**जयतीत्यादि** । चन्द्रमौलिः-सुधांशुशेखरो जयति-सर्वोत्कर्षेण वर्तते । ननु नमस्कार एव विघ्ननिरासकत्वेन प्रसिद्धस्ततः कथं तं परित्यज्य जयतीति प्रयोगः ? उच्यते—जयतीति पदेन सर्वोत्कृष्टता प्रतिपादिता भवति । सर्वोत्कृष्टश्च नमस्कार्य एव । यत्र सर्वोत्कृष्टत्वं तत्र नमस्कार्यत्वमित्यविनाभावादतो जयतीति पदेन नमस्कारप्रतिपत्तिः । नमस्कारेण च प्रबन्धकर्तृव्याख्यातृश्रोतृणामिष्टफलसम्पत्तिः । किम्भूतश्चन्द्रमौलिः ? गिरिसुतायाः-हिमदुहितुः[१] पार्वत्याः सम्बन्धिनि कामसन्तापं वहतीत्येवंशीलं कामसन्तापवाहि तस्मिन् कामसन्तापवाहिनि मनोभवप्रभवपीडां दधाने उरसि-हृदये चन्दनस्यायं चान्दनो रसनिषेक इव सन्तापहरणाद्रोहणद्रुमरसाभिषेक इव यः सः । यथा चन्दनरससेकस्तप्तस्य शान्ति-कृद्भवति तथाऽयमपि कामाभितप्तगिरिजाहृदयस्य शान्तिकृत् । रसा निषिच्यन्तेऽस्मिन्निति रसनिषेको रसाधार इत्यप्येकदेशेन प्रतिपत्तव्यम् । रसाश्च—शृङ्गारादयो नव, तांश्च कवय एव व्यक्तीकर्तुं भविष्णवः[२] । अतस्तदनु तस्य रसाधारस्य भगवतो अनुपश्चाद् रसव्यक्ति-कारणभूतानां कवीनां-वाल्मीकिव्यासकालिदासप्रभृतीनां वाचां विलासा वाग्विलासाः-वचो वैचित्र्यो विजयन्ते । किम्भूतानां कवीनां ? कीर्तिं-यशो भजन्तीति कीर्तिभाजस्तेषां यशस्विनाम् । किम्भूता वाग्विलासाः ? असकृद्-अजस्रं अमृतबिन्दून् तत्समानान् रसातिरेकान् स्यन्दन्ते-स्रवन्तीति अमृतबिन्दुस्यन्दिनः-निरन्तररसाविष्कारिणः । असौ हि भगवान् जगत्कर्तृत्वात् जगतोऽप्यादिरलौकिके[३]पदमध्यास्ते । अतस्तस्य पश्चाद् ये लौकिकभावा रम्यस्वभावास्तदपेक्षयैव वाग्विलासानां विशेषजयः । अथवा वाग्विलासा विजयन्त इति स एव भगवान् शब्दब्रह्मस्वरूपः सकलस्याऽपि जगतोऽसकृदमृतबिन्दु-स्यन्दित्वाद्विशेषेण जयति । यतो मूर्त्तया[४] एकस्या एव गौर्या उरसि तथा चान्दन एव रसनिषेक इति व्यतिरेकः ।

अत्र च प्रथमार्द्धप्रतिपादितेनार्थेन वक्ष्यमाणप्रबन्धार्थो द्योत्यते । तथाहि—गिरिः-भीमः **"गिरिर्भीमनृपे सूर्ये स्वभावे पर्वते जले"** [   ] इत्युक्तेस्तस्य सुताया-दमयन्त्याः दुर्वारस्मारविकारसन्तप्ते उरसि नलश्चन्दनरसनिषेको भविष्यति, स च चन्द्रवंश्यानां मौलिः-

१. हिमाचलदुहितुः अनू० । २. प्रभविष्णवः अनू० से. । ३. अलोकिकं अनू. । ४. मूर्त्त से. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मुकुटायमान इति । यद्यपि "**पूरणगुण०**" [पा०सू० २।२।२१] इत्यादिना षष्ठीसमास-निषेधात्तदन्वित्यत्र समासश्चिन्त्यस्तथापि तदनु तदुपरीत्यादयः शब्दाः ससमासाः महाकविनिबद्धत्वात्साधवः । यद्यप्यन्यतरग्रहणेऽप्यभीष्टसिद्धिस्तथापि स्त्रीपुंसरूपयोर्द्वयोर्ग्रहणं, काव्यस्य शृङ्गाररसनिर्भरत्वद्योतनार्थं, अत्रास्यैव विशेषेण वक्ष्यमाणत्वात् । मालिनी ॥१॥

यश्च जगतः शिवतातिभ्यां★ शिवाभ्यामपि केनाप्यतर्केण हेतुना स्वीकृतः, स किं सहायः ? किं मूलं ? किमुपकरणश्च[1] ? इत्याह—

**जयति मधुसहायः सर्वसंसारवल्ली-**
**जननजरठकन्दः कोऽपि कन्दर्पदेवः ।**
**तदनु पुनरपाङ्गोत्सङ्गसञ्चारितानां,**
**जयति तरुणयोषिल्लोचनानां विलासः ॥२॥**

**जयति मध्वि**त्यादि । कोऽप्यद्भुतवैभवः कन्दर्पदेवो जयति । किम्भूतः ? मधुसहायः-वसन्तसखः, न हि सखायमन्तरेण कश्चिन्महाकार्यकरणाय प्रवर्तते, एतस्यापि कृत्स्नं जगत्साध्यमतो मधुं मित्रमकरोत् । पुनः किम्भूतः ? सर्वा या संसारवल्ली उत्तरोत्तरवृद्धिमत्वाद् भवस्य वल्ल्युपमानम् । तस्या जननाय-उत्पादनाय जरठकन्दः-कठिनकन्दः, कठिनकन्दाद्धि अविच्युता वीरुद्वृद्धिः, तदनु-कन्दर्पदेवानन्तरं[2] तदुत्पाद्यस्तदुत्पादकश्च पुनःपुनः-मुहुर्मुहुः, अपाङ्गोत्सङ्गे-नेत्रोपान्तप्रदेशक्रोडे सञ्चारितानां-कामुकजनलक्षीकरणाय प्रवर्तितानां तरुणयोषिल्लोचनानां-नववयःसुन्दरीनेत्राणां विलासः-कटाक्षादिविभ्रमो जयति । पुनःशब्दो मुहुःशब्दवत् अद्विरुक्तो द्विरुक्तो वाऽभ्यासवृत्तिवचनः । अथवा सकलजगज्जन्तुजातीयाभिप्रेतत्वात् नवस्वपि रसेषु शृङ्गारो मुख्यस्तस्य चाधिष्ठाता कन्दर्पदेवो जयति । तस्य चोत्पाद्योत्पादकत्वेनाविनाभूतत्वात् कान्तानयनविलासो जयति । पुनः-विशेषेणेत्यर्थः । पुनःशब्दो विशेषे । यथा—

"**निःकन्दामरविन्दिनीं स्थपुटितोद्देशाङ्कशेरुस्थलीं**卐,
**जम्बालाविलमम्बुकर्तुमितरासूते वराहीसुतान् ।**
**दंष्ट्रायां पुनरर्णवोर्मिसलिलैराप्लावितायामियं,**
**यस्या एव शिशोः स्थिता वसुमती सा पोत्रिणी पुत्रिणी ॥**"

**[खण्डप्रशस्ति प-२१] मालिनी ॥२॥**

---

१. किमुपकरणश्च काम अनू० । २. कन्दर्पदेवादनन्तरं अनू० ।

★ शिवतातिः-शिवङ्करः । 卐 निम्नोन्नतोद्देशाम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ यदवादि 'तदनु च विजयन्ते वाग्विलासाः' इति तद्गुणानेव श्लोकत्रयेणाह–

**अगाधान्तः परिस्पन्दं[१] विबुधानन्दमन्दिरम् ।**
**वन्दे रसान्तरप्रौढं स्रोतः सारस्वतं वहत् ॥३॥**

**प्रसन्नाः कान्तिहारिण्यो नानाश्लेषविचक्षणाः ।**
**भवन्ति कस्यचित्पुण्यैर्मुखे वाचो गृहे स्त्रियः ॥४॥**

**किं कवेस्तेन काव्येन किं काण्डेन धनुष्मतः ।**
**परस्य हृदये लग्नं न घूर्णयति यच्छिरः ॥ ५॥**

**अगाधेति** । अहं सरस्वती-भारती नदीविशेषश्च तस्या इदं सारस्वतं स्रोतः-प्रवाहं वन्दे-नमस्कुर्वे स्तुवे वा । "**वदि अभिवादनस्तुत्योः**" [पा०धा०-११]% इति धात्वर्थ-निर्देशात् । नदीपक्षे–प्रवाहस्य तद्धर्मत्वान्न किञ्चिद् दुर्घटं परम् । भारतीपक्षे–अन्य-धर्मस्यान्यत्रारोपणलक्षणसमाधिना गिरां नैरन्तर्येऽपि स्रोतः शब्दो, यथा–"**उन्मिमीलकमलं सरसीनां कैरवञ्च निमिमीलमुहूर्तात्**" [ ] इत्यत्रोन्मीलननिमीलने नेत्रधर्मावपि कमलकुमुदयोरारोपिते । किं कुर्वत्? वहत्, भारतीपक्षे–प्रवर्तमानं सदस्यानां पुरः सदोदीर्यमाणत्वात् । नदीपक्षे–प्रसरत् कुण्डादिभिरव्याहतत्वात् । पुनः किम्भूतं ? भारतीपक्षे–अगाधः-महार्थतया अलब्धमध्योऽन्तः-मध्ये प्रकरणान्मनसि परिस्पन्दश्चेतन-श्चमत्कारी स्फूर्तिविशेषो यस्य तत् । नदीपक्षे–अगाधः-गम्भीरः, अन्तर्मध्ये परिसमन्तात् स्पन्दः-चलनं आवर्त्तविशेषो यस्य तत् । तथा गीःपक्षे–विबुधानां-देवानामानन्दमन्दिरं-हर्षस्थानं विबुधानन्दमन्दिरं, भारतीविलासेन सुराणामपि प्रमोदः सम्पद्यते । यद्वा, विबुधानां-पण्डितानामानन्दस्थानम् । नदीपक्षे–वीनां-पक्षिणां बुधाः-राजाहंसास्तेषां हर्षस्थानम्। पुनर्भारतीपक्षे–रसानां शृङ्गारादीनां अन्तरं-विशेषस्तत्र तेन वा प्रौढं-प्रगल्भम् । नदीपक्षे–रसायाः-भूमेरन्तरे-मध्ये प्रवहतिस्मेति प्रौढं, **कर्त्तरि क्तः** । सरस्वती किल म्लेच्छदेशे न्यग्भूय तदन्ते पुनरुद्भवतीति लोकश्रुतिः । **कालिदासोप्यूचे**–"**नदिमिवान्तः सलिलां सरस्वतीं**" [**रघुवंश** ३।९] इति । यद्वा, सरः-पयोऽस्यास्तीति कृत्वा सरस्वतीशब्दो नदीमात्रवचनः । यदने**कार्थः**–

"**सरस्वती सरिद्भिदि ।**
**वाच्यापगायां स्त्रीरत्ने, गोवाग्देवतयोरपि ।**" [४/१३४]
**सरस्तोयतडागयोः ॥**" [स० तृ० ३५]

% अभिवादनं पादयोः प्रणिपातः स्तुतिर्गुणैः प्रशंसा ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति तु **विश्वप्रकाशः** । अतः सारस्वतं नादेयं स्रोतो वन्दे । किम्भूतं ? वहत्-प्रसरत्, पुनः विबुधानां-देवानां जलक्रीडादिभिः प्रमोदसदनं, एतावता स्वर्गमार्गप्रवृत्तं । तदुक्तम्—"**तथा रसायां वसुधायां तथा अन्तरे च**" [ ] श्वभ्रे-अर्थात्पाताले प्रकर्षेणोढं इत्यसाधारणविशेषणसामर्थ्यात् त्रिपथगास्रोत इत्यर्थः । प्रौढमिति "**प्रादूहोढ०**" [ ] इत्यादिना वृद्धिः ॥३॥

**प्रसन्ना** इति । कस्यचिद् विशिष्टभाग्यस्य पुंसः-पुरुषस्य पुण्यैः-श्रेयोभिरीदृग्गुणा मुखे वाचः-वाण्यः, गृहे च स्त्रियो भवन्ति-सम्पद्यन्ते संजायन्ते । कीदृशो[1] वाचः ? नानेति पदं सर्वत्राऽऽकृष्यते । नाना-अनेकधा प्रसन्नाः-प्रसादगुणोपेताः सुबोधा इत्यर्थः । शब्दगुणः प्रसादः ओजो मिश्रितशैथिल्यात्मा, अर्थगुणस्तु प्रसादो वैमल्यं झगिति अवबोधगोचरत्वमिति यावत् । तथा चाह **काव्यप्रकाशकारः**—

**"श्रुतिमात्रेण शब्दानां येनार्थप्रत्ययो भवेत् ।**
**साधारणः समग्राणां स प्रसादो गुणः स्मृतः ॥"** [का० प्र० ८/१०२]

इति । यद्वा, प्रसन्नाः-समासरहिताः । उक्तञ्च—

**"माधुर्यमभिवाञ्छन्तः प्रसादं च सुमेधसः ।**
**समासवन्ति भूयांनि[2] न पदानि प्रयुञ्जते ॥"** [भामहः काव्यलङ्कार २/१]

अन्यत्राप्युक्तम्—

"**बहुसमासवतीवृतिरोजः, असमासवतीवृतिः प्रसादः**"। [ ]

इति । तथा नाना-अनेकधा कान्त्या-कान्तिगुणेन हर्तुं-मनोवशीकर्तुं शीलं यासां ताः कान्तिहारिण्यः । शब्दगुणः—कान्तिरौज्ज्वल्यं ग्राम्यादिभिरनतिप्रयुक्तमिति[3] यावत् । अर्थगुणस्तु—कान्तिर्दीप्तरसत्वं, तथा नाना-अनेकप्रकारं शब्दगुणार्थगुणशब्दालङ्कारार्थालङ्काररूपं चतुर्धा श्लेषं विशेषेण वक्ष्यत इति, नानाश्लेषविचक्षणाः । शब्दगुणो मसृणत्वं श्लेषः, अर्थगुणस्तु श्लेषो घटना, शब्दकृतः शब्दालङ्कार[4]श्लेषः, अर्थकृतस्तु अर्थालङ्कार[5]श्लेषः । आह च **काव्यप्रकाशकारः**-

श्लेषलक्षणम्-**क्रमकौटिल्यानुल्वणत्वोपपत्तियोगरूपघटनात्मा श्लेषः ।**

**[का० प्र० सूत्र ८/१०]**

इति । स्त्रियस्तु प्रसन्नाः-तोषान्विताः, तथा कान्त्या वपुषो गुणविशेषेण मनोज्ञाः,

---

१. कीदृश्यो अनू० । २. भूयांसि अनू० । ३. प्रयुक्तत्वमिति अनू० । ४. शब्दालङ्कारः अनू० । ५. अर्थालङ्कारः अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा विविधे आश्लेषे-आलिङ्गने विचक्षणाः-दक्षाः । आलिङ्गनान्यमूनि द्वादश—स्पृष्टक १, विद्धक २, उद्घृष्ट ३, पीडन ४, लतावेष्टक ५, वृक्षाधिरूढ ६, तिलतण्डुल ७, क्षीरनीर ८, रूपगूढ ९, जघनोपश्लेष १०, स्तनालिङ्गन ११, ललाटिकाख्यानि ॥४॥

**किं कवे**रिति । कवेस्तेन काव्येन किम् ? धनुष्मतः-धानुष्कस्य तेन काण्डेन-शरेण किम् ? न किञ्चिदित्यर्थः । तेनेति केन ? यत्काव्यं काण्डं च परस्य-अन्यस्य श्रोतुः शत्रोश्च हृदये-मनसि[1] वक्षसि च लग्नं-चमत्कृतं मर्मप्रविष्टं च सत् शिरः-मूर्द्धानं न घूर्णयति-न भ्रमयति । शिरोघूर्णनं च हर्षव्यथयोराधिक्याद् भवति । **''हृदयं मानसो रसो''** [यतृ० ६८] इति **विश्वप्रकाशः** । अत्र च काव्यसम्बन्धात् काण्डसम्बन्धाच्च द्वयोरपि कविधनुष्मतोरुपहासपरतया प्रयोगः । अत्र किं शब्दः कुत्सार्थः । यद**नेकार्थः—''किं प्रश्ने कुत्सनेऽपि च ।''** [ परि० १२] काव्यं-सर्गबन्धः[2] ॥५॥

अथ कुकविनिन्दाव्याजेन विपरीतगिरामग्राह्यत्वमाह-

**अप्रगल्भाः पदन्यासे जननीरागहेतवः ।**
**सन्त्येके बहुलालापाः कवयो बालका इव ॥६॥**

**अप्रगल्भा** इत्यादि । एके कवयः बालका इव सन्ति । किम्भूताः कवयः ? पदन्यासे-विभक्त्यन्तं पदं तेषां न्यासे-नैयत्यप्रयोगे अप्रगल्भाः-अनिपुणाः, तथा जनानां-लोकानां[3] नीरागः-रागाभावास्तत्र हेतवः-कारणं । न हि तादृशं काव्यं श्रुत्वा रसिकानां कश्चिच्चमत्कारः संजायते । तथा बहुलालापाः[4] । एतेन निःसारवत् कृत्वोक्तिः ॥१॥

बालकपक्षे—पदन्यासे—चरणक्षेपे अप्रगल्भाः, तथा जनन्याः-मातृ रागहेतवः-अनुरागकारणं, तथा बह्वीं लालां-निष्ठीवनजलं पिबन्तीति बहुलालापाः । यद्वा, बह्व्यो लाला-अप्स्वरूपा येषु ते । **''ऋक्पूरब्धूः पथामनक्षे''** [**पा० सू०** ५/४/७४] इति अप्रत्ययः समासान्तः ॥२॥

अत्र गभीरार्थत्वात् कविभिरन्येप्यर्था उत्प्रेक्ष्यन्ते । तद्यथा-

एके कवय अबालकाः-जराजर्जरितदेहा इव तेऽपि अशक्तत्वात् पदन्यासे अप्रगल्भा एव । तथा जनानां-युवतिलोकानां नीरागं-रागाभावस्तत्र हेतवः । न हि जरद्देहे युवति-जनोऽनुरज्यत इति । तथा निद्रालस्याद्याधिक्येन अबहुल आलापो येषां ते तथाविधाः ॥३॥

---

१. 'मनसि' नास्ति अनू० । २. सर्गसम्बन्धः अनू० । ३. विद्वल्लोकानां अनू० । ४. बहुल आलापो येषां ते बहुलालापाः अनूः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यद्वा, एके-केचन कवयः-जलपक्षिण इव सन्ति, के-जले वयः-कवयः। किम्भूताः ? अरणं आरः "**ऋ गतौ**" [पा० धा० ९२] ये गत्यर्थास्ते प्राप्त्यर्था इति वचनात् आरः-प्राप्तिरार एव आरकः, स्वार्थे कः, रलयोरैक्यात् अप्सु आलकः प्राप्तिर्येषां ते तथा। अतएव पदन्यासे अप्सु प्रगल्भा अप्रगल्भा बकादयः। श्लेषे अक्षरच्युतिश्रवणादयः पलोपः। नीरञ्च अगश्च नीरागौ अजनौ-जनरहितौ नीरागौ स्थित्याद्यर्थं हेतू येषां ते, तथा एकान्तसजलवनस्थायिन इत्यर्थः। तथा अरणं आरो विहा यो गतिर्बहुलस्य आपः[१] प्राप्तिर्येषां ते बहुलालापाः। श्लेषे रलयोरेकत्वश्रवणात्, सपक्षत्वेन बहुलनभोगतयः ॥४॥

यद्वा, एके कवयः वालकाः-ह्रस्वा वाला वालका "**अल्पाख्यायां**" [**पा० सू०** ५/४/१३६] कन्, चूर्णकुन्तला इव सन्ति। ते किम्भूताः ? पदन्यासे-वेणीलक्षणस्थानरचनायां अप्रगल्भाः-असमर्था असंस्कार्यत्वात् तेन जनानां-युवलोकानां रागाभावजनकाः, सपुष्पमालवेणीविन्यासेन बद्धा एव केशा रागजनका इति। तथा अलीनां समूह आलं, पद्मिनीमुखवर्त्तित्वेन कर्णोत्पलनिकटवर्त्तित्वेन वा बहुलः आलस्य-भ्रमरसमूहस्य आपः-प्राप्तिर्येषु ते, पद्मिनीमुखस्य कर्णोत्पलस्य च सुरभित्वात्। यद्वा, बहुलाडे-देशविशेषे आपः-प्राप्तिर्येषां ते, तद्देशे हि अदीर्घा एव केशाः स्युरिति। उलयोरैक्याद् बहुलालापाः ॥५॥

एके[२] अबालकाः-पण्डिताः कस्य-ब्रह्मणो वयः-पक्षिणो राजहंसा इव सन्ति। किम्भूता राजहंसाः ? पदन्यासे-ब्रह्मचरणन्यासे प्रगलतीति[३] प्रगल्, न प्रगल् अप्रगल्, एवं विधा अक्षरा भा-प्रभा येषां ते। ब्रह्मवाहनत्वात्। अतएव जनेषु निश्चितं राजन्ते इति जननीराः,"**क्वचित्**"डः। तथा गो-गमनं तत्र हेतवः विधेर्गमने कारणं। तथा "**लड विलासे**" [**पा० धा०** ३८३] ललनं लालः-विलासः बहुर्लालस्य-लीलाविशेषस्य आपः-प्राप्तिर्येषु ते बहुलालापाः ॥६॥

यद्वा, हे अ !-कृष्ण तव एके कवयः अबालकाः-प्रौढा इव सन्ति। तव इत्यत्र श्लेषाद् विसर्गलोपः। हे प्रगल्भाः। पदन्यासप्रगल्भं धृष्टं प्रकरणाद् बलिं अस्यति—पाताले क्षिपतीति प्रगल्भाः, ईदृग्विधः पदन्यासः-क्रमक्षेपो यस्य स तस्य सम्बोधनम्। तथा इः-कामस्तस्य जननी-लक्ष्मीस्तस्यां रागो यस्य स इजननीरागस्तस्य सम्बुद्धौ इजननीराग !, न विद्यते बहुलस्य-प्रभूतस्य आलस्य-अनर्थस्य आपः-व्याप्तिर्येषु ते। "**आपॢ व्याप्तौ**" [**पा० धा०** १३४२]। अबहुलालापा एतत् कविविशेषणम् ॥७॥

यद्वा, एके कवय अबालका इव सन्ति। किम्भूताः कवयः ? अवत्-विष्णुवत् प्रगल्भाः। क्व ? पदन्यासे-पदरचनायां, यथा तेन पदत्रयेण विश्वत्रयं व्याप्तं तथा कविभिः

१. आरस्य आपः अनू०। २. यद्वा एके अनू०। ३. सति प्रगलतीति अनू०।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्ववचनरचनया, "**णीञ् प्रापणे**" [पा० धा० ९६७] जनान्नयन्ति-सुखं प्रापयन्तीति जनन्यः-राजानस्तेषां रागहेतवः । तथा बहु-अत्यर्थं लान्ति अर्थात् यशो गृह्णन्तीति बहुला, एवं विधा आलापा येषां ते बहुलालापाः ॥८॥

यद्वा, हे एकाम ! तव के कवयः बालका इव सन्ति न केऽपि, त्वां स्तोतुं सर्वेऽपि प्रौढा एवेति भावः । हे आपदन्यासे अप्रगल्भ ! आपदां समूह आपदं तस्य न्यसनं न्यासः-स्थापनं तस्मिन् अप्रगल्भ, सर्वसम्पन्निदानत्वात् । श्लेषाद्विसर्गलोपः । तथा हे जननीराग ! जनानां-कामुकलोकानां निश्चितो रागो यत्रेति, दृष्टिकामस्नेहभेदेन रागस्य त्रिविधत्वात् । बहुलः-सम्भोगविप्रलम्भादिविषय आलापो येषां ते बहुलालापा इति कविविशेषणम् ॥९॥

अथ कारणं विनाऽपि केचित् परोत्कर्षमसहिष्णवस्ततस्[1]तानेव क्षुद्रान् काव्यप्रवृत्ति-भङ्गहेतून् शब्दमात्रेण गौरवयन्नाह—

**अक्षमालापवृत्तिज्ञा कुशासनपरिग्रहा ।**
**ब्राह्मीव दौर्जनी संसद्वन्दनीया समेखला ॥७॥**

**अक्षेति** । दुःनिन्दायाम्, दुष्टाः-कृत्याकृत्यभव्याभव्यविशेषविवेकविकला जना दुर्जनास्तेषामियं दौर्जनीसंसत्-सभा वन्दनीया-नमस्कार्या इत्युपहासवाक्यम् । श्लेषतस्तु वन्दे, गुप्तौ करणीया वन्दनीया । केव ? ब्रह्मणां-विप्राणामियं ब्राह्मी-संसदिव-द्विजसमेव, यथा द्विजसमा वन्द्यते तथा दुर्जनसंसदपि वन्द्या । किम्भूता दौर्जनीसंसत् ? अक्षमया-रुषा य आलापः-सम्भाषणं तस्य वृत्ति-व्यापारं जानातीति अक्षमालापवृत्तिज्ञा-कोपोल्ला-पयुक्वाक्प्रसरा, तथा कुशासनस्य-कुत्सितशिक्षणस्य परिग्रहः-स्वीकारो यस्याः सा कुशासनपरिग्रहा, तथा समे साधावपि खला प्रतिपक्षभूता । असाधौ यदि खला भवति तदा भवतु, परं साधावपि खलेत्यनौचित्यविस्मयमिश्रसमुच्चयार्थोऽपि शब्दः प्रतीयते । किम्भूता द्विजसभा ? अक्षमालायाः-जपमालाया अपवृतिः-भ्रमणं तां जानातीति । तथा कुशस्य-दर्भस्य आसनं-विष्टरस्तस्य परिग्रहः-स्वीकारो यस्याः सा । पवित्रस्य पवित्रत्वात् तदासनमेव तस्या उचितम् । पुनः किम्भूता ? सह मेखलया-मौञ्ज्या वर्तत इति समेखला । ब्राह्मीति "**तस्येदं**" [**पा० सू०** ४/३/१२०] इत्यण् । ब्रह्मण इत्यन्त्यस्वरादि लोपः । "**ब्रह्मा तु तपसि ज्ञाने वेदेऽध्यात्मे द्विजे विधौ ऋत्विग्योगभिदो**" चेत्य**नेकार्थः** [२/२७९] । "**समं साध्वखिलं सदृग्**" इत्य**नेकार्थः** [२/३४४] ॥७॥

---

१. 'ततः' नास्ति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**रोहणं सूक्तरत्नानां[१] वृन्दं[२] वन्दे विपश्चिताम् ।**
**यन्मध्य[३]पतितो नीचः काचोऽप्युच्चैर्मणीयते ॥८॥**

**रोहणमि**ति । अहं विपश्चितां-विदुषां वृन्दं-समूहं वन्दे-नमस्यामि । किम्भूतम् ? शोभनानि-निर्दोषसगुणसरससालङ्काराणि उक्तानि-कथितानि सूक्तानि-सुभाषितानि तान्येव रत्नानि तेषां सूक्तरत्नानां रोहन्त्यस्मिन्निति रोहणं-उत्पत्तिस्थानम् । तन्नमस्करणे हेतुमाह—यस्य विपश्चिद्वृन्दस्य मध्ये पतितः-गतो यन्मध्यपतितः सन् काचोबन्धः-प्रकरणात् काव्यबन्धो नीचोऽपि-अतादृशोऽपि उच्चैः-उत्कृष्टो मणिरिवाचरति स्वप्रबन्धकर्त्तारं भूषयन्मणीयते । विपश्चितो हि कविपरिश्रमं जानन्तोऽतादृशमपि प्रबन्धं व्याख्यानप्रागल्भ्यादनुगृह्योत्कर्षं लम्भयन्ति । कचबन्धे-कच्यन्ते बध्यन्ते "**अनेनार्था अस्मिन्नि**"ति वा घञि [**घञि च भावकरणयोः, पा०सू०** ६।४।२७], काचः-प्रबन्धः । अथ च रोहणं-माणिक्यशैलं स्तौमि, यस्य मध्ये पतितः काचः क्षारमृद्विकारो नीचोऽपि-निकृष्टोऽपि रत्नसांनिध्यान्मणीयते-रत्नायते ॥८॥

आस्तां सज्जनदुर्जनयोः शीलेन साम्यं यावन्मूर्त्यापि महदन्तरमिति निरूपयन्नाह—

**अत्रिजातस्य या मूर्त्तिः शशिनः सज्जनस्य च ।**
**क्व सा वै रात्रिजातस्य तमसो दुर्जनस्य च ॥९॥**

**अत्री**ति । अत्रिमुनिनेत्रजन्मत्वादत्रिजातस्य शशिनः-शशाङ्कस्य, च-पुनः, न त्रिभिर्जातस्येत्यत्रिजातस्य अर्थात्कुलीनस्य सज्जनस्य सतो या मूर्त्तिः-शरीरं अवैरा जगन्मैत्री परावर्तते, सा मूर्त्तिः वै-स्फुटं रात्रिजातस्य-निशासम्भूतस्य तमसः-अन्धकारस्य दुर्जनस्य च त्रिजातस्य-अकुलीनस्य क्व वर्तते ? न क्वापीति । यतो दुर्जनस्य मूर्त्तिर्वैरावैरहेतुः । अत्र श्लेषोक्त्या तलोपः । अथवा शशितमसोः सज्जनदुर्जनयोश्च सहजं वैरमिति, वैराद्धेतोर्दुर्जनस्य क्व सा मूर्त्तिरिति । अथवा दुर्जनस्य मूर्त्तिः क्व अवैरा ? अपितु सर्वत्राऽपि सवैरेत्यर्थः । "**मूर्त्तिः पुनः प्रतिमायां कायकाठिन्ययोरपि**" इत्य**नेकार्थः** [२।१९१] ॥९॥

**निश्चितं ससुरः कोऽपि न कुलीनः समेऽमतिः ।**
**सर्वथासुरसम्बद्धं काव्यं यो नाभिनन्दति ॥१०॥**

**निश्चित**मिति । सुष्ठु रसाः-शृङ्गारादयो यत्र तत् ईदृग्विधं बद्धं-रचितं काव्यं-काव्यग्रन्थं यो नाभिनन्दति-नाभिप्रैति न स्तौतीत्यर्थः । स निश्चितं-ध्रुवं सह सुरया वर्तत

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति कृत्वा ससुरः-मद्यपः कोऽपि न[१] कुलीनः-नाभिजातः । पुनः सर्वथा सर्वेणाऽपि प्रकारेण समे-साधावमतिः सर्वथा साधुविषयां मतिमिच्छां सेवनादिरूपां न करोतीत्यर्थः । अथ च असुरैः सम्बद्धं-मिलितं असुरसम्बद्धं काव्यं-शुक्रमभिलक्षीकृत्य यो न नन्दति-न हृष्यति स सुरः-देवः कोऽपि । तथा न कौ-भूम्यां लीनः-आश्लिष्टः स्वर्ग एव तस्यावस्थानात् । तथा मा-लक्ष्मीः, इः-कामस्ताभ्यां सह वर्तत इति समेः विष्णुस्तत्र सेवनाय मतिर्यस्य स समेमतिर्विष्णुपक्षीय इत्यर्थः ॥१०॥

सम्प्रति वाग्विलासाधारानुदारान् वाल्मीकिप्रभृतीन् कतिचित् कवीन् वर्णयन्नाह–

**सदूषणापि निर्दोषा सखरापि सकोमला ।**
**तस्मै[१] नमः कृता येन रम्या रामायणी कथा ॥११॥**

**सदूषणे**ति । तस्मै श्री**वाल्मीकिमुनये** नमः । तस्मै इति कस्मै ? येन-कविना रम्या-शब्दार्थदोषरहितत्वाद् रमणीया रामायणीकथा चतुर्विंशतिसहस्रप्रमाणा कृता-विदधे । किम्भूता कथा ? दूषणखरौ राक्षसौ, सह दूषणेन वर्तत इति सदूषणा, तथा निर्दोषा-दोषरहिता । पुनः सह खरेण वर्तत इति सखरा, दूषणखरयोरत्र वध्यत्वेन प्रणीतत्वात् । तथा सह कोमलत्वेन-मृदुत्वेन वर्तत इति सकोमला-माधुर्यगुणोपेतेत्यर्थः, अपिः-विरोधे । स च दूषणखरयोर्दोषार्थकठिनार्थत्वे भवेत्, कथं या सदूषणा-सदोषा भवति सा निर्दोषा-अपगतदूषणा कथं स्यात् ? तथा सह खरेण-खरत्वेन वर्तत इति सखरा, या सखरा भवेत् सा सकोमला कथं भवेदिति विरोधः । समाधिस्तु प्रागेवोक्तः । कोमलशब्दः खरशब्दश्च जललवणादिवत् भावप्रधानत्वेन ग्राह्याः । इहानुक्तोऽपि वाल्मीकिः प्रतीयते । प्रौढः[२] विशेषणप्रयोगाद्विशेष्यप्रतिपत्तिरिति वचनात् । किञ्चासौ भगवान् मर्त्यलोके काव्यसृष्टि-प्रथमवेधा निरुपमरामायणीयकरामायणनिर्माणप्रवीणतयैव निर्दिश्यमानः प्रकृष्यते, नत्वितरसाधारणसंज्ञामात्रनिर्देशेन । अत एव कविनोत्कर्षचमत्कृतेन वाक्यसमाप्तिं प्रतीक्षितुमक्षमेण त्रिविक्रमेण वाक्यगर्भेऽपि तस्मै नमः इति भक्तिप्रकर्षप्रकाशनमुक्तम् । **अर्धयोर्व्यत्यासपाठे** तु गर्भितदोषशङ्कैव न स्यात् । नमस्तस्मै कृतेन्त्यपदद्वयस्यादावुपन्यासे सदूषणेत्यादिदलनस्य चान्ते न्यासेन तद्दोषसम्भव इति भावः । नम इति पदस्य पूर्वमेव न्यासात् रामोऽय्यते-ज्ञायते ऽस्यामिति रामायणी । "**अधिकरणे ल्युट्, स्वरात्कृतश्च**" इति णत्वम् ॥११॥

---

१. न च अनू० । २. प्रौढ अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किञ्च–

**व्यासः क्षमाभृतां श्रेष्ठो वन्द्यः स हिमवानिव ।**
**सृष्टा गौरीदृशी येन भवे विस्तारिभारता ॥१२॥**

**व्यास** इति । स व्यासः-कृष्णद्वैपायनाख्यो नमस्कार्यः[१] । स इति कः ? येन कविना ईदृशी-सर्वत्रख्याता भवे-संसारे गौः-वाक् सृष्टा-निर्मिता । किम्भूता ? विस्तारि-विस्तरणशीलं भारतं यस्यां सा विस्तारिभारता । किम्भूतो व्यासः ? क्षमाभृतां-क्षमां बिभ्रतीति क्षमाभृतस्तेषां, क्षान्तानां मध्ये श्रेष्ठः-अतिशयेन प्रशस्यः । क इव ? हिमवानिव, यथा हिमवान् वन्द्यते गौरीपितृत्वात् । स च कीदृशः ? क्षमाभृतां-भूधराणां मध्ये श्रेष्ठः-श्रेयान्, तथा येन हिमवता भवे-शिवे रता-अनुरक्ता ईदृशी विश्वविख्याता गौरी-पार्वती निर्मिता । कीदृशी ? विस्तारिणी भा-दीप्तिर्यस्याः सा विस्तारिभा । भरतान्-भरतवंशोद्भवान् युधिष्ठिरादीनधिकृत्य कृतं शास्त्रं भारतं सपादलक्षप्रमाणम् । "**क्षमा शान्तिः[२] क्षोणी च**" [अने० २/३२१] "**भवः सत्ताप्तिजन्मसु । रुद्रे श्रेयसि संसारे" इत्यनेकार्थः** [२/५४५] । "**गौरुदके दृशि । स्वर्गे दिशि पशौ रश्मौ, वज्रे भूमाविषौ गिरि**" **इत्यनेकार्थः** [१/६]॥१२॥

**कर्णान्तविभ्रमभ्रान्तकृष्णार्जुनविलोचना ।**
**करोति कस्य नाह्लादं कथा कान्तेव भारती ॥१३॥**

**कर्णान्ते**ति । भारती-भरतान्वयसम्भूतयुधिष्ठिरादिवृत्तसम्बद्धा कथा कस्य न आह्लादं-आनन्दं करोति ? अपितु सर्वस्य[३] करोतीत्यर्थः । किम्भूता भारतीकथा ? कर्णस्य-राधेयस्य अन्ते-विनाशे सति विभ्रमेण-विस्मयेन वेः-पक्षिणो गरुडस्य भ्रमेण वा अतिलाघवेन भ्रान्ता-विचरितुं प्रवृत्ताः कृष्णार्जुनविलोचना-वासुदेवपार्थधृतराष्ट्रा यस्यां सा कर्णान्तविभ्रमभ्रान्तकृष्णार्जुनविलोचना तेषां, तत्र प्रबन्धेनाख्यानात् । केव ? कान्तेव-सुन्दरीव, यथा कान्ता सर्वस्याऽऽह्लादं करोति । किम्भूता ? कर्णान्ते-श्रवणपर्यन्ते यो विभ्रमः-विलासस्तेन भ्रान्ते साचिविलोकनाय स्फुरिते कृष्णार्जुने-श्यामवलक्षे विलोचने-नेत्रे यस्याः सा तथाविधा । यद्वा, कर्णान्ते-श्रवणपर्यन्तगामिनी विभ्रमे[४] भ्रान्ते कृष्णार्जुने च विलोचने यस्याः भरतानधिकृत्य कृता भारती । "**अधिकृत्य कृते[५] ग्रन्थे**" [पा० सू० ४।३।८७] इत्यण् ॥१३॥

---

१. वन्द्यः-नमस्कार्यः अनू० । २. क्षान्तिः अनू० । ३. सर्वस्यापि अनू० । ४. विभ्रमभान्ते अनू० । ५. 'कृते' नास्ति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**शश्वद्बाणद्वितीयेन नमदाकारधारिणा ।**
**धनुषेव गुणाढ्येन निःशेषो रञ्जितो जनः ॥१४॥**

**शश्व**दिति । **गुणाढ्ये**न-बृहत्कथाकारेण निःशेषः-सर्वोऽपि[१] जनो रञ्जितः-आवर्जितः प्रमोदं प्रापितः । किम्भूतेन ? **बाणः** कविर्द्वितीयो यस्य स तेन । पूर्वं गुणाढ्येन पश्चाद् द्वितीयेन बाणेन चेति भावः । पुनः किम्भूतेन ? शश्वत्-निरन्तरं न मदाकारं-स्तब्धत्वादिरूपं धरतीत्येवं शीलो मदाकारधारी तेन मदाकारधारिणा किन्त्वगर्वेण । "**अनित्यः समासविधिः**" इति वचनादत्र नञा न समासः । केनेव ? धनुषेव, यथा धनुषा बाणः-शरो द्वितीयो यस्य तत्तेन आकृष्टबाणेन शश्वद् अनिशं अरं-अत्यर्थं निःशेषः-सकलो जनः प्रतिपक्षलोको जितः[२] । किम्भूतेन ? गुणः-ज्या तेन आढ्येन-समृद्धेन आरोपित-प्रत्यञ्चेनेत्यर्थः । तथा नमन् य आकारस्तद्धारिणा तद्बिभ्रता, अन्यथा बाणमुक्तेः ॥१४॥

इदानीं कविवर्णनं संक्षिपन्नाह—

**इत्थं काव्यकथाकथानकरसैरेषां कवीनाममी,**
**विद्वांसः परिपूर्णकर्णहृदयाः कुम्भाः पयोभिर्यथा ।**
**वाचो वाच्यविवेकविक्लवधियामीदृग्विधा मादृशां,**
**लप्स्यन्ते क्व किलावकाशमथवा सर्वंसहाः सूरयः ॥१५॥**

**इत्थ**मिति । इत्थं-उक्तप्रकारेण एषां-वाल्मीकिप्रभृतीनां कवीनां काव्यं-सर्गबन्धः विचित्रविस्तीर्णवस्तुरसग्रथिता वृत्तोत्पाद्या वा कथा । महापुरुषप्रतिबद्धमुपदेशरूपं संक्षिप्त-वृत्तग्रथितं कथानकं तेषां ये रसाः-शृङ्गारादयस्तैः काव्यकथानकरसैः, अमी-ऐदंयुगीना विद्वांसः कर्णौ च हृदयञ्च कर्णहृदयम् । "**द्वन्द्वश्च प्राणितूर्यसेनाङ्गानां**" [पा० सू० २।४।२] इति द्वन्द्वैकवद्भावः । परिपूर्णं-सामस्त्येनाभितं कर्णहृदयं येषां ते परिपूर्णकर्णहृदयाः सन्ति । अतो वाच्यस्यार्थस्य विवेके-सदसद्व्यक्तौ विक्लवाः अधीरा धीः-बुद्धिर्येषां ते तेषां, अभिधेयविरचनविधुरशेमुषीणां मादृशां-अतत्त्वज्ञानां [३]ईदृशाश्चेतश्चमत्कारकरणापटवो वाचः-वाण्यः किल क्वावकाशं लप्स्यन्ते—प्राप्स्यन्ति स्थानाभावात् । क्व किलेत्य-सम्भावने । गिरां ह्यवकाशः कर्णयोर्हृदये वा, तच्च द्वयमाद्यकविवचोभिरेवोभितमतः क्वावकाशः । कैः के इव ? पयोभिः कुम्भा इव, यता पयोभिः परिपूर्णकण्ठोदराः कुम्भा नेतरस्य पानीयस्याव-काशं लभन्ते । इवार्थे यथाशब्दः । तर्हि किं कथाग्रथनप्रयत्नेनेत्या-

१. सर्वो अनू० । २. जितः पराभूतः अनू० । ३. ईदृग्विधाः अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शंक्याह—अथवेति उपायस्मरणगर्भे, पक्षान्तरे सूरयः-विद्वांसः सर्वं सहन्ते इति सर्वंसहाः तस्मादस्मादृशामपि गिरः सहिष्यन्ते, अस्माद् गिरोऽपि कर्णहृदयेऽवकाशं लप्स्यन्त इत्यर्थः । औद्धत्य-परिहारोऽयं । सर्वंसहा इति पूः "**सर्वयोर्दारिसहोः**" [ ] इति सर्वशब्दे सहेः खच्, खित्वान्मुमागमः ॥१५॥

भङ्गश्लेषमुक्तिविशेषणं संवृण्वन्नाह—

**वाचः काठिन्यमायान्ति भङ्गश्लेषविशेषतः ।**
**नोद्वेगस्तत्र कर्त्तव्यो यस्मान्नैको रसः कवेः ॥१६॥**

**वाच** इति । वाचः-गिरो भङ्गश्लेषविशेषतः-भङ्गश्लेषातिशयेन काठिन्यं-कार्कश्यं आयान्ति-प्राप्नुवन्ति । ततोऽन्तरान्तरा निबध्यमाने, तत्र भङ्गश्लेषे नोद्वेगः कर्तव्यः-नोद्विजितव्यम् । यस्माद्धेतोः कवेः-काव्यकर्त्तुः नैको रसः-नैका रुचिः प्रसत्ति-लक्षणाव्युत्पत्तिलक्षणाप्यस्ति ॥१६॥

ननु प्रसत्तिमार्गेण कोमलमेव काव्यं निबध्यतां किमितरेण व्युत्पत्तिमार्गेण भङ्ग-श्लेषकृतकाठिन्येनोद्वेगहेतुना ? इत्याह—

**काव्यस्याम्रफलस्येव[1] कोमलस्येतरस्य च ।**
**बन्धच्छायाविशेषेण रसोऽप्यन्यादृशो भवेत् ॥१७॥**

**काव्यस्ये**ति । कोमलस्य-प्रसन्नस्य इतरस्य-व्युत्पन्नस्य च काव्यस्य बन्धच्छाया-विशेषेण-रचनाचारुत्वेन रसोऽपि-शृङ्गारादिरपि अनन्यरूपोप्यन्यादृशोऽन्यरूपो व्युत्पत्तिचर्चया सोत्कर्षः स्यात् । इतरभाजनस्थक्षीराद्-रत्नभाजनस्थक्षीरवत् । अपिः संभावने । कस्येव ? आम्रफलस्येव, यथा आम्रफलस्य कोमलस्य-अपरिणतस्य इतरस्य च-परिणतस्य बन्धस्य-वृत्तस्य छायायाश्च-नीलपीतादिरूपाया विशेषेण यावद् रसः स्वादोऽप्यन्यादृक् स्यात् । आस्ताम् आकारवैसदृश्यं । आकारवैसदृश्यं तु बन्धच्छायाविशेषेण भवत्येवेत्यर्थः बध्यते अनेनेति कृत्वा बन्धो वृत्तं । यद्वा फलारम्भकरसकणिकारूपो बन्धः । काव्यपक्षे बन्धः-रचना ॥१७॥

अथ ग्रन्थकृत्स्वान्वयवर्णनामाह—

**अस्ति समस्तमुनिमनुजवृन्दवृन्दारक[2]वन्दनीयपादारविन्दस्य भगवतो विधेर्विश्वव्यापिव्यापारपारवश्यादवतीर्णस्य संसारचक्रे क्रतुक्रियाकाण्ड-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**शौण्डस्य शाण्डिल्यनाम्नो महर्षेर्वंशः[१] ।**

**श्रूयन्ते च तत्र[२] श्रवणोचिताश्चन्दनपल्लवा इव[३] केचिदनूचानाः शुचयः[४] सत्यवाचो[५] विरञ्चिवर्चसोऽर्चनीयाचारा ब्रह्मविदो ब्राह्मणाः । पुण्यजनाश्च न च ये लङ्कापुरुषाः, ससूत्राश्च[६] न च ये लम्पटाः, प्रसिद्धाश्च न च ये लम्पाकाः, कामवर्षाश्च न च ये लङ्घनाः सन्मार्गस्य, नववयसोऽपि न च ये लम्बालकाः, महाभारतिकाश्च न च ये रङ्गोपजीविनः, सेविताऽप्सरसोऽपि न च ये रम्भयान्विताः । किम्बहुना—**

**अस्ति समस्ते**त्यादि । **शाण्डिल्य**नाम्नो महर्षेर्वंशः-अन्वयोऽस्ति-विद्यते इत्यन्वयः। किम्भूतस्य महर्षेः ? समस्ता ये मुनयः-वाचंयमाः मनुजानां-मनुष्याणां यद् वृन्दं-कदम्बकं वृन्दारकाः-देवास्ततो द्वन्द्वे समस्तमुनिमनुजवृन्दवृन्दारकास्तेषां वन्दनीये-नमस्करणीये पादारविन्दे-चरणाब्जे यस्य स तथा तस्य । तथा भगवतः-समग्रैश्वर्यादि-गुणयुक्तस्य विधेः-ब्रह्मणो विश्वव्यापी-जगद्व्यापनशीलो यो व्यापारः-करणप्रयत्नस्तस्य यत्पारवश्यं-पारतन्त्र्यं तस्माद् विश्वव्यापिव्यापारपारवश्यात्, संसारचक्रे-भूमण्डले अवतीर्णस्य-प्राप्तजन्मनः । तथा क्रतुक्रियाणां-यज्ञकर्म्माणां यत् काण्डं-कलापस्तेन शौण्डः-विख्यातस्तस्य क्रतुक्रिया-काण्डशौण्डस्य । यज्ञश्च लोकानां शान्तिकृदसौ च यज्ञक्रियाकलापप्रसक्तस्ततोऽयं प्रजाशान्त्यै प्रजासृजा सृष्ट इति भावः । **"काण्डं नालेऽधमे वर्गे"** इत्य**नेकार्थः** [२।११३] । **"शौण्डो विख्यातमत्तयोः"** इत्य**नेकार्थः** [२।१३०] ।

तत्र-शाण्डिल्यनाम्नो★ महर्षेर्वंशे केचित् अनुचानाः-श्रोत्रियाः साङ्गवेदशास्त्राध्येतारो ब्राह्मणाः-ब्रह्ममुखोद्भवाः श्रूयन्ते । किम्भूताः ? श्रवणे-आकर्णने उचिताः-योग्याः पुण्यरूपत्वात्तेषां नामापि श्रोतव्यमिति भावः । क इव ? चन्दनपल्लवा इव । तेऽपि श्रवणोचिताः-कर्णयोरवतंसीकरणाय योग्याः । पुनः किम्भूताः ? शुचयः-जन्मकर्मादिभिः पवित्राः, तथा सत्यं-अवितथं वचो येषां ते सत्यवचसः-सूनृतभाषिणः तथा विरिञ्चेः-ब्रह्मणो वर्चः-तेजो येषु ते विरिञ्चिवर्चसः, ब्रह्मणः समुद्भूतत्वात् । **"वर्चस्तु तेजसि । ग्रथे रूपे"** इत्य**नेकार्थः** [२।१०३] वर्चस् शब्दस्य लोकानुगृहीतत्वाच्छिवलिङ्गादिवन्ना-श्लीलत्वम् । पुनः किम्भूताः ? अर्चनीयः-अभ्यर्च्य आचारः-अनुष्ठानं येषां ते अर्चनीयाचाराः । पुनः ब्रह्म-अध्यात्मं विदन्तीति ब्रह्मविदः । यद**नेकार्थः**-**"ब्रह्मा तु**

---

★ शाण्डिल्यस्यापत्यं शाण्डिल्यः, "गर्गादित्वाद् घञ्" "शाण्डिल्ये साधुर्वा" **इत्यनेकार्थवृत्तौ** ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तपसि ज्ञाने वेदेऽध्यात्मे द्विजे विधौ । ऋत्विग्योगभिदोश्चेति ।**" [२।२७९]

अथ तेषामेव वर्णनप्रक्रमे विरोधमुखेन तान् स्तुवन्नाह—

किम्भूतास्ते ? पुण्याः-पवित्रा जनाः-लोकाः पुण्यजनाः, अलं-अत्यर्थं, न च ये कापुरुषाः-कुत्सितपुरुषाः, सत्पुरुषा इत्यर्थः । न चेति सामुदायिको निषेधार्थो निपातः । तथा सह सूत्रेण-उपवीतेन वेदपाठेन वा वर्तन्त इति ससूत्राः, न च ये लम्पटाः-लालसाः, अतितृष्णारहिता इत्यर्थः । "**लम्पटं लालसं विदुः**" [२।३५३] इति **हलायुधः** । तथा प्रसिद्धाश्च-लोकविख्याताः, न च ये लम्पाकाः-लम्पटाः । "**लम्पाको लम्पटे देशे**" इत्य**नेकार्थः** [३।९०] । तथा कामं-अभिलषितं वर्षन्ति-ददतीति कामवर्षा-ईप्सितदायिनः, न च ये सन्मार्गस्य लङ्घनाः, लङ्घयन्ति-अतिक्रामन्तीति लङ्घनाः, सन्मार्गप्रवर्तका इत्यर्थः । तथा नवं-तारुण्यलक्षणं वयः-अवस्था येषां ते नववयसस्तथाविधा अपि न च ये लम्बाः-दीर्घाः अलकाः-कचा येषां ते लम्बालकाः, यायजूकत्वेन तेषामदीर्घा एव केशा भवन्ति । तथा भारतं-व्यासोक्तशास्त्रं व्याख्यानावसरे आहुरिति भारतिका, महान्तश्च ते भारतिकाश्च-महाभारतिकाः । आहेत्यर्थे प्रभूतादिभ्य उपसंख्यानम् [**आहौ प्रभूतादिभ्यः, पा० वा०** २७०] ठक् । तथाविधाश्च न च ये अरं-अत्यर्थं गोपः-नृपस्तेन जीवन्ति-वृत्तिं कुर्वन्तीति गोपजीविनः नृपदत्तप्रतिग्रहधनेनाजीविकां कुर्वते । नृपात् प्रतिग्रहो दोषाय । यदुक्तम्-

"**यो राज्ञः प्रतिगृह्णाति लुब्धादुच्छास्त्रवर्तिनः ।**
**स याति नरकान् घोरान् स पुत्रपशुबान्धवः ।**" [ ]

तथा अप्प्रधानानि सरांसि अप्सरांसि, सेवितानि अप्सरांसि यैस्ते सेविताप्स-रसस्तथाविधा अपि न च ये अरं-अत्यर्थं भयान्विताः-समयाः । इति तेषां स्तुतिपक्षः ।

अथ विरोधो दर्श्यते-ये पुण्य नाः-राक्षसास्ते कथं न लङ्कोद्भवाः ? अपितु लङ्कोद्भवा एव ते स्युः । तथा ये सहसूत्रेण-तन्तुना विद्यन्त इति ससूत्राः ते अलं-अत्यर्थं कथं न पटाः-वासांसि अपितु पटा एव, तन्मयत्वात् तेषां । तथा ये प्रकर्षेण सिद्धाः-अग्निसंस्कारेण निष्ठां प्राप्ताः पूपाद्यास्ते कथं अलं न पाकाः-पच्यन्ते स्मेति पाकाः, "**कर्मणि घञ्**" । तथा ये कामेन-इच्छया वर्षन्ति-पानीयं क्षरन्ति ये ते कामवर्षास्ते कथं अलं-अत्यर्थं घनाः-मेघा न भवन्ति । तथा ये नववयसस्ते कथं न अलम्बालकाः-शिशवः । तथा ये भरतः-नाट्यभेदः शिल्पमेषामिति भारतिकाः, महान्तश्च ते भारतिकाश्च महाभारतिकास्ते कथं न रङ्गः-नृत्यभूमिस्तेन उपजीवन्तीति रङ्गोपजीविनः, नृत्यभूमौ नृत्यकरणेनैव तेषां वृत्तेः । तथा ये सेविता-मुक्ता अप्सरसः-देवांगना यैस्ते सेविताप्सरसस्ते कथं न रम्भयान्विताः-रम्भाख्याप्सरोन्विताः । अप्सरः शब्दो जातिवचनो जात्या च ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रम्भापि व्यासेति निषिध्यते । इति विरोधस्तत्परिहारस्तु पूर्वपक्षव्याख्यान एवोक्त इति ।

एवं ते सकलगुणगरिष्ठाः शिष्टा आकर्ण्यन्ते । किम्बहुना-किं बहूक्त्या । अस्मादृशास्तेषां कियतो गुणान् वक्तुं क्षमा भवन्तीत्यर्थः । यतः–

**जानन्ति हि गुणान्वक्तुं तद्विधा एव तादृशाम् ।**
**वेत्ति विश्वम्भरा भारं गिरीणां गरिमाश्रयम् ॥१८॥**

**जानन्ती**ति । हिः-निश्चयेन तद्विधा एव-तत्तुल्य गुणा एव, तादृशानां तत्तुल्यगुणानां अनूचानां गुणान् वक्तुं जानन्ति-विदन्ति, न तु मादृशा अतत्तुल्यगुणाः । एतदेव दृष्टान्तेन द्रढयति–गरिम्णः-दुर्वहत्वस्य आश्रयो गरिमाश्रयस्तं, गिरीणां-पर्वतानां भारं विश्वम्भरैव वेत्ति-जानाति, नान्यः । विश्वम्भरेति विश्वं बिभर्तीति साभिप्रायं पदम् ॥१८॥

**तेषां वंशे विशदयशसां[1] श्रीधरस्यात्मजोऽभू-**
**न्नेमादित्यः[2] स्वमति[3]विकसद्वेदविद्याविवेकः ।**
**उत्कल्लोलां दिशि दिशि जनाः कीर्त्तिपीयूषसिन्धुं,**
**यस्याद्यापि श्रवणपुटकैः कूणिताक्षाः पिबन्ति ॥१९॥**

**तेषा**मिति । तेषां-अनूचानां वंशे **श्रीधरस्य**-श्रीधराचार्यस्य आत्मजः-पुत्रो **नेमादित्यो**ऽभूत् । किम्भूतानां तेषाम् ? विशदं-निर्मलं यशः-कीर्त्तिर्येषां ते तेषां विशदयशसाम् । किम्भूतो नेमादित्यः ? स्वमतौ-स्वबुद्धौ विकसन्-उल्लसन् वेदविद्यानां-वेदशास्त्राणां विवेकः-[1]स्वपक्षनिक्षेपणलक्षणं विवेचनं यस्य स स्वमतिविकसद्वेद-विद्याविवेकः । यस्य नेमादित्यस्य जना अद्यापि दिशि दिशीति-सर्वदिक्षु उत्कल्लोलां-उल्लासवतीं कीर्त्तिरेव पीयूषसिन्धुः-सुधासरित् औज्ज्वल्यप्रसारित्वसाम्यात् तां कीर्त्तिपीयूषसिन्धुं श्रवणान्येव-श्रोत्राण्येव पुटकाः-पानपात्राणि तैः श्रवणपुटकैः कूणिताक्षाः-श्रवणसुखात् किञ्चिन्मीलितनेत्राः पिबन्ति-धयन्ति । अद्यापि लोकास्तद्यशः शृण्वन्तीत्यर्थः । सिन्धुरुत्कल्लोला ऊर्ध्ववीचिः पुटकैः पीयत एवेति छायार्थः । मन्दाक्रान्ता ॥१९॥

अथ दमयन्तीकथाकर्त्ता कविः स्वनिन्दागर्भितं स्वाभिधानमाह–

**तैस्तैरात्मगुणैर्येन त्रिलोक्यास्तिलकायितम् ।**
**तस्मादस्मि सुतो जातो जाड्यपात्रं त्रिविक्रमः ॥२०॥**

---

१. स्वस्वपक्षः अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तैस्तै**रिति । तस्मात्-नेमादित्यात् अस्मि-अहं **त्रिविक्रमाख्यः** सुतो जातः-अभूवम् । किम्भूतोऽहम् ? जाड्यस्य-मूर्खत्वस्य पात्रं-आधारो जाड्यपात्रं, आविष्टलिङ्गोऽयम् । तस्मादिति कस्मात् ? येन-नेमादित्येन तैस्तैः-अद्भुतैः, आत्मनः-स्वस्य गुणाः गम्भीरत्वादयस्तैरात्मगुणैः, त्रयाणां लोकानां समाहारस्त्रिलोकी तस्यास्तिलकमिवाचरितं तिलकायितम् । गुणैः कृत्वा सर्वेष्वपि मुख्यो जात इत्यर्थः । "**अस्मीत्यव्ययमस्मदर्थानुवादे**" इति **त्रिलोचनदासः** [कातन्त्रवृत्तिपंजिका] । अस्मीत्यव्ययं अहमित्यर्थे★ अह[१]मित्यस्मत्प्रयोगोऽनुक्तोऽपि ग्राह्यस्ततोऽहं जातोऽस्मीति प्रयोगः[२] । अत्र जातोऽस्मीति "**धातुसम्बन्धे प्रत्ययाः**" [पा० सू० ३।४।१] इति वर्त्तमाने क्तः[३] ॥२०॥

**सोऽहं हंसायितुं मोहाद् बकः पङ्गुर्यथेच्छति ।**
**मन्दधीस्तद्वदिच्छामि कविवृन्दारकायितुम् ॥२१॥**

**सोह**मिति । यथा मोहाद्-अज्ञानाद् गतिमानपि बकः स्वभावसुभगगतेर्हंसस्यापेक्षया पङ्गुरिव पङ्गुः । अथवा देवात् कथञ्चिद्भग्नचरणत्वात् पंगुः हंस इवाचरितुं हंसायितुं इच्छति-वाञ्छति । यथा हंसो लीलया गच्छति तथाऽहमपि यामीत्येवं मोहाद्वष्टि, तद्वत् पङ्गुबकवत् सोऽहं-जाड्यपात्रं त्रिविक्रमः मोहात् मन्दधीः-अल्पबुद्धिः सन् कविषु वृन्दारक इव-श्रेष्ठ इवाचरितुं कविवृन्दारकायितुमिच्छामि । जाड्यपात्रस्य मम तत्साम्यमपि दुःप्रापम्, क्व पुनस्तच्छ्रेष्ठत्वम् । परं तदिच्छायां मोहविलसितमेव बीजम् । अत्रैकक्रियाया द्विप्रयोगो न दोषाय भिन्नाधिकारित्वात् । "**वृन्दारको मनोरमे । सुरश्रेष्ठे**" [४।३४-३५] इत्य**नेकार्थः** ॥२१॥

**भङ्गश्लेषकथाबन्धं दुष्करं कुर्वता मया ।**
**दुर्गस्तरीतुमारब्धो बाहुभ्यामम्भसां पतिः[१] ॥२२॥**

**भङ्गे**ति । मया-त्रिविक्रमेण दुष्करं-कर्त्तुमशक्यं भङ्गश्लेषेण प्रधानो यः कथाबन्धः-कथारचना भङ्गश्लेषकथाबन्धस्तं, कुर्वता-विदधता दुःखेन गम्यतेऽत्रेति दुर्गो गन्तुमशक्यो अम्भसां पतिः-समुद्रः बाहुभ्यां-भुजाभ्यां तरीतुं-लंघयितुमारब्धः । यथा बाहुभ्यां दुस्तरः

---

★ अत्रायं भावो विशेष्याय, अस्मीति आख्यातपदवाच्यायाः क्रियायाः प्राधान्यात् स्वकाल एवावस्थाविशेषणभूतायास्तु क्रियाया उपलक्षणभावेनोपादानाद् भाविभूतव्यपदेशविषयताप्रतिपादनाज्जात इत्यस्या वर्तमानत्वव्यपदेश इत्यर्थः ।

१. यद्वा अहं अनू० । २. क्रियाप्रयोगः अनू० । ३. 'इति वर्तमाने क्तः' स्थाने इति भूते लट् साधुः अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

समुद्रस्तथा भङ्गश्लेषकथाबन्धोऽपि दुष्करः, इत्यौपम्याद्वस्तुसम्बन्धः । "**अभवद्वस्तु-सम्बन्ध उपमा परिकल्पकः**" [काव्यप्रकाश १०।९७] ॥२२॥

अथ खलानां निन्दाभिधानपुरस्सरं स्वकृतकाव्यस्य बह्वायाससाध्यत्वमाह—

**उत्फुल्लगल्लैरालापा:[१] क्रियन्ते दुर्मुखैः सुखम् ।**
**जानाति हि पुनः सम्यक्कविरेव कवेः श्रमम् ॥२३॥**

**उत्फुल्ले**ति । दुष्टमुखैः-दुर्मुखै मुखरैः, उत्फुल्लौ-दुष्टकथनाय विकसितौ उत्कटौ वा, गल्लौ-गण्डौ येषां ते उत्फुल्लगल्लास्तैस्तथाविधैः सद्भिः सुखं लीलया आलापाः किमेतत् कृतं काव्यं स्तूयते ? त एव भङ्गश्लेषाद् या अन्यत्राऽपि दृश्यन्तेऽतः परगृहसर्वस्व-मेतदित्येवंरूपाणि निन्दाकराणि वाक्यानि क्रियन्ते । हिः-यस्मात् पुनः-विशेषेण कविरेव-काव्यकर्त्रैव कवेः श्रमं-चित्ताद्यायासं सम्यक्-साधुवृत्त्या जानाति, काव्यं कुर्वतः कवेर्यः श्रमः सम्पद्यते स तथाविधैरेव कविभिः परिच्छेत्तुं शक्यते, न तु दुर्जनैरिति भावः । "**दुर्मुखो मुखरे नागराजे वाजिनि वानरे**" [३।१११] इत्य**नेकार्थः** ।

उल्लापा इति **पाठे** काकुभाषितानि चस्तरीरूपाणि । अत्र गल्लशब्दो ग्राम्यस्तथा च **काव्यप्रकाशकारः**—

"**ताम्बूलभृतगल्लोऽयं भल्लं जल्पन्ति मानुषः ।**
**करोति खादनं पानं सदैव तु यथा तथा ॥** [का० उदा० २४५]

"**अत्र गल्लादयः शब्दाः ग्राम्या इति ।**" [ ] परं ग्राम्योप्यत्र दुर्मुखाणामकवीनां ग्राम्याणां निन्दाभिधाने प्रयुक्तः समुचित एव । तेनात्र न दोषशङ्का ॥२३॥

अथ कविषु कथासमाप्त्यनन्तरकार्यस्वकीयविनयमाह—यद्वा, मोहहेतुं मनोऽस्थैर्यं निषेधयन्नाह—

**संगता सुरसार्थेन रम्या मेरुचिराश्रया ।**
**नन्दनोद्यानमालेव स्वस्थैरालोक्यतां[१] कथा ॥२४॥**

**संगते**ति । रुचिरः-रम्य आश्रयः-नलोपाख्यानलक्षणो यस्यां[१] सा रुचिराश्रया नलसम्बन्धिनी मे-मम कथा स्वस्थैः-अव्यग्रैरालोक्यतां-विमृश्यताम् । स्वस्थे हि चित्ते बुद्धयः सम्भवन्तीति । किम्भूता कथा ? शोभनो रसः शृङ्गारादिर्यत्र, तथोक्तेन अर्थेन

१. यस्याः अनू० ।

Jain Education International　　For Personal & Private Use Only　　www.jainelibrary.org

सङ्गता-उचिता, औचित्यं हि रसस्य परमरहस्यम् । तदुक्तम्—

"**अनौचित्यादृतेनान्यद्रसभङ्गस्य कारणम् ।**
**प्रसिद्धौचित्यबन्धो हि रसस्योपनिषत्परा ॥**" [ ]

पुनः किम्भूता ? रम्या-भङ्गश्लेषोक्तिभिर्मनोहरा । कथा केव ? नन्दनोद्यानस्य-नन्दनवनस्य माला-पंक्तिः सेव । यथा नन्दनोद्यानमाला स्वस्थैः[१]-स्वः-स्वर्गे तिष्ठन्तीति स्वः स्थास्तैः स्वर्गवासिभिरालोक्यते-वीक्ष्यते । किम्भूता नन्दनोद्यानमाला ? सुराणां सार्थो वृन्दं तेन सङ्गता-कृतसङ्गा, तथा रमयतीति रम्या-सुन्दरा, "**कृत्यल्युटो बहुलम्**" [**पा० सू०** ३।३।११३] इति कर्त्तर्य्यचो यच् । तथा मेरुः-सुरगिरिः स एव चिरं-बहुकालमाश्रयः-आधारो यस्याः सा मेरुचिराश्रया, तत्रैव तस्याः सद्भावात् । स्वस्थैरिति पूर्वपक्षे, "**अघोषस्थेषु शषसेषु वा लोपम्**" [ ] इति विसर्गलोपः ॥२४॥

अथ कविः सोत्कर्षं स्वकीयग्रन्थाभिधानमभिदधाति—

**उदात्तनायकोपेता गुणवद्वृत्तमुक्तका ।**
**चम्पूश्च हारयष्टिश्च केन न क्रियते हृदि ॥२५॥**

**उदात्ते**ति । ईदृग्विधा च चम्पूः-गद्यपद्यमयीकथा, हारयष्टिश्च-मुक्ताहारलता केन सकर्णेन हृदि-चित्ते वक्षसि च न क्रियते-न ध्रियते ?। किम्भूता चम्पूः ? उदात्तः-महात्मा नायकः-स्वामी प्रस्तावात् नलस्तेन उपेता-सहिता, तस्यात्र स्तव्यत्वेन निबद्धत्वात् । पुनः किम्भूता ? गुणवत्-ओजः प्रसादादिगुणयुक्तं यत् वृत्तं-छन्दसा बद्धं, अबद्धं तु मुक्तकं गद्यं, ततो द्वन्द्वस्ते यस्यां सा गुणवद्वृत्तमुक्तका । किम्भूता हारयष्टिः ? उदात्तः-महार्थो नायकः हारमध्यरत्नं यस्यां सा, तथा गुणः-तन्तुः स विद्यते यासु ता गुणवत्यः, ईदृग्विधा वृत्तमुक्ता-वर्तुलमौक्तिकानि यस्यां सा गुणवद्वृत्तमुक्तका । "**शेषाद्विभाषा**" [**पा० सू०** ५।४।१५४] इति कप्रत्यये "**अन्यतरस्यां**" [ ] इति वा ह्रस्वः । इकारस्तु न शंकनीयस्तस्य पाक्षिकत्वात् । चम्पूरिति "**चप सान्त्वने,** [पा० धा० ४२६] **इभि चपेः स्वरान्नोतश्च**" [ ] इति चपेरूप्रत्ययः, चम्पूः **कथाविशेष इत्युणादिवृत्तौ** । विशेषत्वं तु गद्यपद्यमयत्वेन हरचरणेति पदाङ्कितोच्छ्वासान्तत्वेन च बोध्यम् । यद**नेकार्थवृत्तिः** "**गद्यपद्यमयी चम्पूः साङ्कोच्छ्वासा च वर्ण्यते**" [ ] इति ॥२५॥

अथ प्रकृतनलभूपतिकथां तद्देशनगर्यादिकथनद्वारेण प्रस्तावयन्नाह—

---

१. स्वः स्थैः । अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अस्ति समस्तविश्वम्भराभोग[१]भास्वल्ललामलीलायमानः, समानः सेव्यतया नाकलोकस्य, ग्राम्यकविकथाबन्ध[२] इव नीरसस्यमनोहारी[३], भीम इव भारतालङ्कारभूतः, कान्ताकुचमण्डलस्पर्श इवाग्रणीः सर्व-विषयाणां, अनधीतव्याकरण इवादृष्टप्रकृतिनिपातोपसर्गलोपवर्णविकारः, पशुपति-जटाबन्ध[४] इव विकसितकनककमलकुवलयोच्छलितरजःपुञ्ज-पिञ्जरितहंसावतंसया[५] प्रचुरचलच्चकोरचक्रवाककारण्डवमण्डली-मण्डिततीरया भगीरथभूपालकीर्त्तिपताकया स्वर्गगमनसोपानवीथीयमान-रङ्गत्त[६]रङ्गया गङ्गया पुण्यसलिलैः प्लावितश्चन्द्रभागालङ्कृतैकदेशश्च, सारः सकलसंसारचक्रस्य[७], शरण्यः पुण्यकारिणाम्, आरामो रामणीयककदली-वनस्य, धाम धर्मस्य, आस्पदं सम्पदाम्, आश्रयः श्रेयसाम्, आकरः साधु-व्यवहाराणाम्[८], आचार्यभवनमार्यमर्यादोपदेशानामार्यावर्तो नाम देशः।**

**यस्मिन्ननवरतधर्मकर्मोपदेशशान्त[९]समस्तव्याधि[१०]व्यतिकराः पुरुषा-युषजीविन्यः सकलसंसारसुखभाजः प्रजाः।**

○

**अस्ती**ति । आर्यावर्तो नाम-प्रसिद्धो देशोऽस्ति । "**नाम प्रकाशकुत्सयोः । सम्भाव्याभ्युपगमयोरलीके विस्मये क्रुधि**" इत्य**नेकार्थः** [परि० ४६-४७] । "**हिमवद्-विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि । प्रत्यगेव प्रयागाच्च आर्यावर्त्तः स उच्यते ॥**" [ ] । किम्भूतो देशः ? समस्ता या विश्वम्भरा-भूस्तस्या य आभोगः-परीणाहस्तत्र अभास्वल्ललामलीलावान् भास्वल्ललामलीलावान् भवन् भास्वल्ललामलीलायमानः-भास्वत्तिलकशोभायमानो यः स समस्तविश्वम्भराभोगभास्वल्ललामलीलायमानः, सर्वपृथिव्यां मुख्यभूत इत्यर्थः । लीलायमान इत्यत्र लीलाशब्दात् "**तद्वति वर्तमानादायिः**" [ ]। तथा नाकलोकस्य-स्वर्गलोकस्य सेव्यतया-आश्रयणीयतया समानः-समः । यथा नाकलोकः सेव्यते तथाऽयमपि सेव्य इत्यर्थः । तथा नीरसस्यमनोहारी नीरेण-जलेन सस्येन च धान्येन च मनांसि-निवासिजनचेतांसि हरति-वशीकरोतीत्येवंशीलः । क इव ? ग्राम्यः-ग्रामीणो यः कविस्तस्य यः कथाबन्धः स इव । सोऽपि नीरसस्य-अरसिकस्य मनोहरो, न तु रसिकस्य । तथा भारतालङ्कारभूतः भारतं-भरतक्षेत्रं तस्य अलङ्कारभूतः-मण्डनोपमः । क इव ? भीम इव, सोऽपि भारतस्य-व्यासोक्तशास्त्रस्यालङ्कारभूतः । "**भूतं सत्योपमानयोः। प्राप्तेऽतीते पिशाचादौ पृथ्व्यादौ जन्तुयुक्तयोः**" इत्य**नेकार्थः** [२।१८६-१८७] । तथा सर्वविषयाणां-समस्तदेशानामग्रणीः-मुख्यः, क इव ? कान्तानां कुच-मण्डलयोः-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पयोधरयोः स्पर्श इव-आश्लेष इव । सोऽपि सर्वविषयाणां-सकलेन्द्रियार्थानां मुख्यो भवति। तथा अदृष्टप्रकृतिनिपातोपसर्गलोपवर्णविकारः, निपातः-स्वस्वपदात्पतनं, उपसर्गः-धनापहारादिरुपद्रवः, लोपः-देवदायब्रह्मदायापालनं, वर्णविकारः-बलाद् ब्राह्मणस्य शूद्रीकरणं, शूद्रस्य च ब्राह्मणीकरणमित्यादिरूपा चातुर्वर्ण्याव्यवस्था, पश्चात् द्वन्द्वे निपातोपसर्ग-लोपवर्णविकाराः, न दृष्टाः प्रकृतीनां-प्रजानां निपातोपसर्गलोपवर्णविकारा, यत्र सः, क इव? अनधीतव्याकरण इव-न अधीतं-पठितं व्याकरणं-शब्दशास्त्रं येन सः । सोऽपि न दृष्टा-न ज्ञाताः, प्रकृतयः धातवो-भ्वादयः, निपाताः-चादयः, उपसर्गाः-प्रादयः, लोपः-अकारादेर्नाशः, वर्णविकारः-अक्षरविकृतिश्च येन सः । पुनः किम्भूतो देशः ? पशुपतिजटाबन्ध इव-शम्भुजटाजूट इव, गङ्गया-मन्दाकिन्या पुण्यसलिलैः-पवित्राम्भोभिः प्लावितः-प्रक्षालितः । किम्भूतया गङ्गया? विकसितानि-प्रफुल्लानि यानि कनक-कमलानि-स्वर्णाम्भोजानि कुवलयानि च-नीलोत्पलानि तेभ्य उच्छलितः-उद्भूतो यो रजः-पुञ्जः-परागसमूहस्तेन पिञ्जरिताः-पिङ्गलीकृता ये हंसास्त एव अवतंसः-शेखरो यस्याः सा तया तच्छिरोवस्थितत्वेन तेषां शेखरायमाणत्वात् । पुनः किम्भूतया ? प्रचुराः-भूयांसश्चलन्तो ये चकोराश्च-चलचञ्चवः, चक्रवाकाश्च-रथाङ्गाः, कारण्डवाश्च-मुरलास्तेषां या मण्डली-श्रेणिस्तया मण्डितं-भूषितं तीरं-तटं यस्याः सा तया । तथा [1]भगीरथभूपालस्य-जह्नुसूनुनृपस्य कीर्तेः पताका इव या सा तया। तेनैव स्ववंश्यानां सगरपुत्राणां नरकादुद्धर्तुं सुरसरित्प्रवाहस्य आनीतत्वादत एव तन्नाम्ना भागीरथीति प्रसिद्धिर्गङ्गायाः । पताकोपमानं चोज्ज्वल्यसाम्यात् । तथा स्वर्गगमनाय सोपानवीथीयमानाः-आरोहणमार्ग इव आचरमाणा रंगन्तः-विलसन्तस्तरङ्गः-वीचयो यस्याः सा तया । तत्स्नानात् स्वर्गावाप्तेः स्वर्गच्छतां तद्वीचयो मन्ये सोपानवीथीव । शम्भुकपर्द्दोऽपीदृग्विधया गङ्गया धौतो भवति । तथा चन्द्रभागया नद्या अलङ्कृत एकदेशः-विषयांशो यस्य स चन्द्रभागालङ्कृतैकदेशः । पशुपतिजटाबन्धोऽपि चन्द्रस्य भागः-अंशस्तेनालङ्कृतः-भूषित एकदेशो यस्य स ईदृग्विधो भवति । तथा सकलसंसारचक्रस्य-समस्तसंसृतिमण्डलस्य सारः-प्रधानम् । तथा पुण्यकारिणां-पुण्यकर्तॄणां शरणाय साधुः शरण्यः, एतद्देशाधारेण धर्म्मिणो धर्मं कुर्वन्तीति । तथा रमणीयस्य-मनोहरस्य भावो रामणीयकम् । "**योपधाद्गुरूपोत्तमाद् वुञ्**" [**पा० सू०** ५।१।१३२] । तदेव कदलीवनं-रम्भाखण्डं तस्य आरामः-कृत्रिमवनम् । यथा आरामे रम्भावनं तिष्ठति तथाऽत्रापि चारुत्वं तिष्ठतीत्यर्थः । तथा धर्मस्य-पुण्यस्य धाम-गृहम् । तथा सम्पदां-ऋद्धीनां आस्पदं-स्थानम् । तथा श्रेयसां-कल्याणानां आश्रयः-आधारः । तथा साधवः-भव्याः ये व्यवहारः-प्रवर्तनानि तेषामाकरः-रवानिः । तथा आर्या रम्या या

१. भागीरथ· अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मर्यादा-इदं कर्त्तव्यं, इदं न कर्त्तव्यमित्येवंरूपा व्यवस्था तस्या ये उपदेशाः-कथनानि तेषां आचार्यभवनं-अध्यापकगृहम्, यथाऽऽचार्यगृहे साधुमर्यादोपदेशाः प्राप्यन्ते तथा ऽत्रापि ।

यस्मिन्नार्यावर्त्तदेशे ईदृग्विधाः प्रजाः-लोकाः सन्तीति गम्यते । किम्भूता ? अनवरतं-अजस्रं धर्म्मकर्मोपदेशेन-पुण्यकृत्यप्ररूपणेन शान्तः-ध्वस्तः समस्तो व्याधि-व्यतिकरो-रोगसम्पर्को यासां ताः । तथा पुरुषायुषं वर्षाणामष्टोत्तरशतं जीवन्तीत्येवं शीलाः पुरुषायुषजीविन्यः, यद्देशे नाकाले लोका म्रियन्त इत्यर्थः । पुरुषायुषमिति "**अचतुर**-" [**पा० सू०** ५।४।७७] इत्यादिना अजन्तो निपात्यते । तथा सकलानि यानि संसारसुखानि-वैषयिकसौख्यानि तानि भजन्ते यास्ताः सकलसंसारसुखभाजः । **धर्मकर्मणेति पाठे** यस्मिन्देशे धर्मकर्मणा नीरुजो बह्वायुषः सुखिन्यः प्रजाः । धर्मकर्मणेति व्यस्तमेव त्रिभिः प्रजाविशेषणैः सम्बद्धं स्यात् ।

अथ सर्वसुखभाक्त्वं प्रजानां दर्शयन्नाह-

**तथाहि—कुष्ठयोगो[१] गान्धिकापणेषु, स्फोटप्रवादो वैयाकरणेषु, सन्निपातस्तालेषु, ग्रहसंक्रान्तिर्ज्योतिःशास्त्रेषु, भूतविकारवादः सांख्येषु, क्षयस्तिथिषु, गुल्मवृद्धिर्वनभूमिषु, गलग्रहो मत्स्येषु, गण्डकोत्थानं पर्वतवनभूमिषु[२], शूलसम्बन्धश्चण्डिकायतनेषु दृश्यते न[३] प्रजासु ।**

**यत्र चतुरगोपशोभिताः[४] सङ्ग्रामा इव ग्रामाः, तुङ्गसकलभवनाः सर्वत्र नगा इव नगरप्रदेशाः, सदाचरणमण्डनानि नूपुराणीव पुराणि, सदानभोगाः प्रभञ्जना इव जनाः, प्रियालपनसाराणि यौवनानीव वनानि, विटपिहिताश्चेटिका इव वाटिकाः, निर्वृतिस्थानानि सुकलत्राणीवेक्षुक्षेत्र-सत्राणि[५], जलाविलक्षणाः पशुपुरुषा इवाप्रमाणास्तडागभागाः, कुपित-कपिकुलाकुलित [६]लङ्केश्वरकिङ्करा इव भग्नकुम्भकर्णघनस्वापाः कूपाः, पीवरोधसः सरित इव गावः, सतीव्रतापदोषाः[७] सूर्यद्युतय इव कुलस्त्रियः ।**

**यत्र च मनोहारिसारसद्वन्द्वास्तत्पुरुषेण द्विगुना चाधिष्ठिताः कादम्बरी-गद्यबन्धा इव दृश्यमानबहुव्रीहयः केदाराः । किं बहुना—**

**तथा**हीति । इदमिदमेष्वेव वर्त्तते न प्रजास्विति वक्तुं परिसंख्यामाह—'कुष्ठेति' कुष्ठं-औषधविशेषस्तस्य योगः सम्बन्धो गान्धिकापणेषु-गान्धिकहट्टेषु दृश्यते, न प्रजासु, कुष्ठस्य

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्वग्रोगविशेषस्य योगः-सम्बन्धो दृश्यते इति क्रियाऽग्रेऽपि स्वयं योज्या । "**कुष्ठं भेषज-रोगयोः**" इत्य**नेकार्थः** [२।१०६] । तथा स्फुट्यते-व्यज्यतेऽर्थोऽनेनेति स्फोटः वैयाकरण-प्रसिद्धं शब्दब्रह्म, स च वाक्यस्फोटः पदस्फोटश्चेति द्विधा नित्यश्च, तन्मते तस्य प्रकर्षेण वादः-कथनं स्फोटप्रवादः, स च वैयाकरणेषु-शाब्दिकेषु, न प्रजासु स्फोटस्य-पिटकस्य प्रवादः-कथनं न स्फोटकाः कस्यचिज्जायन्त इत्यर्थः । तथा तालाः चञ्चत्पुटादयस्तेष्वेव सन्निपातः-उभयहस्तयोजनं । यदुक्तम्-"**शस्यां दक्षिणहस्तेन तालं वामेन योजयेत् । उभयोर्हस्तयोर्पातः सन्निपातः स उच्यते ॥**" [ ] न प्रजासु सन्निपातः-वातपित्त-श्लेष्मणामेकत्रयोगः, सन्निपातो रोगविशेषः । तथा ज्योतिःशास्त्रेषु ग्रहाः-सूर्यादयस्तेषां मेषादिराशौ संक्रान्तिः-संक्रमणं, न प्रजासु ग्रहसंक्रान्तिः, ग्रहः-बन्धनं तस्य संक्रान्ति । न कश्चिदन्यायं कुरुते यो बध्येतेत्यर्थः । तथा भूतप्रधानाख्यं तत्त्वं मूलप्रकृतिस्ततो महान् तस्मादहङ्कारः, अहङ्काराच्च पञ्च तन्मात्राणि [१]शब्दतन्मात्रादिनि । तत्र शब्दतन्मात्रं-मधुरादिशब्दविशेषः, रूपतन्मात्रं-शुक्लकृष्णादिरूपविशेषः, रसतन्मात्रं-तिक्तादिरसविशेषः, गन्धतन्मात्रं-सुरभ्यादिगन्धविशेषः, स्पर्शतन्मात्रं-मृदुकठिनादिस्पर्शविशेषः[१] । एवमष्टौ, तत एकादशेन्द्रियाणि पञ्चभूतानि चेति षोडशविकाराः । एवं चतुर्विंशति तत्त्वानि पञ्चविंशश्च पुरुषः । तथा मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त, षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः, इति **सांख्याः** । ततश्च तेष्वेव भूतविकारवादः-भूतान्येव विकारास्तेषां वादः-प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः, न प्रजासु भूतं-प्रेतस्तस्य विकारः-उपद्रवस्तस्य वादः-उक्तिर्भूतविकारवादः । न भूतेन कश्चिदभिभूयत इत्यर्थः । तथा तिथिषु-कर्मवाटीषु क्षयो दृश्यते, अद्य तिथिपातो जात इति, न प्रजासु क्षयः-विनाशः । तथा वनभूमिषु गुल्मवृद्धिः-गुल्मः-स्तम्बस्तस्य वृद्धिः-वर्धनं, न प्रजासु गुल्मः-रुग्विशेषस्तस्य वृद्धिः । तथा मत्स्येषु गलग्रहः-गले ग्रहः-ग्रहणं गलग्रहः महान् मत्स्योऽल्पीयांसं मत्स्यं गले गृह्णातीति, बडिशप्रयोगेण वा गलग्रहो, न प्रजासु 'गरग्रहः' गरस्य-विषस्य ग्रहः-ग्रहणं । न कश्चिद् भक्षणार्थं गरं गृह्णातीति भावः । श्लेषे रलयोरेकत्वश्रवणात् । यद्वा, गलग्रहः-गलहस्तः । तथा पर्वतवनभूमिषु-अद्रिनिकुञ्जेषु गण्डकोत्थानं गण्डकाः-खड्गिनस्तेषामुत्थानं-उदय-प्राप्तिः, न प्रजासु गण्डकाः-ह्रस्वस्फोटकास्तेषामुत्थानं-उद्भवः । "**ह्रस्वा गण्डा गण्डकाः**" [ ] "**अल्पाख्यायां**" [**पा०सू०** ५।४।१३६] कन् । यद्वा, गण्डकोऽन्तरायस्तस्योत्थानम् । **यदनेकार्थः-गण्डको विघ्ने विद्यायां संख्यावच्छेदखड्गिषु**" [३।३४] "**विद्येति विद्याविशेषः, संख्येति संख्याभेदश्चत्वारः, कपर्दकाः, अवच्छेदः पर्वतेति**" तद्वृतौ ।

१-१. 'शब्दतन्मात्रादीनि' आरभ्य 'स्पर्शविशेषः' पाठो नोपलभ्यते अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[**अने० टीका०** ३।३४] तथा चण्डिकायतनेषु-चण्डिकागृहेषु शूलसम्बन्धः-शूलस्यायुध-विशेषस्य सम्बन्धः-संयोगः ताभिः स्वहस्ते तस्य गृहीतत्वात्, न प्रजासु शूलस्य-रोगविशेषस्य सम्बन्धः, लोकानां तनौ वाताधिक्याभावात्तदभावः । अपरं यत्र देशे एते पदार्थाः । तद्यथा–

ग्रामाः संग्रामा इव वर्तन्त इति क्रिया सर्वत्राऽध्याहार्या । किम्भूताः ग्रामाः ? 'चतुरगोपशोभिताः' यत्र परिषन्मण्डपेषु ग्रामवृद्धा उपविशन्ति ते चतुरास्तैस्तथा गोपैः-वल्लवैरुपशोभिताः-विभूषिताः । यद्वा, चुतरैः-दक्षैर्गोपैः-पाशुपाल्यजीविभिरुपशोभिताः । गोशब्दस्य पशुमात्रवचनत्वात् । संग्रामपक्षे–यत्र चेति छेदः, ते च किम्भूताः ? तुरगैः-अश्वैरुपशोभिताः । अपरं यत्र सर्वत्र नगा इव-अद्रय इव नगरप्रदेशाः-पौरविभागाः । किम्भूताः नगरप्रदेशाः ? 'तुङ्गसकलभवनाः' तुङ्गानि-उच्चानि सकलानि-समस्तानि सम्पूर्णानि वा भवनानि-गृहा यत्र ते । किम्भूता नगाः ? सह कलभैः-इभडिम्बैः वर्तत इति सकलभं, ईदृग्विधं यद्वनं तत् सकलभवनं, तुङ्गैः-पुन्नागैरुपलक्षितं सकलभवनं यत्र ते पुन्नागकरिपोतयुतकानना इत्यर्थः । यद्**विश्वप्रकाशः**-"**तुङ्गः पुन्नागनागयोः तुङ्गः स्यादुन्नतेऽन्यवत्**" [**गान्तद्विक०** २।१६]। तथा यत्र नूपुराणीव पुराणि । किम्भूतानि पुराणि ? सत्-शोभनमाचरणं-आचारस्तदेव मण्डनं-भूषा येषां तानि सदाचरणमण्डनानि । किम्भूतानि नूपुराणि ? सदा-नित्यं चरणः-अंह्रिस्तस्य मण्डनानि । तत्रैव तेषां विभूषायै[1] निबध्यमानत्वात् । तथा यत्र देशे प्रभञ्जना इव-समीरणा इव जनास्सन्ति । किम्भूता जनाः ? सह दानभोगाभ्यां वर्तन्त इति सदानभोगाः, यैर्लक्ष्मीर्दीयतेऽर्थिभ्यः स्वयं च भुज्यत इति । किम्भूताः प्रभञ्जनाः ? सदा-शश्वन्नभसि-व्योम्नि गच्छन्तीति नभोगाः-आकाशगामिनः । तथा यत्र यौवनानीव-तारुण्यानीव वनानि, किम्भूतानि वनानि ? प्रियालं-राजादनं पनसं-वृक्षविशेषमियुति-प्राप्नुवन्ति यानि तानि प्रियालपनसाराणि, **अर्त्तेरण्**, राजादनपनससहितानीत्यर्थः । किम्भूतानि यौवनानि ? प्रियाणां-दयिता-नामालपनेन-सकामोल्लापेन साराणि-प्रधानानि । तथा यत्र चेटिका इव-दास्य इव वाटिकाः। किम्भूता वाटिकाः ? विटपिभ्यः-तरुभ्यो हिताः-तरुवृद्धिकारिण्यः। किम्भूताश्चेटिकाः ? विटैः-षिङ्गैः पिहिताः-वेष्टिताः विटपिहिताः । न तत्पार्श्वं विटाः मुञ्चन्तीत्यर्थः । तथा यत्र सुकलत्राणीव-भर्तृभक्तस्त्रिय इव इक्षुक्षेत्रसत्राणि, इक्षुक्षेत्रेषु यानि सत्राणि-दानशालास्तानि इक्षुक्षेत्रसत्राणि[2] । निर्वृत्तिस्थानानि निर्वृत्या-वृत्तेरभावेन स्वच्छन्दं स्थीयते एष्विति । किम्भूतानि सुकलत्राणि ? निर्वृत्तिः-सुखं तस्याः स्थानानि-पदानि

---

१. भूषायै अनू० । २. किम्भूतानि इक्षुक्षेत्रसत्राणि अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निर्वृतिस्थानानि । तथा यत्र पशूनां रक्षकाः पुरुषाः पशुपुरुषाः-जावालास्ते इव तडागभागाः-सरसीप्रदेशाः । किम्भूतास्तडागभागाः ? 'जलाविलक्षणाः' जलाविलाः-जलार्थिभिः सदा सेव्यमानतया[१] जलपिच्छिलाः, क्षणाः-अवतारादितीरप्रदेशा यत्र । यद्वा, जलैराविलाः-नीरन्ध्राः पूर्णाः क्षणाः । खातकानि यत्र । पुनः किम्भूताः ? अप्रमाणाः-अगाधाः । किम्भूताः पशुपुरुषाः ? जडाः-मूर्खाः, पुनः विलक्षणाः-व्यपेतलक्षणशास्त्राः । यद्वा, अविभिः-मेण्ढैर्लक्ष्यन्ते-ज्ञायन्त इति अविलक्षणाः । यद्वा, अवीन् लक्षयन्ति-सुदृशानप्युपलक्षयन्तीति अविलक्षणाः, पश्चात्कर्मधारयः । तथा अप्रमाणाः-प्रत्यक्षादि-प्रमाणरहिताश्च । तथा यत्र कुपितकपिकुला-कुपितलङ्केश्वरकिङ्करा इव कुपितं-सीतापहरणात् क्रुद्धं, यत्कपिकुलं-हनुमदादिवानरसमूहस्तेन आकुलिताः-व्याकुलीकृताः ये लङ्केश्वर-किङ्कराः-रावणानुचरास्ते इव कूपाः सन्ति। किम्भूताः कूपाः ? भग्नाः कुम्भकर्णा यत्र ते भग्नकुम्भकर्णाः-स्फुटितघटकण्ठास्तथा घनाः-प्रचुराः स्वाः-स्वकीयाः पातालमूलोत्था न तु प्रवाहादिना प्रविष्टा आपः-पानीयानि येषु ते घनस्वापाः । यद्वा, घनस्वाः-बहुद्रव्या आपो येषु इति, वापीकूपादौ हि प्रायो जीर्णोद्धारार्थं निधिर्भवतीति ख्यातिस्ततः कर्मधारयः । किम्भूताः कुपि० ? भग्नः श्रीरामागमनकथनेन कुम्भकर्णस्य-रावणानुजस्य घनः-प्रचुरः षण्मासावधिकः स्वापः-शयनं यैस्ते भग्नकुम्भकर्णघनस्वापाः । रामः समागत[१] इत्युक्त्या तैस्तन्निद्रा त्याजितेति । तथा यत्र सरित इव-नद्य इव गावः-धेनवः । किम्भूताः गावः ? पीवरमूधं-आपीनं येषां ते पीवरोधसः । अत्र गो शब्दो धेन्वर्थोऽपि "**स्त्रीनरलिङ्गितः**" इति **व्याडिः** [ ] । ततः पुंस्त्वात् पीवरोध्न्यः इति न स्यात् । यद्वा, पीवरं च तदूधश्च पीवरोधस्तस्मात्पीवरोधसो हेतोर्गावः सरित इवेत्येवमर्थघटना विधेया । एतत्पक्षे धेन्वर्थो गो शब्दः स्त्रीत्व एव । किम्भूताः सरितः ? पीव-स्थूलं रोधः-तटं यासां ताः पीवरोधसः । तथा यत्र सूर्यद्युतय इव-रविदीप्तय इव कुलस्त्रियः-सद्वंशोत्पन्नरमण्यः । किम्भूताः कुलस्त्रियः ? सती-साध्वी तस्या व्रतं-एकपतिकात्वं, पतिव्रताधर्म इत्यर्थस्तेन अपगता-नष्टा दोषाः-कलङ्का यासां ताः सतीव्रतापदोषाः । किम्भूताः सूर्यद्युतयः ? सह तीव्रतापदोषैर्वर्तन्त इति सतीव्रतापदोषाः । यद्वा, सह तीव्रतया-उग्रतया वर्तन्त इति सतीव्रतास्तथा अपगता दोषा-रात्रिर्याभ्यस्ता अपदोषास्ततः कर्मधारयः ।

तथा यत्र च **कादम्बरीगद्यबन्धा** इव कादम्बर्याः-कथाविशेषस्य गद्यबन्धाः-छन्दोऽनिबद्धामुत्कलावाक्यरचनास्ते इव केदाराः सन्ति । किम्भूताः केदाराः ? मनोहारीणि-रुचिराणि सारसानां द्वन्द्वानि-दम्पतीरूपाणि युग्मानि येषु ते मनोहारिसारसद्वन्द्वाः । पुनः

---

१. सेव्यतया अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किम्भूताः? द्विगुना-गोयुगयुक्तेन तत्पुरुषेण-तत्स्वामिनाऽधिष्ठिताः-आश्रिताः, द्विगुनेति चोपलक्षणं तेन बहुगोयुक्तेनाऽपि, चकारोऽप्यर्थो द्विगुनाऽपि तत्पुरुषेणाधिष्ठिताः । तथा दृश्यमाना बहवो व्रीहयां येषु ते दृश्यमानबहुव्रीहय इति भूमेः सस्यसम्पद्गुणः । पक्षे किम्भूताः कादम्बरीगद्यबन्धाः ? मनोहारिणः साराः श्रेष्ठाः सद्वन्द्वाः-द्वन्द्वसमाससहितास्ततः कर्मधारयः । पुनः तत्पुरुषेण द्विगुना च समासेनाधिष्ठिताः, तथा दृश्यमानबहुव्रीहिसमासाः, तथा च द्वन्द्वतत्पुरुषद्विगुबहुव्रीहिसमासबहुला इत्यर्थः ।

**किम्बहुना**-किं बहु वर्ण्यते तस्य देशस्य तदेवाह—

**नास्ति सा नगरी यत्र न वापी न पयोधरा ।**
**दृश्यते न च यत्र स्त्री नवापीनपयोधरा ॥२६॥**

**नास्ती**ति । यत्र-आर्यावर्त्तदेशे सा काऽपि नगरी नास्ति यत्रेति यस्यां न वापी-न दीर्घिका । तथा सा नगरी नास्ति यस्यां न पयोधरा-न पयःप्रधाना भूमिः । तथा सा नगरी नास्ति यस्यां न च स्त्री-कान्ता दृश्यते । एतत्त्रयमपि क्रमेण चतुर्थपादेन विशिनष्टि— किम्भूता वापी ? "**णु स्तुतौ**" [पा० धा० १११०] नवं स्तुतिमाप्नुतः, अभीष्टमिति[१] न वापिनी, तथाभूते इनपयसी-स्वामिजले धरतीति नवापीनपयोधरा । स धन्यो येनेयं वापी कारितेति स्तुतिमत्तत्कर्तृधरा सुस्वादतया स्तव्यजलधरा चेत्यर्थः । किम्भूता पयोधरा ? वपन्त्यवश्यमिति वापिनः-कर्षकास्तेषां इनाः-आजीवहेतुत्वात् स्वामिनः पयोधराः-मेघा यस्यां सा वापीनपयोधरा, पश्चान्नञ् सम्बन्धः, मेघानपेक्ष्यसस्यसंपत्तिमतीत्यर्थः । किम्भूता स्त्री ? नवा-तरुणी, तथा [२]पीनपयोधरा-पीनस्तनी च यस्यां नगर्यां दृश्यते सैव नगरी यत्र देशेऽस्ति। अथवा यत्र देशे सा नगरी नास्ति, यस्यां नगर्यां वापी च न दृश्यते। कीदृशी वापी ? न न पयोधरा-अपितु पयोधरा, नञ्द्वयस्य प्रकृतार्थसूचकत्वात् । तथा यत्र नगर्यामेवं विधा स्त्री च न दृश्यते । किम्भूता ? नवा-तरुणी तथा पीनपयोधरा । सर्वास्वपि नगरीषु पयोधरा-वाप्यः, तरुण्यः-पीनस्तन्यश्च स्त्रियो दृश्यन्त इति भावः ॥२६॥

पुनर्देशं व्यावर्णयन्नाह—

**अपि च—**

**भवन्ति फाल्गुने मासि[१] वृक्षशाखा विपल्लवाः ।**
**जायन्ते न तु[२] लोकस्य कदापि च[३] विपल्लवाः ॥२७॥**

---

१. अभीक्ष्णमिति अनू० । २. पीनस्तन्यश्च अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अपि चेति पुनः ।

**भवन्तीति** । फाल्गुने मासि वृक्षाणां-तरूणां शाखाः-शालाः वृक्षशाखा विगता पल्लवा याभ्यस्ता विपल्लवा यत्र भवन्ति-जायन्ते । अत्र भूधातुः प्रादुर्भावार्थः । यदुक्तम्—

**सत्तायां मङ्गले वृद्धौ निवासे व्याप्तिसम्पदोः ।**
**अभिप्राये च शक्तौ च प्रादुर्भावे मतौ च भूः ॥ [ ]**

इति । जनस्य तु कदापि च विपदां-आपदां लवाः-लेशा अपि च न भवन्ति । अपि चेत्युभयत्र सम्बध्यते । मासीति, मासस्य शसादौ वातो लोपः ॥२६॥

**यत्र[१] सौराज्यरञ्जितमनसः सकलसमृद्धिवर्धित[२]महोत्सवपरम्परारम्भनिर्भराः, सततमकुलीनं कुलीनाः, प्राप्तविमानमप्राप्तविमानाः[३], कतिपयवसुविराजित[४]मनेकवसवः, समुपहसन्ति स्वर्गवासिनं जनं जनाः ।**

**यत्रेति** । यत्र देशे सौराज्येन-शोभननृपतिभावेन रञ्जितं-आवर्जितं प्रमोदितं मनो येषां ते सौराज्यरञ्जितमनसः । तथा सकलाः-समस्ता या समृद्धिः-सम्पत् तया वर्द्धिता-वृद्धिं प्रापिता या महोत्सवपरम्परा-क्षणपरिपाटी तस्या य आरम्भः-उपक्रमस्तेन निर्भराः-भृताः जनाः-लोकाः स्वर्गवासिनं-स्वर्गिणं जनमुपहसन्ति-न्यक्कुर्वन्ति । कथमित्याह—किम्भूता जनाः ? कुलीनाः-अभिजाताः । तथा न प्राप्तो विमानो भावप्रधानत्वान्निर्देशस्य विमानता तिरस्कारो राजादिकृतो यैस्ते अप्राप्तविमानाः[१] । तथा अनेकानि-बहूनि वसूनि-धनानि येषां ते अनेकवसवः । किम्भूतं स्वर्गवासिनं जनम् ? सततं-निरन्तरं न कौ-धरायां लीनः-आश्रितस्तं अकुलीनम् । तथा प्राप्तं विमानं-देवयानं येन सः प्राप्तविमानस्तं । तथा कतिपयैरष्टसंख्यैः-वसुभिः ध्रुवादिभिर्देवैर्विराजितः कतिपयवसुविराजितस्तम् । न्यक्कारस्तु तुल्यार्थे व्याख्येयः, स चेत्थं जनाः कुलीनाः-अभिजाताः स्वर्गिवासि जनस्तु न कुलीनः-नाभिजात इत्यादिरूपः । तथा-

**कथं च स[५] स्वर्गान्[६] न विशिष्यते ।**

**यत्र गृहे गृहे गौर्यः स्त्रियः, महेश्वरो[७] लोकः, सश्रीका हरयः, पदे पदे धनदाः सन्ति लोकपालाः[८] । केवलं न सुराधिपो राजा । न च विनायकः[९] कश्चित् ।**

**यत्र चलतासम्बन्धः कलिकोपक्रमश्च पादपेषु दृश्यते न पुरुषेषु[१०] ।**

---

१. अप्राप्तविमानभङ्गाः अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**यत्र चमरकवार्त्ता परमहिमोपघातश्च तुहिनाचलस्थलीषु श्रूयते न प्रजासु ।**

**यश्च नीतिमत्पुरुषाधिष्ठितोऽप्यनीतिः सवटोप्यवटसंकुलः[१], कारूपयुतो[२]ऽप्यगतरूपशोभः ।**

**यत्र च गुरुव्यतिक्रमं नक्षत्रराशयः, मात्राकलहं लेखशालिकाः, मित्रोदयद्वेषमुलूकाः, अपत्यत्यागं कोकिलाः, बन्धुजीवविघातं ग्रीष्मदिवसाः [३]कुर्वन्ति न जनाः[४] ।**

**किम्बहुना ।**

स देशः कथं च स्वर्गान् न विशिष्यते-नाधिको भवति । "**कर्म्म कर्त्तरि यक्**" [　　]। वैशिष्ट्यमेव दर्शयति-

यत्र देशे गृहे गृहे-प्रतिगृहं गौर्यः-गौरांग्यः शुद्धोभयान्वया वा स्त्रियः सन्तीति क्रिया यथासम्भवं सर्वत्र योज्या । तथा यत्र महानीश्वरः-अतिसमृद्धो महेश्वरो लोकः-सर्वोऽपि जनः । तथा यत्र सह श्रिया-शोभया वर्तन्त इति सश्रीका हरयः-अश्वाः । तथा यत्र पदे पदे-प्रतिस्थानं लोकपालाः-राजानो धनं ददातीति धनदाः, स्वर्गे तु नैवम् । एकस्मिन्नेवेश्वरगृहे गौरी-उमा, तथा स्वर्गे एक एव महेश्वरः-शिवः । तथा सलक्ष्मीकः-हरिर्विष्णुरेक एव न बहवः । तथा स्वर्गे एकस्मिन्नेव स्थाने एक एव धनदः-कुबेरो लोकपालस्तथा च कथं स्वर्गान्नायं देशोऽधिको भवेदिति । केवलं स्वर्गलोकादयं विशेषः-अत्र देशे सुराधिपः-राजा न, अधि-आधिक्येन पिबतीति अधिपः, सुरायाः-मद्यस्य अधिपः सुराधिपः । तथा न च कश्चित्-कोऽपि विरुद् नायको विनायकः, सर्वोऽपि सुनायक इत्यर्थः । सुरामधिपिबतीति तु वाक्ये "**कर्मण्यम्**" [पा० सू० ३।२।१] इति सूत्रेण अण् प्रसक्त्या गोसंदायवत् सुराधिपाय इत्यनिष्टं स्यात्, तेन पूर्वोक्त एव समासो विधेयः । सुरा प्रपावत् । स्वर्गे तु सुराणामधिपः-राजा इन्द्रः, विनायकः-गणेशश्च ।

तथा यत्र देशे लतानां-वल्लीनां सम्बन्धः-योगो लतासम्बन्धः, कलिकायाः-कोरकस्य उपक्रमः-प्रारम्भः कलिकोपक्रमश्च पादपेषु दृश्यते, न पुरुषेषु । चलता-लौल्यं तस्याः सम्बन्धः-संगः चलतासम्बन्धः, अचञ्चला इत्यर्थः । पुरुषपक्षे चलतासम्बन्ध इति समुदितं पदम् । तथा कलिः-कलहः, कोपः-क्रुत् तयोः क्रमः-पारम्पर्यं कलिकोपक्रमः स च दृश्यते, न कोऽपि पूर्वं कलिं कुरुते पश्चात् कोपमिति भावः ।

Jain Education International　　For Personal & Private Use Only　　www.jainelibrary.org

तथा **यत्र** देशे चमरकाणां-गोविशेषाणां वार्ता-कथनं, यथा तत्र चमरकास्सन्तीत्येवं रूपा, तथा परमं-उत्कृष्टं हिमं-तुहिनं तेनोपघातः-उपद्रवः परमहिमोपघातः, स च तुहिनाचलस्य-हिमाद्रेः स्थलीषु-भूभागेषु श्रूयते, न प्रजासु । अत्र पक्षे चः-भिन्नः[१] मरकः-मरणबाहुल्यं तस्य वार्त्ता-किम्वदन्ती, तथा परस्य-स्वव्यतिरिक्तस्य महिमा-माहात्म्यं तस्या उपघातः-विनाशः परमहिमोपधातः स च श्रूयते । न क्वापि मरकवार्त्ता श्रूयते । न च कोऽपि परकीयां महिमामसहिष्णुतया उपहन्तीत्यर्थः ।

तथा **यश्च** देशः नीतिमद्भिः-नयोपगतैः पुरुषैरधिष्ठितोऽपि आश्रितोऽप्यनीतिः, अपिर्विरोधे, स च तुल्यार्थव्याख्यायाम् । कथं यः नीतिमत्पुरुषाधिष्ठितो भवति स कथं अनीतिः ? न विद्यते नीतिर्यस्मिन् स अनीतिः, स च अनीतिर्न भवति किन्तु स नीतिर्भवेत् । अयं विरोधः, तत्परिहारस्तु—न विद्यते ईतिः-उपद्रवो यस्मिनित्यनीतिः । एवमग्रेऽपि विरोधतत्परिहारौ द्योत्यौ । तथा यो देशः सह वटैः-न्यग्रोधैर्वर्तत इति सवटस्तथाविधोऽपि नवटैः संकुलः-व्याप्त इति विरोधस्तत्परिहारपक्षे तु—अवटैः-कूपैर्गर्त्ताभिर्वा संकुल अवटसंकुलः । तथा कारूपयुतोऽपि-कुत्सितमीषद्वा रूपं कारूपं तेन युतोऽपि-सहितोऽपि न गता-न भ्रष्टा रूपशोभा यस्य स अगतरूपशोभः, अयं विरोधः, तत्परिहारस्तु—कारवाः-शिल्पिनस्तैरुपयुतस्तथा अगैः-नगैस्तरुभिश्चोपशोभा यस्येति ।

तथा **यत्र च** देशे इदमिदमेते कुर्वन्ति न जनास्तथाहि—नक्षत्रराशयः-अश्विन्यादि-भपंक्तयः गुरोः-बृहस्पतेः व्यतिक्रमं-उल्लंघनं गुरुव्यतिक्रमं कुर्वन्ति, अश्विन्यादयः शीघ्रचारित्वेन गुरुमुल्लंघ्य यान्तीत्यर्थः, परं न जनाः गुरूणां पितृणां पूज्यानां वा व्यतिक्रमं कुर्वन्ति । तथा यत्र मात्रावर्णावयवस्तस्याः कलहं-अन्योक्तानभ्युपगमरूपं लेखशालायां पठनाय नियुक्ता लेखशालिकाः-लेखनशिक्षका बालाः कुर्वन्ति । "**तत्र नियुक्तः**" [पा० सू० ४।४।६९] सप्तम्यन्तात् इति नियुक्तेऽर्थे ठक् । यत्रोपविश्य पट्टादिषु वर्णविन्यासं शिशवः शिक्षन्ते सा लेखशालेति, न जनाः मात्रा-जनन्या सह कलहं कुर्वन्ति । तथा उलूकाः-पेचकाः मित्रस्य-सूर्यस्य उदये-उद्गमे द्वेषं-ईर्ष्यां कुर्वन्ति । किमित्यसावुदित इति, न जना मित्रस्य-सुहृद उदये-ऐश्वर्यप्राप्तौ द्वेषं कुर्वन्ति । तथा यत्र कोकिलाः-पिक्य अपत्यस्य-निजसन्तानस्य त्यागं-काकनीडेषु मोचनं[२] कुर्वन्ति, न जना अपत्यत्यागं कुर्वन्ति, सद्वृत्त-प्रवृत्तत्वेन जारजाताद्यभावात् । तथा यत्र ग्रीष्मदिवसाः-उष्णर्तुदिनानि बन्धुजीवानां-बन्धूकानां विघातं-म्लानतां कुर्वन्ति, गीष्मदिनमध्यंदिनेषु तेषु तेषां शोषात् न जना, बन्धूनां-स्वजनानां जीवविघातं-प्राणच्यावनं कुर्वन्ति, धनाद्यलुब्धत्वात् ।

---

१. भिन्नस्तेन अनू० । २. 'मोचनं' नास्ति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**किंबहुना**-किं बहूक्त्या ?

**देशः पुण्यतमोद्देशः कस्यासौ न प्रियो भवेत् ।**
**युक्तोऽनुक्रोशसम्पन्नैर्यो जनैरिव योजनैः ॥२८॥**

**देश** इति । असौ-आर्यावर्त्तो देशः कस्य-जनस्य प्रिय[१]:-वल्लभो भवेत् । किम्भूतो देशः ? पुण्यतमा-अतिशयेन पवित्रा उद्देशाः-वनादिभूभागा यस्य स पुण्यतमोद्देशः । असाविति कः ? यो देशः अनुक्रोशेन-दयया सम्पन्नैः-युक्तैर्जनैर्युक्तो भृतः । जनैः कैरिव ? योजनैरिव । किम्भूतैर्योजनैः ? अनुगताः-परस्परं सम्बद्धाः क्रोशाः-गव्यूतानि अनुक्रोशास्तैः सम्पन्नानि अनुक्रोशसम्पन्नानि तैः ॥२८॥

देशवर्णनामभिधाय अथ तदेकदेशीयदेशाख्याख्यानपूर्वकं सप्रपञ्चं तन्मध्यभागवर्तिनगरीवर्णनामाह–

**तस्य विषयस्य[१] मध्ये निषधो नामास्ति जनपदः प्रथितः ।**
**तत्र पुरी पुरुषोत्तमनिवासयोग्यास्ति निषधेति ॥२९॥**

**तस्ये**ति । तस्य विषयस्य-आर्यावर्त्ताख्यदेशस्य मध्ये निषधो नाम जनपदो नीवृत्प्रथितः-विख्यातोऽस्ति । तत्र निषधाख्यजनपदे निषधा इति पुरी अस्ति । किम्भूता ? पुरुषोत्तमस्य-विष्णोर्निवासयोग्या-अवस्थानायोचिता अतिश्रेष्ठत्वात् । यद्वा, पुरुषेषु उत्तमाः पुरुषोत्तमाः-प्रधानपुरुषास्तेषां निवासयोग्या ॥२९॥

**जननीतिमुदितमनसा सततं सुस्वामिना कृतानन्दा ।**
**सा नगरी नगतनया गौरीव मनोहरा भाति ॥३०॥**

**जने**ति । सा-[२]निषधानगरी सततं-निरन्तरं मनोहरा-रम्या भाति-शोभते । किम्भूता नगरी ? सुस्वामिना-सुप्रभुणा कृतः-विहित आनन्दः-हर्षो यस्याः सा कृतानन्दा । किम्भूतेन ? जनानां नीत्या-स्वस्वमर्यादानुल्लंघनेन मुदितं-हृष्टं मनो यस्याऽसौ जननीतिमुदितमनास्तेन, यदा जनाः स्वस्वनीत्या प्रवर्तन्ते तदा राजाऽपि हृष्यति । पुनः किम्भूता ? न गतः-भ्रष्टो नयो यस्याः सा नगतनया-न त्यक्तन्याया अपितु सनया । यत एव न भ्रष्टनया अतएव जने नीतिमत्त्वम् । केव ? गौरीव-पार्वतीव । यथा गौरी सततं भाति तथेयमपि ।

---

१. न प्रियः अनू० । २. 'निषधा' नास्ति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किम्भूता गौरी ? जननी-मातेति हेतोर्मुदितमनसा-हृष्टेन अतएव शोभनेन-हर्षोचित्ताकृति-सुन्दरेण स्वामिना-कार्तिकेयेन कृत आनन्दो यस्याः सा, स्वपुत्रावलोकनादुमाया अपि हर्षोत्पत्तिः । पुनः किम्भूता ? नगस्य-हिमाद्रेस्तनया-पुत्री नगतनया । तथा मनसि हरः स्मर्यमाणतया यस्याः सा मनोहरा ॥३०॥

**यस्यामभ्रंलिहेन्द्रनीलशालशिखरसहस्रनिसृतांशुजालबालशाद्वलाङ्कुराग्रग्रासलालसा[२]: [३]स्खलन्तः खेदयन्ति[३] मध्यन्दिने[४] सादिनं रविरथतुरङ्गमा:[५] ।**

**यस्यां च स्फटिकमणिशिलानिबद्धभवनप्राङ्गणगतासु[६] सञ्चरद्गृहिणीचरणालक्तकपदपंक्तिषु पतन्ति[७] निर्मलसलिलाभ्यन्तरतरत्तरुणारुणकमलकाङ्क्षया मुग्धमधुपपटलानि ।**

**यस्यां च विविधमणिनिर्मित[८]वासभवनभव्यभित्तिषु स्वच्छासु स्वां छायामवलोकयन्त्यः कृतापरस्त्रीशङ्का कथमपि प्रत्यानीयन्ते प्रियैः प्रियतमाः ।**

**यस्यां च दिव्यदेवकुलालङ्कृताः स्वर्गा इव मार्गाः, सततमपांसुवसनाः सागरा इव नागराः, समत्तवारणानि वनानीव भवनानि, सुरसेनान्विताः स्वर्गभूपा[९] इव कूपाः, अधिकन्धरोद्देशमुद्भासयन्तो हारा इव विहाराः ।**

**यस्यां च बहुलक्षणाः[१०] सुधावन्तो दृश्यन्तेऽन्तः प्रचुराः[११] प्रासादा[१२], बहिश्च वारणेन्द्राः । सुशोभितरङ्गाः समालोक्यन्तेऽन्तः सङ्गीतकशाला[१३], बहिश्च क्रीडाकमलदीर्घिकाः । बहुधान्यनिरुद्धाः कथमप्यभिगम्यन्तेऽन्तः पण्यस्त्रियो, बहिश्च क्षेत्रभूमयः । नानाशुकविभूषणाः शोभन्तेऽन्तः सभा बहिश्च सहकारवनराजयः । सौगन्धिकप्रसरो[१४] विराजन्ते[१५]ऽन्तर्विपणयो, बहिश्च, सलिलाशयाः[१६] ।**

**किम्बहुना[१७]**

यस्यां च नगर्यां स्खलन्तः-गतिविघातं कुर्वन्तो रवेः-सूर्यस्य रथतुरङ्गमाः-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्यन्दनाश्वा रविरथतुरङ्गमा मध्यन्दिने-मध्याह्ने सादिनं-अरुणसारथिं खेदयन्ति-खिन्नं कुर्वन्ति, यत एव स्खलन्ति, अतएव तस्य पुनः-पुनस्तत्प्रेरणायां प्रवृत्तेः खेदः । अश्वस्खलने कारणमाह—किम्भूता रविरथतुरङ्गमाः ? अभ्रंलिहानि-आकाशं श्लिष्यन्ति यानि इन्द्रनीलशालशिखराणि-इन्द्रनीलमणिघटितप्राकारकपिशीर्षाणि तेषां यानि सहस्राणि तेभ्यो निःसृतं-निर्गतं यदंशुजालं-किरणसमूहस्तदेव बालाः-प्रत्यग्रोत्पन्नाः शाद्वलाः-हरिता ये अङ्कुरास्तेषां यदग्रं तस्य ग्रासे-भक्षणे लालसाः-लम्पटाः धृताभिलाषाः ये ते तथाविधाः । अयं भावः, इन्द्रनीलमणिकिरणान् नीलतृणतुल्यान् जिघत्सवः सप्तसप्तिसप्तयः स्खलन्ति, ततः सारथिनं खेदयन्तीति ।

तथा **यस्यां** नगर्यां स्फटिकमणिशिलाभिर्निबद्धानि-खचितानि यानि भवन-प्राङ्गणानि-गृहाजिराणि तेषु गताः-प्राप्ताः संक्रान्ता इत्यर्थस्तासु सञ्चरन्त्यः-गच्छन्त्यो या गृहिण्यः-वध्वस्तासां या चरणालक्तकस्य तदानीमेवार्द्रलाक्षारसरञ्जितत्वात् पदपंक्तयः-पदरचनास्तासु मुग्धाः-अप्रौढा ये मधुपास्तेषां पटलानि-समूहाः पतन्ति, अन्यत आगत्य तत्र तिष्ठन्ति । कया ? निर्मलं यत् सलिलं तस्याभ्यन्तरे-मध्ये तरन्ति-विलसन्ति यानि तरुणारुणकमलानि-नवरक्ताम्भोजानि तेषामाकांक्षया-वाञ्छया, ते मुग्धत्वादिदं जानन्ति, स्फटिकप्राङ्गणगताः स्त्रीणां चरणालक्तकपदपंक्तय इमा न भवन्ति किन्तु स्वच्छाम्भसि रक्ताम्भोजान्यमूनीति । स्फटिकस्य सलिलं, पदपंक्तेश्च कमलमुपमानम् ।

तथा **यस्यां च** नगर्यां स्वच्छासु-निर्मलासु विविधमणिभिः-नीलपीतादिभेदभिन्नै रत्नैर्निर्मिता-रचिता या वासभवनानां-शयनीयगृहाणां भव्यभित्तयः-चारुकुड्यानि तासु प्रियतमाः-विलासिन्यः स्वां छायां-स्वप्रतिबिम्बं अवलोकयन्त्यः-वीक्षमाणाः कृता अपरस्त्रीणां-सपत्नीनां शङ्कायकाभिस्ताः कृतापरस्त्रीशङ्काः, कथमपि-कृच्छ्रेण प्रियैः-भर्तृभिः प्रत्यानीयन्ते-अनुनीयन्ते प्रसाद्यन्ते । गृहभित्तिषु स्वप्रतिबिम्बं पश्यन्त्यो मुग्धाः सपत्नीः शंकंते, ततः प्रियतमैर्महता कष्टेन ताः प्रतिबोध्यन्ते, यदुतैताः सपत्न्यो न भवन्ति किन्तु भवतीनां प्रतिबिम्बमिति ।

तथा **यस्यां च** पुर्यां स्वर्गा इव मार्गाः सन्ति । किम्भूता मार्गाः ? दिवि भवैरिव दिव्यैर्देवकुलैः[१] देवगृहैरलङ्कृताः दिव्यदेवकुलालङ्कृताः । किम्भूताः स्वर्गाः ? दिव्यैः-स्वर्गोद्भवैः कल्पद्रुमादिभिस्तथा देवानां कुलैश्च-समूहैरन्वयैर्वा अलङ्कृताः । तथा यस्यां सागरा इव अब्धय इव नागराः-पौराः । किम्भूताः नागराः ? सततं-सदा अपांसु-रेणुरहितं वसनं-वस्त्रं येषां ते अपांसुवसनाः । "**पंसेर्दीघश्च, [ ] पसि नाशने**" [पा० धा०

---

१. दिव्यैः—रम्यैर्देवकुलैः अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

१७३६] इत्यस्मादुप्रत्ययो दीर्घश्च भवति पांसुः । पक्षे, किम्भूताः सागराः ? अपां-अम्भसां सुष्ठु वसन्त्येष्विति सुवसनाः । अपामिति "**कर्त्तरि षष्ठी**" [ ] जलवासा इत्यर्थः । तथा यत्र वनानीव भवनानि-गृहाणि । किम्भूतानि भवनानि ? सह मत्तवारणैः-मत्तालम्बैर्वर्तन्त इति समत्तवारणानि । किम्भूतानि वनानि ? सह मत्तवारणैः-समदगजैर्वर्तन्त इति समत्तवारणानि। तथा यत्र स्वर्गभूपा इव-शक्रा इव कूपाः । किम्भूताः कूपाः ? सुरसेन-शोभनजलेन अन्विताः-युताः । पक्षे, स्वर्गभूपास्तु सुरसेनया-त्रिदशसैन्येनान्विताः । तथा यत्र हारा इव-मुक्तावल्य इव विहाराः-चैत्यानि सन्ति। किम्भूता विहाराः ? अधिकं-सोत्कर्षं यथा भवति तथा धरोद्देशं-[१]पृथिवीप्रदेशं उद्भासयन्तः-विभूषयन्तः । पक्षे, किम्भूता हाराः ? कन्धरोद्देशं-शिरोधिप्रदेशं अधिकृत्य अधिकन्धरोद्देशं ग्रीवामित्यर्थः । विभूषयन्तः विभक्त्यर्थेऽव्ययीभावः ।

तथा **यस्यां** च नगर्यां अन्तः-नगरीमध्ये प्रचुराः-बहुलाः प्रासादाः-देवभूपगृहाः, बहिश्च वारणेन्द्राः-गजाः, ईदृग्विधा दृश्यन्ते । किम्भूताः प्रासादाः ? बहुलाः क्षणाः-उत्सवा भूमिका वा येषु ते बहुलक्षणाः । "**क्षणः कालविशेषे स्यात् पर्वण्यवसरे महे**" इत्या**द्यनेकार्थः** [२।१३६] । पुनः किम्भूताः ? सुधा-लेपविशेषः सा विद्यते येषु ते सुधावन्तः । किम्भूता वारणेन्द्राः ? बहूनि लक्षणानि येषां ते, तथा सुष्ठु धावन्तः-वेगेन गच्छन्तः । तथा यस्यां पुर्यां अन्तः-मध्ये सङ्गीतकशालाः[२] प्रेक्षणनिमित्तप्रयुक्तगीत-नृत्यवाद्यत्रयं सङ्गीतं तदेव संगीतकं तस्य शालाः-गृहाः, बहिश्च कमलैरुपलक्षिता दीर्घिकाः-वाप्यः कमलदीर्घिकाः, क्रीडार्थं कमलदीर्घिकाः-क्रीडाजलाधाराः समालोक्यन्ते। किम्भूताः सङ्गीतकशालाः ? सुशोभितः-अतिशयेन शोभायुक्तो रङ्गः-नृत्यस्थानं यासु ताः । किम्भूता दीर्घिकाः ? सुशोभिनस्तरङ्गा यासु ताः सुशोभिततरङ्गाः । तथा यत्र अन्तः-मध्ये कथमपि महता कष्टेन पण्यस्त्रियः-वाराङ्गना अभिगम्यन्ते-प्राप्यन्ते, बहिश्च क्षेत्रभूमयो-ऽभिगम्यन्ते-अतिक्रम्यन्ते । किम्भूताः पण्यस्त्रियः ? बहुधा-अनेकैः प्रकारैः, अन्यैर्विटै-र्निरुद्धा-वेष्टिता, अतएव दुःप्रापाः । किम्भूताः क्षेत्रभूमयः ? बहुभिर्धान्यैर्निरुद्धाः, अत एव दुरतिक्रमणीयाः । तथा यत्र अन्तः-मध्ये सभा, बहिश्च सहकारवनराजयः-आम्रकाननपंक्तयः शोभन्ते । किम्भूताः सभाः ? नाना-अनेकविधा ये आशुकवयः शीघ्रकवयस्त एव विभूषणं-मण्डनं यासां ताः। किम्भूता आम्रवनराजयः ? नाना-अनेकवर्णाः ये शुकाः-पक्षिविशेषास्तैर्विभूष्यन्ते यास्ताः नानाशुकविभूषणाः । तथा यत्र अन्तः-पुरीमध्ये विपणयः-हट्टाः, बहिश्च सलिलाशयाः-जलाधारा विराजन्ते । किम्भूता विपणयः ? सुगन्धीनि द्रव्याणि पण्यमेषामिति सौगन्धिकाः-वणिजस्तेषां प्रसरः-प्रणयो येषु ते । "**प्रसरस्तु सङ्गरे प्रणये**

१. पृथ्वीं अनू० । २. संगीतकलाः अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जवे**" इत्यनेकार्थः [३।६०७] । पक्षे, किम्भूताः सलिलाशयाः ? सौगन्धिकानां-कल्हाराणां प्रसरः-प्रवृत्तिर्येषु ते । **टिप्पनककारेण** तु प्रसारा इति पाठमधिकृत्य व्याख्यायि, प्रसारः-लघ्वापणो विस्तारश्चेति ।

**किम्बहुना**-किं बहु व्यावर्ण्यते तस्याः सकलसमृद्धिमत्त्वात् ।

**भूमयो बहिरन्तश्च नानारामोपशोभिताः ।**
**कुर्वन्ति सर्वदा यत्र विचित्रवयसां मुदम् ॥३१॥**[१]

**भूमय** इति वृत्तम् । यत्र-यस्यां नगर्यां भूमयो बहिः-बाह्यभागे नाना-अनेकविधैरारामैरुपशोभिताः-विभूषिताः सत्यः, तथा अन्तश्च-मध्ये नाना-अनेकविधाभिर्लघुतरुणीवृद्धाभी रामाभिः-स्त्रीभिरुपशोभिताः सत्यो विचित्रवयसां-विविधपक्षिणां । पक्षे, विचित्रं वयः-तारुण्यं येषां ते तेषां रम्यवयसां यूनां च सर्वदा-शश्वत् मुदं-हर्षं कुर्वन्ति । बहिरारामोपशोभिता भूमयः पक्षिण आनन्दयन्ति, अन्तर्भूमयो रामोपशोभिताः यून आह्लादयन्तीति भावः । "**वयस्तारुण्ये बाल्यादौ खगे**" इत्यनेकार्थः [२।६०३] ॥३१॥

**यस्यां च भक्तभाजो[१] देवतायतनेषु देवताः ससन्निधाना[२] दृश्यन्ते हट्टेषु वणिग्जनाः । अक्षरसावधानाः कविगोष्ठीषु कवयो विलोक्यन्ते द्यूतस्थानेषु द्यूतकाराः[३] । कान्तारागप्रियाः करिणो राजद्वारेषु सञ्चरन्ति [४]वेश्याङ्गणेषु भुजङ्गाः ।**

**यस्यां च चतुरुदधिवेलाविराजितसकलधराचक्रचूडामणौ मणिकर्मनिर्मितहर्म्यरम्यतया[५] सुरपतिपुरीपराभवकारिण्याम् । अव्ययभावो[६] व्याकरणोपसर्गेषु[७] न धनिनां धनेषु । दानविच्छित्तिरुन्माद्यत्करिकपोलमण्डलेषु[८] न त्यागिगृहेषु । भोगभङ्गो भुजङ्गेषु न विलासिलोकेषु । स्नेहक्षयो रजनिविरामविरमत्प्रदीपपात्रेषु न प्रतिपन्नजनहृदयेषु । कूटप्रयोगो गीततानविशेषेषु न व्यवहारेषु । वृत्तिकलहो वैयाकरणच्छात्रेषु न स्वामिभृत्येषु । स्थानकभेदश्चित्रेषु[९] न सत्पुरुषेषु ।**

**किम्बहुना !**

तथा **यस्यां च**-नगर्यां देवतायतनेषु-देवकुलेषु देवताः, हट्टेषु वणिग्जना ईदृग्विधा

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दृश्यन्ते । किम्भूता देवताः ? भक्ताः-भक्तिमन्तस्तैर्भज्यन्ते-सेव्यन्त इति भक्तभाजः । पुनः ससन्निधानाः भक्तानां नैकटयभाजस्तत्क्षणं कृतसान्निध्या इत्यर्थः । किम्भूता वणिग्जनाः ? भक्तं-अन्नं भजन्तीति भक्तभाजः । कादम्बिका हि आपणे भक्तं कृत्वा विक्रीणन्तीति । तथा सह सता-प्रधानेन निधानेन[1] इति ससन्निधानाः-सम्यक्निधियुक्ताः । "**भक्तमन्ने तत्परे च**" इत्य**नेकार्थः** [२।१८५] । तथा यत्र पुर्यां कविगोष्ठीषु-विद्वत्पर्षत्सु कवयो, द्यूतस्थानेषु-दुरोदरमन्दिरेषु च द्यूतकारा ईदृग्विधा विलोक्यन्ते । किम्भूताः कवयः ? अक्षरेषु-वर्णेषु युक्तायुक्तविचारणे सावधानाः । किम्भूता द्यूतकाराः ? अक्षः प्रासकः, अक्षरसे-पाशकरागे स्थितमवधानं-चित्तैकाग्र्यं येषां ते तथाविधाः । तथा यत्र राजद्वारेषु करिणः-गजाः, वेश्याङ्गणेषु भुजङ्गाः-गणिकापतयश्च सञ्चरन्ति-क्रीडन्ति । किम्भूताः करिणः ? कान्तारे-वने अगाः-सल्लक्यादयस्ते प्रिया-इष्टा येषां ते कान्तारागप्रियाः । किम्भूताः भुजङ्गाः ? कान्तासु-स्त्रीषु यो रागः-अनुरागः स प्रियो येषां ते तथाविधाः ॥

पुनः पुरीं वर्णयितुमुपक्रमते-

**यस्यां चे**ति । चतुर्णामुदधीनां वेला[2]-मर्यादा तीरं जलवृद्धिर्वा तया विराजितं यत्सकलधराचक्रं-समस्तभूमण्डलं तत्र चूडामणिः-शिरोमणिरिव या सा तस्यां सकल-भूवलयमण्डनभूतायामित्यर्थः । "**वेला बुधस्त्रियां काले सीमनीश्वरभोजने । अक्लिष्ट-मरणेऽम्भोधेस्तीरनीरविकारयोः**" इत्य**नेकार्थः** [२।५२२-२३] । तथा मणिकर्मणा-स्फटिकादिरत्नरचनया निर्मितानि-कृतानि यानि हर्म्याणि-धनिनां गेहानि तेषां रम्यतया-चारुतया कृत्वा सुरपतेः-इन्द्रस्य या पुरी-अमरावती तस्याः पराभवन्ति-तिरस्कारं करोतीत्येवंशीला या सा, इन्द्रपुर्य्या अपीयमधिकशोभावतीत्यर्थः । तथाविधायां[3] यस्यां च नगर्यां व्याकरणे-शब्दशास्त्रे ये उपसर्गाः-प्रादयो विंशतिस्तेषु अव्ययभावः-अव्ययत्वं दृश्यते । "**निपाताश्चोपसर्गाश्च अव्ययसंज्ञकाः**[4]" [ ] इति वचनात् । धनिनां धनेषु दानादिनोपयोगः-व्ययस्तस्य भावः सत्ता व्ययभावः, न व्ययभावो अव्ययभावः स न दृश्यते । दातृत्वेन धनिनो धनानि दानादिषु नियोजयन्ति[5] तेन धनाव्ययभावो नालोक्यते । तथा यस्यां पुर्यां उन्माद्यन्तः-मदोन्मत्ता ये करिणः-हस्तिनस्तेषां कपोलमण्डलेषु-गण्डस्थलेषु दानविच्छित्तिः-मदशोभा दृश्यते, न त्यागिगृहेषु, दातृमन्दिरेषु दानस्य-त्यागस्य विच्छित्तिः-[6]छेदो न[7] दृश्यते, सदा धनं ददातीत्यर्थः । तथा यत्र नगर्यां भुजङ्गेषु-फणिषु भोगस्य-सर्पवपुषो भङ्गः-आमर्द्दनं कुण्डलीकरणं इति यावत् दृश्यते, न विलासिलोकेषु-कामुकजनेषु

---

१. निधानेन वर्तन्त अनू० । २. या वेला अनू० । ३. तथाविधायां स्थाने 'तथा' अनू० । ४. अव्ययीभावसंज्ञकाः अनू० । ५. योजयन्ति अनू० । ६. विच्छेदो अनू० । ७. 'न' नास्ति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भोगस्य-विलासस्य भङ्गः-व्याघातो दृश्यते । तथा यत्र रजन्या विरामे-अत्यये विरमन्तः-निःप्रभीभवन्तो ये प्रदीपास्तेषां पात्रेषु-तैलाधारेषु स्नेहस्य-तैलादेः क्षयः-विनाशो दृश्यते, चतुर्यामोचिततैलस्य तत्पात्रेषु क्षिप्तत्वात् तद्विरामे तस्य क्षयो भवत्येव, न प्रतिपन्नानि-परस्परप्रतीतानि च तानि जनहृदयानि च प्रतिपन्नजनहृदयानि तेषु स्नेहस्य-प्रेम्णः क्षयो दृश्यते, स्नेहलजनचित्तेषु न स्नेहक्षयो वीक्ष्यत इत्यर्थः । विरमदिति "**व्याङ्परिभ्यो रमः**" [**पा० सू०** १।३।८३] इति परस्मैपदे लटः शत्रादेशः । तथा यत्र गीतस्य ताना द्वये—एके कूटाख्याः पञ्चत्रिंशत्, अन्ये च शुद्धाख्याश्चतुर्दश, एवं एकोनपञ्चाशत् तेषां विशेषेषु विभेदेषु कूटानां-तानविशेषाणां प्रयोगः-व्यापारो दृश्यते, न व्यवहारेषु-वणिक्कर्मसु कूटस्य-कपटस्य प्रयोगः-व्यापारो दृश्यते, । यत्र न केऽपि वणिजः कमपि ग्राम्यं व्यापारे छलयन्तीत्यर्थः । तथा वैयाकरणच्छात्रेषु शब्दशास्त्राध्ययनप्रवृत्तशिष्येषु वृतिः-शास्त्रविवरणं तया कलहः-एके छात्राः पठन्ति इदमस्यां व्याकरणवृत्तौ व्याख्यातमस्ति, अपरे वदन्ति नेदमित्यादिरूपो वृत्तिकलहो दृश्यते, न स्वामिश्च[1] भृत्याश्च-सेवकाः स्वामिभृत्यास्तेषु वृत्तेः-आजीविकायाः कलहो दृश्यते । स्वामिनो वदन्ति नैतावद्देयमुक्तं भृत्याश्च[2] वदन्त्येतावदुक्त-मित्येवंरूपो वृत्तिगतः कलहो न जायत इत्यर्थः । स्वामिभिः प्रतिश्रुतदेय[3]धनदानात्, भृत्यैश्च तदधिकाग्रहणादिति । तथा यत्र चित्रेषु-नानावर्णकरचितनानारूपेषु स्थानकभेदो दृश्यते । तत्र सम्मुखं पराङ्मुखं वा सम्पूर्णावयवं पार्श्वगतं, ततो भागद्वयेन एकतः पतता अन्यत्र च वटता क्रमेण ऋजु-ऋज्वागत-द्व्यर्द्ध-अक्ष-अर्धऋजुसंज्ञानि चेति स्थितिस्थानकानि पञ्च, गमनमालीढं त्वरितं त्रिभङ्गमित्याख्यानि चत्वारि गच्छत् स्थानकानीति, एवं स्थानकानां नवानां भेदस्त्रिष्विति । न सत्पुरुषेषु सचिवादिषु स्थानकस्य-रक्षणीयनगरादेर्भेदः-उपजापो दृश्यते । नान्यैः प्रतिपक्षभूपैः सह सन्धि विधाय नृपबन्धादिना तेभ्य एतन्नगरं समर्पयन्तीति भावः सत्पुरुषत्वात् ।

**किम्बहु**ना-किं बहु व्यावर्ण्यतेऽस्याः सर्वस्याप्यत्रावस्थितस्य वस्तुनो व्यावर्णनीयत्वात् ।

**त्रिदिवपुरसमृद्धिस्पर्धया भान्ति यस्यां[1],**
**सुरसदनशिखाग्रेष्वाग्रहग्रन्थिनद्धाः ।**
**नभसि पवनवेल्लत्पल्लवैरुल्लसद्भिः,**
**परममिह वहन्त्यो वैभवं वैजयन्त्यः ॥३२॥**

---

१. स्वामिनश्च अनू० । २. 'च' नास्ति अनू० । ३. 'देय' नास्ति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**त्रिदिवे**ति वृत्तम् । इह-निषधदेशे यस्यां-नगर्यां सुराणां सदनानि-प्रासादा विमानानि च तेषां यानि शिखराग्राणि-कूटाग्रभागास्तेषु वैजयन्त्यः पताका भान्ति-शोभन्ते । किम्भूताः ? आगृह्यन्ते एभिरिति आग्रहाः-अंकुटकास्तेषु ये ग्रन्थयस्तैर्नद्धाः-बद्धाः । उत्प्रेक्ष्यते-त्रिदिवपुरस्य-अमरावत्या या समृद्धिः-सम्पत्तस्याः स्पर्द्धया इव-संहर्षेणेव । अन्योऽपि यः स्पर्द्धते स किल पताकां बध्नातीति स्थितिः । किम्भूता वैजयन्त्यः ? नभसि उल्लसद्भिः-राजमानैः पवनेन-मरुता वेल्लन्तः-चलन्तो ये पल्लवाः-अञ्चलास्तैः परमं-उत्कृष्टं वैभवं-माहात्म्यं शोभातिशयं वहन्त्यः-दधत्यः । लुप्तोत्प्रेक्षा ॥३२॥

पुनर्नगरीवर्णनमाह-

**अपि च-**

**चार्वी सदा सदाचारसज्जसज्जनसेविता ।**
**नगरी न गरीयस्या सम्पदा सा विवर्जिता ॥३३॥**

**अपि चे**ति । सा नगरी-निषधा गरीयस्या-उत्कृष्टया सम्पदा-समृद्ध्या विवर्जिता-रहिता न, किन्तु अतिशयेन सम्पदा सहितेत्यर्थः । निषेधमुखेन विधिप्रतीतिस्तत्सातिशयत्वं द्योतयति । किम्भूता ? चार्वी-मनोज्ञा, तथा सदा-अजस्रं सदाचारसज्जाः-साध्वाचारप्रवणा ये सज्जनाः-साधवस्तैः सेविता-आश्रिता ॥३३॥

एवं नगरीवर्णनाममिधाय तदधीश्वरप्रवरनलवर्णनां कर्तुमुपक्रमते-

**[१]यस्यामासीन्निजभुजयुगलबलविदलितसकलवैरिवृन्दसुन्दरीनेत्र-नीलोत्पलगलद्बहलबाष्पपूरप्लवमान[२]प्रतापराजहंसः, सकलजलनिधि[३]-वेलावननिखातकीर्त्तिस्तम्भभूषितभुवनवलयः, वसुन्धराभोग[४] इव बहुधारणक्षमः, प्रसाद[५] इव नवसुधाहारी, रविरिवानेकधामाश्रयः । दनुजलोक[६] इव सदानवः स्त्रीजनस्य, वसिष्ठ इव विश्वामित्रत्रासजननः, जनमेजय इव परीक्षितनयः, परशुराम इव परशुभाषितः, राघव इवालघु-कोदण्डभङ्गरञ्जितजनकः, सुमेरुरिव जातरूपसम्पत्तिः, तुहिनाचल इव पुण्यभागीरथीसहितः, चिन्तामणिः प्रणयिनां, अग्रणीः साङ्ग्रामिकाणां, आदर्शो दर्शनीयानां, उपाध्यायोऽध्ययनविदां[७], आचार्यः शौर्यशालिनां, उपदेशकः शस्त्रशास्त्रस्य[८], परिवृढो दृढप्रहारिणां, अग्रेगण्यः[९] पुण्य-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कारिणां, अपश्चिमो विपश्चितां, अपाश्चात्यस्त्यागवतां, अचरमश्चातुर्याचार्याणां, अपर्यन्तभूभाराधारस्तम्भभूतभुजकाण्डकीलितशालभञ्जिकायमानविजयश्रीः, श्रीवीरसेनसूनुः, समस्तजगत्प्रासादशिरःशेखरीभूतकान्तकीर्त्तिध्वजो, राजा, राज्यलक्ष्मीकरेणुकाचापलसंयमनशृङ्खलः, नलो[१०] नाम ।**

**यस्या**मिति । यस्यां-नगर्यां वीरसेनस्य-वीरसेननाम्नो राज्ञः सूनुः-आत्मजो नलो नाम इति प्रसिद्धो राजा आसीदिति संटङ्कः । किम्भूतो नलः ? निजभुजयुगलबलेन-आत्मबाहुद्वयसामर्थ्येन विदलितं-विध्वस्तं यत्सकलवैरिवृन्दं-समस्तारिकदम्बकं तस्य या सुन्दर्यः-वध्वस्तासां नेत्रनीलोत्पलेभ्यो गलन्-श्रवन् यो बहलः-निविडो बाष्पपूरः-अश्रुप्रवाहस्तस्मिन् प्लवमानः-तरन् प्रताप एव राजहंसो यस्य सः । एतावता सर्ववैरिविनाशेन प्रतापाधिक्यं तस्य दर्शितम् । तथा सकलजलनिधीनां वेलावनेषु-तीरकाननेषु सकलमण्डल-विजयात् निखाता-निक्षिप्ता [१]यत्कीर्त्तिस्तम्भाः-जयस्तम्भास्तैर्विभूषितं-शोभितं भुवनवलयं-भूमण्डलं येन सः । वेलापदेनैवाब्धितीरप्राप्तौ जलनिधीति पदं करिकलभादिवदुक्तपोषकत्वान्न दुष्टम् । पुनः किंविशिष्टः ? बहुधा-अनेकशो रणक्षमः-सङ्ग्रामकुशलः । क इव ? वसुन्धरायाः-धराया "आभोग इव-परिपूर्णता इव, सोऽपि बहूनां गिर्यादीनां धारणे क्षमः-समर्थः । "**आभोगः परिपूर्णत्वे वरुणे छत्रयत्नयोः**" इत्य**नेकार्थः** [३।११५] । तथा नवसुधां अर्थात् देवद्विजसम्बद्धां हरतीत्येवंशीलः वसुधाहारी । क इव ? प्रसाद[२] इव-नृपमन्दिरमिव, स च नवया सुधया-लेपविशेषेण हारी-रम्यः । तथा अनेकधा-सप्ताङ्गत्वात् बहुधा या मा-राज्यलक्ष्मीस्तस्या आश्रयः-आधारः, "**स्वाम्यमात्यः सुहृत्कोशो राष्ट्रदुर्गबलानि च । राज्याङ्गानि प्रकृतयः**" [ ] इति राज्यसप्ताङ्गमुच्यते । क इव ? रविरिव, स च अनेकस्य-प्रचुरस्य धाम्नः-तेजस आश्रयो भवति । तथा सदा-नित्यं स्त्रीजनस्य-रमणीलोकस्य रम्यतया नवः-अपूर्व इव । क इव ? दनुजलोक इव, स च दानवैः सह वर्तत इति सदानवो भवति । पुनः किम्भूतो नलः ? विश्वेषां-समस्तानाममित्राणां-शत्रूणां त्रासं-भयं जनयतीति विश्वामित्रत्रासजननः । क इव ? वसिष्ठ इव ! स च कीदृक् ? विश्वामित्रस्य-गाधेयस्य त्रासजननः-भयकृत् । त्रिशङ्कु-नाम्नः क्षत्रियस्य विश्वामित्रेण सत्रं कारितमासीत् । ततो याज्ययाजकत्वेन तस्मै कुद्धो वसिष्ठः स्वनिर्वासं तस्य निवारितवान् इत्यागमः । पुनः किम्भूतो नलः ? 'परीक्षितनयः' परीक्षितः-विचारितो नयः-षाड्गुण्यं येन सः । क इव ? जनमेजय इव-नृपविशेष इव । स

१. ये अनू० । २. प्रासाद अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

च कीदृक् ? परीक्षितेरभिमन्योर्नृपस्य तनयः-सुतः परीक्षितनयः । तथा 'परशुभाषितः' परास्मिन्-उत्कृष्टे शुभे-कल्याणे आसितः-स्थितः । यद्वा, परेषां-जनानां शुभाय आसितः । क इव ? परशुराम इव । स च कीदृक् ? परशुना-कुठारेण भासितः-दीप्तः । पुनः किम्भूतो नलः ? अलघुकः-गौरवार्हस्तथा दण्डस्य-वधस्य परिक्लेशार्थलक्षणस्य भङ्गेन-मुक्त्या रञ्जिताः-आवर्जिताः, प्रमोदिता जना एव जनका । येन सः । यद्वा, दण्डः-गर्वस्तस्य भङ्गः-अपनयनं विनय इत्यर्थस्तेन रञ्जितो जनकः-पिता येन सः । यद्वा, दण्डः-चतुर्थोपायस्तस्य भङ्गेन-मोचनेन रञ्जितलोकः । "**दण्डः सैन्ये दमे यमे ।** [१२१] **मानव्यूहग्रहभेदेष्वष्वेऽर्कानुचरे मधि । प्रकाण्डे लगुडे कोणे चतुर्थोपायगर्वयोः ।**" इत्य**नेकार्थः** [२।१२१-१२२] । क इव ? राघव इव-राम इव । स च कीदृक ? अलघु-कोदण्डस्य-शाम्भवबृहद्धनुषो भङ्गेन रञ्जितः-हर्षितो जनकः-जनकाख्यनृपो येन सः । पुनः किम्भूतो नलः ? 'जातरूपसंपत्तिः' जाता-सम्भूता रूपसम्पत्तिः-सौन्दर्यसमृद्धिर्यस्य सः । "**रूपं तु श्लोकशब्दयोः । पशावाकारे सौन्दर्ये नाणके नाटकादिके ।** [३०१] **ग्रन्थावृत्तौ स्वभावे च ।**" इत्य**नेकार्थः** [२।३०१-३०२] । क इव ? सुमेरुरिव-मेरुरिव । स च कीदृक् ? जातरूपं-सुवर्णं सम्पत्तिः-सम्पत् यस्य सः । पुनः कीदृक् नलः ? पुण्ये भजतीत्येवं शील पुण्यभागी, तथा रथोऽस्यास्तीति रथी-रथवान्, तथा सह हितैः-सुखकारिभिर्मित्रैर्वर्तत इति सहितः । क इव ? तुहिनाचल इव-हिमाद्रिरिव । स च कीदृक् ? पुण्या-पवित्रा या भागीरथी-गङ्गा तया सहितः-अन्वितः । पुनः किम्भूतः ? प्रणयिनां-अर्थिनां चिन्तामणिरिव-चिन्तितप्रदो मणिरिव । यथा चिन्तामणिश्चिन्तितं सर्वं दत्ते तथा सोऽपि । तथा सङ्ग्रामाय प्रभवन्तीति सांग्रामिकाः-सांयुगीनास्तेषां मध्ये अग्रणीः-मुख्यः, महासाङ्ग्रामिक इत्यर्थः । सन्तापादिभ्यश्चतुर्थ्यन्तेभ्यः प्रभवतीत्यर्थे [**तस्मै प्रभवति सन्तापादिभ्यः** [**पा० सू०** ५।१।१०१] । तथा दर्शनीयानां-दर्शनार्हाणां वस्तूनां मध्ये आदर्श इव-दर्पण इव यः सः । यथा आदर्शः सुतरां दर्शनीयो भवति विघ्नविनाशकत्वात् । "**आदर्शदर्शनादेव सर्वे विघ्नाः प्रलीयन्ते**" [  ] इति वचनात् । तथाऽयं नलोऽपि सुतरां दर्शनीय इति भावः । तथा अध्ययनं-पठनं विदन्तीति अध्ययनविदस्तेषां मध्ये उपाध्यायः-अध्यापकः, प्रधानोऽध्ययनविदित्यर्थः । तथा शौर्यशालिनां-शूराणां मध्ये आचार्यः-मुख्यः । तथा शस्त्रशास्त्रस्य-धनुर्वेदस्य उपदेशकः-उपदेष्टा कथकः । तथा दृढं-सस्थाम [1]प्रहरन्तीत्येवंशीला दृढप्रहारिणस्तेषां दृढप्रहार-दातृणां मध्ये परिवृढः-स्वामी । तथा पुण्यकारिणां-धर्मकारिणां मध्ये अग्रे गण्यत इति अग्रेगण्यः, मुख्य इत्यर्थः । तथा विपश्चितां-विदुषां मध्ये अपश्चिमः-प्रधानः । तथा त्यागवतां-दातृणां मध्ये अपाश्चात्यः-प्रथमः । तथा

---

१. प्रहरति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चातुर्याचार्याणां-दक्षत्वशिक्षकाणां मध्ये अचरमः-प्रवरः, परमश्चातुर्यविनेतेत्यर्थः । तथा अपर्यन्तः-प्रचुरो यो भूभारस्तस्याधारे-धरणे स्तम्भभूते-स्तम्भोपमे आयतत्त्वं[१] साम्याद् ये भुजकाण्डे-बाहुदण्डे[२] तयोः कीलिता-न्यस्ता शालभञ्जिकेवाचरन्ती शालभञ्जिकायमाना विजयश्रीः-जयलक्ष्मीर्येन सः । अन्यापि पुत्रिकास्तम्भे कील्यत इति छायार्थः । पुनः किम्भूतः ? समस्तं जगदेव प्रासादः-सौधं तस्य शिरसि शेखरीभूतः-अवतंसतया जातः कान्तः-मनोज्ञः कीर्त्तिरेव ध्वजः-पताका यस्य सः । यस्य कीर्त्तिर्जगति सर्वेषामप्युपरि विजृम्भितेत्यर्थः । जगतः प्रासादः कीर्त्तेश्च ध्वज उपमानम् । तथा राज्यलक्ष्मीरेव करेणुकाः-हस्तिनी तस्याः यच्चापलं-चाञ्चल्यं तस्य संयमने निवारणे शृङ्खलेव यः सः । यथा शृङ्खलया करेणुकाचापल्यं निषिध्यते तथा येन राज्यश्रीचापल्यं निषिद्धं । राज्यश्रीस्तं विहायान्यत्र न यातीति भावः ।

अथ नलीयगुणवर्णना चिकीर्षया आह—

**यस्येन्दुकुन्दकुमुदकान्तयः सकललोककर्णप्रियातिथयो गुणाः सततमेकब्रह्माण्डसम्पुटसङ्कीर्णनिवासव्यसनविषादिनः पुनरनेकब्रह्माण्डकोटिघटनामभ्यर्थयमाना[१] इव भगवतो विश्वसृजः कमलसम्भवस्य कर्णलग्नाः[२] स्वर्लोक[३]मधिवसन्ति स्म ।**

**यस्मिंश्च राजनि जनितजनानन्दे नन्दयति मेदिनीम्, गीतेषु जातिसङ्कराः, तालेषु नानालयभङ्गाः, नृत्येषु विषमकरणप्रयोगाः, वाद्येषु दण्डकरप्रहाराः, पुण्यकर्मारम्भेषु प्रबन्धाः, शारिद्यूतेषु[४] पाशप्रयोगाः, पुष्पितकेतकीषु हस्तच्छेदाः, न्यग्रोधेषु[५] पादकल्पनाः, कञ्चुकमण्डनेषु नेत्रविकर्तनानि[६], [७]आसन् । न प्रजासु[७] ।**

**यस्येति** । यस्य-नलस्यः गुणाः-शौर्यौदार्यधैर्यादयो भगवतः-ऐश्वर्ययुक्तस्य विश्वं सृजतीति विश्वसृट् तस्य विश्वसृजः कमलसम्भवस्य-ब्रह्मणः कर्णलग्नाः-विज्ञापनार्थं निकटीभूताः स्वर्लोकमधिवसन्ति स्म-निवासंचकुः । "**उपान्वध्याङ्वसः**" [**पा० सू०** १।४।४८] इति वसतेराधारः कर्मसंज्ञः स्यात् । किमिति ? ते तत्र जग्मुरित्यत[३] आह—सततं-निरन्तरं एकस्मिन्नेव ब्रह्माण्डसम्पुटे सङ्कीर्णः-आकुलो यो निवासः-अवस्थानं स एव व्यसनं-विपत्तिस्तेन विषीदन्तीत्येवंशीलाः, प्राचुर्यादेकस्मिन् ब्रह्माण्डे अमान्त इत्यर्थः ।

१. आयतत्वपीनत्वसाम्याद् अनू० । २. बाहुदण्डौ अनू० । ३. इत्याह अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुनरनेका या ब्रह्माण्डकोट्यस्तासां सा घटना-निर्माणं तामभ्यर्थयमाना इव[१] । अन्योऽपि स्वनिवास-भूमिसांकीर्ण्ये स्वस्वाम्यर्थं[२] बहुभूम्यर्थं प्रार्थयमानस्तत्कर्णयोर्विज्ञप्तिं कुरुते, तथा गुणा अपि स्वनिवासस्थाननिर्मापणविज्ञप्तये ब्रह्मकर्णलग्नाः बहुब्रह्माण्डघटनां कारयन्तीवेत्यर्थः । स्वर्गिभिरपि तत्र तद्गुणा वर्ण्यन्त इति भावः । किम्भूता गुणाः ? इन्दुश्च कुन्दश्च-पुष्पविशेषः कुमुदानि च-श्वेतकमलानि इन्दुकुन्दकुमुदानि तानीव उज्ज्वलसाम्यात्[३] कान्तिः-शोभा येषां ते । तथा सकललोकानां कर्णयोः प्रियातिथय इव-वल्लभाभ्यागता इव ये ते तथा । यथा प्रियातिथयः सबहुमानं प्रवेश्यन्ते तथा यस्य गुणा अपि साभिलाषं श्रूयन्त इत्यर्थः ।

तथा यस्मिंश्च जनितो जनानामानन्दो येन स तस्मिन् जनितजनानन्दे राजनि-नलनृपे मेदिनीं-भुवं नन्दयति-समृद्धिं कुर्वाणे सति गीतादिष्वेव जातिसङ्करादीनि आसन्, न प्रजासु । तथाहि—गीतेषु-गानेषु जातयः-नन्दयन्तीप्रभृतयोऽष्टादश तासु सङ्कराः-मिश्रप्रतीतयः, न प्रजासु जातयः-विप्राद्यास्तासां सङ्कराः-अनुचितसम्बन्धेन विप्लवाः । तथा तालेषु-चञ्चत्पुटादिषु नाना-अनेक स्वरविशेषविशिष्टा लयाः-द्रुतमध्यविलम्बितलक्षणास्तेषां भङ्गाः-विच्छित्तयः, न प्रजासु नाना-अनेकविधा आलयाः-गृहास्तेषां भङ्गाः-विनाशाः, अपराधाकरणात् । तथा नृत्तेषु विषमाणि-कर्तुं दुःशकानि यानि करणानि-तलपुष्पपटादीनि अष्टोत्तरसंख्यानि तेषां प्रयोगाः-व्यापाराः, न प्रजासु । विषम एव विषमकः, "**स्वार्थे कः**" । रणः-युद्धं तस्य प्रयोगाः-प्रवृत्तयः, न केऽपि परस्परं युध्यन्त इत्यर्थः । तथा वाद्येषु-आतोद्येषु दण्डः-कोणो वादनोपकरणं करः-पाणिस्तयो प्रहाराः-आघाताः, न प्रजासु दण्डः-वधादिः करः-राजदेयांशः[४] प्रहारः-घातनं पश्चाद् द्वन्द्वः दण्डकरप्रहाराः । तथा पुण्यकर्मणां-धर्मकर्त्तव्यानां ये आरम्भाः-उपक्रमास्तेषु पुण्यकर्मारम्भेषु प्रबन्धाः-सातत्यानि, नित्यं जनैः पुण्यकर्माण्येव क्रियन्त इत्यर्थः, न प्रजासु प्रकृष्टबन्धाः रज्वादिभिः । तथा शारिद्यूतेषु पाशः-बन्धस्तस्य प्रयोगाः, शारयो हि दायैर्बध्यन्ते । अक्षार्थस्तु पाशक एव प्रतीतः । न प्रजासु पाशः-बन्धनरज्जुस्तस्य प्रयोगाः, न कोऽपि रज्जुभिः कमपि बध्नातीत्यर्थः । तथा पुष्पितकेतकीषु हस्तः-केतकीगर्भस्तस्य छेदाः-विपाटनानि, न प्रजासु हस्तयोश्छेदाः कल्पनानि चौर्याद्यकरणात् । तथा न्यग्रोधेषु-वटेषु पादस्य-मूलस्य कल्पनाः-रचनाः, न प्रजासु पादयोः-चरणयोः कल्पनाः-कर्त्तनानि । तथा कञ्चुकमण्डनेषु-कञ्चुलिकाविभूषासु नेत्रं-वस्त्रविशेषस्तस्य विशेषेण-हृदयप्रमाणेन कर्त्तनानि-छेदनानि, न प्रजासु नेत्रयोः-नयनयोर्विकर्त्तनानि-खण्डनानि ।

---

१. तामभ्यर्थयमाना इव—प्रार्थयमाना इव अनू० । २. स्वस्वामिनं अनू० । ३. औज्ज्वल्यसाम्यात् अनू० । ४. राजदेयोंशः अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुनर्नलं वर्णयितुकाम आह--

यश्च कोऽप्यन्यादृश एव लोकपालः । तथाहि—अपूर्वो विबुधपतिः, अदण्डकरो धर्मराजः[१], अजघन्यः प्रचेता, अनुत्तरो धनदः ।

येन च[२] प्रचण्डदोर्दण्डमण्डप[३]मण्डलीविश्रान्तविजयश्रिया श्रवणोत्पलदलायमानमानिनीमानलुण्टाकलोचनेन पृथ्वी प्रिया च कामरूपधारिणी सा तेन मुक्ता ।

यस्याः सकलजनमनोहारिविशेषकम्, पृथुललाटमण्डलम्, अभिलषणीयकान्तयः कुन्तलाः, श्लाघनीयो नासिक्यभागः, बहुलवलीकः सरोमालिकालङ्कारश्च मध्यदेशः, प्रकटितकामकोटिविलासः काञ्चीप्रदेशः ।

किम्बहुना !

यस्याः कृष्णागुरु[४]चन्दनामोदबहुलकुचाभोगभूषणा नृत्यतीवाङ्गरङ्गे रमणीयतया निरुपमा नवा यौवनश्रीः ।

किञ्चान्यत् ।

अन्य एव नवावतारः स कोऽपि पुरुषोत्तमो यो न मीनरूपदूषितः, नाङ्गीकृतविश्वविश्वम्भराभारोऽपि[५] कूर्मीकृतात्मा, न वराहवपुषा क्लेशेन पृथ्वीं बभार, न च नरसिंहः समुच्छिन्न[६]हिरण्यकशिपुः, न बलिराजबन्धनविधौ वामनो दैन्यमकरोत्, नाऽपि रामो लङ्केश्वरश्रियमपाहरत्, नाऽपि[७] बुद्धः कल्किकुलावतारी !

किम्बहुना[८] !

**यश्चे**ति ? यश्च-नलः कोऽपि अपूर्वो विस्मयहेतोर्लोकं-जगत् पालयन्ति ये तेभ्योऽन्यादृश एव[१] लोकं-प्रजां पालयतीति लोकपालः । **तथाही**त्यादिना स्वोक्तमेव द्रढयति । यतो विबुधानां-देवानां पतिः-इन्द्रः सपूर्वः-पूर्वदिग्युक्तत्वात्, नलस्तु अपूर्वः-

१. अन्यादृश एव-विसदृश एव अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उत्कृष्टो विबुधानां-पण्डितानां पतिः । तथा अन्यो हि धर्मराजः-यमः दण्ड करे यस्य स दण्डकरः-दण्डपाणिः, नलस्तु न दण्डः-वधादिः करश्च-राजदेयोंऽशो यस्मादित्यदण्डकरः । तथा धर्मप्रधानो राजा धर्मराजः धर्मविजयित्वात् । त्रिविधो हि राजा-धर्मविजयी, लोभविजयी, असुरविजयी चेति । यो हि सेवया दण्डमात्रेण च तुष्यति स धर्मविजयी । यो हि परेषां श्रियं भुवं च गृह्णाति स लोभविजयी । यः श्रियं भुवं प्राणांश्च गृह्णाति सोऽसुरविजयीति विशेषः । तथा अन्यो हि प्रचेता-वरुणः सह जघन्यया-पश्चिमया वर्तत इति सजघन्यः, नलस्तु अजघन्यः-अकुत्सितः, तथा प्रकृष्टचेता-उदारमानसः । **"जघन्यं चरमे शिश्ने जघन्यं गर्हितेऽन्यवत्"** [**विश्व०** तृ० यान्त० ८२] । तथा अन्यो हि धनदः-कुबेरः सह उत्तरया दिशा वर्तत इति सोत्तरः, नलस्तु न विद्यते उत्तरः-उत्कृष्टो यस्मादित्यनुत्तरः, तथा धनं ददातीति धनदः ।

अपरं **येन च**-नलेन सातेन-सुखेन पृथ्वी प्रिया च भुक्ता-निर्विष्टा तत्फलास्वादनेन अनुभूतेत्यर्थः । किम्भूतेन येन ? प्रचण्डदोर्दण्ड एव-दीर्घभुजप्रकाण्डमेव मण्डपमण्डली-शोभनमण्डपस्तस्यां विश्रान्ता-श्रान्तिमपनीतवती विजयश्रीः-जयलक्ष्मीर्यस्य सः, अन्यापि या श्रान्ता भवेत् सा मण्डपमण्डल्यां विश्राम्यतीति छायार्थः। मण्डलीशब्दस्तनुयष्ट्या-दिवच्छोभावाचकः। पुनः किम्भूतेन ? श्रवणोत्पलदलमिव-विशालत्वनीलत्वसाम्यात् कर्णोत्पलपत्रमिव आचरती श्रवणोत्पलदलायमाने, तथा मानिन्यां[1] मानं लुण्टतः-चोरयत इत्येवंशीले मानिनीमानलुण्टाके, ये दृष्ट्वा मानिन्या मानो गलतीत्यर्थः । ईदृग्विधे लोचने-नेत्रे यस्य स तेन । **"जल्पभिक्षकुट्टलुण्टवृङ्गः षाकन्"** [**पा० सू०** ३।२।१५५] इति शीलार्थे लुण्टः षाकन् । सातेनेति यदमरसिंहः-**"शर्म सात सुखानि च"** इति [**अमर०** १।४।२५] । किम्भूता पृथ्वी ? कामरूपाः-प्राग्ज्योतिषाख्यदेशस्तान् धरतीत्येवंशीला कामरूपधारिणी ।

तथा **यस्याः**-पृथ्व्याः सकलजनमनांसि हरतीत्येवंशीलं विशेषकं-देशविशेषः । तथा पृथुलं-विशालं लाटमण्डलं-देशविशेषः पृथुललाटमण्डलं । तथा यस्या भुवः कुन्तलाः-देशविशेषाः । किम्भूताः ? अभिलषणीया-स्पृहणीया जनानां कान्तिः-शोभा येषु ते । तथा यस्याः नासिक्यस्य-देशविशेषस्य भागः-मध्यप्रदेशः[2] श्लाघनीयः । तथा यस्य भूमेरी-दृग्विधो मध्यदेशः । किम्भूतो ? बह्व्यो लवल्यः-लताविशेषा यस्मिन् स बहुलवलीकः । **"नद्यृतश्च"** [पा० सू० ५।४।१५३] इति बहुव्रीहौ कप् । तथा सरसां मालिकाश्रेणिः सैव अलङ्कारः-मण्डनं यस्य सः । तथा यस्या भुव ईदृग्विधाः काञ्च्याः-देशविशेषस्य प्रदेशो विभागः । किम्भूतः ? प्रकटितः-प्रकाशितः कामकोटिनाम्न्या देव्या विलासः-

१. मानिन्या अनू० । २. मध्यादिप्रदेशः अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अभिलषितार्थपूरणलक्षणो यस्मिन् सः । किम्भूता प्रिया ? काम्यत इति कामं-अभिलषणीयं रूपं [१]धरन्तीत्येवंशीला । यद्वा, कामं-अतिशयेन रूपधारिणी । तथा यस्याः-कान्तायाः सकलजनमनोहारिविशेषकं-तिलकम् । तथा यस्याः पृथुः-विस्तीर्णं ललाटमण्डलं अलिकम् । तथा यस्या रमण्याः अभिलषणीया कान्तिः-कृष्णस्निग्धच्छाया येषां ते, तथाविधाः कुन्तलाः-केशाः । तथा यस्याः नासिकायां भवो नासिक्यः भागः-प्रदेशः श्लाघनीयः-वर्णनीयः । तथा यस्याः-प्रियाया ईदृग्विधो मध्यदेशः-उदरम् । कीदृक् ? बहुलवल्यः-उदररेखायत्र स बहुलवलीकः । पुनः कीदृक् ? सह रोमालिकालङ्कारेण-रोमपंक्तिलक्षणमण्डनेन वर्तत इति सरोमालिकालङ्कारश्च । तथा यस्याः-प्रियाया ईदृशः काञ्चीप्रदेशः-श्रोणितटं, कीदृक् ? प्रकटितः-दर्शितः कामकोटेः-अनङ्गोत्कर्षस्य विलासो येन सः प्रकटितकामकोटिविलासः ।

**किम्बहु**ना तस्याः भूमेः कान्तायाश्च किं बहु व्यावर्ण्यते ! सर्वसुखकारणत्वात् तदेव वर्ति—

**यस्या** इति । यस्याः-पृथिव्या अङ्के-अङ्काख्यदेशे एव रङ्गे-नर्त्तनस्थाने निरुपमानः-शैत्यमान्द्यसौरभाख्यगुणत्रययुक्तत्वेन प्रधानो यो वायुस्तस्मिन् निरुपमवायौ सति वनश्रीः-काननलक्ष्मी रमणीयतया-चारुतया नृत्यतीव-क्रीडतीव, अत्र वाततरलनमेव नर्त्तनम् । किम्भूता वनश्रीः ? कृष्णा-पिप्पली अगुरुचन्दनौ-वंशिकमलयजौ तेषामामोदः-परिमलस्तथा बहूनां लकुचानां आभोगः-विस्तारस्तौ भूषणं यस्याः सा । पक्षे, यस्याः प्रियाया अङ्गं-शरीरमेव रङ्गः-नृत्यभूमिस्तस्मिन् निरुपमा नवा-प्रत्यग्रा यौवनश्रीः-तारुण्यलक्ष्मी रमणीयतया नृत्यतीव, यूनः प्रेक्ष्यकटाक्षादिविलासकरणात् । किम्भूता यौवनश्रीः ? चर्चावशात् कृष्णागुरुचन्दनयोः-कालागुरुहरिचन्दनयोरामोदेन सुरभिणा-गन्धेन बहुलः-व्याप्तः कुचाभोग एव-स्तनविस्तार एव भूषणं-मण्डनं यस्याः सा तथाविधा ।

**किञ्चान्यत्**-अस्य किञ्चिदन्यदप्यद्भुतं वर्णनीयमस्ति । तथाहि—

कोऽन्यपरिच्छेद्यमहिमा, तथा नवः-पूर्वविलक्षणो अवतारः-जन्म यस्य स तथाभूतः । यद्वा, **"णु स्तुतौ"** [पा० धा० ११९०] इत्यस्य नवाः-स्तुतयोऽवतार्यन्तेऽस्मिन्निति नवावतारः-स्तवास्पदं, सर्वोर्वीपतिभ्योऽन्योऽसाधारण एव स-नलो राजा पुरुषेषु उत्तमः पुरुषोत्तमः । तथा अमः-रोगोऽस्यास्तीति अमी, नामी अनमी-नीरोगः । यदि वा नमयति शत्रूनवश्यमिति कृत्वानमी, प्रतापाक्रान्तारिचक्र इत्यर्थः । पुनः किम्भूतः ? न रूपेण-कुत्सिता कृत्या दूषितः-कलङ्कितः । तथा अङ्गीकृतो विश्वविश्वम्भरायाः-समस्तपृथिव्या

१. धरति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भारस्त-च्चिन्तालक्षणो वीवधो येन सः, स्वीकृतधराधुरोऽपि कुत्सिता ऊर्मिः-पीडा यस्य स कूर्म्मिः, अकूर्म्मिः कूर्म्मिः कृतः कूर्म्मीकृत आत्मा-शरीरं यस्य सः, तथाविधो न, अङ्गी-कृतभारो हि पीडावान् भवति। अयं च भूभारं बिभ्रदपि न पीडां धत्ते। इत्याधिक्यमस्य निवेदितम्। **"ऊर्म्मिः पीडा जवोत्कण्ठा भङ्गप्रकाशवीचिषु" इत्यनेकार्थः** [२।३२०]। तथा वरो-धिको य आहवः-संग्रामस्तं पुष्णातीति वराहवपुट्, तेन वराहवपुषा क्लेशेन-शरीरायासेन न पृथ्वीं बभार, रणकरणमन्तरेणैव वैरिणो जित्वा सुखेनैव भुवं दध्रे इत्यर्थः। तथा नरेषु सिंहः शौर्यात् हिरण्यं-धनं कशिपुश्च-भोजनाच्छादौ समुच्छिन्नौ-नष्टौ हिरण्यकशिपू यस्मात्स ईदृग्विधो न च। तथा बलिनां-बलवतां राज्ञां बन्धनविधौ-बलाद् ग्रहणं विधाने वामनो-दैन्यंकथमेतान् ग्रहीष्यामीति चेतसि वैक्लव्यं न अकरोत्, दर्पिष्ठभूपतीनप्य-बध्नादित्यर्थः। तथा रामः-सुन्दरः तथा अलं-अत्यर्थं 'केश्वरश्रियं' कस्य-ब्रह्मणः ईश्वरस्य च-शम्भोः श्रियं-द्रव्यं नाऽपि न चाऽपाहरत्-हृतवान्, सर्वदेवस्वापहारिनित्यर्थः। ब्रह्मेशौ देवानामुपलक्षणम्। तथा बुद्धः-विद्वान्, पुनः कल्कं-पापं विद्यते येषु तानि कल्कीनि, ईदृग्विधानि यानि कुलानि तेषु अवतारं-जन्म करोतीत्येवंशीलः कल्किकुलावतारकारी, ईदृग्विधो न, न पापि-कुलोत्पन्न इत्यर्थः।

तथा **अन्य एव** पुराणपुरुषात् दशावतारात् विसदृश एव नवावतारो नवसंख्यावतारः, कोऽप्ययं पुरुषोत्तमो विष्णुरित्युक्तिलेशः। अन्यो हि पुरुषोत्तमो दशावतारो भवति, अयं च नवावतारः। अन्यो हि विष्णुर्मीनरूपदूषितो भवति, अयं च न मीनरूपदूषित इत्यादि तुल्यार्थे विरोधोद्भावना कार्या। विष्णुः कीदृक्? मीनरूपेण-मीनावतारेण दूषितः। तथा विश्वम्भराभारधरणे कूर्म्मीकृतात्मा-कूर्म्मावतारः। तथा वराहवपुषा-वराहावतारेण क्लेशेन भुवं अदधत्। तथा नरसिंहावतारः समुच्छिन्नः-निहतो हिरण्यकशिपुश्चेदिभूभृद् येन स तथाविधः। तथा बलिराजस्य-दैत्यविशेषस्य बन्धनविधौ वामनः-वामनावतारः। तथा रामः-दाशरथिः लङ्केश्वरस्य-रावणस्य श्रियं-राज्यलक्ष्मीं जहार। यद्वा, रामः-परशुरामः सोऽप्यस्य विष्णोरवतारस्तत्पक्षे-अलमिति भिन्नं कु-ईषत् ईश्वरः केश्वरः सहस्रार्जुनो जमदग्निहोमार्जुनीमातृहरणात्प्रतिपक्षो जातस्ततस्तस्य श्रियमहरत्। यद्वा, रामः-कृष्णस्तदा केन-वायुना ईष्टे ईश्वरो भवति, पवनाशनत्वात्। यदि वा कस्य-पानीयस्य यमुनाहृद-लक्षणस्य ईश्वरः-स्वामी केश्वरः-कालियसर्वस्तस्य श्रियमपजहार। तथा बुद्धः-बुद्धावतारः। तथा कल्किकुलेऽवतीर्णश्च। विष्णु-मीन-कूर्म-वराह-नरसिंह-वामन-राम-बुद्ध-कल्किनो-ऽवताराः।

**किम्बहुना**-किम्बहूक्त्या!

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**धन्यास्ते दिवसाः स येषु समभूद् भूपालचूडामणि-**
**र्लोकालोकगिरीन्द्रमुद्रितमहीविश्रान्तकीर्त्तिर्नलः ।**
**लोकास्तेऽपि चिरन्तनाः सुकृतिनस्तद्वक्त्रपङ्केरुहे,**
**यैर्विस्फारितनेत्रपत्रपुटकैर्लावण्यमास्वादितम् ।।३४।।**

**धन्या** इति । ते दिवसा धन्याः-प्रशस्ताः, येषु दिवसेषु व्यावर्णिताद्भुतैश्वर्यो नलः समभूत्-जातः । किम्भूतः ? भूपालेषु चूडामणिरिव यः स तथा, सर्वनृपतिप्रधान इत्यर्थः । पुनः किम्भूतः ? लोकालोकगिरीन्द्रेण मुद्रिता-लाञ्छिता या मही-भूस्तस्यां विश्रान्ता-अवस्थिता कीर्त्तिर्यस्य सः । ते चिरन्तनाः-पूर्वकालीना लोका अपि सुकृतिनः-पुण्यवन्तः, यैः-लोकैस्तस्य-नलस्य वक्त्रपङ्केरुहे-वदनपङ्कजे विस्फारितानि-अद्भुतावलोकनाद् विकासितानि यानि नेत्राणि तान्येव पत्रपुटकास्तैर्लावण्यं-सौन्दर्यं आस्वादितं-पीतम्, लोचनैस्तद्रूपं दृष्टमित्यर्थः । पर्णानां नावाकृत्या न्यसनं पत्रपुटकः ।।३४।।

**अपि च–**

**ये कुन्दद्युतयः समस्तभुवनैः कर्णावतंसीकृता,**
**यैः सर्वत्रशलाकयेव लिखितैर्दिग्भित्तयश्चित्रिताः ।**
**यैर्वक्तुं हृदि कल्पितैरपि वयं हर्षेण रोमाञ्चिता-**
**स्तेषां पार्थिवपुङ्गवः स महतामेको गुणानां निधिः ।।३५।।**

**य** इति । तेषां महतां गुणानां स पार्थिवपुङ्गवः-नृपश्रेष्ठ एकः-अद्वितीयो निधिः-निधानम् । तेषामिति केषाम् ? ये गुणाः समस्तभुवनैः-त्रिभुवनलोकैः कर्णयोरवतंसी-कृताः-कर्णपूरीकृताः श्रुता इत्यर्थः । किम्भूताः ? कुन्दवत्-पुष्पविशेषवत् द्युतिर्येषां ते कुन्दद्युतयः, यत एव कुन्दद्युतयस्तत एव कर्णावतंसीकरणमिति छायार्थः । तथा यैर्गुणैः सर्वत्र दिग्भित्तयः-दिक्कुड्यानि चित्रिताः-विलिखिताः, दिक्प्रान्तेऽपि तद्गुणाः श्रूयन्त इत्यर्थः । उत्प्रेक्ष्यते, गुणैः, कैरिव ? शलाकया लिखितैरिव, अन्यदपि लेखनाच्चित्रितं भवति । तथा यैर्गुणैर्वक्तुं हृदि कल्पितैरपि-हृदये न्यस्तैरपि वयं हर्षेण रोमाञ्चिताः-पुलकिताः ।।३५।।

**यस्य च युधिष्ठिर इव[१] न क्वचिदपार्थो वचनक्रमः, मरु-मण्डलमिवापापं मानसम्, महानसमिव सूपकारसारं कर्म, कार्मुकमिव**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सत्कोटिगुणं दानम्, दानवकुलमिव दृष्टवृषपर्वोत्सवं राज्यम्, राजीवमिव भ्रमरहितं सर्वदा हृदयम् ।**

**यश्च परमहेलाभिरतोऽप्यपारदारिकः[१] । शान्तनुतनयोऽपि न कुरूपयुक्तः ।**

**किम्बहुना !**

तथा **यस्य च**-नलस्य न क्वचित्-कुत्रापि वचनक्रमः-वाक्परिपाटी अपार्थः-अर्थादपेतः किन्तु सार्थः । क इव ? युधिष्ठिर इव, सोऽपि न क्वचिदपार्थो भवति, पृथ्व्या अपत्यं पार्थः-अर्जुनस्तद् रहितो न भवति, सर्वत्राप्यर्जुनसहित एव स्यात् । तथा यस्य मानसं-चित्तं अपापं-निःपापं । किमिव ? मरुमण्डलमिव, तदपि अपापम्, अपेता आपो यस्मात् तत् अपापं, "**ऋक्पूरब्धूः पथामनक्षे**" [**पा० सू०** ५।४।७४] इति बहुव्रीहौ अप्रत्ययः समासान्तः । तथा यस्य कर्म-कार्यं सुष्ठु उपकारेण सारं-प्रधानं सूपकारसारं । किमिव ? महानसमिव-पाकस्थानमिव, तदपि सूपकारैः-सूदैः सारं-रुचिरम् । तथा यस्य दानं सत्पात्रवितरणात् शोभनं, तथा कोटिगुणं-कोटिसंख्या[१] फलकरणात् । किमिव ? कार्मुकमिव । तदपि सन्तौ प्रकृष्टौ कोटिगुणौ-अटनिज्ये यत्र तत् तथाविधं भवति । तथा यस्य राज्यं दृष्टवृषपर्वोत्सवं वृषः-धर्मः पर्वः-पौर्णमास्यादिः उत्सवः-पुत्रजन्मविवाहादिः ते दृष्टाः-अनुष्ठिता यत्र तत् तथाविधम् । किमिव ? दानवकुलमिव-दैत्यकुलमिव, तदपि दृष्टो वृषपर्वनाम्नः दैत्यस्य उत्सवः-महो यत्र तत्तथारूपं भवति । तथा यस्य हृदयं सर्वदा भ्रमरहितं भ्रमः-संशयस्तेन रहितं, सर्वशास्त्रेषु प्रगल्भमतित्वात् । किमिव ? राजीवमिव-कमलमिव, तदपि भ्रमरेभ्यो हितं-सुखकारि भवति ।

तथा **यश्च**-नलः 'परमहेलाभिरतोऽपि' परमा हेला-शृङ्गारचेष्टा तस्यामभिरतः-आसक्तः । यद्वा, परः-उत्कृष्टो महः-उत्सवो यस्यां सा परमहा, ईदृग्विधा या इला-भूमिस्तस्यां रतः, राजन्वती हि मही सदुत्सवा भवति । तथा अपारदारिकः-न पर-स्त्रीलम्पटः, अपिः-विरोधे, यः परेषां याः महेलाः स्त्रियस्तासु अभिरतः-आसक्तः, स कथं अपारदारिकः ? किन्तु पारदारिक एव भवति, परिहारस्तूक्त एव । परदारान् गच्छतीति पारदारिकः, पश्चान्नञ्समासः "**गच्छतौ परदारेभ्यः**" [  ] इति ठक् । तथा 'शान्तनु-तनयोऽपि' नुतः-स्तुतो नयः-नीतिर्यस्य स नुतनयः, शान्तश्चासौ नुतनयश्च शान्तनुतनयः, तथा न कुत्सितरूपयुक्तः, अपिः-विरोधे, यः शान्तनुनृपस्य तनयो-गाङ्गेयो भवति स कथं

१. °संख्य° अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न कुरूणां-क्षत्रियाणामुपयुक्तः-उपयोगी ? अपि तु कुरूणामुपयोग्येव ।

**किम्बहुना**-किम्बहूक्त्या ?

**सदाहंसाकुलं बिभ्रन्मानसं प्रचलज्जलम् ।**
**भूभृन्नाथोऽपि नो याति यस्य साम्यं हिमाचलः[१] ॥३६॥**

**अपि च--**

**सदेति** । हिमाचलः-हिमाद्रिर्यस्य नलस्य साम्यं-सादृश्यं नो याति । किम्भूतः ? 'भूभृन्नाथोपि' भूभृतः-गिरयस्तेषां नाथोऽपि-स्वाम्यपि यथा नलः भूभृतां-नृपाणां नाथस्तथाऽयमपि भूभृन्नाथः, परं तथाविधोऽपि तत्तुल्यतां नाप्नोतीत्यर्थः । कथं ? यतः स-नलः सदाऽहं सखेदं-साकुलं व्यग्रं प्रचलत्-कम्पमानं जडं-व्यामूढं मानसं-चेतो न बिभर्ति । अयं चेदृग्विधं मानसं बिभ्रदस्तीति, अतः क्व तुल्यमासादयेदिति । सिद्धान्ते तु, मानसं-सरः सदेति भिन्नम् । किम्विधम् ? हंसैराकुलं-व्याप्तं, तथा प्रचलत्-वायुना कम्पमानं जलं यत्र तत्प्रचलज्जलम् । आकुलशब्दो भावप्रधानो यथा-"**तिष्ठन्ति च निराकुलौ**" [२।७९] इति **माघे** ॥३६॥

**अपि चेति** । पुनर्नलस्य मेरुरपि साम्यं नाप्नोतीत्याह--

**नक्षत्रभूः क्षत्रकुलप्रसूतेर्युक्तो नभोगैः खलु भोगभाजः ।**
**सुजातरूपोऽपि न याति यस्य समानतां काञ्चन काञ्चनाद्रिः ॥३७॥**

**नक्षत्रेति** । यस्य-नलस्य काञ्चनाद्रिः-मेरुः काञ्चन-कञ्चिदपि समानतां-तुलनां नो याति । किम्भूतः ? सुजातरूपोऽपि सुष्ठु जातरूपं-सुवर्णं यत्र तथाविधोऽपि । यथा नलः सुष्ठु जातं-उत्पन्नं रूपं-सौन्दर्यं यस्य स तथाविधस्तथाऽयमपि सुजातरूपः परं साम्यं नाप्नोति । कथमित्याह--यतो नाऽयं क्षत्राद्भवति स्म, तथा भोगैर्न युक्तः । किम्भूतस्य ? यस्य क्षत्रकुले प्रसूतिः-जन्म यस्य स तस्य, तथा खलु-निश्चितं भोगान्-शब्दादीन् भजतीति भोगभाक् तस्य । अतः साम्ये निषेधः । सिद्धान्ते तु, नक्षत्राणां भूः-स्थानं, तथा नभसि गच्छन्ति ये ते नभोगाः-देवास्तैर्युक्तः । किमः सर्वविभक्त्यन्तान्वितचनौ प्रयोज्यौ । भूशब्दः स्थानमात्रवचनः, यथा "**उटजाङ्गभूमिषु**" [ ] इत्यत्र भूमिशब्द इति । इन्द्रवंशा ॥३७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तस्य च महामहीपते[१]रस्ति स्म प्रशस्तिस्तम्भः[२] सकलश्रुतिशास्त्र-शासनाक्षरमालिकानाम्, न्यग्रोधपादपः पुण्यकर्मप्ररोहाणाम्[३], आकरः साधुव्यवहाररत्नानाम्, इन्दुः पार्थिवनीतिज्योत्स्नायाः, कन्दः सकल-कलाङ्कुरकलापस्य, सागरः समस्तपुरुषगुणमणीनाम् आलानस्तम्भश्च-पलराज्यलक्ष्मीकरेणुकायाः, सकलभुवनव्यापारपारावारनौकर्णधारः[४], सुधाम्भोनिधिडिण्डीरपिण्डपाण्डुरयशःकुशेशयखण्डमण्डितसंसारसराः[५], सरागीकृतसमस्त[६]पार्थिवानुजीवी, जीवितसमः[७], प्राणसमः[८], हृदयसमः, शरीरमात्रभिन्नो द्वितीय इवात्मा, कुलक्रमागतः[९], सङ्क्रान्तिदर्पणः सुखदुःखयोः, स्वभावानुरक्तः, शुचिः, सत्यपूतवाक्[१०], कृतज्ञः, ब्राह्मणः सालङ्कायनस्य सूनुः[११] श्रुतशीलो नाम महामन्त्री ।**

**तस्य च** महामहीपतेः-महानृपस्य श्रुतशीलो नामेति प्रसिद्धो महामन्त्री-बृहत्सचिवो अस्तिस्म-आसीत् । किम्भूतः श्रुतशीलः ? सकलाः-कृत्स्नाः याः श्रुतयः-वेदाः शास्त्राणि च-व्याकरणादीनि तान्येव शासनाक्षरमालिकाः-आदेशवर्णपंक्तयः, इत्थं विधेयं, इत्थं न विधेयमित्यादिरूपास्तासां[१] प्रशस्तिस्तम्भः । यथा प्रशस्तिस्तम्भे लिखिता शासनाक्षर-पंक्तिरविच्युता भवति तथा यस्य हृदये श्रुतिशास्त्राणि स्मृतिवशादविनश्वराणि सन्तीति भावः । तथा पुण्यकर्माण्येव प्ररोहाः-अङ्कुरास्तेषां न्यग्रोधपादपः-वटवृक्षः । यथा न्यग्रोधपादपाद् बहवस्तदङ्कुरा उत्पद्यन्ते तथाऽस्मात्पुण्यकर्मोत्पत्तिरिति । तथा साधूनां-सतां ये व्यवहाराः, यद्वा, साधवो रम्या ये व्यवहाराः-व्यापारास्त एव रत्नानि तेषामाकरः-खानिः । यथा आकराद् रत्नानि जायन्ते तथाऽस्मात् सद्व्यवहारा इति भावः । तथा पार्थिवनीतिः-नृपसत्कव्यवहारः स एव ज्योत्स्ना-कौमुदी तस्या इन्दुः-चन्द्रः । यथेन्दौ ज्योत्स्ना विलसति तथाऽस्मिन्नृपाणां नीतयः इति नृपनीतिविदेव, किल नृपाणां सन्न्याये प्रवर्तनं कारयेदिति । तथा सकलकला एव अङ्कुरकलापः-प्ररोहवृन्दं तस्य कन्दः । यथा कन्दात् प्ररोहाणामुत्पत्तिस्तथा तस्मात् सकलकलानामिति । तथा समस्ता ये पुरुषगुणाः-शौर्यादयस्त एव मणयस्तेषां सागरः । यथा सागरे मणयः प्राप्यन्ते तथाऽस्मिन् पुरुषगुणा इति । तथा चपला-अन्यत्र गत्वरी[२] या राज्यलक्ष्मीः सैव करेणुका-हस्तिनी तस्या आलानस्तम्भः-बन्धनस्तम्भः । यथाऽऽलानस्तम्भेन बद्धा करेणुर्नान्यत्र याति तथा येन राज्यलक्ष्मीः सुसूत्रिता नलं विहायाऽन्यं नृपं न सङ्क्रामतीति । तथा सकला ये

१. तासां नास्ति अनू० । २. गत्वरा अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भुवनव्यापाराः-भूव्यवहारास्त एव पारावारः-समुद्रस्तत्र नौकर्णधारः-नाविकः । यथा नाविकेनाऽब्धिस्तीर्यते तथा येन भूव्यवहाराः, सर्वेऽपि तीर्णास्तत्परिच्छेदात् । कर्णधार-पदेनैव नाविकत्वे प्राप्ते नौशब्दो हयहेषितादिवदुक्तपोषकः। **'सकलभुवनव्यापार-नौकर्णधार'** इति **पाठे** सकलभुवनव्यापार एव नौः-बेडा तत्र कर्णधार इव यः सः । यथा कर्णधारेण नौर्व्यापार्यन्ते तथा येन भूव्यापाराः सर्वेऽपि व्यापार्यन्ते स्मेति भावः । पुनः कीदृक् ? सुधाम्भोनिधिः-क्षीराब्धिस्तस्य ये डिण्डीरपिण्डाः-फेनराशयस्तद्वत् पाण्डुरं यद्यशस्तदेव कुशेशयखण्डं-कमलवनं तेन मण्डितं-भूषितं संसारस्य[१] च सर उपमानं, एतावताऽस्य सर्वत्राऽपि यशोऽस्तीति द्योतितम् । तथा सरागीकृताः-स्वस्मिन्ननुरागिणः कृताः समस्ताः पार्थिवस्य-नलस्य अनुजीविनः-सेवका येन सः, सर्वेऽपि नलसेवका अस्मिन्ननुरज्यन्त इत्यर्थः । तथा तस्य-नलस्य 'जीवितसमः प्राणसमः' उभयत्राप्येकार्थ-प्रयोगेणाधिक्यं[२] द्योत्यते, अधिकं नलजीविततुल्य इत्यर्थः । तथा हृदयसमः-चित्ततुल्यः । किं बहूच्यते, शरीरमात्रेण-केवलं शरीरेण भिन्नः-पृथक् द्वितीय इवात्मा, वस्तुतस्तयोरेक एवात्मा, परं शरीरभेदेन द्वितीय इव प्रतिभासते । एको नलः शरीरान्तर्गतो द्वितीयोऽयं श्रुतशीलदेहान्तर्गतो नलस्यैवात्मेत्यर्थः । एतावता तयोः परस्परानुकूलत्वं द्योतितम् । तथा कुलक्रमेण-नलीयवंशपरिपाट्या आगतः-प्राप्तः, नलवंशे पूर्वमप्यस्यैव पूर्वजा मन्त्रिण आसन्निति । तथा नलस्य सुखदुःखयोः सङ्क्रान्तेर्दर्पणः-आदर्शः । यथा दर्पणे अभिमुख्य-पदार्थगत-यथावस्थितरूपसङ्क्रान्तिर्भवति तथाऽस्य हृदि नलीयसुखदुःखयोः संक्रमो जायते। यदा नलस्य सुखं तदाऽस्यापि सुखं, यदा तस्य दुःखं तदाऽस्यापि दुःखमिति भावः । तथा स्वभावेन-प्रकृत्या नलेऽनुरक्तः-अनुरागवान्, कदाचित्तत्प्रातिकूल्याचरणेन नले सानुशयोऽपि वस्तुतस्तस्मिन्ननुरज्यत एवेत्यर्थः । तथा शुचिः शुद्धः । तथा सत्या-अवितथा पूता-निर्दोषा वाक् यस्य सः । तथा कृतं जानातीति कृतज्ञः-परकृतोपकारवेत्ता । तथा ब्राह्मणः-द्विजवंशोत्पन्नः । तथा सालङ्कायनस्य मन्त्रिणः सूनुः-पुत्रः ।

**मित्रञ्च मन्त्री च सुहृत्प्रियश्च, विद्यावयःशीलगुणैः समानः ।**
**बभूव भूपस्य स तस्य विप्रो, विश्वम्भराभारसहः सहायः ॥३८॥**

**मित्रमिति** । स विप्रः-श्रुतशीलनामा तस्य-भूपस्य नलस्य मित्रं च बभूव, आपदि रक्षकत्वात् । तथा मन्त्री च बभूव, सद्बुद्धिदायकत्वात् । तथा सुहृत्बभूव, सर्वरहस्योक्ति-स्थानकत्वात् । तथा प्रियश्च बभूव, अत्यन्तरक्षणीयत्वात् । तथा विद्याभिः-शास्त्रैः, वयसा

---

१. संसार एव सरो येन सः यशसः कुशेसयखण्डं संसारस्य' अनू० । २. एकार्थपद-प्रयोगेणाधिक्यं अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

च-तारुण्येन, शीलेन च-सदाचारेण, गुणैश्च-औदार्यादिभिः समानः-तुल्यः । यादृशा नलस्य विद्यादयस्तादृशाः श्रुतशीलस्याप्यासन् । तथा विश्वम्भरायाः-भुवो भारं-चिन्तारूपवीवधं सहत इति विश्वम्भराभारसहः । ईदृग्विधः सहायः-सहचरः । यथा नलो भूभारं धत्ते तथाऽसावपि ॥३८॥

**अपि च**

**अपि चे**ति पुनर्विरोधद्वारेण मन्त्रिणं व्यावर्णयन्नाह–

**ब्रह्मण्योऽपि ब्रह्मवित्तापहारी स्त्रीयुक्तोऽपि प्रायशो विप्रयुक्तः ।**
**सद्वेषोऽपि द्वेषनिर्मुक्तचितः[१], को वा तादृग् दृश्यते श्रूयते वा[२] ॥३९॥**

**ब्रह्मे**ति । ब्रह्मणे-ब्राह्मणाय हितो ब्रह्मण्यः, "**प्राण्यंगब्रह्मरथयवखलतिलमाष-वृषाद् यः**" [सि० हे० सू० ७.१.३७] **यदनेकार्थः-ब्रह्मण्या ब्रह्मणो हिते । शनैश्चरे**" [३।५३३] इति । ब्रह्माणं वेदं वेत्ति ब्रह्मवित्, तथा तापं-सन्तापं हरतीत्येवंशीलस्तापहारी । तथा स्त्रिया युक्तः, तथा प्रायशः-बाहुल्येन विप्रैः-द्विजैर्युक्तः । तथा सत्-शोभनो वेषः-आकल्पो यस्य स सद्वेषः, तथा द्वेषात्-क्रोधान्निर्मुक्तं-दोषरहितं चित्तं यस्य स द्वेष-निर्मुक्तचित्तः । अपिः-विरोधे । यो ब्रह्मण्यो भवति स ब्रह्मवित्तापहारी-ब्रह्मस्वापहर्त्ता कथं स्यात् ? तथा यः स्त्रीयुक्तः स कथं विप्रयुक्तः-वियुक्तः ? तथा यः सद्वेषः-द्वेषयुक्तः स कथं द्वेषनिर्मुक्तचित्तः ? इति, तत्परिहारस्तूक्तमेव । तादृक् श्रुतशीलसमः अन्यः को वा दृश्यते-वीक्ष्यते[१] श्रूयते वा ? न कोऽपि, स एव प्रकृष्टगुणयुक्त इत्यर्थः । शालिनी ॥३९॥

**अथ स पार्थिव[३]स्तस्मिन्नमात्ये[४]परिजनपरिवृढे प्रौढप्रेमणि[५] [४]निगूढ-मन्त्रे मन्त्रिणि[६] तृणीकृतस्त्रैणविषयरसे सौराज्यरागजनने जननीयमाने[७] जनस्य, सर्वोपधाशुद्धबुद्धौ निधाय राज्यप्राज्यचिन्ताभारमभिनवयौवना-रम्भरमणीये रम्यरमणीयजननयनहृदयप्रिये प्रियङ्गुभासि[८] जितमदनमहस्य-पहसितसुरासुरसौभाग्ययशसि[९] विस्मापितसमस्तजनमहसि लसल्लावण्यपुञ्ज-पराजितसमुद्राम्भसि[१०] क्रान्तिकटाक्षितचन्द्रमसि वयसि वर्तमानो मानि-नीमानसर्वस्वः[११] स्वयमनवरतं[१२] सकलसंसारसुखसन्दोहमन्वभूत् ।**

**तथाहि–**

---

१. वीक्ष्यते नास्ति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अथ**-अनन्तरं स पार्थिवः-नलस्तस्मिन् अमात्यपरिजनस्य-सचिवलोकस्य परिवृढः-स्वामी तस्मिन् श्रुतशीले मन्त्रिणि राज्यस्य प्राज्यः-प्रभूतो [१]यश्चिन्ताभारस्तं राज्यभारं निधाय-निवेश्य । एवं विधे वयसि-तारुण्ये वर्तमानः स्वयं-आत्मना अनवरतं-अजस्रं सकलो यः संसारसुखसन्दोहः-विषयसुखातिशयस्तमन्वभूत्-सिषेवे । किम्विशिष्टः पार्थिवः ? मानिन्याः-मानवत्याः स्त्रियो मानस्याऽहंकृतेः सर्वस्वं-सर्वधनमिव यः सः, यं दृष्ट्वा मानिन्या मानोऽपयातीत्यर्थः । किम्भूते तस्मिन् ? प्रौढं-प्रगल्भं प्रेमः-स्नेहो यस्मिन् स प्रौढप्रेमा तस्मिन् । तथा निगूढः-परैरपरिच्छेद्यो मन्त्रः रहस्यालोचनं यस्य स निगूढ-मन्त्रस्तस्मिन् । तथा तृणीकृतः-तृणवदसारः कृतः[२], स्त्रीणामयं स्त्रैणो विषयरसः-विषयरागो येन सः तस्मिन्, स्त्रीष्वनासक्त इति भावः । स्त्रैणेति **"स्त्रीपुंसाभ्यां नञ्-स्नञौ"** [**पा० सू०** ४।१।८७] इति स्त्रीशब्दान्नञ् । तथा सौराज्ये-सुनृपतिभावे यो रागः-अनुरागस्तं जनयतीति सौराज्यरागजननस्तस्मिन् । अनेन मन्त्रिणा तथा सच्छिक्षा प्रदीयते, यथा राज्ञः सुनृपतित्वे रागस्संजायते, राजा सुनृपो भवतीत्यर्थः । तथा जनस्य-लोकस्य जननी-वदाचरन्[३]-जननीय-मानस्तस्मिन् । यथा जननी सुतं साधुतया पालयति तथाऽयं जनानिति । तथा अमात्यानां भयधर्मार्थकामैश्च या परीक्षा सा उपधा, सर्वाभिरुपधाभिः-मन्त्रिपरीक्षाभिः शुद्धा बुद्धिर्यस्य स तस्मिन् । एवम्भूतप्रभूतामात्यगुणोपेतेत्यर्थः । अथ वयो विशेषणानि, किम्भूते वयसि ? अभिनवः-नव्यो यो यौवनारम्भस्तेन रमणीये-रम्ये । तथा रम्यो यो रमणीजनः-स्त्री-लोकस्तस्य हृदयनयनयोः प्रियं-इष्टं यत्तत् तस्मिन् । तथा प्रियङ्गुः-फलिनीलता तद्वद् भाः-कायकान्तिर्यस्मिंस्तत् प्रियङ्गुभास्तस्मिन् । तथा जितं-रूपसौन्दर्यान्निर्जितं मदनस्य महः-तेजो येन तत् जितमदनमहस्तस्मिन् । तथा अपहसितं-तिरस्कृतं सुरासुराणां सौभाग्यरूपं यशो येन तत् तस्मिन्, तत्सौभाग्यात् अस्मिन् सौभाग्यमधिकमित्यर्थः । तथा विस्मा-पितानि-साश्चर्याणि कृतानि समस्तजनमनांसि येन तत्तस्मिन् । तथा लसन्-उल्लसन् यो लावण्यपुञ्जः-लवणिमसमूहस्तेन पराजितं-जितं समुद्रान्तो येन तत् तस्मिन् । लावण्यं लवणभावः सौन्दर्यञ्च । तथा कान्त्या कटाक्षितं-निराकृतं । चन्द्रमहः-विधुज्योत्स्ना येन तत् कान्तिकटाक्षितचन्द्रमहस्तस्मिन् । अत्र वयसः शरीरापृथग्भूतत्वात् शरीरविशेषणान्यपि वयस्युपचर्यन्ते ।

अथ सुखानुभवनप्रकाशन् दर्शयति-**तथाही**ति ।

**कदाचिदनुत्पन्नविषमरणभयो[१] गरुड इवाहितापकारी हरिवाहन-विलासमकरोत् ।**

---

१. चिन्ताभरः अनू० । २. तृणवदवसारीकृतः अनू० । ३. जननीवदाचरति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कदाचिच्चन्द्रमौलिरिव मदनबाणासनातिमुक्तशरसञ्छादितायां पर्वतभुवि विजहार ।

कदाचिदच्युत इव शिशिरकमलाकरावगाहनोत्पन्नपुलककोरकित-तनुरनन्तभोगभाक्सुखमन्वतिष्ठत् ।

कदाचिन्नलिनयोनिरिय राजसभावस्थितः प्रजाव्यापारमचिन्तयत् ।

कदाचिन्मयूर इव कान्तोन्नमत्पयोधरमण्डलीविलासेन हर्षमभजत् ।

कदाचिन्नक्षत्रराशिरिवाश्विन्या सेनया सहितः[१] मृगानुसारी बहुशष्प-वनमार्गं[२] बभ्राम ।

कदाचिदाञ्जनेय इवाक्षविनोदमन्वतिष्ठत् ।

कदाचिद् वानरेश्वर इव सुग्रीवो वैदेहीति ब्रुवाणस्यालघुकाकुत्स्थस्यार्थिनः प्रार्थना क्रियतां सफलेति वानरपुङ्गवानादिदेश ।

कदाचिन्मकरकेतन इव सुमनसो मार्गणान् विधाय स्वस्यगुणं[३] कर्णपूरीचकार ।

कदाचिदम्भोनिधिरिवोच्चैःस्तननाभिरम्याः, कृतानिमिषनयनविभ्रमाः[४], सकन्दर्पाः सिषेवे वेलाविलासिनीः ।

कदाचिद्दशरथ इवायोध्यायां पुरि स्थितः सुमित्रोपेतो रममाणरामभरतप्रेक्षणेन क्षणमाह्लादमन्वभूत् ।

एवमस्य सकलजीवलोकसुखसन्तानमनुभवतो यान्ति दिनानि ।

**कदाचित्**-कस्मिंश्चित् काले नलो 'हरिवाहनविलासं' हरिः-अश्वस्तस्य वाहनं-वाह्यालीप्रवर्त्तनं तदेव विलासस्तं अकरोत् । किम्भूतः ? न उत्पन्नाः-सञ्जाता विषमा-उग्रा रणभीः-युद्धभयं यस्य सः । तथा अहितानां-शत्रूणां अपकारी-अपकर्त्ता । क इव ? गरुड इव । यथा गरुडः-ताक्ष्यो हरेः-विष्णोर्वाहनविलासः-वाहनलीलां तं करोति, वाहनत्वं भजत इत्यर्थः । किम्भूतः ? न उत्पन्नं विषान्मरणभयं यस्य सः । तथा अहीनां-सर्पाणां तापं-सन्तापं करोतीत्येवंशीलो-ऽहितापकारी, तद्भक्षकत्वात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा **कदाचिन्न**लः पर्वतभुवि-गिरिक्षोण्यां विजहार-चिक्रीड । विपूर्वो हरतिः क्रीडायां वर्त्तते, यदुक्तं **क्रियाकलापे-"क्रीडति विहरति रमते खेलति खेलयति चेति खेलार्था"** [ ] इति । किम्भूतायां पर्वतभुवि ? मदनः-सिकुको रोढा[१] धत्तूरो वा, बाणः-वृक्षविशेषः, असनः-प्रियकः, अतिमुक्तकः-वासन्ती, शरः-मुञ्जस्ततो द्वन्द्वे तैः सम्यक्-छादितायां-आवृतायां । क इव ? चन्द्रमौलिरिव शम्भुरिव । यथा शम्भुः पर्वताद् भवति स्मेति पर्वतभूस्तस्यां पर्वतभुवि गौर्यां विहरति-क्रीडति । किम्भूतायां पर्वतभुवि ? मदनः-कामस्तस्य बाणासनं-धनुस्तेन अतिमुक्ता एव, अतिमुक्ताः, **"स्वार्थे कः"** [ ] प्रतिक्षिप्ता ये शराः-बाणा उन्मादन-मोहनादयस्तैः संछादितायां-विधुरितायां मदनाकुलायामित्यर्थः ।

तथा **कदाचिन्न**लः शिशिरा ये कमलाकराः-सरांसि तेषामवगाहनेन-अवलोडनेन उत्पन्ना ये पुलकाः-रोमाञ्चास्तैः कोरकिता-कुड्मलिता तनुः-शरीरं यस्य[२], ईदृग्विधः सन् अनन्तान्-बहून् भोगान्-विलासान् भजतीति अनन्तभोगभाक् सुखं-आनन्दमन्वतिष्ठत्-अकरोत्, वैषयिकसुखं बभाजेत्यर्थः । यथा[३] कमलानामाकरः-वनं । क इव ? अच्युत इव-विष्णुरिव । सोऽपि अनन्तस्य-शेषस्य भोगं-अहिकायं भजतीति अनन्तभोगभाक् सुखमनुतिष्ठति । किम्भूतोऽच्युतः ? शिशिरः-शीतलः समुद्रोत्पन्नत्वात्[४] कमलायाः-कोरकिता तनुर्यस्य स तथाविधः ।

तथा **कदाचिन्न**लो राजसभायां-नृपसदस्यवस्थितः प्रजाव्यापारं-प्रकृतिव्यवहारं अचिन्तयत्, जनानां सत्यासत्यादिविवेकमकरोत् । क इव ? नलिनयोनिरिव-ब्रह्मेव, सोऽपि राजसभावे-रजो गुणे स्थितः सन् प्रजाव्यवहारं-लोकनिर्माणं चिन्तयति ।

तथा **कदाचिन्न**लः कान्तानां-अङ्गनानां उन्नमन्ती-यौवनभरादुच्चैर्जायमाना या पयोधरमण्डली-स्तनपंक्तिस्तस्या विलासेन-उपभोगेन हर्षं-प्रमोदमभजत् । क इव ? मयूर इव, सोऽपि कान्ता-काम्या उन्नमन्ती-वर्षणाय प्रगुणी भवन्ति या पयोधरमण्डली-मेघमाला तस्या अवलोकने यो विलासः-नृत्यं तेन हर्षं भजति ।

तथा **कदाचिन्न**लः अश्वाः-सन्त्यस्यामिति अश्विनी तया सेनया सहितः-युक्तस्तथा मृगान् अनुलक्षीकृत्य सरतीति मृगानुसारी-मृगानुगामी सन् बहूनि शष्पाणि-बालतृणानि यत्रेदृग्विधं वनमार्गं-वनपथं बभ्राम-अभ्राम्यत् । क इव ? नक्षत्रराशिरिव-भपंक्तिरिव, सोऽपि बहुशः-बहुप्रकारं पवनमार्गं-नभो भ्रमति । किम्भूतः ? अश्विन्या नक्षत्रेण सहितः । किम्भूतया अश्विन्या ? सह इनेन-रविणा वर्तत इति सेना तया । पुनः किम्भूतः ? मृगं-

---

१. सिकुको रेड्ड अनू० । २. यस्य स अनू० । ३. यद्वा अनू० । ४. समुद्रोत्पन्नायाः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मृगशीर्षं अनुसरतीति मृगानुसारी । अत्र पक्षे, पकारात्प्राक् विसर्जनीय उपध्मानीयो वा, शष्पपदे तु षकार एव, तदेवं रूपभेदेऽपि श्रुतिसाम्यान्न दोष इति कविसमयः । तथा च **चण्डसिंह**कृते श्री**चण्डिकाचरिते महाकाव्ये**-

**पुष्पादपामिह सदाधिगमे समृद्ध्या-**
**ऽऽपुः पादपाः फलभराच्च विनम्रभावम् ।**
**पुष्पादपापि दधतो मुनिवत्सुजन्मा**
**पुष्पादपाति मधुसाधुमधुव्रतौघाः ॥** [ ]

अपां-जलानामधिगमे-प्राप्तौ सत्यां पुष्पात्-कुसुमात् फलभराच्च-फलातिशयात् या समृद्धिस्तया पादपाः-तरवो विनम्रभावमापुः ! समृद्धौ हि नम्रता स्यात्, जलाधिगमः पुष्पफलानां हेतुः, तानि च समृद्धेः सा च नम्रताया इति । तथा पुष्पाणां अत्-भक्षणं तया अपापि-पापरहितं शोभनं जन्म यथा मुनयो दधति तद्वदेव[1] एतेऽपि मधुव्रतौघाः सुजन्म धारयन्तः सन्तो मधुः-मकरन्दमपुः-पिबन्ति स्म । पादैः-अंह्रिभिः पादेषु-मूलेषु वा पतन्त्यभीक्ष्णमित्यनेन मधुप्राचुर्योक्तिः ।

अत्रायुक्पादयोः षकार एव, युक्पादयोश्च विसर्ग उपध्मानीयो वा न तु षकारः, परं श्रुतिसाम्याददोषः । एवं विसर्गजिह्वामूलीयषकारेष्वपि, यथा–

**"ये सहजनिष्कलङ्काचारा अपि भान्ति निस्त्रि कूटगमात् ।**
**सुधियः काष्ठादशकन्धराधिकं सपदि तेऽश्नुवते ॥"** [ ]

सहजः-अकृत्रिमो निःकलङ्कः-निर्दोष आचारो येषां तथोक्ताः सुधियः काष्ठादशकं दिग्वत्कन्धरैः पर्वतैरधिकमश्नुवते-प्राप्नुवन्ति । स्त्रीणामभावो निस्त्रि कूटं-छद्म तस्य[2] गमः-भ्रंशः कूटगमः, निस्त्रि च कूटगमश्च निस्त्रिकूटगममिति समाहारद्वन्द्वः । एतेन जितेन्द्रिय-यत्वोक्तिः । अपिः-विरोधे । येषां किल सहजस्वर्णायां लङ्कायां चारः-गतिः, ते कथं त्रिकूटाचलगमनाभावेन भान्ति, दशकन्धरः-रावणः काष्ठाः-दिशः । अत्र स्वर्णार्थे निष्कशब्दे ष एव, निःकलङ्कपक्षे जिह्वामूलीयविसर्गौ ।

तथा **कदाचिन्न**लः अक्षैः-प्रासकैविनोदं-क्रीडामन्वतिष्ठत्-अकरोत् । क इव ? अञ्जनाया अपत्यं आञ्जनेयः-हनुमान् स इव । सोऽपि अक्षस्य-रावणात्मजस्य विनोदं-वधं चकार ।

तथा **कदाचित्** सुग्रीवः-शोभना ग्रीवा यस्य स नलः वैः-स्फुटं देहीति ब्रुवाणस्य-

१. एव नास्ति अनू० । २. तस्य नास्ति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कथयतः, तथा आ-समन्तात् लघ्व्यां काकौ-भिन्नकण्ठध्वनौ तिष्ठतीति आलघुका-कुत्स्थस्तस्य याञ्चावशात् स्वरभेदवतोऽर्थितः-याचकस्य प्रार्थना सफला क्रियतां, इत्यमुना प्रकारेण नरपुङ्गवान् नरश्रेष्ठानादिदेशः-आदिष्टवान् । वा-समुच्चये । क इव ? वानरेश्वर इव । यथा वानरेश्वरः-कपीशः सुग्रीवः-आदित्यसूनुः हे वैदेहि ! सीते[1] ! इति ब्रुवाणस्य प्रलपतः अलघोः-गुरोः काकुत्स्थस्य-रामस्यार्थिनः-सप्रयोजनस्य प्रार्थना सफला क्रियतामिति वानरपुङ्गवान्-कपिमुख्यान् नियुक्तवान् । काकुत्स्थेत्यत्र श्लेषत्वाद् वर्णलोपो न दोषाय ।

तथा **कदाचिन्न**लो मार्गणान्-याचकान् इष्टार्थसम्पादनेन सुमनसः-सौमनस्य युक्तान् विधाय स्वस्य गुणं त्यागाख्यं जगतोऽपि कर्णौ-पूर्येते अनेनेति कर्णपूरः, अकर्णपूरं कर्णपूरं कृतवानिति कर्णपूरीचकार । सर्वस्यापि जगतो मार्गणैः स्वगुणं श्रावयामासेत्यर्थः । क इव ? मकरकेतन इव-मन्मथ इव[2] । यथा मकरकेतनः सुमनसः-पुष्पाणि मार्गणान्-शरान् विधाय स्वगुणं-निजज्यां कर्णपूरीकरोति-आकर्णान्तमाकर्षति ।

तथा **कदाचिन्न**ल उच्चैः-अतिशयेन उन्नताभ्यां स्तनाभ्यां-पयोधराभ्यां नाभ्यां च रम्याः। तथा कृता अनिमिषा-निर्निमेषा नयनविभ्रमा-नेत्रलीला याभिस्ताः । तथा सकन्दर्पाः-सकामा वेलायां-वारके विलसन्ति भोगाय उपतिष्ठन्त इत्येवंशीला वेलाविलासिन्यस्ताः सिषेवे । क इव ? अम्भोनिधिरिव-अब्धिरिव । सोऽपि वेला-अम्भोवृद्धीः सेवते। किम्भूतास्ताः ? उच्चैः-अधिकाः तथा स्तननेन-शब्दनेनाभिरम्याः[3] । तथा कृतमनिमिषाणां मत्स्यानां नयनं-प्रापणं यैस्तथोक्ताः विविधा भ्रमा-आवर्त्ता यासु ताः । तथा कं-जलं तस्य दर्पेण-मोक्षेण सह वर्तन्त इति सकन्दर्पाः । दृपेर्मोचनार्थत्वात् । **"कं शिरोऽम्बु सुखेषु स्यात्तत्रैव च कमव्ययम्"** इत्ये**काक्षरमाला** [**राघव० एकाक्षरकाण्ड**-२१] । तथा विलसन्त्यभीक्ष्णमिति विलासिन्यस्ताः ।

तथा **कदाचिन्न**लः न परैर्योद्धुं शक्या अयोध्या तस्यां निषधायां पुरिस्थितः, तथा सुमित्रैः-शोभनसुहृद्भिरुपेतः-सहितः सन् रममाणा-विलसन्त्यो रामाविलासिन्यो यत्रेदृग्विधं यद्भरतप्रेक्षणं-भरतोक्तसङ्गीतं तेन क्रीडाविशेषेण क्षणं-मुहूर्तं आह्लादनं-प्रमोदमन्वभूत्-अनुबभूव । क इव ? दशरथ इव । यथा दशरथ अयोध्यायां-अयोध्यानाम्न्यां नगर्यां स्थितः, तथा सुमित्रया-लक्ष्मणमात्रा सहितः सन् रममाणौ-क्रीडां कुर्वाणौ यौ रामभरतौ तयोः प्रेक्षणेन-अवलोकनेन आह्लादमनुभवति स्म ।

**एवं**-अमुना प्रकारेण अस्य-नलस्य सफलं यज्जीवलोकस्य सुखं-विषयसौख्यं तस्य

१. सीते नास्ति अनू० । २. मन्मथ इव नास्ति अनू० । ३. शब्देन अभिरम्याः अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सन्तानं-प्रवाहमनुभवतः-निर्विशतो[१] दिनानि यान्ति-गच्छति । "**सन्तानोऽपत्यगोत्रयोः । संततौ देववृक्षे च**" इत्य**नेकार्थः** [३।४५९] । सन्ततिः-प्रवाहः ।

**अथ कदाचिदुन्नमत्पयोधरान्तरपतद्धारावलीविराजिताः, कमलदल-कान्तनयनाः, सुरचापचक्रवक्रभ्रुवः, विद्युन्मणिमेखलालङ्कारधारिण्यः, शिञ्जानामुक्ताहंसकाः[१], प्रौढकरेणुसंचारहारिण्यः, कम्रकन्धराः, तिरस्कृत-शशाङ्ककान्तिकलापोच्चमुखमण्डलाः सकलजगज्जेगीयमानगुण-[२]मिममनुपमरूपलावण्यराशिराजितं राजानमवलोकयितुमिवावतरन्ति स्म वर्षाः[३] ।**

**अथ**-अनन्तरं कदाचित्-कस्मिन्नपि समये इमं राजानं-नृपं[२] नलमवलोकयितुमिव-ईक्षितुमिव वर्षा अवतरन्ति स्म । वर्षाशब्दगतस्त्रीत्वेन वर्षाणां साक्षात् स्त्रीत्वमध्यवसितं । ततश्चोभयत्र श्लेषः । किम्भूता वर्षाः ? उन्नमन्तः-वर्षणाय प्रगुणीभवन्तो ये पयोधराः-मेघास्तेषामन्तरे-मध्ये पतन्ती या धारावली-जलपातश्रेणिस्तया विराजिताः । स्त्रियः कीदृश्यः ? उन्नमन्तौ यौ पयोधरौ-स्तनौ तयोरन्तरे-मध्ये पतन्ती-क्रीडन्ति या हारावली-मुक्तालताश्रेणिस्तया विराजिताः । यद्वा, उन्नमत्पयोधरयोरन्तः-मध्ये अपतन्त अति-संहतोन्नतत्वात् । अप्रविशन्तो हारा यासां ताः । तथा वलीभिः-उदरलेखाभिर्विराजिताः, ततः कर्मधारयः । तथा किम्भूता वर्षाः ? कमलदलानां कान्तं-इष्टं नयनं-अतिवाहनं यासां ताः । पुनः किम्भूता वर्षाः ? सुरचापचक्रं-इन्द्रधनुर्मण्डलं तदेव वक्रे-भ्रुवौ या सां ताः । स्त्रीपक्षे-सुरचापचक्रवत् वक्रे-कुटिले भ्रुवौ यासां ताः । पुनः किम्भूताः ? विद्युदेव मणिमेखला यासां ताः । तथाऽलं-अत्यर्थं कस्य-जलस्य आरं-वेगं धारयन्तीति । यद्वा, करस्य समूहः कारं तस्य राजदेयांशवृन्दस्य धारिण्यः । यद्वा, कार इति राजदेयांश नाम, य**दनेकार्थः**-"**कारो बलौ वधे यत्ने हिमाद्रौ निश्चये यतौ**" [२।४१२] इति । वर्षा हि सस्याद्युत्पत्ति-साधकत्वात् कारस्यापि साधनं भवति । पक्षे, स्त्रियः किम्भूताः ? विद्योतमान-मणिकाञ्चीभूषणधारिण्यः । पुनः किम्भूता वर्षाः ? शिञ्जानाः-गर्जन्त्यः तथा मुक्ता-मानसं प्रतिस्थापिता[३] हंसायकाभिस्ताः । यद्वा, हंसेभ्यो मुक्तानि मुक्तहंसानि-हंसरहितानि । निष्ठान्तं प्राक्प्रयुज्यते । ईदृग्विधानि कानि-जलानि यासु ताः, तत्समये हंसानां मानसे गमनात् । पक्षे, स्त्रियः किम्भूताः ? शिञ्जाने-शब्दायमाने आमुक्ते-बद्धे हंसके-चरणाभरणे यासां ताः । पुनः किम्भूता वर्षाः ? प्रवहति स्मेति प्रौढं "**कर्त्तरि क्तः**" [ ] । प्रवाहापन्नं यत्

१. निर्विशमानस्य अनू० । २. नृपं नास्ति अनू० । ३. प्रति प्रस्थापिता अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कं-जलं तेन रेणुसञ्चारं-रजःप्रसरं हरन्त्यभीक्ष्णमिति प्रौढकरेणुसञ्चारहारिण्यः । पक्षे, किम्भूताः स्त्रियः ? प्रौढा-प्रगल्भा या करेणुः-हस्तिनी तस्यां सञ्चारवद्-गमनवत् सञ्चारेण-गमनेन हारिण्यः-मनोज्ञाः । "**शाकपार्थिवादित्वात्**" [पा०सू०वा० १७८] मध्यमपदलोपीसमासः । तथा कं-जलं धरन्ति कन्धराः-मेघाः कम्राः-रम्याः कन्धरा, यासु ताः कम्रकन्धराः । पक्षे, स्त्रियः कीदृश्यः ? कम्रा-मनोज्ञा कन्धरा-ग्रीवा यासां ताः । पुनः किम्भूता वर्षाः ? तिरस्कृता-आच्छादिता शशाङ्ककान्तिः-चन्द्ररोचिर्याभिस्ताः । तथा काय-पानीयाय लापाः कलापाः-कुटुम्बीजनगीयमानरासकास्तैरुच्चमुखा-मेघावलोकनायोन्मुखा मण्डला-देशा यासु ताः, पश्चात् कर्मधारयः । पक्षे, स्त्रियः किम्भूताः ? तिरस्कृतः-निर्जितः शशाङ्ककान्तिकलापः-चन्द्रकान्तिसमूहो येन तत् । ईदृशं उच्चं-उत्कृष्टं उन्नतकपोलं वा, मुखमण्डलं-मुखबिम्बं यासां ताः । किम्भूतं राजानम् ? सकलजगता-समस्तलोकेन जेगीयमाना-अतिशयेन रागवद्-ध्वनिनोच्चार्यमाणा गुणा यस्य स तम् । पुनः किम्भूतं ? अनुपमः-अद्भुतो यो रूपलावण्यराशिः-रूपसौन्दर्यसमूहस्तेन राजितस्तम् ।

पुनर्वर्षावर्णनमेवाह—

**यत्र—**[१]

**आकर्ण्य स्मरयौवराज्यपटहं जीमूतनूत्नध्वनिं**[२],
**नृत्यत्केकिकुटुम्बकस्य**[३] **दधतं मन्द्रां मृदङ्गक्रियाम् ।**
**उन्मीलन्नवनीलकन्दलदलव्याजेन रोमाञ्चिता,**
**हर्षेणेव समुच्छ्रितान्वसुमती दध्रे शिलीन्ध्रध्वजान् ॥४०॥**

**अपि च—**

**यत्रे**ति । यत्र वर्षासु ।

**आकर्ण्ये**ति । शार्दूलविक्रीडितवृत्तम् । वसुमती-भूः समुच्छ्रितान्-उच्चान् शिलीन्ध्रा-भूमिस्फोटा एव ध्वजाः-पताकास्तान् दध्रे-धारयामास । उत्प्रेक्ष्यते—हर्षेणेव-मुदेव, अन्योऽपि यो हृष्टो भवति स समुच्छ्रितान् ध्वजान् धत्ते । किं कृत्वा ? जीमूतस्य-मेघस्य नूतः-स्तुतो यो ध्वनिस्तं घनगर्जितं आकर्ण्य-श्रुत्वा । "**णूत् स्तवने**" [**पा० धा०** १४८८]। किम्भूतं घनगर्जितं ? युवा चासौ राजा चेति युवराजस्तस्य भावो यौवराज्यं, स्मरस्य-कामस्य यौवराज्ये पटह इव यः स तम् । कामस्य तरुणराजत्वपटहोपमं राज्याभिषेके हि पटहवादनमुचितं । तथा नृत्यत्केकिनां-विततकलापकरणप्रवृत्तकलापिनां यत्कुटुम्बकं-

Jain Education International　For Personal & Private Use Only　www.jainelibrary.org

पुत्रकलत्रादि तस्य मन्द्रां-गभीरां मृदङ्गक्रियां-मृदङ्गवादनविधिं दधतं-दधानं, नृत्ये किल मृदङ्गध्वनिना भाव्यम् । किम्भूता भूः ? उन्मीलन्ति-विकसन्ति यानि नवानि-नूतनानि नीलानि-हरिच्छवीनि कन्दलानि च-प्ररोहाः दलानि च-पत्राणि नवनीलकन्दलदलानि तेषां व्याजेन छलेन रोमाञ्चिता-पुलकिता ॥४०॥

**अपि चे**ति । पुनर्वर्षावर्णनमेवाह—

**पर्णैः कर्णपुटायितैर्नवरसप्राग्भारविस्फारितैः,**
**शृण्वन्तो मधुरं द्युमण्डलमिलत्मेघावलीगर्जितम् ।**
**शाखाग्रग्रथमानसौरभभरभ्रान्तालिपालिध्वजा-**
**स्तोषेणेव वहन्ति पुष्पपुलकं धाराकदम्बद्रुमाः ॥४१॥**

**अथ क्रमेण—**

**पर्णै**रिति । शार्दूलविक्रीडितम् । धाराकदम्बद्रुमाः पुष्पमेव पुलकं-रोमाञ्चं वहन्ति-धारयन्ति । उत्प्रेक्ष्यते—तोषेणेव-हर्षेणेव, अन्योऽपि, हर्षेण पुलकितो भवति । द्विविधा हि कदम्बाः-एके [1]धूलिकदम्बा, अपरे धाराकदम्बास्तत्र ये वसन्ते पुष्पन्ति ते धूलिकदम्बकाः[2], ये पुनर्वर्षासु पुष्पन्ति ते धाराकदम्बा इति । अथ हर्षहेतुमाह—किं कुर्वन्तो धाराकदम्बाः ? कर्णपुटायितैः-कर्णपुटोपमैः पत्रैः कृत्वा मधुरं-मृष्टं द्युमण्डले-नभस्तले मिलन्ती-निविडीभवन्ति या मेघावली-घनपंक्तिस्तस्या गर्जितं-स्तनितं शृण्वन्तः-आकर्णयन्तः । किम्भूतैः पर्णैः ? नवरसप्राग्भारेण नूतनजलसमूहेन विस्फारितानि-विकासितानि यानि तानि तथा तैः, अन्योऽपि नवरागप्राग्भारविस्फारितेन कर्णपुटेन द्युमण्डलात्-स्वर्गमण्डलात् मिलत्या योषितः शब्दं शृणोत्येवेति छायार्थः । किम्भूता धाराकदम्बद्रुमाः ? शाखाग्रे ग्रथमाना मिलन्तः तथा सौरभभरात्-सौगन्ध[3]प्राचुर्यात् भ्रान्ताः-उपरि पर्यटन्तश्च ते अलयश्च, त एव पालिध्वजाः-प्रसिद्धचिह्नानि येषां ते **"ग्रन्थ बन्धने"** [पा० धा० १९७०] इति यौ चौरादिकाद्विकल्पेन ग्रथितुं शीला इति "शानचि" ग्रथमानाः । **यत्कविरहस्ये—**

**गाथां ग्राथयति ग्रथत्यविरतं श्लोकांश्च लोकोत्तरान्,**
**गद्यं ग्रन्थयति स्फुटार्थललितं यो नाटकं ग्रन्थति ।**

---

१. धूली अनू० । २. धूलीकदम्बाः अनू० । ३. सौगन्ध्य अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ग्रथ्नाति श्रुतिशास्त्रयोर्विवरणं ग्रन्थाननेकांश्च यः,
स्वच्छं यस्य मनः स्वभावसरलं नो ग्रन्थते कुत्रचित् ॥ [ ]

अस्मादात्मनेपदमपि । तथा च—

"वहति जलमियं पिनष्टि गन्धा-नियमियमुद्ग्रथते स्रजो विचित्राः ।
मुशलमिदमियं च पातकाले, मुहुरनुयाति कलेन हुङ्कृतेन" ॥४१॥ [ ]

**अथ क्रमेण** यज्जातं तदाह—

**नीरं नीरजनिर्मुक्तं नीरजस्कं भुवस्तलम् ।**
**जातं जातिलतापुष्पगन्धान्धमधुपं वनम् ॥४२॥**

नीरमिति । श्लोकः । नीरं-जलं नीरजनिर्मुक्तं-अम्भोजविहीनं जातं । तथा भुवस्तलंभूतलं निर्गतानि रजांसि यस्मात्तन्नीरजस्कं-निःपांशुजातम् । तथा वने[1] जातिलतापुष्पाणां-मालतीकुसुमानां यो गन्धः-सौरभ्यं तेन अन्धाः-आकुला मधुपाः-अलयो यत्र तत्तथाविधं जातम् ॥४२॥

अपि च—

**धुतकदम्ब[1]कदम्बकनिष्पतन्नवपरागपरागममन्थराः ।**
**हृततुषारतुषा[2] रतिरागिणां, प्रियतमा मरुतो मरुतो ववुः ॥४३॥**

**अपि च । धुतेति । द्रुतविलम्बितवृत्तम्** । मरुतः-पर्वतात् मरुतो-वायवो ववुः-वान्ति स्म । किम्भूता मरुतः ? धुताः-कम्पिता ये कदम्बाः-तरुविशेषास्तेषां यत्कदम्बक-समूहस्तस्मान्निःपतन्-निःसरन् यो नवः परागः-पौष्पं रजस्तस्य परः-प्रकृष्टो य आगमः-सङ्गमस्तेन मन्थराः-मन्दाः, भारोद्वहने हि मन्दगतिरेव स्यात् । एतावता वायूनां सौरभ्यं मान्द्यं चोक्तम् । पुनः किम्भूताः ? हृताः-ऊढाः तुषाराणां-शीकराणां तुषाः-कणाः यैस्ते तथाविधाः, एतावता शैत्यमसूचि । तथा रतौ-सुरते रागः-अभिलाषो विद्यते येषां ते रतिरागिणस्तेषां प्रियतमा-अतिदयिताः तज्जन्यश्रमाय नेतृत्वात् । "**रतिः स्मरस्त्रियां रागे रते**" इत्य**नेकार्थः** [२।१९४] । मरुत इति "**पञ्चम्यास्तसिल्**" [**पा० सू०** ५।३।७] "**मरुः पर्वतदेशयोः**" इत्य**नेकार्थः** [२।४५८] ॥४३॥

---

१. वनं अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततश्च—

तिरस्कृततरणित्विषि, विगलद्वारिविप्रुषि, शान्तचातकतृषि, निर्वाणवारवपुषि, मानिनीमानग्रहग्रन्थिमुषि, जनितजवासकशुषि, विधववधूविद्विषि[1], वर्धितमण्डूकहृषि, मुद्रितचन्द्रमसि, निद्राणपङ्कजसरसि[2], स्वाधीनप्रियप्रेयसि[3], प्रोषितकलहंसवयसि, नष्टनक्षत्रमण्डलमहसि, मेचकितनभसि, निष्पतन्नीपरजसि, स्फुटत्कुटजरजः[4]पुञ्जपिञ्जरिताष्टदिग्भागभासि[5], भासुरसुरचापचक्रभृति, मयूरमदकृति, महिषशोषहृति, विस्तरत्सरिति, शाद्वलहरिति[6], विद्योतमानविद्युति, वहन्मन्दमेघङ्कर[7]मरुति, हृष्यत्कृषाणयोषिति, पुष्यत्केतकीगन्धपानमत्तमधुकृति, प्रोद्भूतभूरुहि, दरिद्रनिद्राद्रुहि, सगर्वगोदुहि, कदम्बस्तम्बालम्बिमधुलिहि[8], मुदितमदनाट्टहासायमानघननादमुचि, [9]पच्यमानजम्बूफलश्यामलितवनान्तररुचि, रचितपान्थसार्थशुचि, श्रूयमाणमदमधुरमयूरवाचि, विनिद्रकोशातकीशालिनि, यूथिकाजालिनि, नवमालिकामालिनी, कन्दलभाजि, पच्यमानजम्बूतरुवनराजिभ्राजि[9], भिक्षाक्षणक्षपित[10]परिव्राजि, शान्तसारङ्गरुजि, नीडनिर्माणाकुलबलिभुजि, सान्द्रेन्द्रगोपयुजि, श्च्योतत्तमालधारागृहसदृशि, श्यामायमानदशदिशि, दिवापि श्रूयमाणरजनिशङ्काकुल[11]चक्रवाकचक्रक्रुशि[11], शकटसञ्चाररुधि, पल्लवितवीरुधि, विश्रान्तजिष्णुक्ष्मापालयुधि, क्षीणोक्षक्षुधि, क्षीरसमुद्रनिद्राणबाणबाहुच्छिदि, सिन्धुरोधोभिदि, दवदहननुदि, विरहिमनस्तुदि[12], जनितजनमुदि, तापिच्छच्छायानुच्छेदिनि, छन्नकुटीमध्यबध्यमानवाजिनि, विकसितबकुलवनविराजिनि[13], सीरसीमन्तितग्रामसीमनि, विजयमानमनोजन्मनि, जाते जगज्जीविनि, जीमूतसमये कदाचिदनम्भसि[14] दिवसे मृगयावनपालकः प्रविश्य राजानं विज्ञपयामास[15] ।

**ततश्च** [इति] । ततः-अनन्तरं एवंविधे जीमूतसमये-मेघवर्षणकाले जाते-सति कदाचित्-कस्मिंश्चित् अनम्भसि-पानीयवर्षणरहिते दिवसे मृगयावनं-आखेटककाननं पालयति-रक्षतीति मृगयावनपालकः प्रविश्य-राज्यसभान्तर्गत्वा राजानं-नलं विज्ञपयामास-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विज्ञप्तवान् । किम्भूते जीमूतसमये ? तिरस्कृताः-आच्छादितास्तरणित्विषः-रविकान्तयो येन स तस्मिन् । तथा विगलन्त्यः-स्रवन्त्यो वारिविप्रुषः-अम्भःकणा यस्मिन् स तथा तस्मिन् । तथा शान्ता-निवृत्ता चातकानां तृट्-तृषा यस्मिन् स तस्मिन्, तथा निर्वाणानि-शान्तानि वारणानां-हस्तिनां वपूंषि-तनवो यस्मिन् स तस्मिन्, करिणां तदैव देहदाहनिवृत्तेः । तथा मानिन्याः-मानवत्या यो मानग्रहः-प्रियानभिमुखप्रवृत्तिः स एव ग्रन्थिस्तं मुष्णाति-हरतीति मानिनीमानग्रहग्रन्थिमुट् तस्मिन्, वर्षासमये हि मानिन्यो मानं परित्यज्य प्रियानुकूला भवन्तीति । "**प्रियापराधसूचिका चेष्टा मानः**" [ ] इति **आनन्दलहरीवृत्तौ** । तथा शोषणं शुट् क्विप्, जनिता जवासकानां-तरुभेदानां शुट्-शोषणं येन स तस्मिन् । तथा विधवानां-मृतभर्तृकाणां वधूनां-स्त्रीणां विद्विट्-अहितो विधववधूविद्विट् तस्मिन्, तदानी तासां प्रियविरहेण दुःखोत्पत्तेः । तथा वर्धिता-वृद्धिं प्रापिता मण्डूकानां-भेकानां हृट्-हर्षो येन स तस्मिन्, क्विप् प्रत्ययान्तः । तथा मुद्रितः-आवृतश्चन्द्रमा येन स तस्मिन् । तथा निद्राणानि-नष्टानि पङ्कजानि यत्रेदृग्विधानि सरांसि यस्मिन् स तथा तस्मिन्, तदानीं कमलानामनुत्पत्तेः । तथा स्वाधीनाः-स्ववशाः प्रियाः-स्त्रियो येषां ते ईदृग्विधाः प्रेयांसः-भर्त्तारो यस्मिन् स तस्मिन्, तदानीं विरहवैक्लव्यमसहिष्णुभिः प्रियैः स्वप्रिया वशं नीयन्ते इत्यर्थः । यद्वा, स्वाधीनः प्रियाणां सन्निहितनारीकाणां प्रेयानिष्टो यः स तस्मिन् । तथा प्रोषितानि-मानसं प्रति गतानि कलहंसवयांसि-राजहंसपक्षिणो यत्र स तस्मिन्, तदानीं पानीयकालुष्यात् । तथा नष्टं-गतं नक्षत्रमण्डलस्य-उडुवृन्दस्य महः-तेजो यस्मिन् स तस्मिन् । तथा मेचकितं-कृष्णीकृतं नभो येन स तस्मिन्, तदानीं मेघानां काष्र्ण्यात् । तथा निष्पतन्-निःसरन्नीपानां-तरुविशेषाणां रजः-परागो यस्मिन् स तस्मिन्, तदानीं हि ते पुष्यन्तीति । तथा स्फुटन्ति-विकसन्ति यानि कुटजानि-कुटजपुष्पाणि तेषां यो रजःपुञ्जः-परागराजिस्तेन पिञ्जरिता-पिङ्गलीकृता अष्टदिग्भागेषु भाः-छविर्यस्मिन् स तस्मिन् । तथा भासुरं-दीप्यमानं यत्सुरचापचक्रं-इन्द्रधनुर्मण्डलं तद्बिभर्त्तीति भासुरसुरचापचक्रभृत् तस्मिन्, तदानीमेव तस्योत्पत्तेः । तथा मयूराणां मदं-हर्षं करोतीति मयूरमदकृत् तस्मिन् । "**मदोरेतस्यहंकारे मद्ये हर्षेभदानयोः**" **इत्यनेकार्थः** [२।२३४] । तथा महिषाणां शोषं-तापं हरतीति महिषशोषहृत् तस्मिन् । तथा विस्तराः-पानीयप्रचुराः सरितः-नद्यो यत्र स तस्मिन् । तथा शाद्वला-नीला हरितस्तृणानि यत्र स तस्मिन् । तथा विद्योतमाना-जलप्राचुर्याद्भासमाना विद्युतो यत्र स तस्मिन् । तथा वहन्वान् मन्दः-शनैर्मेघङ्करः-जलदवर्षणानुकूलो मरुत्-वायुर्यत्र स तथा तस्मिन् । "**मेघर्त्तिभयेषु कृञः**" [**पा० सू०** ३।२।४३] इति खच् रिवत्वानमुमागमः । तथा हृष्यन्त्य[1]ः-प्रमोदं प्राप्नुवन्त्यः[2] कर्षकाणां-कृषीबलानां घोषितः-

---

१. हृष्यत्यः अनू० । २. प्राप्नुवत्यः अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्त्रियो यत्र स तस्मिन् । तथा पुष्पन्त्यः-विकसन्त्यो याः केतक्यस्तासां गन्धपानेन सौरभ्यग्रहणेन मत्ता-हृष्टा[1] मधुकृतो लयो यत्र स तस्मिन् । तथा प्रोद्भूताः-सञ्जाता भूरुहः-तरवो यत्र स तस्मिन् । तथा दरिद्राणां-अकिञ्चनानां निद्रायै द्रुह्यतीति दरिद्रनिद्राद्रुट् तस्मिन्, तदानीं तेषां दारिद्र्योपहतत्वेनाऽऽच्छादितगृहाभावात् कुतः शयनमिति । तथा सगर्वाः-दृप्ताः गोदुहः-गोपाला यत्र स तस्मिन् । तथा कदम्बस्तम्बान्-कदम्बगुच्छान् आलम्बन्ते-आश्रयन्त इति कदम्बस्तम्बालम्बिनः, ईदृग्विधा मधुलिहः-मधुपा यत्र स तस्मिन् । तथा मुदितः-हृष्टो यो मदनः-कामस्तस्य अट्टहास इवाचरन् अट्टहासायमानो यो घननादः-मेघध्वनिस्तं मुञ्चतीति मुदितमदनाट्टहासायमानघननादमुक् तस्मिन्, तदानीं कामस्याधिक्यात् असौ मेघो न गर्जति, मन्ये-मदन एव दृप्तोऽट्टहासं विधत्त इति भावः । तथा पच्यमानानि-परिपाकं गच्छन्ति यानि जम्बूफलानि तैः श्यामलिता-मेचकिता वनान्तराणां-वनमध्यभागानां रुक्-कान्तिर्यस्मिन् स तस्मिन्, तत्फलानां कृष्णत्वात् । तथा रचिता-कृता पान्थसार्थस्य-पथिकसमूहस्य शुक्-शोको येन स तस्मिन्, प्रियाविरहितत्वात् । तथा श्रूयमाणाः-आकर्ण्यमाना मदेन-हर्षेण मधुरा-मृष्टा मयूरवाचः-केका यत्र स तस्मिन् । तथा कोशातक्याः-पटोलिकायाः फलानि कोशातक्यः, विनिद्रा-विहसिता याः कोशातक्यस्ताभिः शालयते-शोभतेऽवश्यमिति विनिद्रकोशातकीशाली तस्मिन् । "**शल् डक् श्लाघे**" [ ] **हरीतकादिभ्यश्च** [पा० सू० ४।३।१६७] इति फलप्रत्ययस्य लुप् । तथा यूथिकानां-मागधीनां जालं-समूहो विद्यते यस्मिन् सयूथिकाजाली तस्मिन् । "**अत इनि ठनौ**" [**वा० पा० सू०** ५।२।११५] । तथा नवमालिकानां ससलालतानां माला-पंक्तिर्विद्यते यस्मिन् स नवमालिकामाली तस्मिन् । "**व्रीह्यादित्वात्** इति" [**पा० सू०** ५।२।११६], तथा कन्दलानि-प्ररोहान् भजतीति कन्दलभाक् तस्मिन् । "**क्लदु रोदनाह्वानयो**" [**सि० है० धा०** ३१७] "**मृदिकन्दिकुण्डि**" [ ] इत्यादिना कन्देरलः । तदानीं कन्दलोत्पतेः । तथा पच्यमाना-परिणतिमासादयन्ती बहुलीभवन्ती या जम्बूतरुवनराजिस्तया भ्राजते-शोभत इति पच्यमानजम्बूतरुवनराजिभ्राट् तस्मिन् । पच्यमानेति "**कर्म्म कर्त्तरि यक्**" [ ] । तथा भिक्षाक्षणे-भिक्षावसरे भिक्षार्थं क्षपिताः-इतस्ततः प्रेरिताः परिव्राजो येन स तस्मिन्, तदानीं हि तेषां भिक्षादुर्लभा वर्षाधिक्यात् । "**क्षपण् प्रेरणे,**" [**पा० धा०** २०९३] चौरादिकः । तथा शान्ता-निवृता सारङ्गाणां-हरिणानां रुक्-रोगो यस्मिन् स तस्मिन्, तदानीमेव तेषां तृषानिवृत्तेः । तथा नीडानां-कुलायानां निर्माणे-निष्पादने आकुला-विहस्ता बलिभुजः-काका यत्र स तस्मिन् । तथा सान्द्राः-घना ये इन्द्रगोपाः-क्षुद्रारक्तजन्तवस्तान् युनक्ति-तैः

---

१. हृष्टा अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सहितो भवति यः संसारेन्द्र[१]गोपयुक् तस्मिन् । तथा श्च्योतत्-क्षरत् तमालानां सम्बन्धि यद्धारागृहं-जलयन्त्रगृहं तेन सदृक् तस्मिन्, तमालानां धारागृहस्य कृष्णाभत्वाज्जलक्षरणाच्च साम्यं जीमूतसमयस्य । तथा श्यामायमानाः-श्यामी भवन्त्यो दशसंख्याः दिशः-हरितो यत्र स तस्मिन् । तथा दिवापि-दिनेपि श्रूयमाणा-आकर्ण्यमाना रजनिशङ्कया आकुला-व्यग्रा ये चक्रवाकाश्च चक्रवाक्यश्च "**पुमांस्त्रियेत्येकशेषे** ।" [पा० सू० १।२।६७] चक्रवाकाः-रथाङ्गास्तेषां यच्चक्रं-वृन्दं तस्य क्रुट्-विरहशब्दो यत्र स तस्मिन्, तदानीं मेघावृतत्वेन दिनेपि तेषां रात्रिभ्रान्तिरुत्पन्ना, अतएव विरहिताः परस्परं आह्वयन्त इति भावः । **क्रोशनं क्रुट् क्विबन्तः** । तथा शकटानां-रथानां सञ्चारं-सञ्चरणं रुणद्धीति शकटसञ्चाररुत् तस्मिन्, भुवः पङ्किलत्वात्, तदानीं मनसां गतेरसम्भवः । तथा पल्लविताः-सञ्जात-किशलया वीरुधो यत्र स तस्मिन् । पल्लवित इति "**तारकादित्वात्**" इतच्"[**तदस्य सञ्जातं तारकादिभ्य इत**च् [पा० सू० ५।२।३६]] । तथा विश्रान्ता-निवृता जयनशीलाः-जिष्णवो ये क्ष्मापालाः-राजानस्तेषां युत्-संग्रामो यत्र स तस्मिन् । तथा क्षीणा-नष्टा उक्ष्णां-बलीवर्दानां क्षुत्-बुभुक्षा यत्र स तस्मिन् । तथा क्षीरसमुद्रे-क्षीराम्भोधौ निद्राणः-शयितः बाणबाहुच्छित्-विष्णुर्यस्मिन् स तस्मिन् । तथा सिन्धूनां-नदीनां रोधांसि-तटानि भिनत्ति-विदारयतीति सिन्धुरोधोभित् तस्मिन् । तदानीं पयःपूरेण तटभेदः सम्पद्यते । तथा दवदहनं-वनवह्निं नुदति-प्रेरयतीति दवदहनुत् तस्मिन्, तदानीं वर्षणात् तच्छान्तेः । तथा विरहिणां मनांसि तुदति-पीडयतीति विरहिमनस्तुत् तस्मिन् । तथा जनिता जनानां मुत्-हर्षो येन स तस्मिन् । तथा तापिच्छानां-तमालतरूणां छायां-शोभां अनुच्छिनत्ति-अनुकरोतीति तापिच्छच्छायानुच्छेदी तस्मिन्, तमालानां छाया किल कृष्णा भवति तथा जलद-समयस्यापीति । तथा छन्ना-तृणादिभिराच्छादिता या कुटी तस्या मध्ये बध्यमानाः-संयम्यमाना, वाजिनः-अश्वा यत्र स तस्मिन् । तथा विकसितानि-विहसितानि यानि बकुलवनानि-केसरकाननानि तैर्विराजते-शोभतेऽवश्यमिति विकसितबकुलवनविराजी तस्मिन्, तदानीमेव तेषां विकसनात् । तथा सीरेण-हलेन सीमन्तिते-द्विधाकृते ग्रामसीमानौ-ग्राममर्यादे यत्र स तस्मिन्, तदानीं कर्षकैः सीरेण ग्रामसीमा क्रियते, इयमस्माकमियं भवतामिति । **सीमन्त इति केशविन्यासे, अन्यत्र सीमान्तो ग्राम इति कातन्त्रचन्द्रि-कायाम् ।** सीमन्तं करोति सीमन्तयति तत्करोतीति णिच्, ततः कर्मणि निष्ठा । यद्यपि सीमन्तशब्दो द्विफालबद्धेषु केशेषु अन्तरा-मार्ग उच्यते, तथाप्यत्रौपचारिकोऽवसेयः । तथा

---

१. सासादेन्द्र अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विजयमानाः-प्रकर्षेण वर्तमानो मनोजन्मा-कामो यत्र स तथा तस्मिन् । तथा जगत्-विश्वं जीवयति-वर्तयतीति जगज्जीवी तस्मिन्, तदानीं सस्याद्युत्पतेः ।

अथ विज्ञप्तिमाह—

**देव !**

**किं स्यादञ्जनपर्वतः स्फटिकयोर्द्वन्द्वं दधद्दीर्घयो-**
**रम्भोमेदुरमेघ एष किमुत श्लिष्यद्बलाकाद्वयः ।**
**शून्यः किं नु करेण कुञ्जर इति भ्रान्तिं समुत्पादय-**
**न्दंष्ट्रायुग्म[१]करालकालवदनः कोलः[२] कुतोऽप्यागतः ॥४४॥**

**ततश्चासौ ।**

**देवे**ति । हे देव !-नृप ! "**देवस्तु नृपतौ तोयदे सुरे**" इत्यनेकार्थः [२।५३८] ।

**किं स्यादि**ति । शार्दूलविक्रीडितवृत्तम् । ईदृग्विधः कोलः-सूकरः कुतोऽपि-कस्माच्चिद् वनादागतः-आयातः । किम्भूतः ? दंष्ट्रायुग्मेन करालं-उच्चं कालं-कृष्णं वदनं-मुखं यस्य सः । करालेति[१] "**डुकृंग् करणे**" [**सि० हे० धा०** ८८८] "**ऋकृभृवृतनि**"-इत्यादिनौणादिक आलप्रत्ययः [**सि० हे०** ४७५] । किं कुर्वन् ? इति भ्रान्तिं-सन्देहं जनयन्-उत्पादयन् । इतीति किम् ? दीर्घयोः-आयतयोः स्फटिकयोर्द्वन्द्वं दधत्-बिभ्रत्, किमिति वितर्के, अञ्जनपर्वतः स्यात् । तद्वपुषः कृष्णत्वात् अञ्जनगिरिसाम्यं, दंष्ट्रयोः श्वेतत्वात् स्फटिकयुग्मोपमानम् । उत-अथवा किं श्लिष्यद्-लगद् बलाकाद्वयं यस्य स, ईदृग्विध अम्भोभिर्मेदुरः पीवरो-भृतो यो मेघः अम्भोमेदुरमेघः स एष वर्तते बलाकाद्वयान्वितः सजलो जलद इति भ्रान्तिरुत्पद्यत इत्यर्थः । नुः-अथवाऽर्थः । अथवा करेण शुण्डया शून्यः किं कुञ्जरः-हस्ती वर्तते । हस्तिनो दंष्ट्राद्वय-मस्त्येवातस्तद्दंष्ट्रोपमानकल्पना न कृता, अञ्जनमेघयोगश्च सूकरदंष्ट्रोपमानस्य प्रकृत्या असत्वात् तत्परिकल्पना कृतेति । कोलस्य मेघकुञ्जरयोरुपमानं दंष्ट्रयोर्बलाकाद्वय-करिदन्तयोरुपमानम् । अत्र युग्मपदे द्वन्द्वशब्दं कश्चित् पठति, तदयुक्तं । स्फटिकयोर्द्वन्द्व-मित्यत्र कथितस्य द्वन्द्वपदस्य पुनः प्रयोगे पुनरुक्तता स्यात्, तेन दंष्ट्रायुग्मेति पाठः श्रेयसः ॥४४॥

---

१. करालेति नास्ति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**ततश्च** ततः-अनन्तरमसौ किं किं कुरुते ? तदाह—

**भिन्दन्कन्दकशेरुकन्दलभृतः स्निग्धप्रदेशान् भुवो,**
**भञ्जन्नञ्जनशैलशृङ्गसदृशः फुल्लल्लतामण्डपान् ।**
**मन्दं मन्दरलीलयाब्धिसदृशं मथ्नंश्च लीलासरः,**
**क्रोडः क्रीडति भायय[१]न्निव भवत्क्रीडावने रक्षकान् ॥४५॥**

**राजा तु तदाकर्ण्य चिन्तितवान्—**

**भिन्दन्निति** । शार्दूलविक्रीडितवृत्तम् । क्रोडः-शूकरः क्रीडति-रमते । किं कुर्वन् ? भुवः-पृथिव्याः कन्दाश्चः-सूरणाः कशेरुणि च-कन्दविशेषाः★ । कन्दलानि च-प्ररोहास्तान् बिभ्रतीति कन्दकशेरुकन्दलभृतस्तान् स्निग्धप्रदेशान्-सजलभूभागान् भिन्दन्-दंष्ट्राभ्यां विदारयन् । तथा अञ्जनशैलशृङ्गैः-अञ्जनगिरिशिखरैः सदृशः-समानाः अञ्जनशैल-सदृशस्तान् उच्चत्वेन नीलत्वेन च तत्सदृक्षान् फुल्लल्लतानांविकसद्वीरुधां मण्डपान्-आश्रयविशेषान् भञ्जन्-आमर्दयन् । तथा च पुनर्मन्दंशनैर्भयाभावात् मन्दरस्य-मेरोर्या लीला-विलासस्तया अब्धिसदृशं क्रीडासरसीं[१] मथ्नन्विलोडयन् । यथा मेरुणा क्षीराब्धिर्मथितस्तथाऽयमुच्चत्वात् मेरुतुलनां प्राप्य भवल्लीलासरोऽब्धिसदृक् मथ्नन् वर्तत इति भावः । एतादृशीभिर्विविधचेष्टाभिर्भवत्क्रीडावने रक्षकान्-गोप्तृन् भाययन्निव-भयमुत्पादयन्निव । भाययन्नित्यत्र भयोत्पत्तौ पूर्वोक्तभेदनादिक्रियाणां करणता अध्याहार्या । यद्वा, घण्टालालान्यायेन पूर्वार्थसम्बद्धाया मन्दरलीलायाः करणता योज्या । न तु कोलस्य भयहेतुत्वं अतो बिभेतेर्हेतु भये इत्यात्वम् । आत्मनेपदं च न भवति । मुण्डो भाययते इत्यादिवत् ॥४५॥

राजा तु तद्वराहागमनमाकर्ण्य-श्रुत्वा चिन्तितवान्-विचारितवान् । किं चिन्तितवान् ? इत्याह—

**अच्छाच्छैः शुकपिच्छगुच्छहरितैश्छन्ना[२] वनान्ता[३]स्तृणैः,**
**सेव्याः सम्प्रति सान्द्रचन्द्रकिकुलैरुत्ताण्डवैर्मण्डिताः ।**
**येषु क्षीरविपाण्डु पल्वलपयः कल्लोलयन्तो मनाग्,**
**वाता वान्ति विनिद्रकेतकवनस्कन्धे लुठन्तः शनैः ॥४६॥**

---

१. लीलासरः क्रीडासरसीं अनू० ।

★ कशेरुकरुणी क्लीबे पुल्लिङ्गेऽपि च दृश्यते ।
किं कुर्वतावराहेण खाद्यन्ते हि कशेरवः ॥ इति **प्रक्रियोणादौ** ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अच्छाच्छै**रिति । शार्दूलविक्रीडितम् । सम्प्रति-अधुना तृणैर्हरिद्भिश्छन्नाः-आच्छादितास्ते वनान्ताः-वनानि सेव्याः-आश्रयणीया । अत्र अन्तशब्दः स्वरूपार्थः । **यदनेकार्थः**- "**अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः**" [२।१५९] इति । किम्भूतैस्तृणैः ? 'अच्छाच्छैः' एकार्थो द्विरुक्तः शब्दस्तस्मात् सातिशयत्वं द्योतयतीति वचनात् । अतिशयेन विमलैः रजोनवगुण्ठितैरित्यर्थः । [१]यद्वा, अच्छवत्-स्फटिकवदच्छैः-निर्मलैः[१], अतएव शुकानां यः पिच्छः-गुच्छः-पक्षकदम्बकं तद्वत् हरितैः-नीलैः, एकस्य तत्पिच्छस्य नीलत्वं तथाविधं न प्रतिभासते तेन समूहार्थं पिच्छगुच्छेत्युक्तम् । वृन्दार्थाऽन्यशब्दे वर्तमानेऽपि यदस्योपादानां तदनुप्रासरसिकत्वेनेति । यद्वा, शुकपिच्छानि-कीरपत्राणि गुच्छाः-स्तबकास्तद्वत् हरितानि तैः । "**अच्छो भल्लूके स्फटिकेऽमले**" इति, [२।६२] "**गुच्छो गुच्छं हारकलापयोः**" **इत्यनेकार्थः** [२।६४] । किम्भूता वनान्ताः ? 'उत्ताण्डवैः' उत्कृष्टं ताण्डवं-नृत्यविशेषो येषां ते तैर्नृत्यं कुर्वाणैः सान्द्राणि-बहलानि यानि चन्द्रकिकुलानि-मयूरकुटुम्बकानि तैर्मण्डिताः-भूषिताः । येषु वनान्तेषु विनिद्राणि-विकसितानि केतकानि-केतकीपुष्पाणि येषु, ईदृशानि यानि वनानि तेषां स्कन्धे-पृष्ठे लुठन्तः-परिवर्तमाना वाताः-वायवः शनैः-मन्दं वान्ति-वहन्ति । एतेन वायोः सौगन्ध्यमान्द्योक्तिः । वाताः किं कुर्वन्तः? पल्वलपयः-अखातसरः पानीयं मनाक्-ईषत् कल्लोलयन्तः-तरङ्गयन्तः शनैः शनैर्वातात्पयसां तरङ्गीकरणं, अनेन तस्य शैत्योक्तिः । किम्भूतम् ? क्षीरवत्-दुग्धवद् विपाण्डुः-उज्ज्वलम् । केतकेति क्वचिन्नेतिवचनात् पुष्पप्रत्ययस्य न लुप् ॥४६॥

**माद्यन्ति [१]च एतेषु[१] सम्प्रति प्रोथिनः । तद्युज्यते विहर्तु इत्यवधारयन्नाहूय बाहुकनामानं सेनापतिमादिदेश ।**

**भद्र ! द्रुतमनुष्ठीयताम्[२], समादिश्यन्तां कृतवैरिविपत्तयः पत्तयः, पर्याण्यन्तां मनस्तुरगास्तुरगाः, सज्जीक्रियन्तां निजवेगनिर्जित[३]मातरिश्वानः श्वानः, समारोप्यन्तामपनीताहितायूंषि धनूंषि, गृह्यन्तां निर्मथितप्रोथियूथपाशाः पाशाः, इति ।**

**अथ मौलिमण्डलमिल[४]न्मुकुलितकरकमलयुगलेन सेनापतिना यदाज्ञापयति देवः इत्यभिधाय त्वरया तथा कृते सति ।**

---

१-१. पाठो नास्ति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एतेषु** वनान्तरेषु च सम्प्रति प्रोथितः-सूकरा माद्यन्ति-मदोन्मत्ता भवन्ति । तत्-तस्माद्धेतोर्विहर्तुं-बनान्तरेषु क्रीडितुं युज्यते-घटते । **"युजि समाधौ, देवादिकः"** [**पा० धा०** १२५४] । इति अवधारयन्-मनसि विकल्पयन् बाहुकनामानं सेनापतिमाहूय-आकार्य आदिदेश-आदिष्टवान् ।

हे **भद्र** !-कल्याणिन् ! द्रुतं-शीघ्रमिति वक्ष्यमाणं अनुष्ठीयतां-क्रियताम् । इतीति किम् ? कृता वैरिणां-शत्रूणां विपत्तिः-आपद् यैस्ते कृतवैरिविपत्तयः, ईदृशाः पत्तयः-पादचारिणः समादिश्यन्तां-पुरो गमनाय आदेशो दीयताम् । तथा मन इव तुराः-शीघ्रा गच्छन्ति मनस्तुरगाः-अश्वाः पर्याण्यन्तां-सपल्ययनाः क्रियन्ताम् । पर्याणं करोत्यश्वानां **"तत्करोति तदाचष्टे"** [ ] इति णिचि, पर्याणयति अश्वान् प्रत्यये उत्पन्ने सम्बन्धो निवर्तते । क्रियासम्बन्धात्तु द्वितीयैव न तु षष्ठी व्याकरणं सूत्रयति, त्रिलोकीं तिलकयतीत्यादिवत् । तथा श्वानः-गृहमृगाः सज्जीक्रियन्तां-प्रगुणीक्रियन्तां । यदा तु **सज्ज्यन्ता**मिति **पाठ**स्तदा सज्जशब्दः कारितान्तः । किम्भूताः श्वानः ? निजवेगेन-आत्मरयेण विनिर्जितः पराभूतो मातरिश्वा-वायुर्यैस्ते निजवेगविनिर्जितमातरिश्वानः, वायोरप्यधिकवेगत्वात् । तथा धनूंषि समारोप्यन्तां-सगुणीक्रियन्तां । किम्भूतानि ? अपनीतं-दूरीकृतं अहितानां-वैरिणां आयुर्यैस्तानि तैः, शरप्रयोगेण प्रतिपक्षाणां हननात् । तथा पाशा-मृगपक्ष्यादिबन्धनानि गृह्यन्तां-करे क्रियन्ताम् । किम्भूताः ? निर्मथिताः-विध्वस्ताः प्रोथियूथपानां-वराहयूथपतीनां आशा-इच्छा यैस्ते तैः कृत्वा तेषां बन्धनात् ।

**अथा**देशश्रवणानन्तरं मौलिमण्डलमस्तकतले मिलत्-संयुज्यमानं मुकुलितं-सञ्जातकुड्मलाकृतिं करकमलयुगलं यस्य स तेन सेनापतिना देवः-नृपो यदाज्ञापयति तत्करिष्यमीत्यभिधाय-उक्त्वा त्वरया-वेगेन तथा कृते सति-राजादेशे विहिते सति । राजा यश्चकार तदाह—

**स्वयमपि—**

**निर्मांसं मुखमण्डले परिमितं मध्ये लघुं कर्णयोः,**
**स्कन्धे बन्धुरमप्रमाणमुरसि स्निग्धं च रोमोद्गमे ।**
**पीनं पश्चिमपार्श्वयोः पृथुतरं पृष्ठे प्रधानं जवे,**
**राजा वाजिनमारुरोह सकलैर्युक्तं प्रशस्तैर्गुणैः[१]** ॥४७॥

**स्वयमपी**ति । आत्मानाऽपि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**निर्मांस**मिति । राजा-नल एवं विधैः सकलैः-समस्तैः प्रशस्तैर्गुणैयुक्तं वाजिनं-अश्वमारुरोह-आरूढवान् । अथ विशेषणगुणानाह[1]—किम्भूतं वाजिनम् ? मुखमण्डले-वक्त्रदेशे निर्मांसं-मांसरहितमित्यर्थः[2] । तथा मध्ये कटिभागे परिमितं-शास्त्रोक्तपरिमाणोपेतं । तथा कर्णयोः-श्रोत्रयोर्लघुम्, लघुकर्णता हि हयस्य प्रशस्या । तथा स्कन्धे-अंसे बन्धुरं-रम्यम् । तथा उरसि-हृदये अप्रमाणं-विशालमित्यर्थः । तथा च पुना रोमोद्गमे-तनूरुहोद्भेदे स्निग्धं-चकचकायमानम् । तथा पश्चिमपार्श्वयोः-अपानभागयोः पीनं-मांसलम् । तथा पृष्ठे-तनोश्चरमभागे पृथुतरं-अतिशयेन विशालं । तथा जवे-वेगे प्रधानं, जवो हि भूषणं वाजिन इति वचनात् । शार्दूलविक्रीडितम् ॥४७॥

**आरुह्य च क्रमेण कार्दमिककर्पटावनद्धमूर्धजैर्दण्डखण्डपाणिभिः क्रूरकर्मोचिताकारै[1]र्वागुरावाहिभि[1]रनन्तैः कृतान्तदूतैरिव पाशहस्तैः पापर्द्धिकै[2]रनुगम्यमानः दूरादुन्नमितकम्रकन्धरैः[3] स्तब्धोर्ध्व[4]कर्णसम्पुटैरकाण्डोड्डीनप्राणैरिव वनप्राणिभिराकर्ण्यमानहर्षितहयहेषारवः, पवनप्रकम्पित[5]तरुशाखाग्रपल्लवव्याजेन दूरादेवोत्क्षिप्तहस्ताभिरुड्डीयमानशकुनिकुलकोलाहलच्छलेन[6] भयान्निवार्यमाण इव वनदेवताभिः, अभिमुखागतैरुन्मिषत्तरु[7]पुष्पप्रकरमकरन्दबिन्दुवाहिभि[8]र्वनविनाशशङ्कितैरर्घ[9]मिवोपादयद्भिरुपरुध्यमान इव वनमारुतैः, उन्निद्रसान्द्रकुसुमकेसराङ्कुरजालजटिलाभिर्भयादुद्गत[10]रोमाञ्चप्रपञ्चाभिरिवोद्भ्रान्तभृङ्गरव[11]गद्गदरुदितेन निषिध्यमान इव वनवीरुद्भिः, उद्भिन्नभास्वद[12]मन्दकन्दलावलोकनेनानन्द्यमानः श्वानुगतोऽप्यश्वानुगतः सगजमप्यगजं तद्वनमाससाद ।**

अथ राजा एवं विधगुणोपेतं अश्वमारुह्य च क्रमेण-कियता कालेन तद्वनं यत्र वने स सूकरस्तत्काननमाससाद-प्राप । किम्भूतः ? अनन्तैः-बहुभिर्वागुरावाहिभिः-मृगबन्धन-धारिभिर्वागुरिकैः पापर्द्धिकैः-मृगयाकारिभिरप्यनुगम्यमानः-अनुस्रियमाणः राज्ञः पश्चान्तैर्गम्यत इत्यर्थः । किम्भूतैः ? उभयैरपि कर्दमेन-नीलीलोहमलादिना रक्तः कार्दमिकः, "**सकलकर्दमाद्वा**" [ ] इतीकण् । कार्दमिकेन कर्पटेन-वेष्टनेन अवनद्धाः-बद्धाः मूर्धजाः-केशा यैस्ते तैः, वन्यानां तिरश्चां मनुष्यभ्रमनिवृत्त्यर्थं तथाविधो वेषविधिः । तथा दण्डस्य खण्डः-शकलं पाणौ येषां ते दण्डखण्डपाणयस्तैः । तथा क्रूरकर्माणां-

---

१. विशेषणद्वारेण गुणानाह अनू० । २. मांसरहितं कृशमित्यर्थः अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उग्रकर्मकारिणामुचितः-योग्य आकारो येषां ते तथाविधैः । यद्वा, क्रूरं-उग्रं यत्कर्म-वधबन्धादिलक्षणं तस्मै उचित आकारो येषां ते तैः । पुनः किम्भूतैः ? कृतान्तदूतैरिव-यमदूतैरिव पाशः-बन्धनरज्जुर्हस्ते येषां ते तैः, यमदूता अपि पाशहस्ता भवन्ति । पुनः किम्भूतो राजा ? वनप्राणिभिः-काननतिर्यग्भिः आकर्ण्यमानः-श्रूयमाणो हर्षितहयानां-प्रमुदिताश्वानां हेषारवः-हेषाध्वनिर्यस्य स तथाविधः । किम्भूतैः ? दूरात्-दूरत एव उन्नमिता-ऊर्ध्वीकृता कम्रा-मनोज्ञा कन्धरा यैस्ते तथाविधैः । तथा स्तब्धा-हेषारवश्रवणाय निश्चला ऊर्ध्वं कर्णसम्पुटा येषां ते तैः । उत्प्रेक्ष्यते, वनप्राणिभिः, कैरिव ? अकाण्डे-अप्रस्तावे भयादुड्डीनप्राणैरिव-विगतजीवितैरिव, गतप्राणा अपि स्तब्धोर्ध्वकर्णसम्पुटा भवन्ति। पुनः किम्भूतः ? वनदेवताभिरुड्डीयमानं-उत्पतत् यच्छकुनिकुलं-पक्षिसमूहस्तस्य यः कोलाहलः-कलकलस्तस्य छलेन-दम्भेन भयात् राज्ञः प्राणिवधरूपान्निवार्यमाण इव-निषिध्यमान इव । शङ्के, खगारवदम्भेन भयात् वनदेवताभिरुच्यते भवताऽत्र नागन्तव्यमिति। किम्भूताभिर्वनदेवताभिः ? पवनेन प्रकम्पिताः-चालिता ये तरुशाखाग्रेषु पल्लवाः-किसलयानि तेषां व्याजेन दूरादेव उत्क्षिप्तौ-ऊर्ध्वीकृतौ हस्तौ याभिस्तास्ताभिः । अन्योऽपि यो वारयति स उत्क्षिप्तहस्त उच्चैः स्वरेण पूत्करोति तथैता अपीति । पुनः किम्भूतः ? वनमारुतैः-काननवायुभिरुपरुध्यमान इव-अनुग्रहं कार्यमाण इव । पुनः किम्भूतः ? अभिमुखागतैः-सम्मुखमायातैः, तथा उन्मिषन्ति-विकसन्ति यानि तरूणां पुष्पाणि तेषां यः प्रकरः-समूहस्तस्मिन् ये मकरन्दबिन्दवः-मधुपृषतास्तान् वहन्तीत्येवंशीलाः उन्मिषत्तरुपुष्प-प्रकरमकरन्दबिन्दुवाहिनस्तैः । अतएव तैः किम्भूतैः ? वनस्य यो विनाशस्तस्या शङ्का-भयं जाता येषां ते वनविनाशशङ्कितः, "**तारकादित्वात् इतच्**" [**तदस्य सञ्जातं तारकादिभ्य इतच्, पा० सू०** ५।२।३६] अर्घमिव-पूजाविधिमिव उपपादयद्भिः-प्रापयद्भिः । अन्योऽपि योऽनुग्राह्यते तस्मै अभिमुखं गत्वा अर्घो दीयत एव, तथा वनमरुद्भिरभिगम्य मकरन्दबिन्दव एवाऽर्घोनुग्राहणार्थं प्रादीयत, मा वनविनाशं विधत्तामिति । पुनः किम्भूतो राजा ? वनवीरुद्भिः-वनलताभि उद्भ्रान्ताः-कोलाहलश्रवणादुड्डीना ये भृङ्गास्तेषां य आरवः स एव गद्गदरुदितं-सकरुणाव्यक्तवर्णं क्रन्दितं तेन निषिध्यमान इव-निवार्यमाण इव । किम्भूताभिर्वनवीरुद्भिः ? उन्निद्राणि-विहसितानि सान्द्राणि-बहलानि यानि कुसुमानि तेषां ये केसराः-किञ्जल्कानि अङ्कुराश्च-प्ररोहास्तेषां यज्जालं-वृन्दं तेन जटिलाभिः-व्याप्ताभिः । अतएव उत्प्रेक्ष्यते, भयात्-राजोपद्रवशङ्कया उद्गतः-सम्भूतो रोमाञ्चप्रपञ्चः-पुलकविस्तारो यासां तास्तथाविधाभिरिव । अन्येनाऽपि यदा कश्चिद् बली निवार्यते तदा गद्गदरुदितं क्रियते, भयात् पुलकितेन च भूयते, तथा वनवीरुद्भिरपि केशराङ्कुराणां उद्गतरोमाञ्चोप-मानं-भृङ्गारवस्य रुदितोपमानमिति । पुनः किम्भूताः ? उद्भिन्नानि-निःसृतानि भास्वन्ति-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चकचकायमानानि अमन्दानि-अलघूनि यानि कन्दलानि-प्ररोहास्तेषामवलोकनेन-वीक्षणेन आनन्द्यमानः-आनन्दं प्राप्यमाणः । पुनः किम्भूतः ? श्वभिः-श्वानैरनुगतः-अनुयातः श्वानुगतः, पुरतो राजा पश्चात् श्वानो यान्तीत्यर्थः । यद्वा, शुनामनुगतः श्वानुगतः श्वपृष्ठयायीत्यर्थः । तथा अश्वैरनुगतः अश्वानुगतः, अग्रतो राजा पश्चादश्वा इत्यर्थः । अपिः-विरोधे । यः श्वानुगतः स अश्वानुगतः कथं भवेत् किन्तु श्वानुगत एव स्यात् ? तत्परिहारस्तूक्त एव । किम्भूतं तद्वनम् ? सगजं-गजोपेतं, तथा अगः-पर्वतः तत्समीपदेशोऽप्यगः तत्र जातं अगजं । अपिः-विरोधे । यत्सगजं तद्गजरहितं कथं स्यात् ? परिहारस्तूक्त एव ।

**ततश्च केचिदुद्यत्परश्वधा[१] गणपतयः, केचिद्[२] दृष्टसिंहिकासुतविक्रमाः शशधराः, केऽपि पाशपाणयो जम्बुकदिक्पालाः, केचित्[३]हरिमार्गानुसारिणो बलभद्राः, केऽपि चक्रपाणयो मधुसूदनाः, केऽपि शिवागमानुवर्तिनो[४] रौद्राः, केऽप्याहिताग्नयो विप्रलोकाः, केऽपि खण्डिताञ्जनाधरपल्लवाः[५] प्रभञ्जनाः, केऽप्युत्खातदन्तिदन्तमुष्टयो निस्त्रिंशाः, तस्य पृथ्वीपतेराकुलितश्वापदाः पदातयो वनं रुरुधुः ।**

**ततश्च** । ततः-अनन्तरं तस्य-नलस्य पृथ्वीपतेः-भूपस्य ईदृशाः पदातयः-पत्तयो वनं रुरुधुः-वेष्टयामासुः । किम्भूतास्ते ? केचित् पदातयः उद्यन्तः-पलायमानाः परे-उत्कृष्टाः ये श्वानस्तान् दधति-धारयन्तीति उद्यत्परश्वधाः । ईदृशा गणस्य-सेनाविशेषस्य पतयः-स्वामिनो गणपतयः । यदनेकार्थवृत्तिः-"**त्रिभिर्गुल्मै गणस्तैश्च वाहिनी त्रिभिरिष्यते**" [ ] । पक्षे, गणपतयः-हेरम्बाः । ते किम्भूताः ? उद्यन्तैरुद्गीर्यमाणत्वात् ऊर्ध्वं गच्छन् परश्वधः-परशुर्येषां ते तथाविधाः । तथा केचित् पत्तयः शशं-मृदुलोमकं धरन्तीति शशधराः । किम्भूताः ? दृष्टः सिंहिकासुतस्य-केशरिकिशोरस्य विक्रमः-शक्तिसम्पद् यैस्ते तथाविधाः । पक्षे, शशधराः-चन्द्रास्ते किम्भूताः ? दृष्टः सिंहिकासुतस्य-राहोर्विक्रमः-ग्रसनलक्षणो यैस्ते । तथा केऽपि पाशः पाणौ येषां ते पाशपाणयः, ईदृग्विधाः सन्तो जम्बुकानां-शृगालानां दिशं पालयंति तद्दिशि गच्छतस्तान् रक्षन्तीति जम्बुकदिक्पालाः । पक्षे, जम्बुकदिक्पालाः-वरुणाः । यद्विश्वप्रकाशः-"**जम्बुकः फेरवे नीचे प्रतीची-दिक्पतावपि**" [**क० तृ०** १४१] । तेऽपि पाशपाणयः । तथा केचित् मृगाणां समूहो मार्गं हरिं-सिंहं मार्गं-मृगकदम्बकं च अनुसरन्ति-पश्चाद् गच्छन्त्यभीक्ष्णमिति हरिमार्गानुसारिणः तथाविधाः सन्तो बलेन स्थाम्ना भद्राः-प्रधानाः शक्ता इत्यर्थः । पक्षे, हरेः-विष्णोर्मार्गः-अध्वानं अनुसरन्त्यवश्य-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मिति। हरिमार्गानुसारिणो बलभद्राः-बलदेवाः । तथा केऽपि पत्तयः चक्रं पाणौ येषां ते, तथा मधुः-क्षौद्रं सूदयन्ति-निःपीडयन्तीति मधुसूदनाः । पक्षे, चक्रं-सुदर्शनं पाणौ येषां ते चक्रपाणयो मधुसूदनाः-विष्णवः, मधुं-दैत्यविशेषं सूदयन्ति-मारयन्तीति मधुसूदनाः । "**षूदक्त्वाश्रुतिहत्योः**" [ ] । तथा केऽपि शिवा-शृगाली तस्या गमः-गतिस्तमनुवर्तन्ते-अनुसरन्तीति शिवागमानुवर्तिनः, यत्र शृगाली याति तत्र पश्चात् तेऽपि ग्रहणाय यान्तीत्यर्थः । तथा रौद्राः-भीषणाः, पक्षे-रुद्रस्य-शम्भोरिमे भक्ता रौद्राः-शैवाः । ते किम्भूताः ? शिवस्य-हरस्य ये आगमाः-शास्त्राणि तान्यनुवर्तन्ते-तेषामनुसारितया प्रवर्तन्त इति शिवागमानुवर्त्तिनः । तथा केऽपि पदातयः आहितः-गृहीतो अग्निर्यैस्ते आहिताग्नयः-तथाविधास्सन्तो वीन्-शकुन्तान् प्रलोकन्ते-वीक्षन्त इति विप्रलोकाः । पापर्द्धिका हि कपोतादिपाचनाय तरूणामधस्तात् तापनीसंज्ञां अग्निष्टिकां कुर्वन्ति । पक्षे, आहितः-स्थापितः कुण्डेषु अग्निर्यैस्ते आहिताग्नयः-साग्निहोत्राः विप्रलोकाः-ब्राह्मणजनाः । तथा केऽपि पत्तयः खण्डिताः-लुम्बिताः[१] अञ्जनस्य-मेचकपक्षिणोधरप्रवालाः-पुच्छाऽधः-पिच्छानि यैस्ते । यद्वा, खण्डिताः अञ्जनशाखिनोऽधः पल्लवा यैस्ते, तथाविधास्सन्तः प्रकर्षेण भञ्जन्ति । पक्षे, देहावयवान् वृक्षशाखादीन् वेति प्रभञ्जनाः । पक्षे, प्रभञ्जनाः-वाताः, ते किम्भूताः ? खण्डितो अञ्जनाख्यायाः-प्रियाया अधरपल्लवः-ओष्ठपल्लवो यैस्ते तथोक्ताः। तथा केऽपि पदातयः उत्खाताः-उन्मूलिता दन्तिदन्ताः यैस्ते तथाविधा, मुष्टयः-संग्रहाः । कराङ्गुलिन्यासविशेषा येषां ते, तथाविधास्सन्तो निस्त्रिंशाः-क्रूरकर्माणः । पक्षे, निस्त्रिंशाः-खड्गाः, ते किम्भूताः ? उत्खातः-उत्क्षिप्तो यो दन्तिदन्तस्तत्प्रधानो मुष्टिः-त्सरुर्येषु ते तथाविधाः ।

**ततश्च तैः क्रियन्ते विकलभा वननिकुञ्जाः कुञ्जराश्च, ध्रियन्तेऽनेकधारयापातिनः[१] खड्गाः खड्गिनश्च, कृष्यन्तेऽनुकूजन्तः[२] कोदण्डदण्डा गण्डकाश्च, विक्षिप्यन्ते परितः शराः शरभाश्च, भज्यन्ते तरवस्तरक्षवश्च ।**

**ततश्च** । ततो वनरोधनानन्तरं तैः पदातिभिः वननिकुञ्जाः विकलभाः-विगताः कलभा यै व्यपगतकरिपोताः क्रियन्ते । कुञ्जराश्च विगता कला-मदसुन्दरा भा-कान्तिर्येभ्यस्ते विकलभाः-विकलकान्तयः क्रियन्ते, भयादिति शेषः । तथा तैः पदातिभिः खड्गाः-असयः अनेकया धारया पतन्त्यभीक्ष्णमिति पातिनः, ईदृग्विधा, ध्रियन्ते खड्गिनश्च-गण्डकाः, अनेकधा-अनेकप्रकारेण रयेण-वेगेन आपतन्ति-गच्छन्त्यवश्यमिति रयापातिन-

१. लुंचिता अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्तथाविधा ध्रियन्ते-गृह्यन्ते । तथा तैः पदातिभिः अनुकूजन्तः कर्षणात्-अनुटणत्कारं कुर्वाणाः कोदण्डदण्डाः-धनूंषि कृष्यन्ते-आरोपितप्रत्यञ्चाः क्रियन्ते, गण्डकाश्च अनुकूजन्तः-ग्रहणादनुचीत्कारं कुर्वाणाः कृष्यन्ते । ये उद्भिन्नशृङ्गाः प्रौढास्ते खड्गिनः, अत एव रयापातिनः त एव बालका गण्डकाः, अतएव कूजन्त इति विशेषः । तथा तैः पत्तिभिः परितः-सर्वतः शराः-बाणा विक्षिप्यन्ते-मुच्यन्ते । शरभाश्च-श्वापदविशेषा विक्षिप्यन्ते-तत्स्थानाद्बहिर्निष्कास्यन्ते । तथा तैः पत्तिभिः तरवश्च-वृक्षास्तरक्षवश्च-चित्रका या भज्यन्ते त्रोट्यन्ते ।

एवं पदातिषु मृगयां विदधत्सु क्षणेन च-मुहूर्तेन च यज्जातं तदाह–

**क्षणेन च पतन्ति पीवरा वराहाः, सीदन्ति दन्तिनः, विरसं रसन्ति सातङ्का रङ्कवः, प्रकाशैलं[1] शैलं भयादारोहन्ति रोहिताः, शरसङ्घात-घूर्णिता[2] यान्ति महीं महिषाः, दुर्गसंश्रयं संश्रयन्ति[3] तरलितनेत्राश्चित्रकाः[4], त्वरिततरं तरन्तीवोत्पतन्तो नभसि निजजवविनिर्जित[5]तुरङ्गाः कुरङ्गाः ।**

पीवराः-मेदुरा वराहाः पतन्ति-निहतास्सन्तो भूमिसङ्गता भवन्ति । तथा दन्तिनः-हस्तिनः सीदन्ति-विषण्णा भवन्ति । तथा रङ्कवः-मृगविशेषाः सातङ्काः-सभयाः सन्तो विरसं-दुःस्वरं रसन्ति-शब्दायन्ते । तथा रोहिताः-श्वापदविशेषाः भयात् शैलं-पर्वतं आरोहन्ति-आश्रयन्ते । किम्भूतं शैलम् ? प्रकाशाः-प्रकटा एला-लता यत्र तम् । तथा महिषाः शरसङ्घातेन-बाणसम्यक्प्रहारेण घूर्णिता-घूर्णायमाना महीं यान्ति-पतन्ति । तथा तरलिते-भयादितस्ततः चलिते नेत्रे येषां ते तथाविधा चित्रकाः-श्वापदविशेषाः दुर्गः-विषमो यः संश्रयः-आश्रयो गर्त्तादिस्तं संश्रयन्ति । तथा कुरङ्गास्त्वरिततरं-अतिशयेन सत्वरं नभसि-व्योम्नि उत्पतन्तः-[1]उत्प्लवमानस्तरन्तीव उन्मज्जन्तीव । किम्भूता ? निजजवेन स्ववेगेन विनिर्जितास्तुरङ्गाः-अश्वा यैस्ते तथाविधाः ।

**तत्र च व्यतिकरे–**

**जाताकस्मिकविस्मयैः किमिदमित्याकर्ण्यमानः सुरैः,**
**संत्रासोज्झितकर्णतालचलनान्दिग्दन्तिनः कम्पयन् ।**
**जन्तूनां जनितज्वरः स मृगयाकोलाहलः कोऽप्यभूद्,**
**येनेदं स्फुटतीव निर्भरभृतं ब्रह्माण्डभाण्डोदरम् ॥४८॥**

---

१. येभ्यस्ते अनु० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्मिंश्चावसरे[१]—

**जातेति** । शार्दूलविक्रीडितवृत्तम् । स मृगयाकोलाहलः-आखेटककलकलः कोऽप्यद्भुतोऽभूत् । येन-कोलाहलेन निर्भरभृतं-अतिशयेन पूरितं सत् इदं ब्रह्माण्डमेव भाण्डं[२]-भाजनं तस्योदरं-मध्यं स्फुटतीव-द्विदलीभवतीव । किम्भूतो मृगयाकोलाहलः ? जातः-उत्पन्न आकस्मिकः-अकस्मादुत्पन्नो विस्मयः-आश्चर्यं येषां ते तथाविधैः सुरैः किमिदम्-किं जातमिदमिति आकर्ण्यमानः-श्रूयमाणः । किं कुर्वन् ? संत्रासेन-भयेन उज्झितं-त्यक्तं कर्णतालयोश्चलनं-कम्पनं यैस्ते, तथाविधान् दिग्दन्तिनः-दिग्गजान् कम्पयन्-वेपयन् । पुनः किम्भूतः ? जन्तूनां-प्राणिनां जनितो ज्वरः-तापो येन स जनितज्वरः । "**भाण्डं मूलवणिक् वित्ते तुरङ्गाणां च मण्डने । नदीकूलद्वयीमध्ये भूषणे भाजनेऽपि च ।।**" इत्यनेकार्थः [२।१२६-१२७] ।।४८।।

**राजाप्येकशरप्रहारपातितमत्तमातङ्गः सर्वतो विहारिहरिहरिणश-श[१]शम्बरवराहहननहेलया विचरन्नितस्ततस्त[२]रुणातरतमाल[२]मञ्जरीजाल-नीलोद्घुषितस्कन्धकेसरमूर्ध्वस्तब्धकर्णसम्पुटमश्वचक्राय[३] क्रुध्यन्त[४]मा-घूर्णितघोणमनवरतकृतघनघोरघर्घररवमुत्क्षिप्तपुच्छ[५]गुच्छमभिमुखमेकस्मिन्नति-सान्द्रभद्रमुस्तास्तम्बभाजि[६] पङ्किलपल्वलप्रदेशे[७] तं शूरसूकर[८]मपरमिव दवदहनदग्धाद्रि[९]मद्राक्षीत् ।**

**राजा** नलोऽपि एकशरप्रहारेण पातितः-हतो मत्तः-दृप्तो मातङ्गः-हस्ती येन स ईदृग्विधः सर्वतः-सर्वदिक्षु विहर्तुं शीलं येषां ते सर्वतो विहारिणो ये हरयश्च-सिंहाः, हरिणाश्च-मृगाः शशाश्च-शम्बराश्च मृगविशेषाः, वाराहाश्च-कोलास्तेषां या हनने-मारणे हेला-विलासस्तया इतस्ततो विचरन्-भ्रमन् सन् अभिमुखं-[३]स्वस्य सम्मुखं[३] एकस्मिन् अति-सान्द्राः-अतिशयेन अविरला ये भद्राः-चारवो मुस्तास्तम्बास्तान् भजति-आश्रयतीति अतिसान्द्रभद्रमुस्तास्तम्बभाक् तस्मिन् मुस्तास्तम्बसङ्कुले पङ्किलः-कर्दमवान् यः पल्लव-प्रदेशः-अखातसरो भूभागस्तस्मिन्, तं शूरसूकरं अद्राक्षीत्-अपश्यत् । किम्भूतं शूरसूकरम् ? तरुणतरा अतिशयेन नवा यास्तमालमञ्जर्यः-तापिच्छलतास्तासां यज्जालं-वृन्दं तद्वन्नीलाः-कृष्णवर्णा उद्घुषिताः-उच्छ्वसिताः स्कन्धकेसराः-स्कन्धरोमाणि यस्य स तं, तथा ऊर्ध्वं स्तब्धौ-अनम्रौ कर्णसम्पुटौ-श्रोत्रयुगलं यस्य स तं । कर्णौ सम्यक्पुटाविव कपाटाविव

---

१. तत्र च व्यतिकरे—तस्मिंश्चावसरे अनू० । २. भाण्डं नास्ति अनू० । ३. स्वस्य सम्मुखं नास्ति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कर्णसम्पुटौ । तथा अश्वचक्राय-वाजिवृन्दाय क्रुध्यन्तं-ईर्ष्यां कुर्वाणं । तथा आघूर्णिता-घूर्णायमाना घोणा-नासिका यस्य स तम् । तथा अनवरतं-असक्तं कृतो घनः-निविडो घोरः-रौद्रो घर्घररवो येन स तम् । तथा उत्क्षिप्तः-उच्चैः कृतः पुच्छगुच्छः-लाङ्गूलं येन स तम् । उत्प्रेक्ष्यते–सूकरं कमिव ? अपरं-द्वितीयं दवदहनेन-दवाग्निना दग्धो अद्रिस्तमिव । मन्ये, एकस्त्वद्रिः सन्निहितो वर्तत एव, द्वितीयस्त्वयं दवाग्निदग्धो गिरिर्न सूकर इति भावः ।

**स राजा[१] दृष्ट्वा च रचितशरसन्धानलाघवो राघव इव राक्षसेश्वरस्य तस्योपरि परिणद्धविविधपत्त्रैः पत्त्रभि[२]रभ्यवर्षत्[३] ।**

**तत्र च व्यतिकरे–**

**दृष्ट्वा चे**ति । तं-सूकरं दृष्ट्वा-अवलोक्य स राजा रचितं-कृतं शरसन्धाने-ज्यया सह बाणसंयोजने लाघवं-त्वरितं[१] येन स, शीघ्रं बाणं संयोजयन्नित्यर्थः । एवंविधः सन् तस्य-सूकरस्योपरि परिणद्धानि-स्नायुभिर्बद्धानि विविधानि पत्त्राणि[२] येषु, ईदृग्विधैः [३]शरैरभ्यवर्षत्-ववर्ष । कः ? कस्येव ? राघवः, राक्षसेश्वरस्येव । यथा राघवः-रामो राक्षसेश्वरस्य-रावणस्योपरि शरैरवर्षत् तथाऽयमपि ।

**तत्र च व्यतिकरे**-तस्मिन्बाणवर्षणावसरे–

**किमश्वः पार्श्वेषु प्लवनचतुरः किं नु नृपतिः,**
**शरान्मुञ्चन्नुच्चैर्दृढतर[४]कराकृष्टधनुषा ।**
**किमालोलः कोलः[५] परिहृतशरः शौर्यरसिको,**
**न जानीमस्तेषां क इह निपुणो[६] वर्ण्यत इति ॥४९॥**

**किमश्व** इति । इह-वेधनाधिकारे तेषां-अश्वनृपतिकोलानां मध्ये को निपुणः-को दक्षो वर्ण्यते-स्तूयत इति वयं न जानीमस्तेषां नैपुण्यमेवाह–किम्-वितर्के, पार्श्वेषु-इतस्ततो भूभागेषु प्लवनचतुरः-कूर्दनप्रवणोऽश्वो निपुणः, नुः-वार्थः, अथवा उच्चैरतिशयेन दृढतरं-गाढतरं कराभ्यामाकृष्टं यद्धनुस्तेन दृढतरकराकृष्टधनुषा शरान् मुञ्चन् नृपतिः किं निपुणः ? अथवा शौर्ये-शूरतायां रसः-आसक्तिर्यस्य स ईदृग्विध आलोलः-चपलः परिहृतः-प्लवनकौशलेन त्यक्तः शरो येन सः, अप्राप्तशरप्रहारः कोलो निपुणः ? ॥४९॥

---

१. त्वरितत्वं अनू० । २. पत्राणि-पक्षा अनू० । ३. पत्त्रिभिः–शरैः अनू०

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुनर्विशेषं दर्शयन्नाह—

**अपि च-**

**अजनि जनितपृथ्वीमण्डलोत्पातकम्पं[१],**
**किमपि चलितशैलं द्वन्द्वयुद्धं तयोस्तत् ।**
**स्खलिततुरगवेगो विस्मयेनेव[२] यस्मिन्,**
**दिनपतिरपि शौर्याश्चर्यसाक्षी बभूव ॥५०॥**

**अपि चेति । अजनीति** । मालिनीवृत्तम् । तयोः-नृपतिकोलयोः किमपि वक्तुमशक्यं तत् द्वन्द्वेन-युग्मेन युद्धं द्वन्द्वयुद्धं अजनि-जातम् । यस्मिन् द्वन्द्वयुद्धे दिनपतिरपि-रविरपि शौर्यस्य-शूरत्वस्य यदाश्चर्यं तस्य साक्षी-लग्नको बभूव । किम्भूतो दिनपतिः ? स्खलितः-प्रतिहतस्तुरगाणां वेगो येन सः । उत्प्रेक्ष्यते—विस्मयेनेव-आश्चर्येणेव स्वभावतोऽपि मध्यन्दिने स्खलिताऽश्ववेगो रविः मध्याह्ने घटिकाद्वयं तिष्ठतीत्युक्तेः । तत्र कवेरयमूहः । किम्भूतं द्वन्द्वयुद्धम् ? जनितः पृथ्वीमण्डले-भूतले उत्पातस्य-उपद्रवस्य कम्पो येन तत् । तथा चलिताः-कम्पिताः शैला यत्र तत् तथाविधम् ॥५०॥

**अथ कथमपि नाथं प्रोथियूथस्य जित्वा[३]**
**ज्वरित इव विशालं सालसः शालमूले[४] ।**
**सुखमभजत राजा राजमानः श्रमाम्भः-**
**कणकलितकपोलालोललीलालकेन ॥५१॥**

**अथेति** । मालिनीवृत्तम् । अथ-अनन्तरं कथमपि महता कष्टेन प्रोथियूथस्य-वराहवृन्दस्य नाथं-स्वामिनं महावराहं जित्वा-निर्जित्य ज्वरित इव-ज्वरप्राप्त इव सालसः-आलस्योपेतो राजा-नलः शालमूले-शालाभिधानतरोस्तले विशालं-विस्तीर्णं सुखमभजत-प्राप । अन्योऽपि श्रान्तश्छायामासाद्य सुखमाप्नोत्येव । किम्भूतः ? श्रमाम्भः-कणैः कलितौ-संयुतौ यौ कपोलो तयोरालोलः-चपलो यो लीलालकस्तेन राजमानः-शोभमानः । ज्वरित इव सालस इत्यनेन श्रमातिशयोक्तिः । अन्योऽपि ज्वरितो मूलादीनि सेवमानः स्वेदबिन्दुलक्ष्यमाणज्वरापगमो राजते ॥५१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[1]तत्र च स्थितं श्रममुकुलितनयनारविन्दं, अन्दोलयन्तः[2] कुसुमिततरून्, तरलयन्तः शिखिशिखण्डमण्डलानि, ताण्डवयन्तस्तनुतरलता-[3]पल्लवनिवहान्, वहन्तो वह[4]न्निर्झरजलशिशिरशीकरनिकरान्, करालयन्तः[5] कुटजकुड्मलानि, मकरन्दबिन्दुमुचो मन्दमानन्दयामासुः कम्पितनीपवनाः पवनाः ।

तत्र च-शालमूले स्थितं-निविष्टं नलं अमन्दं-अतिशयेन पवनाः-वाता आनन्दयामासुः-प्रमोदयन्ति स्म । किम्भूतम् ? श्रमेण खेदेन मुकुलितं-संकुचितं नयनारविन्दं यस्य स तम् । किं कुर्वन्तः पवनाः ? कुसुमिततरून्-पुष्पितवृक्षान् अन्दोलयन्तः-चालयन्तः । अनेन सौरभ्योक्तिः । तथा शिखिनां-बर्हिणां शिखण्डमण्डलानि-बर्हसमूहान् तरलयन्तः-दोलयन्तः कम्पयन्त इति यावत् । तथा तनुतराः-अतिशयेन लघवो ये लतापल्लवनिवहाः-वीरुत्किशलयसमूहास्तान् ताण्डवयन्तः-नर्त्तयन्तः, अनेन मान्द्योक्तिः । तथा वहन्ति-पर्वतान्निःसरन्ति यानि निर्झरजलानि तेषां शिशिराः-शीतला ये शीकरनिकराः-जलकणजालानि वहन्तः-धारयन्तः, अनेन शैत्योक्तिः । तथा कुटजानां कुड्मलानि-मुकुलानि करालयन्तः-पृथू कुर्वन्तः विकासयन्त इत्यर्थः । "**करालो रौद्रतुङ्गोरुघूणतैलेषु दन्तुरे**" इत्य**नेकार्थः** [३।६६८] । उरुः-पृथुलम् । तथा मकरन्दबिन्दून् मुञ्चन्तीति मकरन्दबिन्दुमुचस्तद्वाहित्वात् । तथा कम्पितानि-दोलितानि नीपवनानि यैस्ते कम्पितनीपवनाः ।

अनन्तरमनवरत[1]करालकौलेयककुलकवलनाकुलितकोलकरिकुरङ्गकण्ठीरवकिशोरपृष[2]त्पृष्ठप्रधाविते[3] परितः[4] परिजने, जनितविविध[5]मृगवधूवधव्याधीन्व्याधा[2]न्निवारयितुमिवान्तरान्तरा प्रसारितकरे मध्यस्थतां गतवति भगवति[6] गभस्तिमालिनि, सहसंवर्धितमृगविनाशशोकभरादिव वनवीरुधां पतत्सु पुष्पलोचनेभ्यो बाष्पेष्विव मध्याह्नोष्णविलीनमकरन्दबिन्दुषु, श्रूयमाणेषु वनदेवतानां वनविमर्दोपालम्भेष्विव तरुखण्डोड्डीनविविधविहङ्गविरुतेषु[7], [8]विघट्टितार्भकमृगकुटुम्बिनि[8]करुणकूजितव्याजेनान्यायमिव पूत्कुर्वतीषु वनस्थलीषु[9], इतस्ततः सञ्चरच्चटुलतरतुरङ्ग[10]खुरशिखोत्खात[10]धरणिमण्डलाद्वनविनाशवार्तां गगनचरेभ्यः कथयितुमिवोत्पतितेऽम्बरतल[11]मकृत[12]परित्राणे च मूर्छित[12] इव पुनः[13]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**पतति भुवि भवनपारावतपतत्रिपत्रधूसरे धूलिपटले, [१४]सकम्पकपि-कलापो[१५]ल्ललनलुलिततरुणतरुमञ्जरी[१६]पुञ्जनिकुञ्जादुद्विजिते[१७] मञ्जु गुञ्जति वनान्तरमपरमुच्चलिते चञ्चलचञ्चरीकचक्रवाले, चङ्क्रम-क्रमेण च[१८] सम्पन्ने सैन्यस्य श्रमावसरे तस्यैव सरलशाल[१९]द्रुम-स्याधस्तान्निषण्णे श्रमभाजि[२०] राजनि ।**

**अकस्मात् कुतोऽपि ।**

**अनन्तरं** राज्ञः समीपप्रदेश एव परिजने-अनुचरलोके परितः-सर्वतः अनवरतं-निरन्तरं करालाः-रौद्रा ये कौलेयकाः-श्वानस्तेषां यत्कुलं-वृन्दं तस्य यत् कवलनं-भक्षणं तेन आकुलिता-व्याकुलीभूता ये कोलाश्च-सूकराः, करिणश्च-गजाः, कुरङ्गाश्च-मृगाः, कण्ठीरवकिशोराश्च-सिंहार्भकाः, पृषताश्च-मृगविशेषास्तेषां यत्पृष्ठं-पश्चाद्भागस्तस्मिन् प्रधाविते-अनुद्रुते सति । पुनः क्व सति ? भगवति गभस्तिमालिनि-सूर्ये मध्यस्थतां-नभोमध्यभागं गतवति-प्राप्तवति सति । किम्भूते रवौ ? अन्तरान्तरा-मध्ये मध्ये प्रसारिताः-विस्तारिताः कराः-किरणा येन स तस्मिन् । उत्प्रेक्ष्यते, व्याधान्-लुब्धकान्निवारयितुमिव-निषेद्धुमिव । किम्भूतान् व्याधान् ? जनितः-उत्पादितो विविधमृगवधूनां-अनेक-प्रकारहरिणीनां वध एव-हननमेव व्याधिर्यैस्ते तथाविधान् । अन्योऽपि कारुणिको मध्यस्थतां गतः कांश्चित् कृपणान् घ्नतो निस्त्रिंशान् प्रसारितकरो निवारयत्येव । पुनः केषु सत्सु ? वनवीरुधां-वनलतानां पुष्पाण्येव लोचनानि तेभ्यः मध्याह्नोष्णेन-मध्यन्दिनातपेन विलीनाः-क्षरिता ये मकरन्द-बिन्दवस्तेषु बाष्पेष्विव-अश्रुष्विव पतत्सु सत्सु । उत्प्रेक्ष्यते, सह-लताभिः सार्द्धं संवर्द्धिताः-वृद्धिं प्राप्ता ये मृगास्तेषां यो विनाशः तस्माज्जातो यः शोकभरस्तस्मादिव । अन्योऽपि सहसंवर्धितजनविनाशं वीक्ष्य शोकभराद् रोदित्येव तथैता अपि । **"उष्णा ग्रीष्मदक्षातपाऽहिमाः" इत्यनेकार्थः** [२।१३४] । तथा च पुनः तरुखण्डात्-वृक्षवनाद् उड्डीनाः-संडीना विविधाः-नानाप्रकारा ये विहङ्गास्तेषां यानि विरुतानि-कूजितानि तेषु श्रूयमाणेषु सत्सु । उत्प्रेक्ष्यते-वनदेवतानां वनविमर्दस्य-काननविनाशस्य उपालम्भाः-आक्रोशवचनानि तेष्विव । अन्योऽप्यात्मीयवस्तुविनाशकारिणं उपालभत एव, तथैताः वनदेवता अपि उड्डीनपतत्त्रिकूजनव्याजेन वनोपद्रवकारिण उपालभन्त इव, यथा भवद्भिर्न सुन्दरं कृतमित्यादि । तथा च पुनः वनस्थलीषु विघटिता-वियोजिता अर्भकाः-बाला यासां, ईदृश्यो या मृगकुटुम्बिन्यः-हरिण्यस्तासां यानि करुणकूजितानि-दयोत्पादकरुतानि तेषां व्याजेन अन्यायमिव-अनीतिमिव पूत्कुर्वतीषु-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

व्याहरन्तीषु सतीषु । अन्यस्यापि यस्य कस्यचिद्विनाशः केनचित् कृतो भवति, स किल तदन्यायं पूत्करोत्येव । यथाऽनेनैतदसाध्वनुचितमिति तथा वनस्थल्योऽपि मृगीरुतव्याजेनाऽन्यायं पूत्कुर्वन्तीति । पूत्करणमार्त्तव्याहरणम् । तथा धूलिपटले-रजोवृन्दे इतस्ततः-सर्वतः सञ्चरन्तः-वल्गन्तश्चटुलतराः-अतिशयेन परिप्लवा ये तुरगाः-अश्वास्तेषां खुरशिखाभिः-खुराग्र-भागैरुत्खातं-उत्पाटितं यद्धरणी[१]मण्डलं भूमण्डलं तस्मात्स्वर्गतलमुत्पतिते गते सति । उत्प्रेक्ष्यते-गगनचरेभ्यः-देवेभ्यो वनविनाशस्य वार्त्ता वनविनाशवार्त्ता[२] तां कथयितुमिव-वक्तुमिव । तदनु न कृतं परित्राणं यस्य तत् अकृतपरित्राणं-अकृतरक्षणं, तथाविधे मूर्छित इव-मूर्छाल इव पुनर्भूयो भुवि पतति सति । अन्योऽपि कश्चित् परकृतं स्वजनविनाशं दृष्ट्वा कमप्युत्तमं पुरुषं प्रति तत्कृतोपद्रवं कथयितुं याति, ततस्तत्कृतं प्रतीकारं अलब्ध्वा मूर्छितः पुनर्भुवि निपतत्येव तथेदं धूलिपटलमपि । किम्भूते धूलिपटले ? भवनस्य-गृहस्य ये पारापतपतत्रिणः-कपोतपक्षिणस्तेषां यानि पत्राणि-पिच्छानि तद्वद्धूसरे-ईषत्पाण्डुनि तथा सकम्पः-सवेपथुर्यः कपिकलापः-वानरवृन्दं तस्य यत् उल्ललनं-एकां शाखां परित्यज्य अन्यशाखायां गमनं:-उत्प्लवनमित्यर्थस्तेन लुलिताः-कम्पिता यास्तरूणां तरुणा-नवामञ्जर्यः-वल्लरयस्तासां यः पुञ्जः-वृन्दं तस्य यो निकुञ्जः-गह्वरं तस्माच्चञ्चलं यच्चञ्चरीकाणां-अलीनां चक्रवालं-समूहस्तस्मिनुद्विजिते सति-उद्वेगं प्राप्ते सति, अत एव अपरं-द्वितीयं वनान्तरं-वनमध्यं प्रति उच्चलिते सति-गते सति, कपिकुलेन तरुमञ्जर्यो दोल्यन्ते ततस्तत्रस्था भृङ्गा उद्वेजिताः सन्तस्तद्वनं परित्यज्य वनान्तरमाश्रयन्तीति । किम्भूते चञ्चलचञ्चरीकचक्रवाले ? मञ्जुः-मधुरं गुञ्जति-झं कुर्वति। चङ्क्रमणस्य-इतस्ततः परिभ्रमणस्य क्रमेण-परिपाट्या च सैन्यस्य श्रमावसरे-परिश्रान्तिवेलायां सम्पन्ने सति-सैन्ये श्रान्ते सतीत्यर्थः । श्रमं खेदं भजतीति श्रमभाक् तस्मिन् श्रान्ते, राजनि-नले तस्यैव सरलसालद्रुमस्याधस्ताद्-अधोभागे छायायां निषण्णे-उपविष्टे सति ।

**अकस्मात्**-अकाण्ड एव कुतोऽपि-कस्मात् विदेशात्-

**वल्लीवल्कपिनद्धधूसरशिराः स्कन्धे दधद्दण्डकं,**
**ग्रीवालम्बितमृन्मणिः कुटितवत्[१] कौपीनवासाः कृशः ।**
**एकः कोऽपि पटच्चरं चरणयोर्बद्ध्वाऽध्वगः श्रान्तवा-**
**नायातः क्रमुकत्वचा विरचितां भिक्षापुटीमुद्वहन् ॥५२॥**

---

१. यद्धरणि अनू० । २. वनविनाश वार्तानास्ति अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**वल्ली**ति । शार्दूलविक्रीडितवृत्तम् । एकः-असहायः कोऽपि-अविज्ञातजातिनामा चरणयोः पटच्चरं-जीर्णवस्त्रखण्डं बध्वा अध्वगः-पथिक आयातः-आययौ । किम्भूतोऽध्वगः ? वल्लीवल्केन-वीरुत्वचा पिनद्धं-वेष्टितं धूसरं-वर्त्मरजसा ईषत्पाण्डुवर्णं शिरो येन सः, तथा स्कन्धे-अंशे दण्डकंः-यष्टिं दधत्-धारयन्, तथा ग्रीवायां आलम्बितः-रज्जुप्रयोगेण धृतो मृन्मणिः-पार्थिवमहाघटो येन सः । तथा कुटितवती[१]-शटिते कौपीनवाससी कक्षापटोपरिवस्त्रे यस्य सः । **परिकुथ**दिति **पाठे** तु—कुथः-वर्णकं बलः-रथ्या निपतितजरत्पटखण्डैर्निर्मितत्वात् स इवाचरतीति क्विपि लुप्ते "**शतृङि**" समासः । तथा कृशः-दुर्बलस्तथा श्रान्तवान्-खिन्नः बहुमार्गातिलङ्घनात् । पुनः क्रमुकत्वचा-पूगद्रुमवल्कलेन विरचितां-निर्मितां भिक्षापुटीं-भिक्षार्थ[२]पत्रमयं भाजनं उद्वहन्-धारयन् । पुटशब्दस्त्रिलिङ्गः ॥५२॥

**आगत्य च राजानमवलोक्य सविस्मयमेष[१] चिन्तयाञ्चकार ।**

**आगत्य च** राजानं-नलमवलोक्य-दृष्ट्वा सविस्मयं-साश्चर्यं एषः-अध्वगश्चिन्तयाञ्चकार-विचारितवान् ।

**अब्जश्रीसुभगं युगं नयनयोर्मौलिर्महोष्णीषवा-**
**नूर्णारोमसखं मुखं च शशिनः पूर्णस्य धत्ते श्रियम् ।**
**पद्मं पाणितले गले च सदृशं शङ्खस्य रेखात्रयं,**
**तेजोऽप्यस्य यथा[२] तथा सजलधेः कोऽप्येष भर्ता भुवः ॥५३॥**

**अब्जे**ति । शार्दूलविक्रीडितं वृत्तम् । अस्य-नरस्य नयनयोर्युगं-द्वन्द्वं अब्जश्रीवत्-कमलशोभावत् सुभगं चक्षुषां-नेत्रयोः सुखकारीत्यर्थः । तथा अस्य मौलिः-मस्तकं उष्णीषं-उत्तमाङ्गे लक्षणविशेषः महदुष्णीषमस्मिन्नस्तीति महोष्णीषवान्, एतद्धि सामान्यस्य न स्यादिति । अस्य मुखं-वक्त्रं पूर्णस्य-राकासम्बन्धिनः शशिनः-चन्द्रस्य श्रियं-शोभां धत्ते-धारयति । किम्भूतम् ? ऊर्णा भ्रूमध्ये शुभरोमावर्त्तस्तस्यां यानि रोमाणि-लोमानि तेषां सखा ऊर्णारोमसखं-ऊर्णारोमसहितमित्यर्थः । "**राजाहः सखिभ्यष्टच्**" [**पा० सू०** ५।४।९१] तत्पुरुषे । तथा अस्य पाणितले पद्मं-कमललक्षणं । तथा अस्य गले च शङ्खस्य सदृशं-समं रेखात्रयं । यथा कम्बोः कण्ठे रेखात्रयं वीक्ष्यते तथाऽस्यापि । न केवलमेतान्येव नृपचिह्नानि किन्तु तेजोऽपि-शरीरधामापि तथाऽस्य वीक्ष्यते, यथा सजलधेः-ससमुद्रायाः

१. कुपितवती अनू० । २. भिक्षार्थं अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भुवः कोऽप्यद्भुतवैभव एष भर्ता-स्वामी पृथ्वीपतिर्वर्तते इत्यर्थः । "**उष्णीषं तु शिरोवेष्टे किरीटे लक्षणान्तरे**" इति **विश्वप्रकाशः** [ष० तृ० १९] । "**ऊर्णा मेषादिलोम्नि स्यादन्तरावर्तिते भ्रुवोः**" [**विश्वप्र० ण० द्वि०** २१] । शङ्खस्येत्यत्र "**तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्**" [पा० सू० २।३।७२] इति शङ्खस्येत्यत्र "तुल्यार्थैर्योगे तृतीयाषष्ठ्यौ स्त इति वचनात् सादृश्ययोगे षष्ठी ॥५३॥

**तदेवंविधाः खलु महानुभावा महनीया[१] भवन्ति इत्येवमवधारयन्[२] समुपसृत्य[३] 'स्वस्ति स्वकान्तिनिर्जितमकरध्वजाय तुभ्यम्' इत्यवादीत् ।**

**राजाऽपि सविस्मयमना मनागुन्नमितमस्तकः स्वागतप्रश्नेनाभिनन्द्य तीर्थयात्रिक ! कुतः प्रष्टव्योऽसि[४] । क्व च कियच्चाद्यापि गन्तव्यम् । उपविश[५] । विश्रम्य कथय काञ्चिदपूर्विकां[६] किम्वदन्तीम् ? अनेकदेशदृश्वानः किलाश्चर्यदर्शिनो भवन्तीति । न चाकस्मिकं दर्शनमपूर्वः परिचयः स्वल्पा प्रीतिरित्येकमप्याशङ्कनीयम् । अपूर्वदर्शनेऽपि न जात्या मणयः स्वां[७] स्वच्छतामपह्नुवते । तदेहि, मुहूर्तमेकत्र[८] गोष्ठीसुखमनुभवावः[९] इत्येनमवादीत्[१०] ।**

**असावपि अपूर्वकौतुककथाकर्णनरसिक[११] ! श्रूयतां यद्येवं, इत्यभिधाय सुखोपविष्टस्यास्य समीपे स्वयमुपविश्य[१२] कथयितुमारभत ।**

**तत्**-तस्माद्धेतोः एवं विधाः-सकललक्षणोपेताः खलु-निश्चितं महानुभावाः-महाप्रभावाः पुरुषा महनीयाः-स्तवनीयाः स्तोतुं योग्या भवन्ति, [१]एवं-उक्तप्रकारेण[१]-अवधारयन्-विचारयन् समुपसृत्य-राज्ञः समीपमागत्य इति अवादीत्-अब्रवीत् । इतीति किम् ? तुभ्यं स्वकान्त्या-स्वशरीरछव्या निर्जितः-पराभूतो मकरध्वजः-कामो येन स तस्मै स्वस्तिः-कल्याणमस्तु । इति स्तुतिः । "**स्वस्त्याशीः क्षेमपुण्यादौ**" इत्य**नेकार्थः** [परि, ३३] । "तनेत्याशिषि उक्तायां सत्याम्" ।

**राजाऽपि**-नलोऽपि सविस्मयमनाः-कोऽयं किमित्याशिषं दत्ते इत्याद्याश्चर्यसहितचेताः मनाक्-स्तोकं उन्नमितं-उच्चैः कृतं मस्तकं शिरो येन स ईदृशः सन् स्वागतप्रश्नेन-शोभनमागतं भवत इति प्रश्नेन तं अध्वगं अभिनन्द्य-स्तुत्वा-हे तीर्थयात्रिक !

---

१. एवमनेन प्रकारेण अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तीर्थयात्रैव पुण्यक्षेत्रगमनमेव प्रयोजनं यस्यासौ तीर्थयात्रिकस्तस्य सम्बुद्धौ भो तीर्थयात्रिक ! तीर्थगामिन् ! त्वं कुतः-कस्माद्देशात् प्रष्टव्योऽसि-कस्माद्देशाद् भवतः आगमनं जातमित्यर्थः । तीर्थयात्रिकेति, प्रयोजनं तदस्येति **"प्रयोजन"** [**पा० सू०** ५।१।१०९] इत्यर्थे प्रथमान्तात् ठञ्। च-पुनः क्व-कस्मिंस्तीर्थे त्वया गन्तव्यम् ? अद्यापि कियद्वा गन्तव्यं ? कियती-भूरद्याप्याक्रमणीया वर्तत इति । उपविश-मुहूर्तमेकं निषीद । विश्रम्य-मार्गाति-क्रमणजेन्य[1]खेदमपनीय काञ्चित् अपूर्विकां-अपूर्वैव अपूर्विकां तां[2] किम्वदन्तीं-वार्तां कथय-वद । किञ्च, पुनः किलेति सम्भाव्यते, अनेकान्-बहून् देशान् दृष्टवन्त इति अनेकदेशदृश्वानः-पथिकाः आश्चर्य-अद्भुतं पश्यन्त्यवश्यमिति आश्चर्यदर्शिनो भवन्ति । दृश्वा इति **"दृशेः क्वनिब्"** [**पा० सू०** ३।२।९४] इति भूते दृशेः क्वनिबेव स्यात् । न च वार्ताभिधाने भवता इति वक्ष्यमाणमेकमप्याशङ्कनीयं-विचार्यम् । इतीति किम् ? आकस्मिकं अकस्माद्भवं **"अध्यात्मादित्वाद् ठञ्"** [**पा० सू०** ४।३।७०-वा०] दर्शनं-अवलोकनं जातम्। तथा अपूर्वो नव एव परिचयः-सम्बन्धो जातः । अथ च स्वल्पा प्रीतिः-प्रेम जाता । अतः कथं वार्तां वच्मीति न विकल्पनीयम् । यतः-अपूर्वदर्शनेऽपि-अभिनवालोकनेऽपि जात्या मणयः-विशिष्टजातीयरत्नानि स्वां स्वच्छतां-निर्मलतां न अपह्नुवते-अपलपन्ति न । मणयो अपूर्वमेवास्य दर्शनमभूदतः कथमस्य स्वीयस्वच्छतां दर्शयाम इति विकल्पयन्ति । तथा भवताऽपि वार्ताकथने अपूर्वदर्शनाद्याशङ्का न विधेयेत्यर्थः । तत्तस्माद्धेतोः एहि-आगच्छ । मुहूर्तं यावदेकत्र-एकस्मिन् प्रदेशे स्थित्वा आवां गोष्ठीमिलितयोः परस्परं रहस्यकथनरूपः संलापस्तस्याः सुखं-सौख्यं अनुभवावः-आस्वादयावः । इति उक्तप्रकारेण एनं-अध्वगं अवादीत् ।

**असावपि**-अध्वगोऽपि अपूर्वायाः-अद्भुतायाः कौतुककथाया आकर्णने-श्रवणे रसः-विद्यते यस्याऽसौ तत्सम्बुद्धौ हे अपूर्वकौतुककथा[कर्णन]रसिक ! यदि चेत् एवं नव्यवार्ताश्रवणे त्वदीया मनीषा विद्यते तर्हि श्रूयतामिति अभिधाय-उक्त्वा सुखेन उपविष्टस्य-निषण्णस्य अस्य-नलस्य समीपे स्वयमात्मना उपविश्य कथयितुमारभत-वक्तुं यतते स्म ।

अथ दमयन्तीवर्णनां कर्तुकामस्तन्निवासपवित्रितं देशवर्णनां तावदाह—

**अस्ति स्वर्गसमः समस्तजगतां सेव्यत्वसंख्याग्रणी-**
**देशो दक्षिणदिङ्मुखस्य तिलकः स्त्रीपुंसरत्नाकरः ।**

---

१. 'जन्य' नास्ति अनू० । २. तां अपूर्विकां अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**यस्मिंस्त्यागमहोत्सवव्यसनिभिर्धन्यैरशून्या जनै-**
**रुद्देशाः स्पृहणीयभावभरिताः कं नोत्सुकं कुर्वते ॥५४॥**

**अस्तीति** । शार्दूलविक्रीडितवृत्तम् । दक्षिणदिङ्मुखस्य-अपाचीककुब्वक्त्रस्य तिलकः-विशेषकोपमः देशः अस्ति-वर्तते । किम्भूतो देशः ? स्वर्गेण समः-तुल्यस्तद्वद् वृद्धिसम्पन्नत्वात् । तथा समस्तजगतां-समस्तप्राणिनां सेव्यत्वस्य-आश्रयणीयत्वस्य या संख्या-गणना तस्यां अग्रणीः-मुख्यः । सकललोकस्यापि अयं देशः सेव्यः । अयं देशः सेव्य इति संख्यायां क्रियमाणायां अयं देशोऽतिशायिभोगाधिकरणत्वात् सेव्यत्वे मुख्यतां लभते, अतिशयेन सेव्य इत्यर्थः । तथा स्त्रियश्च पुमांसश्च स्त्रीपुंसा "**अचतुर**" [पा० सू० ५।४।७७] इत्यादिना अजन्तो निपात्यते । त एव रत्नानि उत्कृष्टत्वात् तेषामाकरः-खानिः; दक्षिणस्यां दक्षिणाः स्त्रियः पुमांसश्च प्राप्यन्ते । यस्मिन्देशे स्पृहणीया-अभिलषणीया ये भावाः-पदार्थास्तैर्भरिताः-पूर्णा उद्देशाः-भूभागाः कं-पुरुषं सचेतनं नोत्सुकं-नोत्कण्ठुलं कुर्वते, अपितु-सर्वमपि तद्देशावस्थानाय उत्कण्ठितं कुर्वन्तीत्यर्थः । किम्भूता उद्देशाः ? त्यागे-दाने महोत्सवे-इन्द्रमहादिके व्यसनं-आसक्तिर्विद्यन्ते येषां ते त्यागमहोत्सवव्यसनिनस्तैर्धन्यैः-धनार्हैर्जनैः-लोकैरशून्या-अरिक्ता भृता इत्यर्थः ॥५४॥

**कथं चासौ[1] न प्रशस्यते ।**

**यत्र त्रिपुरपुरन्ध्रिरोध्रतिलकहारिणा हरिविरिञ्चि[2]चूडामणिमरीचिचक्रचकोरचुम्बितचरणनखचन्द्ररुचिनिचयेन भगवता[3]सेव्यते सेव्यतया[3]ऽपहसितकैलासश्रीः श्रीशैलः शूलपाणिना ।**

**यत्र च विकचविविधवनविहारसुरभिसमीरणान्दोलितकदलीदलव्यजनवीज्यमाननिधुवनविनोदखेदविद्राणनिद्रालुद्रविडमिथुनसनाथपरिसराः सरसघननिचुलतलचलच्चकोरचक्रवाककुलकपिञ्जलमयूरहारीत[4]हारिण्यो नाकलोककमनीयतां कलयन्ति कलमकेदारसाराः सरससहकारकारस्कराः काबेरीतीरभूमयः ।**

**किम्बहुना—**

**च-पुन**, असौ देशः कथं न प्रशस्यते ?-कथं न स्तूयते ?

**यत्र** देशे भगवता-शूलपाणिना-ईश्वरेण श्रीशैलः-श्रीशैलाभिधानो गिरिः सेव्यते, यत्र

Jain Education International For Personal & Private Use Only www.jainelibrary.org

देशे शम्भुनाऽपि निवासश्चके स कथं न वर्ण्यः[१] ? इत्यर्थः । किम्भूतेन शम्भुना ? त्रिपुरस्य-त्रिपुराभिधानदैत्यस्य यानि पुराणि तेषु या पुन्ध्रयः-स्त्रियस्तासां रोध्रतिलकं हरति-अपनयतीत्येवंशीलस्त्रिपुरपुरन्ध्रिरोध्रतिलकहारी तेन । तत्र स्थितेन हि भगवता त्रिपुरासुरो हतः । अतस्तन्नितम्बिनीनां सौभाग्याद्यभिव्यञ्जकरोध्रतिलकहर्ता । पुनः किम्भूतेन ? हरिविरिञ्ची-विष्णुवेधसौ तयोश्चूडामण्योः-शिरोमण्योः यन्मरीचिचक्रं-किरणजालं तदेव चकोरस्तेन चुम्बितः-आस्वादितः चरणनखा एव चन्द्रस्तस्य रुचिनिचयः-कान्तिवृन्दं यस्य स तेन । चकोरेण हि चन्द्ररुचि पीयते, हरिधातारौ अपि हरपादयोर्नमस्कृत्यर्थं पतत इत्यर्थः । किम्भूतः श्रीशैलः ? सेव्यतया-आश्रयणीयतया उपहसिता-तिरस्कृता कैलासस्य श्रीः-शोभा येन सः । कैलासे किल शम्भुः कदाचित्तिष्ठति अत्र तु चिरमस्थात्, अतः सेव्यतया कैलासोऽपि येन निर्जित इत्यर्थः ।

तथा च-पुनः यत्र-देशे काबेरीतीरभूमयः-अर्द्धजाह्नवीतटभूमयः नाकलोकस्य-स्वर्लोकस्य या कमनीयता-सुन्दरता तां कलयन्ति-प्रेरयन्ति तर्जयन्तीत्यर्थः । **"कल् किल्क् नुदौ"** [ ] यद्वा, कलयन्ति-धारयन्ति यादृशी स्वर्लोकस्य सुन्दरता तादृशी एतासामपि । कलयतिर्धारणार्थोऽपि, तथा च **क्रियाकलापे-"दधते दधाति धरति च धारयति वहर्यत कलयति च"** [ ] इति । किम्भूताः काबेरीतीरभूमयः ? विकचानि-प्रफुल्लानि यानि विविधवनानि तेषु यो विहारः-विचरणं तेन सुरभिः-सुगन्धिर्यः समीरणः-वातस्तेन अन्दोलितानि-कम्पितानि यानि कदलीदलानि-रम्भापत्राणि तान्येव व्यजनानि-तालवृन्तानि तैर्वीज्यमानानि निधुवनविनोदेन-सुरतक्रीडया विद्राणानि-श्रान्तानि अतएव निद्रालूनि-शयालूनि यानि द्रविडमिथुनानि तैः सनाथः-सहितः परिसरः-नैकट्यं यासां ताः । अत्र विद्राणशब्दः प्रकरणात् श्रान्तार्थः । यदुक्तम्—

**"शब्दात्प्रकरणाल्लिङ्गादौचित्याद्देशकालयोः ।**
**शब्दादर्थं विजानीयान्न शब्दादेव केवलात् ॥"** [ ]

इति । अन्यथा अथं जागरितार्थे प्रसिद्धत्वात्रार्थसंगतिमंगति । पुनः किम्भूताः ? सरसाः-आर्द्रा घनाः-निविडा ये निचुलाः-हिज्जलाख्यवृक्षास्तेषां तलेषु अधोभागेषु चलन्तो ये चकोराश्च-चक्रवाककुलं च रथाङ्गसमूहः कपिञ्जलाश्च-श्वेततित्तिरयः, मयूराश्च-शिखण्डिनः, हारिताश्च-पक्षिविशेषास्तैर्हारिण्यः-मनोहराः । पुनः किम्भूताः ? कलभाः-शालिविशेषास्तेषां ये केदाराः-क्षेत्राणि तैः साराः-उत्कृष्टाः । तथा सरसाः-आर्द्राः सहकारकारस्कराः-चूततरवो यासु ताः ।

---

१. वर्ण्यत अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**किम्बहुना**-किं बहूक्त्या !

**अस्तु स्वस्ति समस्तरत्ननिधये श्रीदक्षिणस्यै दिशे,**
**स्वर्गस्पर्द्धिसमृद्धये हृदयहृद्गोदावरीरोधसे ।**
**यत्र त्रस्तकुरङ्गकार्भकदृशः सम्भोगलीलाभुवः,**
**सौख्यस्यायतनं भवन्ति रसिकाः कन्दर्पशस्त्रं स्त्रियः ॥५५॥**

**अस्तु** इति । शार्दूलविक्रीडितम् । श्रीदक्षिणस्यै दिशे स्वस्ति अस्तु-कल्याणमस्तु । "**नमः स्वस्तिस्वाहास्वधाऽलं वषट् योगाच्च**" [पा० सू० २।३।१६] इति स्वस्तियोगेऽत्र चतुर्थी । किम्भूतायै ? समस्तरत्नानां निधिः-निधानं समस्तरत्ननिधिस्तस्यै । पुनः किम्भूतायै ? स्वर्गं स्पर्द्धते-संहृष्यतीत्येवंशीला स्वर्गस्पर्द्धिनी, एवम्भूता[१] समृद्धिः-सम्पद् यस्याः सा तस्यै, स्वर्गसम्पदधिकसम्पद्धारिण्यै इत्यर्थः । तथा हृदयहृत्-मनोहरं गोदावरीरोधः-गोदातटं यस्यां सा तस्यै । यत्र-दक्षिणस्यां दिशि स्त्रियः कन्दर्पस्य शस्त्रं-आयुधं भवन्ति । ताभिः कृत्वा कन्दर्पः सर्वानपि जयतीत्यर्थः । किम्भूताः ? त्रस्ताः-भयाकुला ये कुरङ्गकार्भकाः-मृगशिशवस्तेषां दृशाविव दृशौ यासां ताः । "**शाक-पार्थिवादित्वात्**" [**पा० सू०** २।१।६० वा०] मध्यमपदलोपीसमासः । त्रस्तकुरङ्गकार्भकत्वे-नातिशायिदृशोश्चाञ्चल्यं दर्शितम् । तथा सम्भोगलीलायाः-सुरतक्रीडाया भुवः-स्थानानि, तथा सौख्यस्य-विषयसुखस्य आयतनं-गृहाः । तथा रसिकाः-रसो विद्यते यासु ता रसिकाः, "**अत इनि ठनो**" [**पा० सू०** ५।२।११५] शृङ्गाररसप्रधानाः । अजहल्लिङ्गत्वादायतनं शस्त्रमिति प्रयोगः ॥५५॥

**तत्र प्रणतसुरासुरशिरःशोणमणिमरीचिचय[१]बहलकुङ्कुमानुलेपपल्लवितपादारविन्दद्वयस्य क्रौञ्चभिदो भगवत सुगन्धि[२]गन्धमादनाधिवासिनः स्कन्ददेवस्य दर्शनार्थमितो गतवानस्मि ।**

**तस्माच्च निवर्तमानेन क्वचिदेकस्मिन्नध्वरोधिनि[३] न्यग्रोधपादपतले दीर्घाध्वश्रान्तेन विश्राम्यता[४] मया श्रूयतां यदाश्चर्यमालोकितम् ।**

**तत्र**-दक्षिणास्यां दिशि भगवतः स्कन्ददेवस्य-कार्त्तिकेयस्य दर्शनार्थमितः-[२]अस्माद्देशादागतवानस्मीत्यव्ययं अहमित्यर्थे, ततोऽयमर्थोऽहं तत्र देशे प्राप्तवान्[२] ।

---

१. एवं विधा अनू० । २. अस्माद्देशादागतवान्, अस्ति गतो भवं, ननु च गतवानित्यत्रातीतार्थतायां अस्मीति वर्त्तमानार्थता कथं घटेत ? उच्यते-धातु सम्बन्धे प्रत्यया इति भूते लट् साधुः । इति से० प्रतौ । अस्माद्देशाद्गतवानस्मि गतो भवं, ननु गतवानित्यत्रातीतार्थतायां अस्मीति वर्तमानार्थता कथं घटेत ? उच्यते, धातुसम्बन्धं प्रत्यया इति भूते लट् साधुः । अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किम्भूतस्य ? प्रणता-नता ये सुराश्च असुराश्च तेषां शिरस्तु ये शोणमणयः-लोहितरत्नानि तेषां यो मरीचिचयः-अंशुजालं स एव बहलः-निविडो च कुङ्कुमानुलेपः-घुसृणलेपस्तेन पल्लवितं-किशलयितं पादारविन्दद्वयं यस्य स तस्य सुरासुरा एनं नमस्कुर्वन्ति । तेषां शिरः-शोणमणिकान्तिस्तत्पादयोः संक्रान्ता, ततः पल्लवोपमत्वं पादाब्जयोर्जातमिति । तथा क्रौञ्चं गिरिं भिनत्तीति क्रौञ्चभित् तस्य क्रौञ्चभिदः । तथा सुगन्धिः-चन्दनादितरु-बहुलत्वात् सुरभिर्यो गन्धमादनाख्यो गिरिस्तमधिवसत्यभीक्ष्णमिति सुगन्धिगन्ध-मादनाधिवासी तस्य ।

तस्माच्च-देशान्निवर्तमानेन-व्याघुट्यागच्छता क्वचित् तद्देशस्य कस्मिंश्चित्भूभागे एकस्मिन्नध्वानं-मार्गं आवृत्य तिष्ठतीति अध्वरोधि तस्मिन् अध्वरोधिनि, न्यग्रोधपादपतले-वटवृक्षच्छायायां दीर्घाध्वना-लङ्घितबहुमार्गेण श्रान्तः-खिन्नो दीर्घाध्वश्रान्तस्तेन, विश्राम्यता-विश्रामं गृह्णता मया यत् आश्चर्यं-अद्भुतमालोकितं तत् श्रूयतां-कथ्यमानमिति शेषः ।

तदेवाह—

**अतिललितपदविन्याससारसाधु[१]सिन्धुरवधूस्कन्धमधिरूढा, प्रौढ-सखीसहायप्राया, प्रान्तपत[२]च्चारुचामीकरदण्डचामर[२]मरुन्नर्तिताल-कवल्लरी, कर्णकुवलयालङ्कारधारिणी, रुचिररुचिमच्चरणनूपुरा, पुरः-सरसरागगान्धर्विककण्ठकन्दर[३]विनिःसरत्सरसगीतप्रेङ्खोलनप्रयोगेषु दत्तावधाना, नेत्रे मनाङ्मीलयन्ती, ध्रियमाणमायूरात[४]पत्रमण्डला, मण्डलितमदनचापचक्रवक्रभ्रूः[५], भूपालपुत्रिका कापि क्वापि कुतोऽप्युच्चलिता तदैव[६] न्यग्रोधच्छायामण्डप[७]मशिश्रियत् ।**

**तां चावलोक्य[८] चिन्तितवानस्मि[९] विस्मितमनाः ।**

**अतीति** । ईदृशी काऽपि अद्भुतरूपा भूपालपुत्रिका-राजसुता क्वापि-कस्मिंश्चिद् रम्यप्रदेशे अधिकरणभूते, कुतोऽपि-कस्माच्चिद् राजावसवा[१]दुच्चलिता-गच्छन्ती, तदैव यदाऽहं[२] तत्र श्रान्त उपविष्टोऽस्मि, तत्काल एव न्यग्रोधछायैव मण्डपः-आश्रयविशेषस्तं

---

१. राजावसथाद् अनू० । २. यदानीमहं अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अशिश्रियत्-आश्रयति स्म । किम्भूता भूपालपुत्रिका ? अतिललित:-अतिशयेन मनोज्ञो य: पदविन्यास:-पदरचना[1] अनेन सारा-रुचिरा साध्वी पीवराङ्गी या सिन्धुरवधू:-हस्तिनी: तस्या: स्कन्धं पृष्ठमधिरूढा-आरूढवती । तथा प्रौढा:-इङ्गितादिभिश्चित्ताभिप्रायपरिच्छेत्र्यो या: सख्य:-वयस्यास्त एव सहाया:-सहचारिण्यस्तासां प्रायो बाहुल्यं वर्तते यस्या: सा बह्वीभि: प्रौढसखीभि: परिवृतेत्यर्थ: । यद्वा, प्रौढसख्य एव सहायप्राया-अनुचरसदृश्यो यस्या: सा । "**प्रायो वयस्यनशने मृतौ बाहुल्यतुल्ययो:**" **इत्यनेकार्थ:** [२।३७४] । तथा प्रान्तयो:-उभयो: पार्श्वयो: पतन्ती-वीजनाय प्रवर्तिते चारुणी-मनोज्ञे चामीकरदण्डे-सौवर्णयष्टिनी ये चामरे-बालव्यजने तयोर्मरुता-वातेन नर्त्तिता-चालिता अलकवल्लरिर्यस्या: सा । अत्र वल्लरिशब्दात् समासे कृते **पश्चादिदं तद्द्वारेण** [ ] ईप्रत्यय:, अन्यथा "**नद्यृदन्तात्**" [**पा० सू०** ५।४।१५३] कप् स्यात् । यद्वा, "**शेषाद्विभाषा**" [**पा० सू०** ५।४।१५४] इति वा कप्प्रत्ययस्ततस्तदभावे रूपम् । तथा कर्णयो: कुवलयालङ्कारं-उत्पलावतंसं धारयतीति कुवलयालङ्कारधारिणी । तथा रुचिररुचिनी-शोभाकान्तिनी चञ्चती-दीप्यमाने चरणयो:-पादयो: नूपुरे-तुलाकोटी यस्यां सा । पुन: किम्भूता ? पुर:-अग्रे सरस:-माधुर्यवान् राग:-गान्धारादिर्येषां ते सरसरागा ये गान्धर्विका:-गायनास्तेषां कण्ठकन्दराद्[2]-गलकन्दराद् विनिस्सरन्ति-निर्गच्छन्ति यानि सरसगीतानि-शृङ्गाररसनिबद्धगानानि तेषां यत् प्रेङ्खोलनं-घोलनं तस्य ये प्रयोगा:-व्यापारास्तेषु दत्तं अवधानं-चित्तैकाग्र्यं यया सा । ईदृग्विधा सती नेत्रे-लोचने मनाक्-स्तोकं मीलयन्ती विगलितवेद्यान्तरं तदानन्दरसनिर्भरतया सङ्कोचयन्ती । तथा ध्रियमाणं-सख्या धार्यमाणं मायूरातपत्रमण्डलं यस्या: सा । पुन: कथम्भूता ? मण्डलितं-आकर्षणाद्-वलयीकृतं यन्मदनचापचक्रं-कामधनुर्मण्डलं तद्वद् वक्रे-अनृज्वौ भ्रुवौ यस्या: सा ।

तदनन्तरं यदभूत्तदाह—

**तं चेति** । तां च-भूपालपुत्रिकामवलोक्य अस्मि-अहं विस्मितं-साश्चर्यं मनो यस्यासौ विस्मितमना:-कौतुकाकुलितचेता: सन् चिन्तितवान्-विचारितवान् । अस्मीत्यव्ययं अहमित्यर्थे ।

**किं लक्ष्मी: स्वयमागता मुररिपोर्देवस्य वक्षस्थलात्,**
**कोपात्पत्युरुतावतारमकरोद् देवी भवानी भुवि ।**

---

१. चरणरचना अनू० । २. कण्ठकन्दलाद् अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**श्यामाम्भोजसदृक्षपक्ष्मलचलन्नेत्रामिमां पश्यतो,**
**धातस्तात करोषि किं न वदने चक्षुः सहस्रं मम ॥५६॥**

**अपि च-**

**किं लक्ष्मीरि**ति । शार्दूलविक्रीडितवृत्तम् । मुररिपोर्देवस्य-विष्णोः वक्षःस्थलात्-उरःस्थलात् किं स्वयं लक्ष्मीरागता ? उत-अथवा भवानीदेवी-गौरी पत्युः-शम्भोरुपरि कोपात्-प्रणयकलहात् भुवि-धरायामवतारमकरोद्-अवतीर्णा ? मर्त्यलोके एतादृग्विशिष्ट-रूपस्यासम्भवादियं कल्पना । इमां-भूपालपुत्रिकां पश्यतः-अवलोकयतो मम वदने तातेति कोमलामन्त्रणे हे तात ! हे धातः ! ब्रह्मन् ! चक्षुः सहस्रं किं न करोषि-किं न विधत्से ? लोचनद्वयमात्रेण एतद्दर्शनातृप्त्या धातारं लोचनसहस्रं याचितवान्, बहूनि यदि नेत्राणि भवन्ति तदा सम्यगेतामवलोकयामीति । अनेनावलोकनीयरम्यरूपाद्याधिक्यं द्योतितम् । किम्भूतामिमाम् ? श्यामाम्भोजसदृक्षे-नीलाब्जसमाने पक्ष्मले-रोमवती चलतीं-विलासं कुर्वती नेत्रे यस्याः सा तथाविधाम् । पक्ष्माणि रोमाणि यस्मिंस्तत्पक्ष्मलं "**सिध्मादि-त्वाल्लः**" [**पा० सू०** ५।२।९८] ॥५६॥

**इन्दोः सौन्दर्यमास्यं कलयति कमलस्पर्धिनी नेत्रपत्रे,**
**कालिन्द्याः कुन्तलाली तुलयति विभवं भव्यभङ्गैस्तरङ्गैः ।**
**तस्याः किं श्लाघ्यतेऽन्यत्सुभगगुणनिधेः काप्यपूर्वैव यस्याः,**
**पुष्पेषोर्वैजयन्ती जयति युवजनोन्मादिनी यौवनश्रीः ॥५७॥**

**अपि च—**

**इन्दोरि**ति । स्रग्धरावृत्तम् । हे नृप ! तस्याः सुभगगुणनिधेः-मनोहारिरूपादिगुण-निधानरूपाया राजपुत्र्या अन्यत्-अपरं किं श्लाघ्यते-किं वर्ण्यते ? यस्याः-भूपालपुत्रिकायाः आस्यं-वक्त्रं इन्दोः-चन्द्रस्य सौन्दर्यं-रामणीयकं कलयति-वहति । तथा यस्या नेत्रपत्रे कमलं स्पर्द्धेते ? अनुकुरुत इत्येवंशीले ये ते कमलस्पर्द्धिनी । तथा यस्याः कुन्तलाली-केशकलापः कालिन्द्याः-यमुनाया भव्या भङ्गाः-लघुगुरुत्वादिकृता विच्छित्तयो येषु ते तथाविधैस्तरङ्गैः-कल्लोलैः सम्भूतमित्यध्याह्रियते, विभवं-विलासं तुलयति-विडम्बयति तत्साम्यं प्राप्नोतीत्यर्थः । यथा तरङ्गेषु वक्रत्वं तथा तदलकेष्वपीति, यद्वेत्थं योजना कार्या-यस्याः कुन्तलाली कालिन्द्या विभवं तुलयति । किम्भूतायाः, भव्य-भङ्गैस्तरङ्गैरुपलक्षितायाः तुलां रोपयति-तुलयति । तथा यस्याः कापि वक्तुमशक्या अपूर्वैव-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अद्भुतैव यौवनश्रीः-तारुण्यलक्ष्मीर्जयति-सर्वोत्कर्षेण वर्तते । किम्भूता यौवनश्रीः ? पुष्पेषोः-कामस्य वैजयन्तीपताका सर्वजगज्जयादियं कामेन जयपताकाप्राया निर्मितेत्यर्थः । पुनः किम्भूताः ? युवजनान्-तरुणलोकान् उन्मादयति-उन्मत्तान् करोतीति युवजनोन्मादिनी ॥५७॥

**अपि** चेति । पुनस्तस्या एव स्तुतिमाह–

**आकारः स मनोहरः स महिमा तद्वैभवं तद्वयः,**
**सा कान्तिः स च विश्वविस्मयकरः सौभाग्यभाग्योदयः ।**
**एकैकस्य विशेषवर्णनविधौ तस्याः स एव क्षमो,**
**यस्यास्मिन्नुरगप्रभोरिव भवेज्जिह्वासहस्रद्वयम्[१] ॥५८॥**

**आकार** इति । शार्दूलविक्रीडितम् । तस्याः-कुमार्याः स मनोहरः-मनोज्ञ आकारः-आकृतिः । "**आकार इङ्गिताकृत्योः**" इत्य**नेकार्थः** [३।५५५] । तथा स महिमा-अनुभावः; तथा तद्वैभवं-ऐश्वर्यं, तथा तद्वयः-यौवनं, तथा सा कान्तिः-शरीरच्छविः । तथा च-पुनः स विश्वस्य समस्तस्य विस्मयं-आश्चर्यं करोतीति विश्वविस्मयकरः, सौभाग्यस्य-सुभगत्वस्य भागधेयस्य[१] च उदयः-प्रादुर्भावः । एषामाकारादीनां मध्ये एकैकस्य कस्यचिद्वर्णयितुमुपक्रान्तस्य आकारादेरेकस्मिन्[२] विशेषणसामस्त्येन वर्णनविधौ-वर्णनाकरणे स एव क्षमः-स एव समर्थो भवेत् यस्य उरगप्रभोरिव-शेषस्येव जिह्वा सहस्रद्वयं भवेत् । यथा उरगप्रभोर्जिह्वासहस्रद्वयं वर्तते, तथा यस्य एतावत्यो जिह्वा भवन्ति स एव वर्णयितुं क्षमः स्यात्, नान्यः वर्णनीयस्याकारादेर्बहुविशेषमयत्वात् । यदा तु '**जिह्वासहस्रं मुखे**' इति पाठस्तदा सहस्रशब्दोऽमितबहुत्ववचनः । यदाहुर्वृद्धाः-"**शतसहस्रशब्दौ भूयसीं संख्यामनियतामाहतुः**" [ ] । इति ॥५८॥

**सापि यथा त्वमिदानीं मामिह पृच्छसि तथार्धपथमिलितं कञ्चिदुदीचीनपथिकं[२] दक्षिणस्यां दिशि प्रस्थितमादरेण पृच्छन्ती मुहूर्त्तमिव तत्रैव विश्रमितुमारभत ।**

**श्रुतश्चायं मयापि तेन तस्याः पुरः कस्यचिदुदीच्यनरपतेः[३] श्लाघ्यमानस्य[४] कथाशेषालापः[५] ।**

---

१. भाग्यस्य भागधेयस्य अनू० । २. आकारादेरस्मिन् अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सापीति** । हे महानुभाव ! यथा त्वमिदानीं मामिह प्रदेशे अद्भुतं पृच्छसि तथा साऽपि बालिका अर्धपथे-अर्धमार्गे मिलितं कञ्चित् अज्ञातज्ञातिनामानं उदीचीनं-उत्तरदिक्सम्भूतं ततः समायातं वा उदीच्यं पथिकं दक्षिणस्यां दिशि प्रस्थितं-गन्तुं प्रवृत्तं संतं आदरेण साभिलाषं पृच्छन्ती मुहूर्तमिव । अत्र इव शब्दः शोभावाची, मुहूर्त्तमेकं तत्रैव-न्यग्रोधतले विश्रमितुं-खेदमपनेतुमारभत-यत्नमकरोत् ।

**च**-पुनर्मयाऽपि तत्रैवावस्थितेन सता तेन-उदीच्यपथिकेन तस्याः-बालिकाया पुरः कस्यचित्-अज्ञातनामधेयस्य उदीच्यनरपतेः श्लाघ्यमानस्य-गुणैः स्तूयमानस्य अयं-वक्ष्यमाणः कथायाः शेषः-प्रान्त्य आलापः-वाग्विशेषः[१] कथाशेषालाप श्रुतः । अन्यस्यां [२]वार्त्तायामवधानं मया[२] न दत्तं किन्तु [३]कथासमाप्तौ पथिकोक्तमिदं वाक्यं श्रुतम् ।

**तस्मिन् स्मितमुखे यूनि यूपदीर्घभुजद्वये[१] ।**
**ते धन्या न्यपतन्येषां कन्दर्पसदृशे दृशः ॥५९॥**

**किम्बहुना !**

**तस्मिन्निति** । वृत्तम् । तस्मिन्-पूर्ववर्णितस्वरूपे भूपे यूनि-तरुणे येषां पुरुषाणां दृशः-नेत्राणि न्यपतन्-निपेतुः तं युवानमद्राक्षुरित्यर्थः । ते धन्याः-पुण्यवन्तः । **यदनेकार्थः**-"**धन्यः पुण्ययुते**" [२।३७१] इति । किम्भूते तस्मिन् ? स्मितं-ईषद्हास्योपेतं मुखं यस्य स तस्मिन् । पुनः किम्भूते ? यूपवद्-युगवद्दीर्घ-आयतं भुजद्वयं यस्य स तस्मिन्। पुनः किम्भूते ? कन्दर्पेण सदृशः-समस्तस्मिन् ॥५९॥

**किम्बहुना**-किम्बहूक्त्या !

**सा त्वं मन्मथमञ्जरी स च युवा भृङ्गस्तवैवोचितः,**
**श्लाघ्यं तद्भवतो किमन्यदपरं किंत्वेतदाशास्महे ।**
**भाग्यैर्योग्यसमागमेन युवयोर्मानुष्यमाणिक्ययोः,**
**श्रेयानस्तु विधेर्विचित्ररचनासंकल्पशिल्पश्रमः ॥६०॥**

**सा त्वमिति** । शार्दूलविक्रीडितवृत्तम् । हे कुमारि ! सा त्वं मन्मथस्य मञ्जरी-वल्लरिर्मन्मथमञ्जरी, स च युवाभृङ्गस्तवैवोचितः-योग्यः । मञ्जरी किल भृङ्गस्यैवोचिता[४],

---

१. वाग्विलासः अनू० । २-२. वार्त्तायां मयाऽवधानं अनू० । ३. कथा नास्ति अनू० । ४. योग्या अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा स युवा तवैवोचित इति । तत्तस्माद्धेतो, अपरं किमन्यत् वच्मः, किन्तु भवती च भवांश्च भवन्तौ स्त्रिया सहोक्तो पुमानेकः शिष्यते, तयोर्भवतोः श्लाघ्यं वर्ण्यमेतत्वक्ष्यमाण-माशास्महे-आशिषं दद्महे । यत् युवयोः-भवतोर्भाग्यैः-पुण्यैर्योग्ययोः, त्वं तस्य योग्या स च भवत्या योग्यः, इति उभयोरुचितयोः समागमेन-सम्बन्धेन विधेः-धातुर्विचित्ररचनायाः-विधिनिर्माणस्य यः संकल्पः-अध्यवसायः स एव शिल्पं-विज्ञानं तस्य यः श्रमः-खेदः स श्रेयान्-अतिशयेन प्रशस्योऽस्तु, भवतोः संयोगेन विधेर्निर्माणसंकल्पशिल्पश्रमः सफलो भवत्वित्यर्थः । किम्भूतयोर्भवतोः ? मानुष्ये-मानुष्यत्वे भूषणभूतत्वान्माणिक्यमिव यौ तौ मानुष्यमाणिक्यौ तयोर्मानुष्यमाणिक्ययोः ।

ननु दमयन्त्याः प्रत्यक्षत्वेऽपि नलस्याप्रत्यक्षत्वात् । कथं भवतोरिति प्रयोगः ? उच्यते अत्राप्रत्यक्षमपि बुद्धिकल्पितं नलं प्रत्यक्षमिव मन्यमानो भवतोरित्याह ॥६०॥

अथासौ पथिको नलं प्रत्याह–

**तन्न जाने स कः सुकृती तेन तस्याः [१]श्रवणादेवोल्लसद्बहुल-पुलकाङ्कुरोत्तभ्भितांशुकायाः पुरो[२] विस्तरेणैवं वर्णितः ।**

**तन्न जान** इति । तत् इति सामान्योक्तौ नपुंसकत्वनिर्देशः । तत्-वस्तु न जाने-नावगच्छामि स कः सुकृती-पुण्यवान् ? यस्तेन उदीच्येन अध्वगेन तस्याः-कुमार्याः पुरः-अग्रे विस्तरेण एवं पूर्वोक्तप्रकारेण वर्णितः-कथितः । किम्भूतायास्तस्याः ? श्रवणादेव-तस्य यून आकर्णनादेव उल्लसन्तः-उच्छ्वसन्तो बहुलाः-अदभ्राः पुलकाः-रोमाञ्चा एव उच्चत्वसाम्यात् अङ्कुरास्तैरुत्तभ्भितं-उच्चैर्जातं अंशुकं-चीनांशुकं यस्याः सा तस्याः । एतावता तस्मिन् तस्या रागातिशयो द्योतितः । उत्तभ्भितेति "**स्तम्भुः** [**पा० धा०** १५७२] **सौत्रो धातुः स्वार्थिको णिच् क्तः** ।"

अत्रान्तरे नल आह–सा का ? कस्य दुहिता ? क्व यास्यति ? कुत आगता ? इत्याह–

**न च मयापि विस्मयविस्मृतविवेकेन केयं[३] कस्येयं कुत्र कुतो वा प्रस्थितेति प्रश्नाग्रहः कृतः । केवलमदृष्टपूर्वरूपोत्पन्नाकस्मिककौतुकाति-रेकास्तमितसमस्तान्यव्यापारेणैकाग्रतया ग्रहनिरुद्धनेवान्धेनेव मूकेनेव[४] मूढेनेव[५] मूर्छितेनेव सञ्जातसंतमसेनेव[६] विषविघूर्णितेनेव[७] स्तोभस्तम्भि-तेनेव[८] गतायामपि तस्यां तेनाध्वनीनेन सह तत्रैव न्यग्रोधतरुतले सुचिर-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**मासितमासीत् ।**

**तदायुष्मन्नेष कथितः स्ववृत्तान्तः ।**

**तस्यां दिशि तया सकलजगज्ज्योत्स्या, अस्मिन्नपि देशे निःशेषजननयनकुमुदेन्दुना त्वया[१] दृष्टेन, दृष्टं यद्द्रष्टव्यम् । अभूच्च मे श्लाघ्यं जन्म । जाते कृतार्थे चक्षुषी । सम्पन्नः सकलः परिभ्रमणप्रयासः ।**

**तदिदानीं किमन्यत् ।**

**अनुमन्यस्व स्वविषयगमनाय माम्, इत्यभिधाय व्यरंसीत् ।**

**राजाऽपि एतदाकर्ण्य चिन्तितवान् ।**

**न चेति** । न च मया[१] विस्मयेन-आश्चर्येण विस्मृतः-नष्टो विवेकः-चातुर्यं यस्य स तादृशेन सता, केयं ? कस्य-नृपस्य इयं ? कुत्र-कस्मिन्प्रदेशे कुतो वा पुरात् प्रस्थितेति प्रश्नाग्रहः कृतः । नष्टविवेको हि पुमान् न किञ्चित्प्रस्तुतं पृच्छेदिति । केवलं-परं पूर्वं दृष्टं दृष्टपूर्वं, न दृष्टपूर्वं अदृष्टपूर्वं यद् रूपं-आकारस्तेन उत्पन्नं-जातमाकस्मिकं यत् कौतुकं-कुतूहलं तस्य य अतिरेकः-आधिक्यं तेन अस्तमिताः-नष्टाः समस्ता अन्ये-अवलोकनादपरे व्यापाराः-चलनादिका यस्य स, तथाभूतेन एकाग्रतया-तद्रूपावलोकनदत्तचित्ततया ग्रहेण-पिशाचेन निरुद्धः-गृहीतो ग्रहनिरुद्धस्तेनेव, ग्रहनिरुद्धः किल न किञ्चिच्चेतयते । तथा अन्धेनेव-गताक्षिणेव तथा मूकेनेव-अवाक्पटुनेव, तथा मूढेनेव-मूर्खेणेव, तथा मूर्छितेनेव-मूर्छालेनेव मूर्छा-मोहः तथा सञ्जातं संतमसं-अन्धकारं यस्य स तेनेव "**अवसमन्धेभ्यः**" [**पा० सू०** ५।४।७९] इति संपूर्वात्तमसोऽच् । तथा विषेण-गरेण विघूर्णितः-धारितस्तेनेव-विषवेगावर्त्तित शरीरेणेव । तथा स्तोभः-चेष्टाव्याघातस्तेन संस्तंभितः-निरुद्धक्रियस्तेनेव, मया तस्यां-बालायां गतायामपि तेनाध्वनीनेन-पथिकेन सह तत्रैव-तस्मिन्नेव न्यग्रोधतरुतले सुचिरं-चिरकालं आसितं-अवस्थितं आसीत्, तत्रैवावस्थानं कृतमित्यर्थः।

**तदिति** । येन मे अद्भुतं पृष्ठं तत्-तस्माद्धेतोः हे आयुष्मन् !-चिरञ्जीविन् ! एषः-अद्भुतावलोकनरूपः स्वस्य वृत्तान्तः-वार्त्ता कथितः, मया च ।

**तस्यां**-दक्षिणस्यां दिशि सकलजनानामाह्लादकारित्वात् ज्योत्स्नेव या सा तथाभूतया तया-बालया दृष्टया अस्मिन्नपि-उदीच्ये देशे निश्शेषजनानां-समस्तलोकानां नयनान्येव

---

१. मयापि अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कुमुदानि तेषु विकाशकत्वादिन्दुरिव यः स तेन त्वया दृष्टेन, यद्द्रष्टव्यं-प्रेक्षणीयं तद्दृष्टम्, अतः परं न किञ्चिच्चारुदृश्यमस्तीत्यर्थः । दृष्टेन इत्यत्र अर्थवशाद् विभक्ति-परिणामेन दृष्टया इत्यपि द्रष्टव्यम् । च-पुनर्मे-मम श्लाघ्यं जन्म अभूत् । चक्षुषी-नेत्रे कृतार्थे-कृतकृत्ये सफले जाते । तथा परिभ्रमणस्य-पर्यटनस्य प्रयासः सफलः सम्पन्नः, यद्भवतोरवलोकनं जातमिति ।

**तत्**-तस्मादिदानीं-अधुना अन्यत्-अपरं किं-वच्मि ?

तेन स्वविषयगमनाय-स्वदेशयानाय मामनुमन्यस्व-अनुजानीहि, इति पूर्वोक्तं अभिधाय-उक्त्वा व्यरंसीत्-विरराम मौनं शिश्रायेत्यर्थः ।

**राजा**—नलोऽपि एतत्—पथिकोक्तमाकर्ण्य चिन्तितवान् ।

**स्त्रीमाणिक्यमहाकरः स विषयः [१]पान्थोऽप्ययं तथ्यवाग्-**
**व्यापारोऽपि विधेर्विचित्ररचनस्तत् किं न सम्भाव्यते ।**
**किन्त्वाश्चर्यमदृष्टरूपविभवाप्याकर्ण्यमाना सती,**
**कान्तेत्युन्नतचेतसोऽपि कुरुते नाम्नैव निम्नं मनः ॥६१॥**

**स्त्रीमाणिक्ये**ति । शार्दूलविक्रीडितवृत्तम् । स विषयः-देशः स्त्रिय एव माणिक्यानि-रत्नानि तेषां महाकरः-महाखानिः उत्पत्तिस्थानं । तथाऽयं पान्थोऽपि तथ्यवाक्-सत्यवचनः । तथा विधेः-धातुर्व्यापारोऽपि चेष्टापि विचित्रा रचना-निर्माणं यस्मिन् स तथाविधः, एषां मध्ये तत् किं यन्न सम्भाव्यते-न कल्प्यते । किन्तु-एतदाश्चर्यं-अद्भुतं यन्न दृष्टो रूपविभवः-सौन्दर्यलक्ष्मीर्यस्याः, सा अदृष्टरूपविभवा ईदृग्विधापि कान्ता-प्रिया इति नाम्नैव आकर्ण्यमाना सती उन्नतं-धीरं चेतो यस्यासौ उन्नतचेतास्तेभ्यः,[१] मम मनो निम्नं कुरुते-अभिलाषदीनत्वाल्लाघवास्पदं विधत्ते । उन्नतस्य निम्नीकरणं दुःशकमिति विरोधः ॥६१॥

अथ मनसो निम्नीकरणमेवाह—

**तथाहि—**

**नो नेत्राञ्जलिना निपीतमसकृत्तस्याः स्वरूपामृतं[२],**
**नो नामान्वयपल्लवोऽपि च मया कर्णावतंसी कृतः ।**

१. तस्य अनू० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**चित्रं चुम्बति चुम्बकाश्मकमयो यद्वद्बलाद्दूरत-**
**स्तद्वत्तर्जितधैर्यमेतदपि मे तस्यां मनो धावति ॥६२॥**

**तथाहीति**। **नो नेत्रेति**। शार्दूलविक्रीडितवृत्तम्। तस्याः-बालायाः स्वरूपमेवामृतं स्वरूपामृतं तत् असकृत्-वारंवारं नेत्रे एव अञ्जलिः-नावाकृत्या करद्वयन्यासस्तेन, नो निपीतं-न दृष्टं। अत्यन्तादरेणावलोकनं पानमुच्यते, अमृतस्य हि पानोचितत्वात्। तथा च पुनर्मया तस्याः नाम च-अभिधानं अन्वयश्च-वंशस्तावेव पल्लवः-किसलयं सोऽपि न कर्णयोरवतंसीकृतः-कर्णपूरीकृतः। पल्लवस्य कर्णावतंसीकरणमुचितं, अद्यापि तन्नामान्वयौ न श्रुतावित्यर्थः। यद्वत्-यथा अयः-लोहं कर्तृ, चुम्बकाश्मकं-लोहाकर्षकमणिं कर्म, बलाद्दूरत एव चुम्बति-आश्लिष्यति तद्वत्-तथा एतदपि मे-मम मनस्तस्यां-बालायां धावति-गच्छति। चित्रं-अद्भुतमेतत्। यदि नामस्वरूपावलोकनेन नामान्वयश्रवणे च मनो धावेत्तदा किं चित्रम्? परमेतदाश्चर्यं यददृष्टस्वरूपायां अश्रुतनामान्वयायामपि मनो गच्छतीति। किम्भूतं मनः? तर्जितं-तिरस्कृतं धैर्यं-धीरता येन तत्तर्जितधैर्यं-त्यक्तपौरुषम् ॥६२॥

**सोऽयं दुर्लभेष्वनुरागः पुंसाम्, अज्वरमस्वास्थ्यम्, अदौर्गत्यं दौःस्थ्यम्, अविषास्वादनमाघूर्णनम्, असाध्वसं कम्पनम्, अनात्मविक्रयं पारवश्यम्, अजरं जाड्यम्, अनिन्धनं ज्वलनम्, अलग्नग्रहमुन्मादनम्[१], अवात्याघातमुद्भ्रमणम्, अमौनं मौक्यम्, अहीनश्रुति बाधिर्यम्[२], अनष्टदृष्टिकमन्धत्वम्, अस्खलितमनोरथं मनःस्तम्भनम्, अमन्त्र आवेशः।**

**सुस्थितजनदुर्जनाय मनोजन्मने सर्वथा नमः[३], यस्यायमेवं विधो व्यापारः, इत्यवधारयन्नवतार्य सर्वाङ्गेभ्यो भूषणानि तस्मै सदयमदात्।**

**तैस्तैरालापैः स्थित्वा[४] च कञ्चित्समयमिममथ[५] यथाप्रस्थितं पान्थं कथमपि प्रेषयामास[६]।**

**सोऽयं** दुर्लभेषु-दुःप्रापेषु प्रियारूपेषु वस्तुषु अनुरागः-अभिलाषः पुंसां अज्वरं-ज्वरं विना अस्वास्थ्यं-असमाधिः। ज्वरे सति अस्वास्थ्यं स्यादेव, परं ज्वराभावेऽपि। सोऽयमनुराग इति पदमग्रेऽपि योज्यम्। तथा अदौर्गत्यं-दारिद्र्यं विनापि दौस्थ्यं-दुःखेनावस्थायित्वं। अन्यद्दौस्थ्यं अकिञ्चनत्वं दौर्गत्ये सति भवति, इयं च तदभावेऽपि।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा अविषास्वादं-विषभक्षणमन्तरेण आघूर्णनं-मूर्छनं । विषास्वादे हि आघूर्णनं भवत्येव, परमिदं विषास्वादाभावेऽपि । तथा असाध्वसं-भयं विना कम्पनं । भये सति कम्प्यत एव, परमिदं भयमन्तरेणाऽपि । तथा न विद्यते आत्मनः-स्वस्य विक्रयः-विक्रीणनं यस्मिंस्तत् अनात्मविक्रयं पारवश्यं-पारतन्त्र्यम् । अन्यद्धि पारतन्त्र्यं आत्मविक्रये सति भवति, इदं चात्मविक्रयं विनाऽपि । तथा न विद्यते जरा-वयोहानिर्यत्र तत् अजरं, जाड्यं-मूर्खत्वम् । अन्यज्जाड्यं जरया भवति, जरायां प्राप्तायां बुद्ध्यभावः संजायते, परमेतज्जरां विनापि जाड्यं, येन न किञ्चिच्चेतये । तथा न विद्यते इन्धनं यत्र तत् अनिन्धनं, ज्वलनं-दीपनम् । अन्यज्ज्वलनमिन्धनेन भवति, इदं च तदभावेऽपि । तथा न लग्नो ग्रहः-भूतादिर्यत्र तत् अलग्नग्रहं, उन्मादनं उन्मादः-उन्मत्तता । अन्यदुन्मादनं ग्रहे लग्ने सति स्यात्, इदं च अलग्नग्रहम् । तथा न विद्यते वात्यायाः-वातसमूहस्य आघातः-आस्फोटनं यत्र तत् अवात्याघातं, उद्भ्रमणं-इतस्ततो मनोंदोलनरूपा भ्रमिः । अन्यदुद्भ्रमणं पर्णादिर्मण्डलाकृत्या ऊर्ध्वगमनं वात्याघातेन भवति, इदं च वात्याघाताभावेऽपि । तथा न विद्यते मौनं-अभाषणव्रतं यत्र तत् अमौनं, मौक्यं-मूकता । अन्यन्मौक्यं मौने सति भवति, इदं च मौनाभावेऽपि । तथा न हीने-शब्दाग्राहके श्रुती-कर्णौ यत्र तत् अहीनश्रुति ईदृशं बाधिर्यं बधिरता । अन्यस्मिन् बाधिर्ये श्रुती हीने भवतः, परमिदमहीनश्रुतित्वेऽपि । तथा न नष्टे दृष्टी यत्र तदनष्टदृष्टिकं, अन्धत्वम् । अन्यदन्धत्वं दृष्टौ नष्टायां भवति, परमिदं दृष्टेः सद्भावेऽपि, "**कामान्धो नैव पश्यति**" [ ] इति वचनात् । तथा न स्खलिताः-प्रतिहता मनोरथाः-अभिलाषा यत्र तत् अस्खलितमनोरथं मनः स्तम्भनं-अन्यत्र मनसो आगमनम् । अन्यन्मनः स्तम्भनं स्खलितमनोरथत्वे भवति, इदं च अस्खलितमनोरथेत्वेऽपि । तथा न विद्यते मन्त्रः-महाबीजादिर्यत्र स अमन्त्रः, आवेशः-व्यन्तरादेर्मनसि प्रवेशः । अन्यो हि आवेशो मन्त्रस्मरणाद् भवति, अयं तु मन्त्राभावेऽपि । यद्वा, अमन्त्र इति न मन्त्रगम्य इत्यर्थः । अन्योहि आवेशो मन्त्रसाध्यो भवति, अयं त्वनुरागरूपः आवेशो न मन्त्रैः शम्य इति भावः ? स्मरातुराणां हि प्रियाया अप्राप्तौ एता अवस्था भवन्त्येवेति ।

**सुस्थिताः**-स्वसुखावस्थायां स्थिता ये जनास्तेषां दुर्जन इव दुःखोत्पादकत्वात् खल इव यः स तस्मै, मनोजन्मने-मनोभवाय सर्वथा-सर्वप्रकारेण नमः-प्रणामोऽस्तु । दुर्जनस्यापि नमस्करणीयत्वात् । यस्य मनोजन्मन एवंविधः-पूर्वोक्तो व्यापारः-चेष्टा इति मनसि अवधारयन्-चिन्तयन्, सर्वाङ्गेभ्यः-सकलप्रतीकेभ्यो भूषणानि-हारादीनि अवतार्य-उत्तार्य तस्मै-तद्वार्त्तानिवेदिने पथिकाय सदयं-सकृपं यथाभवति तथा अदात्-ददौ ।

च-पुनः **तैस्तैः**-अद्भुतावेदकैरालापैः-पान्थं कथमपि कालं स्थित्वा, अथ-अनन्तरं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इमं-तत्कथाकथकं पान्थं कथमपि महता कष्टेन प्रस्थितं-प्रस्थानमनतिक्रम्य यथाप्रस्थितं यस्मै देशाय प्रस्थितोऽभूत्तं देशं प्रेषयामास-मुमोच। याहि स्वैरं स्वदेशमिति।

**स्वयमपि तत्कालान्तरालमिलितैर्नक्षत्रैरिव सार्द्रमृगशिरोहस्तैः सश्रवणचित्रकृत्तिकोपस्करवाहिभिः पापर्द्धिकपरिजनैरनुगम्यमानो राजा निजावासमयासीत्।**

**ततः प्रभृति च–**

तस्मिन् प्रेषिते सति स्वयमपि राजा-नलः तत्कालं-तत्क्षणादन्तराले-अध्वमध्ये मिलितैः-समन्वितैः[१] पापर्द्धिकपरिजनैरनुगम्यमानः-अनुस्रियमाणः निजावासं-निजहर्म्य-मयासीत्-अगात्। किम्भूतैः पापर्द्धिकपरिजनैः ? सार्द्राणि-सास्रत्वात् श्च्योतन्ति मृगशिरांसि-हरिणमूर्ध्नानो[२] येषु तथाविधा हस्ता येषां ते तैः। तथा सश्रवणां-सकर्णां चित्रस्य-चित्रका यस्य कृत्तिकां-त्वचं उपस्करं च-मृगयोपयोगिपाशादि वहन्ति ये ते तथाविधैः। आर्द्रशब्दो भाववचनः। कः कैरिव राजा ? नक्षत्रैरिव। यथा राजा चन्द्रोऽपि तस्मिन्-ज्योतिषप्रसिद्धे काले-कलासमूहे अष्टशतीलक्षणे यदन्तरालं तत्र मिलितैर्नक्षत्रैर-नुगम्यमानो निजावासं-वारुणीं गच्छति। किम्भूतैर्नक्षत्रैः ? सह आर्द्रया नक्षत्रेण वर्तत इति सार्द्रं, मृगशिरो हस्तश्च नक्षत्रं येषु तानि तैः। तथा श्रवणश्च चित्रा च श्रवणचित्रं समाहारद्वन्द्वः। सह श्रवणचित्रेण वर्तन्त इति सश्रवणचित्रास्ताश्च ताः कृत्तिकाश्च तासामुपस्करं-समवायं वहन्ति यानि तानि तथा तैः।

**ततः प्रभृति च–**यद्दिने तद्वार्त्तां पथिकाच्छुश्राव तद्दिनादारभ्य–

**हृद्योद्यानमरुत्तरङ्गितसरित्तीरे[१] तरूणामध-**
**स्तल्पेऽनल्पसरोजिनीनवदलप्राये[२]ऽपि खिन्नात्मनः।**
**धीरस्यापि मनाङ् मनस्तृणकुटीकोणान्तराले बला-**
**ल्लग्नोऽस्येति विभाव्यते परवशैरङ्गैरनङ्गानलः ॥६३॥**

**हृद्योद्या**नेति। शार्दूलविक्रीडितम्। धीरस्यापि-दृढस्यापि अस्य-नलस्य मन एव तृणकुटीकोणान्तरालं-कायमानास्रं मध्यं तस्मिन् बलात्,-प्रसह्य परवशैः-अस्वाधीनैरङ्गैः-प्रतीकैः साधनभूतैरनङ्ग एव अनलः-वह्निः, अनङ्गानलो मनाक्-स्तोकं लग्न इति

१. समवेतैः अनू०। २. हरिणमूर्धानो अनू०।

१. अपि नास्ति अनू०। २. प्रावृषेण्यः अनू०। ३. तत्किरीटस्य अनू०।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विभाव्यते-ज्ञायते । परवशांगत्वे हेतुमाह—कथम्भूतस्य अस्य ? हृद्यानि-मनोज्ञानि यानि उद्यानानि तेषां सम्बन्धी यो मरुत्-वायुस्तेन तरङ्गिता-उत्कल्लोलीकृता या सरित्तस्यास्तीरे-तटे तरूणां-शाखिनामधः-अधोभागे अनल्पानि-बहूनि यानि सरोजिनी वनदलानि-पद्मिनी-खण्डपत्राणि तेषां प्रायः-बाहुल्यं विद्यते यस्मिस्तत्तथाविधेऽपि तल्पे-शय्यायां खिन्नः-खेदापन्न आत्मा-शरीरं यस्य स तस्य । तत्र शयितोऽपि न रतिं लभत इत्यर्थः । अन्यस्याऽपि यस्य कस्यचिदङ्गे अग्निर्लग्नो भवति, स किल ईदृग्विधे शीतले प्रदेशे गत्वा शेते, तथाऽस्यापि[१] मनसि कामाग्निर्लग्न इति सम्भाव्यते । हृदयस्य बन्धनं हृद्यम् ॥६३॥

**एवमस्य—**

**पुनरपि तदभिज्ञान्पृच्छतः पान्थसार्थान्,**
**प्रतिपथमथ यूनो यान्ति तस्य क्रमेण ।**
**हरचरणसरोजद्वन्द्वमुद्राङ्कमौले-**
**र्मदनमदनिवासा वासराः प्रावृषेण्याः ॥६४॥**

**एवं**-अमुना प्रकारेण अस्य-नलस्य-अथेति-उच्छ्वास प्रान्ते मङ्गलार्थः, अनन्तरं वा।

**पुनरपि** । भूयोऽपि तां-दमयन्तीमभिजानन्तीति तदभिज्ञास्तान्, पान्थसार्थान्-पथिकसमूहान् प्रतिपथं-मार्गं मार्गं प्रति दमयन्तीवार्त्ताभित्याह्रियते द्विकर्मकत्वात् पृच्छेः-पृच्छतस्तस्य-नलस्य यूनः क्रमेण-परिपाट्या प्रावृषेण्याः-प्रावृषिका वर्षाकालीना वासराः-दिनानि यान्ति-गच्छन्ति, प्रावृषि वर्षर्तौ भवः प्रावृषेण्याः[२] । "**प्रावृष एण्य**" [**पा० सू०** ४।३।१८] इति एण्यप्रत्ययः । किम्भूतस्य तस्य ? हरस्य-शम्भोर्यच्चरणसरोजद्वन्द्वं तस्य या मुद्रा-प्रतिबिम्बं सैवाङ्कः-लक्ष्म स मौलौ-किरीटे यस्य स तस्य शम्भुपादपद्मद्वय-प्रतिमाङ्कितत्वात् किरीटस्य[३] । किम्भूता वासराः ? मदनस्य-कन्दर्पस्य यो मदः-दर्पस्तस्य निवासाः-आवासास्तदुद्दीपकत्वात् तद्दिवसानाम् । मालिनीवृत्तम् ॥६४॥

**इति [१]श्रीत्रिविक्रमभट्टविरचितायां दमयन्तीकथायां हरचरणसरोजाङ्कायां[२] प्रथम उच्छ्वासः समाप्तः[३] ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उच्छ्वास इति गद्यबन्धान्तरे उच्छ्वास इति संज्ञा । **यदनेकार्थः**-"**उच्छ्वासः प्राणने श्वासे गद्यबन्धान्तरेऽपि च ।**" [३।७८९] इति ।

**इति वाचनाचार्यश्रीप्रमोदमाणिक्यगणिशिष्यश्रीजयसोम-**
**गणितच्छिष्यपण्डितश्रीगुणविनयगणिविर-**
**चितायां श्रीत्रिविक्रमभट्टविरचित-**
**श्रीदमयन्तीकथाविवृतौ प्रथम**

**उच्छ्वासः समाप्तः ।**

# मूलपाठस्य पाठान्तराणि

## प्रथम उच्छ्वासः

पृ. ४. १. 'या दुग्धापि न दुग्धेव कविदोग्धृभिरन्वहम् ।
हृदि नः संनिधलां सा सूक्तिधेनुः सरस्वती ॥'
इति श्लोक : क्वचित्प्रतौ दृश्यते नि० पा०

पृ. ६. १. 'परिस्पन्दि' नि० पा० । २. महत् नि० पा० ।

पृ. ११. १. सूक्तिरत्नानां नि० पा० । २. बृन्दं वन्दे चौ० नि० । ३. यन्मध्ये पु० ।

पृ. १२. १. नमस्तस्मै नि० चौ० ।

पृ. १५. १. फलस्यापि पु० निपा० । २. मनुजवृन्दारकवृन्दं पु० ।

पृ. १६. १. महर्षेर्महावंशः पु० । २. यत्र नि० चौ० ; 'तत्र' नास्ति पु० निपा० । ३. इव तत्र पु० निपा० । ४. सूरयः निपा० । ५. सत्यवचसो पु०, सत्यवाचितः निपा० । ६. सुसूमाश्च पु० निपा० ।

पृ. १८. १. विशदवचसां निपा० । २. देवादित्यः नि०चौ० । ३. सुमति निपा० ।

पृ. १९. १. निधिः निपा० ।

पृ. २०. १. उल्लापाः निपा० । २. स्वस्थैरालोच्यतां निपा० ।

पृ. २२. १. विश्वम्भराभोगभालस्थलभास्वत्० पा० । २. कथाप्रबन्ध निपा० । ३. मनोहरः नि०चौ० । ४. जटाजूटबन्धः निपा० । ५. राजहंसावतंसया पु० निपा० । ६. रिंगत् नि० चौ० । ७. चक्रवालस्य पु० । ८. साधुव्यवहाररत्नानां नि० चौ० । ९. धर्मकर्मोपशान्तं पु० निपा; धर्माधर्मोपदेश °निपा; धर्मकर्मणोपशान्त° निपा० । १०. समस्ताधिव्याधि° पु०निपा; सर्वव्याधि पु० निपा; सर्वव्याधि° निपा० ।

पृ. २४. १. कुष्ठप्रयोगो निपा० । २. पर्वतभूमिषु निपा० । ३. न तु पु० । ४. चतुरंगोपशोभिताः निपा० । ५. इक्षुक्षेत्राणि निपा० । ६. कुपितकपिकुलाकुलिता नि० चौ० । ७. संतीव्रतापदोषाः चौ० ।

पृ. २८. १. मासे निपा० । २. च निपा० । ३. न निपा० ।

पृ.२९. १. यत्र च पु० निपा० । २. °समृद्धिवृद्धिवर्धित° निपा० । ३. °मप्राप्तविभानमङ्गाः चौ० नि०; मप्राप्तविमानसङ्गाः निपा० । ४. °राजित° निपा० । ५. चा सौ नि० चौ० स निपा० । ६. स्वर्गलोकान् निपा० । ७. सर्वत्र महेश्वरः निपा० । ८. सन्ति धनदलोकपालाः पु० । ९-९. न विनायकश्च पु०; न विनायकः निपा० । १०. सत्पुरुषेषु निपा० ।

पृ. ३०. १. सवटोप्यटसंकुलः नि०; सटोप्यवटसंकुलः चौ० । २. °युक्तो पु० । ३. °धातं च पु० निपा० । १४-१४. नास्ति पाठः पु०; न प्रजाः निपा० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पृ. ३२. १. विषयमध्ये चौ० ।

पृ. ३३. १. °निभृतांशु० नि० चौ० । २. °ग्रासग्रहणलालसाः पु०निपा० । ३. स्खलन्तः खे खेदयन्ति नि०चौ० । ४. मध्ये दिनं नि० चौ० । ५. °तुरङ्गाः निपा० । ६. °संगतासु निपा। ७. निपतन्ति पु० निपा० । ८. °विनिर्मित° पु०; निपा० । ९. स्वर्भूपः निपा० । १०. बहुलक्षणा चौ० पु० । ११. नास्ति पाठः पु० । १२. प्रसादा चौ० । १३. संङ्गीतशाला पु०नि०चौ० । १४. सुसौगन्धिकप्रसरो पु०; ससौगन्धिकप्रसारा नि०चौ०; ससौगन्धिकप्रसरा निपा० । १५. राजन्ते निपा० । १६. जलाशयाः पु० । १७. नास्ति पाठः पु० ।

पृ. ३६. 卐 पद्यं नास्ति पु० ।

पृ. ३६. १. भक्तिभाजः निपा० । २. संनिधाना नि० चौ० । ३. द्यूतस्थानेषु च द्युतकाराः पु० । ४. वेश्याङ्गणेषु च भुजङ्गाः पु० । ५. °रम्यहर्म्यतया नि० चौ० । ६. अव्ययीभावो पु० निपा० । ७. वैयाकरणोपसर्गेषु पु० । ८. करिकपोलेषु पु० । ९. चित्रकेषु निः चौ० ।

पृ. ३८. १. यान्ति पु० ।

पृ. ३९-४०. १. तस्यां पु० नि० चौ० । २. °प्लवप्लवमान° निपा० । ३. °जलधिनिधि° निपा० । ४. विश्वम्भराभोग नि० चौ० । ५. प्रासाद पु० नि० चौ० । ६. दनुलोक निपा० । ७-७ उपाध्यायोध्ययनविदां, आदर्शो दर्शनीयानां नि०; उपाध्यायोध्ययनविदां, आदर्शो दर्शनानां चौ० । ८. शस्त्रशास्त्रेषु निपा० । ९. अग्रगण्यः नि० चौ० । १०. खलवृन्दकन्दकन्दल-दावानल नलो पु०; खलवृन्दकन्दलदावानलो नलो नि० चौ० ।

पृ. ४२ १. मभ्यर्थयिमाना पु० । २. कर्णे लग्नाः निपा० । ३. स्वर्गलोकं पु० नि० चौ० । ४. सारिद्यूतेषु नि० चौ; सारद्यूतेषु निपा० । ५. न्यग्रोधपादपेषु पु० निपा० । ६. नेत्रकर्त्तनानि निपा० । ७-७ न प्रजानामासन् पु० ।

पृ. ४४. १. धर्मराजा पु० । २. 'च' नास्ति नि० चौ० । ३. 'मण्डप' नास्ति चौ० । ४. कृष्णागरु° निपा । ५. नाङ्गीकृतविश्वम्भराभारोपि निपा० । ६. समुत्सन्न° नि० चौ० । ७. न पु० । ८. किञ्च निपा० ।

पृ. ४८. १. यस्य च युधिष्ठिरस्येव नि० चौ; यस्य युधिष्ठिर इव निपा० ।

पृ. ४९. १. परमहेलाभिरतोऽपारदारिकः पु० ।

पृ. ५०. १. हिमालयः पु० निपा० ।

पृ. ५१. १. महीपते° निपा० । २. प्रशस्तप्रशस्तिस्तम्भः निपा० । ३. पुण्यकर्मारम्भप्ररोहाणाम् निपा० । ४. सकलभुवनव्यापारनौकर्णधारः पु० निपा० । ५. सकलसंसारकासारः नि०पा० । ६. 'समस्त' नास्ति पु० । ७. जीवितसमा पु० । ८. 'प्राणसमः' नास्ति पु० । ९. सकुलक्रमागतः पु० । १०. सत्यवाक् निपा० । ११-११ सालंकायनसूनुः पु० निपा० ।

पृ. ५३. १. द्वेषनिर्मुक्ताचेताः नि० चौ० । २. 'च' निपा० । ३. पार्थिवः स पु० । ४. अमात्ये नि० चौ० । ५. प्रौढप्रेम्णि पु० निपा० । ६-६. गूढमन्त्रिणि पु; गूढमन्त्रे मन्त्रिणि निपा० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

७. जननीसमाने निपा० । ८. प्रियंगुमञ्जरीभासि निपा० । ९. विलसत् पु० । १०-१०. पराजितसकलसमुद्राम्भसि नि० चौ० । ११-११. मानित-मानिनीयौवनसर्वस्वः पु; मानितमानिनीजनयौवनसर्वस्वः नि०; मानितमामानिनीजन-यौवनसर्वस्वः या; मानिनीयौवनसारसर्वस्वः निपा । १२. अनवरतसकल° निपा ।

पृ. ५४. १. समन्वितः नि० चौ० । २. बहुशष्पवनमार्गे पु० निपा० । ३. स्वगुणं नि० चौ० । ४. कृतानिमेष नयनविभ्रमाः नि० चौ० ।

पृ. ५५. १. विषमरणौ चौ० ।

पृ. ५९. १. शिञ्जानामुक्तकलहंसकाः नि० चौ० । २. °गुणग्रामं निपा० । ३. वर्षाः स्त्रियश्च पु०; वर्षाङ्गनाः निपा० ।

पृ. ६०. १. यत्र च पु० नि० चौ० । २. जीमूतनूतध्वनिं पु० । ३. कदम्बकस्य निपा० ।

पृ. ६२. १. मधुकदम्ब° निपा० । २. धृततुषारतुषा पु० निपा० ।

पृ. ६३. १. विरहितवधूविद्विपि पु; विरहिवधूविद्विषि निपा० । २. विद्राणपंकजसरसि पु०नि० चौ० । ३. स्वाधीनप्रियाप्रेयासि पु० । ४. स्फुटकुटजरजः° नि० चौ०; स्फुटकुसुमरजः° निपा० । ५. दिग्भासि नि० चौ० । ६. नास्ति पाठः चौ० । ७. °मेघाङ्क निपा० । ८. कदम्बस्तम्बालाम्बितमधुलिहि पु० । ९. नास्ति पाठः पु० । १०. °कुपित° निपा० । ११-११. चक्रवाकक्रशि निपा० । १२. विरहितमनस्विनीमनस्तुदि पु० । १३. °वनराजिनी पु० । १४. कदाचिदम्भसि नि० चौ० । १५. विज्ञापयामास पु० नि० चौ० ।

पृ. ६७. १. दंष्ट्राद्वन्द्वं पु०नि० चौ० । २. क्रोडः पु० ।

पृ. ६८. १. भापयन् पु० निपा०; भीषयन् निपा० । १. छत्रान् निपा० । २. वनान्तान् निपा० ।

पृ. ६९. १. च तेषु पु० नि० चौ; वनेषु निपा० । २. द्रुतं मद्वचनमनुष्ठीयतां निपा० । ३. विनिर्जित° निपा० । ४. मौलिमिलत् नि० चौ० ।

पृ. ७०. १. हयानां गुणैः निपा० ।

पृ. ७१. १-१. मृगवागुरावाहिभिः पु० । २. पापर्द्धिकपुरुषैः निपा० । ३. दुरादुन्नमितकन्धरैः पु० नि० चौ० । ४. तथोर्ध्व° नि० चौ० । ५. पवनकम्पितं नि० चौ० । ६. °कोलाहलव्याजेन निपा० । ७. °तरुणतरु° पु० निपा० । ८. °बिन्दुवर्षवाहिभिः पु० नि० चौ० । ९. अर्घ्यं नि० चौ० । १०. उद्भूत° निपा; उद्धुत पु० । ११. °भृगांगनारव° पु० निपा० । १२. °अनन्तकन्द° निपा० ।

पृ. ७३. १. केचिदुद्यतपरश्वधा पु०; केचिदुद्यतपश्च निपा; कतिचिदुद्यत्परश्वधा निपा० । २. केऽपि नि० चौ० । ३. केऽपि पु० नि० चौ० । ४. शिवागमावर्तिनो नि० चौ०; । शिवागमानुसारिणो निपा० । ५. °प्रवालाः नि०चौ० ।

पृ. ७४. १. अनेकधारयातिपातिनः नि० चौ० । २. कूजन्तः पु० नि० चौ० ।

पृ. ७५. १. प्रकाशैरलं निपा० । २. शरसंधातधातधूर्णितायां निपा० । ३. श्रयन्ते नि० चौ; श्रयन्ति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पु० । ४. नेत्राश्चित्रकाः नि० चौ० । ५. °निर्जित° नि० चौ० ।

पृ. ७६. १. °शशक° नि० चौ० । २-२. °तरुणतमाल° निपा० । ३. चक्रायोपरि; चक्रोपरि निपा० । ४. कुप्यन्तं निपा० । ५. °पुच्छं निपा० । ६. °स्तम्बकदम्बभाजि निपा० । ७ पंकिलपल्वलजलप्रदेशे पु० । ८. शूरशूकरं पु० नि० चौ० । ९. दवदहनदग्धमर्द्रि निपा० ।

पृ. ७७. १. 'स राजा' नास्ति पाठः पु० नि० चौ० । २. पतत्रिभिः नि० चौ० । ३. अभिववर्ष निपा० । ४ चलतर° पु० नि० चौ०; द्रुततर° निपा० । ५. क्रोडः पु० । ६. परमो नि० चौ० ।

पृ. ७८. १. °मंडलोत्पादकंपं नि० चौ० । २. विस्मयेनैष नि० चौ० । ३. हित्वा निपा० । ४. सालमूलं निपा० ।

पृ. ७९. १. तत्र स्थितं निपा० । २. आन्दोलयन्तः नि० चौ० । ३. °तनुलता° नि० चौ०; तरुलता° पु० । ४. वहन् नास्ति पाठः निपा० । ५. किसलयन्तः; कलयन्तः निपा० ।

पृ. ७९-८०. १. करालकालकौलेयक नि० चौ०; करालकाककौलेय निपा० । २. दृषत् नि० चौ० । ३. पृष्ठधाविते नि० चौ०; । ४. 'परितः' नास्तिपाठः निपा । ५ मृगवधान्व्याधान् पु०; मृगवधव्यधान्; मृगवधव्याधीन् निपा० । ६. नास्ति पाठः चौ० । ७. °रुंतेषु निपा० । ८. विघट्टितार्भककुरङ्गकुटुम्बिनी° नि० चौ०; विघहितार्भककुरङ्गकुटुम्बिनी° पु० । ९. वनराजिषु नि० चौ० । १०-१० °खुरशिखरशिखोत्‍रवात° नि० चौ० ११. अम्बरतले पु० । १२-१२ परिप्राणावमूर्छित निपा० । १३. पुनः पुनः नि० चौ० । १४. अकस्मात्सकंपं पु० । १५. °कपिकुलकलाप° निपा० । १६. °तरुतरुणमञ्जरी° नि० चौ० । १७. उद्वेजिते नि० चौ० । १८. नास्ति पु० । १९. सरससरलशाल° नि० चौ०; सरसशाल° पु० । २०. अश्रमभाजि निपा० ।

पृ. ८१. १. परिकुथत् पु० नि० चौ० ।

पृ. ८२. १. सविस्मयमेवमेष नि० । २. तथा यथा निपा० ।

पृ. ८३. १. महनीया महानुभावा नि० चौ० । २. अवधार्य नि० चौ० निपा० । ३. उपसृत्य पु० निपा०; समभिसृत्य निपा० । ४. पृष्टव्योसि पु० । ५. उपविश्य निपा० । ६. कांचिदपूर्वां नि० चौ० । ७. 'स्वां' नास्ति चौ० । ८. मुहूर्त्तमेकमत्र पु०; मुहूर्त्तमेकमेकत्र निपा० । ९. अनुभवायः निपा० । १०. एवं इत्येनमवादीत् पु० । ११. °कथानकाकर्णनरसिक निपा० । १२. स्वयमप्युपविश्य पु० निपा० ।

पृ. ८५. १. च नासौ पु०; नासौ निपा० । २. °विरञ्चि° नि० चौ । ३. सेव्यतया सेव्यते निपा० । ४. °हारीत° नास्ति चौ० ।

पृ. ८७. १. °शोणमरीचिचय° नि० चौ; तारशोणमणिमरीचिनिचय° निपा० । २. °सुगन्ध निपा० । ३. अध्वरोधि पु० निपा० । ४. विश्रम्यता निपा० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पृ. ८८. १ °विन्याससाधु° निपा० । २-२ °चारुचामर° नि० चौ०; °चारु चामीकरचामर° नि० पा० । ३. °कन्दल पु० । ४. °मयूरात पु० । ५. °चापवक्रभ्रूः निपा० । ६. तदेव नि० चौ० । ७. न्यग्रोधपादपच्छायामण्डपं चौ० निपा०; न्यग्रोधपादपतच्छायामण्डपं निपा० । ८. चालोक्य नि० चौ० । ९. विचिन्तितवानस्मि पु० ।

पृ. ९१. १. यस्यास्ये उरगप्रभोरिव भवेज्जिह्वासहस्रद्वयं पु०; यस्य स्यादुरगप्रभोरिव मुखे जिह्वासहस्रद्वयम् निपा०; यस्यास्मिन्नुरगप्रभोरिव भवेज्जिह्वासहस्रं मुखे निपा० । २. °मध्वगं नि० चौ० । ३. °उदीचीननरपते पु०; उदीचीनं नरपतेः निपा । ४. श्लाघ्यमान° चौ० । ५. कथावशेषालायः नि० चौ०

पृ. ९२. १. °भुजद्वया निपा० ।

पृ. ९३. १-१ तत्श्रवणाद्देवोल्लसद्बहल° पु० । २. पुरतः निपा० । ३. 'केयं' इति क्वचित्पुस्तके नास्ति निपा० । ४. 'मूकेनेव' नास्ति निपा० । ५. 'मूढेनेव' नास्ति पु० चौ० । ६. संजातान्धतमसेनेव निपा०; नास्ति पाठः चौ०। ७. विषघूर्णितेनेव पु० निपा० । ८. मोहसंस्तम्भितेनेव निपा० ।

पृ. ९४. १. त्वया चाद्य निपा० ।

पृ. ९५. १. पाथः निपा० । २. सुरूपामृतं पु० ।

पृ. ९६. १. अलग्नं ग्रहमुन्मादनम् निपा० । २. अहीनश्रुतिर्बाधिर्यम् पु० । ३. सर्वथा नमः सुस्थितजनदुर्जनाय मनोजन्मने नि० चौ० । ४. स्थित्वा स च निपा० । ५. 'अथ' नास्ति निपा० । ६. संप्रेषयामास निपा० ।

पृ. ९८. १. सरस्तीरे निपा० । २. °नवदलप्राये नि० चौ० ।

पृ. ९९. १. श्री त्रकममह° चौ०; श्री विक्रमभट्ट° नि०; श्री भट्टत्रिविक्रम° निपा०; समविषम कविश्री त्रिविक्रम° निपा । २. हरचरणसरोजांकः पु० निपा० । ३. नास्ति पु० ।

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्री:

# द्वितीय उच्छ्वास:

अथ द्वितीयोच्छ्वासव्याख्या विधीयते ।

अथ कदाचिदवगलद्[1]बहल[2]परिमलमिलदलिकुलाकुलितकुटजकदम्बकुसुमकर्णपूरशून्यकाननासु, विश्राम्यन्मदमुखरमयूररसनावलीकलक्वणितासु, विरलतरतडिल्लताललितलावण्यासु, विगतहंसद्विजराजिषु, पतत्पयोधरासु, क्षीणशुक्रासु, वृद्धास्विव गतप्रायासु वर्षासु, रतिमकुर्वाणो मदकलकलहंसहासहारिण्यामुत्सुकैस्[3]तरुण्यामिवागतायां[4], शरदि द्विरदमदगन्धसन्धानवासितासु[5] कुसुमित[6]सप्तच्छदच्छायासु विस्फूर्जति[7] रोषोद्घुषितकेसरकरालकण्ठे कण्ठीरवकदम्बके[8], गृहदीर्घिकामृणालिकाकाण्डखण्डनविरामरमणीयमुन्नदत्सु शरत्समयप्रवेशमङ्गलमृदङ्गेष्विव[9] हंसमण्डलेषु, स्मरशरनिकरनिर्मथितपान्थप्रहार[10]रुधिरनिष्यन्दबिन्दुसंदोह इव वनस्थलीषून्मिषति बन्धुरबन्धूककुसुमप्रकरे, प्रसरन्तीषु शरल्लक्ष्मीप्रवेशवन्दनमालासु[11] निःशङ्कशुककुलावलीषु, श्रूयमाणासु स्मरराजराज्यविजयघोषणासु पक्वकलमगन्धशालिपालिकाबालिकाहर्षगीतिषु, शरच्छ्री[12]कटाक्षेषून्मीलत्सु नीलनीरजेषु[13], क्वणति वर्षावधूप्रस्थानपटहे षट्चरणचक्रवाले, प्रभात इव घनतिमिरविरामरमणीये जाते जलनिधिशयनशायिशार्ङ्गिनिद्राद्रुहि विनिद्रसान्द्रसरससरोजराजिराजितसरसि शरत्समये स महीपतिः समासन्नवनविहारि[14]किन्नरमिथुनेन गीयमानमिदमनश्लीलं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**श्लोकत्रयमशृणोत् ।**

**अथे**ति । अथ-अनन्तरमिति सति स महीपतिः-नलः कदाचित् समासन्नवने-निकटकानने विहारि-विचरणशीलं यत् किन्नरमिथुनं तेन गीयमानं-रागविशेषेणो-च्चार्यमाणमिदमिति वक्ष्यमाणमनश्लीलं-अग्राम्यं श्लोकत्रयमशृणोत्-आकर्णितवान् । **"स्त्रीपुंसयोश्च युग्मं मिथुनं परिरुध्यन्ते[1] सद्भिः"** [२।७००] इति **हलायुधः** । किं विशिष्टो महीपतिः? मदेन-कमलदलास्वादनोत्पन्नगर्वेण कलाः-मधुरस्वरा ये कलहंसाः-राजहंसास्त एव हासस्तेन हारिण्यां-रम्यायां तरुण्यां-अभिनवायां आगतायां-प्रवृत्तायां शरदि-शरत्काले उत्सुकः-उत्कः । शरदि कस्यामिव ? आगतायां-रागात् स्वयं प्राप्तायां तरुण्यां-युवत्यामिव उत्सुक इत्यत्रापि योज्यम् । किम्भूतायां तरुण्याम् ? मदेन-क्षीबतया तरुणिमोद्रेकेण वा कलकलः-कोलाहलो यस्याः सा तथा । अभ्रत्वात्[2] हंसोपमौ हासहारौ-स्मितमुक्तालते स्तोऽस्यामिति मत्वर्थीये कर्मधारयः । वरं, मत्वर्थीयाद्बहुव्रीहिरिति प्रायिकमेतत्, तेनाऽत्र कर्मधारयः । किं विदधानः ?-अकुर्वाणः, काम् ? रतिं-चित्तासक्तिं, कासु ? वर्षासु, किम्भूतासु ? 'गतप्रायासु' गतोऽतीतः प्रायः-बाहुल्यं यासां तास्तासु स्वल्पशेषासु । पुनः किम्भूतासु वर्षासु ? अवगलन्-विस्तरन् बहलः-निविडो यः परिमलः-आमोदस्तेन मिलत्-पुञ्जीभवत् यदलिकुलं-भृङ्गश्रेणिस्तेन आकुलितानि-व्याप्तानि यानि कुटजाश्च कदम्बाश्च तेषां कुसुमानि तान्येव कर्णपूराः-उत्तंसास्तैः शून्यानि-रहितानि काननानि यासु तास्तासु । वर्षोदय एव तेषां पुष्पणात्, तदानीं तु गतप्रायत्वात् तासां तदसम्भवः । तथा विश्राम्यत्-विरमत् मदेन मुखराणां-वाचालानां मयूराणां या रसनावली-जिह्वाश्रेणिस्तस्याः कलं-मधुरं क्वणितं-शब्दितं यासु । वर्षोदये हि ते केकायन्ते, न प्रान्ते मदाभावात् । तथा विरलतरं-क्वचित् क्वचिद्विद्यमानं तडिल्लतानां ललितं-मनोज्ञं लावण्यं-सौन्दर्यं यासु स्तोकविद्युदुद्योतासु । तथा विगता-व्यपेता हंसद्विजानां-सितच्छदपक्षिणां राजिः-श्रेणिर्यासु । तथा प्रान्तत्वात् पतन्तः-भ्रश्यन्तः पयोधराः-मेघा यासु । तथा क्षीणः-निःप्रभः शुक्राख्यो ग्रहो यासु । वर्षासु कास्विव ? वृद्धास्विव । तदा तासु रतिं-सम्भोगमकुर्वाणः । किम्भूतासु वृद्धासु ? गतं प्रकृष्टं अयमिष्टफलं दैवं यासां तास्तासु । तथा कुसुमैः-पुष्पदामभिः कर्णपूरैश्च शून्यं-रहितं कं-शिरः, आननं च-मुखं यासां तास्तासु । तथा विश्राम्यन् मदमुखरमयूखं-मधुररवं रसनावल्याः-काञ्च्याः क्वणितं यासु । तथा विरलतरं तडिल्लतावत् ललितं-मधुराङ्गविन्यासः, लावण्यं च-लोचनलेह्यकमनीयगुणो यासां तास्तासु । तथा व्यपेतहंसशुभ्रदन्तराजिषु । तथा पतत्कुचासु । तथा क्षीणं-गर्भसंभवाभावात्

---

१. परिकथ्यते अनू. । २. शुभ्रत्वात् अनू.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विनष्टं शुक्रं-पुंवीर्यं यासु । न पुनः क्षीणं-निवृत्तं वीर्यं यास्विति व्याख्येयम् । पुंसां वीर्यं स्त्रीणां रज इति प्रसिद्धेः। अत एव न विद्यते बलं-वीर्यं यासामिति अबलाः । रसनाशब्दः काञ्चीपक्षे न परं तालव्यो दन्त्योप्यस्ति, तथा च **विश्वप्रकाशः**-"**रसना काञ्चिजिह्वयोः**" [न-तृतीय ३०] इति । "**रसति तां रसना रसकान्तौ सौत्रः**" इत्य**मरटीका**ऽपि [ ] ।

क्व सति श्लोकत्रयमशृणोदित्याह--कुसुमिताः-पुष्पिता ये सप्तच्छदास्तेषां छायासु कण्ठीरवकदम्बके-सिंहच्छन्दे[१] विस्फूर्जति सति-आस्फालनं कुर्वति सति । किम्भूते कण्ठीरवकदम्बके ? रोषेण उद्धुषिता-उच्छ्वसिता ये केसराः-स्कन्धरोमाणि तैः करालः-रौद्रः कण्ठः-ग्रीवा यस्य तत्तथा तस्मिन् । किम्भूतासु छायासु ? सन्धानं-सन्धि-मैत्रीसादृश्यमिति यावत् द्विरदमदगन्धस्य यत्सन्धानं तेन वासितासु-सुगन्धिषु । **द्विरदमद-गन्धसम्बन्धावसितासु** इति **पाठे** द्विरदमदगन्धस्य सम्बन्धादवसितासु-द्विरदमदगन्धोऽय-मिति प्रत्यभिज्ञया ज्ञातासु । शरदि सप्तच्छदाः पुष्पन्ति ते च मदगन्धयः, ततो गजभ्रान्त्या सिंहास्तत्र सरोषं विस्फूर्जितं कुर्वन्तीति भावः । पुनः केषु सत्सु ? हंसमण्डलेषु-सितच्छदश्रेणिषु गृहदीर्घिकासु-गृहवापीषु या मृणालिकाः-कमलिन्यस्तासां यत्काण्डं-नालं तस्य खण्डनाय योऽसौ विरामः-अन्तरान्तरा निवृत्तिरर्थान्नादस्यैव । यद्वा,[२] गृहदीर्घिका-मृणालिकाकाण्डखण्डनस्य यो विरामः-निवृत्तिस्तेन रमणीयं-रम्यं यथा भवति, तथा उन्नदत्सु-कूजत्सु सत्सु । स्थित्वा स्थित्वा मृणालं चर्वन्ति तत्कषायसंशुद्धकण्ठाश्च नादं कुर्वन्तीत्यर्थः । अत एव किम्भूतेषु ? शरत्समयस्य-शरत्कालस्य प्रवेशे-समागमने मङ्गलमृदङ्गा इव ये ते तथा तेषु । अन्योऽपि यदा राजादिरागच्छति तदा मङ्गलमृदङ्गा वाद्यन्ते, तथा शरत्समयस्य प्रवेशे अमी नदन्तो राजहंसा एव मङ्गलमृदङ्गा इति । पुनः कस्मिन् सति ? वनस्थलीषु बन्धुरः-मनोहरो यो बन्धूकानां कुसुमप्रकरः-पुष्पसमूहस्तस्मिन् उन्मिषति सति-विकसति सति । उत्प्रेक्ष्यते-स्मरस्य ये शरनिकराः-उन्मादन-मोहनतापनशोषणमारणाख्यास्तैर्निर्मथिताः-हता ये पान्थाः-विरहिणः पथिकास्तेषां प्रहारात्-क्षतस्थानाद् यो रुधिरनिस्यन्दः-रक्तक्षरणं तस्य यो बिन्दुसन्दोहस्तस्मिन्निव । बन्धूक-कुसुमानां लौहित्याद्विरहिजनरुधिरत्वेनोपमानम् । पुनः कासु सतीषु ? निश्शङ्काः-हननाभावान्निर्भया ये शुकास्तेषां यत्कुलं-समूहस्तस्य या आवल्यः-पंक्तिरचनया श्रेणयस्तासु प्रसरन्तीषु-प्रवर्त्तमानासु सतीषु । किम्भूतासु ? शरल्लक्ष्म्याः प्रवेशे वन्दनमाला-तोरणोपरि मङ्गल्यदामेव यास्तास्तासु । अन्यस्यापि नृपादेः प्रवेशे वन्दनमालां बन्ध्यत एव, तथा शरल्लक्ष्म्याः प्रवेशे शुकपंक्तय एव वन्दनमालायन्ते । पुनः कासु सतीषु ? पक्वस्य-

१. सिंहवृन्दे अनू. । २. तेन यद्वा अनु. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कलमस्य श्वेतशाले गन्धशालेश्च पालिका-रक्षिका बालिकास्तासां या हर्षगीतयः-प्रमोदात्-रागसम्बद्धवागुल्लापास्तासु श्रूयमाणासु सतीषु । किम्भूतासु ? स्मरराजस्य-कन्दर्पनृपस्य राज्ये-एकातपत्रत्वे विजयघोषणा इव यास्तासु । अन्यस्यापि राज्यप्राप्तौ जयघोषणा क्रियते, तथा शरदि स्मरेण राज्यं प्राप्तं तत्रैतद् बालिकागानं जयघोषणाप्राप्तमिति । पुनः केषु, सत्सु ? नीलनीरजेषु-नीलोत्पलेषु उन्मीलत्सु-विकसत्सु सत्सु । किम्भूतेषु ? शरच्छ्रियः-शरल्लक्ष्म्याः कटाक्षा इव-भ्रूविक्षेपा इव ये ते तथा तेषु । विकसन्नीलकमलानि शरच्छ्रीकटाक्षा इव इति । पुनः क्व सति ? षट्चरणचक्रवाले-भ्रमरवृन्दे क्वणति सति-गुञ्जति सति । किम्भूते ? वर्षावध्वः प्रस्थानपटह इव-उच्चलनपणव इव यत्तत्तस्मिन् । अन्योऽपि नृपादिर्यदा चलेत् तदा प्रास्थानिकः पटहो वाद्यत एव, तथा वर्षावधूः प्रस्थिता तत्रामी भृङ्गाः पटहवादनकृत्यं कुर्वन्तीति । पुनः क्व सति ? एवं विधे शरत्समये जाते सति। किम्भूते शरत्समये ? घन एव-मेघ एव तिमिरं तस्य यो विरामः-अपसरणं तेन रमणीयः रम्यस्तस्मित् । शरदि मेघानां निवृत्तेः । कस्मिन्निव ? प्रभात इव । किम्भूते प्रभाते ? घनं-निविडं यत्तिमिरं-अन्धकारं तस्य विरामेण रमणीयं तस्मिन् । पुनः किम्भूते ? जलनिधिरेव-अब्धिरेव शयनं-स्थानं तत्र शेते अभीक्ष्णमिति जलनिधिशयनशायी यः शार्ङ्गी-विष्णुस्तस्य निद्रायै द्रुह्यतीति जलनिधिशयनशायिशार्ङ्गिनिद्राध्रुट् तस्मिन् । शरदि प्राप्तायां हरेर्जागरणात् प्रभातेऽपि निद्राद्रोहः। पुनः किम्भूते ? विनिद्राणि-विकस्वराणि सान्द्राणि-घनानि सरसानि-समकरन्दानि यानि सरोजानि-पद्मानि तेषां राज्या-पंक्त्या राजितं सरो यस्मिन् स तथा तस्मिन् । शरदि धान्यानामुत्पत्तेः[१] प्रभातेऽपि विनिद्रसान्द्र-सरोजराजितसरस्त्वं च भवतीति शरत्प्रभातयोस्त्रिभिर्विशेषणैः साम्यं दर्शितम् ।

अथ श्लोकत्रयमेवाह—

**धन्याः शरदि सेवन्ते प्रोल्लसच्चित्रशालिकान् ॥**
**प्रासादान्स्त्रीसखाः पौराः केदारांश्च कृषीबलाः ॥१॥**

**नमिताः फलभारेण नमिताः शालिमञ्जरीः[१] ॥**
**केदारेषु हि[२] पश्यन्तः के दारेषु विनिःस्पृहाः ॥२॥**

**प्रावृषं शरदं चापि[३] बहुधाकाशहारिणीम् ॥**
**विलोक्य नोत्सुकः कः स्यान्नरो नीरजसङ्गताम् ॥३॥**

---

१. पङ्कजानामुत्पत्ते अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**धन्या** इति । शरदि-शरत्काले धन्याः-पुण्यवन्तः पौराः-पुरनिवासिलोकाः प्रासादान्-हर्म्याणि कृषिबलाश्च-कर्षकाः केदारान्-क्षेत्राणि सेवन्ते-आश्रयन्ते । किम्भूताः सन्तः ? उभये स्त्रीणां सखायः-मित्राणि स्त्रीसखाः स्त्रीभिः सहिता इत्यर्थः । "**राजाहःसखिभ्यष्टच्**" [पा० सू० ५।४।९१] । किम्भूतान् प्रासादान् ? प्रोल्लसन्त्यः-दीप्यमानाश्चित्रशालिकाः-सालेख्यभूमिकाः येषु ते तान् । किम्भूतान् केदारान् ? प्रोल्लसन्त्यश्चित्राः-बहुविधाः शालयो येषु ते तथाविधान् ॥१॥

कुतः स्त्रीसखाः ? इत्याह—

**नमिता** इति । अनुष्टुप् । हिः-यस्मात् कारणात् शरदि दारेषु-कलत्रेषु के निःस्पृहाः-निरभिलाषाः स्युः ? अपितु न केऽपि, सर्वेऽपि स्त्रीषु साभिलाषा भवन्तीत्यर्थः । किं कुर्वतः ? फलभारेण नमिताः-वक्रिताः कुटिलीभूता न च मिताः-स्तोकाः, बह्वीरित्यर्थः। केदारेषु-क्षेत्रेषु शालिमञ्जरीः पश्यन्तः-अवलोकयन्तः तद्दर्शनं हि उद्दीपनविभावः, अतएव यामिनीषु साभिलाषत्वम् ॥ २ ॥

**प्रावृषमि**ति । वृत्तम् । ईदृग्विधां प्रावृषं-वर्षाकालं शरदं च-शरत्कालं रमणीयत्वात् बहुधाः-पुनः पुनर्विलोक्य को नरः-पुरुषो नोत्सुकः-प्रियामिलनाय नोत्कण्ठितः स्यात् ? अपितु सर्वोऽपि । किम्भूतां प्रावृषम् ? आकाशं हरतीत्येवं शीला तां मेघैः कृत्वा व्योम्नस्तिरोधायिनीम् । किम्भूतां शरदम् ? काशैः-काशपुष्पैर्हारिणीं-मनोज्ञां, तदानीं तेषामुत्पत्तेः । पुनः किम्भूतां प्रावृषम् ? नीरजसं-निःपांशुम् । पुनः गतां-अतिक्रान्ताम् । किम्भूतां शरदम् ? नीरजैः सङ्गताम्-पद्मैः अन्विताम् ॥ ३ ॥

**अनेन मृदुमूर्छनातरङ्गरङ्गिताक्षरेण श्रवणपथप्रथमप्रियातिथौ[1] श्लोकत्रयेण [2]विषविषमविषयवैरस्यव्रतव्रततिकठिनकुठारे[3], दारपरिग्रहपराङ्मुखोऽपि [4]शृङ्गारशिखरमुत्तुङ्गमारोप्यमाण[5]स्तदेवोद्यानममन्दमन्दारमकरन्दामोदमत्तमधुकर[6]मधुरझंकाररमणीयमुपसर्तुमारभत ।**

**अनेन** श्लोकत्रयेण दाराणां यः परिग्रहः-स्वीकारस्तस्मात् पराङ्मुखोऽपि-विमुखोऽपि कः स्त्रिय परिणेष्यतीत्यभिप्रायवानपि नलः उत्तुङ्गं-उच्चैस्तरं शृङ्गारशिखरं[1]-शृङ्गारगिरिशिखरं आरोप्यमाणः-नीयमानः शृङ्गाररसनिर्भरीक्रियमाणस्तदेवोद्यानं-यस्मिन्नुद्याने स पथिको मिलित आसीत् तदेव वनं उपसर्तुं-गन्तुमारभत-आरेभे । किम्भूतेन श्लोकत्रयेण ? मृद्व्यः-नीचैः स्वरा या मूर्धनाः-गलनालकृतघोलनाः स्वरसारणास्तासां ये

१. शृङ्गारशृङ्गं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तरङ्गाः-परम्परास्तै रङ्गितानि-शोभमानानि अक्षराणि-वर्णाः यस्मिंस्तत्तेन । तथा श्रवणपथे-कर्णमार्गे प्रथमं-पूर्वं प्रियातिथिरिव-वल्लभपथिक इव यत्तत्तथा तस्मिन्, पथिको यथा पूर्वं पथि प्रवर्तते तथेदं श्लोकत्रयं नलस्य श्रवणपथे पथिकवत्तदानीमेव प्रवृत्तं, न तु पूर्वं कदाचित् कृतमित्यर्थः। अतएव प्रियातिथिसमानत्वं तेषां[१] विषवद् विषमाः-दुःपरिणामा ये विषयाः-शब्दादयस्तेषां वैरस्ये-निःस्वादत्वे यद्व्रतं एतान्न भोक्ष्यं इत्येवं रूपं तदेव व्रततिः-वीरुत्तत्र कठिनः-तीक्ष्णधारः कुठारः-परशुरिव यत्तत्तथा तस्मिन् । एतस्मिन् श्लोकत्रये श्रुते विषयविरक्ततात्रतं निवर्तत इत्यर्थः । किम्भूतमुद्यानम् ? अमन्दः-बहुलो यो मन्दारमकरन्दानां-कल्पवृक्षपुष्परसानां आमोदः-परिमलस्तेन मत्ता-दृप्ता ये मधुकरास्तेषां यो मधुरझङ्कारस्तेन रमणीयं-रम्यं, मधुपानमत्ता मधुपा मधुरं तत्र गुञ्जन्तीत्यर्थः ।

**प्रथमसम्मुखप्रेङ्खितेन चलच्चन्दनामोदनन्दिनान्दोलन[१]वेगवित्रस्त-कुसुमिततरुशिखरसुप्त[२]सुरतश्रमखिन्नकिन्नरी[३]निबिडतरपरिरभ्यमाणकिन्नर-नमस्कृतेन क्रीडाकमलदीर्घिकातरङ्गोत्सङ्गतरुणतामरसरसविसरोद्गार-हारिणा यौवनमदनिरुद्धनैषधी[४]धम्मिल्लवल्लरीचलनविलास[५]लासकेन वनमारुतेनोत्पुलकिततनुः स्तोकमन्तरमतिक्रम्य[६] 'देव, भवद्वैरिवधूवदने वने च नारंगतरूपशोभे भान्ति गण्डशैलस्थलालङ्कारधारिण्यो लोध्रलताः, नागरुचिताश्चन्दनपत्रभङ्गाः, नालिकेरचितस्तिलकः, नवा दृष्टिपथमवतरति घनाञ्जनयष्टिका, नाभिरम्या नीलतमालका, नाधरीकृतस्ताम्बूलीरागः[७], पल्लवितमेतद्दृश्यतेशोकजालम् । इतश्च काञ्चनगिरिरिव सुरचितः क्रीडा-पर्वतः । इतश्च [८]गूर्जरकूर्चमिवाखण्डितप्रवालं बालशालवनम् । इतश्च भवद्वैरिनगरमिवानेकविधवकुलसंकुलं कूपकुलम् । इतश्च धूर्जटिजटाजूट इव पुंनागवेष्टितो वापीपरिसरः । इतश्च कुरुसेनेव कृताश्वत्थामहिता च क्रीडा-सरित्पुलिनपालिः । इति भङ्गश्लेषोक्तिदक्षया[९] वनरक्षिकया[१०] कथ्य-मानानि[११] वनविनोदस्थानान्यवलोकयाञ्चकार ।**

तत ईदृग्विधेन वनमारुतेन उत्पुलकिता-रोमाञ्चिता तनुर्यस्य स ईदृग्विधः सन् नलः स्तोकं-अल्पं अन्तरं-वनमध्यं अतिक्रम्य, देव ! इत्यामन्त्र्य तवारिस्त्रीमुखे वने चाऽपि इदमिदमिति भङ्गश्लेषोक्ति★ दक्षया वनरक्षिकया कथ्यमानानि वनविनोदस्थानानि-

---

१. तथा अनू. । ★ द्व्यर्थसाधकश्लेषः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

काननकौतुकस्थलानि अवलोकयाञ्चकार-व्यलोकयदित्यन्वयः । किम्भूतेन वनमारुतेन ? प्रथमं-पूर्वं सम्मुखं-अभिमुखं प्रेङ्खितः-वल्गितः समागतस्तेन । तथा चलन्ति-वायुना कम्प्यमानानि यानि चन्दनानि-गोशीर्षतरवस्तेषामामोदेन-परिमलेन नन्दयति-आनन्दयतीति चलच्चन्दनामोदनन्दी तेन । तथा अन्दोलनवेगेन-तरूणां वेपनरहंसा वित्रस्ता-भयाकुला याः कुसुमिततरुशिखरेषु-पुष्पितवृक्षाग्रेषु सुप्ताः-शयिताः सुरतश्रमेण-सम्भोगखेदेन खिन्नाः किन्नर्यः, अतएव ताभिर्निविडतरं-गाढतरं परिरभ्यमाणाः-आश्लिष्यमाणाः ये किन्नरास्तैर्नमस्कृतेन-प्रणतेन । अनायासं तासां सम्भोगविधानाद्[1] द्वयोरुपकारित्वेन नमस्करणीयत्वम् । तरुशिखरेषु ताः सुरतश्रमखिन्नाः सुप्ता आसन्, ततो वायुवेगेन भीताः सत्यः प्रियानालिलिङ्गुरित्यर्थः । तथा क्रीडार्थं या कमलदीर्घिकाः-सरोजवाप्यस्तासां तरङ्गोत्सङ्गेषु-वीचिक्रोडेषु तरुणानि-नवानि यानि तामरसानि तेषां यो रसविसरः-मकरन्दपटलं तस्य उद्गारेण-उद्वमनेन हारी-मनोहरस्तेन, तद्वहनात् तस्योद्वमनं घटत एव । तथा यौवनमदेन निरुद्धा-व्याप्ता या नैषध्यः-निषधदेशोत्पन्नाः स्त्रियस्तासां या धम्मिलवल्लर्यः-संयताः केशास्तेषां यश्चलनविलासः-इतस्ततोंदोलनलीला तस्य लासकः-नर्त्तकस्तेन । यथा लासकेन नर्त्तकी नर्त्यते तथा तेन नैषधीधम्मिल्लवल्लरी नर्त्यत इत्यर्थः ।

अथ वनपालिका यदवादीत्तत्प्राह–हे देव !-हे नृप ! भवद्वैरिवधूवदने-त्वदरिस्त्रीमुखे गण्डशैलस्थलस्य अलङ्कारं-मण्डनं कुर्वन्ति यास्ताः कपोलफलकालङ्कारकारिण्यो लोध्रस्य-विलेपनरूपस्य लताः-मण्डपवल्लयो न भान्ति-न शोभन्ते । किम्भूते वदने ? अरं अत्यर्थं गता-नष्टा रूपशोभा-सौन्दर्यं यस्य तत्तस्मिन् । तथा अगरुद्रवेण चिताः-व्याप्ताश्चन्दनद्रवस्य पत्रभङ्गाः-पत्रवल्ल्यो न भान्ति । तथा अलिके-ललाटे रचितस्तिलकः-विशेषको न भाति । तथा त्वदरिस्त्रीमुखे वा-समुच्चये घनं-सान्द्रं अञ्जनं-कज्जलं तस्य यष्टिः-शलाकादृष्टिः पथं-लोचनमार्गं नावतरति-नायाति, लोचनयो रञ्जनाय न लगतीत्यर्थः । तथा अभिरम्याः-संस्कृताः नीलतमाः-प्रकर्षेण नीला अलकाः-कुटिलाः केशाः दृष्टिपथं नावतरन्ति, स्नानसमारचनाद्यभावाज्जटाजूटीभूतास्सन्तो विलोक्यन्त इत्यर्थः। तथा भवद्वैरिवधूवदने, न ताम्बूलं हेतुतया विद्यते यस्यासौ ताम्बूली **'इनन्तः'**, रागः-अरुणिमा अधरो अस्यास्तीति अधरी-ओष्ठवान् ओष्ठसम्बद्धः कृतः, न ताः भर्तृविरहात्ताम्बूलं खादन्तीति भावः । क्रमुकफलपत्रचूर्णसंयोगस्ताम्बूलम् । तथा त्वदरिस्त्रीमुखे शोकात्-सप्रलापमनोदौःस्थ्याज्जातं शोकजं एतत् आलं-अनर्थः पल्लवितं-प्रवृद्धं दृश्यते । पल्लवितशब्दो लक्षणया प्रबुद्धार्थः । वने च सहजच्युतस्थूलपाषाणस्थलीभूषणा लोध्रस्य-तरुविशेषस्य लताः-शाखा

१. संयोगविधानाद् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भान्ति । किम्भूते वने ? नारङ्गतरुभिः कृतशोभे । तथा वने नागेभ्यः-अहिभ्यो रुचिताः-अभीष्टाश्चन्दनतरोः पत्राणां भङ्गाः-विशेषा भान्ति । तथा वने नालिकेरैस्तरुभिश्चितः-व्याप्तस्तिलको भाति । तथा नवा-नवीना अञ्जनस्य शाखिनो यष्टिः-प्रकाण्डो दृष्टिपथ-मवतरति। तथा वने नीलाः-नीलवर्णाः ह्रस्वास्तमालास्तमालकाः ह्रस्वेकः पश्चात्कर्मधारयः, अत एव नाभिरम्या-नाभिदघ्ना इति भावः, वीक्ष्यन्ते । तथा वने ताम्बूलीनां-नागवल्लीनां रागः-प्रसक्तिर्नाधरीकृतः-न हीनीकृतो दृश्यते, स्थाने स्थाने तासां सद्भावात् । तथा पल्लवितं-जातकिशलयं अशोकानां जालं-खण्डं दृश्यते ।

पुनराह—हे देव ! इतश्च-अस्मिन्प्रदेशे सुष्ठु रचितः-निर्मितः क्रीडापर्वतः-केलिशैलो दृश्यते । क इव ? काञ्चनगिरिरिव-मेरुरिव । स च कीदृशः ? सुरैः-देवैश्चितः-व्याप्तः । हे नृप ! इतश्च वीक्षस्व, न खण्डिताः-त्रोटिताः प्रवालाः-पल्लवा यत्र तत्, ईदृशं बालशालवनं-नवीनशालतरुकाननं वर्तते । किमिव ? गूर्जराणां-गूर्जरदेशोद्भवानां नराणां कूर्चमिव-श्मश्रू इव । किम्भूतं तत् ? अखण्डिताः-क्षुरादिना अच्छिन्ना अतएव प्रवृद्धाः बालाः-केशा यत्र तत्तथाविधं भवति । हे देव ! इतश्च अनेकविधैः-नानाप्रकारैर्बकुलैः संकुलं-व्याप्तं कूपकुलं वीक्ष्यते । किमिव ? भवतो वैरिणां नगरमिव । किम्भूतं तत् ? अनेका विधवाः-मृतभर्तृका येषु कुलेषु तैर्कुलैः-गोत्रैः संकुलं, तद्भर्तृणां त्वया हतत्वात् । हे नृप ! इतश्च पुंनागैः-तरुविशेषैर्वेष्टितः-परिकरितो वापीपरिसरो वीक्ष्यते । क इव ? धूर्जटिजटाजूट इव-ईश्वरकपर्द इव । स च कीदृशः ? पुमान् नागः-वासुकिस्तेन वेष्टितः-उद्ग्रथितः । हे देव ! इतश्च प्रदेशे कृताः-उत्पादिता अश्वत्थाः-पिप्पला यस्यां सा । तथा महिता च-चार्वी क्रीडासरितः-केलिनद्याः पुलिनपालिः-तटप्रान्तो वर्तते । अत्र पालिशब्दः प्रान्तार्थः, तथा **चानेकार्थः-"पालिर्यूकाश्रिपंक्तिषु** [३।५०८] । **जातश्मश्रुस्त्रियां प्रान्ते सेतौ कल्पितभोजने । प्रशंसा कर्णलतयोरुत्सङ्गे प्रस्थचिह्नयोः"** इति [२।५०८-५०९] । केव ? कुरुसेनेव-कुरुक्षत्रियचमूरिव । सा किम्भूता ? कृतमश्वत्थाम्ने-द्रोणसुताय हितं यया सा ।

**चलच्चकोरचञ्चु[१]चञ्चलचञ्चरीकचरणचूर्णितचम्पकाङ्कुरमरिच-मञ्जरीदलदन्तुरेण वनमार्गेण स्तोकमन्तरमतिक्रान्तस्तया[२] पुनरेवं बभाषे ।**

**'देव ! पुरन्दरानन्दिनन्दनोद्यानस्पर्धिनोऽस्य वनस्य किं वर्ण्यते[३]' ।**

**यत्र त्रिजटाश्रयमनेकजटाः, स्फुरदेकपुष्पकमनेकपुष्पाः[४], समुद्वेजितराममानन्दितरामाः, समुपहसन्ति लङ्केश्वरं तरवः ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**यस्मिंश्च मत्तमयूरहारिणि भद्रभुजङ्गप्रयाते विचित्रक्रौञ्चपदे छन्दः-शास्त्र[१] इव वैतालीयं मालिनी[२] शिखरिणी पुष्पिताग्रा च दृश्यते विविधा जातिः ।**

**यस्मिंश्च—एकभीमार्जुनविनिर्जितानाक्रान्तानेकभीमार्जुनाः, कोपितैकनकुलानाह्लादितानेकनकुलाः, सहदेवेनैकेन स्पर्धमानाननेकैः सहदेवैः सङ्गताः । न बहु मन्यन्ते कुरुवीरान्वीरुधः ।**

**किं चान्यदवलोकयतु देवः ।**

ईदृशे वनमार्गेण स्तोकं-कियत् अन्तरं-अवकाशं व्यवधानं अतिक्रान्तः-उल्लंघितवानेष नलस्तया-वनपालिकया पुनर्बभाषे । कीदृशेन वनमार्गेण ? चलन्तो ये चकोराः-चलचञ्चवस्तेषां याश्चञ्चवः-त्रोटयस्ताभिस्तथा चञ्चलाः-चपला ये चञ्चरीकाः-अलयस्तेषां चरणैश्च अंह्रिभिश्चूर्णिताः-खण्डिता ये चम्पकाङ्कुराः-हेमपुष्पकप्ररोहास्तथा मरिचानां मञ्जर्यो दलानि च-पत्राणि तैर्दन्तुरः-सञ्चारयोग्यस्तेन ।

**हे देव** ! पुरन्दरं-शक्रमानन्दयतीति पुरन्दरानन्दि यन्नन्दनोद्यानं-नन्दनवनं तत् स्पर्द्धते-संहृष्यति तदनुकारं भजतीत्येवं शीलं यत्तत् पुरन्दरानन्दिनन्दनोद्यानस्पर्द्धि, तथाविधस्य अस्य वनस्य किं वर्ण्यते ?-किं श्लाघ्यते ? सर्वस्याप्यस्य वर्णनीयस्वरूपत्वात् । तदेवाह-

**यत्रेति** । यत्र-वने तरवः-वृक्षा लङ्केश्वरं-रावणं समुपहसन्ति-तिरस्कुर्वन्ति । कथम् ? किम्भूतं रावणम् ? त्रिजटा-रावणस्वसा तस्या आश्रयः-आधारो भ्रातृत्वात् यः स तम् । किम्भूतास्तरवः ? अनेकाः जटामूलानि येषां ते तथाविधाः । पुनः किम्भूतं रावणम् ? स्फुरद्-दीप्यमानमेकं-उत्कृष्टं पुष्पकं विमानं यस्य स तम् । किम्भूतास्तरवः ? अनेकानि-बहूनि पुष्पाणि येषु ते तथाविधाः । तथा किम्भूतं रावणम् ? समुद्वेजितः-सीतापहरणात् उद्वेगं प्रापितो रामः-दाशरथिर्येन स तम् । किम्भूतास्तरवः ? आनन्दिताः-प्रमोदिता[१] रामाः-स्त्रियो यैस्ते । तथाभूताः हासस्तु तुल्यार्थमधिकृत्य स चैवं सति[२] तिसृणां जटानामाश्रयः, अमी अनेकजटाः । स स्फुरदेकपुष्पकः-स्फुरदेककुसुमः, अमी अनेक पुष्पकाः । स समुद्वेजित रामः पीडितवनितः[३], अमी आनन्दितरामा इति समाधिपक्षस्तूक्त एव । अनेकजटा इति एकशब्देन संख्या उपलक्ष्यते ततोऽनेकशब्दो असंख्यातवचनः ।

---

१. 'प्रमोदिता' नास्ति अनू. । २. स. अनू. । ३. पीडितवनः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा **यस्मिंश्च**-वने वै-स्फुटं इयं ताली-तालद्रुमः, इयं च विविधा-अनेकप्रकारा जातिर्मालती दृश्यते । द्वे अपि विशेषयति । कीदृशी ? माला-पंक्तिः स्रग् वा अस्या अस्ति मालिनी, तथा शिखरिणी-शिखरयुक्ता, तथा पुष्पितं अग्रं-शिखरं यस्याः सा कुसुमिताग्रभागा । किम्भूते वने ? मत्ताः-तालीवनावलोकनान्मेघभ्रान्त्या हृष्टा ये मयूरास्तैर्हारि-रम्यं तस्मिन् । तथा भद्रं-मनोज्ञं भुजङ्गानां-अहीनां विटानां च प्रयातं-गमनं यत्र तत्तथाविधे । तथा विचित्राः-विविधा ये क्रौञ्चाः-पक्षिविशेषास्तेषां पदं-स्थानं तस्मिन्, तत्र क्रौञ्चानां बाहुल्यात् । कस्मिन्निव ? छन्दःशास्त्रे इव-यथा छन्दःशास्त्रे वैतालीयं मालिनी शिखरिणी पुष्पिताग्रा चेति छन्दो नामानि दृश्यन्ते । विविधा-अनेकधा जातिश्च-उक्तादि उत्कृत्यन्ता दृश्यते । किम्भूते छन्दःशास्त्रे ? मत्तमयूराख्येन छन्दसा हारिणि-मनोहरे, तथा भद्रं भुजङ्गप्रयातं यत्र, तथा विचित्रा क्रौञ्चपदा यत्र तस्मिन् ।

हे देव ! यस्मिंश्च-वने वीरुधः-लताः कुरुवीरान्-कुरुक्षत्रियशूरान् न बहुमन्यन्ते-न गौरवयन्ति, अस्माकं पुरस्ते के ? इत्येवं लाघवयन्तीत्यर्थः । अथ लाघवप्रकारमेवाह– किम्भूतान् कुरुवीरान् ? एकेन-मुख्येन भीमेन अर्जुनेन च-पार्थेन विनिर्जिताः-जितास्तान् । किम्भूताः वीरुधः ? आक्रान्ताः-अध उपरि च आलीढा अनेके-बहवो भीमा-अम्लवेतसा अर्जुनाश्च-ककुभा यकाभिस्ताः । **यद्विश्वः**-"**भीमोऽम्लवेतसे शम्भौ घोरे चापि वृकोदरे ।**" [मान्तद्वि० १५] "**अर्जुनः पार्थे, हैहये केकिनि द्रुमे । मातुरेकसुते ।**" चेत्**यनेकार्थः** [३।५८१] । द्रुमः ककुभाख्यः । पुनः किम्भूतान् कुरुवीरान् ? कोपितः-कषायित एको नकुलः-पाण्डवो यैस्ते कोपितैकनकुलास्तान् भूतान् । किम्भूताः वीरुधः ? आह्लादिताः-आनन्दिता अनेके नकुलाः-जीवविशेषा याभिस्तास्तथाविधाः । पुनस्तान् कीदृशान् ? एकेन सहदेवेन पाण्डवेन सह स्पर्द्धमानान्-स्पर्धाकुर्वाणान् । किम्भूतास्ताः ? अनेकैः सहदेवैः-औषधिविशेषैः सङ्गता-अन्विता । लाघवपक्षस्तु तुल्यार्थे एवं व्याख्येयः– ते एकेन भीमेन अर्जुनेन च जिताः, आभिस्तु अनेक भीमार्जुना आक्रान्ताः-पराभूताः । तैर्य एको नकुलः सोऽपि कोपितः, आभिस्तु अनेके नकुला आह्लादिताः । ते च एकेनाऽपि सहदेवेन सह स्पर्द्धन्ते-संहृष्यन्ति कलहायन्ते, एताश्च अनेकैः सहदेवैः सह सङ्गताः-मिलितास्तिष्ठन्ति ।

**किञ्च**, पुनः अन्यत्-रमणीयं देवः-नृपो अवलोकयतु-वीक्षताम् ।

**पटलमलिकुलानामुन्नमन्मेघनीलं,**
**भ्रमदुपरि तरूणां पुष्पितानां विलोक्य ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मृदुमदकलकेकानिर्भरो नृत्यसक्त-[१]
स्तरलयति कलापं मन्दमन्दं मयूरः ॥ ४ ॥

**अपि च–**

**भ्राम्यद्द्विरेफाणि विकासभाञ्जि, संयोज्य पुष्पाणि शिलीमुखेषु ।**
**इह स्थितः सर्वजगज्जयाय, धनुःश्रमं पुष्पशरः करोति ॥ ५ ॥**

**इतश्च–**

**पटल**मिति । मालिनीवृत्तम् । मयूरः-केकी पुष्पितानां-कुसुमितानां तरूणामुपरि उन्नमन्-वर्षार्थं कृतप्रयत्नो यो मेघस्तद्वन्नीलं-कृष्णवर्णं भ्रमत्-कुसुममधुपानाय पर्यटत् अलिकुलानां पटलं-वृन्दं विलोक्य मन्दं मन्दं-शनैः शनैर्नृत्यसक्तः-ताण्डवप्रवृत्तः सन् कलापं-पिच्छं तरलयति-कम्पयति, ताण्डवाय सज्जीकुरुत इत्यर्थः । किम्भूतो मयूरः ? मृद्वी-श्रोत्रसुखावहा मदेन कला-रम्या या केका-मयूरध्वनिस्तया निर्भरः-भृतस्तां कुर्वन्नित्यर्थः । तरुशिखरेषु भ्रमदलिकुलं दृष्ट्वा मयूरस्य मेघभ्रान्तिरभवद् यदयं मेघ इति, ततः केकायते नृत्यति चेति भावः । मयूर इति जात्येकवचनं । कालविरुद्धनृत्ये तु मधुपपटले घनभ्रान्तिरेव निबन्धनम् ॥ ४ ॥

**अपि च**-पुनः हे देव !

**भ्राम्ये**ति । उपजातिवृत्तम् । इह-वने स्थितः सन् पुष्पशरः-कामः सर्वजगज्जयाय-त्रिलोकीविजयाय धनुषः श्रमं-व्यायामं करोति । अन्योऽपि यो वैरिजयाय धनुःश्रमं करोति सोऽप्येकान्ते वनादौ करोति तथाऽयमपि । किं कृत्वा ? पुष्पाणि शिलीमुखेषु-शरेषु संयोज्य-मीलयित्वा, पुष्पाणि बाणस्थानीयानि विधायेत्यर्थः । किम्भूतानि पुष्पाणि ? भ्राम्यन्तः-मधुलिलिक्षया पर्यटन्तो द्विरेफा येषु तानि, तथा विकासं-प्रफुल्लतां भजन्ति यानि तानि विकासभाञ्जि-विकस्वराणि । इहेत्युद्यानस्योद्दीपनविभावातिशयोक्ता कामस्य स्थितिरूह्यते । एतावता सुरभिकुसुमसम्पदुक्ता ॥ ५ ॥

वनपालिका पुनर्विनोदस्थानं दर्शयति–

**इतश्चे**ति । हे देव ! इतश्च-अस्मिन्प्रदेशे–

**हरिति हरिणयूथं यूथिकाजालमूले, कुसुमजमधुबिन्दुस्पन्दसंदोहभाजि ।**
**मधुरमधुकरालीगीतदत्तावधानं, लिखितमिव न दूर्वापल्लवानुल्लुनाति ॥६॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## इतोऽपि

**हरितीति** । मालिनीवृत्तम् । हरिणयूथं-मृगकदम्बकं हरिति-शाद्वले यूथिका-जालस्य-मागधीलतासमूहस्य मूले-अधःप्रदेशे मधुरं-श्रोत्रसुखकारि यन्मधुकराल्याः-मधुपपंक्तेर्गीतं-झङ्कारारवस्तस्मिन् दत्तमवधानं-चित्तैकाग्र्यं येन ईदृशं सत् दुर्वापल्लवान्-दूर्वाकिसलयानि न उल्लुनाति-न खादति । उत्पेक्ष्यते—हरिणयूथं किमिव ? लिखितमिव-आलेख्यभूमौ चित्रितमिव । यथा चित्रितं हरिणयूथं पल्लवान् न खादति तथेदमपि । किम्भूते यूथिकाजालमूले ? कुसुमजा ये मधुबिन्दवः-मकरन्दपृषतास्तेषां यः स्पन्दः-क्षरणं तस्य संदोहं-समूहं भजति तत्तत्तथाविधे । मधुबिन्दुसंदोहसम्बन्धात् स्पृहणीयेऽपि गीतरसिकतया मृगाणां दूर्वाङ्कुराग्रहणमुक्तम् ॥ ६ ॥

**इतो**ऽपीति । हे देव ! अस्मिन्नपि प्रदेशे—

**सोऽयं क्रीडाचलो भव्य लोभव्यसनवर्जित[१] ।**
**यस्मिन्नासन्नसारङ्गा सारं गायति किन्नरी ॥ ७ ॥**

**राजते राजतेनायं सानुना सानुनायकः ।**
**यस्मिन्निशम्य गायन्तं किन्नरं किं न रंस्यते ॥ ८ ॥**

## इतश्च[२]—

**सोऽयमिति** । अनुष्टुप्वृत्तम् । हे भव्य ! हे लोभव्यसनैर्वर्जित ! सोऽयं क्रीडाचलः-क्रीडागिरिर्वर्तते । यस्मिन् क्रीडाचले किन्नरी सारं-उत्कृष्टं गायति । किम्भूता किन्नरी ? आसन्नाः-निकटवर्तिनः सारङ्गाः-मृगा यस्याः सा, गीतप्रकर्षाकृष्टत्वात् सारङ्गाणामामन्त्रता[१] ॥७॥

**राजत** इति । अनुष्टुप्वृत्तम् । अयं, सानुनायकः-गिरिः राजते न रजतनिर्मितेन, सानुना-तटेन राजते । यस्मिन्-गिरौ गायन्तं किन्नरं निशम्य-श्रुत्वा किं न रंस्यते ?-त्वया न क्रीडिष्यते ? अपितु रंस्यत एव ॥ ८ ॥

**इतश्च** हे देव !

**जनयति जलबुद्धिं बाललीलामृगाणा-**
**मयमिह पटुकान्तिः स्फाटिको भित्तिभागः ।**

---

१. आसंगता अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इह हरितमणीनामुल्लसन्तो मयूखाः**
**सरसनवतृणालीलोभमुत्पादयन्ति ॥ ९ ॥**

**जनयती**ति । मालिनीवृत्तम् । इह-क्रीडापर्वते अयं प्रत्यक्षेण वीक्ष्यमाणः स्फाटिकः-स्फटिकमणिनिर्मितो भित्तिभागः-कुड्यप्रदेशः बालाः-अर्भका ये लीलामृगाः-केलिहरिणास्तेषां जलबुद्धि-पानीयमतिं जनयति-करोति । किम्भूतो भित्तिभागः ? पट्वी-मलाभावादुज्ज्वला कान्तिः-छविर्यस्य स । तथाविध श्वेतां स्फटिकच्छविं वीक्ष्य बालमृगाः पानीयमिति मत्या पातुं प्रवर्तन्त इत्यर्थः। हे देव ! इह पर्वतैकदेशे हरितमणीनां-नीलमणीनां उल्लसन्तः-प्रवर्धमानाः मयूखाः-किरणाः बाललीलामृगाणां सरसा-स्वादवती नवा-सार्द्रा या तृणाली तस्या लोभं-गार्ध्यं अभिलाषमुत्पादयन्ति । तन्मणीनां नीलानंशून् वीक्ष्यते इति वितर्कयन्ति । यदमी तृणाङ्कुरा इति, ततस्तद्भक्षणाय प्रवर्तन्त इत्यर्थः ॥ ९ ॥

**इयं च–**

**गौरवं गौरवंशस्य पर्वतः पर्वतस्थले ।**
**भ्रमरी भ्रमरीणस्य कुरुतेऽकुरुतेन ते ॥ १० ॥**

**अपि च–**

**इयं चे**ति । **गौरव**मिति ।[१] हे देव ! इयं च भ्रमरी अकुरुतेन-अकुत्सितशब्देन ईदृशस्य ते-तव गौरवं-आगतस्य प्रतिपत्तिविशेषं कुरुते । अन्योऽपि धन्यः कश्चित्-कुतश्चिद् यदागच्छेत्तदा तस्य स्वागतमित्यादि, मधुरस्वरेण वाचिकीं प्रतिपत्तिः क्रियते तथा भृङ्ग्यपि[२] विधत्त इत्यर्थः । किम्भूतस्य ते ? गौरः-विशुद्धो वंशः अन्वयो यस्य स तस्य । "**गौरः श्वेतेऽरुणे पीते विशुद्धे चन्द्रमस्यपि ।**" इत्य**नेकार्थः** [२।४२५] । पुनः किम्भूतस्य ते ? पर्वतस्थले-गिरिस्थले पर्वतः-गच्छतः, अत एव भ्रमेण-देहवैक्लव्येन भ्रमिसंज्ञेन रीणस्य-खिन्नस्य ॥१०॥

**अपि च**-पुनः

**इह कवलितकन्दं कन्दरे कन्दलिन्यां,**
**भुवि विरचितकेलिःक्रीडति क्रोडयूथम् ।**
**इह सरसिजगन्धभ्रान्तभृङ्ग[१] कुरङ्गाः,**
**सरसि सरलयन्तः कंधरां[२] कं धयन्ति ॥११॥**

---

१. गौरेति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इहे**ति । मालिनीवृत्तम् । इह-पार्वतीये कन्दरे-दर्यां क्रोडयूथं-वराहवृन्दं क्रीडति-खेलति । किम्भूतं ? कवलिताः-ग्रस्ताः कन्दाः-सूरणा येन तत्, तथा कन्दलिन्यां-प्रोहबहलायां भुवि विरचिता-कृता केलिः-क्रीडा येन तत् तथाविधम् । हे देव ! इह सरसि-कासारे कुरङ्गाः कन्धरां-ग्रीवां सरलयन्तः-ऋज्वीकुर्वन्तः सन्तः कं-पानीयं धयन्ति-पिबन्ति । **"धेट् पाने"** [ ]। किम्भूते सरसि ? सरसिजानां गन्धेन-सौरभ्येण भ्रान्ताः-इतस्ततः पर्यटिता भृङ्गा यत्र तत्तथाविधं तस्मिन् ॥ ११ ॥

**इह पुनरनिशं निशम्य भिन्न-द्रुम-मुकुलानि कुलानि षट्पदानाम् ।**
**श्रुतिसुखकरणं रणन्ति वीणां, तदनुगुणां क्वणयन्ति[1] किंनरेन्द्राः ॥१२॥**

**इहे**ति । हे देव ! इह-क्रीडागिरौ पुनः-भूयः अनिशं-निरन्तरं रणन्ति-झं कुर्वन्ति षट्पदानां कुलानि-समूहान् निशम्य-श्रुत्वा किन्नरेन्द्रास्तदनुगुणां-भृङ्गरणितस्यानुगामिनीं वीणां क्वणयन्ति-वादयन्ति । किम्भूतानि षट्पदानां कुलानि ? भिन्नानि-मुखचरणैश्छिद्रितानि द्रुमाणां मुकुलानि-कुड्मलानि यैस्तानि । किम्भूतां वीणाम् ? श्रुत्योः-कर्णयोः सुखकरणं-आह्लादकारिणीम् । करणशब्द आविष्टलिङ्गः, क्रियाविशेषणं वा । रणन्तीति रणशब्दे शतृप्रत्यये रूपम् । पुष्पिताग्रा ॥ १२ ॥

**इतश्च क्रीडाचलस्थलकमलदीर्घिकातीरतरुतलमनुसरत देवः ।**

**यत्र च–**

**इतश्चे**ति । हे देव ! इतश्च-अस्मिन्प्रदेशे क्रीडाचलस्थले याः कमलदीर्घिकाः-सरोजवाप्यस्तासां तीरे-तटे ये तरवस्तेषां तलं-अधोभागमनुसरतु-आश्रयतु । बहुभ्रान्त्या श्रान्तत्वात् तरुच्छायायामुपविशत्वित्यर्थः ।

**यत्र चे**ति । यत्र च-तरुतले

**वहति नवविकासोल्लासिकिंजल्कलुभ्यन्-**
**मधुकरकृतगीता नर्त्तयन्नब्जराजीः ।**
**वनकरिमदगन्धस्पर्धिसप्तच्छदाली,**
**कुसुमजकणशारः शारदीनः समीरः ॥१३॥**

**वहती**ति वृत्तम् । हे देव ! वनकरिणां-वन्यहस्तिनां मदगन्धं स्पर्द्धते-संहृष्यति या सा वनकरिमदगन्धस्पर्द्धिनी या सप्तच्छदाली-सप्तच्छदवृक्षपंक्तिस्तस्या ये कुसुमजकणाः-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मकरन्दलवास्तैः शारः-शबलः समीरः-वायुर्वहति-वाति । "**शारः शबलवातयोः** [२।४७३]। **द्यूतस्य चोपकरणे**" इत्य**नेकार्थः** [२।४७३-७४] । किं कुर्वन् समीरः ? अब्जराजीः-पङ्कजश्रेणीः नर्त्तयन्-कम्पयन्, तरलनमेवात्र नर्तनम् । किम्भूता अब्जराजीः ? नवविकासेन-सरोजानामभिनवोद्भेदेन उल्लासि-विस्तरद् यत् किञ्जल्कं-केसरं तस्मिन् लुभ्यन्तः-गार्ध्यमभिलाषं कुर्वन्तो ये मधुकराः-भृङ्गास्तैः कृतं गीतं-झंकारगानं यासु तास्तथाविधाः । पुनः किम्भूतः समीरः ? शरदि भवानि शारदानि मुद्गादीनि तानि विद्यन्ते येषां ते शारदिनः-कृषिबलास्तेषामिनः-स्वामी, तत्सस्यसम्पत्तिहेतुत्वात् । मालिनीवृत्तम् ॥१३॥

**राजा तु तेन तस्याः सकलललितवनप्रदेश[१]प्रकटनप्रियालापप्रपञ्चेन परितोषितः 'साधु ! भो सारसिके ! सुभाषितमञ्जरि, साधु ! गृहाण पारितोषिकम्' इत्यभिधाय सर्वाङ्गीणाभरणप्रदानप्रसन्नाननां[२] तामकरोत् ।**

**राजा तु** नलः तस्याः-वनपालिकायास्तेन सकलाः-कृत्स्नाः ललिताः-मनोज्ञा ये वनप्रदेशाः-काननविभागास्तेषां प्रकटने-प्रदर्शने यः प्रियः-मधुर आलापप्रपञ्जः-वाग्विस्तरस्तेन परितोषितः-आनन्दितः सन्, भो सारसिके ! सुभाषितानां-सूक्तानां मञ्जरिरिव या सा तस्याः सम्बुद्धौ हे सुभाषितमञ्जरि ! साधु-चारु त्वया भणितमित्यध्याह्रियते । परितोषे भवं पारितोषिकं-प्रीतिदानं वासनां साधु गृहाण-आदत्स्वेति अभिधाय-उक्त्वा तां-सारसिकां सर्वाङ्गाणि व्याप्नुवन्तीति सर्वाङ्गीणानि आभरणानि[१]-हारादीनि तेषां प्रदानेन प्रसन्नं-विकस्वरं आननं यस्याः सा तथाविधामकरोत्। पारितोषिकमिति "**अध्यात्मादित्वात् ठञ्**" [पा० सू० ४।३।६०]। सर्वाङ्गीणेति "**तत्सर्वादेः पथ्यंगकर्म्मपत्रपात्रं व्याप्नोतीति**" [पा० सू० ५।२।७] सर्वपूर्वकादंगात् व्याप्नोत्यर्थे स्वः । स्वस्य चेनः ।

**ततश्च[३] संचरच्चटुलभृङ्गविहंगवेल्लद्बकुल[४]चम्पकचूतचन्दनमन्दाराम-न्दस्यन्दमानमकरन्दबिन्दुसंदोहाडम्बरिताकाण्डप्रावृषि, प्रलम्बताम्बूलवल्ली-वलयितनितम्बनिम्बकिम्बजम्बीर[५]जम्बूस्तम्बककदम्बके[६], कुसुमितकर-वीर[७]वीरुधि कोरकितकरञ्जाञ्जननिकुञ्जशिञ्जानशुककपिञ्जले, जलदसमय-नीरदनीलतमाल[८]तलताण्डवितशिखण्डिनि, मण्डलितमदकलकलहंसो-**

१. यानि आभरणानि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**त्तंस[१]कमलवापीमण्डिते, मञ्जरितसिन्दुवारसुन्दरामोदे[२] मन्दतरमारुतान्दोलन[३]विलोलकक्कोलकुट्मलफल[४]नालिकेरलवङ्गपूगपुंनागनारङ्गरङ्गितविहङ्ग[५]भृङ्गमुखनखरपञ्जर[६]जर्जरितखर्जूर[७]मञ्जरीरजःपुञ्जपांसुलभुवि, भुवो भूषणायमाने, सर्वर्तुनिवासनामनि[८] वने विहर्तुमारभत ।**

**ततश्च** । ततः-अनन्तरं नलः एवं विधे भुवः-भूमेर्भूषणायमाने-मण्डनोपमे सर्वर्तुनिवासनामनि[१]-सर्वर्तुनिवासाभिधाने वने विहर्तुं-विचरितुमारभत-प्रयत्नं कृतवान् । किम्भूते वने ? सञ्चरन्तः-मधुपुष्पफलाद्यास्वादनाय प्रवर्तमानाश्चटुलाः-चञ्चला ये भृङ्गाश्च विहङ्गाश्च तैर्वेल्लन्तः-कम्पमाना ये बकुलाश्च चम्पकाश्च चूताश्च-आम्राः चन्दनानि च मन्दाराश्च-कल्पवृक्षास्तेभ्यो अमन्दाः-अनल्पाः स्यन्दमानाः-क्षरन्तो ये मकरन्दबिन्दवः-कुसुमजकणास्तेषां संदोहेन-समूहेन आडम्बरिता-आरब्धा अकाण्डे-असमये प्रावृट्-वर्षाकालो यस्मिंस्तत्तस्मिन् । यद्यपि तदानीं वर्षासमयो नास्ति तथापि मकरन्दबिन्दुवृन्दस्यन्दनेन तदानीमसमयेऽपि वर्षाः प्रादुरासन् इति । "**मन्दो मूढे शनौ रोगिण्यलसे भाग्यवर्जिते ।** [२।२३५] **गजजातिप्रभेदेऽल्पे स्वैरे मन्दरते खले ।**" **इत्यनेकार्थः** [२।२३५-२३६] । पुनः किम्भूते? निम्बाश्च किम्बाश्च जम्बीराश्च जम्ब्वश्च निम्बकिम्बजम्बीरजम्ब्वः प्रलम्बाभिः-दीर्घाभिस्ताम्बूलवल्लीभिर्वलयितः-वेष्टितो नितम्बः-मध्यभागो यासां, ईदृग्विधा या निम्बकिम्बजम्बीरजम्ब्वस्तासां यानि स्तबकानि-गुच्छास्तेषां कदम्बकं-वृन्दं यत्र तत्तस्मिन् । तथा कुसुमिताः-पुष्पिताः करवीराणां-हयमाराणां वीरुधः-लता यत्र तत्तस्मिन् । तथा कोरकिताः-कलिकां प्राप्ताः ये करञ्जाश्च अञ्जनाश्च तेषां निकुञ्जे-कुडङ्गे सिञ्जानाः-कूजनशीलाः शुकाश्च कपिञ्जलाश्च-पक्षिविशेषा यस्मिंस्तत्तस्मिन् । तथा जलदसमयस्य यो नीरदः-मेघस्तद्वन्नीलाः कृष्णाः ये तमालतरवस्तेषां तले जलदभ्रान्त्या ताण्डविताः-नृत्यं कुर्वन्तः शिखण्डिनः-मयूरा यत्र तत्तस्मिन् । जलदसमय इति पदं नीरदस्य जलभृतत्वं द्योतयति, तदा च नीलत्वं घटत एवेति । तथा मण्डलिताः-पंक्त्या व्यवस्थिता मदेन-हर्षेण कलाः-मधुरस्वराः ये कलहंसास्त एवोत्तंसः-शेखरो यासां, ईदृश्यो याः कमलवाप्यस्ताभिर्मण्डितं-भूषितं यत्तत्तस्मिन् । तथा मञ्जरिताः-सञ्जातमञ्जरीकाः ये सिन्दुवाराः-निर्गुण्डीतरवस्तेषां सुन्दरः-रम्य आमोदः-परिमलो यस्मिंस्तत्तस्मिन् । तथा मन्दतरः-अतिशयेन अल्पो यो मारुतः-वायुस्तेन यदन्दोलनं-वेपनं तेन विलोलानि-चपलानि यानि कक्कोलानां-कोशफलानां कुड्मलानि-मुकुलानि फलानि च, तथा नालिकेराश्च लवङ्गानि च पूगाश्च-क्रमुकाः पुन्नागाश्च नारङ्गाश्च तेषु रङ्गिताः-क्रीडिताः विहङ्गा

१. 'सर्वर्तुनिवासनामनि' नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यत्र तत्तस्मिन् । पुनः किम्भूते ? भृङ्गाणां-धूम्याटपक्षिणां मुखैश्च-चञ्चुभिः नखरपञ्जरेण च-नखजालेन जर्जरिताः-खण्डिता याः खर्जूरमञ्जर्यस्तासां रजःपुञ्जेन-परागसमूहेन पांसुला-रजस्वला भूर्यत्र तत्तस्मिन् ।

**तत्र च[1] व्यतिकरे**

**प्रलयप्रचण्ड[2]पवनोल्लालित[3]तनुतुहिनाचलगण्डशैललीलामाकलयन्तः, मन्दमरुत्तरङ्गिततनुतरशरदभ्रविभ्रमायमाणाः, सुरवारण[4]विक्षोभितगगनमन्दाकिनीपतत्पाण्डुर[5]डिण्डीरपिण्डपटलानि विडम्बयन्तः, शकलोदितेन्दुमण्डलसहस्रसंछादितामिव गगनमापादयन्तो, मन्दर[6]गिरिपरिक्षेपक्षुभितक्षीरवारिधिदूरसमुच्छलितदुग्धकल्लोललीलां दर्शयन्तः, [7]शेषाहिफणचक्रवालधवलाः, प्रमुदितहराट्टहासलवा इव मूर्तिमन्तः पतन्तः, अमन्दमदकलकोलाहल[8]भरितभुवनान्तरालाः, सपदि धरामण्डलमु[9]त्फुल्लपाण्डुपङ्कजप्रकरप्रकारेण मण्डयन्तो निपेतुः कुतोऽपि पुण्डरीकपाण्डुपक्षपत्रराजयो राजहंसाः[10] ।**

**तत्र च व्यतिकरे**-तस्मिंश्चावसरे राजहंसाः सपदि-शीघ्रं पतनसमकालमेव धरामण्डलं-भूतलं उत्फुल्लानि-विकसितानि[1] पाण्डूनि-धवलानि यानि पङ्कजानि-पद्मानि तेषां यः प्रकरः-समूहस्तस्य प्रकारेण-निर्देशस्य भावप्रधानत्वात् प्रकारत्वेन सादृश्येन उत्फुल्लपाण्डुपङ्कजप्रकर इव मण्डयन्तः । यथा भूः पाण्डूत्फुल्लाब्जैः शोभते तथा विभूषयन्तः सन्तः कुतोऽपि-कस्माच्चित्प्रदेशान्निपेतुः-पतन्ति स्म । "**प्रकारः सदृशे भेदे**" इत्य**नेकार्थः** [३।६०८] । किं कुर्वन्तः ? प्रलयस्य-प्रलयकालस्य प्रचण्डो यः पवनस्तेन उल्लालिताः-उच्छालितास्तनवः-लघवो ये तुहिनाचलस्य-हिमालयस्य गण्डशैलाः-गिरेश्च्युतस्थूलपाषाणास्तेषां लीलां-शोभां आकलयन्तः-बिभ्रतः, मन्येऽमी हंसा न निपेतुः किन्तु प्रचण्डमरुता उच्छालितास्तुहिनाचलस्य गण्डशैला एवेति । तथा मन्दमरुता-अल्पवातेन तरङ्गाणि-जाततरङ्गाणि उपचारात्तरङ्गाकृतीनि तनुतराणि-अतिलघूनि यानि शरदभ्राणि तद्वत् विभ्रमवन्तः-विलासवन्तो भवन्तो विभ्रमायमाणा ये ते मन्दमरुत्तरङ्गिततनुतरशरदभ्रविभ्रमायमाणाः। तरङ्गितेति "**तारकादित्वादितच्**" [**तदस्य सञ्जातं तारकादिभ्य इतच्** [पा० सू० ५।२।३६]]। तथा सुरवारणेन-ऐरावणेन विक्षोभिता-गाहिता या

१. विहसितानि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गगनमन्दाकिनी-नभःसुरसरित्, अतएव तस्याः पतन्ति यानि पाण्डुरडिण्डीरपिण्डपटलानि-श्वेतफेनपिण्डजालानि तानि विडम्बयन्तः-अनुकुर्वन्तः । तथा शकलानि-खण्डानि उदितानि-उद्गतानि यानि इन्दुमण्डलानि तेषां यत्सहस्रान्तेन संछादितं-आवृतमिव गगनं आपादयन्तः-सम्पादयन्तः, खण्डशशिनो हंससदृशा एव भवन्त्यतस्तेषां भ्रमः । तथा मन्दरगिरिरेव-मेरुरेव परिक्षेपः-मन्थास्तेन क्षुभितः-मथितो यः क्षीरवारिधिः-क्षीरसमुद्रस्तस्माद् दूरे समुच्छलिता-उल्ललिता ये दुग्धकल्लोलास्तेषां लीलां-शोभां दर्शयन्तः । शङ्के, हंसा अमी न भवन्ति किन्तु क्षीराब्धेरुच्छलिताः पयःकल्लोला इति । तथा शेषाहेः-शेषनागस्य फणाः चक्रवालवत्-स्फटसमूहबद्धवलाः श्वेताः । उत्प्रेक्ष्यते, मूर्तिमन्तः-सदेहाः पतन्तः प्रमुदितस्य हरस्य-शम्भोरट्टहासलवा इव, हासस्य श्वेततया वर्णनमिति कविसङ्केतः । पुनः किम्भूता ? अमन्देन-अनल्पेन मदेन-हर्षेण कलः-मनोज्ञः कोलाहलः-कलकलस्तेन भरितं-पूरितं भुवनान्तरालं-भुवनमध्यं यैस्ते तथाविधाः । तथा पुण्डरीकवत्-सिताम्भोजवत् पाण्डुः-श्वेता, पक्षपत्रराजिर्येषां ते तथाविधाः । यद्यपि पक्षपिच्छयोरभिधानकृता न भेदः प्रत्यपादि तथापि महदेवान्तरं । यतः-पक्षशब्देन पक्षती एव, पिच्छशब्देन तु तदंशोऽभिधीयते ।

**तथाविधे च व्यतिकरे[१] विस्मयविस्मृतनिमेषतया निर्वातनिश्चल-नीलोत्पलपलाशशोभायमानलोचनः कौतुकाकूततरलितमनाः सपरिजनो नरपतिर[२]वलोकयन्निश्चल एवावतस्थे[३] ।**

**तथाविधे च व्यतिकरे**-यस्मिन्नवसरे ते निपेतुस्तस्मिन्नेवावसरे सपरिजनः-सपरिच्छदो नरपतिः-नलः तान् अवलोकयन्-वीक्षमाणो निश्चल एवावतस्थे-स्थितः । किम्भूतो नरपतिः ? विस्मयेन-तत्समागमनोत्पन्नाश्चर्येण विस्मृतः-नष्टो निमेषः-नेत्रयो-र्निमीलनं यस्य स तद्भावस्तत्ता, तया हेतुभूतया निर्वातेन-वाताभावेन निश्चलं यन्नीलोत्पलस्य पलाशं-पत्रं तद्वत्, अशोभावती शोभावती भवती शोभायमाने-लीलायमाने लोचने-नेत्रे यस्य स । यादृग् वाताभावे नीलोत्पलदलं निश्चलं वीक्ष्यते । तथा कौतुकाकुलिततया निमेषाभावेन नेत्रे निश्चले वीक्ष्येते,[१] इत्यर्थः । शोभायमानेत्यत्र शोभाशब्दात्त**द्वति वर्तमानादायिः** । एवं विभ्रायमाणेत्यादयोऽपि व्याख्येयाः । पुनः किम्भूतः ? कौतुकाकूतेन-कुतूहलाभिप्रायेण तरलितं-चञ्चल्योपेतं[२] मनो यस्याऽसौ तथाविधः ।

अथ तेषां केलिलीलामाह—

---

१. वीक्ष्येते अनू. । २. चाञ्चल्योपेतं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**ते च धार्तराष्ट्रा अपि कृतपाण्डुपक्षपाताः, द्विजातयोऽपि सुराजिताः, केचिदुच्चचञ्चुपुटविघटितनिकटबालस्थल[१]कलमकुट्मलाः [२]सरसबिसकिसलयानि कवलयन्तः, केऽप्युन्नमित[३]सरलगलनालयो[४] नलिनवनविमुखाः खमालोकयन्तः[५], केचिदुत्क्षिप्तपक्षविक्षेपपवनकम्पितकन्दलाः सलीलमुत्पतन्तः, केचिन्मदमधुरनिजनिनादनिर्जितशिञ्जाननूपुराः, पुरः पुरोऽस्य धावन्तो विचरितुमारभन्त ।**

**ते च** कृष्णैश्चरणाननैर्युक्ता हंसा-धार्तराष्ट्राः तथा कृतः पाण्डुपक्षाणां-शुभ्रपक्षतीनां पातः-न्यासो यैस्ते तथाविधाः, तथा द्विजातयः-पक्षिणः, तथा सुष्ठु राजिताः-शोभिताः सुराजिताः । अपिः-विरोधे । ये धार्तराष्ट्राः कुरवो भवन्ति ते कथं कृतः पाण्डुनृपस्य पक्षपातः-तत्पक्षस्वीकारो यैस्ते ईदृग्विधा भवन्ति, पाण्डुगृह्या न भवन्तीत्यर्थः। तथा ये द्विजातयः-विप्रा भवन्ति ते कथं सुरया-मदिरया जिताः-आयत्तीकृतास्तत्पायिनो भवन्तीत्यर्थः । तेषां मध्ये केचिद्धंसाः उच्चचञ्चुपुटेन-उन्नतचञ्चुसम्पुटेन विघटितानि-नियोजितानि निकटे-नलस्य समीपे बालानां-नवोत्पन्नानां स्थलकमलानां कुड्मलानि-मुकुलानि यैस्ते, तथाविधाः सन्तः सरसानि-आस्वादवन्ति यानि विसानि-मृणालानि किसलयानि च-पल्लवास्तानि कवलयन्तः-भक्षयन्तः। तथा केचित्[१] हंसाः खं-व्योममालोकयन्तः-वीक्षमाणाः । किम्भूताः सन्तः ? उन्नमिता-ऊर्ध्वीकृता सरला-ऋज्वी गलनालि-कण्ठकाण्ठं यैस्ते तथाविधाः । पुनः नलिनवनाद्विमुखाः-पराङ्मुखाः, अतएवोड्डयनायाकाशावलोकनं कुर्वन्तः । तथा केचिद्-हंसाः उत्क्षिप्तौ-उच्चैः कृतौ यौ पक्षौ-पक्षती तयोर्विक्षेपेण-विधूननेन संजातो यः पवनस्तेन कम्पितानि-दोलितानि कन्दलानि-प्ररोहा यैस्ते, तथाविधाः सन्तः सलीलं-लीलया सहितं यथास्यात्तथा उत्पतन्तः-उड्डीयमानाः । तथा केचित् उन्मदेन-उत्कृष्टहर्षेण मधुरः-श्रोत्रानुकूलो यो निजनिनादस्तेन निर्जितं शिञ्जानं-रणत्कारं कुर्वाणं नूपुरं-तुलाकोटिर्यैस्ते, तथाविधाः सन्तः, अस्य-नलस्य पुरः पुरः-अग्रतो अग्रतो धावन्तः-प्लवमानाः विचरितुं-क्रीडितुमारभन्त ।

**राजापि परिधावितविहङ्गग्रहणाग्रहव्यग्रसमग्रजनपरिजनः[६] परिहासोन्मीलद्दन्त[७]कान्तिस्तबकिताधरपल्लवो विहसन्नेव[८] तेषामन्यतममनुच्चचटुलचरणचारीचर्यया चारु संचरन्तमीषदुत्क्षिप्तपक्षविक्षेपविलास[९]विहसित[१०]विलासिनीलास्यलीलामुन्नमिताग्रग्रीवं जग्राह हेलया हंसम् ।**

---

१. केऽपि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**राजाऽपि**-नलोऽपि विहसन्नेव तेषां-हंसानां मध्ये अन्यतमं हंसं हेलया-विलासेन जग्राह । किम्भूतो राजा ? परिधावितानां-इतस्ततः प्लुतानां विहङ्गानां-अर्थाद्धंसपक्षिणां ग्रहणे-स्वीकारे यः आग्रहः-हठस्तेन व्यग्रः-व्याकुलः समग्रः-निखिलः परिजनो यस्य स । तथा परिहासेन-लीलापूर्वकहास्येन उन्मीलन्ती-विकसन्ती या दन्तकान्तिः-दशनच्छविस्तया स्तबकितः-कर्बुरित अधरपल्लवः-ओष्ठकिसलयं यस्य स, तथा विधः श्वेतारुणवर्णयोगात् कर्बुरितत्वम् । किं कुर्वन्तं हंसम् ? उच्चा-उन्नता चटुला-चपला या चरणचारी-पादन्यासस्तया या चर्या-गमनं तया चारु यथास्यात्तथा सञ्चरन्तं-गच्छन्तम् । तथा ईषत्-मनाक् उत्क्षिप्तौ-उच्चैःकृतौ यौ पक्षौ तयोर्विक्षेपविलासेन-विधूननलीलया विहसिता-अधरिता विलासिनीनां-रमणीनां लास्यलीला-नर्त्तनविलासो येन स तम् । तत्पक्ष-विक्षेपलीलायाः पुरः का विलासिनीनां नर्त्तनलीलेति ?। पुनः किम्भूतं ? उन्नमिता-उच्चैः कृता अग्रग्रीवा-कन्धराग्रभागो येन स तम् ।

**उत्क्षिप्तः स च तेन रक्तकमलगर्भविभ्रमायमाणपाणिपल्लवे, पाण्डुपद्म इव पद्मरागशुक्तितले, क्षणमुदयशैलशोणमाणिक्यशिखरशिलाया[१]मिन्दु-रिव, व्यराजत[२] राजहंसो मृदुवाद्यमानरौप्य[३]घनघर्घरीजर्जरस्वरेण च कृत-स्वस्तिशब्दो विस्पष्टवर्णविशेषमेष राजानमुपश्लोकयाञ्चकार ।**

**तेन**-नलेन रक्तकमलगर्भवत्-शोणपद्ममध्यवद् विभ्रमवान्-विलासवान् भवन् विभ्रमायमाणो यः पाणिपल्लवः-करकिसलयं तस्मिन्, उत्क्षिप्तः-उच्चैर्धृतः स च राजहंसो व्यराजत-शुशुभे । कस्मिन् ? क इव ? पद्मरागमणेः-लोहितमणेः शुक्तितले-शुक्तिकायां पाण्डुपद्म इव-श्वेतकमलमिव । यथा, पद्मरागः शुक्तौ निहितः पाण्डुपद्मो राजते तथाऽयमपि । पद्मशब्दः पुन्नपुंसके । पुनः कस्यां ? क इव ? क्षणं-मुहूर्तं यावत् उदयशैले-उदयाद्रौ शोणमाणिक्यानां-लोहितमणीनां या शिखरशिला तस्यामिन्दुरिव । यथा, इन्दुरुदयाद्रि-शोणमणिशिलायां राजते तथाऽयमपि शोभते स्म । पाणिपल्लवस्य पद्मरागशुक्तिः शोणमाणिक्यशिला चोपमानं, हंसस्य तु पाण्डुपद्मं इन्दुश्च । पाणितलस्य रक्तत्वात् हंसस्य श्वेतत्वादियमुपमा । ततो गृहीतः सन् एष-हंसः विस्पष्टवर्णविशेषं-व्यक्ताक्षररचनं यथास्यात्तथा राजानं नलमुपश्लोकयाञ्चकार-श्लोकैरुपस्तौति स्म । उपश्लोकयाञ्चकारेति "**सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्म्मवर्णचूर्णचुरादिभ्यो णिच्**" [पा०सू० ३।१।२५] । किम्भूतः सन् ? मृदु यथा भवति तथा वाद्यमानाः-शब्दं कार्यमाणाः 'रौप्याः[१]' [२]रूप्यस्य विकारो रौप्यी कृते समासे पूर्वस्य पुंवद्भावे रौप्यघनघर्घरीति

१. रौप्यः अनू. । २. रूप्यस्य'प्रारब्ध 'हेममुद्रिकावत्' पाठो नास्ति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हेममुद्रिकावत् कलधौतमय्यो घना-निविडा या घर्घर्यः-किङ्किण्यस्तद्वत् जर्जरो यः स्वरः-ध्वनिस्तेन च कृतः स्वस्तिशब्दो येन स तथाविधः ।

अथ श्लोकानेवाह–

**पाण्डुपङ्कजसंलीनमधुपालीसमं गलम् ।**
**यो बिभर्ति विधेयात्ते ना कपाली स मङ्गलम् ॥ १४ ॥**

**अपि च ।**

**पाण्ड्वि**ति । पाण्डुः-श्वेतं यत्पङ्कजं-सरोजं तस्मिन् संलीना-श्लिष्टा या मधुपाली-अलिश्रेणिस्तया समं-सदृशं गलं-कण्ठं यो बिभर्त्ति-धारयति स ना-पुमान् कपाली-कपालमाली अर्थात् शिवस्ते तव मङ्गलं-कल्याणं विधेयात्-क्रियात् ॥ १४ ॥

**अपि च**-पुनः–

**सरलप्रियं गुणाढ्यं लम्बितमालं विचित्रतिलकञ्च ।**
**वनमिव वपुस्तवैतत्कथमवनं नृप ! जनस्याभूत् ॥ १५ ॥**

**अपि च ।**

**सरलेति** । आर्यावृत्तम् । हे नृप ! एतत् प्रत्यक्षतो दृश्यमानं तव वपुर्वनमिव अस्य जनस्य-लोकस्य कथं अवनं-कथं वनं नाऽभवत् । अवनशब्दस्य वनप्रतिषेधार्थत्वात् । पक्षे, अवनं-रक्षकमभूत् । कथमिति विरोधे । किम्भूतं तव वपुर्वनं च ? सरलाः-अकुटिलाः प्रिया यस्य तत्, तथा गुणैः-शौर्यधैर्यादिभिराढ्यं-समृद्धं, तथा लम्बिता-लम्बायमानी कृता माला-स्रक् यस्य तत् । तथा विचित्राणि-विविधानि तिलकानि-विशेषका यस्य तत् तथाविधं च । वनपथे-सरलाश्च-देवदारवः प्रियङ्गवश्च-फलिनीलतास्ततः समाहारद्वन्द्वे सरलप्रियंगु तेन आढ्यं, तथा लम्बिनः-प्रलम्बास्तमाला यत्र तत्, तथा विशिष्टाश्चित्राः-चित्रका यास्तिलकाश्च-वृक्षविशेषा यत्र तत् तथाविधं च ॥ १५ ॥

**अपि च**-पुनः

**वरसहकारकरञ्जकवीरतरोऽशोकमदनपुंनाग[१] ।**
**विविधद्रुममय राजन् ! कथमसि न बिभीतकः क्वापि ॥ १६ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अपि च –

**वरे**ति । आर्यावृत्तम् । हे वरसहकारक ! वराः सहकारकाः-सचिवादयो यस्य स तस्य सम्बुद्धौ हे वरसहकारक !, तथा रञ्जयतीति रञ्जकस्तत्सम्बुद्धौ हे रञ्जक ! तथा वीराणां-सुभटानामिव तरः-बलं यस्येति तत्सम्बुद्धौ हे वीरतर ! सम्बुद्धौ न दीर्घः । तथा न विद्यते शोकः-शोचनं यस्य स तत्सम्बुद्धौ हे अशोक !, एतेन धीरत्वोक्तिः । तथा मदन इव रूपेण काम इव यः स तत्सम्बुद्धौ हे मदन !, तथा हे पुन्नाग !-पुरुषश्रेष्ठ ! नागशब्दः प्रशंसायाम् । हे विविधद्रुममयराजन् ! कथं क्वापि न बिभीतकः कलिर्नासि, यो हि विविधद्रुममयो भवति स बिभीतकोऽपि स्यात्, त्वं च तथा नाऽसि । प्रकृते तु विशेषेण भीतो विभीतको भीरुर्नाऽसि । कुत्सायामनुकम्पायां वा कः । विविधद्रुममयेति पदाद् द्रुमार्थोप्यभ्यूह्यस्तथा[१] सहकारश्च-आम्रः, करञ्जः-नक्तमालः वीरुतरुः-नदीसर्जः । तथा **चामरसिंहः-"नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः** [२।४।४५] । अशोकः-कङ्केल्लिः, मदनः-शल्यः यत्फलं विवाहे वधूवरपाणौ बध्यते । पुन्नागः-सुरपर्णिका इति विविधद्रुममयत्वं । कथमिति विरोधे ॥ १६ ॥

**अपि च**-पुनः

**बाणकरवीरदमनकशतपत्रकबन्धुजीवकसुजाते ।**
**नृप विविधविटपि[१]रूपस्तथापि विटपः कथं नासि ॥ १७ ॥**

**बाणेति** । आर्यावृत्तम् । बाणः करवीरो दमनकः शतपत्रकं बन्धुजीवकं जातिश्चेति विटपिनः सम्बोधनपदे योज्याः । हे नृप !-राजन् ! असि त्वं विविधविटपिरूपः-विचित्रतरुमयः शब्दतो नार्थतः, अर्थतस्तु बाणाः-शराः करे यस्य तत्सम्बुद्धौ हे बाणकर ! तथा वीरान् दमयतीति वीरदमनस्तत्सम्बुद्धौ हे वीरदमनक ! तथा शतसंख्यं पत्रं-वाहनं यस्य स तत्सम्बुद्धौ हे शतपत्रक !, **"शेषाद्वा"** [पा० सू० ५।४।१५४] इति कः । तथा बन्धून्-स्वजनान् जीवयसि-उपकरोषीति बन्धुजीवकस्तत्सम्बुद्धौ हे बन्धुजीवक ! तथा शोभना जातिः-क्षत्राख्या यस्य तत्सम्बुद्धौ हे सुजाते !, तथापि विटपः-शाखा कथं न ? यो हि विविधविटपिरूपो भवति स कथं न विटपः स्यात् । प्रकृते तु त्वं न विटपः-षिड्गः । यद्वा न विटान्-पासीति विटपः, अपात्रभर्त्ता नेत्यर्थः । असीत्यव्ययं त्वमित्यर्थे । कथमिति विरोधोद्भावने । **"विटपः पल्लवे स्तम्बे विस्तारे षिङ्गशाखयोः ।"** इत्यनेकार्थः [३।४७५]। विस्तारोऽर्थाद् वृक्षस्य । ॥ १७ ॥

---

१. तद्यथा अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**राजा[१] तु तदाकर्ण्य सविस्मयम् 'अहो अस्य धैर्यं मनुष्यसन्निधौ[२], आश्चर्यं रूपे, माधुर्यं वाचि, प्राचुर्यं प्रज्ञायाम्, औदार्यमर्थे, गाम्भीर्यं वर्णव्यक्तौ । प्रायेणाहारमैथुननिद्राभयभ्रमणमात्रविवेकासु कथं प्रागल्भ्यमेतत्पक्षिजातिषु । तदेष विहङ्गव्यञ्जनः[३] कोऽपि कामचारी भविष्यति ॥ सर्वथा मनसापि नावज्ञेयाः सर्वे[४] प्राणिनः । [५]यतः कामतः कर्मतः शापतो वा[६] संछन्नरूपाण्यपि[७] भ्रमन्ति विविधाश्चर्यभाञ्जि भूतानि[८] इति चिन्तयन्नुचितज्ञस्तमीषदुल्लसितसिन्दुवारमञ्जरीभिरिव कुन्दकान्तदन्त[९]दीप्तिभिरर्चयन्स्वागतमपृच्छत् ।**

**राजा** तु नलस्तद्भङ्गश्लेषोक्तिरूपं वाक्यं सविस्मयं-साश्चर्यं यथा स्यात्तथा आकर्ण्य-श्रुत्वा इति चिन्तयन्[१] तं-हंसं स्वागतं सुखागमनवार्त्तां अपृच्छत्-पप्रच्छ । इतीति किम् ? अहो इति विस्मये, अस्य-हंसस्य मनुष्यसन्निधौ-पुरुषसविधेऽपि धैर्यं-धीरता । अहो इति अग्रेऽपि योज्यम् । तथा अस्य रूपे-आकृतौ आश्चर्यं-अद्भुतत्वं । तथा वाचि-वाण्यां माधुर्यं-मधुरता । तथा प्रज्ञायां-बुद्धौ प्राचुर्यं-प्रचुरता । तथा अस्य अर्थे-व्याख्यायां औदार्यं-उदारता। तथा अस्य वर्णव्यक्तौ-अक्षरविवेचने गाम्भीर्यं-गम्भीरता, अर्थद्वयात्मकत्वात् । प्रायेण-बाहुल्येन आहारः-भक्षणं मैथुनं-कामकेलिर्निद्रा-स्वापः भयं-परस्माद्भीतिर्भ्रमणं-इतस्ततः पर्यटनं तन्मात्र एव-तस्मिन्नेव विवेकः-चातुर्यं यासां तास्तथाविधासु पक्षिजातिषु, कथमेतत् प्रागल्भ्यं-धाष्टर्यम् ? तत्तस्माद्धेतोः एष-कोऽपि विहङ्गेन-पक्षिरूपेण बाह्याकृत्या व्यज्यते-ज्ञायत इति विहङ्गव्यञ्जनः-विहङ्गलक्ष्मा कामचारी-विद्याधरादिभिर्भविष्यति । **"व्यञ्जनं श्मश्रुचिह्नयोः । तेमनेऽवयवे कादौ" इत्यनेकार्थः** [३।४३८] । सर्वथा-सर्वप्रकारेण मनसाऽपि प्राणिनः-जन्तवो नावज्ञेया-न अवगणनीया । यतो यस्माद्धेतौः भूतानि-प्राणिनः कामतः-स्वेच्छया, तथा कर्मतः-कार्यात्, तथा शापतो वा ऋषीणां शापात्, सञ्छन्नरूपाणि-आवृतप्रकृत्याकाराणि विविधानि आश्चर्याणि भजन्तीति, तादृंशि भ्रमन्ति । एभिः-कामादिभिः कारणैः स्वीयं रूपं परित्यज्य अन्यरूपेण प्राणिनः पर्यटन्तीति । किम्भूतो राजा ? उचितं-योग्यं यस्मिन् समये यद्विधेयं तज्जानातीति उचितज्ञः। पुनः कुन्दः-पुष्पविशेषस्तद्वत् कान्ता-उज्ज्वला या दन्तदीप्तयः-दशनच्छवयस्ताभिरर्चयन्-पूजयन् । उत्प्रेक्ष्यते-ताभिः काभिरिव ? ईषन्-मनाक् उल्लसिताः-विकसिताः सिन्दुवारस्य-निर्गुण्ड्या मञ्जर्यस्ताभिरिव । अन्योऽपि उचितज्ञ

---

१. चिन्तयन् विचारयन् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आगतमतिथिं सिन्दुवारमञ्जरीभिरर्चयति, तथा राजा हंसं दन्तकान्तिभिरेव सिन्दुवार-मञ्जरीभिरपूजयत् । दन्तकान्तिस्तच्छरीरे संक्रान्तेत्यर्थः ।

**असावपि प्रणयप्रणतशिराः शुचिरोचिषां चयेन पाण्डुपुष्पप्रकरेण[१] प्रतिपूजयन्निव 'देव, भवदवलोकनेनाह्लादितमनसो ममाद्य स्वागतम्' इति ब्रुवाणो राजानं रञ्जयाञ्चकार ।**

**असाव**पि-हंसः प्रणयेन-स्नेहेन प्रणतं-नम्रं शिरो यस्याऽसौ, ईदृशः शुचिरोचिषां-निर्मलकान्तीनां यश्चयः-समूहस्तद्रूपेण पाण्डुः-धवलो यः पुष्पप्रकरः-विकीर्णकुसुमानि तेन प्रतिपूजयन्निव-प्रत्यर्चयन्निव राजानं-नलं रञ्जयाञ्चकार-साह्लादमकरोत् । किं कुर्वाणः ? हे देव ! भवद्दर्शनेन-त्वदालोकनेन आह्लादितं-हृष्टं मनो यस्य स तस्य, मम अद्य स्वागतं-शोभनमागतं आयातं यद्भवान् दृष्ट इति ब्रुवाणः-वदन् ।

**अत्रान्तरे त्रासतरलतारक[२]मकाण्डाडम्बरितबाष्पप्लवप्लवमानमिव वहन्ती चक्षुः, उत्क्षिप्तपक्षपत्रपल्लवव्याजेन[३] संगृहीते सहचरे शाखोद्धार-मिव दर्शयन्ती, हंसी दूरादवनिपालमवाप्य रूप्यमयघण्टा[४]टंकारकोमलया गिरा श्लोकद्वयमपठत् ।**

**अत्रान्त**रे-अस्मिन्नवसरे हंसी दूराद्-विप्रकृष्टदेशात् अवनिपालं-नृपमवाप्य रूप्यमयी या घण्टा तस्या यष्टङ्कारस्तद्वत्कोमलया-सुकुमारया गिरा-वाण्या श्लोकद्वयमपठत्। किम्भूता ? ईदृशं चक्षुर्वहन्ती-धारयन्ती । किम्भूतम् ? त्रासेन-भयेन तरला तारका-कनीनिका यस्मिंस्तत् । उत्प्रेक्ष्यते–अकाण्डे-असमये आडम्बरितः-आरब्धो यो बाष्पप्लवः-अश्रुप्रवाहस्तस्मिन् प्लवमानमिव-मज्जदिव, अनेन अश्रुबाहुल्योक्तिः । पुनः किं कुर्वन्ती ? सहचरे-सहाये हंसे संगृहीते-राज्ञा कररुद्धे कृति सति पक्षौ च-पक्षती पत्राणि च-पिच्छानि तान्येव कोमलत्वात् पल्लवाः पक्षपत्रपल्लवा उत्क्षिप्ता-ऊर्ध्वीकृता ये पक्षपत्रपल्लवास्तेषां व्याजेन-मिषेण शाखोद्धारं-अन्यायपूत्कारचिह्नं शाखाग्रहणमिव दर्शयन्ती। अन्यस्याऽपि कस्यचित् केनचित् किञ्चिदपराधं भवति सोऽपि तदन्यायपूत्कारचिह्नं शाखाग्रहणं राज्ञः पुरो दर्शयति, तथेयमपि हंसी पक्षती उच्चैर्विधाय मन्ये शाखोद्धारमेव दर्शयतीति । अयं भावो हे देव ! त्वया मत्पतिग्रहणान्महानन्यायः क्रियते, इत्युत्क्षिप्तपक्षाभ्यां ज्ञाप्यत इति ।

श्लोकद्वयमेवाह–

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एकान्ते सेवते योगं मुक्ताहारपरिच्छदः ।**
**हंसः समोक्षयोग्योऽपि देव ! किं वध्यते त्वया[१] ॥ १८ ॥**

**नीरञ्जनपदे तिष्ठन्विश्वसंसारसङ्गतः ।**
**हंसः किं बध्यते क्वापि यस्य नालम्बनं प्रियम् ॥ १९ ॥**

**अन्यच्च ।**

**एकान्त** इति । अस्य-विष्णोरपत्यं इः-इरिव, इः-कन्दर्पप्रतिमस्तत्सम्बुद्धौ हे ए ! इति-हे देव ! इति च उपच्छन्दयितुं सम्बोध्य मुमोचयिषुः पतिं हंसी नृपमाह—हे ए !-हे देव ! मुक्ताहारः-मौक्तिकहारस्तद्वत् परिच्छदः-पक्षती यस्य शुभ्रत्वात् तथोक्तः । तथा कस्य-जलस्य अन्ते-अवसाने वर्तमानं अगं-द्रुमं यः सेवते । तथा मोक्षस्य-मोचनस्य योग्योऽपि-उचितोऽपि स हंसः-पक्षी त्वया किं-किमर्थं बध्यते, इत्येकधार्थः । अथवा, एकान्त इति समस्तं विजनार्थः, अथ च हंसः-आत्मा पुरुषः । हे देव ! स हंस आत्मा मोक्षयोग्योऽपि-निर्वाणार्होऽपि किं बध्यते ? न बध्यत एवेत्यर्थः । कया ? त्वया । त्वशब्दः सर्वनामगणमध्ये अन्यार्थः । अतः पुरुषापेक्षया अन्यया प्रकृत्येत्यर्थः । कस्मान्न बध्यते ? इत्याह—य एकान्ते-विजने, यद्वा, अः-कृष्णस्तस्मिन् एकान्ते-कमनीये परमानन्दस्वरूपे त्यक्ताहारपरिवारः सन् योगं-अध्यात्मं ध्यानं समाधिमिति यावत् सेवते । अत्र पक्षे, अ इत्यस्माद् विष्णुवाचकात् सप्तम्येकवचने ए इति रूपम् । यदि वा स मोक्षयोग्योऽपीति समः-समदर्शनः शत्रुमित्रसमानदृष्टिः रागद्वेषाकरणात् । तथा अक्षयोग्योऽपि इन्द्रिय-सम्बद्धोऽपि ॥१८॥

**नीरमिति** । जनानां पदे-स्थाने पुरग्रामादौ अतिष्ठन्-अवसन् यः सरस इदं सारसं, तथा श्वसन्तीति श्वसाः, वयः-पक्षिणः, श्वसाः-प्राणिनो यत्र तत्तथाभूतं नीरं-जलं गतः स हंसः किं क्वापि बध्यते ? अपि तु न बध्यत एव । स इति कः ? यस्य-हंसस्य नालं-तृणसम्बन्धि वनं-काननं प्रियं-अभीष्टम् । नलस्येदमितीदमर्थे अण् । अथ च अध्यात्म-पक्षे—नीरञ्जनपदे-नीरागपदे, तिष्ठन् हंसः-आत्मा किं क्वापि बध्यते ? न बध्यत एव । यस्य विश्वेभ्यः-समस्तेभ्यः संसारसङ्गेभ्य आलम्बनं-आसक्तिर्न प्रियम् । विश्वसंसारसङ्गतः इति **"पञ्चम्यास्तसिल्"** [पा० सू० ५।३।७] । यद्वा, यस्य विश्वेषु संसारसङ्गेषु आलम्बनं-आसक्तिर्न प्रियं, तत्पक्षे **"सार्वविभक्तिकस्तस्"** [ ] ॥ १९ ॥

**अन्यच्च**-पुनरपि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**राजन् ! जलपक्षिणो मुनय इव ये मीनाहारं वाञ्छन्ति, बहुधावन-व्यसनिनो विसाधारा:[१] । तदलमाग्रहेण[२] ।**

**हे राजन्** ! जलपक्षिणो मुनय इव-यतय इव मीनः-मत्स्यस्तस्याहारं वाञ्छन्ति-ईहन्ते। तथा बहुधा वने-अतिशायिभ्रमणे व्यसनं-आसक्तिर्विद्यते येषां ते बहुधावन-व्यसनिनः। तथा विसं-पद्मिनीनालं आधारः जीवनं येषां ते विसाधारास्ते, [मुनिपक्षे—अमी मुनयो न आहारं वाञ्छन्ति तथा बहुधा-अनेकधा वनव्यसनिनो वनस्थाः, तथा व्यपेतः साधारः, अन्यलोकसाधारणस्तिथिपर्वोत्सवादिर्येभ्यः] । लोकोत्तरवृत्तत्वात् । **विसादना** इति तु **पाठे** विसं अदनं येषां ते, पक्षे विगतं सादनं-पीडनं येभ्यस्ते अपीड्यकरा इत्यर्थः । यत एव तत्तस्माद्धेतोः आग्रहेण-ग्रहणहठेन अलमिति वारणे अव्ययं, मा गृहाणेत्यर्थः ।

**राजा तु तेन तस्याः श्लेषश्लाघिना श्लोकोक्ति[३]रसेनाह्लाद्यमानो नर्मालापलीलया तां बभाषे ।**

**राजा तु**-नलस्तस्या हंस्यास्तेन श्लेषश्लाघिना-श्लेषप्रकाशनशीलेन एतेन एकान्त इत्यादि वचसां श्लिष्टार्थत्वमुक्तं, श्लोकोक्तीनां यो रसः-माधुर्यं तेन श्लोकोक्तिरसेन आह्लाद्यमानः-आनन्द्यमानः नर्मालापानां-परिहासपूर्वकमधुरवाक्यानां यो लीलाविलासस्तया तां-हंसी प्रति बभाषे।

**अनेकधा यः किल पक्षपातं सदा सदम्भोजगतः करोति ।**
**स हंसिकेदारविहारशीलो न बध्यते किं बहुनाशकुन्तः ॥ २० ॥**

**किं चान्यदपि श्रूयतां बन्धस्य कारणम् ।**

**अनेकधेति** । उपेन्द्रवज्रावृत्तम् । हे हंसिके ! यः सदा जगतोऽपि-सर्वस्यापि सदम्भः-दाम्भिकः, तथा अनेकधा उक्तोऽपि प्रणतिप्रत्युपकारादिना पक्षपातं-ममत्वं करोति। तथा दारेषु-परस्त्रीषु विहारशीलः-क्रीडापर अब्रह्मचारी, तथा बहून् नाशयत्येवं विधः कुन्तो यस्येति हिंसापापरतः स कथं न बध्यते संसारकारायामिति शेषः । इति हंसीप्रतिवचनौचित्ये समपक्षे व्याख्या । यद्वा, यो दाम्भिकः सदा जगतोऽपि पक्षस्य-मित्रवर्गस्य पातं-नाशं करोति । तथा जगतोऽपि दारेषु क्रीडापरः, तथा बहुघातकुन्तास्त्रः स महाऽपराधी वध्यत एव । नर्म्मणैव हंसीवचसोऽन्यथात्वं, तत्त्वतस्तु प्रामाण्यं, तद्यथा-हे हंसि । [किम्बहुना] अन्य किं बहूक्तेन सदम्भोजं-सत्पद्मं गतः-प्राप्तः सन् यः पक्षति पातं करोति, तथा केदारविहारं-क्षेत्रेषु सञ्चरणं शीलयति-निषेवते यः स केदारविहारशीलः स

[ ] कोष्ठकान्तरतियाढो अन्यप्रतिषु नास्ति, केनजं अनू. प्रतावेना ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शकुन्तः-पक्षी न बध्यते, किं तर्हि मुच्यत एव । तस्माद्युक्तमुक्तं त्वयेति वास्तवोऽर्थः । एवं मुत्तरत्रापि ॥२०॥

**किञ्चान्यदपि,** हे हंसिके ! बन्धस्य कारणं श्रूयताम्–

अपरपरिभोगप्रतिपादनेर्ष्यया उत्कृष्टदोषदर्शनेन च हंसं प्रति हंसी कलहयन्नाह–

**अस्ति मत्परिग्रहे मृणालिकानामवननायिका, सापरागस्थगितमुखकमलापि बलादनेन विनाशिता, विनिपत्योपरि जर्जरिता नखैः खण्डितमधरदलम्, दलितमलिकालकमण्डनम्, अपनीतः सुकुमारभावः ।**

**किं वापीवरेणानेन न कृतम् ।**

**तदेष यावन्मध्यं बहुधापाञ्जरन्नावगाहते तावन्मे कुतः संतोषः । न च नदीक्षिते द्विजन्मनि निगृहीतेऽपि[1] गरीयः पातकमस्ति ।**

चकारः पराभिप्रायाक्षेपपूर्वके विशेषे एवं नामाऽसौ दुरात्मा निर्मर्यादो निशङ्कश्च तेन आसतां लोकदाराः, ममाऽपि राज्ञः परिग्रहे-स्वीकारे मृणालिकानां-पद्मिनीनामवने-रक्षणे नायिका-स्वामिनी सा, ततो अपरागाद्-रागाभावात् स्थगितं-संवृतं मुखकमलं-वक्त्राब्जं यया सा, ईदृश्यपि बलात्-बलात्कारेण अनेन-त्वद्भर्त्रा विनाशिता । विनाशोऽत्र शीलखण्डनं, कथं विनाशितेति ? तदेवाह-

**विनिपत्येति** । उपरि विनिपत्य-संस्थायेयं नखैर्जर्जरिता, तथा अस्या अधरदलं-ओष्ठपल्लवः खण्डितं-सक्षतं कृतं, तथा अस्या अलिकं-ललाटं तस्य, तथा अलकानां च-केशानां मण्डनं-तिलकपुष्पादि दलितं-लुप्तं, तथा अस्याः सुष्ठु, कुमारभावः अर्थात् कन्यात्वं अपनीतः-उदस्तः । वा-अथवा अनेन पीवरेण-स्थूलेन किं न कृतं ? अपितु पूर्वोक्तं सर्वं कृतमेव । तदित्युपसंहारे तस्माद्दोषोऽपराधी पञ्जरस्य बन्धनोपकरणस्येदं पाञ्जरं मध्यं बहुधा-अनेकप्रकारेण यावन्नावगाहते-नाध्यास्ते मे-मम तावत् कुतः सन्तोषः ? अथाऽयं द्विजन्मत्वादनिग्राह्यः ? इत्यत आह–न चेति । द्वाभ्यां सकाशाज्जन्म यस्य स द्विजन्मा, न द्विजन्मा अद्विजन्मा तथोक्तेः अर्थात् त्रिजाते निगृहीतेऽपि-अपरुद्धेऽपि गरीयः-गरिष्ठं पातकं न च नैवास्ति । तस्मिन् कीदृशे ? 'न दीक्षिते' दीक्षा-शौचादिमतपरिग्रहः सा सञ्जाताऽस्येति दीक्षितस्तस्मिन् । एतेन लिङ्गी त्रिजातोप्यवध्य एव । अपिः-समुच्चयार्थो भिन्नक्रमः, स च द्विजन्मनीत्यनेन संयोज्यः । तद्यथा, दीक्षिते-व्रतिनि द्विजन्मनि च ब्राह्मणे निगृहीते पातकं न इति-न च पातकमेवेत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वास्तवे तु, मत्परिग्रहे मृणालिना पद्मिनी नामेति सम्बोधने, वनस्य नायिकेव मुख्यत्वात्, वर्तते सा मृणालिका परागः-मकरन्दस्तेन छन्नमुखानि कमलानि यस्याः सा, ईदृशी बलादपि अनेन विना-पक्षिणा अशिता-भक्षिता । "**अशेर्भोजनार्थत्वात् कर्मणि क्तः**" [ ] । तथा उपरि विनिपत्य नखैर्जजरिता, तथा अस्या अधरदलं-अधःपत्रं खण्डितं, तथा अस्या अलय एव-भृङ्गा एव कालं-कृष्णं, कस्य-शिरस उपरिभागस्य मण्डनं दलितं-लुप्तं, एतदागमने तेषामुड्डयनात् । तथा अपनीतः सुकुमारभावः-मृदुभावः नखैर्जर्जरितत्वात् । अनेन-हंसेन वाप्यां वरेण-प्रधानेन मण्डनत्वात्, किं न कृतं ? अपितु पूर्वोक्तं सर्वं कृतमेव । तत्तस्माद्धेतोरेष त्वत्पतिरपां-जलानां मध्यं जरन् यावत् वार्द्धकावधि बहुधा नावगाहते-न सेवते, तावन्मे कुतः सन्तोषः ? । तथा नद्यां क्षिते-उषिते द्विजन्मनि-विहङ्गे नितरां गृहीतेऽपि-स्नेहात्स्वीकृतेऽपि गरीयः-अत्यर्थं न च पातकमस्ति, श्रेय एवास्तीत्यर्थः । गरीय इति क्रियाविशेषणं । अपिः विरोधोद्भावने । यदा निगृह्यते तदा पातकं कथं न भवेत् ? अपितु भवत्येव । गृहीतशब्दस्य दण्डितार्थत्वात् ।

**अयि मुग्धे कलहंसिके[१], त्वं पुनः मानसङ्गतापि विमाननां सहसे[२], विपरीतः खल्वेषः । यतः सद्वंशकान्तारागविमुखो मधुपश्रेणिश्रयणीयां [३]सुराजीविनीं कान्तां कामयते । तदलमनेन । गच्छ वत्से, यथाप्रियम्' इत्यभिहितवति वसुन्धरेश्वरे[४] ।**

**सापि सपरिहासं हंसी 'हंहो ! विहङ्गभुजङ्ग, मृणालिकां तामरसान्तरसानुरागरञ्जितमनाः कामयसे किं वा पीनदेहे नीरसेवके त्वयि न संभाव्यते' इत्याकलितकलहं कलहंसमवादीत् ।**

**अयी**ति प्रश्ने अनुनये वा । हे मुग्धे ! कलहंसिके ! त्वं मानेन-पूजया संगताऽपि विमाननां-अवगणनां सहसे ? पक्षे, मानसं सरो गता-प्राप्ता । तथा विषु-पक्षिषु माननां-पूजां सहसे । यतः—यस्मात्कारणात् विपरीतः-विरुद्धवृत्तः खलु-निश्चितमेष-हंसः । पक्षे, विभिः-पक्षिभिः परीतः-परिवृतः, कादम्बकदम्बकेश्वरत्वात् । तथा सद्वंशस्य-सदन्वयस्य याः कान्तास्तासु यो रागः-अनुरागस्तस्मात्पराङ्मुखः, तथा मधुपश्रेणिभिः-मद्यपंक्तिभिः श्रयणीयां-सेव्यां सुरया जीवति या सा तां-कान्तां कामयते-इच्छति । पक्षे, शोभना वंशा मस्करो येषु, ईदृशानि यानि कान्ताराणि-विपिनानि तेषु ये अगाः-वृक्षास्तेभ्यो विमुखः, मधुपश्रेणिश्रयणीयां-भृङ्गपंक्तिश्रितां सुष्ठु-शोभनां राजीविनीं-नलिनीं कान्तां-कमनीयां कामयते । तत्-तस्माद्धेतोः अनेन हंसेन अलं-सृतम् । हे वत्से !-हंसि ! यथाप्रियं गच्छ

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रियस्यानतिक्रमेण यथाप्रियं प्रियः-भर्त्रा इष्टप्रदेशश्च । वसुन्धरेश्वरे-नृपे इति अभिहितवति-इत्युक्तवति सति ।

**साऽपि** हंसी सपरिहासं-सस्मितं यथा स्यात्तथा इत्युक्तप्रकारेण आकलितः-मनसावधारितः कलहः-परस्परं राटिर्यस्मिन् कर्मणि तद्यथास्यात्तथा कलहंसमवादीत् । हं हो! इति प्रश्नपूर्वामन्त्रणे, हे विहङ्ग !-हंस ! भुजङ्गविलासिन् ! तां-राजनिवेदितां मृणालिकां-पद्मिनीपालननायिकां अरसां-निःस्नेहां तरसा-बलेन नु-किं रागेण-स्वासक्त्या रञ्जितं-हृष्टं मनो यस्याऽसौ, ईदृशः सन् कामयसे-इच्छसि ? नुः-किमर्थे । न चाऽयं विलासिधर्मः । वस्तुतस्तु-हं हो ! हंस ! मृणालिकां-पद्मिनीं रञ्जितमना-रञ्जितचित्तः कामयसे । हे तामरसान्तरसानुराग ! तामरसान्ते-अम्भोजे यो रसः-निर्यासस्तत्र अनुरागो यस्येति सम्बोधनम् । अन्तशब्दः स्वरूपार्थः । यद्वा, तामरसस्य अन्तरे-मध्ये सानुरागेति सम्बोधनम् । वा-अथवा पीनदेहे-स्थूलाङ्गे नीरसे-निःस्नेहे निर्वीर्ये वा बके-बकप्राये त्वयि किं न सम्भाव्यते ? अपितु सर्वं नृपोक्तं सम्भाव्यत एव । पक्षे, त्वयि किम्भूते ? वाप्यश्च-नदीश्च तेष्वीहा-वाञ्छा यस्य स तस्मिन्, तथा नीलं-जलं सेवते यः स तस्मिन्, किं न सम्भाव्यते, इति सम्भावना । अत्र प्रशंसाविषया एकमेव हि वाक्यं प्रकरणादौचित्याच्च प्रशंसां निन्दां च प्रतिपादयति । तथा त्वमस्माकं किं किं न करिष्यसीति प्रसन्नेनोक्तं प्रशंसां गमयति, दुष्टेन च निन्दाम् ।

**सोऽपि वैदग्ध्यधुरंधर[1], धूर्तालापपण्डित, प्रज्ञाप्राग्भारगुरो, चातुर्याचार्य, मा मे प्रियां प्रकोपय । सदृशा एव यूयं वयं च राजहंसाः । सरसां श्रियमनुभवामः । नदीनां पात्रेषु स्थितिं[2] कुर्मः । न चरणचर्यायां न श्लाघ्यामहे[3]। तत्सपक्षेषु विपक्षो माभूः ।**

अथ **सोऽपि**-हंसः इति वक्ष्यमाणं राजानं-नलमवादीत् । इतीति किम् ? वैदग्ध्येन-चातुर्येण धुरन्धरः-सर्वेषां मध्ये मुख्यस्तस्य सम्बुद्धौ हे वैदग्ध्यधुरन्धर ! तथा धूर्तानां-चस्तरीवाक्यवक्तृणामालापेषु-वाक्येषु पण्डितो धूर्तालापपण्डितस्तस्य सम्बुद्धौ हे धूर्तालापपण्डित !, अन्यथा एतादृशानां वाक्यानां कुत उल्लापः । तथा प्रज्ञाप्राग्भारेण-बुद्धिबाहुल्येन गुरुः-गरिष्ठो बृहस्पतिप्रतिभो वा तस्य सम्बुद्धौ हे प्रज्ञाप्राग्भारगुरो !, तथा हे चातुर्याचार्य !-चातुर्यशिक्षक ! हे नृप ! मे-मम मा प्रियां-हंसीं प्रकोपय-सेर्ष्यां कुरु । यतो यूयं वयं च सदृशा एव-समाना एव राजहंसाः-राजमुख्याः । पक्षे, लोहितैश्चञ्चुचरणैर्युक्ता हंसाः-राजहंसाः । तथा यूयं सरसां-जनानुरागकरीं श्रियं-राज्यलक्ष्मीमनुभवथ, तथा पात्रेषु-

धर्मपात्रादिषु दीनां स्थितिं-व्यवस्थानं न कुरुथ, औदार्यं भजथेत्यर्थः । तथा रणचर्यायां-रणविधौ न न श्लाघ्यध्वे ? अपितु श्लाघ्यध्व एव । चः-समुच्चये । वयं च सरसां-तडागानां श्रियमनुभवामः, तथा नदीनां-सरितां पात्रेषु-कूलमध्येषु स्थितिं-अवस्थानं कुर्मः । **"पात्रं तु कूलयोर्मध्ये पर्णे नृपतिमन्त्रिणि ।"** इत्यनेका**र्थः** [२।४४९] । तथा चरणं चर्या-गतिविशेषस्तस्यां न न श्लाघ्यामहे लोकैरिति शेषः, अपितु श्लाघ्यामह एव । तत्-तस्मादुक्तप्रकारेण सपक्षेषु-समानपक्षेषु । पक्षे, पक्षिति सहितेषु अस्मासु विपक्षः-विरुद्धपक्षो मा भूः ।

अत्रास्माभिरर्थवशाद् विभक्तिपरिणामं विधाय व्याख्या व्यधायि । सूत्रकृता तु युष्मदस्मदोर्युगपद्योगे अव्यवधानाच्च पुरुषविशेष इति वचनादस्मत्प्रयोग एवोक्त इति ।

**एषा मे हृदयं जीव उच्छ्वासः प्राण एव च ।**
**संसारसुखसर्वस्वं प्राणिनां हि प्रियो जनः[१]॥ २१ ॥**

**एषे**ति । अनुष्टुप् । एषा-एषैव मे-मम हृदयं-मनः अभिन्नभावत्वात्, तथा जीवः-जीवितं तत्सद्भावे जीवनात्, तथा उच्छ्वासः-श्वासरोधकचिन्तादिदुःखभरापगमहेतुत्वात्, तथा प्राणः-प्रधानभूतो वायुः देहाधारत्वात्, प्राणो बलमपि । यत्**प्रशस्तपादः-"प्राणोऽन्तः शरीरे रसमलधातूनां प्रेरणादिहेतु**रिति [ ] । हिः-यस्मात्कारणात् प्राणिनां प्रियः-जनो वल्लभो लोकः संसारसुखस्य सर्वस्वं-सर्वधनं, एतस्मादधिकं संसारसुखं न किञ्चिदस्तीत्यर्थः ॥२१॥

तथा—

**रूपसंपन्नमग्राम्यं प्रेमप्रायं प्रियंवदम्[२] ।**
**कुलीनमनुकूलं च कलत्रं कुत्र लभ्यते ॥ २२ ॥**

**रूपे**ति । श्लोकः । ईदृशं कलत्रं-स्त्री केन लभ्यते अपिरत्रानुक्तोप्यर्थाद् ग्राह्यस्तेन केनाऽपि भाग्यवता जनेन प्राप्यते, न तु येन केनचिदित्यर्थः । किम्भूतम् ? रूपसम्पन्नं-रूपसम्पदुपेतं, तथा अग्राम्यं-अप्राकृतं, तथा प्रेम्णा प्रायं-सदृशं प्रेमप्रायं-समस्नेहमित्यर्थः । यादृग् ममैतस्या उपरि स्नेहस्तादृगेतस्या अपि ममोपरीति । यद्वा, प्रेम्णः-स्नेहस्य प्रायः-बाहुल्यं विद्यते यस्मिंस्तत्स्नेहलमित्यर्थः । **"प्रायो वयस्यनशने मृतौ बाहुल्यतुल्ययोः ।"** इत्य**नेकार्थः** [२।३७४] । तथा प्रियम्वदं-मधुरवादि, तथा कुलीनं-सत्कुलोत्पन्नं, तथा अनुकूलं-अनुगामि ॥ २२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तदलमलीककलहारम्भेण भवानप्येवं विधो[१] प्रेमप्रपञ्चनाटक-नायको नातिचिरादेव यथा भवति तथा कमप्युपकारं करिष्यामि' इति राजानमवादीत्।**

**तत्**-तस्माद्धेतोः अलीकः-अन्योक्तिकथनरूपो यः कलहारम्भस्तेन अलं-अलीककलहारम्भं मा कुर्वित्यर्थः। भवानप्येवं विधो यथा वयोर्दम्पत्योस्तथाविधो यः प्रेमप्रपञ्चः-स्नेहविस्तारः स एव नाटकं तस्य नायकः शिक्षयिता नातिचिरादेव-स्वल्पेनैव कालेन यथाभवति "**वर्तमानसामीप्ये वर्तमानवद्वा**" [पा० सू० ३।३।१३१] इति वचनाद्भविष्यति लट् भविष्यति। तथा कमपि अभीष्टं उपकारं करिष्यामि। काञ्चन राजपुत्रीं भवता सह संयोजयिष्यामीति भावः, इत्युवाच।

**अत्रान्तरेऽन्तरिक्षमण्डलादतिस्पष्टवर्णव्यक्तिमनोहारिणी[२] वाग्श्रूयते[३]।**

**अत्रान्तरे**-अस्मिन्नवसरे अन्तरिक्षमण्डलात्-आकाशादतिस्पष्टातिशयेन व्यक्ता या वर्णव्यक्तिः-अक्षरविवेचनं तया मनोहारिणी-मनोज्ञा वाक् श्रूयते। तथाहि-

**राजन्! राजीवपत्राक्ष! क्षिप्रं हंसो विमुच्यताम्।**
**भविष्यत्येष ते दूतो दमयन्त्याः प्रलोभने ॥ २३ ॥**

**राजन्निति**। श्लोकः। हे राजन्! राजीवपत्रवद्विशाले अक्षिणी यस्य स राजीवपत्राक्षस्तस्य सम्बुद्धौ हे राजीवपत्राक्ष! अयं-हंसः क्षिप्रं विमुच्यताम्। यस्मादेष-हंसो दमयन्त्याः प्रलोभने-त्वयि सरागीकरणे ते-तव दूतो भविष्यति। असौ दमयन्तीं त्वयि विषये रागिणीं करिष्यतीति भावः ॥ २३ ॥

**राजा तु तेन तस्याः[४] सोष्मबलातैलपूरेणेवाङ्गमुत्पुलकयता, कर्णान्तरमवतीर्णेन, दमयन्तीति नाम्ना कोमलतैत्तिर[५]पिच्छस्पर्श-सुखमिवानुभवन्मनाङ्मीलिताक्ष[६]श्चिन्तयांचकार।**

**राजा तु**-नलस्तस्याः-नभोवाण्याः सकाशात् कर्णान्तरं-कर्णमध्यमवतीर्णेन-प्राप्तेन तेन दमयन्तीति नाम्ना तित्तिरेरिदं तैत्तिरं कोमलं-मृदु यत्तैत्तिरं-तित्तिरिसम्बन्धि पिच्छं-पत्रं तस्य स्पर्शे-वपुषाश्लेषे यत्सुखं तदनुभवन्निव-आस्वादयन्निव मनाक्-स्तोकं मीलिते-संकोचिते अक्षिणी येन स ईदृशः सन् चिन्तयाञ्चकार-चिन्तितवान्। किम्भूतेन दमयन्तीति नाम्ना? सोष्म-औष्ण्यसहितं यत् बला-गन्धद्रव्यविशेषस्तस्य तैलं तस्य यः पूरः-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रवाहस्तेनेव अङ्गं-शरीरमुत्पुलकयता-रोमाञ्चयता । यथा सोष्मबलातैलस्पर्शात्पुलकाः संजायते तथा तन्नामश्रवणादेवेति ।

किं चिन्तितवानित्याह-

**आह्लादयन्ति सौख्याम्भःशातकुम्भीयकुम्भिकाः ।**
**काञ्चीकलापसश्रीकाः[१] श्रोणीबिम्बाः श्रुता अपि ॥ २४ ॥**

**आह्लादे**ति । श्लोकः । आसतां दृष्टाः स्पृष्टा वा श्रुता अपि तस्याः श्रोणीबिम्बा आह्लादयन्ति-आनन्दमुत्पादयन्ति । वयःकृतगुरुगुरुतरादिबहुविशेषात्तद्बहुत्वम् । किम्भूताः श्रोणीबिम्बाः ? सौख्यमेव अम्भः-जलं तस्य शातकुम्भीयाः-सौवर्ण्यः कुम्भ्य इव-कलशा इव यास्ताः । सौख्यस्य सर्वात्मना आधारभूता इत्यर्थः । पुनः किम्भूताः ? काञ्चीकलापेन-मेखलावृन्देन सश्रीकाः-शोभमानाः ॥ २४ ॥

**तत् का नाम सा दमयन्ती[२], कश्चायमाश्चर्यभूतो विहंगः[३], का चेयं नभोभारती, सर्वमेतद्विस्तरेण वेदितव्यम्' इत्यवधारयन्नेकस्यामुत्फुल्ल-पल्लवितलतामण्डपच्छायायामुन्निद्रकुसुममकरन्दशीकरासारशिशिरे शिला-तले निषद्य तं हंसमवादीत् ।**

**तत्**-तस्माद्धेतोः नामेति प्रसिद्धा सा दमयन्ती का ? तथा कश्चायं आश्चर्यभूतो मानुषभाषाभाषकत्वेन चेतश्चमत्कारकारी विहङ्गः-पक्षी ? तथा का च इयं राजन्नित्यादिरूपा नभोभारती-व्योमवाणी ? एतत् सर्वं विस्तरेण-प्रपञ्चेन वेदितव्यं-ज्ञातव्यमिति अवधारयन्-विचारयन्, एकस्यां उत्फुल्लाः-विहसिताः पल्लविताः-किसलयिता या लता-वीरुधस्तासामाधारभूतो यो मण्डपः-आश्रयविशेषस्तस्य छायायां उन्निद्राणि-विकसितानि यानि कुसुमानि तेषां ये मकरन्दशीकराः-कुसुमजकणास्तेषां य आसारः-वेगवद्वर्षस्तेन शिशिरं-शीतलं तत्तत् तस्मिन्, शिलातले निषद्य-उपविश्य तं हंसमवादीत्-ऊचिवान् ।

**'भद्र, साप्तपदीनं सख्यम्, उत्पन्नकतिपयप्रियालापा[४] प्रीतिः, प्रयोजननिरपेक्षं दाक्षिण्यम्, अकारणप्रगुणं वात्सल्यम्, अनिमित्तसुन्दरो मैत्रीभावः सतां लक्षणम् ।**

**किमवादीत्याह**–

**अस्ति च तत्सर्वं[५] भवन्मूर्तावतो निःशङ्कमभिधीयसे । कथय केयं**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**दमयन्ती, कस्य सुता[१], कीदृग्रूपम्, कुत्र सा वसति, कश्च भवानस्माकमुपकर्तुमिच्छति[२], का चेयं दिव्यावाणी[३] इत्येवमुक्तः स[४] कथयितुमारेभे[५]।**

हे **भद्र** !-कल्याणिन् ! इदं सतां-साधूनां लक्षणम् । किं तत् ? सप्तपदानि गम्यन्ते उच्यन्ते वा यत्र सख्ये तत्साप्तपदीनं सख्यं-मैत्र्यम् । तथा उत्पन्नाः-सञ्जाताः कतिपये-कियन्मात्राः प्रियालापाः-मधुरवागुच्चारा यस्यामीदृशी सतां प्रीतिः, प्रेमस्तोकैरेव वागुल्लापैः सतां प्रीतिरुत्पद्यत इत्यर्थः । तथा सतां दाक्षिण्यं-अनुकूलता प्रयोजनं-कार्यं तन्निरपेक्षं-तदनधीनं, अन्येषां हि प्रयोजनसापेक्षं आनुकूल्यं, सतां च प्रयोजनाभावादपि[१] । तथा सतां वात्सल्यं-वत्सलता स्नेहवत्त्वं न कारणेन प्रगुणं-सज्जं, अन्येषां हि वात्सल्यं कारणेन प्रगुणं भवति, सतां तु कारणं विनाऽपि वात्सल्यप्रगुणम् । तथा सतां मैत्र्याः-प्रीतेर्भावोऽभिप्रायो मैत्रीभावः, न निमित्तेन सुन्दरः अनिमित्तसुन्दरो, अन्येषां हि निमित्ते-प्रयोजने सति मैत्रीभावो भवति, सतां तु निमित्ताभावेऽपि ।

**अस्ति च** तत्सर्वं सतां लक्षणं भवन्मूर्त्तौ-त्वच्छरीरे, अतः कारणात् त्वं निःशङ्कं-शङ्काभावेन मया अभिधीयसे-कथ्यसे । यः सल्लक्षणलक्षिता न भवति तस्य पुरः कथनेन स्यात् किमु ? त्वं कथय केयं दमयन्ती ? कस्य-नृपस्य सुता ? कीदृक् रूपमाकारः सौन्दर्यं वा ? "**रूपं तु श्लोकशब्दयोः । पशावाकारे सौन्दर्ये नाणके नाटकादिके । ग्रन्थावृत्तौ स्वभावे च ।**" इत्य**नेकार्थः** [२।३०१-३०२] । तथा कुत्र-देशसन्निवेशादौ सा वसति ? कश्च भवान्-त्वं ? अस्माकमुपकर्त्तुं-उपकारं विधातुमिच्छति ? का च इयं दिव्या वाणी ? इति । एवं नलेन उक्तः-कथितः सन् स-हंसः कथयितुं-वक्तुमारेभे-कथयामास ।

**शृङ्गाररसभृङ्गार तस्याः सौन्दर्यवीरुधः ।**
**कर्णमारोप्यतां देव वार्तांविस्मयपल्लवः ॥ २५ ॥**

**शृङ्गारे**ति । हे देव ! शृङ्गाररसस्य-शृङ्गाररूपजलस्य भृङ्गार इव-कनकालुकेव यः स, शृङ्गाररसेन पूरित इत्यर्थस्तत्सम्बुद्धौ हे शृङ्गाररसभृङ्गार ! नल ! तस्याः सौन्दर्येण वीरुदिव या सा सौकुमार्यात् सौन्दर्यवीरुत्तस्याः सौन्दर्यवीरुधो दमयन्त्या वार्त्तया विस्मयः-आश्चर्यं वार्त्ताविस्मयः स एव पल्लवो वार्त्ताविस्मयपल्लवः स कर्णमारोप्यतां-श्रोत्रं निधीयतां, तद्वार्त्ता श्रूयतामित्यर्थः । शृङ्गाररसेन सिच्यमाना सौन्दर्यवीरुद्वर्द्धते, शृङ्गारोऽपि कर्णकण्ठे निहितेन पल्लवेन शोभते । इत्युभयसमागमौचित्यौक्तिः । श्लोकः ॥ २५ ॥

---

१. प्रयोजनाभावेऽपि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ सप्रपञ्चं देशवर्णनपुरस्सरं दमयन्तीस्वरूपमाह—

**अस्ति विस्तीर्णमेदिनीमण्डलमण्डनायमानो नगनगरपुरविहाराराम-रमणीयः सीतासहायसंचरितरघुपतिपादपद्मपवित्रारण्यः[1] पुण्यतरतरङ्गगङ्गा-गोदावरीवारिवारितदुरितदावानलप्रसरः मन्दर इव बलिराजजनितपरिवर्तनः, कैलास इव महेश्वरलोककृतवसतिः, मेरुरिवसुवर्णप्रकृतिकमनीयो, यदुवंश इव दृष्टशूरपुरुषावतारः, सोमान्वय इव बुधप्रधानो, वेदपाठ इवानेकैः सवनैरुपेतः, पर्वते पर्वते स्थाणुभिः, पुरे पुरे पुराणपुरुषैः[2], जले जले कमलोद्भवैः, पदे पदे देवकुलैः, वने वने वरुणैः, स्थाने स्थाने नन्दनोद्यानैः, अर्गलः स्वर्गस्य, तापीप्रायोऽप्यतापी[3] जनस्य, विन्ध्याद्रि-मुद्रितायां दिशि देशानामुत्तरोऽपि दक्षिणो देशः ।**

**अस्ती**ति । गद्यम् । वन्ध्याद्रिणा-वन्ध्याचलेन मुद्रिता-लाञ्छिता या सा तस्यां अर्थाद् दक्षिणस्यां दिशि देशानामुत्तरः-मुख्यो दक्षिणो देशोऽस्ति-वर्तते । अपिः-विरोधे, य उत्तरः-उत्तरदिग्देशवर्त्ती स कथं दक्षिणः-दक्षिणदेशवर्ती स्यात् ? उत्तरशब्दस्य दिग्देशार्थत्वात् । किम्भूतो देशः ? विस्तीर्ण-पृथु यन्मेदिनीमण्डलं-भूतलं तस्य मण्डनमिव-अलङ्कार इवाऽऽचरन् यः स तेन कृत्वा भूतलं शोभत इत्यर्थः । तथा नगाश्च-पर्वताः नगराणि च-पुराणि च विहाराश्च-चैत्यानि आरामाश्च-कृत्रिमवनानि तैः रमणीयः-रम्यः । नगरपुरयोश्च गुरुलघुत्वकृतो विशेषः । यद्वा, पुराणि-गृहाः, **यदनेकार्थः**-"**पुरं शरीरे नगरे गृह-पाटलिपुत्रयोः**" [२।४५०] इति । तथा सीतासहायः-जानकीसहितः सञ्चरितः-प्रवृत्तो यो रघुपतिः-दाशरथिस्तस्य पादपद्मेन-चरणाम्भोजेन पवित्रं-शुचि अरण्यं यस्य स तथाविधः । तथा पुण्यतराः-अतिशयेन पवित्रास्तरङ्गाः-वीचयो यस्याः, ईदृशी या गङ्गा च गोदावरी च तयोर्यद्वारि-जलं तेन वारितः-निवर्त्तितो दुरितमेव-पापमेव दावानलप्रसरो यस्मिन् स । जलेन हि दावाग्नेः शमनमुचितं । तत्सरितोः स्नानेन तद्वासिजनानां पापतापापगमात् । तथा बलिना-बलवता राज्ञा-भीमलक्षणेन जनितं परिसमन्तात् वर्तनं-परिपालनं यस्य सः । क इव ? मन्दर इव-मेरुरिव । स च किम्भूतः ? बलिराजेन-दैत्येन जनितं परिवर्तनं-भ्रमणं यस्य सः । पुनः किम्भूतः ? महान् ईश्वरः-समृद्धो यो लोकस्तेन कृता वसतिः-निवासो यस्मिन् स, समृद्धलोकैर्भृत इत्यर्थः । क इव ? कैलाश इव-रजताद्रिरिव । स च कीदृशः ? महेश्वरः-शिवस्तस्य लोकेन-परिजनेन कृता वसतिर्यस्मिन् स। तथा सुष्ठु वर्णाः-द्विजातयः प्रकृतयः-अमात्यास्तैः कमनीयः-सुन्दरः । क इव ?

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मेरुरिव । स च कीदृशः ? सुवर्णप्रकृत्या-स्वर्णस्वभावेन रम्यः । तथा दृष्टः शूरपुरुषाणां-विक्रमशालिनराणामवतारः-जन्म यस्मिन् स तथाविधः । क इव ? यदुवंश इव । स च कीदृशः ? दृष्टः शूरपुरुषस्य-वसुदेवपितुरवतारो यस्मिन् स । तथा बुधैः-पण्डितैः प्रधानः । क इव ? सोमान्वय इव-सोमवंश इव । स च किम्भूतः ? बुधेन-ग्रहविशेषेण प्रधानः, तस्य तत्पुत्रत्वात् । तथा स-देशः अनेकैः-बहुभिर्वनैः-काननैरुपेतः-सहितः । क इव ? वेदपाठ इव । स च कीदृक् ? अनेकैः सवनैः-यज्ञैरुपेतः, तत्र तेषां प्ररूपणात् । तथा यो देशः पर्वते पर्वते स्थाणुभिः-कीलैः, तथा पुरे पुरे पुराणपुरुषैः-वृद्धनरैः, [तथा] जले जले कमलोद्भवैः-कमलोत्पत्तिभिः, तथा पदे पदे-स्थाने स्थाने देवकुलैः-देवगृहैः, तथा वने वने वरुणैः-वृक्षैः जलैर्वा, तथा स्थाने स्थाने नन्दयति-आनन्दयतीति नन्दनानि तैः उद्यानैः-वनैः, कृत्वा स्वर्गस्य-दिवो अर्गलः-अधिकः । अत्र स्थाण्वादयो बहुत्वविशिष्टाः स्वर्गे हि एकैक एव स्थाण्वादिः । तथाहि—

एक एव स्थाणुः-ईश्वरः, एक एव पुराणपुरुषः-विष्णुः, एक एव कमलोद्भवः-ब्रह्मा, एकमेव देवानां कुलं-वृन्दं, एक एव वरुणः-प्रचेता सूर्यो वा, एक एव नन्दनमुद्यानं-इन्द्रवनम् । अतः स्वर्गाभ्यधिको देश इति । तथा तापी-नदी प्रायेण-बाहुल्येन यत्र स तापीप्रायस्तथा न तापयत्यवश्यमिति अतापी जनस्य । अपिः-विरोधे । स च तुल्यार्थः[१] व्याख्येयः । तथाहि—यस्तापी प्रायो भवति बाहुल्येन जनस्य तापकृत् स अतापी कथं स्यात् ? परिहारस्तूक्त एव ।

**यत्र - [१]शास्त्रे शस्त्रे वेदे वैद्ये[२] च भरते भारते च कल्पे शिल्पे च प्रधानो, धनी, धन्यो, धान्यवान्, विदग्धो वाचि, मुग्धो मुखे, स्निग्धो मनसि, वसति निरन्तरमशोको लोकः ।**

तथा **यत्र**-देशे ईदृशोऽशोकः-शोकरहितो लोको निरन्तरं वसति । कीदृशो लोकः ? शास्त्रे-व्याकरणादौ, शस्त्रे-धनुर्वेदादौ, तथा वेदे-सामादौ, वैद्ये च-आयुर्वेदादौ, तथा भरते-सङ्गीतशास्त्रे, तथा भारते च-महाभारतादौ, तथा कल्पे-यज्ञकर्मणामुपदेशके शास्त्रे, तथा शिल्पे च-वास्तुकादिशास्त्रे, प्रकृष्टं धानं-धारणं यस्य स प्रधानः, शास्त्रशस्त्रादीनि प्रकर्षेण धारयतीत्यर्थः । एवं सर्वत्रवाच्यलिङ्गता । मुख्यार्थस्य हि प्रधानशब्दस्य आविष्ट-नपुंसकलिङ्गत्वात् । तथा धनी-धनवान्, तथा धन्यः-पुण्यवान्, तथा धान्यवान्-सस्यबहुलः, तथा वाचि-वाण्यां विदग्धः-चतुरः, तथा मुखे मुग्धः-रम्यः, परमर्मानुघट्टनात् ।

१. तुल्यार्थे अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदनेकार्थः-"**मुग्धो मूढे रम्ये**" [२।२४९] । तथा मनसि स्निग्धः-स्नेहलः ।

**यत्र[1] क्रुद्धधूर्जटिललाटलोचनानलज्वालाकवलनाकुलः, त्रासादपाङ्गावलोकनमात्रनिर्जितपरमेश्वरमनसां विलासिनीनामुच्चकुचकुम्भयोः शृङ्गारसर्वस्वम्, अधरपल्लवेषु[2] मधु, भ्रूभङ्गेषु धनुः, कटाक्षेषु पुष्पबाणान्निधाय निलीनोऽङ्गेषु जघनस्थलस्थापितरतिर्मकरकेतनः ।**

तथा **यत्र**-देशे क्रुद्धः-कुपितो यो धूर्जटिः-शम्भुस्तस्य यो ललाट-लोचनानलस्तस्य ज्वालाभिर्यत्कवलनं-भक्षणं तेन आकुलः-व्याकुलो मकरकेतनः-कामो विलासिनीनां-स्त्रीणां अङ्गेषु-कुचादिष्ववयवेषु स्वोपकरणानि शृङ्गारादीनि निधाय-स्थापयित्वा त्रासाद्-भयाल्लीनः-निलीनः । किं किं कुत्र कुत्र निधाय ? इत्याह—उच्चकुचकुम्भयोः-उन्नतपयोधरकलसयोः शृङ्गारसर्वस्वं-शृङ्गाररूपं सर्वं धनं निधाय, तथा अधरपल्लवेषु-ओष्ठकिसलयेषु मधुमद्यं-पुष्परसं च निधाय, तथा भ्रूभङ्गेषु-भ्रूविलासेषु धनुश्चापं निधाय, तदाकृतित्वात्तेषाम् । तथा कटाक्षेषु-अर्द्धवीक्षणेषु पुष्पबाणान् निधाय । किम्भूतः ? तासां जघनस्थले स्थापिता रतिः-स्मरकान्ता सुरतं च येन स । ननु किमिति शम्भुभयात्तत्रैव निलीनः ? इत्याह—किम्भूतानां तासाम् ? अपाङ्गे-नेत्रप्रान्ते[1] यदवलोकनं-वीक्षणं तन्मात्रेण तेनैव निर्जितं परमेश्वराणां-धनवतां मनो यकाभिस्तास्तासाम् । अथ च परमेश्वरः-धूर्जटिः सोऽपि ताभिर्निर्जित इत्युक्तिलेशः । एतेन शरणागतत्राणवैभवं, कामस्य जेता शम्भुः, शम्भोश्चैता जैत्र्यस्तत्र एतासां सविधे गच्छन् कामो निर्भयो भवत्येव जेतृजेतृकत्वात्तासां । एतेन तद्देशे कामाधिक्यं दर्शितम् ।

**यासां तारुण्यमेव सर्वाङ्गेषु शोभार्थमाभरणम्, उत्तुङ्गस्तनमण्डललावण्यमेव मुखकमलावलोकनाय दर्पणः, तारतरनयनकान्तिरेव मुखमण्डलमण्डनाय चन्दनललाटिका, भ्रूभङ्गा एव विभ्रमाय मृगमदपत्रभङ्गाः, कटाक्षा एव युवजनजयाय परमास्त्राणि, बन्धूककुसुमकान्तिदन्तच्छद एव लोकलोचनमनोमोहनाय माहेन्द्रमणिः, मुखकमलपरिमलागतमधुकरझंकार[3] एव विनोदाय वीणाध्वनिः ।**

तथा **यासां**-स्त्रीणां तारुण्यं-यौवनमेव सर्वाङ्गेषु-सर्वावयवेषु शोभार्थमाभरणं-मण्डनम्। तथा यासां उत्तुङ्गं-उन्नतं यत्स्तनमण्डलं-पयोधरयुगलं तस्य यल्लावण्यं तदेव

१. अपांगेन नेत्रप्रान्तेन ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मुखकमलस्य यदवलोकनं-वीक्षणं तस्मै दर्पणः-आदर्शः । तथा यासां तारतरा-अतिशयेन उज्ज्वला या नयनकान्तिः सैव मुखमण्डलमण्डनाय चन्दनस्य-श्रीखण्डस्य ललाटिका-ललाटभूषणम् । तथा यासां भ्रूभङ्गा एव विभ्रमाय-विलासाय मृगमदस्य-कस्तूरिकायाः पत्रभङ्गाः-पत्रलताः । तथा यासां कटाक्षा एव-अक्षिविकूणितानि जनजयाय-युवजनवशीकरणाय परमास्त्राणि-प्रकृष्टशस्त्राणि । तथा यासां बन्धूककुसुमवदरुणा कान्तिर्यस्य ईदृशो यो दन्तच्छदः-ओष्ठः स एव लोकानां युवजनानां लोचनं च मनश्च तयोर्मोहनाय-वशीकरणाय माहेन्द्रमणिः माहेन्द्रं-इन्द्रजालं तन्त्रबलेन अविद्यमानवस्तु-प्रकाशनमिति यावत्, तदर्थो मणिर्माहेन्द्रमणिः । यथा इन्द्रजालिका लोकस्य लोचनमोहनाय माहेन्द्रमणिं प्रकटयन्ति तथैतासां दन्तच्छद एव जननेत्रमनोमोहकृत् । तथा यासां मुखकमलस्य यः परिमलः-आमोदस्तेन आगता ये मधुकरास्तेषां झङ्कार एव विनोदाय-कौतुकनिमित्तं वीणाध्वनिः । अन्योऽपि वीणाध्वनिर्विनोदाय क्रियते तत्र तासां मुखसौरभ्यलुब्धागतमधुलिट्झंकार एव विनोदकृत्, न वीणाध्वनेः प्रयोजनमिति भावः ।

**किं बहुना—**

**किम्बहु**ना-किं बहूक्तेन—

**ता एव निर्वृतिस्थानमहं मन्ये मृगेक्षणाः ।**
**मुक्तानामास्पदं येन तासामेव स्तनान्तरम् ॥ २६ ॥**

**ता एवे**ति । अनुष्टुप् । अहमेवं मन्ये-सम्भावयामि ता एव-दक्षिणदेशीया मृगेक्षणा निर्वृतेः-शर्मणः स्थानम् । पक्षे, निर्वृतिरेव-मुक्तिरेव स्थानम् । कथम् ? येन कारणेन तासामेव-मृगेक्षणानामेव स्तनान्तरं-स्तनमध्यं मुक्तानां-मौक्तिकानामास्पदं-आश्रयः । पक्षे, मुक्तात्मनामास्पदं[1] निर्वृतिर्हि मुक्तानां स्थानं भवत्येवेति । मन्ये इति सम्भावनार्थे तिङन्तप्रतिरूपकमव्ययम् ॥ २६ ॥

**मन्ये च । ताभिरेव विविधनिधुवननिधानकुम्भीभिः कुम्भोद्भवोऽपि भगवान् प्रलोभितो भविष्यति, येनाद्यापि न मुञ्चति दक्षिणां दिशम्[1] ।**

**मन्ये चे**ति । चः-विशेषे । अहं मन्ये विशेषेण ताभिरेव भगवान् कुम्भोद्भवोऽपि-अगस्तिमुनिरपि प्रलोभितः-रञ्जितो भविष्यति । येनाद्यापि दक्षिणां दिशं न मुञ्चति । किम्भूताभिः ? विविधं-अनेकप्रकारं करिधेनुव्यानतमर्कटादिरूपं यन्निधुवनं-कामकेलि-

१. मुक्तानां मुक्तात्मनां अनू ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्तदेव निधानं तस्य कुम्भीभिः, कुम्भीषु निधानस्य निक्षेपात् तद्वत् सुरतास्पदं वर्तन्त इत्यर्थः ।

**अथवा –**

**देशो भवेत्कस्य न वल्लभोऽसौ, स्त्रीसंकुलः सुस्थितकामकोटिः ।**
**दग्धैककामं त्रिदिवं विहाय, यस्मिन्कुमारोऽपि रतिं चकार ॥ २७ ॥**

**अथवे**ति-पक्षान्तरे

**देश** इति । असौ-दक्षिणो देशः कस्य न वल्लभः ?-न प्रियः ? किम्भूतः ? स्त्रीभिः संकुलः-व्याप्तः । पुनः किम्भूतः ? सुष्ठु स्थिता-अवस्थिता कामकोटिः-देवी कन्दर्पकोटिश्च यस्मिन् स । यस्मिन् देशे कुमारः-कार्तिकेयो रतिं-आस्थां चकार । किं कृत्वा ? त्रिदिवं-स्वर्गं विहाय-त्यक्त्वा । किम्भूतम् ? दग्धः । एकः-एकसंख्यः कामः-मन्मथो यस्मिन् तत् । त्रिदिवे य एकः कामः सोऽपि शम्भुनाऽदाहि । अत्र तु कामानां कोटिरपि सुस्थिता, अतस्तत्परित्यागः । अपिः-विरोधे । यः कुमारः-डिम्भः स कथं रतिं-सुरतं कुरुते ? एतावता यद्देशे कामकोटिनाम्न्याः देव्याः कुमारस्य च आयतनमस्तीति ध्वनितम् ॥ २७ ॥

**तस्यान्तर्भूतं[१] वैदर्भमण्डलस्यालङ्कारभूतमनाकुल[२]ममरपतिपुरस्य-र्धिपरितः[३] परिखाक्रान्तिप्रान्तरुढ[४]प्रौढहृद्योद्यानमाला[५]वलयितमदभ्र[६]शुभ्रा-भ्रंलिहप्रासादशिखरशिखाभोगभग्नरविरथतुरङ्गवेगम्, एकत्राग्निहोत्रमन्त्र-पवित्राहुतिहतसमस्तदिव्यान्तरिक्षभौमोत्पातसंघातैः, कृतमन्युभिरपि मन्युशून्यैः, उक्तसूक्तैरपि निरुक्तपरैः, सन्मार्गैरपि[७] गृहस्थैः, सकलत्रैरपि ब्रह्मचारिभिः, अभ्यस्ततिथिभिरप्यतिथिकुशलैः, सामप्रयोगप्रधानैरपि दण्डावलम्बिभिः, शतपथानुसारिभिरप्येकमार्गैः, ब्राह्मणैरध्यासितम् । एकत्र कुरुभिरिव द्रोणपुरःसरैः, प्रासादैरिव तुलाधारिभिः, नैयायिकैरिवानु-मेयानुमाननिपुणैः, वैशेषिकैरिव द्रव्यानुगुणकर्मविशेषपण्डितैः[८], वैया-करणैरिव रूपसिद्धिप्रधानैः, रुद्रैरिवानेकग्रन्थिबद्धकपर्दकैः, विपणिव-णिग्जनैरधिष्ठितम् । एकत्र विटकौल[९]दम्भदीक्षाभिरिव कुचरूपलोभि-तलोकाभिः, कुकविकाव्यपद्धतिभिरिव भग्नयतिगणवृत्ताभिः निशा-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**चरीभिरिव रजनीरागिणीभिः, सर्वतोमुखजघनचपलाभिरप्यनार्याभिः, कर्णाटचेटीभिर्भरितम् । एकत्र बालकमिव कुलालाकीर्णम् । एकत्र वृद्धिमिव कुजराजितम् । एकत्र चित्रविद्ययेव प्रवर्धमानसकलशिशुशोभितया विन्यस्तस्वस्तिकया सर्वतोभद्रभूषणया भवनमालयालंकृतम् । एकत्र नाटकैरिव पताकाङ्कसंधिसंगतैः, दुष्टकिराटैरिव[१] दृष्टकूटकर्मभिः, शस्त्रैरिव सुधारैः, विचित्रैरपि सचित्रैः[२], अतुलैरपि[३] सतुलैर्देवकुलैः संकुलम्। विशालमपि शालासंपन्नम्, चतुश्चरणसंयुक्तमपि चरणरहितम्, विट्भृतमपि[४] शुचिमार्गम्, सर्वत्र चत्वराधिकमपि स्थिरप्रकृतिः, मज्जन्महाराष्ट्र-कुटुम्बिनीमुखमण्डलविधीयमानोत्फुल्लकमलखण्डशोभाया-[५]स्तुङ्गतरङ्गरङ्गत्तरुणार्जुनराजीवराजमानराजहंसविराजितवारेर्वरदास्तीरे कुण्डिनं[६] नाम नगरम् ।**

**तस्य**-दक्षिणदेशस्य अन्तर्भूतं-मध्यवर्त्ति यद्वैदर्भमण्डलं तस्य अलङ्कारभूतं-मण्डनोपमं, एवंविधविशेषणोपेतम् । तुङ्गतरङ्गेषु-उच्चवीचिषु रंगति-शोभमानानि तरुणानि-नवानि अर्जुनानि-धवलानि यानि राजीवानि तद्वद् राजमाना ये राजहंसास्तैर्विराजितं, वारि यस्याः सा तस्याः, वरदायास्तीरे कुण्डिनं नाम नगरं-पुरं वर्तत् इति शेषः। किम्भूतं कुण्डिनम् ? अनाकुलं-स्वपरचक्रादिभिरव्याकुलं, तथा अमरपतिपुरं-अमरावतीं स्पर्द्धते-संहृष्यति इति अमरपतिपुरस्पर्द्धि, तथा परितः-चतसृष्वपि दिक्षु परिखया-खातिकया आक्रान्तः-आलीढो यः प्रान्तः-अवसानं तत्र रूढानि-उत्पन्नानि प्रौढानि-गुरूणि हृद्यानि-हृदयहारीणि यानि उद्यानानि-वनानि तेषां या माला-श्रेणिस्तया वलयितं-वेष्टितं, यस्य पुरस्य परित उद्यानमालाशोभत इत्यर्थः । तथा अदभ्राणि-बहूनि शुभ्राणि-धवलानि अभ्रंलिहानि-नभ आश्लिष्यन्ति उच्चानि यानि प्रासादशिखराणि तेषां शिखाभोगेषु-अग्रविस्तारेषु भग्नो रविरथतुरङ्गाणां वेगः-रयो यत्र तत्, प्रासादानामत्युच्चत्वेन अन्तरापतितत्वात्तद्वेगभङ्गः । तथा एकत्र-एकस्मिन् प्रदेशे ब्राह्मणैरध्यासितं-निषेवितं । कीदृग्भिर्ब्राह्मणैः ? अग्निहोत्रस्य-अग्निहोमस्य ये मन्त्रास्तैः पवित्रा-शुद्धा या आहुतिः-होतव्यद्रव्याहवनं तया हतः-ध्वस्तः समस्तानां दिव्यानां-दिविभवानां, व्यन्तरादिकृतानां मार्य्यादीनां, आन्तरिक्षाणां च-आकाशोत्पन्नानां अवृष्ट्यादीनां, भौमानां च-भुवि भवानां चौरादिकृतानामुत्पातानां-उपद्रवाणां संघातः-समूहो यैस्ते, तथाविधैः आहुतिहतोपद्रवसंघैः । तथा कृता मन्यवः-यज्ञा यैस्ते तथाविधैः कृतक्रतुभिः, तथा मन्युशून्यैः-कोपरहितैः । अपिः-विरोधे । ये कृतमन्यवः-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कृतकोपास्ते कथं मन्युशून्याः ? इति । तथा उक्तानि सूक्तानि-सुभाषितानि यैस्ते तैः, तथा निरुक्तं-ग्रन्थविशेषस्तत्र परैः-पठनादिना सावधानैः । विरोधस्तु, ये उक्तसूक्ता भवन्ति ते कथं निरुक्तं-वचनाभावस्तत्परा भवन्ति ? किन्तु वचनपरा एव भवन्ति । तथा सन्मार्गः-सदाचारस्तस्मिन् लग्नाः-प्रवृत्तास्तैः, तथा गृहस्थैः-गृहाश्रमरतैः । विरोधस्त्वेवं, ये सन्मार्गे-श्रेष्ठवर्त्मनि लग्ना भवन्ति-मार्गे चलन्तीत्यर्थस्ते कथं गृहे तिष्ठन्तीति ? मुक्तगृहा एव भवन्तीत्यर्थः। तथा सकलं-सर्वं त्रायन्त इति सकलत्रास्तैः, तथा ब्रह्म-वेदं चरन्ति अवश्यं जानन्तीति ब्रह्मचारिणस्तैः । "**ब्रह्मचारिभिरपि सकलत्रै**रिति **पा**ठे ब्रह्मचारिभिर्निषिद्धकामैः सकलत्रैरिति स एवार्थः । विरोधे तु ये सकलत्राः-सस्त्रीका भवन्ति ते कथं ब्रह्मचारिण इति । तथा अभ्यस्ता-ज्योतिःशास्त्राध्ययनात्तिथिः-प्रतिपदादिर्यैस्ते तथाविधैस्तिथि-रित्युपलक्षणं नक्षत्रवारादीनां, तथा अतिथीनां-आगन्तून् कुशांश्च-दर्भान् लान्ति-स्वीकुर्वन्ति भोजनार्थं शुच्यर्थं च ये ते अतिथिकुशलास्तैः । विरोधे तु ये अभ्यस्ततिथयो भवन्ति ते कथं तिथिषु कुशलाः न भवन्ति । तथा सामवेदस्य प्रयोगे-पठनादिव्यापारे प्रधानानि-मुख्यास्तैः, दण्डः-आषाढस्तमवलम्बन्ते-करे गृह्णन्तीत्येवंशीला दण्डावलम्बिनस्तैः । विरोधे तु, ये सामप्रयोगे-सांत्वनव्यापारे प्रधानानि भवन्ति ते कथं दण्डः-दमनं तदवलम्बिनो भवन्ति । तथा शतपथः-यजुर्वेदस्तमनुचरन्ति-जानन्तीति शतपथानुचारिणस्तैः, तथा एकमार्गैः-ऋजुभिः। विरोधे तु, ये शतसंख्याः पन्थानस्तेषु अनुचरन्ति ते एकमार्गाः कथं भवन्ति, एको मार्गो येषां ते इति ।

पुनरपि एकत्र विपणि वणिग्जनैरधिष्ठितम् । किम्भूतैर्विपणि वणिग्जनैः ? द्रोणः-मानविशेषः स पुरस्सरः-अग्रेसरो येषां ते तथाविधैः । कैरिव ? कुरुभिरिव-कुरुक्षत्रियैरिव । किम्भूतैः ? द्रोणः-कौरवगुरुः स पुरस्सरो येषां ते तैः । तथा तुला-सूत्रादिमानं तां धारयन्तीति तुलाधारिणस्तैः । कैरिव ? प्रासादैरिव । तैः किम्भूतैः ? गृहादीनां तिर्यक्धारणस्तम्भस्तुला तां धारयन्तीति तैः । तथा अनुमेयं-कणादि तस्य अनुमानं-उद्देशज्ञानं तत्र निपुणैः-चतुरैः । कैरिव ? नैयायिकैरिव-योगैरिव । तैः किम्भूतैः ? यदनुमीयते तदनुमेयं, येन च अनुमीयते तदनुमानं, यथा पर्वतोऽयं वह्निमान् धूमवत्त्वात् इत्यत्र धूमोऽनुमानं वह्नेरनुमेयः तयोर्निपुणैः-दक्षैः । तथा द्रव्यस्य-रूपकादेरनुगुणः-संकलना तत्कर्मविशेषेषु पण्डिताः-विज्ञास्तैः । कैरिव ? वैशेषिकैरिव । तैः किम्भूतैः ? द्रव्यानुगताः-द्रव्यसमवेता ये गुणाश्च कर्माणि च विशेषाश्च पदार्थास्तेषु पण्डितास्तैः । तथा रूपं-टंककरूपकादिनाणकं तस्य या सिद्धिः-निष्पत्तिस्तया प्रधानानि तैः । कैरिव ? वैयाकरणैरिव-शाब्दिकैरिव । तैः किम्भूतैः ? रूपाणि-शब्दास्ते च रामादयस्तेषां या

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सिद्धिः-विभक्त्यादिसंघटनेन या[१] निष्पत्तिस्तया प्रधानैः । **"रूपं तु श्लोकशब्दयोः"** इत्य**नेकार्थः** [२।३०१] । तथा अनेके-बहवो ग्रन्थिषु बद्धाः कपर्दकाः-वराटका यैस्ते तथाविधैः । कैरिव ? रुद्रैरिव-शम्भुभिरिव । तैः किम्भूतैः ? अनेकैः ग्रन्थिभिर्बद्धः कपर्दकः-जटाजूटो यैस्ते तथा तैः ।

तथा एकत्र प्रदेशे कर्णाटचेटीभिः-कर्णाटदेशदासीभिर्भरितं-पूरितम् । किम्भूताभिः ? कुचयो रूपेण-सौन्दर्येण लोभिताः-साभिलाषत्वमापादिता लोका याभिस्तास्तथा-विधाभिः । काभिरिव ? विटाः-षिङ्गा ये कौलास्तेषां या दम्भदीक्षाः-कपटदीक्षास्ताभिरिव [२]पल्लवकशाक्तदम्भदीक्षाभिरिव । किम्भूताभिस्ताभिः ? कुत्सितेन चरुणा-मांसपाकादिना उपलोभिता लोका याभिस्तास्तथा ताभिः । तथा भग्नं यतिगणस्य-मुनिवृन्दस्य वृत्तं-शीलं याभिस्तास्तथाविधाभिः । काभिरिव ? कुकवेः-कुत्सितकाव्यकर्त्तुर्याः काव्यपद्धतयः-काव्यपंक्तयस्ताभिरिव । **"पद्धतिर्मार्गपंक्त्योश्च"** इत्य**नेकार्थः** [३।२९४] । किम्भूताभि-स्ताभिः ? यथावदन्यासात् भग्ना-अपास्ता यतयः-विरतयो गणाश्च-मगणादयो येषु ईदृशानि वृत्तानि-पद्यानि यासु तास्तथाविधाभिः । तथा रजनी-हरिद्रा तस्या रागः-वर्णान्तरारोपो विद्यते यासां तास्तथाविधाभिः, कर्णाटे हि हरिद्रैवाङ्गरागाः । काभिरिव ? निशाचरीभिरिव-राक्षसीभिरिव। ताभिः किम्भूताभिः ? रजनी-रात्रिस्तस्यां रागः-आसक्तिर्विद्यते यासां तास्तथा ताभिः । तथा सर्वतः-सर्वस्मिन्नपि काले मुखे जघने चपलाः-चञ्चलास्ताभिः, तथा आर्याः-साध्व्यो न आर्या अनार्यास्ताभिः । अपिः-विरोधे। या मुखचपला जघनचपलाश्च भवन्ति ताः कथं आर्या-मात्रावृत्तभेदः न आर्या अनार्या भवन्ति, किन्तु आर्या एव भवन्ति।

तथा एकत्र प्रदेशे कुलालैः-कुम्भकारैराकीर्णं-व्याप्तं । कमिव ? बालकमिव । तं किम्भूतम् ? कुत्सितलालया आकीर्णम् । तथा एकत्र कुजैः-तरुभिः राजितं । कमिव ? वृद्धमिव । किम्भूतं तम् ? कुत्सितजरया जितं-आयत्तीकृतं, जरया व्याप्तमित्यर्थः ।

तथा एकत्र प्रदेशे ईदृश्या भवनमालया-गृहपंक्त्या अलङ्कृतं-मण्डितं । किम्भूतया ? प्रवृद्धमानैः-प्रतिदिनं वयस्तत्त्वादिभिरधिकीभवद्भिः सकलैः-कलावद्भिः शिशुभिः-डिम्भैः शोभिता तया, तथा विन्यस्ताः-रचिताः स्वस्तिकाः-मौक्तिकादिक्षो-दान्विताश्चतुष्का यस्यां सा तया, तथा सर्वतः-सर्वस्मिन् देशे भद्राणि-सुन्दराणि वास्तुशास्त्रख्यातानि भूषणानि यस्यां सा तया । यदि वा स्वस्तिकवर्द्धमानौ गृहावयव-विशेषौ। कयेव ? चित्रविद्ययेव । तया किम्भूतया ? प्रकृष्टवर्द्धमानसकलशिशुशोभितया,

---

१. 'या' नास्ति अनू. । २. 'पल्लबक' नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा विन्यस्तः स्वस्तिको यस्यां सा तया, तथा सर्वतो भद्रो भूषणं यस्याः सा तया । एतावता शिशुः सकलः स्वस्तिको वर्द्धमानः सर्वतोभद्र इत्याख्यानि पञ्चपत्राणि भवन्ति तानि चित्रकरविद्यायां प्रसिद्धानि ।

तथा एकत्र प्रदेशे ईदृशैर्देवकुलैः-देवगृहैः संकुलम् । किम्भूतैर्देवकुलैः ? पताकाध्वजवासः सैवाङ्कः-चिह्नं येषां तानि, तथा सन्धिषु-भित्त्यादिश्लेषेषु संगतानि-मिलितानि अविभाव्यसन्धीनीत्यर्थः, पश्चात् कर्मधारयस्तैः । कैरिव ? नाटकैरिव । तैः किम्भूतैः ? मुख्यनायकोपरि उपनायकचरितं पताका, तथा अंकः-प्रबन्धविभागः, तथा मुखप्रतिमुखगर्भअवमर्शनिर्वहणाख्याः पञ्चसन्धयस्तैः सङ्गतैः-सम्बद्धैः । पुनः किम्भूतैर्देवकुलैः ? दृष्टं कूटस्य-शिखरस्य कर्म-घटनालक्षणं येषु तानि तथा तैः । कैरिव ? दुष्टाः ये किराटाः-सिन्धुदेशप्रसिद्धा वणिग्जनास्तैरिव । तैः किम्भूतैः ? दृष्टं कूटं-कपटो येषु तादृशानि कर्माणि-क्रयविक्रयादीनि येषां ते तथा तैः । "**किरोलश्च वेति किरातः किदाटः प्रत्ययः किराटः भक्ष्यविशेषः वणिक्म्लेछश्च**" इत्यु**णादिवृत्तौ** [ ] । तथा सुधां-लेपविशेषमियूति-प्राप्नुवन्ति यानि तानि तथा तैः, सुधया लिप्तैरित्यर्थः । कैरिव ? शस्त्रैरिव-आयुधैरिव । तैः किम्भूतैः ? शोभना धारा-अग्रभागो येषां तानि तथा तैः । तथा विचित्रैः-अनेकप्रकारैः, तथा सचित्रैः-आलेख्यसहितैः । अपिः-विरोधे । यानि विगत-चित्राणि भवन्ति तानि चित्रसहितानि कथं स्युरिति । तथा न विद्यते तुला-साम्यं येषां तानि तथा तैः, अनुपमैरित्यर्थः । तथा सह तुलया-धारणस्तम्भेन वर्तन्त इति सतुलानि तैः । विरोधे तु, यानि तुलया रहितानि भवन्ति तानि कथं तुलया सहितानीति । तथा विशालं-विस्तीर्णं शालाभिर्गृहैः सम्पन्नं-सहितम् । अपिः-विरोधे । यद्विशालं-शालारहितं भवति तत्कथं शालासम्पन्नं स्यात् । तथा चत्वारश्चरणाः-ऋग्वेदादयस्तैः संयुक्तं, तत्पाठकैरधिष्ठितत्वात् । तथा रणेन-युद्धेन रहितम् । अपि चेति-विरोधे । यत् चतुर्भिश्चरणैः-पादैः संयुक्तं स्यात् तत्कथं चरणैः रहितं भवेत् । तथा विड्भिः-वैश्यैः मनुष्यैर्वा भृतं-पूरितं, तथा शुचिमार्गं-पवित्रपथम् । विरोधे तु, यद् विड्भि-विष्टाभिर्भृतं भवति तत्कथं शुचिमार्गं स्यात् । तथा सर्वत्र-सर्वस्मिन्नपि भूभागे चत्वरै अङ्गणैः चतुःपथैर्वा अधिष्ठितं-आश्रितम् । "**चत्वरं स्यात् पथां श्लेषे स्थण्डिलाङ्गणयोरपि**" **इत्यनेकार्थः** [३।५८७] । तथा स्थिराः-निश्चलाः प्रकृतयः-अमात्यादयो यस्मिंस्तत्तथाविधम् । विरोधे तु, चकारस्य-समुच्चयार्थस्य, पूर्वपादेन[१] योगस्तदा सर्वत्र चेति भिन्नं, यत्त्वराधिष्ठितं-वेगाश्रितं भवति तत्कथं स्थिरप्रकृतिः-स्थिरस्वभावं स्यात् ।

---

१. पूर्वपदेन अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किम्भूतायाः वरदायाः ? मज्जन्त्यः-स्नानं कुर्वन्त्यो या महाराष्ट्रकुटुम्बिन्यः-महाराष्ट्रदेशीयपुरन्ध्रयस्तासां मुखमण्डलैः-वक्त्राम्भोजैर्विधीयमाना-क्रियमाणा उत्फुल्लकमलखण्डस्य-विकसिताब्जवनस्य शोभा यस्यां सा तस्याः, मन्ये तासां मुखान्यमूनि न भवन्ति, किन्वेतत् प्रफुल्लकमलवनमिति । वस्तुतः सरिति कमलानुत्पत्तिरतस्तत्र तदारोपः।

**यस्य नातिदूरे दर्शनदूरीकृतदुरितोपप्लवाऽऽप्लवनजनितपातकभङ्गां गङ्गामुपहसन्ती स्वर्गमार्गाश्रयणनिश्रेणी पुण्यपयाः पयोष्णी वहति ।**

तथा **यस्य**-कुण्डिनपुरस्य नातिदूरे-समीपे पयोष्णी नाम्नी नदी वहति । किम्भूता ? दर्शनेनैव दूरीकृतः-निराकृतो दुरितोपप्लवः-पापोपद्रवो यया सा, अतएव किं कुर्वती ? आप्लवनेन-स्नानेन जनितः पातकभङ्गो यया सा, तथाविधां गङ्गां-सुरसरितमुपहसन्ती-तिरस्कुर्वन्ती । गङ्गा हि स्नानात् पुण्यहेतुः, पयोष्णी तु दर्शनादपीत्यस्या विशेषः । पुनः किम्भूता ? स्वर्गमार्गस्य आश्रयणे-आरोहणे निःश्रेणीव-अधिरोहिणीव या सा, यथा निःश्रेण्या प्रासादादेरुपर्यधिरुह्यते तथाऽनया स्वर्गे गम्यत इत्यर्थः । तथा पुण्यं-पवित्रं पानीयं[१] यस्याः सा पुण्यपयाः ।

**यस्य च पश्चिमप्रदेशे[१] प्रणतसुरासुरमौलिनीलमणिमरीचिचञ्चरीकचक्रचुम्बितचरणाम्भोजस्य भोजकटकूपजन्मनो जरापातितययातेः प्रचण्डदाण्डिक्य[२]दण्डनाडम्बरितगण्डपाषाणविदलितवैदर्भमण्डलस्य भगवतो भार्गवस्याश्रमः ।**

तथा **यस्य** च-कुण्डिनपुरस्य पश्चिमप्रदेशे-पश्चिमभूभागे भगवतो भार्गवस्य-शुक्रस्य आश्रमो वर्तते इति शेषः । किम्भूतस्य भार्गवस्य ? प्रणताः-पादयोः पतिता ये सुराश्च असुराश्च तेषां ये मौलयः-किरीटानि तत्र ये नीलमणयः-इन्द्रनीलादयस्तेषां ये मरीचयः-किरणास्त एव चञ्चरीकचक्रं-भ्रमरवृन्दं तेन चुम्बितं-आलीढं चरणाम्भोजं यस्य स तस्य । सुरासुरा अपि यत्पदाब्जं प्रणता इत्यर्थः । पुनः किम्भूतस्य ? भोजकटकूपेति-अधिष्ठाननाम तत्र जन्माऽस्येति । तथा च **श्रुतिः-"शुक्रो भोजकटेऽभवत् ।"** कूपादिप्रसिद्ध्या हि अधिष्ठाननामानि दृश्यन्ते । तथा च-**"मरुदेशे शिवकूपः किराटकूपः जाङ्गलकूपः"** इत्याद्यधिष्ठानानि । तथा जराविद्यया पातितः शतो ययातिः-नृपतिर्येन स तस्य । वृषपर्वदैत्यसुतां शर्मिष्ठां शुक्रसुतां देवयानीं च ययातिर्नृपतिरुपयेमे । ततोऽसौ शर्मिष्ठा प्रीत्या देवयानीमवजानन् तवाङ्गे जरा पतत्विति शुक्रेण शप्तः । तथा प्रचण्डा या दाण्डिक्यदण्डना-

१. पयः पानीयं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दाण्डिक्यनृपतेः शासना तस्यै आडम्बरिताः-पातिताः ये गण्डपाषाणाः-पर्वतच्युतस्थूल-दृषदस्तैर्विदलितं-ध्वस्तं वैदर्भमण्डलं येन स तस्य । दाण्डिक्यो नाम भोजकटदेशाधिपः शुक्रसुतामरज्जः संज्ञां, लब्धावसरः प्रसभादुपयेमे । ततः क्षत्रियः किल हठाद् द्विजकन्यां परिणीतवानिति । परिभूतं मन्येन शुक्रेण मन्युना पातितगन्धशैलवृष्टिना स वैदर्भमण्डलो हतः । तदा प्रभृति दण्डकारण्यमिति ख्यातम् ।

**यत्र च विपत्त्राः सन्ति साधवो न तरवः[१], विजृम्भमाणकमलानि सरांसि न जनमनांसि, कुवलयालंकाराः कमलदीर्घिका[२] न सीमन्तिन्यः, विपदाक्रान्तानि सरित्कूलानि न कुलानि ।**

**यत्र चे**ति । यत्र च-कुण्डिनपुरे विपदस्त्रायन्त इति विपत्त्राः-साधवः सन्तः-वर्तन्ते, न तरवो विपन्नाः-विपर्णाः । तथा यत्र विजृम्भमाणानि-विकसन्ति कमलानि येषु तानि ईदृशं सरांसि वर्तन्ते, न जनमनांसि-लोकचित्तानि कुत्सितो विजृम्भमाणः-प्रसरन् मलः-पापं येष्विति, ईदृशि वर्तन्ते, निर्मलानीत्यर्थः । यद्विश्वः-"**मलं किट्टे पुरीषे च पापे च कृपणे मलः** [लान्त० द्वि० ८] ।" "**कुत्सिते**" [पा० सू० ५।३।७४] कः । तथा यत्र-पुरे कुवलयान्येव-सरोजान्येव अलङ्कारः-मण्डनं यासां ता, ईदृश्यः कमलदीर्घिकाः-सरोजवाप्यः सन्ति, न सीमन्तिन्यः कुत्सितवलयालङ्काराः किन्तु सौवर्णकङ्कणभूषितकराः सन्ति । तथा यत्र-पुरे वीनां-पक्षिणां [१]पादैः-चरणैराक्रान्तानि व्याप्तानि, सन्ति निरापदीत्यर्थः ।

**किं बहुना—**

**किं बहुना**-किं बहूक्तेन—

**देशानां दक्षिणो देशस्तत्र वैदर्भमण्डलम् ।**
**तत्रापि वरदातीरमण्डनं [३]कुण्डिनं पुरम् ॥ २८ ॥**

**देशाना**मिति । अनुष्टुप् । देशानां मध्ये दक्षिणो देशः प्रधानमिति गम्यते । तत्र-देशे वैदर्भमण्डलं प्रधानम् । तत्रापि-वैदर्भमण्डलेऽपि वरदातीरस्य मण्डनं-भूषणं कुण्डिनपुरं प्रधानमिति ॥ २८ ॥

**तत्रास्ति समस्तरिपुपक्षक्षोदक्षमदक्षिण[४]क्षोणीपालमौलिमाणिक्य-निकषनिर्मलितचरणनखदर्पणश्चतुरुदधिपुलिन[५]चक्रवालवालुकासंख्य-**

---

१. पदैः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**संख्यविख्यातकीर्तनीयकीर्तिसुधाधवलितवसुंधरावलयो निजभुजपञ्जरान्तर-निरुद्धसारिकायमाणरणरङ्गाङ्गणार्जितोर्जितजयश्रीः, यौवनमदमत्त-कान्तकुन्तलविलासिनीनयननीलोत्पलदलमालाभ्यर्च्यमान[१]लावण्यपुण्य-प्रतिमः, रविरिव नासत्यजनकः, पुरंदर इव नाकविख्यातः, गरुत्मानिव नागमाधिक्षेपी, पद्मखण्ड इव नालसहितः, व्याकरणप्रबन्ध इव नामसंपन्नः, धाम धाम्नाम्, आधारो वीरतायाः[२], पुरं पुरुषकारस्य, आश्रयः श्रेयसां, श्रियां श्रुतीनां च, राजा राणाङ्गणेष्वगणितभीर्भीमो नाम ।**

**तत्र**-कुण्डिनपुरे एवं विधो भीमो नाम राजा अस्ति । किम्भूतो राजा ? समस्तरिपुपक्षाणां-सकलवैरिपक्षाणां क्षोदे-चूर्णने क्षमाः-समर्थो ये दक्षिणक्षोणीपालाः-दाक्षिणात्या अनुकूला राजानस्तेषां मौलिषु-किरीटेषु यानि माणिक्यानि-रत्नानि तान्येव निकषः-शाणस्तेन निर्मलिता-निर्मर्जिताश्चरणनखा एव दर्पणाः-आदर्शा यस्य सः, सर्वेऽपि राजानस्तत्पादयोः पतन्तीति भावः । तता चतुरुदधीनां-चतुःसमुद्राणां पुलिनचक्रवालेषु-द्वीपपुञ्जेषु या वालुकाः-पांसवस्तद्वत् असंख्यानि-अनेकानि यानि संख्यानि-आयोधनानि तेषु जयाद्विख्याता-प्रसिद्धा कीर्तनीया-स्तवनीया या कीर्त्तिः सैव सुधा-लेपविशेषस्तया धवलितं-पाण्डुरितं वसुन्धरावलयं-भूमण्डलं येन सः । तथा निजभुजावेव पञ्जरान्तरं-पञ्जरमध्यं तेन निरुद्धा-निगृहीता सारिकायमाणा-सारिकोपमा रणरङ्गाङ्गणे-समररूपनृत्य-भूभागाजिरे अर्जिता-लब्धा ऊर्जिता-ऊर्जस्वला बलवती जयश्रीः-विजयलक्ष्मीर्येन सः । यद्भुजयोर्जयश्रीः क्रीडतीत्यर्थः । सारिका हि पञ्जरान्तरे निक्षिप्यत इति छायार्थः । तथा यौवनमदेन-तारुण्यदर्पेण मत्ताः-दृप्ताः कान्ताः-कमनीयाः या कुन्तलविलासिन्यः-कुन्तल-देशीयः वा नामधेयस्येति[१]स्त्रियस्तासां नयनान्येव नीलोत्पलदलमाला-नीलाब्जपत्रपंक्तिस्तया अभ्यर्चमाना-पूज्यमाना लावण्यमेव पुण्यप्रतिमा-पवित्रप्रतिबिम्बं यस्य सः । प्रतिमा हि कमलदलैरर्च्यत इति यल्लावण्यं ताभिर्नेत्राभ्यां पीयत इत्यर्थः ।

पुनः किम्भूतो राजानः ? असत्यजनकः-असत्यवक्ता, क इव ? रविरिव । स च कीदृक् ? नासत्ययोः-देववैद्ययोर्जनकः-पिता । तथा न अकविषु-कुत्सितकविषु ख्यातः-प्रतीतः सत्काव्यकर्तृत्वात् सत्कविषु प्रतीत इत्यर्थः । क इव ? पुरन्दर इव-शक्र इव । स च कीदृक् ? नाके-स्वर्गे विख्यातः । तथा आगमान्-शास्त्राणि अधिक्षिपति-तिरस्करोतीति आगमाधिक्षेपी, तथाविधो न आगमोक्तं सर्वं मन्यत इत्यर्थः । क इव ? गरुत्मानिव गरुड

---

१. वा नामधेयस्येति नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इव । स च कीदृक् ? नागानां-सर्पाणां मां-लक्ष्मीं अधिक्षिपति-लुम्पति यः स तथाविधः, तेषां भक्षणात् । तथा अलसेभ्यः-आलस्योपेतेभ्यो हितो न । यद्वा, आलेन-अनर्थेन सहितो न । क इव ? पद्मखण्ड इव-सरोजकाननमिव, स च किम्भूतः ? नालेन-काण्डेन सहितः-युतः । **"षण्डः काननइट्चरेः" इत्यनेकार्थः** [२।१३०] । तथा न आमेन-आतङ्केन रोगेण वा सम्पन्नः-युक्तः । **"आमोऽपक्वे रुग्भेदरोगयोः" इत्यनेकार्थः** [२।३१८] । क इव ? व्याकरणप्रबन्ध इव-शब्दशास्त्ररचनेव । स च किम्भूतः ? नाम-प्रातिपदिकं तेन सम्पन्नः । तथा धाम्नां-तेजसां धाम-गृहम् । तथा वीरतायाः-शौर्यस्य आधारः-आश्रयः । तथा पुरुषकारस्य-पौरुषस्य पुरं-नगरम् । तथा श्रेयसां-कल्याणानां श्रियां-लक्ष्मीणां श्रुतीनां च-वेदानां आश्रयः-आस्पदम् । पुनः किम्भूतः ? रणाङ्गणेषु न गणिता-भाविता भीः-भयं येन सः अगणितभीः ।

अथ नृपवर्णने बहुत्वैकत्वश्लेषः—

**यस्यानवरतमुत्कृष्टालयः क्रीडावनपादपाः पौरलोकश्च, अपरुषो दायादा वाग्विभवश्च, विमत्सराः सभासदो देशश्च, विकसद्रुचयोऽङ्गावयवाः क्रीडापर्वतश्च[१], अपराजयो मण्डनमणयः सेनासमूहश्च, अगतरुजो वने विनाशमन्वभवन्नितान्तं[२]रिपवः पुष्पप्रकरश्च ।**

**यस्य**-नृपतेः सम्बन्धिनः ईदृशाः, क्रीडार्थं वनपादपाः-वनवृक्षाः, पौरलोकश्च । कीदृशाः ? क्रीडावनपादपाः अनवरतं अजस्रं उत्-प्राबल्येन अर्थात् सौरभ्यजनितेन कृष्टा-आनीता अलयः-भ्रमरा यैस्ते तथोक्ताः । कीदृशः पौरलोकः ? उत्कृष्टा आलयाः-गृहा यस्य स तथाविधः । तथा यस्य-नृपस्य ईदृशा 'दायादाः' दायं विभक्तव्यं पितृद्रव्यं आददते-गृह्णन्तीति दायादाः-भागग्राहिणो वाग्विभवश्च-वचनविलासः । किम्भूता दायादाः ? अपगता रुट्-रोषो येभ्यस्ते अपरुषः । किम्भूतो वाग्विभवः ? न परुषः-रूक्षः, अपरुषः, नञ्तत्पुरुषः, स्निग्ध इत्यर्थः । तथा यस्य-नृपस्येदृशाः सभासदः-सभ्याः देशश्च । कीदृशाः सभासदः ? विगतो मत्सरः-परगुणोत्कर्षासहन येभ्यस्ते तथाविधाः । किम्भूतो देशः ? विमन्ति-पक्षियुक्तानि सरांसि यस्मिन् सः विमत्सरः । तथा यस्य-नृपस्येदृशा अंगस्य-शरीरस्यावयवाः-हस्तपादादयः क्रीडापर्वतश्च । किम्भूता अंगावयवाः ? विकसन्ती-उल्लसन्ती रुचिः-कान्तिर्येषु ते तथाविधाः । किम्भूतः क्रीडापर्वतः ? विकसतां द्रुणां-वृक्षाणां चयः-समूहो यस्मिन् स तथाविधः । श्लेषे वर्णलोपो न दोषाय । तथा यस्य नृपतेः ईदृशाः मण्डनमणयः-अलङ्काररत्नानि सेनासमूहश्च । किम्भूता मण्डनमणयः ? अपगता राजिः-रेखा येभ्यस्ते अपराजयः । एकत्वपक्षे तु—न पराजीयते-परैः पराभूयत इति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अपराजयः । तथा यस्य-नृपतेः न गता रुक्-रोगो येभ्यस्ते अगतरुजः-अगतपीडा, रिपवः-शत्रवः इतः-प्राप्तः अन्तः-मरणं यत्र, तथाभूतं विशिष्टं नाशं-नशनं भयाददर्शनं वने अन्वभवन्-अनुभूतवन्तः । **इणः क्ते इतः** [ ] इति रूपम् । पुष्पप्रकरश्च-कुसुमसमूहश्च अगतरुषु जायत इति अगतरुजः-पर्वतवृक्षसम्भूतो वने नितान्तं-भृशं विनाशं-प्रध्वंसं अन्वभवत्-समनुबभूव । अन्वभवन्नितान्तमिति ह्यस्तन्या बहुत्वैकत्वयोः सन्ति सन्धौ समानं रूपम् ।

**तस्य च कंदर्पकमनीयकान्तेर्मत्ताः करिणः सदामानो न मानिनीलोकः, कृतविटपानमनाः क्रीडोद्यानतरवो नावरोधजनः, कटकालंकृतदोषः सीमन्तिन्यो न परिपन्थिकः ।**

तथा **तस्येति** । कन्दर्पवत् कमनीया कान्तिः-शरीरच्छविर्यस्य स । तथाविधस्य च नृपतेः ईदृशा मत्ताः करिणः-हस्तिनो, न मानिनीलोकः । कीदृशाः करिणः ? सह दाम्ना-बन्धनविशेषेण विद्यन्त इति सदामानः । एकत्वपक्षे, सदा मानः-गर्वो यस्य स सदामानः, ईदृशो न । तथा तस्य ईदृशाः कीडार्थमुद्यानतरवो, न अवरोधजनः-अन्तःपुरीलोकः । किम्भूताः क्रीडोद्यानतरवः ? कृतं विटपानां-शाखानामानमनं-नीचैःकरणं येषां ते तथाविधाः । अवरोधजनस्तु कृतं विटानां पाने-चुम्बने मनो येन स, तथाविधो न भवति । तथा तस्य-नृपस्य ईदृश्यः सीमन्तिन्यो, न परिपन्थिकः-शत्रुः । किम्भूताः सीमन्तिन्यः ? कटकैः-वलयैरलंकृतौ-विभूषितौ दोषौ-बाहू यासां तास्तथाविधाः । परिपन्थी तु न कटके-प्रकरणान्नृपस्य स्कन्धावारे अलं-अत्यर्थं कृतो दोषः-उपद्रवो येन स तथाविधः । यस्य शत्रवो हीनबलत्वात् किञ्चिदप्युपद्रवं कर्तुं न शक्नुवन्तीत्यर्थः ।

**यस्य च चरणाम्भोजयुगलं[१] विमलीक्रियते नमज्जनेन न मज्जनेन ।**

**यः शृङ्गारं जनयति नारीणां नारीणाम् ।**

**यः करोत्याश्रितस्य नवं धनं न बन्धनम् ।**

**यो गुणेषु रज्यते नरमणीनां न रमणीनाम् ।**

**यस्य च नमस्याग्रहारेषु श्रूयते नलोपाख्यानं न लोपाख्यानम् ।**

**यस्य च राज्ये साक्षरस्य पुस्तकस्य[२] बन्धः, सगुणस्य कार्मुकस्याकर्षणम्[३], सुवंशप्रभवस्य च्छत्रस्य[४] दण्डः, सुजातेरुद्यानविशेषस्योत्-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**खननम्[1], कुलीनस्य कन्दस्योन्मूलनारम्भः[2], सन्मार्गलग्नस्य पुनर्वसुभाजश्चन्द्रस्यैव ग्रहणालोकनमभूत्[3] ।**

तथा **यस्य च**-राज्ञश्चरणाम्भोजयुगलं-पादपद्मद्वयं नमता जनेन विमलीक्रियते-निर्मलीक्रियते, न मज्जनेन-न क्षालनेन । एतेन जनानुरागसम्पत्तिः।

तथा यः-राजा नारीणां-स्त्रीणां शृङ्गारं-सुरतं रसभेदं मण्डनं वा जनयति । न अरीणां-शत्रूणां शृङ्गारं जनयति । "**शृङ्गारो गजमण्डने । सुरते रसभेदे च ।" इत्यनेकार्थः** [३।६५०] ।

तथा **यः**-भूपः आश्रितस्य-तच्छरणमुपागतस्य नवं-नव्यं धनं-सम्पदं करोति, न बन्धनं-न ग्रहणम् ।

तथा **यः**-राजा नरमणीनां-उत्कृष्टमनुष्याणां गुणेषु-औदार्यादिषु रज्यते-अनुरक्तो भवति, तद्गुणान् बहुमन्यत इत्यर्थः । न रमणीनां-नारीणां गुणेषु रज्यते, न स्त्रीवश इत्यर्थः ।

तथा **यस्य** च-नृपतेर्नमस्यानां-पूज्यानां देवद्विजातीयानां ग्रामेषु नलस्योपाख्यानं-भारतप्रतीतं वर्तते, लोपस्य-विनाशस्य उपाख्यानं-कथा नैव ।

तथा **यस्य च**-भूपतेः राज्ये साक्षरस्य-लिखिताक्षरस्य पुस्तकस्य बन्धः-बन्धनमभूत्, न साक्षरस्य-अधीताक्षरस्य जनस्य बन्धः, अन्यायाकरणात् । तथा यस्य-नृपस्य राज्ये सगुणस्य-ज्यासहितस्य कार्मुकस्य-धनुषः आकर्षणं-कर्णान्तप्रापणं, न सगुणस्य-शौर्यादिगुणसहितस्य जनस्य आकर्षणं-केशाकेशिरूपं युद्धम् । तथा यस्य राज्ये सुवंशभवस्य-शोभनवंशशलाकोद्भवस्य छात्रस्य दण्डः-यष्टिः, न शोभनान्वयजातस्य जनस्य दण्डः-दमनम् । तथा यस्य-नृपतेः राज्ये शोभनाजातिर्मालती यत्र ईदृशस्य उद्यानविशेषस्य उत्खननं-वृक्षपुष्पपुष्टये आलवालमार्दवाय च उत्कृष्टं खननं गोवर्द्धनमिति प्रतीतं तदभूत्, न शोभनजातेर्विप्रादेर्जनस्योत्खननं-उच्छेदनम्, चाण्डालादितया आपादनम् । तथा यस्य-भूपस्य राज्ये कौ-क्षितौ लीनस्य-आश्रितस्य कन्दस्य-सूरणस्य उन्मूलनारम्भः-उन्मूलने उद्यमोऽभूत्, न कुलीनस्य अभिजातस्य जनस्य उन्मूलने आरम्भः । तथा यस्य-राज्ञो राज्ये सत्-विद्यमानं मृगस्येदं मार्गं लग्नं-सक्तं संयोगो यस्य स तस्य । यद्वा, सन्-नित्यतान्वितो मार्गो अर्थान्नभस्तस्मिन् लग्नस्य, तथा च पुनः पुनर्वसू-*"पुनर्वसुशब्दः सदा द्विवचनान्तः"* नक्षत्रं भजतीति पुनर्वसुभाक् तस्य तथाविधस्य चन्द्रस्येव ग्रहणं-राहुयोगस्तस्यावलोकनं-

*-* चिह्नान्तर्गतपाठो नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वीक्षणं । न सन्मार्गः-सदाचारस्तास्मिन् लग्नः-प्रवृत्तस्तस्य । तथा पुनः-भूयः वसु-द्रव्यं भजतीति वसुभाक् तस्य धनिनो जनस्य ग्रहणावलोकनं-धारणेक्षणं अभूत् इति क्रिया सर्वत्र योज्या ।

**किं बहुना—**

**देवो दक्षिणदिङ्मुखस्य[1] तिलकः कर्णाटकान्ताकुच-**
**क्रीडाशैलमृगः प्रतापकदलीकन्दः[2] स किं वर्ण्यते ।**
**यस्यारातिकरीन्द्रकुम्भरुधिरक्लिन्नासिदंष्ट्राङ्कुरा**
**शौर्यश्रीर्भुजदण्डमण्डपतले सिंहीव विश्राम्यति ॥ २९ ॥**

**किं बहुना**-किं बहूक्तेन—

**देव** इति । शार्दूलविक्रीडितम् । स देवः-भीमः किं वर्ण्यते-किं स्तूयते वागगोचरगुणमयत्वात् । किम्भूतः ? दक्षिणदिगेव मुखं तस्य तिलकः-तिलकोपमः, यथा तिलकेन कृत्वा मुखं शोभते तथा तेन दक्षिणदिगिति । तथा कर्णाटकान्तानां-कर्णाटदेशीयरमणीनां यौ कुचौ तावेव उन्नतत्वकठिनत्वसाम्यात् क्रीडाशैलः-क्रीडागिरिस्तत्र मृग इव यः सः, यथा मृगः क्रीडाशैले क्रीडति तथा तासां कुचयोः खेलतीत्यर्थः। तथा प्रताप एव कदली-रम्भा तस्या कन्द इव-मूलमिव यः सः, यथा कन्दात् कन्दल्या उत्पत्तिस्तथाऽस्मात्प्रतापोत्पत्तिः । यद्वा, प्रताप एव कदली तस्या कन्द इव-मेघ इव यः सः तथाविधः । स इति कः ? यस्य-भीमनृपस्य भुजदण्ड एव मण्डपस्तस्य तले-अधोभागे अरातिकरीन्द्राणां-शत्रुगजेन्द्राणां यौ कुम्भौ-द्विपशिरःपिण्डौ तयोर्विदारणाद् यद् रुधिरं-रक्तं तेन क्लिन्नः-आर्द्रो असिरेव-खड्ग एव दंष्ट्राङ्कुरो यस्याः सा, ईदृशी शौर्यश्रीः-शूरतालक्ष्मीः सिंहीव विश्राम्यति-खेदमपनयति, यथा सिंही गजदारणोद्भूतरक्तक्लिन्नद्रंष्ट्रा मण्डपतले विश्राम्यति तथा यस्य शौर्यश्रीर्भुजयोर्विश्राम्यतीति । ॥ २९ ॥

**तस्य च महीपतेरात्मरूपोपहसित[3]समस्तसुरसुन्दरीसौन्दर्य-सारसंपत्तिरकलङ्क[4]कुलकन्दकन्दलीकंदर्पदर्पगजेन्द्रावष्टम्भस्तम्भयष्टि-रखिलजननयनकुरङ्गवागुरा रामणीयकपताकायमानोद्भिन्ननवयौवनश्रीः, शृङ्गारस्यागारम्, अवनिर्वनिताविभ्रमाङ्कुराणाम्, आभोगः सौभाग्य-भाग्यस्य[5], रङ्गशाला रागवृत्तनृत्तस्य, सर्वान्तःपुरपुरंध्रि[6]प्रधानभूताऽस्ति प्रिया प्रियङ्गुमञ्जरी नाम ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तस्य च** महीपतेः-भीमस्य सर्वासां अन्तःपुरपुरन्ध्रीणां-अवरोधजनानां मध्ये प्रधानभूता-मुख्या प्रियङ्गुमञ्जरीनाम प्रिया-रमणी अस्ति । किम्भूता ? आत्मरूपेण निजसौन्दर्येण उपहसिता-तिरस्कृता समस्तसुरसुन्दरीणां-सकलदेवीनां सौन्दर्यस्य सार-सम्पत्तिः-प्रधानसम्पत् यया सा, तदधिकसौन्दर्यशालिनीत्यर्थः । तथा अकलङ्ककुलकन्दस्य-निःकलङ्कान्यवयकन्दस्य कन्दलीवनप्ररोह इव या सा, यथा कन्दात् कन्दल्या उत्पत्तिस्तथा निःकलङ्कवंशादस्या उत्पत्तिरिति । कन्दलशब्दस्त्रीलिङ्गः । "**उपरागे समूहे च नवाङ्कुरे मृगजातिप्रभेदे च ।**" [ ] "**कन्दली तु द्रुमान्तरे**" [ ] इति । तथा कन्दर्पदर्प एव गजेन्द्रस्तस्यावष्टम्भे-आधारदाने स्तम्भयष्टिरिव या सा, यथा गजस्य स्तम्भयष्टिरवष्टम्भभूता तथा कन्दर्पदर्पस्येयमालम्बनभूता, अस्यां कन्दर्पः खेलतीत्यर्थः । तथा अखिलजनानां नयनान्येव कुरङ्गास्तेषां वागुरेव या सा, यथा वागुरया-मृगबन्धनेन मृगाः बध्यन्ते तथाऽनया समस्तजननेत्राणि स्वीयरूपे बध्यन्ते, अन्यत्र गन्तु त ददातीत्यर्थः । तथा रामणीयकेन-रम्यत्वेन पताकायमाना-पताकोपमसर्वोत्कृष्टा उद्भिन्ना-उल्लसिता नवयौवनश्रीः-तारुण्यलक्ष्मीर्यस्याः सा, यथा पताका सर्वस्योपरि राजते तथा अस्या रम्यत्वेन यौवनश्रीः पताकायत इति । तथा शृङ्गाररस्य-सुरतस्य रसभेदस्य वा अगारं-गृहं, तथा वनितानां विभ्रमा एव-विलासा एव अङ्कुरास्तेषामवनिः-भूमिः । यथा भुवोऽङ्कुरा उत्पद्यन्ते तथा विभ्रमा अस्या उत्पद्यन्त इति । तथा सौभाग्यं च-सुभगत्वं भाग्यं च-दिष्टं द्वन्द्वैकवद्भावे सौभाग्यभाग्यं तस्य आभोगः-विस्तारः, अधिकसौभाग्यभाग्यवतीत्यर्थः । तथा राग एव-अनुराग एव वृत्तं-दृढं यन्नृत्तं-नर्तनं तस्य रङ्गशाला-नृत्तभूमिगृहं । यथा रङ्गशालायां नृत्यं प्रवर्तते तथा अस्यां युवजनानां रागः प्रवर्तत इति । "**वृत्तं वृत्तौ दृढे मृते । चरित्रे वर्तुले छन्दस्यतीताधीतयोर्वृते ।**" **इत्यनेकार्थः** [२।२०१] ।

अथाऽस्या रूपवर्णनं प्रथमैकत्वद्वित्वभ्यां स्त्रीक्लीबाभ्यां च कुर्वन्नाह—

**यस्याः पद्मानुकारिणी कान्तिर्लोचने च, रम्भाप्रतिस्पर्धिनी रूपसंपत्तिरुरुमण्डले च, सुमनोहारिणी केशकबरी[1] भ्रूभङ्गचक्रे च, भ्रमरकोद्भासिनी ललाटपट्टिका कर्णोत्पले च, प्रवालानुकारिणी[2] दन्तच्छदच्छाया करचरणयुगले च ।**

**यस्याः सुवर्णमयं वचनं नूपुरं च पदे पदे मनोहरति ।**

**यस्याः सुमधुरया वाचा सदृशी शोभते कण्ठे कुसुममालिका । अलिकालयाऽप्यलकवल्लीमालया सह विराजते तिलकमञ्जरी ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**किं बहुना—**

**यस्याः**-प्रियङ्गुमञ्जर्याः ईदृशीर्कान्तिः-देहच्छविः, ईदृग्विधे च लोचने । कीदृशी कान्तिः ? पद्मा-श्रीस्तामनुकरोत्यवश्यमिति पद्मानुकारिणी, यादृशी पद्मायाः कान्तिस्तादृशी अस्या अपि । कीदृशे लोचने ? पद्मं-अब्जमनुकुरुतः-तुलयत इत्येवंशीले पद्मानुकारिणी । तथा यस्या ईदृशी रूपसम्पत्तिः-सौन्दर्यसम्पत्, ईदृशे च उरुमण्डले-सक्थिनी । किम्भूता रूपसम्पतिः ? रम्भां-अप्सरोऽन्तरं प्रतिस्पर्द्धने संहृष्यति-तिरस्करोतीति रम्भाप्रतिस्पर्द्धिनी । किम्भूते उरुमण्डले ? रम्भा-कदलीं सौकुमार्याधिक्यात् प्रतिस्पर्द्धते ये ते रम्भाप्रति-स्पर्द्धिनी । तथा यस्या ईदृशी केशकबरी-केशविन्यासः, कबरीपदेनैव केशविन्यासे प्राप्ते केशपदं व्यर्थमिति चेत् ? आह—हयहेषितादिवदुक्तपोषकत्वात् केशपदं न दोषाय । ईदृशे च भ्रूभङ्गचक्रे-भ्रूविलासमण्डले । कीदशी केशकबरी ? सुमनसः-पुष्पाणि ताभिर्हारिणी-मनोहरा । किम्भूते भ्रूभङ्गचक्रे ? सुष्ठु मनोहारिणी-मनोहरे । तथा यस्या ईदृशी ललाटपट्टिका-अलिकफलकः, ईदृशे च कर्णोत्पले-कर्णयोरवतंसीकृते[१]। किम्भूता ललाटपट्टिका ? भ्रमरकं-ललाटस्थमलकं तेन उद्भासते-शोभत इत्येवंशीला भ्रमर-कोद्भासिनी । [२]किम्भूते कर्णोत्पले ? भ्रमरकैः-भ्रमरैरुद्भासेते इति भ्रमरकोद्भासिनी ।[२] तथा यस्या ईदृशी दन्तच्छदच्छाया-ओष्ठपुटशोभा, ईदृशे करचरणयुगले-पाणिपादद्वन्द्वे । कीदृशी दन्तच्छदच्छाया ? प्रवालः-विद्रुमस्तं रक्तत्वात् अनुकरोत्यवश्यमिति प्रवालानुकारिणी । कीदृशे करचरणयुगले ? प्रवालः-पल्लवस्तमनुकुरुत इति प्रवालानुकारिणी । सर्वत्र **नान्तत्वात् स्त्रियां ई क्लीबे च री ।**

तथा **यस्याः** वचनं-वाक्यं सुष्ठु वर्णाः-अकारादयः प्रकृता यत्र तत् सुवर्णमयं पदे पदे मनोहरति । पदं-विभक्त्यन्तं, तत्प्रकृतवचने मयट् । नूपुरं च सुवर्णं-स्वर्णं तेन निर्वृत्तं सौवर्णमयं सौवर्णं पदे पदे मनोहरति । अत्र पदं-पादन्यासः यस्या इति । अत्र तृतीयाप्रथमयोः श्लेषः ।

**यस्याः** । प्रियङ्गुमञ्जर्याः वाचा-वाण्या सदृशी, कण्ठे कुसुममालिका-पुष्पमाला शोभते । किम्भूतया वाचा ? सुष्ठु मधुरा श्रोत्रानुकूला तया । किम्भूता कुसुममालिका ? सुष्ठु मधुनः-मकरन्दस्य रयः-प्रसरो यत्र तादृशी । तथा यस्या अलकवल्लरीमालया-केशकलापेन सह तिलकमेव मञ्जरी सा राजते । किम्भूतया अलकवल्लरीमालया ? अलिवत्कालः-वर्णो यस्या सा तया, यदा तु अलिवत् कालेतिक्रियते तदा नदादित्वाद्भजादिगणेत्यादिना ई

---

१. कर्णयोरवतंसीकृते नीलकमले अनू. । २-२. पाठो नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रसज्येतेति । किम्भूता तिलकमञ्जरी ? अलिकं-ललाटं आलयः-स्थानं यस्याः सा अलिका तया ।

**किं बहुना**-किं बहूक्तेन

**तस्याः कान्तिनिरुद्धमुग्धहरिणीलीलाचलच्चक्षुष-**
**स्तारुण्यस्य भरादनालसलसल्लावण्यलक्ष्मीरसः ।**
**लुभ्यल्लोकविलोचनाञ्जलिपुटैः पेपीयमानोऽपि स-**
**न्नङ्गेष्वेव न माति सुन्दरतरो रङ्गस्तरङ्गैरिव ॥ ३० ॥**

**तस्या** इति । तस्याः- प्रियङ्गुमञ्जर्याः तारुण्यस्य-यौवनस्य भरात्-अतिशयात् सुन्दरतरः-चारुतरः आ-समन्तात् अलसः-आलसः, न आलसः अनालसः, ईदृशो लसन्-विलसन् यो लावण्यलक्ष्म्याः-सौन्दर्यश्रियो रसः-शृङ्गाररूपः लुभ्यन्ति-तत्राभिलाषवन्ति भवन्ति । यानि लोकविलोचनानि-युवजननेत्राणि तान्येव अञ्जलिपुटाः-हस्तन्यास-विशेषास्तैः कृत्वा पेपीय्यमानोऽपि-अतिशयेन पीयमानोऽपि सन्नङ्गेषु-शरीरावयवेष्वेव न माति, किन्तु तरङ्गै रङ्गन्-विलसन्निव । रसो हि भरादजिह्मो लसति, तरङ्गैश्च रङ्गति । किम्भूतायास्तस्याः ? कान्त्या-स्वीयनेत्रशोभया निरुद्धे-जिते मुग्धहरिण्याः लीलया चलती-तरले चक्षुषी यया सा तस्याः । शार्दूलविक्रीडितम् ॥ ३० ॥

**एवमनयोः सकलसंसारसुखरसास्वादमुदितमनसोर्यान्ति दिवसाः ।**

**एवं** अमुना प्रकारेण सकलसंसारसुखरसस्य आस्वादेन-अनुभवनेन मुदितं-सृष्टं मनो ययोस्तौ, तादृशयोरनयोः-प्रियङ्गुमञ्जरीभीमयोर्दिवसा यान्ति-गच्छान्ति ।

**कदाचिच्चटुलतरतरुणाषट्चरणचक्रचुम्बनाक्रमणभरभज्यमान-मञ्जरीजालगलदमन्दमकरन्दबिन्दुकर्दमिलेषु विविधाङ्गविहंगविहार-विदलितदलदन्तुरान्तरालेषु स्मरबन्धुसुगन्धिगन्धवाहवाजि[१]बाह्यालीषु वरदायाः पुण्यपुलिनपालिपादपतलेषु रममाणयोः परिणतेन्द्रवारुणारुण-कपोलकान्तिरुद्घुषितदेहपिण्डकण्डूयनाकूततरलितकरकिसलया बालक-मेकमुदरदेशलग्नपरमपि पृष्ठप्रतिष्ठितमुद्वहन्ती कापि कपिकुटुम्बिनी दृष्टि-पथमवातरत् ।**

**तां चावलोक्यं[२] चेतस्यास्पदमकरोत्तयोरनपत्ययोर्विषमविषाद-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**वेदनाव्यतिकरः ।**

**कदाचित्**-कस्मिंश्चित्समये वरदायाः-नद्याः एवं विधेषु पुण्या-पवित्रा या पुलिनपालिः-तटप्रान्तस्तस्यां ये पादपाः-तरनस्तेषां तलेषु वरदातटतरुतलेषु रममाणयोः-क्रीडतोरनयोः-राज्ञीनृपयोः कोऽपि[1]कपिकुटुम्बिनी-वानरी दृष्टिपथं-नयनमार्गं अवातरत्-ताभ्यां दृष्टेत्यर्थः । किम्भूतेषु ? चटुलतराः-अतिशयेन चञ्चलास्तरुणा-नवा ये षट्चरणाः-भ्रमरास्तेषां यच्चक्रं-वृन्दं तस्य चुम्बनाय-मधुपानार्थं यदाक्रमणं-आश्रयणं तेन यो भरः-भारस्तेन भज्यमानं-नम्यमानं यन् मञ्जरीजालं, अतएव तस्माद् गलन्तः-श्रवन्तो अमन्दाः-अनल्पा ये मकरन्दबिन्दवस्तैः कर्दमिलेषु-कर्दमवत् "**सुपिच्छादित्वादिलच्**"[पिच्छादिभ्य इलच् [ ]] तथा विविधाङ्गा वर्णादिभेदात्-अनेकप्रकारशरीरा ये विहङ्गास्तेषां विहारेण-विचरणेन विदलितानि-खण्डितानि यानि दलानि-पत्राणि तैर्दन्तुरं-सञ्चारयोग्यं अन्तरालं-मध्यं येषां तानि तथा तेषु । तथा स्मरबन्धुः-वसन्तस्तेन सुगन्धिः-सुरभिगन्धिर्यो गन्धवाहः-वायुः स एव वाजी तस्य बाह्यालीव-बाह्यवाहनभूमिरिव यानि तानि तथा तेषु, यथा वाजिनो बाह्यालीषु क्रीडन्ति तथा वायुरपि तरुतलेषु भ्रमतीति । किम्भूता कपिकुटुम्बिनी ? इन्द्रवारुण्याः-विशालायाः फलं ऐन्द्रवारुणं परिणतं-पक्वं यदिन्द्रवारुणं तद्वत् आ-ईषत् अरुणा-पिङ्गला कपोलकान्तिर्यस्याः सा । "**क्वचिन्नेति**"वचनात् फलप्रत्ययस्य न लुप् । तथा उद्घुषितः-उच्छ्वसितो देह एव पिण्डः-गोलस्तस्मिन् कण्डूयने-कण्डूयायां यदाकूतं-अभिप्रायस्तेन तरलितं-कम्पितं करकिसलयं यया सा । "**पिण्डो वृन्दे जपापुष्पे गोले बोलेऽङ्गसिल्हयोः । कवले" इत्यनेकार्थः** [२।१२४-१२५] । तथा एकं बालकं उदरदेशे लग्नं, अपरमपि-द्वितीयमपि पृष्ठे-तनोः पश्चाद्भागे प्रतिष्ठितं-स्थितं बालकं उद्वहन्ती-धारयन्ती ।

**तां च**-सकुटुम्बां-कपिकुटुम्बिनीं अवलोक्य-वीक्ष्य तयोः-राजराज्ञ्योरनपत्ययोः-अपत्यरहितयोश्चेतसि-चित्ते अपत्यविषयः-सन्तानगोचरो यो विषमः-दुस्सहो विषादस्तस्य या वेदना-व्यथा तस्याः व्यतिकरः-सम्पर्क आस्पदं-अवस्थानमकरोत् । तां सापत्यां वीक्ष्य स्वयं निरपत्यत्वाद् दुःखिनौ जातावित्यर्थः । तमेवाह-

**करपत्रधाराविकर्तन[1]दुःसहदुःखदूनमनसोर्वैमनस्य[2]मभूद् भूमौ[3] राज्ये जने[4] जीविते च । किमनेनाधिपत्येनापत्यशून्येन ।**

**करपत्रधार**या-क्रकचतीक्ष्णाग्रेण यद्विकर्त्तनं-छेदनं तद्वद् दुस्सहं-सोढुमशक्यं

१. काऽपि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यद्दुखं तेन दूनं-पीडितं मनो ययोस्तौ । तयोः-दम्पत्योर्भूमौ-क्षितौ राज्ये जने-लोके जीविते च-स्वीयं प्राणधारणे वैरस्यं-विरागोऽभूत् । विनाऽपत्यं किमेभिरिति[1]। अनेन सर्वथा सर्वप्रकारेण आधिपत्येन-ऐश्वर्येण अपत्यशून्येन किम् ?

**सर्वथा [1]सकलसुरासुरकिरीटकोटिकोणमणि[2]मरीचिचञ्चरीकचुम्बितचरणाम्बुजमम्बिकाप्रियं[3] प्रतिपद्यामहे महेश्वरमित्यन्योन्यमालोचयांचक्रतुः ।**

ततस्तौ इति अन्योन्यं-परस्परं आलोचनाचयाञ्चक्रतुः-विचारयामासतुः । इतीति किम् ? अम्बिकायाः प्रियं-वल्लभं महेश्वरं शम्भुं प्रतिपद्यामहे-[2]सेवामङ्गीकुर्महे । किम्भूतं महेश्वरम् ? सकला ये सुराश्च असुराश्च तेषां याः किरीटकोटयः-बहूनि मुकुटानि तेषां कोणेषु-अश्रेषु मणयः-इन्दुनीलाद्यास्तेषां या मरीचयस्ता एव चञ्चरीकचक्रं तेन चुम्बितं-आलीढं चरणाम्बुजं यस्य स तं, सुरासुरैरपि प्रणतमित्यर्थः । अम्बुजं हि चञ्चरीके चुम्ब्यत एवेति छायार्थः । कोटिशब्दो बहुत्ववचनः ।

**अथ विपुलवियद्विलङ्घनघनश्रम[4]प्रशमनार्थमरुणेन वारुणीं प्रतिपानार्थमिवावतार्यमाणेषु रविरथतुरंगमेषु, अपरासक्ते दिवसभर्तरि शोकभरादिव तमःपटलेनापूर्यमाणामाश्वासयितुमिव पूर्वां दिशमभिधावमानासु पादपच्छायासु, हारीतहरितहरिहारिणस्तरणेररण्यान्तराच्च मन्दमपवर्त्तमानेषु गोमण्डलेषु, अस्ताचलवनदेवतादत्तरक्तचन्दनार्घसलिलप्लवप्लाव्यमान इव लोहितायति पश्चिमाशामुखे, वारविलासिनीभिः कपोलमण्डलीमण्डनाय क्रियमाणेषु पत्त्रभङ्गेषु । भयेनेव पादपैः प्रारब्धे पत्त्रसंकोचकर्मणि, विघटिष्यमाणचक्रवाककामिनीकरुणकूजितव्याजेन दिवसभर्तुरस्ताचलगमनं निवारयन्तीभिरिव विरहविधुराभिः कमलिनीभिर्विधीयमानेषु प्रार्थनाप्रणामाञ्जलिपुटेष्विव कमलमुकुलेषु, क्रमेण पश्चिमाम्भोधितर[5]ङ्गान्तररुत्तरतस्तरुणतामरसानु[5]कारिकेसरायमाणरश्मिमञ्जरीजालजटिल[6]मवलोक्य तरणिमण्डलमतिसंभ्रमभ्रमद्भ्रमरनिकुरम्ब इव प्रधावमाने दूरं[7] तिमिरपटले, कृष्णागरु[8]पङ्कपत्त्रभङ्गभूष्यमाणेष्विव दिगङ्गनामुखेषु,**

---

१. किमेतेरिति अनू. । २. तत्सेवा० अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कोकिला[१]कलापैराक्रम्यमाणेष्विव वनान्तरेषु, विकचकुवलयबहलमेचक[२]रुचिनिचयश्यामलीक्रियमाणेष्विव सलिलाशयेषु, तापिच्छगुच्छच्छदच्छाद्यमानास्विव वनवृत्तिषु, नृत्यत्कलापिकुल[३]कलापैः कालीक्रियमाणेष्विव शैलशिरःशिलातलेषु, कज्जलालेख्य[४]चित्रचर्च्यमानास्विव भवनभित्तिषु, विरहिणीनिःश्वासधूमश्यामलीक्रियमाणेष्विव पान्थावसथेषु, कस्तूरीकासलिलसिच्यमानास्विव कामुकविलासवासवेश्मवाटीषु[५], मदान्धसिन्धुरनिरुध्यमानेष्विव भूपभवनाङ्गणेषु[६] कलितकालकञ्चुकायामिव गगनलक्ष्म्याम्, मदनशरनिकरविद्रुतदरिद्रविटविषादानलस्फुलिङ्गेष्विव रङ्गत्सु ज्योतिरिङ्गणेषु, [७]तिमिरकरिकुम्भभेदभल्लीष्विव[७] निशितासु प्रदीप्यमानासु[८] प्रदीपकलिकासु, प्लवमानपाण्डुपुण्डरीककल्माषितकालिन्दीपरिस्यन्दसुन्दरेऽमृतमथनक्षणक्षुब्धक्षीरसागररसबिन्दुस्तबकितनारायणवक्षःस्थल इव कांचिदपि श्रियं कलयति ताराविराजिते वियति, विटङ्कान्तमनुसरन्तीषु वेश्यासु वेश्मपारापत[९]पतत्रिपंक्तिषु च, भ्रमरसंगतासु कुलटासु कुमुदिनीषु च, नदीपालिविरहितेषु[१०] चत्वरेषु चक्रवाकमिथुनेषु[११] च, जाते जरद्गवयकायकालकान्तिकाशिनि निशावतारे, स लोकेश्वरः[१२] 'प्रिये प्रियङ्गुमञ्जरि ! प्रसादय प्रणतप्रियकारिणमभङ्गानङ्गदर्पहरं हरम् । अहं च तदाराधनावधानमनुविधास्यामि, इत्यभिधाय यथावासमयासीत् ।

ततश्च ।

**अथेति** । अथ-अनन्तरं स लोकेश्वरः-भीमः इतीति जाते सति, यथा वासंस्वीयवासगृहं अयासीत्-जगाम । किं कृत्वा ? इति अभिधाय-उक्त्वा । इतीति किम् ? हे प्रिये !-प्रियङ्गुमञ्जरि ! प्रणतानां प्रियं-ईप्सितं करोत्यवश्यमिति प्रणतप्रियकारी तं । अनेन स्वेष्टसन्तानसिद्धिः सूचिता । तथा अभङ्गः-अजेयो यो अनङ्गस्तस्य दर्पं हरतीति अभङ्गानङ्गदर्पहरस्तं हरं प्रसादय-प्रसन्नीकुरु । अहं च तस्य-शम्भोराराधने-सेवायां च यदवधानं चित्तैकाग्र्यं तत् अनुपृष्ठलग्नो विधास्यामि-करिष्यामि । इतीति दर्शयति-केषु सत्सु ? अरुणेन-रविसारथिना वारुणीं-पश्चिमां प्रति-लक्षीकृत्य रविरथस्य ये तुरङ्गास्तेषु अवतार्यमाणेषु-नीयमानेषु सत्सु । उत्प्रेक्ष्यते, विपुलं-महत् वियद्विलंघनं-आकाशातिक्रमणं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तेन घनः-निविडो यः श्रमः-खेदस्तस्य प्रशमनार्थं-शान्त्यर्थं वारुणीं सुरां प्रतिपानार्थमिव । श्रान्तस्य खलु सुरा पाय्यते इत्यभिप्रायेणेव तेषां तत्र नयनमिति । पुनः कासु सतीषु ? पादपच्छायासु पूर्वां दिशं अभिधावमानासु-अभिमुखं गच्छन्तीषु[1] । उत्प्रेक्ष्यते, दिवसभर्त्तरि-दिनप्रिये सूर्ये अपरस्यां दिशि, पक्षे, अपरस्यां अङ्गनायां, आसक्ते-लग्ने सति शोक-भरादिव प्रियान्यासक्तिसम्भूताद् दुःखातिशयादिव तमसः-अन्धकारस्य । पक्षे, तमसः-मोहस्य पटलेन-वृन्देन आपूर्यमाणां-भ्रियमाणां पूर्वां दिशं । पक्षे, पूर्वां-पुराङ्गीकृतां । स्त्रियं आश्वासयितुमिव-धैर्यमापादयितुमिव । यथा स्वस्था भव पुनरेष्यति पतिरिति । यथा अन्या काचित्सखी भर्त्तरि अन्यासक्ते दुःखितां पूर्वां स्त्रियमाश्वासयितुं याति तथैताश्छाया अपि । पुनः केषु सत्सु ? तरणेः-सूर्याद् गोमण्डलेषु मन्दं-शनैरपवर्त्तमानेषु-वलमानेषु सत्सु । किम्भूतात्तरणेः ? हारीताः-शुकाभाः पक्षिणस्तद्वत् हरिताः-नीला ये हरयः-अश्वास्तैर्हरति-गच्छत्यभीक्ष्णमिति हारीतहरितहरिहारी तस्मात् । किम्भूतात् अरण्यान्तरात् ? हारीतैः-शुकाभपक्षिभिस्तथा हरितैः-शाद्वलैस्तथा हरिभिः-वानरैश्च हारिणः-मनोज्ञात् । पुनः कस्मिन् सति ? पश्चिमाशाया मुखे अलोहितं लोहितं भवल्लोहिता यत् तस्मिन् सति । "**लोहितादिडाज्भ्यः क्यषि**ति [पा० सू० ३।१।१३] क्यष् शतृप्रत्यये रूपम् । उत्प्रेक्ष्यते, अस्ताचलस्य या वनदेवता तया दत्तो यो रक्तचन्दनार्घः अर्घाद्रवेरिव तस्य सलिलप्लवेन-पानीयप्रवाहेन प्लाव्यमान इव-क्षाल्यमान इव, पश्चिमाशां गते रवौ वारुणीप्रकृत्यैव रक्ता भवति तत्र कविरियमुत्प्रेक्षा । पुनः केषु सत्सु ? वारविलासिनीभिः-वाराङ्गनाभिः कपोलमण्डल्याः-कपोलबिम्बस्य मण्डनाय-भूषणाय पत्रभङ्गेषु-विलेपनचित्रेषु पत्रवल्लीसंज्ञेषु पर्णानां भञ्जनेषु च क्रियमाणेषु सत्सु । "**मण्डलो बिम्बदेशयोः । भुजङ्गभेदे परिधौ शुनि द्वादशराजके**" **इत्यनेकार्थः** [३।७११] । मण्डलशब्दस्त्रिलिङ्ग । पुनः कस्मिन् सति ? पादपैः-वृक्षैः पत्राणां-पर्णानां संकोचकर्मणि-निमीलविधौ प्रारब्धे-विहिते सति, रात्रौ पत्राणि संकुचन्ति । उत्प्रेक्ष्यते, भयेनेव-भीत्येव, भीतो हि संकुचत्येव । पुनः केषु सत्सु ? कमलिनीभिः-पद्मिनीभिः कमलमुकुलकेषु-पद्मकुड्मलेषु विधीयमानेषु सत्सु, रात्रौ तेषां संकोचात् । किम्भूताभिः कमलिनीभिः ? उत्प्रेक्ष्यते, विरहेण-रविवियोगेन विधुराभिः-पीडिताभिः सतीभिः विघटिष्यमाणा-वियुज्यमाना या चक्रवाककामिनी-चक्रवाकी तस्याः करुणं-दयोत्पादकं यत्कूजितं तस्य व्याजेन-दम्भेन दिवसभर्त्तुरस्ताचलगमनं निवार-यन्तीभिरिव-निषेधयन्तीभिरिव, मा याहि अस्तगिरिशिखरमिति । किम्भूतेषु कमल-मुकुलेषु ? उत्प्रेक्ष्यते, प्रार्थना-माऽस्मात् मुञ्च इत्येवंरूपा याञ्चा तदर्थं प्रणामाञ्जलिपुटा इव नमस्कृतये संयोजितकुब्जितकरपल्लवा इव यानि तानि तथा तेषु, तेऽपि एतदाकारा एव

१. गच्छन्तीषु सतीषु अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भवन्तीति[1] । अन्यापि कामिनी विरहविधुरा सती करुणशब्देन गच्छन्तं पतिं निवारयति, अगमनप्रार्थनायै प्रणामाञ्जलिपुटमपि करोतीति । पुनः क्व सति ? क्रमेण-गमनपरिपाट्या पश्चिमाम्भोधेर्यानि तरङ्गान्तराणि-कल्लोलान्तरालानि तेषु उत्तरत्-उन्मज्जत् तरुणं-नवं यत् तामरसं-पद्मं तस्यानुकारि-तदनुकरणशीलं समुद्रप्रविष्टमित्यर्थः । तथा केसरायमाणं-किञ्जल्कोपमं यद् रश्मिमञ्जरीजालं-किरणमञ्जरीवृन्दं तेन जटिलं-व्याप्तं तरणिमण्डल-मवलोक्य दूरं-अतिशयेन तिमिरपटले-ध्वान्तवृन्दे प्रधावमाने सति । उत्प्रेक्ष्यते, अतिसम्भ्रमेण-अत्यादरेण भ्रमत्-पर्यटत् यद्भ्रमरनिकुरम्बं-अलिवृन्दं तस्मिन्निव । नवं तामरसं विलोक्य भ्रमरवृन्दं परितः पर्यटत्येव तथेदं तिमिरपटलमपि । **"संभ्रमो भीतौ संवेगादरयोरपि" इत्यनेकार्थः** [३।५०४] । पुनः केषु सत्सु ? दिगङ्गनामुखेषु कृष्णागरुपङ्केन-कालागरुकर्दमेन ये पत्रभङ्गाः-पत्रवल्ल्यस्तैर्भूष्यमाणेषु इव-मण्ड्यमानेष्विव सत्सु । तमःपटलेन दिशां तदानीं कृष्णाभत्वात् इयमुत्प्रेक्षा । तथा वनान्तरेषु-काननान्तरालेषु कोकिलाकलापैः-पिकवृन्दैराक्रम्यमाणेष्विव-आश्रियमाणेष्विव । तथा सलिलाश्रयेषु-जलाशयेषु विकचानि-विकस्वराणि यानि कुवलयानि-नीलोत्पलानि तेषां बहलः-निविडो यो मेचकरुचीनां-कृष्णकान्तीनां निचयः-पटलं तेन श्यामलीक्रियमाणेष्विव-तमसा श्यामी क्रियन्ते । तत्र कविरुत्प्रेक्षन्ते, मन्ये जलाश्रया नीलोत्पलदलकान्त्येव नीला जाता इति । तथा वनवृत्तिषु-काननसुगहनासु तापिच्छानां-तमालानां गुच्छैः-स्तबकैः छदैश्च-पत्रैः छाद्यमानास्विव-आव्रियमाणास्विव, तेषां हि गुच्छपत्राणि कृष्णानि भवन्ति । तत इयमुत्प्रेक्षा । तथा शैलस्य-गिरेः शिरसि-शृङ्गे यानि शिलातलानि तेषु नृत्यत्-ताण्डवयत् यत् कलापिकुलं-बर्हिवृन्दं तस्य ये कलापाः-पिच्छानि तैः कालीक्रियमाणेष्विव-श्यामली-क्रियमाणेष्विव, तमसा शिलातलानि नीलानि जातानि । तत्र उत्प्रेक्ष्यते, नृत्यत्कलापिनां कलापैरेव जातानीति । तथा भवनभित्तिषु गृहकुड्येषु कज्जलेन-अञ्जनेन यानि आलेख्य-चित्राणि-आलेखितुं योग्या रूपविशेषास्तैश्चर्च्यमानाष्विवमण्ड्यमानाष्विव, तच्चित्राणां कृष्णत्वादियमुत्प्रेक्षा । तथा पान्थावसथेषु-पथिकगृहेषु विरहिणीनां-वियोगिनीनां यो वियोगोद्भवो निःश्वासधूमस्तेन श्यामलीक्रियमाणेष्विव-विवर्णीक्रियमाणेष्विव, तद्विरहनिः-श्वासधूमेन श्यामानि गृहाणि जातानि न तमसा इति कवेरुत्प्रेक्षा । तथा कामुकानां विलासार्थं-क्रीडार्थं यानि वासवेश्मानि-आवासगृहाणि तेषां वेदीषु अलङ्कृतभूमीषु कस्तूरिकासलिलेन सिच्यमानाष्विव ।[2] **"वेदिरङ्गुलिमुद्रायां बुधेऽलंकृतभूतले ।" इत्यनेकार्थः** [२।२३७] । तथा भूपभवनाङ्गणेषु-राजमन्दिराजिरेषु मदान्धाः-मदाकुला ये सिन्धुराः-हस्तिनस्तैर्निरुध्यमानेष्विव-व्याप्यमानेष्विव, तत्र तेषामवस्थानस्योचितत्वान्मन्ये इदं

१. भवतीति अनू. । २. सिच्चमानाष्विव—उक्ष्यमाणास्विव अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तमो न भवति किन्त्वमी सिन्धुराबद्धा इति । तथा गगनलक्ष्म्यां-नभोरमायां कलितः-धृतः कालः मेचकः कञ्चुकः-कञ्चुलिका यया सा, तस्यामिव सत्याम् । तथा ज्योतिरिङ्गणेषु-खद्योतेषु रंगत्सु-दीप्यमानेषु सत्सु । उत्प्रेक्ष्यते, मदनशरनिकरेण-कन्दर्पबाणवृन्देन विद्रुताः-पीडिता ये दरिद्रास्सन्तो विटाः-षिड्गास्तेषां धनाभावेन आशाया अपूरणात् विषाद एव-मनःपीडैव अनलस्फुलिंगाः-अग्निकणास्तेष्विव। अत्र अनलपदं करिकलभवदुक्त-पोषकत्वात् न दुष्टम् । तथा प्रदीपकलिकासु-दीपार्चिषु प्रदीप्यमानासु-राजमानासु सतीषु । उत्प्रेक्ष्यते, निशितासु-तीक्ष्णासु तिमिरमेव करिकुम्भः-गजमस्तकपिण्डस्तस्य भेदने-विदारणे भल्लीष्विव-शस्त्रविशेषेष्विव । यथा भल्लीभिः करिकुम्भभेदनं भवेत् तथा दीपकलिकाभिस्तमो भिद्यत इति । तथा वियति-नभसि काञ्चिदप्यद्भुतां श्रियं-शोभां कलयति-धारयति सति । किम्भूते नभसि ? ताराभिर्विराजिते, अतएव पुनः किम्भूते ? प्लवमानानि-उन्मज्जन्ति पाण्डूनि-धवलानि यानि पुण्डरीकाणि-पद्मानि तैः कल्माषितः-कर्बुरितो यः कालिन्दीपरिस्यन्दः-यमुना-प्रवाहस्तद्वत्सुन्दरं-रम्यं तस्मिन् । '**कल्माषो राक्षसे कृष्णे शबलेऽपि' इत्यनेकार्थः** [३।७७३] । वियति कस्मिन्निव? उत्प्रेक्ष्यते, अमृतमथनक्षणेः-सुधार्थमथनावसरे क्षुब्धः-मथितो यः क्षीरसागरः-क्षीराब्धिस्तस्य ये रसबिन्दवः-दुग्धपृषतास्तैः स्तबकितं-शवलितं यन्नारायणवक्षःस्थलं तस्मिन्निव । तत्पक्षे, श्रियं-अब्धिपुत्रीं प्राप्नुवति सति । कालिन्दी-परिस्यन्दो नारायणवक्षश्च वियत उपमानं, पाण्डुपुण्डरीक्षाणि क्षीररसबिन्दवश्च ताराणामुपमानम्। पुनः कासु सतीषु ? वेश्यासु विटं-भुजङ्गं कान्तं-पतिं अनुसरन्तीषु-गच्छन्तीषु, च-पुनः वेश्मपारापतपतत्रिणां-गृहकपोतपक्षिणां पंक्तिषु-राजिषु[१]आवासयष्टेरुन्नतोंशो विटंकस्तस्यां तं समीपं गच्छन्तीषु । रात्रौ पारापतास्तन्निवासयष्टिषु निवसन्तीति । "**कपोलपाली विटंकः**" इति **हैममाला** [४।७६] । तथा कुलटासु-असतीषु भ्रमः-भ्रमणं तत्र रसस्तात्पर्यं तं गतासु-प्राप्तासु सतीषु । निशीथिन्यां अन्धकारवशान्निःशङ्कं ताः भ्रमन्तीति, च-पुनः कुमुदिनीषु भ्रमराः-भृङ्गास्तैः संगतासु-सम्बद्धासु, रात्रौ चन्द्रोदये तासां विकसनात्। तथा चत्वरेषु-संस्कृतभूमिषु अङ्गणेषु वा नेति-निषेधे दीपाल्या-प्रदीपपंक्त्या विरहितेषु सत्सु, दीपाल्या सहितेष्वित्यर्थः । "**चत्वरं स्यात् पथां श्लेषे स्थण्डिलाङ्गणयोरपि।" इत्यनेकार्थः** [३।५८७] । स्थण्डिलं-संस्कृताभूमिः । चः-पुनः चक्रवाकमिथुनेषु नदीनां पालिः-सेतुस्तस्यां विरहितेषु-वियोगिषु सत्सु, रात्रौ श्रीरामशापात्तेषां वियोग इति कविसमयः । तथा ईदृशे निशावतारे-क्षणदागमे जाते सति । कीदृशे ? जरतः-वृद्धस्य गतवयस्य[२] अरण्यखण्डस्य यः कायः शरीरं तस्य काला-कृष्णा या कान्तिः-छविस्तद्वत् काशते-दीप्यत इत्येवंशीला जरद्गवयकायकाल-

१. राजिसु पक्षिणं अनु. । २. गवयस्य अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कान्तिकाशी तस्मिन्। "**काशृ दीप्तौ**" [पा० धा० १२३८]।[१]

ततः-अनन्तरम्

**अखण्डितप्रभावोऽथ प्रदोषेणान्धकारिणा।**
**तस्याश्चित्ते स्थितः शम्भुरुदयाद्रौ च चन्द्रमाः॥ ३१॥**

**अखण्डी**ति। वृत्तम्। अथेति-मङ्गले, तस्याः-प्रियङ्गुमञ्जर्याश्चित्ते शम्भुः स्थितः-तद्ध्यानलीनाऽभवदित्यर्थः। उदयाद्रौ च उदयाचले चन्द्रमाः-चन्द्रः स्थितः। अथ शम्भुशशिनोः श्लेषः। किम्भूतः शम्भुः? प्रकृष्टदोषेण अन्धकारिणा-अन्धकनाम्ना प्रतिपक्षेण न खण्डितः-व्याहतः प्रभावः-वैभवं यस्य स तथाविधः। किम्भूतश्चन्द्रमाः? अन्धत्वं करोत्यवश्यमिति अन्धकारी तेन, अत्र भावप्रधानो निर्देशः। यद्वा, अन्धकारमस्मिन्नस्तीति अन्धकारी तेन अन्धकारयुक्तेन प्रदोषेण-रात्रिमुखेन न खण्डितः प्रभायाः आवः-वृद्धिर्यस्य स, न तामसभावं प्रापित इत्यर्थः। अत्र आवः-वृद्ध्यर्थः। "**अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमनप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादहन( दान )भाववृद्धिषु**" [पा० धा० ६३९] इति वचनानत्॥ ३१॥

**बिभ्रते हारिणीं छायां चन्द्राय च शिवाय च।**
**नभोगरुचये तस्मै नमस्कारं चकार सा॥ ३२॥**

**बिभ्रते** इति। अनुष्टुप्। सा-प्रियङ्गुमञ्जरी तस्मै चन्द्राय च शिवाय च-शम्भवे नमस्कारं चकार। किम्भूताय चन्द्राय? हरिणस्येयं हारिणी तां छायां-प्रतितिम्बं, कलङ्कमित्यर्थः। बिभ्रते-धारयते। तथा नभोगा-वियद्व्यापिनी रुचिः-छाया यस्य स तस्मै। किम्भूताय शिवाय? हारिणीं-चार्वीं छायां-कान्तिं बिभ्रते, तथा भोगे-विलासे रुचिः-अभिलाषा यस्याऽसौ भोगरुचिस्तस्मै, पश्चान्नञ् योगः। "**छाया पंक्तौ प्रतिमायामर्कयोषित्यनातपे। उत्कोचे पालने कान्तौ शोभायां च तमस्यपि।**" **इत्यनेकार्थः** [२।३६३]॥३२॥

**नित्यमुद्वहते तुभ्यमन्तः सारङ्गरञ्जितम्।**
**भूतिपाण्डुर गोवाह सोम स्वामिन्नमो नमः॥ ३३॥**

---

१. तथा सकलजीवलोके अन्धकारबाहुल्यात् तरुणं-नवं यत्तमालकाननं-तापिच्छवनं तद्विशतीव-प्रविशतीव। तथा अञ्जनगिरेः-कृष्णवर्तस्य गुहागर्भ-कन्दरामध्यं विशतीव। तथा इन्द्रनीलमहामणीनां यन्मन्दिरं गृहं तस्योदरं-मध्यं विशतीव तमोबाहुल्यात्, लोकानामदृश्यमानत्वे इयमुत्प्रेक्षा। अनू. प्रतौ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**नित्यमि**ति । अनुष्टुप् । हे भूत्या-भस्मना पाण्डुर-शुभ्र ! तथा गौः-वृषो वाहनं यस्य स तस्य सम्बोधने हे गोवाह !, सह उमया-गौर्या वर्तत इति सोमा[१]स्तस्य सम्बोधने हे सोमा[२] ! -हे स्वामिन् ! उमापते ! तुभ्यं नमो नमः-नमस्कारोऽस्तु । किम्भूताय तुभ्यम् ? अन्तः-मध्ये सारं-उत्कृष्टं तथा जितं-निजमहिम्ना स्तम्भितशक्ति ईदृशं गरं-कालकूटं नित्यमुद्वहते-बिभ्राणाय । पक्षे, भवनं-भूतिर्जन्म, जन्मना पाण्डुरः स्वभावः-चेतस्तस्य सम्बोधने हे भूति- पाण्डुर !, तथा गाः-किरणान् **वहतीत्यण्,** गोवाहस्तस्य सम्बुद्धौ हे गोवाह ! हे सोमस्वामिन्! चन्द्र ! तुभ्यं नमो नमः । भूतिवत् पाण्डुराश्च ता गावश्चेति कर्मधारये तु कृते समासाद् दुर्द्धरस्तथा च परमगववत् भूतिपाण्डुरगववाहः इति स्यात् । किम्भूताय तुभ्यम् ? नित्यं-सारं गौ-मृगस्तेन रञ्जितं-लाञ्छितं अन्तः-मध्यं उद्वहते । ननु नमो नमः इति पौनरुक्त्यं दोष इति चेत् ? न, हृतचित्तः सन् यत् पदमेकस्मिन्नेवाऽर्थे पुनः पुनर्वक्ति तत्र पुनरुक्तत्वं दोषाय न भवति, अपितु अलङ्कारायेति । तथा च **रुद्रटः-"वद वदेत्यादि,[३] तया वद वदेति हर्षे, तव तवास्मीति भये, चित्रं चित्रमिति विस्मये, हा हेति शोके, जय जयेति स्तुतौ, कुरु कुरु इति त्वरायां, धिग् धिगिति निन्दायां, दिशि दिशीति वीप्सायां, सर्वस्यां दिशीत्यर्थः ।"** [काव्यालङ्कार ६।३०-३१ टीका] वारं वारमिति लोकप्रसिद्धमित्यादिवदत्र न पौनरुक्त्यदोषः । यद्वा, प्रकर्षेद्विवचनम् ॥ ३३ ॥

**एवं च नातिचिरात्—**

**क्षुभ्यत्क्षीरसमुद्रसान्द्रसलिलोल्लोलैरिव प्लावयँ-**
**ल्लोकं लोचनलोभनः स्मरसुहृज्जातः स चन्द्रोदयः ।**
**यस्मिन्संस्मृत[१]वैरदारुणरणप्रारम्भिणो भ्राम्यतः**
**क्रुद्धोलूककदम्बकस्य पुरतः काकोऽपि हंसायते ॥ ३४ ॥**

**एवं चे**ति । एवं च-वक्ष्यमाणप्रकारेण नातिचिरात्-स्तोकेनैव कालेन

**क्षुभ्यदि**ति । स धवलिताशेषभुवनतलश्चन्द्रोदयो जातः । किम्भूतः? लोचने लोभयति-वीक्षणाय लोभवती करोतीति लोचनलोभनः **विन्मतोर्लुक्** इति णौ मतुप्प्रत्यये लोपः । यद्वा, लोचने लोभयति-विमोहयतीति लोचनलोभनः, **"लुभ् विमोहने"** [ ]। तथा स्मरस्य सुहृत्-मित्रं स्मरसुहृत्, तदुदये तस्योदयात् । उत्प्रेक्ष्यते, चन्द्रोदये क्षुभ्यन्-क्षोभं प्राप्नुवन् यः क्षीरसमुद्रस्तस्य सान्द्राणि-निविडानि यानि सलिलानि तेषां ये उल्लोल्लाः-कल्लोलास्तैर्लोकं प्लावयन्निव-आपूरयन्निव, क्षीरसमुद्रक्षोभस्य तत्सहचरितत्वात् । स इति

१. सोमः अनू. । २. सोम ! अनू. । ३. वद वदेत्यादि जय जयेत्यादि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कः ? यस्मिन्-चन्द्रोदये जाते सति भ्राम्यतः-काकहननार्थं पर्यटतः । क्रुद्धं काकेन दिवाटनात् कुपितं यत् उलूककदम्बकं-घूकवृन्दं तस्य पुरतः-अग्रे काकोऽपि हंस इवाचरति हंसायते श्वेतचन्द्रकान्तीनां सम्पर्कात् तस्याऽपि धवलत्वमभूत्, अतएव हंसबुद्ध्या[१] तैर्न हत इति भावः । किम्भूतस्य ? संस्मृतं-पूर्वं काकेन ते हता आसन्, अतएव स्मरणगोचरमायातं यद्वैरं-विरोधस्तेन दारुणं-रौद्रं रणं प्रारभतेऽवश्यमिति संस्मृतवैरदारुणरणप्रारम्भि तस्य । शार्दूलविक्रीडितवृत्तम् ॥ ३४ ॥

**अपि च—**

**श्च्योतच्चन्दनचारुचन्द्ररुचिभिर्विस्तारिणीभिर्भरा-**
**ज्जातेयं जगती तथा कथमपि श्वेतायमानद्युतिः ।**
**उन्निद्रो दिनशङ्कया कृतरुतः[१] काको वराकः प्रिया-**
**मन्विष्यन्पुरतः स्थितामपि यथा चक्रभ्रमं भ्राम्यति ॥ ३५ ॥**

**अपि च**-पुनः—

**श्च्योत**दिति । विस्तारिणीभिः-विस्तरणशीलाभिः श्च्योतत् द्रवरूपत्वात् क्षरत् यच्चन्दनं-गोशीर्षं तद्वच्चार्व्यः शीतलत्वात्, मनोज्ञा याः चन्द्ररुचयः-शशिकान्तयस्ताभिः इयं जगती-भूमिस्तथा कथमपि वक्तुमशक्येन, प्रकारेण भरात्-अतिशयेन अश्वेता श्वेता भवन्ती श्वेतायमाना द्युतिः-कान्तिर्यस्याः सा, तथाभूता जाता । यथा वराकः-तपस्वी काकः पुरतः स्थितामपि अग्रे व्यवस्थितामपि प्रियां-काकीमन्विष्यन्-वीक्षमाणः सन् सातत्यभ्रमणेन कुलालप्रेरितचक्रवत् भ्रमो यत्र, एवं यथा स्यात्तथा भ्राम्यति-पर्यटति । यद्वा, चक्रः-कोकस्तस्येव भ्रमो यत्र, एवं यथा भवति तथा सोऽपि रात्रौ समीपवर्तिनीमपि प्रियामन्विष्यन् भ्रमति । चक्रभ्रममिति क्रियाविशेषणं ।[२] चन्द्ररुच्या धवलितत्वात् काक्यां हंसीति भ्रमस्तत इतस्ततस्तदन्वेषणाय भ्रमतीति । किम्भूतः काकः ? दिनस्य या शंका अत्यौज्ज्वल्याद्दिनं जातमित्यारेका तया उन्निद्रः-विगतनिद्रः तथा कृतं रुतं-क्रों क्रों इति ध्वनिर्येन सः । शार्दूलविक्रीडितम् ॥ ३५ ॥

**अपि च –**

**मुग्धा दुग्धधिया गवां विदद्यते कुम्भानधो वल्लवाः,**
**कर्णे कैरवशङ्कया कुवलयं कुर्वन्ति कान्ता अपि ।**

---

१. हंस इति बुद्ध्या अनू. । २. भ्रमणक्रिया० अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कर्कन्धूफलमुच्चिनोति शबरी मुक्ताफलाकाङ्क्षया,**
**सान्द्रा चन्द्रमसो न कस्य कुरुते चित्तभ्रमं चन्द्रिका ॥ ३६ ॥**

**अपि चे**ति । अपि च-पुनः—

**मुग्धे**ति । सान्द्रा-निविडा चन्द्रमसश्चन्द्रिका-ज्योत्स्ना कस्य चित्ते भ्रमं-विपर्यासं न करोति, अन्यस्मिन् वस्तुनि अन्यबुद्धिं कस्य न जनयतीत्यर्थः । तमेवाह—मुग्धाः-अच्छेका बाला वल्लवाः-गोपालाः गवां-धेनूनां अधः दुग्धधिया-पयोबुद्ध्या कुम्भान् विदधते-कुर्वते, ते मुग्धत्वादिदं न जानन्ति यदमी चन्द्रकरा इति किन्तु दुग्धं क्षरतीति ततस्तदधो घटान् न्यस्यन्तीति । तथा कान्ता अपि कर्णे कुवलयं-नीलोत्पलं कैरवशङ्कया-कुमुदभ्रमेण कुर्वन्ति । तथा शबरी-भिल्लस्त्री कर्कन्धूफलं-बदरीफलं मुक्ताफलानां-मौक्तिकानां आकांक्षा[१]-वाञ्छा तया उच्चिनोति-आदत्ते, जात्येकवचनम् । अमूनि कर्कन्धूफलानि न भवन्ति किन्तु मुक्ता इति बुद्ध्या तानि स्वीकुरुते । बाला-गोपालाः, शबर्यः-आरण्यकस्त्रियो विपर्यस्ता भवन्तु, परं सततं परिचितोत्तंसरचनाः कान्ताः-उत्तमस्त्रियोऽपि विपर्यस्ता इति । अपेर्विस्मयार्थता । शार्दूलविक्रीडितम् ॥ ३६ ॥

**यत्र च—**

**मुक्तादाममनोरथेन वनिता गृह्णन्ति वातायने,**
**गोष्ठे गोपवधूर्दधीति मथितुं कुम्भीगतान्वाञ्छति ।**
**उच्चिन्वन्ति च मालतीषु कुसुमश्रद्धालवो मालिकाः,**
**शुभ्रान्विभ्रमकारिणः शशिकरान्पश्यन्न को मुह्यति ॥ ३७ ॥**

**यत्र च** इति । यत्र च चन्द्रोदये—

**मुक्ते**ति । शुभ्रान्-धवलान् विभ्रमं-आशंकां कुर्वन्तीत्येवंशीला विभ्रमकारिणस्तान् शशिकरान्-इन्दुरुचीः पश्यत् कः-जनः न मुह्यति-न मूढो भवति ? अपितु सर्वोऽपि । तत्प्रकारमेवाह—वनिताः-स्त्रियः वातायने-गवाक्षे मुक्तादाममनोरथेन-मौक्तिकमालाकांक्षया शशिकरान् गृह्णन्ति, यदियं मौक्तिकमालेति कृत्वा तद्ग्रहणाय करं क्षिपन्ति । तथा गोष्ठे-गोस्थाने गोपवधूः-गोपालकान्ता कुम्भीगतान्-धरान्तर्गतान् शशिकरान् दधि इति कृत्वा मथितुं वाञ्छति । च-पुनर्मालिकाः-पुष्पलाव्यो मालतीषु जातिषु कुसुमानां ग्रहणे श्रद्धा-वाञ्छा यासां ताः कुसुमश्रद्धालवः-तादृश्यः सत्यः शशिकरान् उच्चिन्वन्ति-आददते, अमी

---

१. या आकांक्षा अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शशिकरा न किन्तु पुष्पाणीति । शार्दूलविक्रीडितम् ॥ ३७ ॥

**अपि च—**

**किं कर्पूरकणाः स्रवन्ति वियतः किं वा मनोनन्दिनो,**
**मन्दाश्चन्दनबिन्दवः किमु सुधानिष्यन्दधारा इमाः ।**
**इत्थं भ्रान्तिममी जनस्य जनयन्त्यङ्गे लगन्तः परा-**
**मिन्दोः कुन्दविकासिकुड्मलदलस्रक्सुन्दरा रश्मयः ॥ ३८ ॥**[1]

**अपि चेति** । अपि च-पुनः—

**किं कर्पूरेति** । अमी-इन्दो-रश्मयः-कराः जनस्य अंगे-देहे लगन्तः-सन्तः इत्थं-अमुना प्रकारेण परां-प्रकृष्टां भ्रान्तिं-भ्रमं जनयन्ति-उत्पादयन्ति । तमेव प्रकारमाह[1]—वियतः-आकाशात् किमिति-वितर्के कर्पूरकणाः-घनसारलवाः श्रवन्ति-क्षरन्ति ? वा-अथवा किं मनो नन्दयन्ति-आह्लादयन्तीति मनोनन्दिनो मन्दाः-लघवश्चन्दनस्य-द्रवरूपस्य बिन्दवः-कणाः श्रवन्ति-शीतलत्वात्तेषामपि । अथवा इमाः सुधानिस्यन्दनस्य-पीयूषक्षरणस्य धाराः सततपाता इति ! किम्भूता रश्मयः ? कुन्दानां-पुष्पविशेषाणां विकासीनि-विकसनशीलानि यानि कुड्मलानि-मुकुलानि तेषां यानि दलानि-पत्राणि तेषां या स्रक् तद्वत्सुन्दरा इति । शौक्ल्यसौकुमार्यातिशयार्थः । कुड्मलदलप्रयोगः जरठकुन्दस्य हि दलाग्राणि अरुणानि परुषाणि च भवन्तीति । शार्दूलविक्रीडितम् ॥ ३८ ॥

**इति जनितमुदिन्दोः सिन्दुवारस्रगाभं,**
**किरति किरणजालं मण्डले दिङ्मुखेषु ।**
**हरचरणसरोजद्वन्द्वमाराधयन्ती,**
**शुचिकुशशयनीये साऽथ निद्रां जगाम ॥ ३९ ॥**

**इति श्रीत्रिविक्रमभट्टविरचितायां दमयन्तीकथायां**
**हरचरणसरोजाङ्कायां द्वितीय उच्छ्वासः ॥**

**इतीति** । अथ-अनन्तरं इति-अमुना प्रकारेण जनिता मुद्-हर्षे येन तत् । तथा सिन्दुवारस्रगाभं-निर्गुण्डीकुसुममालाप्रतिमं किरणजालं-करनिकरं दिङ्मुखेषु किरति-

१. प्रकारमेवाह अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वितन्वति सति, इन्दोर्मण्डले-चन्द्रबिम्ब सा-प्रियङ्गुमञ्जरी हरचरणसरोजद्वन्द्वं-शम्भुपादपद्मं आराधयन्ती-ध्यायन्ती शुचि-पवित्रं यत् कुशशयनीयं दर्भशय्या तस्मिन् निद्रां जगाम-अस्वपत् । समाधिलयं गतेति भावः । मालिनीवृत्तम् ॥ ३९ ॥

**इति वाचनाचार्यश्रीप्रमोदमाणिक्यगणिशिष्य-श्रीजयसोमगणि-**

**तच्छिष्यपण्डितश्रीगुणविनयगणिविरचितायां श्रीत्रिविक्रम-**

**भट्टविरचित-श्रीदमयन्तीकथाविवृतौ**

**द्वितीय उच्छ्वासः समाप्तः । २ ।**

**मोतीसरामध्ये[१] । घ ।**

● ● ●

१. मोतीसरामध्ये नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# मूलपाठस्य पाठान्तराणि

## द्वितीय उच्छ्वासः

पृ. १०६. १. °विगलद्° निपा० । २. °बहुल° निपा० । ३. °उत्सुकश्च° निपा० । ४. °तरुण्यामागतायां पु० । ५. द्विरदमदगन्धसम्बन्धानुधाविते नि० चौ०; द्विरदमदगन्धसन्धानुधाविते पु०; द्विरदमदगन्धसन्धानुधाविते निप०; द्विरदमदगन्धानुसन्धानवासितासु निपा० । ६. °वासितकुसुमित° निपा० । ७. विस्फूर्जिते निपा० । ८. कण्ठीरवकुटुम्बके निपा० । ९. 'इव' नास्ति निपा० । १०. °पान्थसार्थप्रहार° नि० चौ०; °पथिकप्रहार° निपा० । ११. शरल्लक्ष्मीप्रवेशानन्दक्रन्दनमालासु पु० नि० चौ० । १२. शरत्स्त्री° निपा०; सरःश्री° निपा० । १३. नीलसरोजेषु निपा० । १४. विहारहारि° निपा० ।

पृ. १०९. १. शालमञ्जरीः निपा० । २. केदारेष्विह निपा० । ३. वापि पु० निपा० ।

पृ. ११०. १. °प्रियातिथिना पु० नि० चौ० । २. विषमविषय° निपा० । ३. °कुठारेण पु० नि० चौ० । ४. शृङ्गारशृङ्गिशृङ्गमुत्तुंगं पु० नि० चौ० । ५. समारोप्यमाणः निपा० । ६. °मधुकरक्रंकार° पु० ।

पृ. १११. १. °नन्दिनामन्दान्दोलन° निपा० । २. °शिखरसुखसुप्त° निपा० । ३. °किन्नरीजन° निपा० । ४ °निरुद्धापाङ्गनैषधी°; °रुद्धापाङ्गनैषधीय° निपा० । ५. °हास्यलासकेन निपा० । ६. अतिक्रम्य वनपालिका राजानं जगाद निपा० । ७. ताम्बूलरागः निपा० । ८. गुर्जर° निपा० । ९. °कुशलया नि० चौ० । १०. वनपालिकया पु० नि० चौ० । ११. निवेद्यमानानि पु० नि० चौ० ।

पृ. ११३. १-१ चलच्चकोरचक्रकचक्रचञ्चु° नि० चौ० । २. स पुनरेयं; पुनरेषः निपा० ।
३. किं किं वर्ण्यते नि० चौ० । ४. अनेकपुष्पकाः पु० ।

पृ. ११४. १. मध्यमणिविभूषिते चम्पकमालाचित्रे हरिगीताकर्णनं सुखे शार्दूलविक्रीडिते हरिणीमनोहरे सहरिणप्लुते छन्दःशास्त्रे निपा० । २. शालिनी निपा० ।

पृ. ११६. १. नृत्तसक्तः

पृ. ११७ १. °वर्जितः निपा० । २. इतश्चास्य पु० नि० चौ० ।

पृ. ११८. १. सरसिजगर्भभ्रान्तभृङ्गं नि० चौ० । २. बन्धनाः निपा० ।

पृ. ११९. १. गुणयन्ति पु० नि० चौ०; गणयन्ति निपा० ।

पृ. १२०. १. सकतललितपल्लवितवनप्रदेश° निपा० । २. सर्वाङ्गीणाभरणप्रदानेन प्रसन्नाननां नि० चौ० । ३. इतस्ततश्च पु० निपा; अनन्तरं चेतस्ततश्च निपा० । ४. °विटंगवेगवेल्लद्बकुल° नि० चौ० पु०; °विहंगवेगवेल्लल्लकुचलसद्बकुल° निपा० । ५. निम्बजम्बीर° पु० निपा० । ६. °स्तम्बकदम्बके नि० चौ० । ७. °कणवीर° पु० । ८. °नीलतमतमाल° पु० नि० चौ० ।

पृ. १२१. १. °कलहंसमण्डलोत्तंस° निपा० । २. °सुन्दरामोदनन्दिनी पु० नि० चौ० । ३. आन्दोलित°

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निपा० । ४. °कक्कोललपनसकुट्मलफल° निपा० । °फनसकुसुम-कुट्मलफल°; °कंकोलकुट्फल° निपा० । ५. नारंगरंगरंगितविहंगे पु० । ६. °पुञ्ज° निपा० । ७. °जर्जरितसर्जखर्जूर° पु० नि० चौ० । ८. °नाम्नि निपा० ।

पृ. १२२. १. तत्र व्यतिकरे निपा० । २. प्रलयकालकशलप्रचण्ड° निपा० । ३. °पवनोल्लासित° नि० चौ० । ४. सुरवारणेन्द्र° पु० नि० चौ० । ५. °पाण्डु० पु० निपा० । ६. अमन्दमन्दरगिरि° निपा० । ७. शेषाहिककण° नि० चौ० । ८. अमन्दमन्द्रकोलाहल° नि० चौ० । ९. धरतलं पु० नि० चौ० । १०. सपदि राजहंसाः चौ० ।

पृ. १२३. १. विलासव्यतिकरे पु० । २. नृपतिः पु० । ३. एवावतिष्ठते स्म निपा० ।

पृ. १२४. १. °बालशैवालस्थल° निपा० । २. सरल° निपा० । ३. केप्युन्नतं नि० चौ० । ४. °सरलगलनालनालयो पु० । ५. अवलोकयन्तः निपा० । ६. समग्रव्यग्रपरिग्रहः नि० चौ० । ७. अमलदन्त° पु० नि० चौ० । ८. विहसन्निव निपा० । ९. °पक्षविलास° नि० चौ० । १०. °हासित पु० ।

पृ. १२५. १. °माणिक्यशिखरशिखायां नि० चौ०; माणिक्यशिलायां निपा० । २. विराजितो नि० चौ० । ३. °रूप्य° पु० ।

पृ. १२६. १. मदनशोकपुंनाग निपा० ।

पृ. १२७. १. °विटप° नि० चौ० ।

पृ. १२८. १. राजापि निपा० । २. मनुष्यसन्निधावपि निपा० । ३. विहंगमव्यञ्जनः निपा० । ४. केऽपि नि० चौ० । ५ यतः कर्मतः कामतः शापतः नि० चौ०; यतः कर्मतः शापतो वा निपा० । ६. प्रच्छन्नरूपाणि निपा० । ७. भवन्ति पु० । ८. भुविभूतानि निपा० । ९. कुन्दकान्तदीप्ति° चौ० ।

पृ. १२९. १. पाण्डुपुष्पप्रकरप्रकेरण पु० नि० चौ० । २. त्रासतरलतरतरत्तारक° नि० चौ०; त्रासतरलतरत्तारतारक° पु०; त्रासतरलतरतारक°; त्रासतरलतार° निपा० । ३. उत्क्षिप्रपक्षपल्लवव्याजेन निपा० । ४. रूप्यमयघण्टा° नि० चौ; रौप्यघण्टा° निपा०; रूप्यघण्टा° पु० ।

पृ. १३०. १. क्वचित् निपा० ।

पृ. १३१ १. विसादनाः पु० । २. आग्रहेणेति निपा० । ३. श्लोकोक्तिद्वयेन निपा० ।

पृ. १३२ १. निगृहेऽपि पु० ।

पृ. १३३ १. अपि तु कलहंसिके निपा० । २. सहसि पु० । ३-३ सुराजीविनीं कामयते पु० निपा० । ४. निषधेश्वरे निपा० ।

पृ. १३४ १. वैदग्धधुरन्धर चौ० । २. पात्रेषु अवास्थितिं नि० चौ०; पात्रे स्थितिं निपा० । ३. श्लाघामहे निपा० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पृ. १३५. १. प्रियाजनः निपा० । २. प्रियंवद निपा० ।

पृ. १३६ १. भवानप्येवं नि० चौ०; त्वाप्येवं विध निपा० । २. °मनोहरा निपा । ३. वागश्रूयत नि० चौ० । ४. राजा तु तस्याः नि० चौ० । ५. °तित्तिर° निपा० । ६. निमीलिताक्षः पु० नि० चौ० ।

पृ. १३७ १. सश्रीकः निपा० । २. तत्केयं दमयन्ती नि० चौ० । ३. विहङ्गमः पु० । ४. उपपन्नकतिपय° निपा० । ५. अस्ति तत्सर्वं निपा० ।

पृ. १३८ १. तनया पु० निपा० । २. भवान्कस्मादस्माकं निपा० । ३. दिव्यवाणी नि० चौ० । ४. सोऽथ पु० निपा० । ५. आरभत पु० ।

पृ. १३९. १. °पवित्रारामः निपा० । २. पुरुषैः निपा० । ३. तापीप्रायोऽप्यनुपतापी नि० चौ०; तापीप्रायोऽनुतापी निपा० ।

पृ. १४०. १. शस्त्रे वा शास्त्रे च । २. वैद्यके पु० ।

पृ. १४१. १. यत्र च पु० । २. अधरपल्लवे निपा० । ३. °मधुकरमधुरझंकार नि० चौ० ।

पृ. १४२. १. दिशमेव नि० चौ; दक्षिणं देशं पु० ।

पृ. १४३. १. तस्यान्तर्भूत° नि० चौ० । २. °अनाकूत° निपा० । ३. अमरपतिपुरप्रतिस्पर्धि पु० नि० चौ० । ४. °परिखाप्रान्तरूढ° नि० चौ०; परिखाक्रान्तं प्रान्तप्ररूढ° पु०; परिखाप्रान्तमारूढ° निपा० । ५. °मालया पु० । ६. °शरदभ्रादभ्र° निपा० । ७. सन्मार्गस्थैरपि नि० चौ० । ८. द्रव्यगुणकर्मसामान्यसमवायविशेषपण्डितैः निपा० । ९. विकटकौल° पु० ।

पृ. १४४ १. दुष्टकिरातैरिव नि० चौ० । २. सुचित्रैः पु० निपा० । ३. सतुलैरप्यतुलैः नि० चौ० । ४. विट्सभ्भृतमपि पु० नि० चौ० । ५. °कमलशोभायाः नि० चौ० । ६. रामणीयकरसकुण्डं कुण्डिनं पु० निपा०; रमणीयकरसकुण्डं कुण्डिनं नि० चौ० ।

पृ. १४८. १. पश्चिमदेशे नि० चौ० । २. प्रचण्डदण्डदाण्डिक्य° नि० चौ० ।

पृ. १४९. १. न तु तरवः पु० नि० चौ० । २. क्रीडादीर्घिका पु० नि० चौ० । ३. वरदातीरमण्डलं नि० चौ । ४. समस्तरिपुपक्षक्षोददक्षदक्षिण° नि० चौ०; समस्तरिपुपक्षक्षोददक्षिण° पु० । ५. चतुरुदधिवेलापुलिन° निपा० ।

पृ. १५० १. °भालार्च्यमान° नि० चौ० । २. धीरतायाः नि० चौ० ।

पृ. १५१. १. क्रीडापर्वतकश्च पु० । २. नितान्तरिपवः निपा० ।

पृ. १५२. १. चरणाम्भोजं निपा० । २. पुस्तकस्यैव निपा० । ३. कार्मुकस्यैव कर्षण° निपा० । ४. छत्रस्यैव निपा० ।

पृ. १५३. १. विशेपस्यैव उत्खननं निपा; विशेषस्योत्खननं लुण्टनं च पु० । २. कन्दस्यैवोन्मूलनारम्भः निपा० । ३. अभूत् न तु जनस्य पु० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पृ. १५४. १. दिङ्मुखे तिलकः निपा० । २. प्रतापहुतभुक्पुञ्जः निपा० । ३. आत्मरूपापहसित° नि० चौ० । ४. °सम्पत्तिकलङ्क° नि० चौ० । ५. सौभाग्यभागस्य नि० चौ० । ६. °पुरन्ध्रिका° नि० चौ० ।

पृ. १५५. १. केशपाशवल्लरी; केशपाशकबरी निपा० । २. प्रवालुकाकारिणी नि० चौ० ।

पृ. १५७. १. °वाह° निपा० । २. च विलोक्य निपा० ।

पृ. १५८. १. °कर्तन° पु० नि० चौ० । २. वैरस्यं नि० चौ० । ३. भूम्नि नि० चौ० । ४. निजराज्यजने निपा० ।

पृ. १५९. १. सर्वथा सकल° पु० नि० चौ० । २. °कोणशोणमणि° नि० चौ० । ३. अष्टिकापति° निपा० । ४. विलंधनश्रम° नि० चौ० । ५. °तरङ्गान्तरतस्तरुणतरताभ्रतामरस° नि० चौ०; °तरङ्गरङ्गान्तरेषूत्तरत्तरुणताम्रतामरस° निपा०; °तरङ्गान्तरे तरत्तरुणताम्रतामरस° पु० । ६. °जटिलमप्यवलोक्य निपा० । ७. दूरतः पु० । ८ कृष्णागुरु° नि० चौ० ।

पृ. १६०. १. कोकिल° नि० चौ० । २. °बहललग्नषट्पदमेचक° निपा० । ३ °कलापकाली° पु० निपा० । ४. उदेष्यमाणनिजनायकालोकप्रेष्यमाणसन्ध्यावधूकटाक्षमेकीकृतेष्विव गगनवर्त्मसु कज्जलालेख्य° निपा० । ५. कामुकविलासवेश्मवेदीषु पु०; कामुकविलासवेश्मवेदिकेषु निपा० । ६. नृपभवनाङ्गणेषु नि० चौ० । ७-७ काञ्चनीषु तिमिरकरिकुम्भ-भेदभल्लीष्विव पु० नि० चौ; काञ्चनीषु तिमिरकदिकुम्भभेद-काञ्चनभल्लीविव निपा० । ८. दीप्यमानासु पु० । ९. °पारावत° नि० चौ० । १०. °विरहित पु० । ११. °मिथुने पु० । १२. तरुणतमालकाननमिवाञ्जनगिरिगुहागर्भ-मिवेन्द्रनीलमणिमहामन्दिरोदरमिव विशति सकलजीवलोके सलोकेश्वरः पु० नि० चौ० निपा० ।

पृ. १६५. १. °सम्भृत° नि० चौ० ।

पृ. १६६. १. कृतरवः निपा० ।

पृ. १६८. १. निपा० - अपि च -

रूप्यस्थाने विडालः कलयति च करान्दुग्धबुद्ध्या सुधांशोः,
पार्श्वस्थां राजहंसः परिहरति वधूं चन्द्रिकाविप्रलब्धः ।
प्रेङ्खन्त्या हर्म्यदोलाध्वजपटशिखरच्छायया कुट्टिमाङ्के,
वल्गत्कूणाहितृष्णातरलितनयनो भ्राम्यते बभ्रुपोतः ॥

पृ. १६९. २. द्वितीय उच्छ्वासः समाप्तः पु० ।

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्री:

# तृतीय उच्छ्वास:

अथ तृतीयोच्छ्वासव्याख्या प्रतन्यते ।

**अथ[1] क्रमेण रजतकुम्भमम्भोभरणार्थमिवेन्दुमण्डलमादाय पश्चिमाम्भोनिधिपुलिनमनुसरन्त्यां तरुणकपोतकन्धरारोमराजिराजिन्यां रजन्याम्, अखिलकमलखण्डकमलिनीनां विनिद्रायमाणकमलकुड्मलविलोचनेषु कज्जलरेखास्विवोल्लसन्तीषु भ्रमरराजिषु, राजीवराजिपुञ्जनिकुञ्जे शिञ्जानमञ्जीररवमञ्जुल[2]मुन्नदत्सु शरद्बलाहकवलक्षपक्षविक्षेपपवनतरलिततरुणतामरसेषु दीर्घिकावतंसेषु, हंसेषु, [3]केङ्कारयति च चक्रवाकमिथुनमेलकमङ्गलमृदङ्ग इव रौप्यघर्घरारवसरसं सारसकुले[3], अवश्यायजलशिशिरशीकरिणि मन्दान्दोलितविनिद्रद्रुममञ्जरीरजःकणकषायिते, तमःसर्पसंदष्टोज्जीवितजगन्निश्वासायमाने, प्रस्खलति प्रभातसुरतश्रमखिन्नसुन्दरीकुचमण्डले, मरुति, मनोहारहारीतहरितहये हरतितिमिरपटलपटीं गगनलक्ष्म्याः, करपरामृष्टपयोधरे रागवति सवितरि, मृगमदमिलितबहल[4]कुङ्कुममण्डनमञ्जरीभिरिव पिञ्जरिते पुरन्दरदिङ्मुखे सुखप्रसुप्ता सा स्वप्नमद्राक्षीत् ।**

**अथेति** । अथ-अनन्तरं इति-इति सति सा-प्रियङ्गुमञ्जरी सुखेन प्रसुप्ता सती स्वप्नमद्राक्षीत्-ददर्श । इतीति दर्शयति-कस्यां सत्यां ? क्रमेण-नभोमार्गातिक्रमणपरिपाट्या रजन्यां पश्चिमाम्भोनिधेः-पश्चिमाब्धेः पुलिनं-तटं अनुसरन्त्यां-गच्छन्त्याम् । किं कृत्वा ? इन्दुमण्डलं-चन्द्रबिम्बमादाय-गृहीत्वा । चन्द्रमण्डलं किमिव ? उत्प्रेक्ष्यते, अम्भोभरणार्थं-पानीयेन पूरणार्थं रजतकुम्भमिव वृत्तत्वात् श्वेतत्वाच्च रूप्यकलशोपमा ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अन्यापि कामिनी कुम्भं शिरसि धृत्वा अम्भोभरणार्थं अम्भोधिपुलिनं याति तथेयं यामिनीति। किम्भूतायां यामिन्याम् ? तरुणः-नवो यः कपोतो रक्तलोचनस्तस्य या कन्धरायां-ग्रीवायां रोमराजिः-तनूरुहश्रेणिस्तद्वद् राजतेऽवश्यमिति । तरुणकपोतकन्धरारोमराजिराजिनी तस्यां धूसरायामित्यर्थः । पुनः कासु सतीषु ? अखिलं-सकलं यत्कमलखण्डं तत्र या कमलिन्यः-पद्मिन्यस्तासां विनिद्रायमाणानि विकसन्ति यानि कमलकुड्मलानि-पद्ममुकुलानि तान्येव विलोचनानि तेषु कज्जलरेखाष्विव-अञ्जनरेखाष्विव भ्रमरराजिषु उल्लसन्तीषु-विलसन्तीषु सतीषु । पद्मिनीनां स्त्रिय उपमानं, कुड्मलानां नेत्रोपमानं, भ्रमरराजेः कज्जलरेखोपमानम् । तथा राजीवानां-कमलानां या राजिः-श्रेणिस्तस्या यः पुञ्जः-निकरस्तस्य निकुञ्जे गहने हंसेषु शिञ्जानं शब्दं कुर्वद् यन्मञ्जीरहंसकं तस्य यो रवस्तद्वन्मञ्जुलं-मधुरं यथा भवति तथा उन्नदत्सु-कूजत्सु सत्सु । किम्भूतेषु हंसेषु ? शरदबलाहकवत्-शरदभ्रवद्वलक्षा-धवला ये पक्षाः-पक्षतयस्तेषां यो विक्षेपः-चालनं तेन यः पवनः-वायुस्तेन तरलितानि-चालितानि तरुणानि-नवानि तामरसानि यैस्ते तथाविधेषु, तथा दीर्घिकाणां वापीनां अवतंसा इव-शेखरा इव विभूषकत्वाप्येते तथा तेषु । च-पुनः सारसकुले रौप्यः-रूप्यमयो या घर्घर्यः-किङ्किणिकाः "**घृ सेचने**, [पा०धा० ९३८] औणादिकः तथा झर्झरः-वाद्यविशेषस्तेषां य आरवः-शब्दस्तद्वत् सरसं-मधुरं यथा भवति तथा क्रेंकारयति-क्रेंकारं शब्दविशेषं कुर्वति सति । उत्प्रेक्ष्यते, चक्रवाकमिथुनस्य रात्रौ वियुक्तस्य मेलकः-संयोगस्तस्मिन् मङ्गलमृदङ्ग इव-मङ्गलार्थमरुज इव । यथा वधूवरयोः संयोगे मङ्गलमृदङ्गो वाद्यते तथा वियुक्तचक्रवाक्योः संयोगे सारससखा एव मङ्गलमृदङ्गा इति। तथा एवंविधे मरुति-वायौ प्रभातसुरतश्रमेण खिन्नाः-श्रान्ताः याः सुन्दर्यस्तासां कुचमण्डले प्रस्खलति सति, अत्युन्नतत्वात् स्खलनम् । किम्भूते मरुति ? अवश्याय जलस्य-हिमाम्भसः शिशिराः शीकराः-कणा विद्यन्ते यस्मिन् स तथा तस्मिन्, तथा मन्दं-शनैरन्दोलिताः-कम्पिता विनिद्राः-विकस्वराः या द्रुममञ्जर्यस्तासां रजःकणेन-परागलवेन कषायितः-सुरभितस्तस्मिन्, "**कषायः सुरभौ रसे। रागवस्तुनि निर्यासे क्रोधादिषु विलेपने। वर्णे**" [तृ० ४१३-४१४] **इत्यनेकार्थः**। पुनः किम्भूते ? तम एव सर्पस्तेन पूर्वं संदष्टं-भक्षितं पश्चादुज्जीवितं आगतप्राणं यज्जगत् तस्य निश्वास इवाचरन् यः स तथा तस्मिन् । सर्पदष्टो यदोज्जीवति तदा निःश्वासान् मुञ्चति, तथेद जगदपि तमोऽहिना दष्टोज्जीवितं सन्निःश्वासान् मुञ्चतीव । तथा रागवति-आरक्ते सवितरि-रवौ गगनलक्ष्म्याः-नभोरमायाः तिमिरपटलमेव पटी-वासस्तां हरति-अपनयति सति । किम्भूते रवौ ? मनोहारिणः-रम्या ये हारीताः-शुकाभाः पक्षिणस्तद्वद् हरिता-नीला हयाः यस्य स तस्मिन् । पुनः किम्भूते ? करैः-किरणैः परामृष्टः-संस्पृष्टः पयोधरः-मेघो येन स तस्मिन् । अन्योऽपि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रागवान्-आसक्तः किल प्रियायाः पटीमुत्सार्य स्तनौ स्पृशति । तथा पुरन्दरदिक्मुखे-प्राचीमुखे पिञ्जरिते सति-पीतरक्ते जाते सति । उत्प्रेक्ष्यते, मृगमदेन-कस्तूरिकाद्रवेण मिलितं-सम्पृक्तं बहलं-निविडं यत्कुङ्कुमं-वाल्हीकं तस्य या मण्डनमञ्जर्यस्ताभिरिव । प्राचीमुखं रविकरैः पिञ्जरितं न, किन्तु मन्ये मृगमदयुतकुङ्कुमरसेनेति । "**पीतरक्तस्तु पिञ्जरः**" इति वाक्यात्, मृगमदमिलितकुङ्कुमेन पिञ्जरितत्वं चिन्त्यम् ।

स्वप्नमाह—

**किल सकलसुरासुरशिरःशेखरीकृत[१]चरणकमलः, कमलाधिवासेन[२] ब्रह्मणा नारायणेन च रचित[३]रुचिरस्तुतिः, कृशानुरूपेण [४]ललाटलोचनेन चन्द्रमसा च भासमानः, विकचं कर्णे कुवलयं[५] करे कपालं च कलयन्, अहिंसाटोपं मनसा शिरसा च[६] बिभ्राणः, प्रोज्ज्वलत्त्रयनार्चिश्चिताभस्म च समुद्वहन्, अधिकङ्कालेन स्कन्धेन कन्धरार्धेन च विराजमानः, सालसदृशं भुजवनं भवानीं च दधानः, सर्वदानववारं त्रिशूलं मन्दाकिनीं च धारयन्, देवो दर्पितदनुजेन्द्रनिद्राहरो हरश्चन्द्रमण्डलादवतीर्य 'पुत्रि प्रियंगुमञ्जरि ! मञ्जरीमिमां गृहाण । मा भैषीः । प्रत्युषसि[७] मन्त्रियोगाद्दमनको नाम[८] महामुनिरेष्यति[९] स तेऽनुग्रहं करिष्यति' इत्यभिधाय स्वश्रवणशेखरान्तराद[१०]मन्दमकरन्दस्यन्द[११]सुन्दरामोदमाद्यन्मधुकररवरमणीयां पारिजातकमञ्जरी[१२]मदात् ।**

**किलेति** वार्तोक्तौ । दर्पितानां-दृप्तानां दनुजाना-दैत्यानां निद्रां हरतीति दर्पितदनुजेन्द्रनिद्रहरस्तदुद्वेजकत्वात् तथा विधो हरः-देवः शशिमण्डलात्-चन्द्रबिम्बादुत्तीर्य इत्यभिधाय-उक्त्वा श्रवणशेखरान्तरात्-कर्णावतंसान्तरालात् ईदृशीं पारिजातकमञ्जरीं-कल्पवृक्षमञ्जरीमदात्-ददौ । इतीति किम् ? हे पुत्रि प्रियङ्गुमञ्जरि ! इमां मञ्जरीं गृहाण-आदत्स्व, मा भैषीः-मा भयं विधेहि । प्रत्युषसि-प्रभाते मन्त्रियोगात्-मदादेशाद्दमनको नाम महामुनिरेष्यति, स ते-तव अनुग्रहं-प्रसादं करिष्यति । किम्भूतां पारिजातकञ्जरीं ? अमन्दैः-अनल्पो यो मकरन्दस्यन्दः-मधुक्षरणं तस्मात् सुन्दरः-रम्यो य आमोदः-परिमलस्तेन माद्यन्तः-दृप्यन्तो ये मधुकरास्तेषां रवेण-झङ्कारेण रमणीयां-रम्याम् । किम्भूतो हरः ? सकलैः-समस्तैः सुरैः असुरैश्च शिरसि शेखरीकृतं-अवतंसीकृतं चरणकमलं यस्य स तं, सुरासुरैर्यत्पादपद्मं नमस्क्रियत इत्यर्थः । पुनः किम्भूतः ? ब्रह्मणा नारायणेन च रचिता-कृता रुचिरा-चार्वी स्तुतिर्यस्य स तथा विधः । किम्भूतेन ब्रह्मणा ? कमले अधिवासः-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अवस्थानं यस्य स तेन, पद्मासनत्वात् । किम्भूतेन विष्णुना ? कमलायाः-श्रियोधिवासः-आश्रयस्तेन, तत्पतित्वात् । तथा ईदृशेन ललाटलोचनेन चन्द्रमसा य भासमानः-दीप्यमानः । किम्भूतेन ललाटलोचनेन ? कृशानुरूपेण-वह्निस्वरूपेण । किम्भूतेन चन्द्रेण ? कृशेन-क्षामेण तता अनुरूपेण-अनुगतरूपेण, अविनाभावसम्बद्धमूर्तिना । कृशश्चासावनुरूपश्चेति समासः । तथा ईदृशं कर्णे कुवलयं-नीलोत्पलं, करे कपालं च-नरशिरोऽस्थि कलयन्-बिभ्रत् । कीदृशं कुवलयम् ? विकचं-सविकासं, कपालं तु विगताः कचाः-केशा अस्मादिति विकचम् । तथा मनसा अहिंसायाः-दयाया आटोपं-आवेशं बिभ्राणः-दधानः, शिरसा च-मूर्ध्ना अहिं-सर्वं साटोपं-सस्फटं बिभ्राणः । तथा ईदृशं नयनार्चिः-नेत्रज्वालां चिताभस्म च समुद्वहन्-धारयन् । किम्भूतं नयनार्चिः ? प्रोज्ज्वलत्-दीप्यमानं, भस्म तु प्रकर्षेण उज्ज्वलं-श्वेतम् । तथा ईदृशेन स्कन्धेन-अंशेन कन्दरार्धेन च-ग्रीवार्धेन विराजमानः-शोभमानः । किम्भूतेन स्कन्धेन ? अधिगतं-प्राप्तं कङ्कालं-शरीरास्थि अर्थात् खट्वाङ्गं येन स तथा तेन, कन्दरार्धेन तु कालेन-कृष्णं[१], स कालकूटत्वात्, अत्र पक्षे अधिकमिति क्रियाविशेषणम् । तथा ईदृशं भुजवनं ईदृशीं च भवानीं च दधानः-बिभ्रत् । कीदृशं भुजवनम् ? सालसदृशं-सालद्रुमतुल्यं, प्रांशुत्वात् । किम्भूतां भवानीम् ? सालसे-सलीले मन्थरे दृशौ यस्याः सा ताम् । तथा ईदृशं त्रिशूलं ईदृशीं च मन्दाकिनीं-गङ्गां धारयन् । किम्भूतं त्रिशूलम् ? सर्वान् दानवान् वारयति यत्तत्तथाभूतम् । किम्भूतां गङ्गाम् ? सर्वदा-नित्यं नवा-अविच्छा या वाः-पाथो यस्या सा ताम् । यद्वा, सर्वं ददतीति[२] सर्वदा आनयन्त इति आनवाः तथोक्ता वारोऽस्याः, एतेन कामुकत्वेन नर्मवचनादात्मजलानां स्तुत्यत्वोक्तिः ।

**सापि 'प्रसादोऽयम्' इत्यभिधाय स्वप्न एव प्रणामपर्यस्तमस्तका[१] स्तुतिमकरोत् ।**

**साऽपीति** । साऽपि-प्रियङ्गुमञ्जरी प्रसादोऽयमित्यभिधाय स्वप्न एव प्रणामार्थं-नमस्कारार्थं पर्यस्तं-नीचैः कृतं मस्तकं यया सा, तथाभूता सती स्तुतिं-वर्णनामकरोत् । तामेवाह–

**तुभ्यं नमो नमल्लोकशोकसन्तापहारिणे ।**
**व्यर्थीकृतान्धकारातिदम्भारम्भाय शम्भवे ॥ १ ॥**

१. कृष्णेन अनू. । २. ददातीति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तुभ्यमिति** । तुभ्यं शम्भवे-हरये नमः । किम्भूताय तुभ्यम् ? नमन्तो ये लोकास्तेषां शोकं-शोचनं सन्तापः-कृच्छ्रं तौ हरत्यवश्यमिति नमल्लोकशोकसन्तापहारी तस्मै । तथा व्यर्थीकृतः-विफलितः अन्धकश्चासावरातिश्च अन्धकारातिस्तस्य दम्भारम्भः-कपटोपक्रमो येन स तस्मै ॥ १ ॥

**विभो ! विभूतिसंपन्न ! पन्नगेन्द्रविभूषण ! ।**
**नमो नमोघसंकल्प[1] ! तुभ्यमभ्यन्तरात्मने ॥ २ ॥**

**विभो** इति । हे विभो ! हे स्वामिन् ! सर्वव्यापक ! वा, तथा विशेषेण भूत्या-भस्मना सम्पन्नः-समृद्धस्तस्य सम्बोधने हे विभूतिसम्पन्न ! यद्वा, हे विभूत्या-चतुर्दशभुवनाधिपत्यलक्षणया सम्पन्न ! तथा हे पन्नगेन्द्रविभूषण !-वासुकिमण्डन ! मोघः-निःफलः संकल्पः-ध्यानं यस्य स मोघसंकल्पः पश्चान्नञ् योगस्तस्य सम्बोधने हे नमोघसंकल्प !-ध्यातृमानाभिलषितार्थपूरकत्वेन सफलध्यान ! तुभ्यं नमः । किम्भूताय तुभ्यम् ? अभ्यन्तरात्मने-परमात्मस्वरूपाय ॥ २ ॥

**अत्रान्तरे तरणिकोमलकान्तिभिन्न-भास्वत्सरोजदलदीर्घविलोचनायाः ।**
**तस्याः प्रबोधमकरोद्रजनीविराम[2]-यामावसानमृदुमङ्गलतूर्यनादः ॥३॥**

**अत्रान्तरे**-अस्मिन्नवसरे अस्याः-प्रियङ्गुमञ्जर्याः रजन्या विरामस्य-निवृत्तेर्या यामः-तुर्यप्रहरस्तस्य अवसाने-अन्ते मृदुः-मधुरो मङ्गलतूर्यनादः प्रबोधं-जागरणमकरोत् । किम्भूताया अस्याः ? तरणेः-सूर्यस्य अभिनवोदितत्वात् कोमला-मृद्वी या कान्तिस्तया भिन्नानि-विकसितानि भास्वन्ति-दीप्यमानानि यानि सरोजानि-पद्मानि तेषां यद्दलं-पत्रं तद्वद्दीर्घे-आयते विलोचने यस्याः सा तस्याः ॥ ३ ॥

**क्रमेण च[3] सिच्यमानायामिव बहुल[4]कुसुम्भाम्भःकुम्भैः ककुभि, प्रभवति तारकोच्छेदनाय[5] सुकुमारे रश्मिजाले, पूर्वाचलस्थलीमधिरोहति जगत्प्रबोधप्रारम्भमङ्गलकलशोंऽशुमालिमण्डले, ताण्डवाडम्बरिणि पुण्डरीकखण्डे, हिण्डमानासु दीर्घिकाकमलमुखमण्डनमुण्डमालासु[6] कारण्डवमण्डलीषु, विश्राम्यति श्रवणपुटेषु हृदयानन्दिनि बन्दिवृदारक-वृन्दवन्दनारम्भरवे, रणयत्सु वीणावेणुकोणान्वैणिकवैणविकेषु, कण्ठ-कुहरप्रेङ्खोलनालङ्कारकुशले तारतरं गायति ग्रामरागं गायनजने, जाते**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जरज्जपाप्रसूनभिन्नस्फुटस्फटिक[१]कान्तिसमप्रभे[२] प्रभातसमये, सा समुत्थाय शुचि भूत्वा[३]विकचनवनलिनगर्भमर्घाञ्जलिमवकीर्य भगवतः सवितुः स्तुतिमकरोत् ।**

**क्रमेण चेति** । क्रमेण च-परिपाट्या जरद्-विशीर्णं यज्जपाप्रसूनं-जपापुष्पं तेन भिन्नः-प्रतिफलितत्वादारक्तकान्तिः स्फुटः-प्रकटो निर्मलो यः स्फटिकस्तस्य या कान्तिस्तया समप्रभे[१]-समानकान्तौ प्रभातसमये जाते सति सा-प्रियङ्गुमञ्जरी समुत्थाय शुचिर्भूत्वा-पवित्रीं भूय विकचानि-सविकासानि नवानि-नूतनानि नलिनानि गर्भे-मध्ये यस्य स तं,'अर्घाञ्जलिं' अर्घः-पूजाविधिस्तस्मै या अञ्जलिस्तं, अवकीर्य-विक्षिप्य भगवतः सवितुः स्तुतिमकरोत् । क्रममेव दर्शयति–क्व सति ? प्राच्यां ककुभि-दिशि तारकाणां-उडूनामुच्छेदनाय-विनाशाय सुकुमारे-मृदुनि रश्मिजाले प्रभवति-समर्थे जाते सति। पक्षे, सुकुमारः-शोभनकार्तिकेयः स हि तारकासुरोच्छेदनाय प्राभवत् । प्राच्यां किम्भूतायामिव ? उत्प्रेक्ष्यते, बहुलानि-प्रभूतानि यानि कुम्भाम्भसि तैर्भृता ये कुम्भास्तैः सिच्यमानायामिव-प्लाव्यमानायामिव रश्मिजालेन, पूर्वदिशो रक्तत्वादियमुत्प्रेक्षा । तथा अंशुमालिमण्डले-सूर्यबिम्बे पूर्वाचलस्थली-उदयाचलचूलां अधिरोहति-आक्रामति सति । किम्भूते ? जगत्प्रबोधस्य-जगज्जागरणस्य यः प्रारम्भः-उपक्रमस्तस्मिन् मङ्गलकलसमिव[२]-मङ्गलार्थकुम्भ इव । अथ जगत्प्रभोत्स्यते तदर्थमिदं भानुमण्डलं न, किन्तु मङ्गलकलशोऽयं निरमायीति । तथा पुण्डरीकखण्डे-श्वेतकमलवने ताण्डवं-नृत्यं तस्येव आडम्बरो यस्य तत्तस्मिन् प्रफुल्ले जाते सतीत्यर्थः । तथा कारण्डवमण्डलीषु-मरुतपक्षिश्रेणिषु हिण्डमानासु-भ्रमन्तीषु सतीषु । अत्र वक्ष्यमाणविशेषणान्[३] यथा अनुपपत्त्या दीर्घिकाकमलेषु इत्यध्याहार्यम् । किम्भूतासु ? दीर्घिकाणां-वापीनां यानि कमलानि तान्येव मुखानि तेषां मण्डनाय-अलङ्करणाय मुण्डमाला इव-शीर्षश्रेण्य इव यास्तास्तासु । यथा शीर्षेण आननं शोभते तथा ताभिः कमलानीति । 'दीर्घिकामण्डनमुण्डमालासु' इति पाठे दीर्घिकाणां मण्डनाय या मुण्डमालाः-कपिशीर्षाणि तासु-कारण्डवमण्डलीषु हिण्डमानासु सतीषु । तथा श्रवणपुटेषु-श्रोत्रेषु बन्दिवृन्दारकाः-मागधमुख्यास्तस्य[४] यो वन्दनारम्भरवः-स्तुत्यारम्भशब्दस्तस्मिन् विश्राम्यति सति, श्रवणपुटं प्राप्ते सतीत्यर्थः । "**वदि अभिवादनस्तुत्योः**" [पा०धा० ११] । इति धातोर्युटि प्रत्यये वन्दनमिति प्रयोगः । किम्भूते ? हृदयं-मन आनन्दयतीति हृदयानन्दी तस्मिन् । तथा

---

१. सप्रभे अनू. । २. मंगलार्थकलस इव अनू. । ३. वक्ष्यमाणान् । विशेषणान् नास्ति अनू. । ४. मागधमुख्यास्तेषां यद्वृन्दं-समूहस्तस्य अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वैणिकाः-वीणावादिनः वैणविकाः-वेणुवादिनस्ततो द्वन्द्वस्तेषु वीणानां वेणूनां च ये कोणाः-अश्रास्तान् रणयत्सु-वादयत्सु सत्सु । तथा गायनजने-गायकलोके तारेत्युच्यध्वनिः-अतिशयेन तारं-तारंतरं यथा भवति तथा ग्रामरागं-पञ्चमस्वरं, यद्वा षड्गमध्यमगान्धारान् ग्रामान् रागं च-भरतोक्तं षड्विधं श्रीरागादिकं गायति सति । किंविशिष्टे गायनजने ? कण्ठकुहरे-गलनाले यत् प्रेङ्खोलनं-घोलनं अलङ्काराश्च-मुद्रितविवृतानुनासिकादयस्तेषु कुशलः-प्रवीणस्तस्मिन् ।

अथ स्तुतिमेवाह—

**वासरश्रीमहावल्लि[१]पल्लवाकारधारिणः ।**
**जयन्ति प्रथमारम्भसम्भवा भास्वदंशवः ॥ ४ ॥**

**वासरेति** । प्रथमारम्भे-सूर्यस्य प्रथमोद्गमे सम्भवन्तीति प्रथमारम्भसम्भवाः-अभिनवोत्पन्नाः भास्वदंशवः-सूर्यकरा जयन्ति । किम्भूता रविकराः ? वासरश्रीः-दिनलक्ष्मीरेव महावल्लिस्तस्याः पल्लवाकारं-किशलयाकारं धारयन्तीति वासर-श्रीमहावल्लीपल्लवाकारधारिणः, मन्ये दिनश्रीवल्लेरमी पल्लवा इति रक्तत्वसाधर्म्यात् ॥४॥

**जयत्यम्भोजिनीखण्डखण्डितालस्यसञ्चयम् ।**
**कौङ्कुमं पूर्वदिग्गण्डमण्डनं[२] मण्डलं रवेः ॥ ५ ॥**

**जयतीति** । रवेर्मण्डलं-बिम्बं जयति । किम्भूतम् ? कुङ्कुमेन-घुसृणद्रवेण रक्तं, कुङ्कुमस्येदं वा कौङ्कुमं पूर्वदिशः-प्राच्याः गण्डमण्डनमिव-कपोलालङ्कार इव । अत्र लुप्तोत्प्रेक्षा । पुनः किम्भूतम् ? अम्भोजिनीखण्डस्य-पद्मिनीवनस्य खण्डितः-अपास्त आलस्यसञ्चयः-निद्रासम्बन्धो येन तत्तथाविधं, विकस्वरीकृताब्जिनीवनं । कौङ्कुममिति "**तेन रक्तं रागात्**" [पा० सू० ४।२।१।] इति तृतीयासमर्थाद् रागवाचिनो रक्तमित्यर्थे अण् ॥५॥

**राजापि प्रथमप्रबुद्धप्रगीतगीतध्वनि[३]ध्वस्तनिद्रः[४], सान्द्रविद्रुमप्रभा-भासि संध्यावसरे, विधाय सान्ध्यं विधिम्, [५]अधिकृतेन धर्मकर्मणि तत्कालपुरःसरेण पुरोधसा सह[६] तामेवान्वेष्टुमन्तःपुरमाजगाम ।**

**राजाऽपि**-भीमः प्रथमं-पूर्वं प्रबुद्धा-गतनिद्रा ये प्रगीताः-प्रकृष्टगीता-गाथकास्तेषां यो गीतध्वनिः-[१] रागवद्वाक्योच्चारस्तेन ध्वस्ता-गता निद्रा यस्य स तादृशः सन् सान्द्रा-

१. गीतिध्वनिः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

घना विद्रुमप्रभावत्-प्रवालच्छविवद् रक्ताभाः-कान्तिर्यस्य स तथाविधे, सन्ध्यावसरे-सायंतनसमये सन्ध्यायां भवं सान्ध्यं विधिं-अनुष्ठानं सन्ध्यावन्दनादिकं विधाय कृत्वा यत्कर्म-कार्यं तस्मिन् अधिकृतेन अधिकारिणा तत्कालं-यस्मिन् समये राजा प्रवृत्तस्तत्समयमेव पुरस्सरः-अग्रे प्रवृत्तस्तेन पुरोधसा-पुरोहितेन सह तामेव-प्रियङ्गुमञ्जरी अन्वेष्टुं-द्रष्टुं अन्तःपुरमाजगाम ।

**दृष्ट्वा च विस्मयमानः[१] स्फुरदरविन्दसुन्दराननां 'अनुगृहीतेयमिन्दुमौलिना' इत्यवधारयन्, अतिहर्षोत्कर्षमन्थरगिरा[२] तां बभाषे ।**

**दृष्ट्वा** च-अवलोक्य विस्मयमानः-विस्मयं प्राप्नुवन् स भीमः स्फुरद्-विकसद् यदरविन्दं-पद्मं तद्वत् सुन्दरं आननं यस्याः सा तथाविधां तां-प्रियङ्गुमञ्जरीमियं प्रिया इन्दुमौलिना-हरेण अनुगृहीता, अस्या उपरि हरेण प्रसादः कृत इत्यवधारयन्-मनसि चिन्तयन् सन् अतिहर्षोत्कर्षेण मन्थरा मधुरा या गीस्तया बभाषे-उवाच ।

किमाह—

**मुग्ध[३]स्निग्धनिरुद्धशब्दहसितस्फारीभवल्लोचनं,**
**निर्यत्कान्ति[४]कपोलपालिपुलकस्पष्टीकृतान्तर्धृति ।**
**एतत्ते करभोरु ! पङ्कजसदृग्दृष्ट्वा मुखं मे बला-**
**दुच्चैः किञ्चिदचिन्त्यचर्चित[५]चमत्कारं मनो हृष्यति ॥ ६ ॥**

**मुग्धेति** । वृत्तम् । हे करभोरु ! प्रिये ! ते-तव एतत् पङ्कजसदृक्-पद्मसमानं मुखं दृष्ट्वा मे-मम मनः बलात्-सहसा उच्चैः-उत्कृष्टं किञ्चिदनिर्वाच्यं अचिन्त्यः-कल्पनातीतश्चर्चितः-उक्तश्चमत्कारो यत्र कर्मणि ईदृशं यथाभवति तथा हृष्यति-हृष्टं भवति । "**चर्च्च जर्च झर्च्चश् उक्तौ भर्त्से च ।**" [ ] यद्वा, मनोविशेषणम् । किम्भूतं मनः ? अचिन्त्याधिगतचमत्कारं । किम्भूतं मुखम् ? मुग्धं-रम्यं स्निग्धं-दन्तज्योत्स्न्या चकचकायमानं निरुद्धः-निवृत्तः शब्दो यत्र मादृशं[१] यत् हसितं-हास्यं तेन स्फारीभवती-विकसती लोचने यस्मिंस्तत्तथाविधम् । "**मुग्धो मूढे रम्ये**" [२।२४९] इत्य**नेकार्थः** । तथा निर्यती-निःसरन्ती कान्तिर्यत्र ईदृश्यौ ये कपोलपाली-प्रशस्तगण्डौ तयोर्ये पुलकाः-रोमाञ्चास्तैः स्पष्टीकृता-प्रकटीकृता[२] अन्तः-चित्तस्य धृतिः-सुखं, येन तत्पुलकितकपोलेन मुखेन ज्ञायते । यदेतस्याः सन्तानवरप्राप्त्या अन्तःसुखमुत्पन्नमिति । अत्र पालिशब्दः

१. तादृशं अनू. । २. प्रकटिता अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रशंसार्थः । "**धृतिर्योगविशेषे स्याद्धारणाधैर्ययोः सुखे । सन्तोषाध्वर्योश्चापि**" [द्वि० १७८-१७९] इत्य**नेकार्थः**। मणिबन्धकनिष्ठयोर्मध्यं करभस्तद्वद् ऊरु यस्याः सा, तत औङ्, तस्याः सम्बोधने रूपं हे करभोरु ! निर्यदिति इणः शतृप्रत्ययः, **इणो यणः** [पा० सू० ६।४।८१] ॥ ६ ॥

**तत्कथय[1] शप्तासि ममाज्ञया[2] हर्षवृत्तान्तम्[3] इत्यभिहिता सा स्मित-सुधानुविद्धमुग्धवीणां[4]क्वणत्कोमलालापेन सर्वमादितः स्वप्नदर्शनमाच-चक्षे ।**

**तदिति** । हे प्रिये ! यस्मात्त्वं शप्तासि-दीयमानशपथासि[1] "**शप उपलम्भने**" [पा० धा० १०००] उपलम्भः-शपथविशेषस्तथाहि विप्राय शपते विप्रस्य शरीरं स्पृशामि इति शपथं कुर्वाण इत्यर्थः इति **प्रसादे** । शप्तासीति धातुसम्बन्धे प्रत्यया इति ★वर्तमाने क्तः साधुः, सर्वत्र तिङन्तवाच्योऽर्थो विशेषः, सुबन्तवाच्योऽर्थस्तु विशेषणमिति **न्यासोक्तेः** । शप्तेति सुबन्तस्यासीत्यनेन सम्बन्धे भूतार्थतापरित्यागेन वर्तमानार्थता भवति★ साधुः[2] । तत्तस्माद्धेतोर्ममाज्ञया हर्षवृत्तान्तं कथयेत्यभिहिता सा प्रियङ्गुञ्जरी स्मितमेव सुधा-पीयूषं तथाऽनुविद्धः-व्याप्तस्तथा मुग्धः-रम्यस्तथा वीणाक्वणत्-वीणाशब्दवत् कोमला-मृदुः पश्चात् कर्मधारयः, ईदृग्विधो य आलापस्तेन आदितः-यदा शम्भुध्यानायमुक्ताऽभूत् तत्कालादारभ्य सर्वं स्वप्नदर्शनं-स्वप्नावलोकनं यावत् आचचक्षे-कथयामास ।

**क्षितिपतिस्तु तदाकर्ण्य 'प्रिये, मयापि स भगवान् । आत्मा-नुहारिणा[5] विनायकेन स्वामिना च शक्तिमता पुत्रेणानुगम्यमानो, दग्ध-कामः पूरितकामश्च, एककपर्दक ईश्वरश्च, ससोमश्चासोमः[6], सविभव-श्चाविभूतिश्च[7], पिनाकीचापिनाकि, दृष्टः स्वप्नान्तरे तरुणार्कमण्डल-मध्यवर्ती प्रणतप्रियंकरः शंकरः । तदेष ब्राह्मणः करोतु संवादिनोरनयोः स्वप्नयोरर्थपरामर्शं' इत्यभिधाय[8] अवस्थितं[9] पुरः पुरोहितमभाषयत्[10] ।**

**क्षितिपतिस्तु**-भीमः तत्प्रियोक्तमाकर्ण्य-श्रुत्वा प्रियां प्रति इति-अमुना प्रकारेण अभिधाय पुरोवस्थितं-अग्रे स्थितं पुरोहितमभाषयत्-अवादयत् । यदेतयोः-स्वप्नयोः फलं वदेति । इतीति किम् ? हे प्रिये ! मयाऽपि स्वप्नान्तरे-स्वप्नमध्ये तरुणं-नवोदितं

---

१. दत्तशपथासि अनू. । ★-★ चिह्नान्तर्गत पाठो नास्ति अनू. । २. भूते लट् साधुः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदर्कमण्डलं तस्य मध्ये वर्तितुं शीलमस्येति तरुणार्कमण्डलमध्यवर्ती, प्रणतानां-कायवाङ्मनोभिर्नम्राणां प्रियं करोतीति प्रणतप्रियङ्करो भगवान् शङ्करो दृष्टः । तत्-तस्माद्धेतोः एष ब्राह्मणः संवदितुं शीलं ययौस्तौ संवादिनौ, तयोः संवादिनोः परस्परसंगतयोरनयोः स्वप्नयोरर्थपरामर्श-फलविचारणां करोतु । कीदृशः शम्भुरदर्शीत्याह—आत्मानं अनुहर्तुं-अनुकर्तुं शीलमस्येति आत्मानुहारी तेन आत्मप्रतिमेन शक्तिमता-सामर्थ्यवता विनायकेन-हेरम्बेण शक्तिशस्त्रभृता स्वामिना च-षण्मुखेन अनुगम्यमानः-अनुस्त्रियमाणः पुरतः शम्भुः पश्चाद्धेरम्बस्वामिनौ, शिवोऽपि विगतनायकः-सकललोकस्वामी शक्तिमांश्च-शिवशक्त्योरविनाभावसम्बन्धात्, इत्यात्मसादृश्यम् । पुनः किम्भूतः । दग्धः कामः-स्मरो येन स दग्धकामः, तथा पूरितो भक्तानां काम-इच्छा येन सः । च शब्दो विरोधद्योतकः । यो हि दग्धकामः स पूरितकामः कथं स्यात् ? तथा एकः-मुख्यः कपर्दः-जटाबन्धो यस्य स एककपर्दः, तथा ईश्वरः-भगवान् । विरोधे तु एकः संख्यां कपर्दः-वराहो यस्य स तथाविधो यो भवति स ईश्वरः-धनवान् कथं स्यात् ? तथा सह सोमेन-इन्दुना वर्तत इति ससोमः-तथा सह उमया वर्तत इति सोमः, न सोमः असोमः-पार्वत्या रहितः । विरोधे तु यः सोमसहितो भवति स सोमरहितः कथं स्यात् ? तथा विगतो भवो येभ्यस्ते विभवाः-मुक्तात्मानः तैः सह वर्तत इति सविभवः, भगवत्सा योग्यं हि मुक्तिरिति वृद्धाः, तथा विगता भूतिः-भस्म यस्य स विभूतिः, न विभूतिरविभूतिः-भस्मसहित इत्यर्थः । विरोधे तु यः सविभवः-सधनो भवति स विशिष्टा भूतिः-लक्ष्मीस्तया रहितः कथं स्यात् ? तथा पिनाकं-धनुरस्यास्तीति पिनाकी, तथा अपीति-भिन्नं नाकी-स्वर्गी । यदि वा "**चप सान्त्वने**" [ ] चपयन्ति-सान्त्वयन्ति अनुनयन्ति अवश्यमिति चापिनः-प्रसादकाः नाकिनो यस्य स चापिनाकी । विरोधे तु यः पिनाकी भवति स पिनाकरहितः कथं स्यात् ?

अथ फलं कथयन्नाह—

**सोऽपि 'देव, दिष्ट्या वर्धसे । अनल्पपुण्यप्राप्यमेतत्तरुणेन्दुमौलेरालोकनम्, चिराद[1]वाप्स्यति देवी सकलराजचक्रचूडामणिकल्पमशेषभुवनभ्रान्तशुभ्रयशःपिण्डडिण्डिममपत्यम्' इत्यनेकधा तयोराशंसांचकार[2] ।**

**सोऽपीति** । सोऽपि-पुरोहितस्तयोः-दम्पत्योरिति अनेकधाफलपूर्वकं आशंसांचकार-कथयामास । इतीति किम् ? हे देव ! -राजन् ! दिष्ट्या-आनन्देन वर्धसे, तथा एतत् तरुणः-नव इन्दुर्मौलौ यस्य स तस्य तरुणेन्दुमौलेः-शम्भोरालोकनं-दर्शनं अनल्पैः-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बहुभिः पुण्यैः प्राप्यं-लभ्यम् । तथा देवी-राज्ञी अचिरात्-शीघ्रं अपत्यं-सन्तानं अवाप्स्यति-लप्स्यते। किम्भूतमपत्यम् ? सकलराजचक्रस्य-समस्तनृपमण्डलस्य चूडामणिकल्पं-शिरोमणिसदृशं, सर्वेभ्योप्युत्तमत्वात् । तथा अशेषभुवने-त्रिलोक्यां भ्रान्तः-पर्यटितः शुभ्रयशःपिण्ड एव-धवलकीर्त्तिसमूह एव डिण्डिमः-वाद्यविशेषः पटहो यस्य तत्तथाविधं, त्रिलोक्यामपि प्रसरत्कीर्त्तीत्यर्थः । डिमेः किन् डिमेः सौत्रात् डिमः प्रत्ययो भवति, डिण्डिमः-वाद्यविशेषः इत्युणादौ ।

**एवंविधे च व्यतिकरे कोऽपि कान्तकार्तस्वरस्वरूप[१]मुत्फुल्ल-पाण्डुपुष्पमालया मेरुशिखरमिव प्रदक्षिणाक्षीणलग्नया नक्षत्रराज्या जनितशोभं जटाभारमुद्वहन्, अतिबहलमलयजरसरचितविचित्रपुण्ड्रक-[२]मण्डना[३]ममरशैलशिलामिव रङ्गत्त्रिस्रोतसं ललाटपट्टिकां कलयन्, प्लवमान इवोज्जृम्भपङ्कजकिंजल्ककपिलकायकान्तिकल्लोलेषु, करुणा-रसपूर्णवक्षःस्थलदीर्घिकाया[४]मन्तस्तरन्तीं बालकलहंसपक्षिपङ्क्तिमिव स्फारस्फाटिका[५]क्षमालिकां बिभ्राणः, कुशकौपीनवासाः[६], करकलित-कुशकाण्डकमण्डलुमण्डलैः, तरुभिरिव विविधशाखैर्विधृतजटावल्कलैश्च, पर्वतैरिव समेखलैः सरुद्राक्षाक्षमालैश्च[७], नक्षत्रैरिव समृगकृत्रिकाश्लेषैः सज्येष्ठाषाढैश्च, ससम्मदैरपि नमदाकारमाकलयद्भिः[८], अक्रीडैरपि च क्रीड-परैः, रोमशैरपि विप्रबालकैः मुनिभिः परिवृतः, सेवितपुराणपुरुषोऽप्य-जनार्दनप्रियः, प्रपन्न[९]शंकरोऽप्यनाश्रितभवः; प्रबुद्धोऽप्यबन्दीकृतजनः, श्रमणो[१०]ऽप्यजिनपरिग्रहः, ग्रहगण इव नवधात्मको लोकानाम्, धनुर्धर इव नालीकसन्धः, हंस इव नदाम्भस्थानकप्रियः[११], पन्नग इव नाकुलीनः, सरस्वतीसंनिवासस्य मुखमन्दिरस्य वन्दनमालयेव, प्रथमोद्भेदभासिन्या दंष्ट्रीकारोमराजिरेखया श्यामलितोत्तरोष्ठपृष्ठः, कलिकालकलङ्कशङ्का[१२]-शरणागतैस्त्रिभिः पुण्ययोगैरिव[१३] सुसूत्रीभूय देहलग्नैः, त्रिपुष्करस्नानाव सरविलग्नसरसविसकाण्डकुण्डलैरिव[१४] भक्त्याराधितत्रिपुरुषरचित-रक्षासूक्ष्मरेखानुकारिभिः सितयज्ञोपवीततन्तुभिर्भूषितदेहः, शमी विद्रुमा-भाधरश्रयः, प्रजापो विप्रजापश्च, सुतपाः कुतपश्श्लाधी च, विकलत्रः सकलत्रश्च, यमान्तानुसारी सकुशलश्च, विकचनवनलिनशङ्कया**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**मिलन्मुग्ध[१]मधुपमण्डलेनेव रुद्राक्षवलयेन विराजितवामपाणिपल्लवः[२], न स्मृतः स्मरापस्मारेण, नाङ्गीकृतः कृतघ्नतया, नालोकितः कितववृत्तेन, नाकलितः कलिना, न विरुद्धो[३] विरुद्धक्रियाभिः, अतितेजस्विया[४] द्वितीय इव परब्रह्मणः, तृतीय इव सूर्याचन्द्रमसोः, चतुर्थ इव गार्हपत्याहवनीयदक्षिणाग्नीनाम्, पञ्चम इव दिक्पतीनाम्, षष्ठ इव महाभूताधिदेवतानाम्, सप्तम इव मूर्तर्तूनाम्, अष्टम इव सप्तर्षीणाम्, नवम इव वसूनाम्, दशम इव ग्रहाणाम्, अनवरतहृदयकमलकर्णिकान्तःस्फुरज्ज्योतीरूपपरमब्रह्मकान्तिकलापेनेव बहिर्निर्गच्छताच्छम्, भस्मानुलेपेन कनकगिरिरिव विमल[५]चन्द्रातपेनापाण्डुरितदेहः[६], दीर्घसरसबिसकाण्डपाण्डुना प्रचण्डपवनेनोर्ध्वमुल्लालितेन[७] जटाजूटबन्धनपटप्रान्तपल्लवेन[८] शिरःपतद्वियद्गङ्गा[९]म्बुधाराहारिणी हरस्य स्वामिभक्त्या कृतानुकरणव्रतचर्यामिव कलयन्[१०], कोमले महसि तरुणे[११] वयसि वृद्धे तपसि पृथुनि यशसि गुरुणि श्रेयसि वर्तमानः, सदः सदाचाराणाम्, आश्रयः श्रुतीनाम्, महीमहिम्नः, प्रपा कृपारसस्य, क्षेत्रं क्षमाङ्कुराणाम्, पात्रं मैत्रीसुधायाः, प्रासादः प्रसादस्य, सिन्धुः साधुतायाः, तरुणार्कमण्डलमध्यान्मुनिरवातरत् ।**

**एवंविधे** च व्यतिकरे-यस्मिन्नवसरे पुरोहितस्तयोरग्रे फलं कथयति तस्मिन्नेवावसरे कोऽपि मुनिस्तरुणार्कमण्डलमध्यात् अवातरत्-अवततार । किं कुर्वन् ? एवं विधं जटाभारमुद्वहन्-बिभ्रन् । किम्भूतं जटाभारम् ? कान्तं-कम्रं यत्कार्तस्वरं-स्वर्ण तत्स्वरूपं-तद्वर्णं । पुनः किम्भूतम् ? उत्फुल्लानि-विकस्वराणि यानि पाण्डुपुष्पाणि-श्वेतकुसुमानि तेषां मालया जनिता शोभा यस्य स तम् । किम्भूतया मालया ? प्रदक्षिणेन-प्रदक्षिणावृत्त्या अक्षीणं-अविच्युतं यथा स्यात्तथा लग्ना-सम्बद्धा या सा तया । जटाभारं किमिव ? उत्प्रेक्ष्यते, नक्षत्रराज्या-नक्षत्रपंक्त्या जनितशोभं मेरुशिखरमिव-कनकाचलकूटमिव । किम्भूतया नक्षत्रराज्या ? प्रदक्षिणं-अनुकूलं अक्षीणं लग्नं-ज्योतिषप्रणीतमेषवृषादिराश्युदयो यस्यां सा तया । कनकपिङ्गजटाभारस्य मेरुशिखरं, पुष्पमालायाश्च नक्षत्रराजिरुपमानम् । तथा ईदृशीं ललाटपट्टिकां-अलिकफलकं कलयन्-धारयन् । किम्भूताम् ? अतिबहलेन-अतिनिविडेन मलयजरसेन-श्रीखण्डद्रवेण रचितानि-कृतानि विचित्राणि-आश्चर्यकारीणि पुण्ड्रकमण्डनानि-तिलकरूपालङ्काराः यस्यां सा ताम् ।[१] उत्प्रेक्ष्यते, रंगत्त्रिस्त्रोतसं-

---

१. तस्याम् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विलसद्गङ्गां अमरशैलस्य शिलामिव । ललाटस्य शिलोपमानं तिलकानां च गङ्गोपमानं । तथा उज्जृम्भाणि-विकसितानि यानि पङ्कजानि तेषां यानि किञ्जल्कानि-केसराणि तद्वत् कपिलाः-पिङ्गला ये कायकान्तिकल्लोलाः-शरीरच्छविवीचयस्तेषु आप्लवमान इव-स्नानं कुर्वन्निव, तथा स्फारा-विपुला या स्फटिकस्य अक्षमालिका-जपमालिका तां बिभ्राणः-दधत्। उत्प्रेक्ष्यते, करुणारसेन-कृपाकुलेन[१] पूर्णं-भृतं यद्वक्षःस्थलं तदेव दीर्घिका-वापी तस्या अन्तस्तरन्ती-मध्ये उन्मज्जन्ती बालकलहंसपक्षिणां पंक्तिमिव-श्रेणिमिव । कृपापूर्णवक्षसो वापी,[२] स्फटिकाक्षमालायाश्च[३] बालमरालपंक्तिरुपमानम् । तथा कुशश्च-दर्भः कौपीनवासः-कक्षापटस्तौ विद्येते यस्य स कुशकौपीनवासाः । किम्भूतः[४]? एवंविधैर्मुनिभिः परिवृतः-वेष्टितः । किम्भूतैर्मुनिभिः ? कराभ्यां-पाणिभ्यां कलितानि-धृतानि कुशकाण्डानि-दर्भस्तम्बाः कमण्डलुमण्डलं च-कुण्डिकासमूहो यैस्ते तथाविधैः, तथा विविधान्[५]-अनेकप्रकाराः शाखाः-वेदांशाः कठबह्वृचादयो येषां ते विविधशाखास्तै । "**शाखाः द्रुमांशे वेदांशे भुजे पक्षान्तरेऽन्तिके ।**" [२।२७] इत्य**नेकार्थः** । तथा जटा-केशरचना वल्कलं च-तरुत्वक् ते विधृते यैस्ते । तथा तैः कैरिव ? तरुभिरिव । किम्भूतैस्तरुभिः ? विविधाः काश्चिल्लघ्व्यः काश्चिद्गुर्व्यः शाखा येषां ते तथा[६] तैः । तथा जटामूलं वल्कलं च तदेव ते विधृते यैस्ते तथा तैः । वल्कलं च तरूणां सहजं मुनीनां चाहार्यम् । तथा सह मेखलया-मौञ्ज्या वर्तन्त इति समेखलास्तैः, तथा सह रुद्राक्षाणां अक्षमालया-जपमालया विद्यन्ते ये ते तथा तैः । कैरिव ? पर्वतैरिव । किम्भूतैस्तैः ? सह मेखलया-अद्रिमध्यभागेन वर्तन्त इति मेखलास्तैः, तथा रुद्राक्षाः अक्षाश्च-तरुविशेषास्तेषां माला-पंक्तिस्तया सह वर्तन्त इति सरुद्राक्षाक्षमालास्तैः । पुनः किम्भूतैः ? सह मृगकृतिकायां-मृगत्वचः श्लेषेण-संयोगेन विद्यन्ते इति समृगकृतिकाश्लेषास्तैः, मृगत्वचं परिदधानैः । च-पुनः ज्येष्ठा आषाढाः-प्रशस्यव्रतिदण्डास्तैः सह विद्यन्त इति स ज्येष्ठाषाढास्तैः । कैरिव ? नक्षत्रैरिव । किम्भूतैस्तैः ? मृगः-मृगशिरः कृत्तिका अश्लेषा ताभिः सहितानि समृगकृत्तिकाश्लेषाणि तैः, तथा ज्येष्ठा आषाढाश्च नक्षत्रे ताभिः सहितानि सज्येष्ठाषाढानि तैः। न सहत इति नञः सहेः षाचेति ढः [सहेः साडः सः]षाचास्यादेशो भवति । अषाढानक्षत्रं, तत्र भवो दण्डः आषाढः, भवार्थे संज्ञयामण् [तत्र भवः] तथा ससम्मदैः-तृष्णाक्षयात् सानन्दैः, तथा न मदस्य-गर्वस्य आकारं-स्तब्धत्वरूपं आकलयद्भिः-बिभ्रद्भिः विनयपरैरित्यर्थः । अपिः-विरोधे, स च तुल्यार्थे व्यायेयः । कथं ये सह सम्यक्मदेन वर्तन्त इति ससम्मदाः-सगर्वा भवन्ति, ते मदाकारं कथं न कलयन्ति । तथा क्रीडा-विषयासक्तिः न विद्यते क्रीडा येषां

१. कृपाजलेन । २. वाप्या अनू. । ३. मालिकायाश्च । ४. पुनः किंभूतः अनू. । ५. विधाः अनू. । ६. तथा नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ते अक्रीडास्तैर्ब्रह्मचारिभिः, तथा चक्रिणः-विष्णोरीडा-स्तुतिस्तत्परैः । विरोधे तु चः-पृथक्, ये अक्रीडा भवन्ति ते क्रीडापराः कथं स्युः ? तथा रोमाणि विद्यन्ते येषां ते रोमशाः "**अस्त्यर्थे रोमपिच्छाभ्यां शेलाविति शः**"[**लोमादिपामादिपिच्छादिभ्यः शनेलचः**[पा० सू० ५।२।१००]। तथा विप्राणां बालकै :-डिम्भैः । विरोधे तु, ये सरोमाणा भवन्ति ते कथं विशेषेण प्रगतकेशा भवन्ति ? पुनः किम्भूतः ? सेविताः पुराणपुरुषाः-वृद्धा येन सः, तथा न विद्यते जनानामर्दनं-पीडा प्रियं यस्य स, जनासन्तापक इत्यर्थः । तथा प्रपन्नानां-आश्रितानां शं-सुखं करोतीति प्रपन्नशङ्करः, तथा न आश्रितः-अङ्गीकृतो भवः-संसारो येन सः । तथा प्रबुद्धः विद्वान्, तथा न बन्दीकृतः-हठेन गृहीतो जनो येन सः । तथा श्रमणः-तपस्वी, तथा अजिनं-मृगादित्वक् तस्य परिग्रहः-स्वीकारो यस्य स अजिनपरिग्रहः । विरोधे तु, सेवितः पुराणपुरुषः-विष्णुर्येन ईदृशो यो भवति स न विद्यते जनार्दनः प्रियो यस्य स, ईदृग्विधः कथं स्यात् ? स तु जनार्दन प्रिय एव स्यात्। तथा प्रपन्नः शङ्करः-भवो येन, ईदृशो यो भवति स अनाश्रितभवः-अनङ्गीकृतशङ्करः कथं स्यात् ? तथा यः प्रबुद्धः-सुगतो भवति स वन्दाः-वन्दकाः बौद्धव्रतस्था न बन्दीकृतो जनो येन ईदृशः कथं स्यात् ? किन्तु बन्दीकृतजन एव स्यात् । तथा यः श्रमणः-क्षपणो भवति स कथं न विद्यते जिनस्य अर्हतः परिग्रहो यस्य ईदृग्विधः स्यात् ? किन्तु[१] जिनाङ्गीकर्त्रैव भवेत् । तथा लोकानां वधः-हिंसा तेन सहित आत्मा यस्यासौ वधात्मकस्तथाविधो न, न लोकहन्तेत्यर्थः । क इव ? ग्रहगण इव-ग्रहसमूह इव। स च किम्भूतः ? नवधात्मकः-नवसंख्या[२]स्वरूपः आदित्यादिभेदात् । तथा अलीका-असत्या सन्धा-प्रतिज्ञा यस्य सः अलीकसन्धस्तथाविधो न, सत्यप्रतिज्ञ इत्यर्थः । क इव ? धनुर्धर इव-धनुष्क इव । स च किम्भूतः ? नालीकस्य-शरस्य सन्धानं यस्य स नालीकसन्धः । तथा दम्भवेदिनो दाम्भाः-मायिकास्तेषां स्थानकं-आश्रयः प्रियं यस्य स, तथाविधो न, अमायिस्थानसेवीत्यर्थः । क इव ? हंस इव। स च कीदृक् ? नदस्य अम्भ एव स्थानकं तत् प्रियं यस्यासौ तथा विधः। तथा अकुलीनः-अनभिजातो न, क इव ? पन्नग इव । स च कीदृक् ? नाकुः-वल्मीकस्तत्र लीनः-आश्रितः । पुनः किम्भूतो मुनिः ? दंष्ट्रिकायाः-दाढिकाया यः रोमराजिस्तस्या या रेखा-विस्तारस्तया श्यामलितं-मेचकितं उत्तरोष्ठपृष्ठं-उपरितनाधरोपरिभागो यस्य स । "**रेखा स्यादल्पके छद्मन्याभोगोल्लेखयोरपि** ।" [२।२५] इत्य**नेकार्थः** । किम्भूतया दंष्ट्रिका रोमराजिरेखया ? प्रथमोद्भवेन-पूर्वोद्गमेन भासतेऽवश्यमिति प्रथमोद्भेदभासिनी तया, तदानीमेव सा रोमराजिर्निःसृताऽस्ति, तेन भृशं भासते । उत्प्रेक्ष्यते, मुखमेव मन्दिरं तस्य शोभायै वन्दनमालयेव-तोरणस्रजेव । किम्भूतस्य मुखस्य ? सरस्वत्याः-भारत्याः सत्-

१. अपितु अनू. । २. "संख्य" अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शोभनो निवासः-अवस्थानं यस्मिंस्तत्तस्य । मुखस्य मन्दिरं, रोमराजेश्च तोरणस्रगुपमानम् । अत्र दंष्ट्रिकाशब्देन कूर्चमेव गृह्यते, अन्यथा श्यामलितोत्तरोष्ठपृष्ठत्वं कथं घटेत । पुनः किम्भूतः ? सिताः-श्वेता ये यज्ञोपवीततन्तवस्तैर्भूषितो देहो यस्य स भूषितदेहः । किम्भूतैः ? भक्त्या आराधितैः-सेवितैः त्रिपुरुषैः-हरिहरब्रह्मभिः रचिता प्रत्येकं रक्षार्थं या सूक्ष्मरेखास्ता अनुकर्तुं शीलं येषां ते भक्त्याराधितत्रिपुरुषरचितरक्षासूक्ष्मरेखानुकारिणस्तैः । मन्ये, सेवया प्रसन्नीभूतैः हरिहरब्रह्मभिः रक्षार्थमेतस्य वक्षसि तिस्रः सूक्ष्मा रेखा विहिताः सन्तीति । त्रिपुरुषैरिति त्रयः पुरुषा यत्रेति समुदायिन एव समुदायाः[1] इति दर्शने बहुवचनं व्यतिरिक्तसमुदायपक्षस्तु नेहाश्रित इति । उत्प्रेक्ष्यते, सुसूत्रीभूय-परस्परमविरोधं विधाय, पक्षे सुसूत्ररूपताश्रित्य देहलग्नैः-मुनिवपुः प्राप्तैः त्रिभिः पुण्ययोगैः कृतादिभिरिव । ननु किमर्थमत्र तेषामागमनम् ? इत्याह—कलिकालस्य-कलियुगस्य यः कलङ्कः-अपवादस्तस्य या शङ्का-भयं तस्याः शरणार्थमागतानि तैः कृतयुगादीनि त्रीण्यपीत्यचिन्तयन् माऽस्माकं कलि-कालापवादो लगतु ततस्तद्भीत्या मन्ये उपवीतव्याजेन मुनिमाश्रितानि । अन्योऽपि भीतःकस्यचित् प्रभोः शरणं गच्छत्येव । "**कलङ्कोऽङ्कापवादयोः । कालोयसमले चापि ।**" [३।१७-१८ इत्**यनेकार्थः**] । पुनरुत्प्रेक्ष्यते, त्रिपुष्करेषु-[2]त्रिपुष्कराख्यतीर्थविशेषेषु स्नानावसरे-अभिषेकसमये विलग्नानि सरसानि-आर्द्राणि विसकाण्डान्येव-कमलनालान्येव कुण्डलानि-वलयास्तैरिव । मन्ये, ऋषिणा त्रिषु पुष्करेषु स्नानं विहितं तत्र प्रत्येकमेकैक विसकाण्डवलयो लग्नस्ततस्त्रयोऽमी तेषां त्रयाणां तीर्थानां विसकाण्डवलया इति । "**कुण्डलं वलये पाशे ताटङ्के**" [३।३७५] इत्**यनेकार्थः** । तथा शमो अस्यास्तीति शमी-शान्तः, तथा विद्रुमं-प्रवालं तदाभौ रक्तत्वात्, तत्तुल्यौ अधरौ-ओष्ठौ यस्य स विद्रुमाभाधरः। तथा प्रजां पातीति प्रजापः क्रतुकृद्भ्यो हि प्रजात्राणं, तथा विप्रान् जापयति-जपं प्रापयति विप्रजापः । भद्रदर्शनान्वयत्वात् । "**जप हृदुच्चारे** [पा० धा० ३९८] । **जपतेर्णिच्**" तथा सुष्ठु तपः-व्रतमस्येति सुतपाः, तथा कौ-भुवि तपसा-लोकोत्तरेण धर्मेण श्लाघनीयः-शीलः कुतपः श्लाघी । यद्वा, कौ तपसा श्लाघा अस्यास्तीति कुतपः श्लाघी, "**व्रीह्यादित्वादिनिः**" [ ] "**तपश्चान्द्रायणादौ स्याद्धर्मे लोकोत्तरेऽपि च ।**" [ ] इति **विश्वः** । यदा कुतपो दर्भस्तदा सुतपा इत्युक्तो विसर्गाभावेऽपि श्रुत्याविरोधप्रतीतिः । तथा विकलत्रः-विगतकलत्रः । तथा सकलं त्रायते इति सकलत्रः । तथा अहिंसा-सत्यास्तेयब्रह्मचर्यापरिग्रहाः यमास्तेषां अन्तं-पारं अनुसर्तुशीलमस्येति यमान्तानुसारी, तथा कुशान्-दर्भान् लान्ति-गृह्णन्ति ये ते कुशलाः-दक्षास्तैः सह वर्तत इति सकुशलः । चशब्दः-सर्वत्रविरोधे, तद्यथा—यः शमी नामा तरुर्भवति स कथं द्रुमाभां धरतीति

---

१. समुदाय अनू. । २. त्रिषु अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

द्रुमाभीधरः, विः-नञर्थे विद्रुमाभाधरो न भवेत् ? किन्तु द्रुमाभामेव धरेत् । तथा यः सुतपा भवेत् स कथं कुत्सिततपः श्लाघनीयाशीलः ? । तथा यो विगतकलत्रः स कथं कलत्रसहितः स्यात् ? । तथा यो यमस्य अन्तकस्य अन्तं-समीपं अनुसरत्यवश्यं स कथं सह कुशलेन-क्षेमेण वर्तत इति सकुशलः ? । पुनः किम्भूतः ? रुद्राक्षवलयेन-रुद्राक्षजपमालया विराजितो वामः-सव्यः पाणिपल्लवो यस्य सः । उत्प्रेक्ष्यते, विकचं-सविकासं नवनूतनं यन्नलिनं तस्य शंकया-भ्रमेण मिलत्-संयुज्यमानं मुग्धं अप्रौढं यन्मधुपमण्डलं-भ्रमरवृन्दं तेनेव । मन्ये, असौ रुद्राक्षवलयो न भवति किन्तु नलिनोपकण्ठमागता मधुपमण्डलीति । तथा स्मर एव अपस्मारः-ग्रहावेशस्तेन न स्मृतः, न स्मराधीन इत्यर्थः । तथा कृतं हन्तीति कृतघ्नस्तद्भावस्तत्ता तया नाङ्गीकृतः, परकृतोपचारवेत्तेत्यर्थः ।[१] तथा कितववृत्तेन-कपटाचारेण न आलोकितः-नेक्षितः, अदम्भ इत्यर्थः । तथा कलिना-कलहेन न[२] आकलितः-स्वीकृतः, न कलहप्रिय इत्यर्थः । तथा विरुद्धक्रियाभिः-असभ्यकर्मभिः न विरुद्धः-विशेषेण आक्रान्तः, सत्कर्मकर्त्रेत्यर्थः । तथा अतितेजस्वितया-अतिदीप्तिमत्तया परमब्रह्मणः-प्रकृष्टाऽऽत्मनो, द्वितीय इव, एकं तु दीप्तिमत्परमब्रह्माऽऽसीदेव द्वितीयं त्वयमेव, अतितेजस्वित्वात् । तथा सूर्याचन्द्रमसोः तृतीय इव, अत्राप्यतितेजस्विता हेतुः । सूर्याचन्द्रमसोरित्यत्र अवातसहोक्तस्वराणां द्वन्द्व[**देवता द्वन्द्वे च** पा० सू० ६।२।२६]इति दीर्घः । तथा गार्हपत्या हवनीया दक्षिणाग्नीनां चतुर्थ इव, अत्राऽपि स एव हेतुः । तथा दिक्पतीनां-दिक्पालानां इन्द्रयमवरुणकुबेराणां पञ्चम इव, प्रजापालकत्वात् । तथा महाभूतानां-पृथिव्यादीनां पञ्चानामधिष्ठात्र्यो देवता-महाभूताधिदेवतास्तासां षष्ठ इव, अस्याऽपि महाभूतरक्षकत्वात् । तथा मूर्त्ताः-सशरीरा ये ऋतवः-वसन्तादयस्तेषां सप्तम इव, परार्थगुणत्वात् । तथा सप्त च ते ऋषयश्च-"**मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्च महातेजाः सप्तमः परिकीर्त्तितः ।**" [ ] इति तेषां अष्टम इव, जितेन्द्रियत्वात् । तथा च वसूनां **अनेकार्थवृत्तौ**[३]-"**धरो ध्रुवश्च सोमश्च अहश्चैवानिलो नलः । प्रत्यूषश्च प्रभासश्च अष्टौ ते वसवः स्मृताः ।**" [ ] इत्येवं रूपाणामष्टसंख्य-देवविशेषाणां नवम इव । तथा ग्रहाणां-सूर्यादीनां नवानां दशम इव, भास्वररूपत्वात् । अतितेजस्वितयेति वा सर्वत्र योज्यम् । पुनः किम्भूतः ? अच्छं अनलं यद्भस्म तस्य अनुलेपेन-अङ्गरागेण आ-ईषत् पाण्डुरितः-धवलितो देहो यस्य सः । उत्प्रेश्यते-बहिर्निर्गच्छता-बहिर्निःसरता अनवरतं-सततं हृदयमेव कमलं तस्य या कर्णिका-बीजकोशः तस्या अन्तः-मध्ये स्फुरद्दीप्यमानं-ज्योतीरूपं यत्परमब्रह्म-प्रकृष्टज्ञानं तस्य कान्ति-

---

१. परमोपकार० अनू. । २. न नास्ति अनू. । ३. अनेकार्थवृत्तौ नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कलापेनेव-दीप्तिसमूहेनेव । मन्ये, अङ्गलग्नमिदं भस्म न भवति किन्तु बहिर्निर्गता हृदयान्तर्गतपरमब्रह्मकान्तिरेवेयमिति, श्वेतत्वसाम्यात् । उत्प्रेक्ष्यते, मुनिः विमलो यश्चन्द्रातपः-चन्द्रज्योत्स्ना तेन आपाण्डुरितदेहः कनकगिरिरिव-मेरुरिव । मुनेर्मेरुः, भस्मनश्चन्द्रातप उपमानम् । पुनः किम्भूतः ? उत्प्रेक्ष्यते, दीर्घ-आयतं सरसं-आर्द्रं यद् बिसकाण्डं-कमलतन्तुस्तद्वत् पाण्डुना-धवलेन तथा प्रचण्डपवनेन-वेगवद्वायुना ऊर्ध्वं-उच्चैरुल्लालितेन-अन्दोलितेन जटाजूटस्य-जटाबन्धस्य यो बन्धनार्थं पटस्तस्य यः प्रान्तपल्लवः-अवसानाञ्चलस्तेन कृत्वा शिरसि पतन्ती या वियद्गङ्गा-अमरसरित्तस्या या अम्बुधारा-जलसातत्यपातस्तेन हारिणः-मनोहरस्य हरस्य स्वामिभक्त्या-प्रभुसेवया कृतस्य-स्वामिनो विहितस्य यदनुकरणं-अनुशीलनं तदेव व्रतचर्या तां कलयन्निव-धारयन्निव । अन्योऽपि यो यद्भक्तो भवेत् स किल तद्भक्त्या तदनुकरणव्रतं अनुतिष्ठति तथा मुनिनाऽपि शम्भु-भक्तत्वाद् तद्भक्त्या तदनुरूपं व्रतमनुष्ठितमिति । जटाजूटेति, स्नानभस्मादिना रूक्षकेशा जटास्तासां जूटः-बन्धविशेषः मुनेर्हरः वेष्टनपटप्रान्तस्य गङ्गोपमानम् । तथा कोमले-अनुग्रे महसि-तेजसि, तथा तरुणे-वयसि यौवने, तथा वृद्धे-श्रेष्ठे तपसि लोकोत्तरे धर्म्मे, तथा पृथुनि-विस्तीर्णे यशसि, तथा गुरुणि-महति श्रेयसि-कल्याणे वर्तमान इति सर्वत्र योज्यम् । तथा सदाचाराणां-साधुकृत्यानां सदः-सभा, सदाचाराश्रयत्वात् । तथा श्रुतीनां-वेदानां आश्रयः-आलयः, तदध्येतृत्वात् । तथा महिम्नः-अनुभावस्य महीभूः । तथा कृपारसस्य-करुणारूपजलस्य प्रपा-पानीयशाला । तथा क्षमैव अङ्कुराः-प्रोहास्तेषां क्षेत्रं-केदारः, यथा क्षेत्रमङ्कुराणामाश्रयस्तथा क्षमाया मुनिः । तथा मैत्री एव सुधा-पीयूषं तस्यां पात्रं-अमत्रं, यथा पात्रे सुधावतिष्ठते तथाऽस्मिन् मैत्रीति । तथा प्रसादस्य-प्रसन्नतायाः प्रासादः-मन्दिरं, सर्वेषामप्युपरि प्रसीदतीत्यर्थः । तथा साधुतायाः-सौजन्यस्य सिन्धुः-समुद्रः ।

**[१]राजा तु दूरत एव तमायान्तमवलोक्य[२] विस्मयविस्फारित-विलोचनो[३] हर्षवश[४]विनिःसरद्बहलपुलकोत्तम्भितोत्तरीयवासः ससंभ्रममासनादुत्थाय कियन्त्यपि पदान्यभिमुखं समेत्य क्षितितल-मिलन्मौलिमण्डलः प्रणाममकरोत् ।**

**राजा तु**-भीमो दूरत एव-विप्रकृष्टत एव तं-मुनिमायान्तं अवलोक्य-दृष्ट्वा विस्मयेन-आश्चर्येण विस्फारिते-विकासिते विलोचने येन सः । तथा हर्षवशेन-आनन्दोल्लासेन विनिःसरन्तः-रोमकूपेभ्यो निर्गच्छन्तो यो[१] बहलाः-निविडा ये पुलकाः-रोमाञ्चास्तै-

१. यो नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रुत्तंभितं उच्चैर्जातं उत्तरीयवासः-वैकक्षपटो यस्य स तथाविधः सन् ससम्भ्रमं-सादरं यथा स्यात्तथा आसनात्-विष्टरादुत्थाय कियन्त्यपि पदानि-पादन्यासान् अभिमुखं-सम्मुखं समेत्य-आगत्य क्षितितले-भूपीठे मिलन् मौलिमण्डलं-मस्तकं यस्य स ईदृग्विधः प्रणाममकरोत् ।

**मुनिरपि सदारुणान्तयापि सौम्यया दृशा[1] विद्रुमप्रभाभिन्नया सुधासिन्धुतरङ्गमालयेव प्लावयन्नाशिषमवादीत् ।**

**मुनिरपि** प्रणामानन्तरं आशिषमवादीत् । किं कुर्वन् ? सदा अरुणः-रक्तो अन्तः-प्रान्तो यस्याः सा तया सौम्यया[1]-रम्यया दृशा आप्लावयन्-प्रक्षालयन् । दृशा कयेव ? उत्प्रेक्ष्यते, विद्रुमप्रभया-प्रवालकान्त्या भिन्नया-छुरितया सुधासिन्धोः-क्षीराब्धेस्तरङ्गाणां मालया इव-पंक्त्येव रक्तान्तनेत्रत्वं शुभलक्षणं । अपिः-विरोधे । तत्पक्षे, स इति मुनिविशेषणं, या दारुणान्ता-रौद्रप्रान्ता भवति सा सौम्या कथं स्यात् ? दृशः सुधा-तरङ्गोपमानं, रक्तप्रान्तस्य प्रवालोपमानम् ।

ननु सास्यदेवता इत्यधिकृत्य सोमाद्यणिति विधानात् कथमिह सौम्यया ? इत्युच्यते सोमदेवता हि तृप्तिहेतुरतः सुन्दरेऽपि वस्तुभि तृप्तिहेतुत्वादुपचारात् सौम्यमित्युत्यते । तथा **चामरसिंहः**-"**सौम्यं सुन्दरे सोमदैवते**" [नानार्थवर्भ १६०] इति । "**धारोष्णं तु पयोऽमृतम्**" [मर्त्य० १९] इति **शेषोक्तेः** । तथा "**पेयूषोऽभिनवं पयः**" [३।६९] **इत्यभिधानचिन्तामणि**वाक्ये "**पेयूषमपि पीयूषं**" [मर्त्य० २८] इति **शीलोञ्छोक्तेश्च** तत्पर्यायस्य सुधेति पदस्याऽपि तयोरिव। क्षीरार्थता **श्रीचण्डपालेन** व्याकृता इत्यवसीयते। इतरथा सुधासिन्धोरिति शब्दस्य क्षीराब्धिपर्यायता दुर्घटेति ध्येयम्।

आशिषमेवाह—

**सिन्दूरस्पृहया स्पृशन्ति करिणां कुम्भस्थमाधोरणाः,**
**भिल्ली पल्लवशङ्कया[2] विचिनुते सान्द्रद्रुमद्रोणिषु ।**
**कान्ताः कुङ्कुमकाङ्क्षया करतले मृद्नन्ति लग्नं च य-**
**त्तत्तेजः प्रथमोद्भवं भ्रमकरं सौरं चिरं पातु वः ॥ ७ ॥**

**सिन्दूरेति** । तत्प्रथमोद्भवं-प्रथमत एव सम्भूतं सौरं-भास्करं तेजो वः-युष्मान् चिरं-चिरकालं पातु-रक्षतु । किम्भूतम् ? भ्रमकरं-भ्रान्तिजनकं । तमेवाह—आधोरणाः-हस्तिपकाः करिणां-दन्तिनां कुम्भस्थं यत्तेजः सिन्दूराय-नागजाय या स्पृहा-वाञ्छा तया स्पृशन्ति-

१. सौम्यया नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आमृशन्ति, तेजसः सिन्दूरभ्रमात् स्पर्शनम् । तथा भिल्ली-शबरी सान्द्रा-निविडा या द्रुमद्रोणयः-तरुश्रेणयस्तासु पल्लवानां-किशलयानां या शङ्का-भ्रमस्तया यत्तेजो विचिनुते-आदत्ते, तेजसः पल्लवा अमी इति भ्रमादुच्चयनम् । "**द्रोणिरिकारान्तः श्रेण्यामपि**" [ ] **इत्यनेकार्थवृत्तौ** । तथा कान्ताः-कामिन्यः करतले-पाणितले लग्नं यत्तेजः कुङ्कुमकांक्षया-वाल्हीक इव वाञ्छया मृद्नन्ति-प्रदयन्ति, इति नवरवितेजसो भ्रमोत्पादकत्वम् ॥७॥

**दत्ताशीश्च[१] प्रणामपर्यस्तकर्णपूरपल्लवपरामृष्टपादपद्मपांशु[२]रवनिपालेन स्वयमादरेणोपनीतमुच्चकाञ्चनासनमध्यतिष्ठत् ।**

एवं **दत्ता** आशीर्येन ईदृशो मुनिश्च अवनिपालेन-भीमेन स्वयं-आत्मना आदरेण उपनीतं-दत्तं उपढौकितं उच्चं काञ्चनासनं-हैमासनं अध्यतिष्ठत्-आश्रितवान् । किम्भूतो मुनिः ? प्रणामेन-नृपतिनमस्कारेण पर्यस्तः-पतितो यः कर्णपूरः-कर्णावतंसः स एव पल्लवः-वासः प्रान्तस्तेन परामृष्टः-अपनीतः पादपद्मयोः पांशुः-धूलिर्यस्य स तथाविधः । यद्वा, कर्णपूरपल्लवः-अवतंसकिसलयं इति व्याख्येयम् । एतेन नृपतेरप्यर्च्यत्वं मुनेरावेदितम् ।

**अथ नरपतिदत्ते प्राप्तसौन्दर्यनिर्यन्,**
**मणिमहसि स तस्मिन्नासने सन्निविष्टः ।**
**रुचिररुचिसुमेरोः संगतः शृङ्गभागे,**
**कमलज इव कान्तिं काञ्चिदुच्चैर्बभार ॥ ८ ॥**

**अथेति** । अथ-अनन्तरं नरपत्तिदत्ते-भीमोपढौकिते तस्मिन्-आसने सन्निविष्टः-स्थितः स-मुनि काञ्चिदपूर्वां उच्चैः-अतिशयेन कान्ति-शोभां बभार-दध्रे । किम्भूते आसने ? प्राप्तं सौन्दर्यं येन तत्तथाविधं निर्यन्-निस्सरन् मणीनां महः-तेजो यस्मात्त-त्तथाविधे । उत्प्रेक्ष्यते, रुचिरा-मनोज्ञा रुचिः-कान्तिर्यस्याऽसौ तथा विधो यः सुमेरुस्तस्य शृङ्गभीगे-शिखराग्रे सङ्गतः-स्थितः कमलज इव-ब्रह्मेव । यथा ब्रह्मा मेरोः शिखरे स्थितः काञ्चिच्छोभां बिभर्त्ति [१]तद्वा अयमपि[१] । मुनेर्ब्रह्मण उपमान, सिंहासनस्य च सुमेरोरुप-मानम् ॥ ८ ॥

**दत्त्वार्घमर्हणीयाय तस्मै सोऽपि महीपतिः ।**
**स्वहस्तधौतयोर्भक्त्या ववन्दे पादयोर्जलम् ॥ ९ ॥**

---

१-१. तथाऽयमपि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**दत्वेति** । सोऽपि महीपतिः-भीमः तस्मै-मुनये अर्घणीयाय-पूज्याय अर्घ-जलाक्षतादिकं पूजाविधिं दत्वा भक्त्या स्वहस्ताभ्यां धौतौ-क्षालितौ यौ तौ स्वहस्तधौतौ तयोः पादयोर्जलं ववन्दे ॥ ९ ॥

**कृत्वातिथ्यक्रियां सम्यग्विनयं च प्रकाशयन् ।**
**तस्याग्रे भूतलं भेजे नोपविष्टः स विष्टरे ॥ १० ॥**

**कृत्वेति** । स-राजा सम्यक् आतिथ्यक्रियां-चरणक्षालनपुष्पादिदानरूपां आवर्जनां कृत्वा विनयं च-अञ्जलियोजनादिरूपं प्रकाशयन् सन् तस्य-मुनेरग्रे विष्टरे-सिंहासने नोपविष्टः किन्तु भूतलं भेजे-शिश्राय ॥ १० ॥

**ललाटपट्टविन्यस्तपाणिसंपुटकुड्मलः ।**
**नीचैरुवाच वाचं च चञ्चद्दशनदीधितिः ॥ ११ ॥**

**ललाटेति** । च-पुनः स-राजा नीचैः-विनयपुरःसरं वाचं उवाच । किम्भूतः ? ललाटपट्टे-अलिकफलके विन्यस्तं रचितं पाणिसम्पुटरूपं कुड्मलं-मुकुलं येन सः । पुनः किम्भूतः ? चञ्चन्ती-दीप्यमाना दशनानां-दन्तानां दीधितिः-कान्तिर्यस्य सः ॥ ११ ॥

**अद्य मे सुबहोः कालाच्छ्लाघनीयमभूदिदम् ।**
**त्वत्पादपद्मसंस्पर्शसंपन्नानुग्रहं गृहम् ॥ १२ ॥**

**अद्येति** । हे भगवन् ! अद्य सुबहोः-अतिभूयिष्टात् कालात् मे-मम इदं गृहं श्लाघनीयं-श्लाघ्यमभूत् । किम्भूतम् ? त्वत्पादपद्मस्य यः संस्पर्शः-सम्पर्कः स एव सम्पन्नः-सञ्जातो अनुग्रहः-प्रसादो यस्य तत्तथाविधम् । भगवद्भिः स्वपदन्यासेन मम गृहस्योपर्यनुग्रहः कृत इत्यर्थः । ॥ १२ ॥

**यतः समस्त[१]मुनिमनुजवृन्दवृन्दारकवन्दनीय[२]पादारविन्दाः,[३] परमानन्दपरिस्पन्दभाजः पांसूनिव पार्थिवान्, तृणमिव स्त्रैणम्, निधनमिव धनम् । रोगानिव भोगान्, राजयक्ष्माणमिव लक्ष्मीम्, आकलयन्तः सकलसंसारसुखविमुखाः कस्य भवादृशा भवनमवतरन्ति ।**

**यतः**-यस्माद्धेतोः ईदृशाः-भवादृशाः कस्य-पुण्यवतो भवनं-गृहं अवतरन्ति । किम्भूताः भवादृशाः ? समस्ता ये मुनयः-यतयस्तथा मनुजानां यत् वृन्दं-कदम्बकं तथा

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वृन्दारका:-देवास्ततो द्वन्द्वस्तेषां वन्दनीयं-नमस्करणीयं पादारविन्दं येषां ते तथाविधा: । तथा परमानन्दस्य य: परिस्पन्द:-चेष्टा तं भजन्त इति परमानन्दपरिस्पन्दभाज: । पुन: किं कुर्वन्त: ? पार्थिवान्-नृपान् पांसूनिव-धूलीरिव । तथा स्त्रैणं-स्त्रीणां समूहं तृणमिव । "**स्त्रीपुंसाभ्यां नञ् स्नञौ**" [ ] भवनादिति समूहे नञ् । तथा धनं निधनं-मरणमिव । तथा भोगान् रोगानिव । तथा लक्ष्मीं-श्रियं राजयक्ष्माणं-रोगराजमिव आकलयन्त:-अवधारयन्त:, नि:स्पृहत्वात् सकलं[१] यत्संसारसुखं-वैषयिकं सौख्यं तस्माद् विमुखा:-पराङ्मुखा: ।

**तदहमद्यानवद्यस्य भगवन्नभूवं भूम्नो यशोराशेर्भाजनम्, आरूढ: पदं श्लाघार्हम्, भागतो गुणिषु गौरवम्, उपलब्धवान्धन्यताम्, संपन्न: पुण्यवतामग्रणी:, जातो जनस्य वन्दनीय: ।**

**तत्**-तस्माद्धेतोर्हे भगवन् ! अद्य मद्गृहागमनेन अहं अनवद्यस्य-अमलस्य भूम्न:-प्रत्ययार्था विवक्षया बहो:-बहुलस्य यशोराशे:-कीर्तिश्रेणेर्भाजनं-पात्रं अभूवम् । तथा अद्य श्लाघार्हं-श्लाघनीयं पदं-स्थानं आरूढ:-आश्रित: । तथा गुणिषु-गुणवत्सु नरेषु गौरवं-गरिमाणं आधिक्यमागत:-प्राप्त: । तथा स्वस्य धन्यतां-पुण्यवत्तां उपलब्धवान् प्राप्तवान् । तथा पुण्यवतां-पुण्यात्मनां अग्रणी:-मुख्य: सम्पन्नो जात: । तथा जनस्य-लोकस्य वन्दनीय:-स्तवनीयो जात: ।

**तदित्थमनेकप्रकारोपकारिणां किं ब्रवीमि, किङ्करोऽस्मीति पौनरुक्त्यं सर्वेषां स्वामिनाम्[१] । केनार्थित्वमित्यनुचितादरो नि:स्पृहाणाम् । इदं मे सर्वस्वमात्मीक्रियतामिति स्वल्पोपचार:, स्वाधीनाष्टगुणैश्वर्याणां भवताम् । तथापि प्रणयेन भक्त्या च मुखरित: किंचिद्विज्ञापयामि ।**

**तत्**-तस्मादित्थं-पूर्वोक्तेन अनेकप्रकारेण-यश: प्रापकत्वादिरूपेण उपकर्तुं शीलं येषां ते अनेकप्रकारोपकारिणस्तेषां भगवतां किं ब्रवीमि । अथानुक्तिप्रकारमेवाह–भवतां किङ्करोऽस्मीत्युक्तौ पौनरुक्त्यं-पुनरुक्तता । यत: किम्भूतानां भवताम् ? सर्वेषां स्वामिन:-प्रभवस्तेषां सर्वस्वामित्वे सिद्धे मम किङ्करत्वं सिद्धमेव । सर्वपक्षान्तर्भूतत्वात् मम तत: किंकरोऽस्मीत्युच्चारे पौनरुक्त्यम् । तथा भवतां केन वस्तुना अर्थित्वं-याचकता कस्य वस्तुनोऽर्थो विद्यत इत्युक्तौ, न उचित:-योग्य: आदर: अनुचितादर: । यत: किम्भूतानां

१. अतएव सकलं अनू. । भावप्रत्यया अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भवताम् ? निःस्पृहाणां-निराकांक्षाणाम् । निःस्पृहाणां भवतां पुरः कस्यार्थो विद्यत इति वाक्यमनुचित्तम् । तथा भवद्भिः इदं मे सर्वस्वं-सर्वधनं गजाश्वकोशादि आत्मीक्रियताम्-आत्मसाद्विधीयतां इति स्वल्प उपचारः स्वल्पोपचारः-स्तोका पूजेति । यतः किम्भूतानां भवताम् ? स्वाधीनं-स्ववशं अष्टसंख्यगुणानामणिमादीनां ऐश्वर्यं येषां ते तथा तेषां, येषां हि अष्टगुणैश्वर्यं भवति तेषां राज्यप्रदानं कियन्मात्रमिति ? तथापि प्रणयेन-प्रेम्णा भक्त्या च मुखरितः-वाचालो जातः सन् किञ्चित्-अल्पं विज्ञपयामि-कथयामि ।

तदेवाह—

**इदं राज्यमियं लक्ष्मीरिमे दारा इमे गृहाः ।**
**एते वयं विधेया वः कथ्यतां यदिहेप्सितम् ॥ १३ ॥**

**इदमिति** । इदं राज्यं, इयं लक्ष्मीः, इम प्रत्यक्षा दाराः-अवरोधजनाः, इमे गृहाः-प्रासादाः, एते भगवतां पुरःस्थिताः वयं विधेया विनयस्थां स्म, हे भगवन् ! कथ्यतां इह राज्यादौ यत् वः-युष्माकं अभीप्सितं-वाञ्छितम् । एतेन राज्ञो महाशयत्वं द्योतितम् । दारशब्दो भूम्न्येव प्रयोक्तव्यः । क्वचिद् एकवचनमपि दृश्यते, यथा-"**धर्म्म प्रजासम्पन्ने दारे नान्यं कुर्वीत**" [ ] इति । गृहशब्दस्तु पुन्नपुंसकः ॥ १३ ॥

**मुनिरप्यवनीशस्य विनयमभिनन्द्य स्निग्धमुग्धस्मित[१]सुधाधवलिताधरपल्लवमब्रवीत्[२]- 'उचितमेत[३]द्भवादृशां वक्तु कर्तुं[४] वा ।**

राज्ञा एवमुक्ते सति मुनिरपि अवनीशस्य-भीमस्य विनयं-आसनदानादिकमभिनन्द्य-साधुः साधुस्ते विनय इति संस्तूय स्निग्धं दन्तज्योत्स्नया-चकचकायमानं मुग्धं-रम्यं यत् स्मितं-ईषद्धास्यं तदेव सुधा-पीयूषं, तथा धवलितः-पाण्डुरितः अधरपल्लवो यत्र कर्मणि, एवं यथास्यात्तथा अब्रवीत्-सहास्यमुवाच इत्यर्थः ।

अथ यदुवाच तदेवाऽऽह—हे राजन् । एतद् भवादृशं महाशयानां इदं राज्यमित्यादिरूपं वाक्यं वक्तुमुचितं-योग्यं तथा एतदासनप्रदानादिरूपमातिथ्यं च कर्तुं-विधातुं उचितम् । यतः—

**उपकर्तुं प्रियं वक्तुं कर्तुं स्नेहमकृत्रिमम् ।**
**सज्जनानां स्वभावोऽयं केनेन्दुः शिशिरीकृतः ॥ १४ ॥**

**उपकर्तुमिति** । सज्जनानां-साधूनामयं स्वभावः-प्रकृतिः । कःस्वभावः ? इत्याह-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उपकर्तुं-उपकारं विधातुं, तथा प्रियं-मधुरं वक्तुं, तथा अकृमिमं-अनौपचारिकं स्नेहं-प्रेमं कर्तुं प्रवर्तन्त इति क्रिया सर्वत्राऽध्याहार्या । कथमवगम्यते अयं सज्जनानां स्वभावः ? इत्याह—इन्दुः-चन्द्रः केन शिशिरीकृतः-शीतलविहितः ?[१] किन्तु स्वभावादेव शिशिर इत्यर्थः । यथेन्दोः स्वभावत एव शैत्यं तथैषां सज्जनानामुपकरणादिकरणं स्वभाव एवेति ॥१४॥

**अपि च—**

**यथा चित्तं तथा वचो यथा वाचस्तथा क्रिया[१] ।**
**चित्ते वाच्रि क्रियायां च साधूनामेकरूपता[२] ॥ १५ ॥**

**अपि** चेति । पुनरिदमेव दर्शयति—

**यथेति** । साधूनां यथा चित्तं सरलं तथा वचोऽपि सरलाः, यथा वाचः सरलास्तथा क्रियाः-चेष्टाः अपि ऋजवः, ततश्चित्ते वाचि क्रियायां च साधूनां-सतां एकरूपता-तुल्यरूपता । अव्यभिचारित्वं वाचि क्रियायां चेति । जात्या एकत्वेऽपि बहुत्वमवसेयं निष्पन्नो व्रीहिरित्यादिवत् ॥ १५ ॥

**अपि च—**

**विवेकः सह संपत्त्या विनयो विद्यया सह ।**
**प्रभुत्वं प्रश्नयोपेतं[३] चिह्नमेतन्महात्मनाम्[४] ॥ १६ ॥**

**अपि च**-पुनः-

**विवेक** इति । एतन्महात्मनां-महतां चिह्नं-लक्षणं । तदेवाह—सम्पत्त्या-सम्पदा सह विवेकः-साध्वसाधुपरिज्ञानं । क्षुद्राणां हि सम्पदि विवेको नश्यति, महात्मनां च समृद्धावपि विवेको न गच्छति । तथा विद्यया-शास्त्रपरिज्ञानेन सह विनयः-महतां पूजनम् । अन्येषां हि विद्यायां-सत्यां विनयो याति, महतां च तस्यां सत्यामपि विनयविधानम् । तथा प्रभुत्वं-ऐश्वर्यं प्रश्रयः-प्रणयस्तेन उपेतं-सहितं । अन्येषां हि प्रभुत्वे जाते लघुभिः सह पूर्वकृतप्रणयोपयाति, महतां च तस्मिन् सम्पन्नेऽपि न प्रणयापकर्षो जायते ॥ १६ ॥

**तदेतत्सर्वमस्ति दीर्घायुषि त्वयि[५]।**
**श्रूयतामिदानीं प्रस्तुतम् ।**

---

१. शीतलो अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अनवरतसुरासुरचक्रचूडामणीकृतचरणरजसश्चन्द्रचूडामणेर्देवस्या[१]देशेना[२]गता वयम् । अवाप्स्यसि[३] सकलजलनिधि[४]जलकल्लोलमालालंकारभाजो भुवोभर्तुरुचितमतिमान्यं धन्यमसामान्यं कन्यारत्नम् इति ।**

**तदेतत्**-पूर्वोक्तं सज्जनलक्षणं सर्वं दीर्घायुषि-चिरञ्जीवति त्वयि अस्ति ।

अथ मुनिर्यन्नियोगादागाद्यदुवाच, तदाह—

**श्रूयतामिति** । हे राजन् ! इदानीं-प्रस्तुतं यदर्थमत्र मयायातं तत्स्वरूपं श्रूयताम्—वयं चन्द्रचूडामणेर्देवस्य-शम्भोरादेशेन-आज्ञया आगताः स्मः ।

किम्भूतस्य देवस्य ? **अनवरतं**-सततं सुरासुराणां चक्रेण-समूहेन चूडामणीकृतं-शिरोमणीकृतं चरणरजो यस्य स तस्य, यत्पादौ सुरासुरैरपि नम्यते इत्यर्थः । तथा भुवोभर्तुः- भूपतेरुचितं-योग्यं अतिमान्यं-भर्तृगौरवार्हं धन्यं-पुण्यवत् असामान्यं-अनन्यसदृशं कन्यारत्नं-प्रकृष्टपुत्रीं अवाप्स्यसि । किम्भूताया भुवः ? सकलाः-चत्वारो ये जलनिधयः-अब्धयस्तेषां या जलकल्लोलमाला-वारिवीचिपंक्तिः सैवालङ्कारं-मण्डनं भजतीति [१]सकलजलकल्लोलमालालङ्कारभाक् तस्याः, समुद्रपर्यन्तभूनाथस्येत्यर्थः ।

**एवमुक्तवति तस्मिंस्तपस्विनि पुत्रार्थिनी कन्यालाभं विप्रियं मन्यमाना[५] प्रियंगुमञ्जरी जरन्मञ्जीररवजर्जरविलक्षाक्षरया[६] गिरा[७] कुर्वाणेव क्रोधपरिस्पन्दं निन्दास्तुतिधर्मेण नर्मलीला[८]कलहमकरोत् ।**

**तस्मिन्**-दमनके तपस्विनि इत्येवं-उक्तप्रकारेण उक्तवति-कथितवति सति पुत्रार्थिनी-पुत्राभिलाषुका प्रियङ्गुमञ्जरी कन्यालाभं विप्रियं-अनभीष्टं मन्यमाना-जानाना सती निन्दा च-तद्गुणग्रहणं स्तुतिश्च-तस्य वर्णना तयोर्धर्मः-स्वभावस्तेन एकत्रपक्षे निन्दा, द्वितीयपक्षे तु स्तुतिरित्येवं रूपेण वाग्विलासेन नर्मलीलया-परिहासविलासेन कलहो नर्मलीलाकलहस्तं अकरोत्-चकार । "**धर्मो यमोपमापुण्यस्वभावाचारधन्वसु । सत्सङ्गेऽर्हत्यहिंसादौ न्यायोपनिषदोरपि ।**" [२।३३०] इत्य**नेकार्थः**। किं कुर्वाणा ? उत्प्रेक्ष्यते, जरज्जर्जरीभवद् यन्मञ्जीरहंसकं तस्य यो रवः शिञ्जितं तद्वज्जर्जराणि, विलक्षाणि च वीक्षापन्नानि अक्षराणि-वर्णा यस्यां सा तथा गिरा-वाण्या क्रोधस्य परिस्पन्दं-चेष्टां कुर्वाणेव । मन्ये क्रोधानुविद्धा वदतीति ।

---

१. सकलजलनिधिः जलकल्लोल० अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ मुनेर्निन्दास्तुती–

**नयशोभाजन, कृतकुटीककुशास्त्रग्राहिन्नवेदनोद्गारं कृतवानसि क्वापि। सर्वदानादेयेषु प्रतिकूलवर्तिषु जलेषु रतिं कुर्वाणः पाठीनहिंसको धीवर इवोपलक्ष्यसे[१] । कुरङ्गेषु प्रीतिं बध्नासि । कदम्बैः[२] कुरबकैर्बहुकदलीकैः पलाशप्रायैः कुजन्मभिः सह संवससि ।**

**किमन्यद् ब्रूमो वयम्[३] । यस्य ते सदाचारविरुद्धः पुष्पवत्कान्ताराग एव प्रियः ।**

**तदलमनेन[४] तापसहितेन कन्यावरप्रदानेन"[५] इति ।**

**नयेति** । यशसो भाजनं-पात्रं यशोभाजनं, पश्चान्नञ्योगस्तस्य सम्बोधने हे न यशोभाजन !-अयशस्विन् ! तथा कृतानि-कृत्रिमाणि न तु वेदवत् अपौरुषेयाणि, तथा कुत्सितटीकानि[१]-एवं विधानि कुशास्त्राणि गृह्णातीत्येवंशीलः कृतकुटीककुशास्त्रग्राही तस्य सम्बुद्धौ हे कृतकुटीककुशास्त्रग्राहिन् ! यतो हे अवेदवेदपाठरहित ! क्वापि-विद्वत्परिषदि नोद्गारं-उच्चारं कृतवानसि-वक्तुमपि न वेत्सीत्यर्थः । तथा सर्वदा-नित्यं अनादेयेषु-अश्रद्धेयेषु सर्वलोकाग्राह्यवाक्येषु वा प्रतिकूलवर्तिषु-सदाचारपराङ्मुखेषु जडेषु-मूर्खेषु रतिं-रागं कुर्वाणः-[२]विदधन् । "**रतिः स्मरस्त्रियां रागे रते**" [२।१९४] इत्य**नेकार्थः** । तथा पाठीनान्-मत्स्यान् हिनस्तीति पाठीनहिंसको धीवर इव-कैवर्त्त इव उपलक्ष्यसे-अवबुध्यसे । धीवरोऽपि किल कूलं-कच्छं प्रति वर्तमानेषु नादेयेषु- नदीसम्बन्धिषु जलेषु-पयस्सु रतिं कुरुते, पाठीनाहारत्वात् । तथा कुत्सितो रङ्गः-वासना येषां तेषु विषयेषु प्रीतिं-प्रेम बध्नासि प्रीतिमान् । तथा कदम्बैः कुमातृकैः कुत्सिता अम्बाः कदम्बाः ताश्च दुश्चेष्टितैः कुर्वन्ति आचक्षते वा इति नामकारितांतादचि सिद्धम् । बहुव्रीहौ तु कोः कन्न भवति । तथा कुत्सितो रवो येषां ते कुरवकास्तैः, तथा कुत्सितं अलीकं कदलीकं कोः कत् बहु-बहुलं कदलीकं येषां ते बहुकदलीकास्तैः, तथा पलं-पिशितमश्नन्ति ये ते पलाशाः-राक्षसास्तेषां प्रायैः-सदृशैः, तथा कुत्सितं जन्म येषां ते एवंविधैः सह संवससि-वासं विधत्से ।

**किमन्य**त्स्वरूपं वयं ब्रूमः, एतदुपालम्भवचनम् । यद्यस्मात् ते-तव पुष्पवतीषु-रजस्वलासु कान्तासु रागः-आसक्तिरेव प्रियः-इष्टः । किम्भूतस्तासु रागः ? सदाचारेण-सद्वृत्तेन सह विरुद्धः सदाचारविरुद्धः-कुलधर्मानुचितः । तत्-तस्माद्धेतोर्हे तापस !-

---

१. कुत्सितटीकानि-कुटीकानि अनू. । २. विदधत् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तपस्विन्! हि-स्फुटं ते-तव सम्बन्धिना कन्यावरप्रदानेन अलं न पर्याप्तं-नेष्टमपूर्यत इति यावत्। यतोऽहं पुत्रार्थिनीति। अथवा तापः-सन्तापस्तत्सहितेन कन्यावरप्रदानेन अलम्। इति निन्दापक्षः।

स्तुतिपक्षे तु—नयश्च-नीतिः शोभा च-लक्ष्मीः नयशोभे ते जनयसीति नयशोभा-जनस्तस्य सम्बोधने हे नयशोभाजन! यदहमागतोऽसि तस्य नयं शोभां च जनयसीत्यर्थः। तथा कृता कौ-पृथिव्यां टीका-गमनं येन स्वर्गिणाप्यस्मदनुजिघृक्षया इति शेषः, तस्य सम्बोधने हे कृतकुटीक!, तथा कुशः-दर्भः स एव अस्त्रं तद् गृह्णास्यवश्यं कुशास्त्रग्राही, एतेन अदृश्यशत्रूणामपि विघातोक्तिः, तस्य सम्बोधने हे कुशास्त्रग्राहिन्!, तथा वेदना-दुःखं तदर्थमुद्गारः-उच्चारस्तं, येन वाक्योच्चारेण परस्य दुःखं उत्पद्यते, तथाविधं वाक्योल्लापं क्वापि नाऽकरोः, एतेन प्रियम्वदत्वोक्तिः। तथा सर्वदा-सर्वकालं नादेयेषु-नदीभवेषु कूलं-कूलं प्रति वर्तमानेषु जलेषु-वारिषु रागं-आसक्तिं कुर्वाणः। तथा पाठी-पाठवान्, तथा न हिंसकः-हिंसाशीलः, तथा धिया-बुद्ध्या वर एव अवगम्यसे। अत्र इव शब्दोऽव-धारणार्थः। एतेन तीर्थस्थास्पुर्ज्ञानी दयालुश्च। तथा कुरङ्गेषु-मृगेषु प्रीतिं बध्नासि, प्रीत इत्यर्थः। तथा कदम्बैः-कुरबकैर्बहुकदलीकैः-प्रचुररम्भैः पलाशप्रायैः-पलाशबहुलैः कौ-पृथिव्यां जन्म येषां इति कृत्वा कुजन्मानः-भूरुहस्तैः सह संवससि। मुनयो हि मृगनगप्रियाः वनवासित्वात् हे सदाचारशोभनकर्मन् किं अपरं ब्रूमो वयम्। यस्य ते-तव विभिः-पक्षिभिः रुद्धः-व्याप्तस्तथाविधः पुष्पवान्-कुसुमितो यः कान्तारस्य-विपिनस्य अगः-तरुः स एव प्रियः। हे तापस! तत्-तस्माद्धेतोः हिः-निश्चितं तेन अनेन कन्यावरप्रदानेन अलं-पूर्यते, नान्यत्प्रार्थनीयमित्यर्थः।

**एवमभिहित[१]: सोऽपि तां बभाषे।**

**एवं**-उक्तप्रकारेण निन्दास्तुतिरूपेण वाक्येन प्रियङ्गुमञ्जर्या अभिहितः-उक्तः सोऽपि-मुनिस्तां-प्रियङ्गुमज्जरीं प्रति निन्दास्तुतिरूपेणैव वाक्येन बभाषे।

**'दोषाकरमुखि, किं मामुपालभसे। प्रायः प्राणिनामीशः शंभुरेव शुभाशुभं कर्मालोच्य[२] तुलाधार[३] इव तुलितं फलमुपकल्पयति[४]।**

**दोषेत्यादि**। दोषाणामाकरो मुखं यस्याः सा तस्याः सम्बुद्धौ हे दोषाकरमुखि! येन एतान् मुनीनपि दूषयसीति। पक्षे, दोषाकरः-चन्द्रस्तद्वन्मुखं यस्याः सा तस्याः सम्बोधने हे दोषाकरमुखि! किं मामुपालभसे-उपालम्भान् ददासि तर्जयसि। प्रायः-बाहुल्येन प्राणिनामीशः-स्वामी शम्भुरेव शुभाशुभं कर्म आलोच्य एषां शुभं कर्म, एषां अशुभं कर्म

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्येवं विचार्य तुला-मानकार्युपकरणविशेषस्तां धारयतीति तुलाधारः-वणिजः[१] स इव तुलां रोपितं तुलितं-समीकृतं फलं-सुखदुःखादि उपकल्पयति-रचयति । यथा तुलाधारस्तुलायां मानं मेयं च वस्तु उभयतो निक्षिप्य तत्तुलितं फलं देयाऽदेयादिरूपं उपकल्पयति, तथा शम्भुर्जनानां शुभमशुभं च वीक्ष्य तदनतिपाति समं फलं सुखदुःखादिकं विधत्ते, स्तोकस्य शुभस्य स्तोकं सुखं, भूयसः शुभस्य भूयः, एवं अशुभस्यापि ।

**तथाहि[१]–**

**यद्यावद्यादृशं येन कृतं कर्म शुभाशुभम् ।**
**तत्तावत्तादृशं तस्य फलमीशः प्रयच्छति ॥ १७ ॥**

**तथाहीति** । एतदेव दर्शयति–

**यदिति** । येन असुमता यदिति-यन्नामकं, यावदिति-यावत्प्रमाणं यादृशमिति-यादृक् स्वरूपं शुभाशुभं कर्म कृतं तस्य प्राणिनः तदिति-तन्नामकं तावदिति-तावत्प्रमाणं तादृशमिति-तादृक् स्वरूपं फलं सुखदुःखादिकं ईशः-शम्भुः प्रयच्छति-ददाति ॥ १७ ॥

**अथवा-**

**मत्तमातङ्गगामिनि, यस्यास्तवाप्रमाणालोचनश्रीः सा त्वं बलि-संश्रयावलग्ना कस्य नाधिक्षेपं जनयसि ।**

**तदलमनेनालापालसत्प्रपञ्चेन । गतो भूयिष्ठो दिवसः । समासन्नोऽस्माकमाह्निकसमयः[२] । सीदत्येषा ब्रह्मपरिषद्[३] । [४]गगनमण्डलमध्यमारोहति भगवानशेष[५]कल्याणचिन्तामणिस्तरणिः । अरविन्दारुणवदने[६]न[७]नक्तं समयमनुपालयन्त्यमी मुनयः । अनुमन्यस्व । यामो वयम्' ।**

**अथवेति** । पक्षान्तरे । एकः पक्षेस्तु किं मामुपालभस इत्येवं रूपः । द्वितीयस्त्वयं-मत्तः-क्षीबो यो मातङ्गः-शबरस्तद्वद् गच्छति-चेष्टतेऽवश्यमिति मत्तमातङ्गगामिनी तस्याः सम्बुद्धौ हे मत्तमातङ्गगामिनि !, यथा मत्तो मातङ्गः अनुचितचेष्टः, तथा त्वमपि क्षीबा यथा स्यात्तथा वादित्वात्, म्लेच्छाभिगमस्त्वनुचितत्वात्तदाख्येयः । स्तुतौ तु-मत्तो यो मातङ्गः-हस्ती तद्वद्गच्छतीत्येवंशीला मत्तमात्तङ्गगामिनी तस्याः सम्बोधने हे मत्तमात्तङ्गगामिनि !,

---

१. वाणिजः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा यस्याः-भवत्याः आलोचनश्रीः-विवेकसम्पत् प्रमाणा[१]-प्रत्यक्षादिप्रमाणानुपेता सा त्वं बलिनः-बलवतो राज्ञः संश्रये-आश्रये अवलग्ना-अवष्टब्धा सती कस्य-पूज्यस्य अधिक्षेपं-तिरस्कारं न करोषि, सर्वस्याऽपि करोष्येव । स्तुतौ तु—यस्यास्तव लोचनश्रीः अप्रमाणा भृत्यादि प्रमाणातिरिक्ता वर्तते । तथा वलयः-उदरलेखास्तासां संश्रयः-आश्रयो अवलग्नं-मध्यं यस्या सा वलिविभूषितमध्या, एवंविधा सा त्वं-शुभलक्षणा कस्य आधिक्षेपं आधेः-पीडाया अपनोदं न नयसि-न करोषि ।

**तत्**-तस्माद्धेतोः हे प्रियङ्गुमञ्जरि ! अलं-पूर्यताम्, अनेन आलापे-संभाषे आलस्य-अभव्यस्य सतश्च-भव्यस्य प्रपञ्चेन-विस्तारेण निन्दास्तुतिरूपेण वाक्येन इत्यर्थः । प्रकृतं प्रक्रियत इति भावः । उक्तयो हि सप्रतिपक्षा भवन्तीति । आल प्रतिषेधे, सतोऽपि प्रतिषेधः । तथाहि—

**"सन्तः सच्चरितोदयव्यसनिनः प्रादुर्भवद्यंत्रणाः,**
**सर्वत्रैव जनापवादचकिता जीवन्ति दुःखं सदा ।**
**अव्युत्पन्नमतिः कृते न न सता नैवासता व्याकुलो,**
**युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः ॥"** [ ]

अथवा आलापस्य आलेन-अवस्तुरूपेण सन् योऽसौ प्रपञ्चस्तेनालं निरर्थकत्वात् । यदुक्तम्-

**"यदेवार्थक्रियाकारि तदेव परमार्थसत् ।"** [ ] भूयिष्ठः-प्रचुरो दिवसो गतः । अस्माकं मुनीनां आह्निकं-नित्यक्रिया तस्य समयः-अवसरः समासन्नः-निकटवर्ती । एषा ब्रह्मणां-द्विजानां परिषत्-सभा सीदति-खिद्यते, बहुकालमवस्थानात् । तथा भगवान् अशेषकल्याणानां-समस्तशुभानां पूरणे चिन्तामणिरिव यः सः तथाविधस्तरणिः-सूर्यो गगनमण्डलस्य यन्मध्यं तदारोहति-आश्रयति । नयशोभाजन ! पाठीनहिंसकेत्यादिकस्य मुनीनां प्रतिपादनात् दारुणं-रौद्रं वदनं यस्याः सा तस्याः सम्बोधने हे दारुणवदने ! न अरविं-नक्तं समयं, अपितु सरविं सन्ध्यासमयं मुनयोऽप्यनुपालयन्ति सन्ध्योपासनादिना प्रति जाग्रति । नक्तमित्यनेन सन्ध्या लक्ष्यते । वयमपि मुनयः, ततोऽस्माकं सन्ध्यासमय इत्यभिप्रायः । स्तुतौ तु अरविन्दवत् अरुणं-लोहितं वदनं यस्याः सा तस्याः सम्बोधने हे अरविन्दनयने[२] ! नैते मुनयः सन्ध्याकालं अनु-पश्चात् पालयन्ति, अवश्यविधेयत्वात् तत्कालमेवेत्यर्थः । तस्मात् अनुमन्यस्व-अनुजानीहि वयं यामः ।

---

१. अप्रमाणा अनू. । २. अरविन्दारुणवदते अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इत्यभिहिता[१] सा प्रियंगुमञ्जरी 'महर्षे समर्षणीयो[२]ऽयमेकस्त्यक्त-[३] कुलवधू धर्मो नर्मापराधः । स्वीक्रियन्तामेतानि विविधान्यु[४]ल्लसन्म-यूखमञ्जरीरचितेन्द्रचापचक्राण्याभरणानि । गृह्यतामिदमिन्दुद्युतिधवल-मनलशौचं चीनांशुकपट्ट[५]परिधानयुगलमियं च कुसुममालिका' इत्यभि-धायास्यान्यदप्यतिथिसत्कारोचितमुपढौक्य प्रसादनाय प्रणाममकरोत् ।**

**इति अभिहिता**-उक्ता सा प्रियङ्गुञ्जरी इति अभिधाय अस्य-मुनेरन्यदपि-उक्तव्यतिरिक्तमपि वस्तु अतिथिसत्कारोचितं-आतिथ्यक्रियायोग्यं उपढौक्य-उपादाय प्रसादनाय-मुनिं हर्षयितुं प्रणामं-प्रणतिं अकरोत्-चक्रे । इतीति किम् ? हे महर्षे !-महामुने ! अयमेकस्त्यक्तः कुलवध्वाः-कुलकान्तायाः धर्म-आचारो यत्र ईदृशो नर्मणा-परिहासेन यो अपराधः-मंतुः समर्षणीयः-सहनीयः । अयं परिहासापराधः कुलस्त्रीणामनुचितः, परं भगवद्भिः सोढव्यः । तथा एतानि विविधानि-नानाप्रकाराणि आभरणानि-अलङ्काराः स्वीक्रियन्तां-अङ्गीक्रियन्ताम् । किम्भूतानि आभरणानि ? उल्लसन्ती-विलसन्ती या मयूखमञ्जरी-किरणराजिस्तया रचितं-विहितं इन्द्रचापचक्रं-सुरपतिधनुर्मण्डलं यैस्तानि तथा तैः । आभरणानां विविधवर्णरत्नमयत्वात् तच्छविरप्यनेकविधा अत एव इन्द्रचापरचनं तेषाम् । तथा इदं चीनांशुकपट्टस्य-चीनदेशवासोविशेषस्य परिधानयुगलं-अधस्तनोपरि-तनाच्छादनयुग्मं गृह्यताम् । किम्भूतम् ? इन्दुद्युतिवत्-चन्द्रकान्तिवद्धवलं, तथा अनलेन-वह्निना शौचं-पवित्रं । **"चीनो देशैणतन्तुषु । व्रीहौ वस्त्रे"** [२।२६७] **इत्यनेकार्थः** । च-पुनः इयं-कुसुममालिका गृह्यताम् ।

**मुनिस्तु 'गौरमुखि'[६], वृत्तमुक्तोऽयं हारः, दोषालयमङ्गदम्, जघन्य-पदाश्रयं काञ्चीदाम, सदापदाधिष्ठानं नूपुरम्, अलंकारो भवद्विधानामेव राजते नास्माकम् । इयं च परिमलवाहिनी माला निबद्धमधुकरालापा चीनं वासश्च तवैवोचितम्' इत्यनेकधा श्लिष्टालापलीलयातिवाह्य काश्चित्काल-कलाः करकलितकमण्डलुर्मण्डलेश्वरमापृच्छ्य तां च प्रणतां[७] प्रियंगुमञ्जरीं जरठतमालनीलमम्बरतलमुदपतत् ।**

**मुनिस्तु**-दमनकस्तां-एवं वन्दन्तीं प्रत्याह-हे गौरमुखि !-अरुणवदने ! **"गौरः श्वेतेऽरुणे पीते विशुद्धे चन्द्रमस्यपि ।"** [२।४२५] **इत्यनेकार्थः** । अयं हारः वृत्ताः-वर्तुला मुक्ताः-मौक्तिकानि यस्मिन् स वृत्तमुक्तः, पक्षे शीलरहितः । तथा इदं अङ्गदं-केयूरं दोषा-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बाहुरालयः-आश्रयो यस्य तद्दोषालयम् । यद्विश्वः-"**दोषा रात्रौ भुजेऽपि च**" [षान्तद्वि० ७]। पक्षे दोषाः-अवद्यानि तेषामालयो यत्तत् दोषालयम् । तथा इदं काञ्चीदाम-मेखला जघने भवं जघन्यं यत्पदं-स्थानं तदाश्रयो यस्य तत् जघन्यपदाश्रयं, जघनविभूषकमित्यर्थः । पक्षे, जघन्यं-गर्हितं यत्पदं तत् आश्रयो यस्य तत्, गर्हितस्थानावस्थितमित्यर्थः । तथा इदं नूपुरं सदा शश्वत् पादः[१]- पादावधिष्ठानं आश्रयो यस्य तत् सदा पदाधिष्ठानम् । पक्षे, सतामप्यापदां आ-समन्तात् अधिष्ठानं-नगरं । उपसर्गात् "**सुनोति सुवति स्यति स्तौति स्तोभति स्थासे नयसे धसि च सञ्जस्वञ्जाम्**" [ ] इति । अधेरुपसर्गात् स्थः[अधेरुपरिस्थम् पा० सू० ८।३।८८]सस्य षः । आपदां-आधेश्च स्थानमिति तु वाक्ये निरुपसर्गत्वात् षत्वं दुर्लभमिति । प्रकृतेरलङ्कारस्य वर्णनं, गौणवृत्त्या दूषणम् । तस्मादेवं दोषयुक्तोऽलङ्कारो भवद्विधानां-युष्मादृशानामेव राजते-भाति, नाऽस्माकं यतीनाम् । यतयो हि चारित्रमण्डनाः । नर्मणि तु अलं-अत्यर्थं कारः- राजग्राह्यभागस्त्वादृशीनामेव राजपत्नीनां संगच्छते नास्माकम् । वनवृत्तीनां लोकस्योपकुर्म एव वयम् । न कुतोऽपि किञ्चित्प्रति गृह्णीम इति भावः । "**कारो बलौ वधे यत्ने हिमाद्रौ निश्चये यतौ ।**" [२।४१२] इत्य**नेकार्थः** । बलिः-राजग्राह्यो भाग् ।[३] इयं च परिमलं-आमोदं वहतीत्येवंशीला परिमलवाहिनी सुगन्धिः, तथा निबद्धः-सञ्जातो मधुकराणामालापो यत्र ईदृशी सभृङ्गालापा माला-स्रक् । चीनं वासश्च-अंशुकं तदैव उचितं-युक्तं, नाऽस्माकं, यत्परितो मलं-पापं वहति या सा परिमलवाहिनी मुनीनां हि उपादीयमाना माला पापकारिणी भोगाङ्गत्वात् । तथा निबद्धमधुना-समवेतसुरया कराला-रौद्रा एवंभूता असौ स्रक्, अपाचीनं-निकृष्टं वासः । इति अनेकधा-अनेकप्रकारया श्लिष्टालापलीलया-सङ्गश्लेषोक्तिविलासेन काश्चित् कालकलाः-कियतः अतिवाह्य[३]-निर्गम्य करे कलितः-धृतः कमण्डलुः-कुण्डिका येन ईदृशो मुनिः जरठः-चिरोत्पन्नत्वात् परुषो यस्तमालस्तापिच्छस्तद्वन्नीलं कृष्णं अम्बरतलं-गगनं उदपतत्-उत्पपात । किं कृत्वा ? मण्डलेश्वरं राजानं-भीमं आपृच्छ्य च-पुनस्तां प्रणतां-नम्रीभूतां प्रियङ्गुमञ्जरीमापृच्छ्य ।

**वियति विशदविद्युल्लोललीलायमाने[१]**
**स्फुरदुरुपरिवेषाकारकान्तौ मुनीन्द्रे ।**
**अथ गतवति तस्मिन्विस्मयोत्तानिताक्षः,**
**क्षितिपतिरवतस्थे स्थाणुसन्धां[२] दधानः ॥ १८ ॥**

---

१. पदे अनू. । २. भागः अनू. । ३. समयांशान् अतिवाह्य अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**वियतीति** । अथ-अनन्तरं तस्मिन्-वरप्रदातरि मुनीन्द्रे-दमनके वियति-नभसि गतवति सति क्षितिपतिः-भीमो विस्मयेन-आश्चर्येण उत्तानिते-अनिमीलमुच्चैःकृते अक्षिणी-नेत्रे येन स तथाविधः सन् स्थाणोः-स्तम्भस्य सन्धा-मर्यादा तां दधानः-बिभ्रत् अवतस्थे-स्थितः । विस्मयेन निश्चलाकृतित्वान्नृपस्य स्थाणोरुपमानम् । निःक्रियत्वात् मन्ये स्थाणुरेवायमवस्थित इति । "**सन्धा स्थितिप्रतिज्ञयोः**" [२।२५६] इत्य**नेकार्थः** । किम्भूते मुनीन्द्रे ? विशदा-अमला या विद्युत्-सौदामनी तद्वत् लोललीलावान्[१]-चपलविलासवान् भवन् लोलं लीलायमानो यः स विशदविद्युल्लोललीलायमानस्तस्मिन्, यादृक् क्षणिको विद्युत्झात्कारो दृश्यते तादृक् अतितेजस्वित्वान्मुनिरपि क्षणं यावद् दृश्यते इति भावः । लीलायमानेत्यत्र लीलाशब्दात् तद्वति वर्तमानादायिः। पुनः किम्भूते ? स्फुरन्ती-दीप्यमाना उर्वी-पृथुला परिवेषाकारा-परितः परिसर्पिणी कान्तिः-देहदीप्तिर्यस्य स तस्मिन् ॥ १८ ॥

**स्थित्वा च तत्कथावस्थया[३] काश्चित्कालकलाः कलापिकुलोत्-कण्ठाकारिणि रणति[४] नवजलधररवरमणीये मध्याह्नगम्भीरभेरीसखे[५] शङ्ख-युगलके[६], विशति बिसकाण्डकवलनमपहाय तीव्रतरतपनताप-[७]ताम्यत्तनुनि नवनलिनीछदच्छायामण्डलमुपवनदीर्घिकावतंसे हंसकुले, [८]कुमुदकुवलयाम्भोजपत्रपुञ्जपञ्जरान्तरमनुसरति परिहृतोष्णमधुनि, मुकुलितपक्षपुटे षट्चरणचक्रवाले, चटुलाग्रिमखुर[९]शिखरोल्लिखित-भूमण्डलेषु[१०] खण्डितखर्व[११]दूर्वानाल[१२]नीलघुरघुरायमाणघोणाकोणेषु विमुच्यमानेषु पिपासातुरतुरंगमेषु, घर्मविघूर्णितेषु[१३] ससूत्कारकरविमुक्त-सीकरासारवर्षणा[१४]र्द्रिताङ्गणेषु मज्जनाय सज्जितेषु सेवागतराजकुञ्जरेषु, क्रीडागिरिसरितमवतार्यमाणेषु लीलामृगमिथुनेषु, पयोभिः पूर्यमाणासु पञ्जरपक्षि[१५]पयःपानपात्रीषु, उद्यानारघट्टतटीं टीकमानासु, कोयष्टिमयूर-मण्डलीषु, क्रीडासरःसरत्सु संगीतश्रमखिन्नकिन्नरेषु[१६], कूपकूलकुलाय-कोणाकूणितेष्वातपातङ्काकुलकलविङ्केषु, भवनवनवापीपुलिनपालि-पांसुपटलमुत्तममपहाय शीतल[१७]शैवलावलिं श्रयति तरलितनक्रे, क्रेंकार-यति[१८] क्रौञ्चचकोरचक्रवाकचक्रे[१९], क्रीडाप्ररोपितप्राङ्गणप्रान्ततरुशिखर-मध्ये मध्याह्नबलिपिण्डाय पिण्डिते क्रेंकारयति काकवयसां कर्णकटु**

---

१. अलोललीलावान् लोललीलावान् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कुटुम्बके, वकवलयवलक्षान्क्षिपति दिक्षु दीप्रान्दीप्तिदण्डांश्चण्डरोचिषि, विसृज्य[२०] परिजनं राजा मज्जनभवनायोदचलत् ।**

**स्थित्वेति** । काश्चित्कालकलाः कतिचिन्समयांशान् तस्य-मुनेर्या कथा-वाक्यप्रबन्धस्तया या अवस्था-अवस्थानं तया स्थित्वा च काञ्चित्समयं[१] तत्कथाभिरतिवाह्य इतीति सति परिजनं-परिच्छदं विसृज्य स्व-स्वमन्दिरं प्रति मुक्त्वा राजा-भीमो मज्जनभवनाय मध्याह्नस्नानसमये उदचलत्-प्रतस्थे । क्व सति ? भेर्याः सखा भेरिसखं मध्याह्ने गम्भीरं-मधुरं भेरीसखं-भेरीसहितं यच्छंखयुगलकं-कम्बुयुग्मं तस्मिन् रणति-ध्वनति सति । किम्भूते ? नवः-अदृष्टत्वात् सजलो जलधरः-मेघस्तस्य यो रवः-गर्जितं तद्वद् रमणीयं-श्रवणसुखकारि यत्तत्तस्मिन् । रणद्भेरीसखशङ्खयुगस्य नवमेघरवानुकारित्वात् । अतएव पुनः किम्भूते ? कलापिकुलस्य-मयूरवृन्दस्य उत्कण्ठां-रणरणकं करोतीत्येवंशीलं कलापिकुलोत्कण्ठाकारि तस्मिन् । पुनः क्व सति ? हंसकुले नवनलिनीनां-नवकमलिनीनां यानि च्छदानि-पत्राणि तेषां यच्छायामण्डलं आतपाभाववृन्दं तद् विशति-प्रविशति सति । किं कृत्वा विसकाण्डानां-कमलनालानां कवलनं-भक्षणं अपहाय-त्यक्त्वा। किम्भूते हंसकुले ? तीव्रतरः-अत्युग्रो यस्तपनतापः-सूर्यघर्मस्तेन ताम्यन्त्यः-ग्लानिं प्राप्नुवत्यस्तनवः-शरीराणि यस्य तत्तथाविधे, अतएव छायाश्रयम् । पुनः किम्भूते ? उपवने-वनसमीपे या दीर्घिकाः-वाप्यस्तासामवतंस इव-शेखर इव विभूषकत्वाद् यत्तत्तथाविधे । तथा षट्चरणचक्रवाले-मधुकरवृन्दे कुमुदानि च-श्वेतोत्पलानि कुवलयानि च-नीलकमलानि अम्भोजानि च-सामान्यकमलानि तेषां यः पत्रपुञ्जः-दलसमूहस्स एव पञ्जरं तस्यान्तरं-मध्यं अनुसरति-गच्छति सति । तथा परिहृतं-त्यक्तं रवितापयोगादुष्णं मधुमकरन्दो येन तत्तथाविधे । तथा मुकुलितौ-संकोचितौ तापभयादेव पक्षपुटौ-पक्षितिद्वयं येन तत्तस्मिन् । तथा पिपासातुराः-तृषार्त्ता ये तुरङ्गमास्तेषु पानीयपानाय बन्धनादि विमुच्यमानेषु-छोट्यमानेषु सत्सु । किम्भूतेषु पिपासातुरतुरङ्गमेषु ? चटुलैः-चञ्चलैः अग्रिमखुरशिखरैः-अग्रिमशफाग्रैरुल्लिखितं-विदारितं भूमण्डलं यैस्ते तथा तेषु । तथा खण्डितं-विदारितं अखर्वं-दीर्घं यद् दूर्वानालं तद्वन्नीलः-कृष्णो घुरघुरायमाणः-घुरघुररवं कुर्वन् घोणाकोणः-नासाग्रभागो येषां ते तथा तेषु । **"घुरत् भीमार्थशब्दयोः इदुदुपान्त्याभ्यां किदिदुतौ चेति अः प्रत्ययः सरूपे च द्वैरूपे भवतः"** [ ] इत्यु**णादिवृत्तौ** । पुनः केषु सत्सु ? सेवायै-नृपपर्युपास्त्यै आगता ये राजकुञ्जरास्तेषु मज्जनाय-स्नानाय सज्जितेषु-सावधानीकृतेषु सत्सु । किम्भूतेषु राजकुञ्जरेषु ? घर्मेन-तापेन घूर्णितेषु-घूर्णायमानेषु **"घुण घूर्ण भ्रमणे"**

---

१. कंचित् अनू.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[पा० धा० ४३७-४३८] घूर्णनं हि व्यथा हर्षोद्रेकाद् भवति। तथा ससूत्कारो यः करः-शुण्डा तेनैव मुक्ता ये शीकराः-जलकणास्त एव आसारः-वेगवद्वर्षस्तस्य वर्षणेन आर्द्रितं-क्लिन्नं अङ्गणं-राजाजिरं यैस्ते तथा तेषु । तथा लीलार्थं-क्रीडार्थं यानि मृगमिथुनानि-हरिणहरिणीलक्षणं द्वन्द्वानि तेषु क्रीडागिरेः-लीलार्थपर्वतस्य[१] या सरित्-नदी तां अवतार्य-माणेषु-नीयमानेषु सत्सु । तथा पञ्जरपक्षिणां-पञ्जरनिरुद्धपतत्त्रिणां पयःपानपात्र्यः-जलपानार्थकुण्डिकास्तासु पयोभिः-अम्भोभिः पूर्यमाणासु-भ्रियमाणासु सतीषु । तथा कोयष्टयः-जलकुकुभा मयूराश्च-बर्हिणस्तेषां मण्डलीषु-श्रेणिषु उद्यानस्य या अरघट्टतटी-पादावर्त्ततीरं तां प्रति टीकमानासु-गच्छन्तीषु सतीषु । तथा सङ्गीतश्रमेण-गानायासेन खिन्नाः-श्रान्ताः ये किन्नरास्तेषु क्रीडासरः-क्रीडासरसीं प्रति सरत्सु-गच्छत्सु सत्सु । तथा आतपात् य आतङ्कः-भयं तेन आकुलाः-व्याकुला ये कलविंकाः-चटकास्तेषु कूपकूलेषु अन्धुतटेषु ये कुलाया नीडानि तेषां कोणेषु-अश्रेषु कूणिताः-संकुचिताः तेषु सत्सु । "**कूणक् संकोचे**" [पा० धा० १६८९] "**आतङ्को रुजि शङ्कायां सन्तापे मुरजध्वनौ ।**" [३।८] इत्य**नेकार्थः** । तथा तरलितः-औष्ण्ययोगात् कम्पितो यो नक्रः-कुम्भीराख्य-मत्स्यविशेषस्तस्मिन् शीता-शिशिरा ये शैवलावलिः-शैवालपंक्तिस्तां श्रयति सति । नक्रे इति जात्येकवचनम् । किं कृत्वा ? उत्तप्तं-उग्रकरकरप्रसराद् उष्णीभूतं भवनस्य-गृहस्य वने वाप्यस्तासां पुलिनपालिषु-तटप्रान्तेषु पांसुपटलं-धूलिवृन्दं अपहाय-त्यक्त्वा । तथा क्रौञ्चाश्च-क्रुञ्चः चकोराश्च-विषसूचकाः चक्रवाकाश्च-काकास्तेषां चक्रे-वृन्दे क्रेंकारयति-क्रेंकारं शब्दविशेषं कुर्वति सति । तथा काकवयसां-बलिभुक्पक्षिणां कुटुम्बके-परिवारे कर्णकटु-श्रवणदुःखकारि यथा स्यात्तथा क्रंकारयति-क्रां क्रां इति शब्दविशेषं कुर्वति सति। किम्भूते कुटुम्बके ? क्रीडायै-केलये प्ररोपिता-उप्ता ये प्राङ्गणप्रान्ते तरवः-द्रुमास्तेषां यत् शिखरमध्यं-शाखाग्रान्तरालं तस्मिन् मध्याह्ने-मध्यंदिने यो बलिपिण्डः-पूजार्थमोदनादि-कवलस्तस्मै पिण्डिते-समवेते सति । मध्याह्ने हि जनैर्बलिपिण्डो दीयते देवपूजायै, ततस्तद्भक्षणार्थं काकास्तरुशिखराग्रे मिलन्तीति । तथा चण्डरोचिषि-रवौ दीप्रान्-दीपनशीलान् दीप्त्य एव दण्डास्तदाकृतित्वात् सम्मिलितरुचि-प्रपञ्चास्तान् दिक्षु क्षिपति-प्रसारयति सति । किम्भूतान् दीप्तिदण्डान् बकानां-बकोटानां यो वलयः-मण्डलं तद्वद् वलक्षान्-धवलान् । दीप्रानिति "**नमिकम्पिस्मयजसकमिहिंसिदीपो रः**" [पा० सू० ३।२।१६७] इति दीपो रप्रत्ययः ।

---

१. लीलापर्वतस्य अनू ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**गत्वा च पृथ्वीवलयमिव पयःपूर्णसमुद्रद्रोणीकम्, केदारोदरमिव सकलशालिस्थानम्, श्रोत्रियद्विज[१]भवनमिव सकलधौतपट्टम्, अतिरमणीयं मज्जनभवनमवतारिताभरणः स्नानपीठे निषसाद ।**

ईदृशं मज्जनभवनं-स्नानगृहं गत्वा च अवतारितानि अङ्गेभ्योऽपनीतानि आभरणानि येन स ईदृग्विधः स-राजा स्नानपीठे निषसाद-निषण्णः । किम्भूतं गृहम् ? पयसा पूर्णा समुद्रा-अङ्किता द्रोणीजलपात्री कुण्डिका यत्र तत् पयःपूर्णसमुद्रद्रोणीकं । स्नानीयजलादिषु मुद्रा दीयत इति राजधर्मः । कमिव ? पृथ्वीवलयमिव-भूमण्डलमिव तम् । किम्भूतः ? पयोभिः पूर्णः समुद्रः-अब्धिद्रोणी च यत्र तम् । "**नद्यृतः**" [पा० सू० ५।४।१५३] इति बहुव्रीहौ कप् । द्रोणी देशविशेषः, **यद्विश्वः-"द्रोणी स्यान्नीवृदन्तरे**" [णान्त द्वि०, ८]। पुनः किम्भूतम् ? कलशाः-कुम्भास्तेषामालिः-पंक्तिस्तया सह-युक्तानि स्थानानि-प्रदेशा यत्र तत्। किमिव ? केदारोदरमिव-क्षेत्रमध्यमिव । तत् किम्भूतम् ? सकलशालीनां-कलमप्रभृतीनां स्थानं-पदम्। पुनः किम्भूतम् ? सह कलधौतस्य-हेम्नः पट्टेन-आसनेन वर्तत इति सकलधौतपट्टं। किमिव ? श्रोत्रियद्विजन्मनां-छान्दसब्राह्मणानां भवनमिव-गृहमिव। तत् किम्भूतम् ? सकलाः-सर्वे धौताः-क्षालिताः पट्टाः-आसनानि यत्र तत् । पुनः किम्भूतम् ? अतिरमणीयं-मनोहरम् ।

**आसन्नस्थितश्चास्यावसरपाठकः[२] पपाठ ॥**

यदा च राजा तत्र निषसाद तदैव अस्य-राज्ञः आसन्नस्थितः-निकटप्रदेशस्थश्च अवसरपाठकः-मागधः पपाठ-उवाच ।

**'वर रजनीकरकान्ते ! चित्राभरणे ! निशानभःसदृशे ।**
**तव नृप ! मज्जनभवने सवितानाभाति परमश्रीः ॥ १९ ॥**

**वरेति** । हे वर !-प्रधान ! हे नृप ! तव मज्जनभवने-स्नानसदने सविताना-सोल्लोचा परमश्रीः-उत्कृष्टलक्ष्मीर्भाति-द्योतते । अथ नृपसम्बोधनानि–रजनीकरस्य-चन्द्रस्येव कान्तिरस्येति रजनीकरकान्तिस्तस्य सम्बोधने हे रजनीकरकान्ते !-चन्द्रद्युते ! तथा रणे-युद्धे चित्रः-व्याघ्रस्तद्वद् आभा-शोभा यस्य स चित्राभस्तस्य सम्बोधने हे रणे चित्राभ ! यथा व्याघ्रः शूरस्तथा त्वमपि शूर इत्यर्थः। तथा निशानैः-तेजस्विभिः बभस्तीति निशानभास्तस्य सम्बोधने हे निशानभ !-सुभटरम्य !, अथवा निशानं-निर्मलं यथा भवति तथा बभास्ति-शोभते । इति, **भसलि द्युतौरवैदिकः** [पा० धा० १०००] । तथा सदृशः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इः-कामोऽस्येति कृत्वा हे सदृशे !-कन्दर्पप्रतिम !

अथवा हे नृप ! तव मज्जनभवने सविता-रविर्ना भाति परं केवलं अश्रीः-निष्प्रभ एवेत्युक्तिलेशः । यतः किम्भूते मज्जनभवने ? निशायां यन्नभस्तस्य सदृशे[१]-प्रद्योतनानुद्योते हेतुरयम् । तथा चित्राणि-अद्भुतानि आभरणानि यत्र तत्तथाविधे । **चित्रं खे तिलकेऽद्भुते । आलेख्ये कर्बुरे**" [२।४३०] इत्य**नेकार्थः** । नभःपक्षे, चित्रैव आभरणं यस्य तत्तथा तस्मिन् । पुनः किम्भूते ? वरा-श्रेष्ठा रजनी-हरिद्रा तां कुर्वन्ति-संस्कुर्वन्तीति रजनीकराः-गन्धकारकास्तैः कान्तं-कमनीयं तस्मिन् । नभःपक्षे तु, वरः-दीप्तिमान् सूर्याभावाद् यो रजनीकरः-शशी तेन कान्ते-मनोज्ञे ॥ १९ ॥

**अनन्तरमुत्तुङ्गकनककुम्भशोभास्पर्धिकुचमण्डलार्धबद्धो[१]त्तरीयांशुकपरिकराः, सस्मर[२]स्मितविकारकारिण्यः, दर्शितससीत्कारा[३]ङ्गमलन[४]विन्यासाः, काश्चित्समुद्रवेला[५] इव समकरोत्क्षिप्तामलकाः, काश्चित्तरुणतरुमञ्जरी[६]राजय इव भृङ्गारभरभुग्नदेहाः, काश्चिदन्यायकारिण्य इव सभाजनोद्धूलनकराः, काश्चिन्मलयाचलभूमय इवोत्कृष्टगन्धधारितैलाः, काश्चिद्देवलोकवसतय इव चामरधारिण्यः, काश्चित्पुरंदरपुरंध्रिका इव सविभ्रमकङ्कतिकोपान्तेनाकेशप्रसादनमारचन्त्यः, काश्चिद्विन्ध्याटव्य इव दर्शितविविधपादपालिकाः, काश्चिद्राघवसेना इव कृतप्रहस्तमलनाः, काश्चिद्व्याकरणवृत्तय इव बाहुलतां संवाहयन्त्यः, मज्जननियुक्ताः कामिन्यो राजानं स्नपयामासुः ।**

**अनन्तरमिति** । अनन्तरं-स्नानपीठनिषदनात् पश्चात् उत्तुङ्गौ-उन्नतौ यौ कनककुम्भौ-सुवर्णकलसौ तयोः शोभां-श्रियं स्पर्द्धते-संह्वाष्यत इत्येवंशीले ये कुचमण्डले-पयोधरौ तयोरर्द्धे बद्धः उत्तरीयांशुकेन-उपरिवस्त्रेण परिकरः-पर्यस्तिकाभिः स्ताः, जघने पटीवेष्टिं कृत्वेत्यर्थः । मज्जने-स्नाने नियुक्ताः-अधिकृताः कामिन्यः राजानं-भीमं स्नपयामासुः-मज्जयन्तिस्म अस्नपयन् । "**परिकरः पर्यङ्कपरिवारयोः**" [४।२७४] इत्य**नेकार्थः** । किम्भूताः कामिन्यः ? सस्मरः-समन्मथो यः स्मितविकारः-हास्यविक्रिया तं कुर्वन्तीत्येवंशीलाः सस्मरस्मितविकारकारिण्यः । तथा दर्शितः-प्रकटितः ससीत्कारः-सीत्कारसम्बद्धः अङ्गमलनस्य शरीरमर्दनस्य विन्यासः-रचना याभिस्ताः । तासां मध्ये काश्चित्कामिन्यः समेन-अविषमेण करेण उत्क्षिप्तानि-उद्धृतानि आमलकानि याभिस्ताः ।

---

१. सदृशो अनु. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ईदृश्यो वर्तन्त इति क्रिया सर्वत्र योज्याः । आमलकचूर्णं हि स्नानीयम् । का इव ? समुद्रवेला इव-अब्धिजलवृद्धय इव । किम्भूताः ? मकरैः सह उत्क्षिप्तं अमलं कं-जलं यकाभिस्ताः । तथा काश्चित् भृङ्गारभरभुग्नदेहाः भृङ्गारः-कनकालुका तस्य यो भरः-भारस्तेन भुग्नः-कुब्जीभूतो देहो यासां ताः । का इव ? तरुणाः-प्रत्यग्राः यास्त-रुमञ्जर्यस्तासां राजय इव[१] । ताः किम्भूताः भृङ्गाणां भारः ?-आगमनं तस्माद यो भरः-भारस्तेन भुग्नः-अवनतो देहो यासां ताः । तथा काश्चित् भाजनं-पात्रं तत्रोद्धूलनं-चूर्णविशेषस्तेन सह-युक्तः करः-पाणिर्यासां ताः, सचूर्णपात्रपाणय इत्यर्थः । **'सभाजनो-द्वलन'** पाठे तु उद्वलनं-उद्वर्त्तनं । का इव ? अन्यायकारिण्य इव-अनीतिविधायिन्य इव । किम्भूतास्ताः ? अवाच्यवचनैः सभाजनस्योद्धूलनं-मालिन्यं कुर्वन्ति यास्ताः । "उद्वलन" पाठेतु सभाजनादुद्वलनं-अपसरणं कुर्वन्तीति । तथा काश्चित् उत्कृष्टानि अद्भुतानि उद्धतानि-उत्क्षिप्तानि गन्धधारीणि-सौरभ्ययुक्तानि तैलानि यकाभिस्ताः । का इव ? मलयाचलस्य भूमय इव । किम्भूतास्ताः ? उत्कृष्टगन्धा धारिता-धृता एता-औषधिविशेषा यकाभिस्ताः । तथा काश्चित् चामरं-प्रकीर्णकं धारयन्तीत्येवंशीलाश्चामरधारिण्यः । का इव ? देवलोकस्य वसतय इव-गृहा इव । ताः किम्भूताः ? चः-पृथक् अमरान्-देवान् धारयन्तीति अमरधारिण्यः । तथा काश्चित् विशिष्टो भ्रमः-चलनं तेन सह-युक्ता या कङ्कतिका-केशमार्जनी तस्याः उपान्तेन-प्रान्तेन आ-समन्तात् केशानां प्रसादनं-विरलीकरणं आरचयन्त्यः-कुर्वन्त्यः । का ईव ? पुरन्दरस्य-इन्द्रस्य पुरन्ध्रिका इव-स्त्रिय इव । किम्भूतास्ताः ? सविभ्रमं-सविलासं कं-मुखं यत्र एवं यथा भवति तथा कतिकोपान्ते-कियत्कोपविगमे नाकेशस्य-दिवस्पतेः प्रसादं कुर्वन्त्यः । कतीति पुरन्ध्रिविशेषणं वा । तता काश्चित्कामिन्यः दर्शिता विविधा पादपालिः-पादमर्दनावसरो यकाभिस्ताः । पालिं पर्यायावसरः । यदजयः-**"पालिः कर्णलतायां स्यात् प्रदेशे पंक्तिचिह्नयोः । पृष्ठश्मश्रूस्त्रियामश्रौ पर्यायावसरे क्रमे ।"** [ ] का इव ? विन्ध्याटव्य इव । ताः किम्भूताः ? दर्शिताः विविधाः पादपानामालयः-पंक्तयो यकाभिस्ताः । तथा काश्चित् कृतं प्रकर्षेण हस्तमलनं यकाभिस्ताः । का इव ? राघवसेना इव-रामचम्वा इव । ताः किम्भूताः । कृतः प्रहस्तस्य-रावणप्रतिहारस्य मलनं-अभिभवो यकाभिस्ताः । तथा काश्चिद् बाहुलतां-भुजलतां संवाहयन्त्यः- प्रयत्नेन मर्दयन्त्यः । **"वेहृ वाहृ प्रयत्ने"** [ ] । का इव ? व्याकरणवृत्तय इव । ताः किम्भूताः ? बाहुलतां-बाहुलवं, संवाहयन्त्यः-सम्यक्प्रापयन्त्यः । **"वह प्रापणे,** [पा० धा० १००४] **सम् पूर्वकः"** ।

---

१. इव श्रेणय इव अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**किं बहुना —**

किम्बहुना-किं बहुक्तेन—

**तास्तास्तं स्नपयामासुरङ्गनाः कुम्भवारिणा ।**
**एत्य याः स्युः प्रसन्नेन द्युलोकात्कुं भवारिणा ॥ २० ॥**

**ता इति** । भवस्य-संसारस्य अरिः-शत्रुः शिवस्तेन भवारिणा प्रसन्नेन हेतुना द्युलोकाः-स्वर्गलोकाः कुं-पृथ्वीमेत्य-आगत्य याः स्युः-भवेयुः । तास्ताः-स्त्रियः कुम्भवारिणा-कलशोदकेन तं-राजानं भीमं स्नपयामासुः-स्नपितवत्यः । ईश्वरेण प्रसादं विधाय स्वर्गाद् यादृश्यः सुराङ्गना अवतारिता भवति तादृश्यः सुरूपास्तास्तं स्नपयामासुरित्यर्थः ॥ २० ॥

**अथ विमलदुकूलप्रान्तनिर्नीरिताङ्गः**
**परिहितसितवासाः स्वल्पमङ्गल्यभूषः[१]।**
**शुचिरुचितविधिज्ञः स स्वयं स्वस्थचेताः[२]**
**कुशकुसुमकरः[३] सन्कर्म धर्म्यं चकार ॥ २१ ॥**

**अथेति** । अथ-स्नानानन्तरं विमलदुकूलप्रान्तेन निर्मलक्षौमाञ्चलेन निर्नीरितं-निर्जलीकृतं अङ्गं यस्य स । तथा परिहितं-सम्वीतं सितं-धवलं वासः-दुकूलं येन सः । तथा स्वल्पाः-स्तोकाः मङ्गल्यभूषाः-रुचिरभूषणानि यस्य स तथाविधः । स-राजा भीम, कुशः-दर्भः कुसुमानि च-पुष्पाणि तानि निकरे यस्य स तथाविध, सन् स्वयं-आत्मना धर्म्यं-धर्मादनपेतं धर्मसम्बन्धिकर्मक्रियां माध्याह्निकसन्ध्योपासनादि चकार-कृतवान् । यतः किम्भूतः सः ? शुचिं-पवित्रं रुचितं-अभीष्टं विधिं-अनुष्ठानं जानातीति शुचिरुचितविधिः, यो हि विधिज्ञो भवति स एव धर्म्यं कर्म कुरुत इति । यद्वा, शुचिः-शुद्धः उचितविधिज्ञश्च-योग्यकृत्यवित् । पुनः किम्भूतः ? स्वस्थं-अव्याकुलं चेतो यस्याऽसौ स्वस्थचेताः । "**मंगल्यो रुचिरे स्वच्छे त्रायमाणे मसूरके**[१]" [३।५३०] इत्य**नेकार्थः** । धर्म्यमिति "**धर्मपथ्यर्थन्यायादनपेते**" [पा० सू० ४।४।९२] इति यत् ॥ २१ ॥

**अनन्तरमावर्त्तितानेकस्वर्णवल्लभो वल्लभो जनस्य भोजनस्य समये स मयेन निर्मितया तया सधर्माणं[४] धर्मसुतसभया सभयागतजनजनिता-रक्षारम्भोऽरं[५] भोजनस्थानवेदी[६] गतवान् ।**

---

१. मसूरके बिल्वे अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अनन्तरं**-वस्त्रालङ्कारपरिधानं मध्याह्नसमयोचितधर्म्यकर्मादि च विधाय पश्चात् जनस्य-लोकस्य वल्लभः-दयितः स-नृपो भोजनसमये-भोजनावसरे भोजनस्थानस्य या वेदी-संस्कृताभूमिस्तां गतवान्-प्राप्तवान् । किम्भूतः सः ? आवर्त्तिता-मूषायां तापिता ये अनेके स्वर्णस्य वल्लाः-तौल्यमानविशेषाः तद्वद् भा-कान्तिर्यस्य सः । पुनः किम्भूतः? सभयाः-सत्रासाः आगता ये जनास्तच्छरणं प्रपन्नास्तेषां जनितः-कृतो रक्षारम्भः-पालनोपक्रमो येन सः । पुनः किम्भूतः ? अरं-अत्यर्थं जनानां स्थानं-अवस्थानं वेत्तीत्येवंशीलो जनस्थानवेदी लोकस्योचितासनज्ञः । किम्भूतां भोजनस्थानवेदीम् ? मयेन-दैत्यवर्द्धकिना निर्मितया-कृतया तया-प्रतीतया धर्मसुतसभया-युधिष्ठिरसंसदा सधर्माणं-सदृशीम् ।

**तस्यां च बहुविस्तीर्णस्वर्णभोजनपात्रपत्रशङ्खशुक्तिसनाथायामुपविष्टस्यास्य क्रमेण परिकरमाबध्य गाढमाढौकन्त स्वस्य स्वस्यानुहारिणोऽन्नविशेषानादाय सूपकाराः सूपकाराङ्गनाश्च ।**

**तस्यां च**-भोजनस्थानवेद्यां उपविष्टस्य-निषण्णस्य अस्य-राज्ञः सूपकाराः-औदनिकाः सुष्ठु, उपकारकाश्च सूपकाराङ्गनाश्च तत्स्त्रियः परिकरमानध्य-जघने पटीवेष्टिं कृत्वा क्रमेण-यथा समयोचितभोज्यानयनपरिपाट्या गाढं-भृशं स्वस्य स्वस्य अनुहारिणः-अनुकारिणः अन्नविशेषान् आदाय आढौकन्त-प्राप्ताः । यादृक् यादृक् स्वस्य नाम तादृक् तादृक् अभिधानं अन्नविशेषं गृहीत्वोपस्थिता इत्यर्थः । किम्भूतायां तस्याम् ? बहुविधानि-गुरुलघुत्वभेदात् अनेकधा विस्तीर्णानि-पृथूनि यानि स्वर्गस्य-हेम्नो भोजनार्थपात्राणि पत्राणि च-पलाशादीनां पर्णानि शङ्खाश्च-कम्बुपात्राणि शुक्तयश्च-मुक्तास्फोटपात्राणि तैः सनाथा-सहिता तस्याम् ।

अथ ते कथं स्वस्वनामानुकारि भोज्यमानीतवन्तः ? इत्याह -

**तथाहि —**

**भक्तास्तस्य भक्तम्, मुद्गा मुद्गान्, मोदका मोदकान्, अशोकवर्तिन्योऽशोकवर्तीः, समांसा मांसम्, नानाशाकाः शाकानि, व्यञ्जना व्यञ्जनानि अपरास्तु काश्चिदक्षीरा अपि क्षीरम्, अघा रिका अपि घारिकाः परिवेषयामासुः ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सोऽप्यधीशो भूभुजां भुञ्जानो भोज्यम्, लिहँल्लेह्यम्, आस्वादयन्स्वादून्[1] चूषयञ्चुष्याणि, पिबन्पेयानि, आहारमकरोत् ।**

**तथा ही**ति । तदेव दर्शयति–

**भक्ताः**-प्रसादकास्तस्य राज्ञो भक्तं-ओदनम् । तथा मुदं गच्छन्ति-प्राप्नुवन्तीति मुद्गाः, मुद्गान्-हरितान् । तथा मोदयन्ति-हर्षं जनयन्तीति मोदकाः, मोदकान्-लड्डुकान् । तथा न शोके वर्ततेऽभीक्ष्णमिति अशोकवर्ती-सदाहृष्टः सनीर्नायको येषां यासां वा, अशोकवर्तिन्यः-अशोकवर्तीमण्डिकाभिधपक्वान्नः विशेषान् । तथा समो अंसः-स्कन्धो यासां ताः समांसाः, मांसं-पललं । तथा नाना-अनेकप्रकारा आशा-वाञ्छा यासां ताः नानाशाकाः, "**शेषाद्वा**" [पा० सू० ५।४।१५४] इति कः । शाकानि-तन्दुलीयकादीनि । तथा व्यञ्जनाः-विशिष्टाञ्जनाः, व्यञ्जनानि-तेमनानि । तथा अपरास्तु काश्चित् अक्षीणि ईरयन्ति-विभ्रभात् कम्पयन्ति यास्ता अक्षीरास्तथाविधाः, क्षीरं-दुग्धम् । तथा काश्चित् अघस्य-पापस्य अरिकाः-शत्रुरूपाः, घारिकाः परिवेषयामासुरिति क्रिया सर्वत्र योज्या । अपि शब्दो विरोधे—या अक्षीराः-क्षीररहितास्ताः कथं क्षीरं परिवेषयन्ति । तथा या अघारिकाः-घारिकारहितास्ताः कथं घारिकाः परिवेषयन्तीति । तुल्यार्थे विरोधः, परिवेषणं भोज्यस्य भोजनोत्क्षेपणम् ।

**सोऽपि** भूभुजां-शेषराजानां अधीशः-भीमः भोज्यान् भक्तादीन् भुञ्जानः-खादन्, तथा लेह्यं-मध्वादि लिहन्, तथा स्वादून् मृष्टान् शर्करादीन् आस्वादयन्, तथा चूष्याणि-कम्राम्रादीनि चूषयन्, "**चूष पाने**", [पा० धा० ६७३] तथा पेयानि-पातुं योग्यानि द्राक्षापानीयादीनि पिबन् आहारं-खादनमकरोत् ।

**अनन्तरमाचम्य चन्दनेनोद्वर्तितपाणिपल्लव[2]: शीघ्रमाघ्राय धूप-धूमम्, आस्ये निक्षिप्य[3] कस्तूरिकाकुङ्कमकर्पूरकर्बुराणि[4] क्रमुकफलशकलानि[5], आदाय च वित्रस्तमृगतर्णक[6]कर्णकम्राणि शुक्तिशुक्लानि[7] ताम्बूलीदलानि, तस्मात्प्रदेशादपरमपकीर्ण[8]कुसुमहारि विस्तीर्णास्तीर्ण-स्वर्णमयवैदूर्यपर्यन्त[9]पर्यङ्काङ्कमाप्तैः सह विनोदास्थायिकास्थान[10]मगात् ।**

**अनन्तरं**-भोजनकरणात् पश्चात् आचम्य-आचमनं गृहीत्वा शुचीभूय चन्दनेन उद्वर्तितौ-आमृष्टौ पाणिपल्लवौ येन सः, ईदृग्विधः सन् राजा तस्मात्प्रदेशात्-भोजनस्थानात् अपरं-अन्यत् आप्तैः-यथाभूतवादिभिः सेवकैः सह विनोदस्य क्रीडाया या आस्थानिका-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आस्थानमण्डपः सैव स्थानं-पदं तत् आगात्-आययौ । किं कृत्वा ? शीघ्रं धूपस्य-गन्ध द्रव्ययोगविशेषस्य धूममाघ्राय-शिंघित्वा, तथा आस्ये- वक्त्रे कस्तूरिकाकुङ्कुमकर्पूरद्रवैः कर्बुराणि-शबलानि क्रमुकफलानां यानि शकलानि-खण्डानि तानि निक्षिप्य-निवेश्य । च-पुनः शुक्तिवत् शुक्लानि-धवलानि ताम्बूलीदलानि-अहिवल्लीपत्राणि आदाय-गृहीत्वा । किम्भूतानि ? वित्रस्तः-भयाकुलो यो मृगतर्णकः-मृगशावस्तस्य यौ कर्णौ तद्वत् कम्राणि-मनोज्ञानि, त्रस्तस्य हि मृगशावस्य कर्णौ स्तब्धौ भवतः, ताम्बूलीदलान्यपि तादृशीति भावः । किम्भूतं विनोदास्थायिकास्थानम् ? अपकीर्णानि-इतस्ततो परिक्षिप्तानि यानि कुसुमानि तैर्हारि रम्यम् । पुनः किम्भूतम् ? विस्तीर्णः-विशाल आस्तीर्णः-क्षौमवाससा आच्छादितः स्वर्णमयः-हैमो वैडूर्य-वासवायजं[१] पर्यन्ते यस्य स पश्चात् कर्मधारयः, ईदृग्विधः पर्यङ्कः-पल्यङ्को अङ्के-उत्सङ्गस्थानीये मध्ये भागे यस्य तत् ।

**तत्र च सकामकामिनीकमलकोमलकरपुटपीड्यमानपादपल्लवो नर्तयन्नाट्यपरिपाटीपटून्नटान्, भावयन्नमृतश्रुतः[१] कविवाचः, वाचयंश्चिरं-तनकविकथाः[२], शृण्वन्वीणाप्रवीणकिंनरमिथुनगीतानि, आलोक-यँल्लोचनोत्सवकरा[३]न्विलासिनीलास्यविलासान्, वादयन्मृदुवाद्यविशेषान्, अवधारयन्वांशिक[४]वाद्यमानवेणुनिक्वाणान्[५], कलगिरः पाठयन्पञ्जर-शुकान्, कान्ताकुचकुम्भमण्डलावष्टम्भलीलयापराह्णसमयमतिवाहितवान् ।**

**तत्र च**-आस्थायिकास्थाने सकामाः-समन्मथा या कामिनी तस्याः कमल-वत्कोमलो-मृदू यो करपुटौ-पाणिद्वयं ताभ्यां पीड्यमानौ-सम्वाह्यमानौ पादपल्लवौ-चरणयुग्मं यस्य स, ईदृग्विधः स-राजा एवं-एवं कुर्वन् कान्ताया यत्कुचकुम्भमण्डलं तस्य या अवष्टम्भलीला आक्रमणविलासस्तया अपराह्णसमयं-मध्याह्नादूर्ध्वं यामद्वयं अति-वाहितवान्-अतिक्रामितवान् । किं कुर्वन् ? नाट्यपरिपाट्यां-नृत्यदर्शनक्रमे ये पटवः-अभिज्ञास्तान् नटान्-नर्त्तकान् नर्त्तयन्-ताण्डवयन् । तथा अमृतं-पीयूषं अवन्ति-क्षरन्तीति अमृतश्रुतस्ताः कविवाचः-कविगिरो भावयन्तदभिप्रायं गृह्णन् । अत्र भूधातुरभिप्रायार्थः । यदुक्तम्—

> **"सत्तायां मङ्गले वृद्धौ निवासे व्याप्तिसम्पदोः ।**
> **अभिप्राये च शक्तौ च प्रादुर्भावे गतौ च भूः ॥ १ ॥"** [ ]

तथा चिरन्तनकवीनां-पूर्वकवीनां याः कथा-[२]गद्यपद्यमयी [३]वाक्प्रबन्धास्ता वाचयन्-पाठयन् ।

---

१. वालवायजं अनू. । २. गद्यपद्यमया अनू. । ३. वाक्यप्रबन्धाः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा वीणायां प्रवीणानि-चतुराणि यानि किन्नरमिथुनानि तेषां यानि गीतानि तानि शृण्वन्-आकर्णयन् । तथा लोचनयोरुत्सवकरान्-हर्षविधायिनो विलासिनीनां-स्त्रीणां ये लास्यविलासाः-नृत्यलीलांस्तान् आलोकयन्-वीक्षमाणः । तथा मृदु-मधुरं यथा भवति तथा वाद्यविशेषान्-मुरजादीन् वादयन् । तथा वंशवादनं शिल्पमेषामिति वांशिकास्तैर्वाद्यमाना ये वेणवः-वंशास्तेषां निक्वाणान्-शब्दान् अवधारयन्-मनसा आकलयन् । शिल्पं[1]-कौशलं क्रियाभ्यासपूर्वको ज्ञानविशेषस्तस्येति ठक् । तथा पञ्जरशुकान् पाठयन् । किम्भूतान् पञ्जरशुकान् ? कला-मधुरा गीः-स्वनो येषां ते तान् ।

**क्रमेण च चषकायमाणविकचकमलमध्यमधुपानमत्त इव पुनर्वारुण्याशयाभिभूतभासि मदादिव लोहितायमाने निपतति[1] मुक्तांशुकेऽशुमालिनि, वनान्तरतरु[2]शिरःश्रिताशाखाशिखरेषु[3] गलद्द्रहलकिञ्जल्कपुञ्जपिञ्जरासु मञ्जरीष्विव विलम्बमानासु[4] दिनकरदीधितिषु, विस्तीर्णशिलावकाशजघनायामुल्लसल्लोहिताधरपल्लवायामस्ताचलवनराजिरेखायामुपरि पतितमवलोक्य रागिणमहर्पतिमीर्ष्यारोषभरादिव जाते जपापुष्पनिचयरुचि[5] पश्चिमाशामुखे, मुखरयति नभो निजनीडनिलयनाकूत[6]कूजितजर[7]दण्डजव्रजे, व्रजति सरः संध्या[8]विधिविधित्सया द्विजन्मजनमुनिनिकाये, कालागुरु[9]रसाङ्गराग[10] इव श्यामलयति गगनलक्ष्मीमभिसारिकाबन्धावन्धकारे, राज्ञः संध्यावसरमावेद[11]यन्किन्नरमिथुनमिदमगायत् ।**

**क्रमेण**-नभोलङ्घनपरिपाट्या अंशुमालिनी-सूर्ये पतति-नीचैर्गच्छति सति । किम्भूते अंशुमालिनि ? चषकं-मद्यपानपात्रमिवाचरच्चषकायमाणं विकचं-सविकासं यत्कमलं-पद्मं तस्य मध्ये-अन्तराले यन्मधुमकरन्दस्तस्य पानेन मत्त इव पुनर्वारुण्याशया-पश्चिमदिशा अभिभूता-पराभूता विच्छाया जाता भाः-कान्तिर्यस्य स तस्मिन् । पुनः किम्भूते ? अलोहितः-लोहितोभवन् लोहितायमानस्तस्मिन् । कस्मादिव ? मदादिव । "**लोहितादिडाज्भ्यः क्यष्**" [पा० सू० ३।१।१३] इति क्यष् । पुनः किम्भूते ? मुक्ताः-त्यक्ता अंशवः-किरणा येन स मुक्तांशुकस्तस्मिन् । अन्योऽपि मधुपानेन-मद्यास्वादनेन माद्यति, पुनर्वारुण्याशया-मधुवाञ्छया अभिभूतभाः-निःप्रभः स्यात्, तथा मदात्-क्षीबतया आरक्तः सन् मुक्तांशुकः-निर्वस्त्रो भूमौ पतति । तथा दिनकरदीधितिषु-रविरश्मिषु वनान्तरेषु-

---

१. शिल्पं शिल्पं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

काननान्तरालेषु ये तरवस्तेषां शिरसि श्रितानि-अवस्थितानि यानि शाखाशिखराणि-शाखाग्राणि तेषु विलम्बमानासु-किञ्चित्कालक्षेपं कुर्वाणासु सतीषु । तथा अस्ताचलस्य-अस्तगिरेर्या वनराजिरेखा-काननपंक्तिविस्तारस्तस्यां । **"रेखा स्याल्पके छद्मन्याभोगोल्लेखयोरपि ।"** [२।२५] इत्य**नेकार्थः** । उपरिपतितं-उपरिष्टात्प्राप्तं रागिणं अहर्मणिं-सूर्यं अवलोक्य-वीक्ष्य ईर्ष्या च-परोत्कर्षासहनं मात्सर्यं यदसावस्यां वनराज्यां रक्त इति । रोषश्च-भर्तुरिवोपरि कोपः, मामभुक्त्वैव मां असजदिति रूपः, भयं च-मा कदाचिन्नागच्छदपि ततो द्वन्द्वैकवद्भावे ईर्ष्यारोषभयं तस्मादिव पश्चिमाशामुखे जपापुष्पनिचयवत्-जपाकुसुमसमूहवत् रक्ता रुक्-कान्तिर्यस्य तत्तस्मिन् जाते सति । किम्भूतायां अस्ताचलवनराजिरेखायां ? विस्तीर्णशिलावकाशः पृथुशिलान्तरमेव जघनं-श्रोणी यस्याः सा तस्यां । तथा उल्लसन्तः-विलसन्तो लोहिता-रक्ता अधराः-अधःस्थिता पल्लवाः-किसलयानि यस्याः सा तस्याम् । अन्यस्या अपि कान्ताया मुखं विस्तीर्णशिलावकाशवज्जघनं यस्याः सा तस्याम् । तथा उल्लसन् लोहितो अधरपल्लवः-ओष्ठकिसलयं यस्याः सा तस्याम् । अपरकान्तायामनुरागिणं उपरिपतितं पतिमवलोक्य ईर्ष्यादिवशात् रक्तं स्यात् । तथा निजनीडेषु-आत्मीयकुला येषु यन्निलयनं-अवस्थानं तस्य यदाऽऽकूतं-अभिप्रायस्तेन कूजितः-शब्दितो जरदण्डजानां-वृद्धपक्षिणां यो व्रजः-वृन्दं तस्मिन् नभः-व्योम मुखरयति-सशब्दं कुर्वति सति । तथा सन्ध्याविधेः-सायन्तनकर्मणः सन्ध्यावन्दनादेर्या विधित्सा-कर्त्तुमिच्छा तया हेतुभूतया द्विजन्मजनाः-ब्राह्मणलोकाः मुनयश्च-यतयस्तेषां निकाये-समूहे सरः-सरसीं व्रजति सति, स्नानपूर्वकत्वात् सन्ध्याविधिविधानस्येति । तथा अन्धकारे-तमसि गगनलक्ष्मीं-नभःश्रियं श्यामयति-श्यामलां कुर्वति सति । उत्प्रेक्ष्यते, कालागुरुरसस्य-कृष्णागुरुद्रवस्य अङ्गराग इव-विलेपन इव । कृष्णागुरुरसांगरागो हि अङ्गं श्यामलयत्येव । किम्भूते अन्धकारे ? अभिसारिकायाः-सङ्केतस्थानगामिन्याः कामिन्याः-स्वैरिण्या इत्यर्थः, बन्धुरिव-भ्रातेव यः सः तस्मिन् । यथा भ्रातुर्गृहे स्वैरं रमते तथा अन्धकारेऽपि अभिसारिकायाः यथेच्छं प्रवृत्तिरिति भावः ।

**"हित्वा लज्जा भये श्लिष्टा मदनेन मदेन या ।**
**अभिसारयते कान्तं सा भवेदभिसारिका ॥ १ ॥"** [ ]

**रुद्रटेऽप्युक्तम्—**

**"अभिसारिका तु या सा दूत्या दूतेन वामसहैका वा ।**
**अभिसरति प्राणेशं कृतसङ्केतो[१] यथास्थानम् ॥१ ॥"** [काव्यलङ्कार १२।४२]

१. कृतसंकेता अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

"**बन्धुर्भ्रातृबान्धवयोः**" [२।४६] इत्य**नेकार्थः** । एवंविधे समये राज्ञः-भीमस्य सन्ध्यावसरं-सायन्तनसमयं आवेदयत्-ज्ञापयत् सत् किन्नरमिथुनं इदं वक्ष्यमाणं अगायत्-रागवदुच्चारेण अपठत् ।

**भोगान्भो ! गाङ्गवीचीविमलितशिरसः प्राप्य शंभोः प्रसादा-**
**न्मोहान्मोहानभिज्ञाः क्वचिदपि भवत प्राणिनो दर्पभाजः ।**
**यस्माद्यः स्मार्तविप्रप्रणतिनुतपदः सर्वसंपन्नभोगो**
**भास्वान्भाः स्वाङ्गभूता अपि स परिहरन्नस्तमेष प्रयाति ॥ २२ ॥**

**भोगानिति** । भो ! इति आमन्त्रणे । भो प्राणिनः ! गाङ्गवीच्या विमलितं शिरो यस्य स तस्य गङ्गोर्मिनिर्मलीकृतोत्तमाङ्गस्य शम्भोः-शिवस्य प्रसादाद् भोगान्-शब्दादीन् विषयान् प्राप्य दर्पभाजः-दृप्तास्सन्तः मोहात्-अज्ञानात् सकाशात् ऊहानभिज्ञाः ऊहायां-विचारणे अनभिज्ञाः-अचतुराः, अविमर्शकामात् क्वचिदपि विषये भवतामायोगेऽपि सानुबन्ध-त्वाद्विधौ पञ्चमी, यस्माद्धेतोः स्मार्त्तविप्रैः-स्मृतिपाठकद्विजैः प्रणतौ-प्रणामसमये नुते-स्तुते पदे-चरणौ यस्य स, तथा सर्वा सम्पत् यस्य स सकलश्रीकः, तथा नभोगः-वियद्गामी यो भास्वान्-रविः सोऽपि स्वाङ्गभूताः-स्वशरीरप्राप्ता भा-दीप्तीः परिहरन्-त्यजन्। एष भवतां प्रत्यक्षोऽस्तं प्रयाति । सर्वे सुलभा दुर्लभाश्च सम्पन्नाभोगा अस्येत्युक्त्याऽभिहितं तस्मादेवंविधस्य महात्मनो रवेरस्तं विलोक्य शम्भोराराधनादिकार्ये न प्रमदितव्यमित्यर्थः । पदशब्दः पुन्नपुंसकः । "**भूतं सत्योपमनायोः । प्राप्तेऽतीते पिशाचादौ पृथ्व्यादौ जन्तुयुक्तयोः ।**" इत्य**नेकार्थः** [२।१८६-१८७] ॥ २२ ॥

**एतदाकर्ण्य नरपतिः सांध्यं विधिमन्वतिष्ठत् ।**

**एतदिति** । एतत् रवेरपि एवंविधावस्था भवति तर्हि अन्येषां का विकल्पना ? इत्यादि वैराग्यगर्भितं किन्नरमिथुनोक्तं वृत्तं आकर्ण्य नरपति-भीमः सन्ध्यायां भवं सान्ध्यं विधिं-सन्ध्यावन्दनादिकं अन्वतिष्ठत्-चकार । सान्ध्यमिति "**भर्तुसन्ध्यादेरण्**" [सि० हे० श० ६।३।८९] इत्यण् ।

**क्रमेण च[1] प्रचुरचलञ्चाषकुलकालकान्ति[2]काशिभिर्बहलतमतमः[3]-कल्लोलैरालोडिते लोके लोकेश्वरो विहितविकालवेलाव्यापारः पारसी-कोपनीतपारावारपारीणपारावत[4]पतत्त्रिपञ्जरसनाथे विकीर्णवासधूलिनि**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**धूपधूममुचि विचित्रचित्रशालिनि प्रान्तप्रदीपितदीप्रप्रदीपदीप्ति[५]दण्डखण्डित-तमसि सज्जितशय्ये शय्यागृहे गृहीतस्पृहणीयाङ्गरागो रागसागरकल्लोललोल-लोचनया[६] तया[७] प्रियया प्रियंगुमञ्जर्या अलीककलहकोप[८]कुटिलभ्रम-द्भ्रूकोणतर्जनजनितस्मितः स्मरविकारकारिकरिकलभकुम्भविभ्रमायमाणो पीवर[९]कुचकुम्भपीठमारोपितो[१०]रजनीमनैषीत् ।**

**क्रमेण च**-तत्समयोचितकृत्यकरणपरिपाट्या प्रचुराः-बहुलाः चलन्तो ये चाषाः-किकीदिवयस्तेषां यत्कुलं-वृन्दं तद्वत् काला-कृष्णा या कान्तिस्तया काशन्ते-दीप्यन्तेऽ-वश्यमिति प्रचुरचलच्चाषकुलकालकान्तिकाशिनस्तैः, कृष्णच्छविभिरित्यर्थः। एवंविधैः बहलतमाः-अतिशयेन निविडाः ये तमःकल्लोलाः-अन्धकारपरम्परास्तैर्लोके आलोडिते-अवगाहिते व्याप्ते सति लोकेश्वरः-भीमः विहितो विकालवेलायाः-सन्ध्यासमयस्य व्यापारः-कर्म येन, ईदृग्विधः सन् एवंविधे शय्यागृहे-निवासभवने रजनीमनैषीत्-अत्यवाहयत् । किम्भूते शय्यागृहे ? पारसीकदेशादुपनीताः-उपढौकिताः अतिशीघ्रगामित्वात्, पारावारपारगामिनः पारावारपारीणाः ये पारापतपतत्त्रिणस्तेषां यानि पञ्जराणि-वीतंसास्तैः सनाथे-सहिते । "**अवारपारात् पन्तानुकामं गामि**" [पा० सू० ५।२।११] इति सूत्रेण व्यस्ताद्विपरीताच्च इत्युक्तत्वात्, खः खस्य चेनः । तथा विकीर्णा-विक्षिप्ता वासधूलिः-सुगन्धिचूर्णपांशुर्यत्र तत्तस्मिन् । तथा धूपधूमं मुञ्चति[१] धूपधूममुक् तस्मिन्, तत्र तस्य विधीयमानत्वात् । तथा विचित्राणि-विविधानि चित्राणि आलेख्यानि यत्र, ईदृशी शालागृहैकदेशो विद्यते यत्र तत् विचित्रचित्रशालि तस्मिन् । "**शालौकस्तत्प्रदेशयोः । स्कन्धशाखायाम्**" [२/५२३-२४] इत्य**नेकार्थः** । यद्वा, विचित्रैश्चित्रैः शालते-शोभतेऽवश्यमिति विचित्रचित्रशालि तस्मिन् । तथा प्रान्ते-गृहकोणे प्रदीपिताः-तैलक्षेपेण प्रभास्वरीकृता दीप्रा-दीपनशीला ये प्रदीपास्तेषां ये दीप्तिदण्डा-सम्मिलितरुचिप्रपञ्चास्तैः खण्डितं-शकलीकृतं तमः-अन्धकारं यस्मिस्तत्तस्मिन् । दीप्तय एव दण्डाः दीप्तिदण्डाः । तथा सज्जिता-समारचिता शय्या-शयनीयं यस्मिस्तत् तस्मिन् । किम्भूतो राजा ? गृहीतः-स्वीकृतः स्पृहणीयः-अभिलषणीयः अङ्गरागः-विलेपनं येन सः । पुनः किम्भूतः ? रागः-विषयाभिलाषः स एव सागरस्तस्य ये कल्लोलाः-विविधरुचिवीचयः, यद्वा रागसागर-कल्लोलाः-अनुरागपरम्परास्तैर्लोले-चपले लोचने यस्याः सा तया रागसागरकल्लोल-लोचनया तया पूर्वोक्तप्रियया-वल्लभया प्रियङ्गुमञ्जर्या कर्त्र्या अलीककलहाद् यः कोपस्तेन कुटिलः-वक्रो भ्रमन्-परावर्तमानो यो भ्रूकोणः-भ्रूप्रान्तस्तेन यत्तर्जनं तेन जनितं उत्पादितं

१. मुंचतीति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्मितं हास्यं यस्य सः, ईदृग्विधः सन् स्मरविकारं कुरुत इत्येवंशीलौ स्मरविकारकारिणौ-मन्मथविलासोल्लासितौ, तथा कलभकुम्भवत्-करिपोतशिरःपिण्डवत् विभ्रमवन्तौ[1]-विलासवन्तौ भवन्तौ विभ्रमायमाणौ यौ तौ कलभकुम्भविभ्रमायमाणौ ततः कर्मधारयः, ईदृशौ पीवरौ-पीनौ यौ कुचौ-कुचकुम्भौ तावेव पीठं-आसनं तत् कर्म आरोपितः-अवस्थापितः । अनेन रजन्याः-सुखातिक्रम उक्तः । विभ्रमायमाणेत्यत्र विभ्रमशब्दात् "**तद्वति वर्त्तमानादायिः**" [ ]। शोभादिभ्यस्तद्वद्वृत्तिभ्य एव प्रत्ययो भवतीति वचनात् ।

**एवमस्य सकलसंसारसुखपरम्परामनुभवतो यान्ति दिवसाः ।**

**एवं**-अनेन प्रकारेण अस्य-भीमस्य सकलसंसारसुखानां या परम्परा-परिपाटी तां अनुभवतः-आस्वादयतः सतो दिवसाः यान्ति-गच्छन्ति ।

**कदाचिच्चारुचामीकराचलचलद्देहाधिदेवतेव बहुधानन्दने सुरुचिरवा-यौवनारम्भे सुरतोत्सवमनुभवन्ती पत्युः प्राणप्रिया प्रियंगुमञ्जरी गर्भं बभार ।**

**कदाचित्**-कस्मिंश्चित् समये सुष्ठु रुचिः-इच्छा रवश्च-स्वरे यस्याः सा सुरुचिरवाः-शोभनाभिलाषाः कलभाषिणी च, पत्युः-भीमस्य प्राणेभ्योऽपि प्रिया-दयिता प्रियङ्गुमञ्जरी गर्भं बभार-दध्रे । किं कुर्वती ? बहुधा-अनेकधा आनन्दयति-हर्षयति यः स तथा तस्मिन्, यौवनारम्भे तारुण्यादौ सुरतं-मोहनं तदेव उत्सवः-उद्धर्षस्तं अनुभवन्ती-आस्वादयन्ती । प्रियङ्गुमञ्जरी केव ? चारु[2]:-मनोज्ञो यश्चामीकराचलः-मेरुस्तस्य चलन्-विलसन् देहो यस्या ईदृशी अधिष्ठातृ देवता इव । सा हि बहुधा-अनेकधा सुष्ठु अतिशयेन रुचिरवायौ-मृदुसुरभिमरुति नन्दनाख्ये वनारम्भे-वनमुख्ये सुरतायाः-देवत्वस्य उत्सवं-हर्षं अनुभवति । आरम्भणं आरम्भः, आदिरित्यर्थः । नन्दनं हि वनानामादिः-अग्र्यं प्रधानमित्यर्थः । यदि वा, वनानि आरभ्यन्ते अनेनेति कृत्वा वनारम्भः शतानन्देन हि प्रथमं नन्दनं सृष्ट्वा तद्वृक्षावयवैः-बीजशाखादिभिरितरवनानि जगति सृष्टानि ।

**तेन च विकचचूतमञ्जरीव कोमलफलबन्धेन बन्धुर[1]रमणीयाकृतिः, चन्द्रकलेव कलाप्रवेशेनोपचीयमानप्रभा, प्रभातवेलेवोन्मीलदंशुमालि[2]मण्डलेनानन्द्यमाना[3], रत्नाकरतरङ्गमालेवान्तःस्फुरन्माणिक्य-कान्तिकलापेनोद्भासमाना, गर्भसंदर्भितेन लावण्यपुण्य[4]परमाणुपुञ्जेन व्यराजत राजमहिषी ।**

---

१. विभ्रमवत्तौ विभ्रमवन्तौ अनू. । २. उत्प्रेक्ष्यते, चारुः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तेन चेति** । तेन च-गर्भेण संदर्भितः-रचितस्तेन लावण्येन सौन्दर्येण पुण्यः-पवित्रो यः परमाणुपुञ्जस्तेन लावण्यपुण्यपरमाणुपुञ्जेन सा राजमहिषी-पट्टराज्ञी व्यराजत-शुशुभे । किम्भूता सा ? कुसुमान्तर्गूढः फलारम्भकरसकणिकारूपो[1] बन्धः कोमलः-अभिनवोत्पन्नत्वात् मृदुर्यः फलस्य बन्धस्तेन विकचा-सविकासा या चूतमञ्जरी-आम्रमञ्जरी सेव बन्धुररमणीया-अतिशयेन सुन्दरा आकृतिः-आकारो यस्याः सा बन्धुररमणीयाकृतिः । यथा फलबन्धयुताऽऽम्रमञ्जरी रमणीयाकारा भवति तथा तेन साऽपि। बन्धुररमणीया इत्यत्र एकार्थो द्विरुक्तः शब्दस्तस्यैव सातिशयत्वं द्योतयति । तथा कलाप्रवेशेन-कलान्तश्चारेण चन्द्रकलेव-शशिषोडशांश इव उपचीयमाना-वर्ध्यमाना वृद्धिं नीयमाना प्रभा-देहकान्तिर्यस्याः सा उपचीयमानप्रभा । यथा चन्द्रकला प्रतिपदि वर्तमाना सती कलाप्रवेशेन द्वितीयायां उपचीयमानप्रभा भवति, तथा तेन गर्भेण साऽपि । तथा उन्मीलत्-प्रादुर्भवत् यत् अंशुमालिमण्डलं-रविबिम्बं तेन प्रभातवेलेव-प्रभातसमय इव आनन्द्यमाना-हर्षं प्राप्यमाणा । यथा नवरविबिम्बेन प्रभातवेला आनन्द्यते तथा तेन साऽपि। तथा अन्तः-मध्ये अर्थात्तरङ्गमालाया एव स्फुरन्-दीप्यमानो यो माणिक्यानां-रत्नानां कान्तिकलापः-दीप्तिसमूहस्तेन रत्नाकरस्य-अब्धेस्तरङ्गमालेव-वीचिपंक्तिरिव उद्भासमाना-शोभमाना । यथा अन्तःस्फुरद्रत्नकान्तिवृन्देन रत्नाकरवीचिमाला भासते तथा तेन सा ऽपीति ।

**गच्छत्सु च केषुचिद्दिवसेषु सुवृत्ततुहिनाचलगण्डशैलयुगलमिव बालमयूरिक्रान्तम्[1], अनङ्गसौधशिखरद्वयमिव शेखरीकृतेन्द्रनीलकलशम्, उज्ज्वलरौप्यनिधानकुम्भयुग्ममिव भुजंगसंगतमुखम्[2], उल्लासि[3]हंसमिथुनमिव चञ्चूत्खातपङ्किलकमलकोमलकन्दम्[4], ऐरावतमस्तकपिण्डपाण्डुरमुच्चचूचुकश्यामलिम्नाऽलंकृतमापूर्यमाणमन्तःक्षीरेण क्षणं-[6]मखिद्यत पयोधरद्वन्द्वमुद्वहन्ती ।**

**गच्छत्सु** च केषुचिद्दिवसेषु गर्भानुभावात् सा-प्रियङ्गुमञ्जरी ईदृशं पयोधरद्वन्द्वंकुचयुग्मं उद्वहन्ती-धारयन्ती क्षणं क्षणं-मुहूर्तं मुहूर्तं अखिद्यत-खेदमाप । किम्भूतम् ? अन्तः-मध्ये क्षीरेण-पयसा आपूर्यमाणं-भ्रियमाणं । अत एव पुनः किम्भूतम् ? ऐरावतमस्तकपिण्डवत्-सुरगजकुम्भस्थलवत् पाण्डुरं-श्वेतं, तथा उच्चचूचुकयोर्यः श्यामालिमा-श्यामत्वं तेन अलङ्कृतं-विभूषितं । एतावता अधः पाण्डुरा[2], उपरि च नीलचूचुकराजितमस्तीति भावः । अथैतदाकृत्यैवोपमानान्याह—उत्प्रेक्ष्यते, बालमयूराभ्यामा-

१. फलारम्भरस० अनू. । २. पाण्डुरं अनु. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्रान्तं-आश्रितं सुष्ठु वृत्तं-वर्तुलाकारं तुहिनाचलस्य-हिमाचलस्य गण्डशैलयुगलमिव-पर्वतच्युतस्थूलपाषाणद्वन्द्वमिव । कुचयुगलस्य गण्डशैलयुगलं, चूचुकद्वयस्य च बालबर्हियुगमुपमानम् । तथा शेखरीकृतौ-अवतंसीकृतौ उपरि धृतौ इन्द्रनीलस्य-नीलमणेः कलसौ-कुम्भौ यस्मिंस्तत्तथाविधं, अनङ्गसौधस्य-काममन्दिरस्य शिखरद्वयमिव । अत्र कुचयुगस्य शिखरद्वयं, चूचुकद्वयस्य च इन्द्रनीलकुम्भद्वयमुपमानम् । तथा भुजङ्गाभ्यां-कृष्णाहिभ्यां सङ्गतं-परिवेष्टितं मुखं यस्य तत्तथाविधं, उज्ज्वलं-दीप्यमानं रौप्यं-रूप्यघटितं निधानकुम्भयोर्युग्ममिव । कुचयुगमस्य रौप्यघटद्वयं, चूचुकद्वयस्य च कृष्णभुजगद्वय-मुपमानम्। तथा चञ्चूभ्यां उत्खातौ-उत्पाटितौ पङ्किलौ-कर्दमवन्तौ कमलकोमलकन्दौ येन तत्, ईदृशं उल्लासिनशीलं हंसमिथुनमिव । कुचयुगमस्य हंसमिथुनं, चूचुकद्वयस्य च चञ्चूत्खातपङ्किलकमलकन्दद्वयमुपमानम् ।

अथ प्रियङ्गुमञ्जरी गर्भानुभावाद् यद् यद् अभिललाष तत्तदाह—

**बबन्ध च चन्द्रकलाङ्कुरकवलने स्पृहाम् ।**

**अभिलाषमकरोच्च[१]चञ्चलचञ्चरीककुलकलरवरमणीयविकच-चूतवनविहारेषु ।**

**स्पर्शममन्यत बहु बहलम[२]भ्यर्णावकीर्ण[३]विकसितकमलवन-निष्यन्दिमकरन्दबिन्दोर्मन्दतरतरङ्गसङ्गशीतल[४]मलयमारुतस्य ।**

**चिन्तयांचकार[५] चतुरुदधिलावण्यरसमास्वादयितुम् ।**

**अभ्यवाञ्छदतुच्छमशेष[६]ममन्दमन्दरमन्थानमन्थानो[७]त्पन्नममृतमातृप्ति पातुम् ।**

**बबन्धेति** । पूर्वक्रियापेक्षया चशब्दप्रयोगः । चः-पुनः चन्द्रकलाङ्कुराणां कवलने-भक्षणे स्पृहां-वाञ्छां बबन्ध-अबघ्नात्-अकरोदित्यर्थः ।

चः-पुनश्चञ्चलचञ्चरीकाणां-चटुलभृङ्गाणां यत्कुलं तस्य कलरवः-मधुरस्वर स्तेन रमणीयं-रम्यं यद् विकचचूतवनं सविकासाम्रकाननं तत्र ये विहाराः-विचरणानि तेषु अभिलाषमकरोत् ।

तथा मन्दतराः-[१] शनैर्शनैर्वान् तथा तरङ्गाणां सङ्गेन-सम्पर्केण शीतलः-शीतो यो

---

१. मन्दतरः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मलयमारुतस्तस्य बहलं-निविडं स्पर्शं बहु अमन्यत-बहुमानं आदरमदात् । पुनः पुनः तत्स्पर्शं ववांछेत्यर्थः । किम्भूतस्य मारुतस्य ? अभ्यर्णे राज्याः समीपे अवकीर्णानि क्षिप्तानि विकसितकमलवनेभ्यो निस्यन्दिनः-क्षरणशीला मकरन्दबिन्दवो येन स तथा तस्य, कमलमधुबिन्दुवर्षिण इत्यर्थः ।

तथा चतुर्णां उदधीनां लावण्यरसं-लवणभावस्वादं आस्वादयितुं-अनुभवितुं चिन्तयाञ्चकार-व्यामृशत्[1] । यदुत अहं तल्लावण्यरसमास्वादयामीति ववांछेत्यर्थः ।

तथा अतुच्छं-अद्भुतं अशेषं-समस्तं अमन्दः-अनल्पो यो मन्दर एव-मेरुरेव मन्थानः-मन्थदण्डस्तेन यन्मथनं-विलोडनं तेनोत्पन्नं-जातं अमृतं-सुधां आतृप्ति-तृप्तिपर्यन्तं पातुमभ्यवाञ्छत् आचकांक्ष ।

**इत्यनेकधोत्पन्नगर्भप्रभावानुरूप[1]दोहदसंपत्तिसंपन्नाधिककमनीय-कान्तिरुल्लसद्बहलमृगमदजललिखितविचित्रपत्रभङ्गभव्यविपुलकपोल-मण्डलेन मुखेन शशाङ्कमन्तः[2]स्फुरत्कलङ्कमुपहसन्ती द्विगुणमवनिपतेस्तस्य प्रिया प्रियंगुमञ्जरी बभूव ।**

**इति**-अमुना प्रकारेण अनेकधा-बहुधा उत्पन्नानि गर्भप्रभावेण-गर्भानुभावेन अनुरूपाणि-योग्यानि अद्भुतानि यानि दोहदानि-दौर्हृदानि तेषां या सम्पत्तिः-सम्पत् तया सम्पन्ना-युक्ता प्रियङ्गुमञ्जरी तस्य-पूर्वोक्तस्य अवनिपतेः-भीमस्य द्विगुणं-पूर्वस्मात् प्रियत्वादधिकं यथा भवति तथा प्रिया-वल्लभा बभूव । किम्भूता ? अधिका कमनीया कान्तिः-देहदीप्तिर्यस्याः सा, तथा मुखेन अन्तः-मध्ये स्फुरन्-विलसन् कलङ्कः-लक्ष्म यस्य स, तथाविधं शशाङ्कः-चन्द्रमुपहसन्ती-जयन्ती, मुखे कलङ्कसाम्यमाह । किम्भूतेन मुखेन ? उल्लसत्-विलसद् बहलं-निविडं यन्मृगमदजलं-कस्तूरिकाद्रवस्तेन लिखिता-विन्यस्ता विचित्रा-नानाविधा ये पत्रभङ्गाः-पत्रवल्लर्यस्तैर्भव्यं-मनोहरं विपुलं-विशालं कपोल-मण्डलं-गण्डस्थलं यस्मिंस्तत्तेन । गर्भानुभावात् पाण्डुरस्य मुखस्य चन्द्रः मृगमदपत्रभङ्गानां च कलङ्कमुपमानम् ।

**तथाहि –**

**सा समीपस्थितज्येष्ठा पयःपूर्णपयोधरा ।**
**अग्रप्रावृडिवाह्लादमकरोत्तस्य भूपतेः[3] ॥ २३ ॥**

---

१. व्यमृशत् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तथाहीति** । द्विगुणं प्रियत्वमेव दर्शयति–

**सेति** । सा-प्रियङ्गुमञ्जरी तस्य-प्रतीतस्य भूपतेः-भीमस्य आह्लादं-आनन्दमकरोत्। या ह्यतिशयेन प्रिया भवति सैवानन्दं दृष्टा सती जनयतीति भावः । किम्भूता सा ? समीपे स्थिता-अवस्थिता ज्येष्ठाः-वृद्धस्त्रियो ज्ञातप्रसवस्वरूपा यस्याः सा । तथा पयसा-क्षीरेण पूर्णौ-भृतौ पयोधरौ-स्तनौ यस्याः सा । केव ? अग्रप्रावृडिव-अग्रं प्रावृषो अग्रप्रावृट्-आषाढवर्षाः, यथा अग्रप्रावृट् भुवः परमोपकारिणीति भुवः पत्युराह्लादं करोति। किम्भूता अग्रप्रावृट् ? समीपे स्थितो ज्येष्ठः-शुक्रो मासो यस्याः सा, तथा पयसा-जलेन पूर्णः पयोधरः-मेघो यस्याः सा ॥२३ ॥

**एवमविरतविविधवाञ्छोत्सवाविच्छेदकर्तरि भर्तरि, संज्ञयैवाज्ञाकारिण्यपारे परिवारे[१], बहुभङ्गिभाग्योपभोग[२]क्रमेणातिक्रामति कुत्रचित्काले[३], कालकलाकुशलश्लाघनीये पूर्णप्राये प्रसवसमये, विलीनजात्यशातकुम्भभासि भास्वत्युदयमारोहति, हततिमिरासु दिक्षु क्षणमेकं[४] सा प्रसववेदनाव्यतिकरमन्वभूत ।**

**एवं**-अमुना प्रकारेण अविरतं-निरन्तरं विविधवाञ्छोत्सवानां-अनेकविधाभिलाषरुपोद्भवानां अविच्छेदकर्त्ता-पूरकस्तथाविधे भर्त्तरि-प्रिये सति । तथा संज्ञयैव-भ्रूकराङ्गुलिचालनादिरूपसङ्केतेनैव अपारे-अपर्यन्ते परिवारे-परिजने आज्ञां-आदेशं करोतीत्येवंशील आज्ञाकारी तस्मिन् सति, वक्तुमपि प्रयासं न कारयति, अपितु संज्ञयैव सर्व आदेशं करोतीत्यर्थः। तथा बहुभङ्ग्या-अनेकविच्छित्त्या भाग्यस्य शुभकर्मणो य उपभोगः-अनुभवस्तस्य क्रमेण-परिपाट्या कुत्रचित् काले-कस्मिंश्चित्समये अतिक्रामति-गच्छति सति। तथा कालकलासु-कालविशेषेषु त्रुटिलवमुहूर्त्तादि रूपेषु ये कुशलाः-प्रवीणास्तेषां तैर्वा श्लाघनीयः-प्रशंस्यस्तस्मिन् प्रसवसमये-जन्मकाले पूर्णप्राये स्तोकमपूर्णे सति । तथा भास्वति-रवौ उदयं-उदयाचलमारोहति-आश्रयति सति । किम्भूते रवौ ? विलीनं-द्रवीभूतं जात्यं सदा करोत्पन्नं पत् शातकुम्भं-स्वर्णं तद्वत् पिङ्गा-पिङ्गला भाः-कान्तिर्यस्य स तस्मिन्। "**उदयः पर्वतोन्नत्योः**" [३।५१२] **इत्यनेकार्थः** । तथा दिक्षु हतानि-ध्वस्तानि तिमिराणि यत्र ईदृशीषु सप्रकाशासु सतीषु सा प्रियङ्गुमञ्जरी एकं क्षणं-कालविशेषं नाडिकाषष्ठ्यंशं मुहूर्त्तं वा यावत् प्रसववेदनायाः-प्रसवव्यथायाः व्यतिकरं-सम्पर्कं अन्वभूत-अनुबभूव ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**ततश्च—**

**प्रभासंयोगिविख्यातं योग्यं नालस्यकर्मणः ।**
**पृथ्वीव पुण्यतीर्थं सा कन्यारत्नमजीजनत् ॥ २४ ॥**

**ततश्चेति** । ततः प्रसववेदनामनुभूय—

**प्रभेति** । वृत्तम् । सा-प्रियङ्गुमञ्जरी कन्यारत्नं अजीजनत्-प्रासूत । किम्भूतम् ? प्रभायाः-कान्तेः संयोगो विद्यते यस्मिंस्तत्प्रभासंयोगि दीप्तिमदित्यर्थः । तथा विशेषेण ख्यातं-प्रसिद्धं । तथा नलस्य नृपतेरिदं नालं तस्य कर्मणः, अगण्यपुण्यात्मकस्य योग्यं-उचितं नलस्य भोग्यमित्यर्थः । का ? किमिव ? पृथ्वी-भूः पुण्यतीर्थमिव । यथा पृथ्वी पुण्यतीर्थं प्रभासाख्यमजनयत् । किम्भूतं पुण्यतीर्थम् ? योगिभिः-योगमार्गरतैर्विख्यातं प्रसिद्धं, तत्र योगिन एव योगमभ्यस्यन्तीति तस्य तैः प्रसिद्धिः । तथा आलस्य-असारस्य कर्मणो न योग्यं किन्तु सारस्यैव-तपोध्यानादेर्योग्याम् । अथवा आलस्य कर्मणो न योग्यं, किं तर्हि उद्यमक्रियाया योग्यं तदर्थं केनाऽपि न प्रमदितव्यमिति भावः ॥ २४ ॥

**तत्र च दिवसे 'विकसितकुमुदकुन्दकान्त[१]कीर्तिसुधया धवलानि करिष्यत्येषा प्रवर्धमानास्मन्मुखानि[२]' इति प्रियादिव प्रसन्नाः समपद्यन्त दश दिशः । 'मा स्म पुनरस्मद्गुणानेषापहार्षीत्' इत्यपहृतैकैकसारगुणाः सभया नमस्यन्त इव तस्यै कुसुमाञ्जलिममुञ्चँश्चेन्द्रादयो[३] देवाः । स्वकान्ति-सर्वस्वापहारभयादिव दिवि ननृतुरप्सरसः । 'किमस्याः सममुत्पन्न-[४]मन्यदपि[५] कन्यारत्नम्' इत्यन्विष्यन्त इव परितः परिबभ्रमुः सुरभयः समाः समीरणाः ।**

**तत्र च** दिवसे-कन्याजन्मदिने दश-दशसंख्या दिशः प्रसन्नाः-स्फुटावकाशाः समपद्यन्त-जाताः। कस्मादित्र ? उत्प्रेक्ष्यते, विकसितानि-प्रफुल्लानि यानि कुमुदानि-श्वेतपद्मानि कुन्दाश्च-पुष्पविशेषास्तद्वत् कान्ता-विशदा कीर्तनीया-प्रशंसनीया या कीर्त्तिः सैव सुधा तया कृत्वा एषा-दमयन्ती प्रवर्द्धमाना सती अस्मन्मुखानि धवलानि करिष्यति इति प्रियादिव-अभीष्टादिव । अन्योऽपि इतः प्रियं[१] प्राप्स्यामीत्याकलय्य पुराऽपि प्रसन्नो भवत्येव तथा एता दिशोऽपि । तथा च इन्द्रादयो देवास्तस्यै-कन्यायै कुसुमाञ्जलिं अमुञ्चन्-अवर्षन् । उत्प्रेक्ष्यते, एषा-कन्या पुनः-भूयो अस्मद्गुणान्-कलादीन् मा स्म

---

१. प्रियां अनु. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अपहार्षीत्-मा अपहरतु, इति-हेतोः अपहृतः-कन्यया गृहीतः एकैकः सारगुणो येषां ते, ईदृग्विधाः सभया नमस्यन्त इव । अन्यस्याऽपि कस्यचित् किञ्चित्सारवस्तु केनचित् बलवताऽपहृतं भवति तदा अन्यवस्तुरक्षायै स तं सभयो नमस्यन् पुष्पादिभिस्तत्पूजां कुरुते तथैते देवा अपि । वस्तुतस्तु तद्भाग्यादेव नभसः पुष्पवृष्टिर्बभूव, परं तत्र कविरित्थमुत्प्रेक्षां चकार-मा स्म अपहार्षीदिति । "अत्र मा शब्देन निषेध उच्यते, स्मशब्देन त्रास एव द्योत्यते" इति **क्रियारत्नसमुच्चये** [ ]। तथा अप्सरसः-देवाङ्गनाः दिवि-आकाशे ननृतुः-अनृत्यन् । उत्प्रेक्ष्यते, स्वकान्तिरेव-निजदेहदीप्तिरेव यत्सर्वस्वं-सर्वधनं तस्य यो अपहारः-अपहरणं तस्य यद्भयं तस्मादिव माऽस्माकं कान्तिसर्वस्वमियमपहरतु, इति भीत्या ननृतुः । नर्त्तनेन हि प्रसन्ना भविष्यतीति, ततो न अपहरिष्यतीति भावः । तथा सुरभयः-सौरभ्यवन्तः समाः-अनुकूलाः समीरणाः परितः-सर्वत, परिबभ्रमुः-परिभ्रान्ताः। उत्प्रेक्ष्यते, किं अस्याः कन्याया समं-तुल्यं, अन्यदपि कन्यारत्नमुत्पन्नमित्यन्विष्यन्त इव-विलोकयन्त इव, कन्यारत्नाऽन्वेषिणो हि सुरभयः-सौरभ्यवन्तः समाः-सश्रीकाश्च काम्या भवन्ति ।

**किं बहुना –**

**अमन्दानन्दनिष्यन्द[१]मपास्तान्यक्रियाक्रमम् ।**
**जगज्जन्मोत्सवे तस्याः पीतामृतमिवाभवत् ॥ २५ ॥**

**किम्बहुना**-किं बहूक्तेन-

**अमन्देति** । वृत्तम् । तस्याः-दमयन्त्या जन्मनि उत्सवः-महस्तस्मिन् जगत्पीतं-आस्वादितं अमृतं येन ईदृशमिव अभवत् । पीतामृतत्वस्यैव स्वरूपमाह—किम्भूतं जगत् ? अमन्दः-अतुच्छः आनन्दस्य-प्रमोदस्य निष्पन्दः-चेष्टा यस्य तत् । तथा अपास्तः-मुक्तः अन्यक्रियायाः जन्मोत्सववीक्षणात् अपरकर्मणः क्रमः-परिपाटी येन तत् । सर्वोऽपि लोके जन्मोत्सवमेव वीक्ष्यते, तेन अन्यत्कर्म कुरुत इत्यर्थः । अन्योऽपि[१] हि यः पीतामृतो भवति स अमन्दानन्दमयो भवति । अमृतपानात् अन्यां क्रियां च कामपि न कुरुते तथेदं जगदपि ॥ २५ ॥

**अथ बहोः कालादनुरूपप्रौढप्रहरणप्राप्तिप्रीतहृदयेनास्फोटितमिव सकलजगद्विजयव्यवसायसाहसिकेन कुसुमसायकेन, चिरादुचिताश्रय-लाभ[२]मुदितमनसा स्फूर्जितमिव शृङ्गाररसेन, शुचिकाशकुसुमहास्येन[३] योग्यसहकारिकारणोपलम्भपूर्णमनोरथेन वल्गितमिव वसन्तमासेन,**

१. अपि नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**निजकर्मणः सफलतां मन्यमानेनोच्छ्वसितमिव मलयानिलेन, चिर-कालोपलब्धश्लाघ्याधारतया[१] हसितमिव रूपसंपदा, विलसितमिव[२] लावण्यलक्ष्म्या, प्रनृत्तमिव समस्तस्त्रीलक्षणाधिदेवतया, कलकलितमिव कान्तिकलापश्रिया ।**

**अथ**-अनन्तरं बहोः कालात्-चिरात् अनुरूपं-योग्यं प्रौढं-प्रगल्भं यत्प्रहरणं-दमयन्तीलक्षणमायुधं तस्य प्राप्त्या प्रीतं-तुष्टं हृदयं-मनो यस्य स तेन, कुसुमसायकेन-कामेन आस्फोटितमिव समुल्लसितमिव । अन्योऽपि यश्चिरात् किञ्चिदिष्टं लभेत तदा स समुल्लसति, तथा कामेनाऽपि दमयन्तीलाभात् समुल्लसितम् । किम्भूतेन कामेन ? सकलस्य-समस्तस्य जगतः-विश्वस्य विजये-वशीकरणे यो व्यवसायः-उद्यमस्तत्र सहसा-अविमर्शात्मकेन बलेन वर्तत इति । साहसिकस्तेजः "**ओजः सहोम्भसा वर्तते ठक्**" [पा० सू० ४।४।२७] इति ठक् । यद्वा, साहसं-धाष्टर्यं विद्यते यस्याऽसौ साहसी इनन्तस्ततः "**स्वार्थे कः**" [ ] साहसिकस्तेन । तता शृङ्गाररसेन स्फूर्जितमिव-विलसितमिव । किम्भूतेन ? चिरात्-बहुना कालेन उचितः-योग्यो य आश्रयः-दमयन्तीलक्षणं स्थानं तस्य लाभेन प्राप्त्या मुदितं-हृष्टं मनो यस्याऽसौ तेन । यथाऽहं[१] दमयन्तीमाश्रयिष्यामीति हृष्टं मनसा । तथा वसन्तमासेन वल्गितमिव-कूर्दितमिव । किम्भूतेन ? शुचीनि-धवलानि यानि काशकुसुमानि तदानीमेव तेषां सम्भवात्, तान्येव हास्यं यस्याऽसौ शुचिकाशकुसुमहास्य-स्तेन । पुनः किम्भूतेन ? योग्यं-स्वस्योचितं यत्सहकारिकारणं दमयन्तीरूपं, यथा वसन्तेन काम उद्दीप्यते तथा दमयन्त्यापि आलम्बनरूपत्वात् तस्याः तस्य उपालम्भः-[२] प्राप्तिस्तेन पूर्णः मनोरथः-अभिलाषः कामोद्दीपनरूपो यस्य स तेन । मुख्येनाऽपि कारणेन सहकारिकारणं विना कार्यमुत्पादयितुं दुःशकं, तेन दमयन्तीरूपं सहकारिकारणं प्राप्य पूर्णमनोरथः सन् वसन्तो वल्गतीति । तथा निजकर्मणः-विरहवेदनोत्पादकतारूपस्य सफलतां-कृतकृत्यतां मन्यमानेन-जानता मलयानिलेन-मलयवायुना उच्छ्वसितमिव[३] । मलयानिलेन ज्ञातं यदीयं दमयन्ती समुत्पन्ना तर्हि अस्याः विरहव्यथां जनयित्वा स्वकर्मणः साफल्यं प्राप्स्यामीति उच्छ्वसितम् । तथा चिरकालेन उपलब्धः-प्राप्तः श्लाघ्यः आधारः-दमयन्तीरूपो यया सा, ईदृश्या रूपसम्पदा हसितमिव-रूपसम्पदा व्यतर्कि, इयं तं अनेहसं काऽपि तादृश्यभूद् यामहं संश्रयामि, अथेयं दमयन्ती चेज्जाता तर्हि अहं एतामा-श्रयिष्यामीति हर्षेण हसितम् । अन्योऽपि आश्रयलाभात् हृष्टः सन् हसतीति । तथा लावण्यलक्ष्म्या-सौन्दर्यश्रिया विलसितमिव । तथा समस्तानां स्त्रीलक्षणानां अधिदेवतया-

---

१. अथाऽहं अनू. । २. उपलम्भः अनू. । ३. उच्छ्वसितिमिव-उल्लसितामिव अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अधिष्ठातृदेव्या प्रतृप्तमिव-ताण्डवितमिव, शुभ्राश्रयलाभात् । तथा कान्तिकलापस्य-दीप्तिसमूहस्य श्रिया-लक्ष्म्या कलकलितमिव-कोलाहलित मिव । कान्तिकलापश्रियाऽचिंति यदि मामप्याश्रयिष्यामीति हर्षात् कोलाहलश्चक्रे ।

**किं बहुना—**

**सर्गव्यापारखिन्नस्य बहोः कालाद्विधेरपि ।**
**आसीदिमां विनिर्माय श्लाध्यः शिल्पपरिश्रमः ॥ २६ ॥**

**किम्बहुना**-किं बहुक्तेन—

**सर्गेति** । वृत्तम् । सर्गस्य-सृष्टेर्यो व्यापारः-करणं तेन खिन्नस्य-श्रान्तस्य विधेरपि-ब्रह्मणोऽपि बहोः कालात्-चिरात् इमां दमयन्तीं विनिर्माय-निष्पाद्य शिल्पपरिश्रमः श्लाह्यः-वर्णनीयः आसीत् अन्यस्मिन्-समस्तेऽपि निर्मिते न विधेः शिल्पपरिश्रमः श्लाघ्योऽभूत्, अस्यां च निष्पादितायां स श्लाघ्यतामलभत । यदियं विधेः सृष्टिः श्रेयसी यस्यामीदृशी दमयन्ती अजायतेति ॥ २६ ॥

**एवमस्याः सततविस्तीर्णस्वर्णपूर्णपात्रपूजितपूज्यद्विजन्मनि जन्मनि संपन्ने नामकर्मसमये संमान्य मान्यजनं जनेश्वरो[२] वरप्रदानमनुस्मृत्य दमनकमुनेः 'दमयन्ती' इति नाम प्रतिष्ठितवान् ।**

**एवं**-अमुना प्रकारेण अस्याः-दमयन्त्याः जन्मनि सम्पन्ने प्राप्ते नामकर्मणः समये-अभिधानदानप्रस्तावे मान्यजनं-पूज्यलोकं सम्मान्य-पुष्पफलताम्बूलादिभिरभ्यर्च्य जनेश्वरः-राजा भीमः दमनकमुनेर्वरदानमनुस्मृत्य-विचार्य दमयन्तीति नाम प्रतिष्ठितवान्-स्थापितवान्। किम्भूते जन्मनि ? सततं-निरन्तरं विस्तीर्णानि विपुलानि स्वर्णैः पूर्णानि यानि पात्राणि-भाजनानि तैः पूजिताः-सत्कृताः पूज्या द्विजन्मानः-ब्राह्मणाः यस्मिंस्तत् तस्मिन् । यज्जन्मनि विप्रेभ्यः स्वर्णपूर्णानि पात्राणि अदीयन्तेत्यर्थः ।

**क्रमेण च प्रचुरामृतरससिक्ता[३] इव सुकुमाराः प्रसर्तुमारभन्ताङ्गावयवपल्लवाः, चकार च चञ्चच्चामीकररुचिरुचिराङ्गणमणिवेदिकासु कैश्चिद्दिवसैरनुच्चचरणप्रचारचापल्यलीलाः[४], सहासमकरोत्परिजनं जनयन्ती बालकेलीः[५], स्वच्छन्दमानन्दयांचकार पितरं तरङ्गभङ्गिरङ्गितेन[६], जननीमजीजनज्जातविस्मयां[७] स्मितमुग्धदुग्धस्निग्ध[८]दर्शितदन्तकान्तिकुन्द[९]**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**पुष्पमनिष्पन्नाक्षरमल्पाल्पं जल्पन्ती ।**

**क्रमेण च**-दिनपक्षमासाद्यतिक्रमपरिपाट्या अस्याः सुकुमाराः-कोमलाः अङ्गावयवपल्लवाः-शरीरावयवरूपकिसलयानि प्रसर्तुं-वर्द्धितुं आरभन्त-प्रवर्तन्ते स्म । उत्प्रेक्ष्यते, प्रचुरामृतरसेन सिक्ता इव, यथा अमृतेन जलेन सिक्ताः पल्लवाः वर्द्धन्ते तथा तदङ्गावयपल्लवा अपि । तथा कैश्चिद्दिवसैः-कियद्भिर्वासरैः चञ्चत्-दीप्यमानं यच्चामीकरं-स्वर्णं तस्य या रुचिः-कान्तिस्तया रुचिरं-मनोज्ञं यदङ्गणं-अजिरं तत्खचितत्वात्, तत्र या मणिवेदिका-मणिनिबद्धसंस्कृतभूमयस्तासु अनुच्चाभ्यां-ऊर्ध्वमनुक्षिप्ताभ्यां चरणाभ्यां यः प्रचारः-गमनं तस्मिन् या चापल्यलीला चञ्चलता-विलासस्तां चकार । तथा कैश्चिद्दिवसैः बालकेलीः-बालक्रीडाः जनयन्ती सती परिजनं-तत्सेवानुवर्त्तिनं लोकं सहासं-हास्योपेतमकरोत्, बालकेलिं विधाय परिजनं अहासयदित्यर्थः । तथा कैश्चिद् दिवसैः स्वच्छन्दं-स्वेच्छया तरङ्गभङ्गिवत्-वीचिविच्छित्तिवत् यद् रङ्गितं-गमनं तेन पितरं-भीमं आनन्दयाञ्चकार-अहर्षयत् । तथा कैश्चिद् दिवसैः जननीं-प्रियङ्गुमञ्जरीं जातो विस्मयः-आश्चर्यं यस्या सा तथाविधामजीजनत्-उत्पादयामास, आश्चर्यवन्ती चकारेत्यर्थः। किं कुर्वती ? स्मितेन मुग्धा-रम्या तथा दुग्धवत् स्निग्धा-चिक्कणा दर्शिता-प्रकटिता या दन्तकान्तिः सैव उज्ज्वलत्वात् कुन्दपुष्पमिव यत्र कर्मणि, ईदृशं यथा भवति तथा न निष्पन्नानि-स्फुटीभूतानि अक्षराणि यत्र, ईदृशं अव्यक्ताक्षरं यथा भवति तथा अल्पाल्पं-स्तोकं स्तोकं जल्पती-भाषमाणा । अल्पाल्पमिति एकं बहुव्रीहिवदिति पूर्वपदेसु लोपः ।

**किं बहुना–**

**अपि रेणुकृतक्रीडं नरेऽणुक्रीडयान्वितम् ।**
**तस्याः प्रौढं शिशुत्वेऽपि वयो वैचित्र्यमावहत् ॥ २७ ॥**

**किम्बहुना**-किं बहूक्तेन–

**अपीति** । रेणुना कृता क्रीडा यत्र तत्, तथा कस्तवां परिणेष्यति ? त्वं कस्मै दातव्या ? इत्याद्युक्तिभिर्नरेषु-पुंसि विषये अणुक्रीडयान्वितं-अल्पकौतुककरं तस्यां सम्बन्धि वयः शिशुत्वेऽपि-शैशवेपि प्रौढं-प्रगल्भं वैचित्र्यमावहत्-दधौ । अपिः-विरोधार्थः, सचेत्थं यो रेणुना कृता क्रीडा येन ईदृशो स रेणुक्रीडया अन्वितः कथं न भवेत् ? किन्तु रेणुक्रीडासहित एव भवेत् ॥ २७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एवमियम[१]नवरतस्वैरविहारहारिणि[२] क्रमेणातिक्त्कामतिशैशवे वयसि पितुर्नियोगाद्गुरूपदेशात्साधुवृद्धसंवासाद्बुद्धिविकासाच्च नातिचिरेण, प्राप्ता नैपुण्यं पुण्यकर्मारम्भेषु, जाता प्रवीणा वीणासु, निराकुला कुलाचारेषु, कुशला शलाकालेख्येषु[३], विशारदा शारिदायेषु, सप्रबन्धा[४] प्रबन्धालोचनेषु, चतुरा चातुरानाथजनचिकित्सासु[५] ।**

**किं चान्यत् –**

**अकरोदनालस्यं लास्ये, प्राप प्राधान्यं धन्योचितव्यवाहरेषु, वैचित्र्यं चित्रेषु[६], चातुर्यं तौर्यत्रिके, कौशल्यं[७] शल्योद्धारे[८], पाटवं पटहवादने, वैमल्यं नवमाल्यग्रथने, प्रागीत्यं गीत्याम्, प्राकाम्यं कामकथायाम्[९] ।**

**एवं**-अमुना प्रकारेण अनवरतं-निरन्तरं यः स्वैरविहारः-स्वेच्छया विचरणं तेन हारिणि-मनोज्ञे शैशवे वयसि क्रमेण सूर्यपरिस्पन्दपरिपाट्या अतिक्रामति-गच्छति सति पितुर्नियोगात् इत्थं कुरु, इत्थं वद, इत्थं गच्छेत्यादिरूपात्-प्रेरणात्, तथा गुरूणां-शिल्पाचार्याणामुपदेशात्-शिक्षावचनेन, तथा साधुभिः-सभ्यैर्वृद्धैः सह संवासात्-अवस्थानात्, तथा बुद्धिविकासाच्च-स्वीयमत्युद्बोधात् नातिचिरेण-स्तोकेनैव कालेन पुण्यकर्मणां-दानादीनां ये आरभ्याः-उपक्रमास्तेषु नैपुण्यं-प्रावीण्यं प्राप्ता, पुण्यकर्मारम्भे कुशला जातेत्यर्थः । तथा वीणासु प्रवीणा-दक्षा जाता । तथा कुलाचारेषु-स्वान्वयविधेयेषु कर्मसु निराकुला-अव्याकुला, तत्र प्रसक्तेत्यर्थः । तथा शलाकया-आलेख्यकूर्चिकया यानि लेख्यानि चित्राणि तेषु कुशला-चतुरा । तथा शाराणां-द्यूतोपकरणानां या दानानि तेषु विशारदा-कोविदा । "**शारः शम्बलवातयो ।, द्यूतस्य चोपकरणे**" [२।४७३-४७४] इत्य**नेकार्थः** । "**दायो दाने यौतकादिधने सोल्लण्ठभाषणे । विभक्तव्यपितृव्ये**" [२।९३] इत्य**नेकार्थः** । तथा प्रबन्धानां-पूर्वनृपादिसम्बन्धानां आलोचनेषु-विमर्शनेषु सप्रबन्धा सह प्रकृष्टेन बन्धेन-रचनया विद्यत इति सप्रबन्धा, समूलं तत्प्रबन्धान् विचारयतीत्यर्थः । तथा आतुराः-रोगादिना पीडिताः अनाथाः-अस्वामिनो ये जनास्तेषां चिकित्सासु-प्रतिक्रियासु चतुरा च-अभिज्ञा ।

**किञ्च**-पुनः अन्यत्-अपरं लास्ये-नृत्ये अनालस्यं-उद्यममकरोत् । तथा धन्यानां-पुण्यवतामुचिता-योग्या ये व्यवहाराः-अनुष्ठानानि तेषु प्राधान्यं प्राप, सद्व्यवहारानाचरदित्यर्थः । तथा चित्रे-आलेख्ये वैचित्र्यं-विचित्रतां प्राप । तथा तौर्यत्रिके-गीतनृत्यवाद्यत्रयरूपे चातुर्यं-पाटवं प्राप । तथा शल्योद्धारे-निखातशल्यस्याकर्षणे कौशल्यं-दक्षतां प्राप। तथा पटहवादने पाटवं-पटुतां दक्षत्वं प्राप । तथा नवमाल्यस्य-नव्यमालाया ग्रथने-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सन्दर्भणे वैमल्यं-वैशद्यं प्राय । तथा गीत्यां-गाने प्रगीता-प्रसिद्धा तस्या भावः प्रागीत्यं प्राप। तथा कामकथायां प्राकाम्यं-इच्छानभिघातत्वं प्राप ।

**किं बहुना—**

**न तत्काव्यं न तन्नाट्यं न सा विद्या न सा कला ।**
**यत्र तस्याः प्रबुद्धाया बुद्धिर्नैव व्यजृम्भत[1] ॥ २८ ॥**

**किम्बहुना**-किं बहूक्तेन—

**नेति** । तत्काव्यं-सर्गबन्धो न, तन्नाट्यं-भरतादिशास्त्रं न, सा विद्या न, सा कला न, यत्र-काव्यादिषु तस्याः-दमयन्त्याः प्रबुद्धायाः-ज्ञाततत्त्वायाः सत्या बुद्धिः-शेमुषी नैव व्यजृम्भत-न विकाशं अलभत । सर्वत्राऽपि काव्यादिषु बुद्धिः प्रससारेत्यर्थः ॥ २८ ॥

**एवमस्याः शैशव एव निजजरठप्रज्ञातज्ञातव्य[2]वस्तु-विस्तरायाः[3] क्रमेण तिलकभूतं नूतनचूतवनमिव वसन्तप्रवेशप्रथम[4]पल्लवोल्लासेन, प्रत्यग्रधनसमयमहीमण्डलमिवामन्दविदलत्क[5]न्दलकलापेन केसरि-किशोरकण्ठपीठमिव नवकेसराङ्कुरोद्गारेण, करिकलभकपोलस्थलमिव प्रथममदोद्भेदेन, निशावसाननभस्तलमिव प्रभातप्रारम्भप्रभाप्रभावेण[6], सरःसलिलमिव विदलित[7]कोमलकमलकान्तिसंतानेन, मनोहारिणा संसारसारभूतेनाभूष्यत प्रधानं वयः[8] कान्ततरतारुण्यावतारप्राक्प्रारम्भेण ।**

**एवं**-अमुना प्रकारेण शैशव एव-बाल्यावस्थायामेव निजजरठप्रज्ञया-आत्मीय-प्रौढबुद्ध्या प्रज्ञातः-अवबुद्धः ज्ञातव्यवस्तूनां-ज्ञेयपदार्थानां विस्तरः-प्रपञ्चो यया सा तस्याः, अस्याः-दमयन्त्याः क्रमेण-शैशवातिक्रमपरिपाट्या कान्ततरं-अतिशयेन कमनीयं यत्तारुण्यं-यौवनं तस्य योऽवतारः-प्रादुर्भावस्तस्य यः प्राक्प्रारम्भः-प्रथमोपक्रमस्तेन तिलकभूतं-तिलकोपमानं[1] प्रधानं वयः-कालावस्था अभूष्यत-अलंक्रियत[2] । किम्भूतेन ? मनोहारिणा-चारुणा तथा संसारे सारभूतः-प्रधानभूतस्तेन । केन ? किमिव ? वसन्तस्य-मधोः प्रवेशे आदौ यः प्रथमः-पूर्वः पल्लवोल्लासः-किसलयोद्गमस्तेन नूतनचूतवनमिव-नव्या-म्रकाननमिव । यथा वसन्तप्रवेशप्रथमपल्लवोल्लासेन नूतनचूतवनं भूष्यते । तथा अमन्दानि-अनल्पानि विदलन्ति-विकसन्ति यानि कन्दलानि-प्ररोहास्तेषां यः कलापः-समूहस्तेन,

१. तिलकोपमं अनू. । २. अलमक्रियत अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत्यग्रघनसमये-प्रथममेघागमावसरे यन्महीमण्डलं-भूतलं तदिव, यथा तेन तद्भूष्यते। तथा नवकेसराङ्कुराणां सप्रभसिंहस्कन्धरोमप्ररोहाणां य उद्गारः-उल्लासस्तेन केसरिणः-सिंहस्य यः किशोरः-शिशुस्तस्य कण्ठपीठमिव। यथा नवकेसराङ्कुरोद्गारेण केसरिकिशोर-कण्ठपीठं भूष्यते। "**केसरो नागकेसरे। तुरङ्गसिंहयोः स्कन्धकेशेषु बकुलद्रुमे। पुन्नागवृक्षे किञ्जल्के स्यात्**" [३।५७८-५७९] इत्य**नेकार्थः**। तथा प्रथममदोद्भेदेन-अभिनवदाननिर्गमेण करिकलभस्य-दन्तिपोतस्य कपोलस्थलमिव। यथा प्रथममदोद्भेदेन करिपोतगण्डस्थलं भूष्यते। तथा प्रभातप्रारम्भे-अहर्मुखमुखे यः प्रभायाः-दीप्तेः प्रभावः-शक्तिस्तेन निशावसाने-रात्रिप्रान्ते यन्नभस्तलं तदिव। यथा प्रभातप्रारम्भप्रभाप्रभावेण निशावसाननभस्तलं भूष्यते। "**प्रभावस्तेजसि शक्तौ**" [३।७४१] इत्य**नेकार्थः**। तथा विदलन्ति-विकसन्ति कोमलानि-मृदूनि यानि कमलानि तेषां यः कान्तिसन्तानः-शोभाप्रवाहस्तेन सरःसलिलमिव-सरसीजलमिव। यथा विदलत्कोमलकमलकान्तिसन्तानेन सरःसलिलमिव-सरसीजलमिव। यथा विदलत्कोमलकमलकान्तिसन्तानेन सरःसलिलं भूष्यते, तथा तेन तदपि।

**ततश्च –**

**परिहरति वयो यथा यथाऽस्याः,**
**स्फुरदुरुकन्दलशालि बालभावम्।**
**द्रढयति धनुषस्तथा तथा ज्यां,**
**स्पृशति शरानपि सज्जयन्मनोभूः॥ २९॥**

**ततश्चेति**। ततः-अनन्तरम्

**परिहरतीति**। यथा यथा अस्याः-दमयन्त्याः स्फुरत्-विकसत् उरु-बृहत् यत्कन्दलं-प्ररोहस्तद्वत् शालते-शोभते यत्तथाविधं वयो बालभावं-शैशवं परिहरति-त्यजति तथा तथा मनोभूः-कामः धनुः-चापं दृढं करोति, धनुषो द्रढयति। अत्र कर्मण्यपीति केचिद् यथा "**भजे शम्भोश्चरणयोः**" [ ] इति **प्रक्रियाकौमुदी**वचनात् कर्मण्यपि षष्ठी। तथा शरानपि सज्जयन्-सज्जीकुर्वन् सन् ज्यां-प्रत्यञ्चां स्पृशति। कामः प्रागल्भ्यं प्राप्नोतीति भावः॥ २९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अपि च –**

**मुञ्चन्त्याः शिशुतां भरादवतरत्तारुण्यमुद्राङ्कित[1]-**
**स्फारीभूतनितान्तकान्तवपुषस्तस्याः कुरङ्गीदृशः ।**
**उन्मीलत्कुचकाञ्चनाब्जमुकुलं यूनां मुहुः पश्यतां,**
**बाह्वोरन्तरमन्तरायसदृशा मन्ये निमेषा अपि ॥ ३० ॥**

अपि न-पुनः–

**मुञ्चन्त्या** इति । शिशुतां-शैशवं मुञ्चत्याः-त्यजन्त्यास्तस्या, कुरङ्गीदृशो दमयन्त्याः बाह्वोरन्तरं-मध्यं हृदयं मुहुः-वारंवारं पश्यतां-अवलोकयतां यूनां-तरुणानां निमेषा अपि-अक्षिसंकोचा अपि अन्तरायसदृशा चित्रोपमाः[1], अहमेवं मन्ये-सम्भावयामि यदि निमेषा न भवेयुस्तदा निरन्तरं ते-तद्हृदयं पश्यन्तीति । एतावता प्रेक्ष्यस्य अद्भुतत्वं निवेदितम् । किम्भूतायास्तस्याः । भरात्-अतिशयेन अवतरत्प्रादुर्भवत् यत्तारुण्यं तदेव मुद्रा-लाञ्छनं तथा अङ्कितं-चिह्नितं तथा स्फारीभूतं-विपुलीभूतं, तथा नितान्तकान्तं-अतिकमनीयं पश्चात् कर्मधारयः, ईदृशं वपुः-शरीरं यस्याः सा तस्याः । "**स्फारस्तु स्फुरकादीनां बुद्बुदे विपुलेऽपि च**" [२।४७९] इत्य**नेकार्थः** । किम्भूतं बाह्वोरन्तरम् ? उन्मीलती-विकसती कुचावेव काञ्चनाब्जमुकुले-स्वर्णकमलकुड्मले यत्र तत् उन्मीलत्कुचकाञ्चनाब्जमुकुलं । मन्ये इत्यव्ययं उत्प्रेक्षायाम् ॥ ३० ॥

**ततश्च –[2]**

**तत्तस्याः कमनीयकान्तविजितत्रैलोक्यनारीवपुः,**
**शृङ्गारस्य निकेतनं समभवत्संसारसारं वयः[3] ।**
**यस्मिन्विस्मृतपक्ष्मपालिचलनाः कामालसा दृष्टयो,**
**नो यूनां पुनरुत्पतन्ति पतिताः पाशे शकुन्ता इव ॥ ३१ ॥**

**तदिति** । तस्याः-दमयन्त्याः तद्वयः-तारुण्यं संसारे सारं-प्रधानं समभवत्-जातम् । किम्भूतं वयः ? कमनीयकान्त्या-सुन्दरदीप्त्या कृत्वा विजितानि त्रैलोक्यनारीणां वपूंषि-तनवो येन तत् । पुनः किम्भूतम् ? शृङ्गारस्य निकेतनं-गृहम् । यस्मिन् वयसि यूनां-तरुणानां कामेन अलसा-मन्थरा दृष्टयः पतिताः सत्यः पुनः-भूयो नो उत्पतन्ति-

---

१. विघ्नोपमाः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नोच्चैर्भवन्ति न निवर्तन्त इत्यर्थः । कस्मिन् ? के इव ? पाशे-बन्धनग्रन्थौ शकुन्ता इव-पक्षिण इव । यथा पाशे पतिताः शकुन्ता नोच्चैर्भवितुं शक्नुवन्ति, तथेमा दृष्टयोऽपि । किम्भूता दृष्टयः ? विस्मृतं-तद्रूपदर्शनरसिकत्वेन नष्टं पक्ष्मपाल्योः-नेमरोमप्रान्तयोश्चलनं यासां ता अनिमिषा इत्यर्थः ॥ ३१ ॥

**अपि च –**

**आबध्नत्परिवेषमण्डलमलं वक्त्रेन्दुबिम्बाद्बहिः,**
**कुर्वञ्चम्पकजृम्भमाणकलिकाकर्णावतंसक्रियाम् ।**
**तन्वङ्ग्याः परिनृत्यतीव हसतीवोन्सर्पतीवोल्बणं[1]**
**लावण्यं ललतीव काञ्चनशिलाकान्ते कपोलस्थले ॥ ३२ ॥**

**अपि च**-पुनः–

**आबेति** । तन्वङ्ग्याः-दमयन्त्याः काञ्चनशिलावत् कान्ते-कमनीये कपोलस्थले लावण्यं-नयनलेह्यं स्निग्धत्वं परिनृत्यतीव, तथा हसतीव-हास्यं करोतीव, तथा उल्वणं-प्रकटं यथा भवति तथा उत्सर्पतीव-मूर्छतीव, तथा ललतीव-विलसतीव । एतावता तदाधिक्यं दर्शितम् । किं कुर्वत् ? अलं-अत्यर्थं वक्त्रेन्दुबिम्बाद्बहिः-परितः परिवेषमण्डलं-कान्तिपरिधिं आबध्नत्-कुर्वत् । पुनः किं कुर्वत् ? चम्पकस्य जृम्भमाणा-विकसन्ती या कलिका तथा या कर्णावतंसक्रिया-कर्णोत्तंसशोभा तां कुर्वत्-विदधत् । यथा चम्पक-कलिकया कर्णावतंसक्रिया क्रियते तथा लावण्येनैव चम्पककलिकाकर्णावतंसक्रिया क्रियत इति । लावण्येणैव तच्छोभा विधीयत इत्यर्थः ॥ ३२ ॥

**एतदाकर्ण्य[2] राजा रञ्जितस्तत्कथया पुनरुदञ्चदुच्च[3]रोमाञ्चकञ्चुकितकायस्तत्कालमेवान्तःस्फुरन्मन्मथमनोरथभरभज्यमानमानसस्तं हंसमपृच्छत् ॥**

राजा-नलः **एतत्**-दमयन्तीस्वरूपनिरूपकं[1] हंसोक्तं वचनकदम्बकं आकर्ण्य-श्रुत्वा तत्कथया-दमयन्तीकथया रञ्जितः-आवर्जितः सन् पुनः-भूयस्तं भैमीवृत्तान्तं हंस प्रति पप्रच्छ-पृष्ठवान् । पृच्छिर्द्विकर्मकः । किम्भूतः ? उदञ्चन्तः-तद्वार्ताश्रवणान्निर्गच्छन्तः उच्चा ये रोमाञ्चाः-पुलकास्तैः कञ्चुकितः-परिहितकञ्चुकः कायः-देहो यस्याऽसौ उदञ्चदुच्चरो-

१. निरूपक० अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

माञ्च कञ्चुकितकायः । तथा तत्कालमेव-तत्कथाश्रवणसमकालमेव अन्तः-चेतसि स्फुरन्तः-विलसन्तो ये मन्मथमनोरथाः-कामाभिलाषास्तेषां भरेण-अतिशयेन भज्यमानं-पीड्यमानं मानसं-अन्तःकरणं यस्य सः । "**भरोऽतिशयभारयोः**" [२।४५६] इत्य**नेकार्थः**।

**"पक्षिराज ! राजीववनावतंस ! हंस ! पुनः कथ्यतां तस्याः संप्रति वयोवृत्तवृत्तान्तव्यतिकरः"।**

**इत्युक्तः पुनरेष[१] तं[२] बभाषे ।**

**"देव, किमेकोऽस्मद्विधः[३] पक्षी क्षीरतरङ्गधवललोचनां तां वर्णयेत् यस्या[४]: सर्वदेवमय इवाकारो विभाव्यते[५] ।**

**हे पक्षिराज** ! हे पक्षिश्रेष्ठ ! राजीववने अवंतस इव विभूषकत्वात्शेखर इव यः स तस्य सम्बोधने हे राजीववनावतंस !-हंस ! तस्याः-दमयन्त्याः सम्प्रति वयसि-यौवने वृत्तः जातो यो वृत्तान्तव्यतिकरः-वार्त्तासम्बन्धः स त्वया कथ्यताम् ।

**इति**-अमुना प्रकारेण उक्तः-कथितः । एष-हंसः पुनर्बभाषे-उवाच ।

**हे देव** ! एकः-केवलः अस्मद्विधः-अस्मत्सदृक्षः पक्षी क्षीरतरङ्गवत्-क्षीरोदधि-वीचिवत् धवले लोचने यस्याः सा तां क्षीरतरङ्गधवललोचनां, तां-दमयन्तीं किं वर्णयेत् ?-किं स्तुवीत ? स्तवनाऽशक्यत्वे हेतुमाह—यस्याः-दमयन्त्याः सर्वदेवमय इव आकारः-आकृतिर्विभाव्यते-दृश्यते ।

**तथाहि—**

**सुतारा दृष्टिः, सकामाः कटाक्षाः, सुकुमाराश्चरणपाणिपल्लवाः[६], सुधाकान्ति स्मितम्, अरुणो दन्तच्छदः[७], भास्वन्तो दन्ताः, सुकृष्णाः केशाः, प्रबुद्धा वाणी, गौरी कान्तिः, गुरुः स्तनाभोगः, पृथ्वी जघनस्थली, सुरभिर्निःश्वासः, सुगन्धवाहः प्रस्वेदः, सश्रीकः सकलाङ्ग-भोगः[८] ।**

तथाहीति । सर्वदेवमयत्वमेव दर्शयति-

यस्याः दृष्टि सुतारा-शोभनकनीनिका; पक्षे सुमेरुवत् सुतारादेवी । तथा कटाक्षाः-

अपाङ्गदर्शनानि सकामाः-साभिलाषाः, पक्षे कामः-स्मरः सम्यक्कामो येभ्य इति सकामाः। "**तुमः समश्च काममनसोः**"[तुमश्च मनः कामे] मलोपः । तथा चरणपाणिल्लवाः सुकुमाराः-सुकोमलाः, पक्षे महेन्द्रवत् कार्तिकेयोऽपि सुकुमारः । तथा सुधावत् कान्तिरस्येति सुधाकान्तिः-शुभ्रं स्मितं-हास्यं, पक्षे सुधाकान्तिः-चन्द्रः । तथा दन्तच्छदः-ओष्ठः अरुणः-आरक्तः, पक्षे अरुणः-रविसारथिः । तथा भास्वन्तः-दीप्यमाना दन्ताः, पक्षे भास्वान्-रविः । तथा यस्याः केशाः सुष्ठु-अतिशयेन कृष्णाः-मेचकाः, पक्षे कृष्णः-विष्णुः । तथा प्रबुद्धा-व्युत्पन्ना वाणी, पक्षे बुद्धः-सुगतः । तथा गौरी-पीतवर्णा कान्तिः-देहच्छविः, पक्षे गौरी-पार्वती । तथा गुरुः-विशालः स्तनाभोगः-पयोधरपरिपूर्णता, "**आभोगः परिपूर्णत्वे वरुणे छत्रयत्नयोः**" [३।११५] **इत्यनेकार्थः** । पक्षे गुरुः-बृहस्पतिः । तथा पृथ्वी-विपुला[1] जघनस्थली, पक्षे पृथ्वी-भूः । तथा सुरभिः-सुगन्धिर्निश्वासः, पक्षे सुरभिः-वसन्तः । तथा शोभनं गन्धं-परिमलं वहतीति सुगन्धवाहः "**कर्मण्यम्**" [ ] प्रस्वेदः-धर्मः, पक्षे गन्धवाहः-वायुः । तथा यस्याः सकलः-समस्तो अङ्गभोगः-अङ्गविस्तारः सह श्रिया-कान्त्या वर्तत इति सश्रीकः, पक्षे श्रीः-लक्ष्मीः । एतावता सर्वदेवमयी तस्यास्तनुलता वर्णिता ।

अथ नक्षत्रमयत्वं तस्यां वर्णयति–

**किं चान्यत्-**

**नक्षत्रमयीव सा[1] विनिर्मिता[2] विधिना ।**

**तथाहि[3] –**

**भद्रपदा ज्येष्ठा सुहस्ता पूर्वोत्तरा सार्द्रहृदया[4] मूलं कंदर्पस्य ।**

**किं बहुना –**

**किञ्चान्यदिति** । किन्तु पुनः अन्यत् शृणु–

**सा**-दमयन्ती विधिना-वेधसा नक्षत्रमयी विनिर्मिता-निष्पादिता ।

**तथा**हीति भणित्वा स्वोक्तमेव द्रढयति–

**भद्रं**-सुन्दरं पदं-पादन्यासो यस्याः सा भद्रपदा । तथा ज्येष्ठा-प्रथमापत्यं । तथा

---

१. पृथुला अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शोभनौ हस्तौ यस्याः सा सुहस्ता । तथा पूर्वं-उत्कृष्टं उत्तरं-प्रतिवचो यस्याः सा पूर्वोत्तरा । तथा सार्द्रं-अनिष्ठुरं हृदयं यस्याः सा सार्द्रहृदया । तथा कन्दर्पस्य-कामस्य मूलं-कारणम् । पक्षे-भद्रपदा, ज्येष्ठा, हस्ता, पूर्वोत्तरा, आर्द्रा, मूलं नक्षत्राणि ।

**किम्बहुना**-किंबहूक्तेन–

**लावण्यातिशयः स कोऽपि मधुरस्ते केऽपि दृग्विभ्रमाः[१]**
**सा काचिन्नवकन्दलीमृदुतनोस्तारुण्यलक्ष्मीरपि ।**
**सौभाग्यस्य च विश्वविस्मयकृतः सा कापि संपद्यया,**
**लग्नानङ्गमहाग्रहा इव कृताः सर्वे युवानो जनाः ॥ ३३ ॥**

**लावण्येति** । वृत्तम् । नवकन्दलीवत्-नववृक्षविशेषवत् मृद्वी-सुकुमारा तनुर्यस्याः सा तस्याः दमयन्त्याः स कोऽपि वार्तामगोचरो मधुरः-मनोहरो लावण्यातिशयः सौन्दर्याधिक्यं वर्तत इति क्रिया सर्वत्राध्याहार्या । तथा ते केऽपि अद्भुता दृष्टिविभ्रमाः-दृग्विलासाः । तथा सा काचित् सकलजनस्य स्पृहणीया तारुण्यलक्ष्मीरपि । च-पुनः विश्वस्य-समस्तस्य विस्मयं-आश्चर्यं करोतीति विश्वविस्मयवृत् तस्य विश्वविस्मयकृतः-जगच्चमत्कारकारिणः सौभाग्यस्य चक्षुष्मतायाः सा काप्यद्भुता सम्पत्, यया सौभाग्यसम्पदा सर्वे युवानः-तरुणा जनाः लग्नः अनङ्ग एव-मन्मथ एव महाग्रहो येषां ते। ईदृग्विधा इव कृताः सकामा जाता इत्यर्थः । "**त्रिलिङ्गमुपरागेऽपि कलापे च नवाङ्कुरे । मृगजातिप्रभेदे च कन्दली तु [ ] द्रुमान्तरे ।**" इति **गौडः** ॥ ३३ ॥

**राजा–ततस्तः।**

**हंसः–तत[२]स्तस्याः पुनरिदानीं**

**राजा**-नलः ततः-ततः किम् ? इत्युवाच–

ततो हंसो ब्रवीति–हे राजन् ! तस्याः-दमयन्त्याः पुनरिदानीम्–

**दूराभोगभरेण भुग्नगतिना श्लिष्टा[३] नितम्बस्थली,**
**धत्ते स्वर्णसरोजकुड्मलकलां[४] मुग्धं[५] स्तनद्वन्द्वकम् ।**
**आलापाः स्मितसुन्दराः परिचितभ्रूविभ्रमा दृष्टय-**
**स्तस्यास्तर्जितशैशवव्यतिकरं रम्यं वयो वर्तते ॥ ३४ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**दूरेति**, वृत्तम् । तस्याः-दमयन्त्याः तर्जितः-अपाकृतः शैशवव्यतिकरः-बालत्वसम्बन्धो येन ईदृशं रम्यं वयः-यौवनं वर्तते । अथ वयसो रम्यत्वमेवाह—तस्याः दूरं-अतिशयेन आभोगेन-विस्तारेण यो भरः-भारस्तेन नितम्बस्थली श्लिष्टा-आश्रिता, बृहदारोहवती जातेत्यर्थः । किम्भूतेन दूराभोगभरेण ? भुग्ना रुग्णा-कुब्जीभूता गतिः-गमनं येन स तथा तेन । भुग्नेति "**भुजो भङ्गे**" [रुजो भंगे, भुजौ कौटिल्ये पा० धा० १५०९-१५१०] "**आदितश्च**" [पा० सू० ८।२।१६] इति निष्ठानत्वम् । तथा मुग्धं-रम्यं ह्रस्वं स्तनद्वन्द्वं-स्तनद्वन्द्वकं "**अल्पाख्यायां कन्**" [पा० सू० १।४।१३६] स्वर्णसरोजस्य-हेमपद्मस्य कुड्मलकलां-मुकुलकलनां धत्ते-बिभर्त्ति । "**कला स्यात् कालशिल्पयोः । कलने मूलरै वृद्धौ षोडशांशे विधोरपि ।**" [२।४८८-४८९] **इत्यनेकार्थः** । तथा स्मितेन-ईषद्हास्येन सुन्दरा-मनोहरा आलापाः-संभाषणानि, तथा दृष्टयः-दर्शनानि परिचिता-अभ्यस्ता भ्रूविभ्रमाः-भ्रूविक्षेपा याभिस्ताः परिचितभ्रूविभ्रमाः । दृष्टिपदेनात्र न[२] चक्षुर्गृह्यते तस्या । द्वित्वेन-बहुत्वासम्भवात्, तेन दर्शनं दृष्टिरिति क्त्यन्तं रूपं साध्यते । ॥ ३४ ॥

**तदेष तस्योः सकलयुवजनमनोमयूरवासयष्टेः समस्तसंसारसार[१]-सौन्दर्याधिदेवतायाः कथितो वृत्तान्तः ॥ किमन्यत् ।**

यस्मात् त्वया पृष्टः तत्तस्माद्धेतोर्मया तस्याः-दमयन्त्या एष वृत्तान्तः कथितः । अन्यदपरं किं वच्मि ? किम्भूतायास्तस्याः ? सकलयुवजनानां-समस्ततरुणलोकानां मन एव मयूरः-बर्ही तस्य वासयष्टिरिव या सा तस्याः । यथा मयूरो वासयष्टौ रमते तथा युवजनानां मनो अस्यां क्रीडतीत्यर्थः । तथा समस्तं यत्संसारे सारं-श्रेष्ठं सौन्दर्यं-लावण्यं तस्य अधिदेवतेव-अधिष्ठातृदेवतेव या सा तस्याः । यथा अधिष्ठातृदेव्याः सर्वमायत्तं भवति तथा सर्वमपि सौन्दर्यं तदायत्तमस्तीत्यर्थः ।

**हरचरणसरोजाराधनावाप्तपुण्यः,**
**परमसुकृतकन्दो वन्दनीयः स कोऽपि ।**
**अपि जयतु[२] स यस्तां दुर्लभां लप्स्यतेऽस्मि-**
**न्निति कथितकथा सन्सोऽथ[३] हंसो व्यरंसीत् ॥ ३५ ॥**

**इति श्रीत्रिविक्रमभट्टस्य कृतौ[४] दमयन्तीकथायां हरचरणसरोजाङ्कायां[५] तृतीय उच्छ्वासः समाप्त : ॥**

---

१. स्यादंशशिल्पयोः । २. 'न' नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**हरेति**[१] । हरचरणसरोजाराधनेन-शम्भुपादपद्मसेवनेन अवाप्तं-लब्धं पुण्यं येन सः । तथा परमसुकृतस्य-उत्कृष्टपुण्यस्य कन्द इव उत्पत्तिकारणत्वात् । तथा कन्दः कन्दलानां कारणं तथा सोऽपि परमसुकृतानां कारणं, ईदृग्विधः स कोऽपि पुरुषः वन्दनीयः-स्तवनीयः । अपिश्चार्थः । च-पुनः स जयतु-परमोत्कर्षेण वर्तताम् । स इति कः ? यः अस्मिन् संसारे दुर्लभां-दुःप्रापां तां-दमयन्तीं लप्स्यते-प्राप्स्यति । इति-अमुना प्रकारेण कथिता-उक्ता कथावृत्तान्तो येन ईदृग्विधः सन् स-हंसः अथ-अनन्तरं व्यरंसीत्-विरराम तूष्णीमभजदित्यर्थः ॥ ३५ ॥

**इति वाचनाचार्य-श्रीप्रमोदमाणिक्यगणिशिष्यश्रीजयसोमगणितच्छिष्यपण्डित-श्रीगुणविनयगणि-विरचितायां श्रीत्रिविक्रमभट्टविरचित-श्रीदमयन्तीकथाविवृतौ तृतीय उच्छ्वासः समाप्तः ।**

● ● ●

---

१. हरेति वृत्तम् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# मूलपाठस्य पाठान्तराणि

## तृतीय उच्छ्वासः

पृ.१७४- १. अथ च निपा० । २. °मञ्जीरमञ्जुल° नि० चौ० । ३-३ क्रेंकारयत्सु मधुररवभरितभुवनेषु चक्रवाकमिथुनमेलकमंगलमृदङ्गेष्विव रौप्यघर्घरी ऋर्ऋरखसरसं सारसकुलेषु; क्रेंकारयति चक्रवाकमिथुनमेलकमंगलमृदङ्ग इव भरितभुवने रौप्यघर्घरीघर्घररवसरसं सारसकुलेः निपा; क्रेंकारयति च चक्रवाकमिथुनमेलकमंगलमृदङ्ग इव रौप्यघर्घररवसरसं सारसकुले नि० चौ०; क्रेंकारयति च चक्रवाकमिथुनमेलक-मंगलमृदङ्ग इव रौप्यघर्घरीऋऋरखंडवसरसं सारसकुले पु० । ४. °बहुल° पु० निपा० ।

पृ. १७६ १. °भूत° निपा० । २. कमलाधिवासिना पु० निपा० । ३. विरचित° निपा० । ४. ललाटलोचन-चन्द्रमसा निपा० । ५. कुवलयं कर्णे पु० । ६. नास्ति पु० । ७. रेष्यत्युषसि पु० । ८. दमनकनामा नि० चौ० । ९. महामुनिः पु० । १०. स्वश्रवण-शिखरादन्तराद् नि० चौ०; श्रवणशिखरान्तराद् पु० । ११. °बिन्दुस्यन्द° निपा० । १२. पारिजातमञ्जरी नि० चौ०।

पृ. १७७ १. प्रणामावनमितमस्तका निपा० ।

पृ. १७८ १. नमोस्त्वमोघसंकल्प निपा० । २. °तुरीय° निपा० । ३. 'च' नास्ति निपा० । ४. बहल° नि० चौ० । ५. तारकोदयविनाशनाय पु० । ६. दीर्घिकामण्डनमुण्डभालासु पु० नि० चौ०।

पृ. १७९ १. °स्फटिक० नि० चौ० । २. °सप्रभे निपा० । ३. भूत्वा शुचिः नि० चौ० ।

पृ. १८० १. °महावल्ली० नि० चौ० । २. पूर्वदिक्गण्डमण्डनं निपा० । ३. °गायनगीत° निपा० । ४. निरस्तनिद्रः नि० चौ० । ५. कृतेऽधिक-धर्मकर्मणि निपा० । ६. समं निपा० ।

पृ. १८१ १. सस्मयमानाः पु०; स विस्मयमनाः निपा० । २. मन्थरया गिरा निपा० । ३. मुग्धे पु० । ४. निर्यत्कान्ति° पु० चौ० । ५. °वर्धित° निपा० ।

पृ. १८२. १. 'तत्कथय' नास्ति पु०; 'तत्' नास्ति नि० चौ० । २. 'ममाज्ञया' नास्ति पु० ।

३. पुलकितहर्षवृत्तान्तं पु० । ४. °मुग्धमुखवीणा नि० चौ० । ५. आत्मानुकारिणा निपा० । ६. असोमश्च पु० निपा० । ७. सविभवोऽविभूतश्च पु० । ८. इत्यवधाय पु० । ९. तां तमवस्थितं नि० चौ; तमवस्थितं पु० निपा० । १०. अभाषत पु० निपा० ।

पृ. १८३ १. अवश्यं नि० चौ० । २. आशंसयांचकार नि० चौ० ।

पृ. १८४ १. °भास्वररूपं पु०; °भासुरस्वरूप°; °भास्वरस्वरूपं निपा० । २. °त्रिपुण्ड्रक° निपा० । ३. °मण्डला° पु० । ४. °कमलदीर्घिकायां निपा० । ५. °स्फाटिक° नि० चौ० । ६. °कोपीनवासाः नि० चौ० । ७. सरुद्राक्षमालैश्च निपा० । ८. नमदा कालयद्भिः पु० । ९. प्रसन्न° नि० चौ० । १०. सुश्रमणो निपा० । ११. °स्थानप्रियः निपा० । १२. °शंकया° निपा० । १३. पुण्ययुगैरिव पु० नि० चौ० । १४. °काण्डकन्दलैरिव निपा० ।

पृ. १८५ १. मिलन्मुक्तमुग्ध° नि० चौ० । २. विराजितपाणिपल्लवः निपा० । ३. निरुद्धो नि० चौ;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रुद्धो पु० निपा० । ४. अतितेजस्तया नि० चौ० । ५. विरल° नि० चौ० । ६. °पाण्डुरितदेहः पु० निपा० । ७. उल्लासितेन नि० चौ० । ८. °बन्धनप्रान्तपल्लवेन निपा०। ९. °पतद्गगनगलद्गङ्गा° नि० चौ०; पतद्गगने गलद्गङ्गा° निपा० । १०. आकलयन् पु०; आकारयन् निपा० । ११. तरुणे च निपा० ।

पृ. १९० १. राजापि दूरादायान्तं पु० । २. आलोक्य निपा० । ३. °लोचनो पु० । ४. हर्षवशात् निपा० ।

पृ. १९१-९२ १. दृशा सौम्यया पु० । २. पल्लवलीलया पु० । ३. दत्ताशीश्च पु० । ४. पादपांसु° नि० चौ० ।

पृ. १९३ १. प्रशस्त° निपा० । २. मुनिमनुजवृन्दारकवृन्दवन्दनीय° नि० चौ० । ३. चरणारविन्दाः पु० ।

पृ. १९४. १. सर्वस्वामिना नि० चौ; सर्वे स्वामिनां पु० ।

पृ. १९५. १. स्निग्धस्मित° पु० निपा० । २. पल्लवस्तमब्रवीत् निपा० । ३. उचितमेव पु० । ४. उपकर्तुं च निपा० ।

पृ. १९६. १. क्रियाः पु० निपा० । २. एकरूपताः पु० । ३. प्रश्रयोपेता पु० । ४. सतां मतं निपा० । ५. तदेतत्समस्तमस्ति त्वयि दीर्घायुषि पु० नि० चौ०; तदिदं सर्वमस्ति दीर्घायुषि त्वयि निपा० ।

पृ. १९७ १. देवस्य चन्द्रचूडामणेः पु० । २. आदेशात् पु० । ३. अवाप्स्यसि च पु० । ४. °जलधि° नि० चौ० । ५. कन्यालाभमलाभं मन्यमाना निपा०; कन्यालाभं मन्यमाना विप्रियं नि० चौ० । ६. °जर्जरिताक्षरविलक्षया निपा० । ७. वाचा निपा० । ८. नर्मलीलया पु० ।

पृ. १९८ १. उपलक्षसे पु० । २. कदम्बकैः पु० । ३. 'वयं' नास्ति पु० । ४. तदलं पु० । ५. कन्यावररत्नप्रदानेन पु० ।

पृ. १९९ १. उक्तः निपा० । २. कर्मालोक्य नि० चौ० । ३. तुलाधर नि० चौ० । ४. अनुकल्पयति निपा० ।

पृ. २०० १. अपि च पु० । २. माध्याह्निकसमयः निपा० । ३. ब्राह्मी परिषत् निपा० । ४. गगनमण्डलीमध्यमधिरोहति पु०; गगनमध्यमारोहति निपा० । ५. भगवानेष° निपा० । ६. °लोचने निपा० । ७. 'न' नास्ति पु० ।

पृ. २०२. १. इति नास्ति पु० । २. मर्षणीयो पु० नि० चौ० निपा० । ३. अस्माकमयमेकः निपा० । ४. 'विविधानि' नास्ति निपा० । ५. 'पट्ट' नास्ति पु० । ६. गौरवमुखि नि० चौ० । ७. प्रणता नास्ति नि० चौ० ।

पृ. २०३-०४. १. लीलायमान निपा० । २. स्थाणुसंस्थां पु० नि० चौ० । पृ. २०४ ३. कथया पु० । ४. 'रणति' नास्ति निपा० । ५. °भेरीसखे नि० चौ० । ६. °युगले पु० । ७. तापार्ते प्रतननलिनी

पृ. २०५ निपा० । ८. कुवलयकुमुद° पु० । ९. चटुलाग्रनख° पु० । १०. °धरणिमण्डलेषु पु० नि० चौ० । ११. खण्डितखर्व° नि० चौ० । १२. दूर्वाङ्कुर; दूर्वाचय. निपा० । १३. धर्मविघूर्णितेषु नि० चौ०; महाघर्मविघूर्णितेषु निपा० । १४. वर्षेण° नि० चौ० । १५. °पत्रि° पु० । १६. संगीतश्रमस्विन्नखिन्नकिन्नरेषु पु० नि० चौ० । १७. शीतल° नि० चौ० । १८. क्रेंकारमति च पु० । १९. कौंचचक्रवाकचक्रे निपा० । पृ. २०५. २०. विसर्ज्य नि० चौ० ।

पृ. २०७. १. °द्विजजन° निपा० । २. आसन्नस्थितस्यास्य प्रस्तावपाठकः पु० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पृ. २०८. १. °मण्डलार्द्धावनद्धो° पु० । २. सस्मेर° निपा० । ३. दर्शितसीत्कार° नि० चौ० । ४. °वलन° निपा० । ५. समुद्रवेल नि० । ६. तरुणमञ्जरी निपा० ।

पृ. २१०. १. °माङ्गल्यभूषः नि० चौ० । २. स्वस्थचित्तः नि० चौ० । ३. कुसुमकुशकरः निपा० । ४. स्वधर्माणं नि० । ५. °जनितारम्भोऽरं नि० चौ० । ६. जनस्थानवेदी नि० ।

पृ. २११. १. व्यञ्जनं नि० चौ०; व्यञ्जना पु० ।

पृ. २१२ १. स्वादु नि० चौ । २. चन्दनोद्वर्तित° निपा० । ३. विक्षिप्य पु० निपा० । ४. कस्तूरिकाकुंकुमचन्दनकर्पूरकर्बुराणि पु०; कस्तूरिकाकर्पूरकर्बुराणि निपा० । ५. क्रमुकफलानि पु० । ६. °तर्ण° नि० चौ० । ७. शुक्तिशुभ्राणि पु० । ८. अवकीर्ण° नि० चौ० पु० । ९. °वैदूर्यमणिपर्यन्त° पु० । १०. विनोदस्थानं निपा० ।

पृ. २१३ १. अमृतस्रुवः पु० । २ कथां पु० । ३. लोचनोन्मादकरान् पु० । ४. °वाद्यवेणु° नि० चौ० । ५. निक्वणान् पु० निपा० ।

पृ. २१४. १. निपतति नि० चौ० । २. °तरूच्छ्रित° निपा० । ३. °शिरः शाखा शिखर° पु० । ४. प्रगलद्बहलकिञ्जल्कपुञ्जपिञ्जरासु मञ्जरीष्विव विलम्बमानासु पु० निपा०; गलद्बहलकिञ्जल्कपुञ्जपिञ्जरासु मञ्जरीष्विव विलम्बमानासु नि० चौ० । ५. °रुचिरुचिरे निपा० । ६. °निलयनाकुल° निपा० । ७. °कूजितवतिजरद्° पु० निपा०; कूंजितैर्जरद्° निपा० । ८. सान्ध्य° पु० । ९. कालागरु° पु० । १०. साञ्जनराग नि० चौ० । ११. आवेदयितुं निपा० ।

पृ. २१६-२१७ १. 'च' नास्ति नि० चौ० । २. °कुलकान्ति° निपा० । ३. °बहलतमः° नि० चौ० । ४. °पारावत° नि० चौ० । ५. °दीपदीप्ति° नि० चौ० । ६. कल्लोललोचनया नि० चौ० । ७. अनया पु० नि० चौ० । ८. °कलहकेलिकोप° पु० । ९. °विभ्रमायमाणोत्तुङ्गपीवर° नि० चौ० । १०. °कुलकुम्भकण्ठपीठमारोपितकरः निपा० ।

पृ. २१८ १. बन्धुरा° निपा० । २. °अंशुनांशुमालि° निपा० । ३. मण्डलेन मण्ड्यमाना पु० । ४. 'पुण्य' नास्ति नि० चौ० ।

पृ. २१९. १. °मयूरिकाक्रान्तं नि० चौ०; °मयूरक्रान्तं° पु० । २. भुजंगसंगतं निपा० । ३. उल्लसत् पु० । ४. °कमलकन्दं नि० चौ० पु० । ५. °पाण्डुमुपरिमदलुभ्यत्भ्रमदलिकुलालंकृतमुच्च° पु०; पिण्डमेवोपरि मदलुभ्यद्भ्रमदलिकुलालंकृतं पाण्डुरमुच्च° निपा० । ६. 'क्षणं' नास्ति निपा० ।

पृ. २२० १. 'च' नास्ति पु० । २. बहुलं निपा० । ३. °विकीर्ण° पु० । ४. तरंगशीतल° निपा० । ५. चिन्तयांचकार च नि० चौ० । ६. अभ्यवाञ्छदच्छमशेष° पु०; अभ्यवांछदतुच्छमच्छमशेष° नि० चौ०; अभ्यवांछदच्छमच्छमशेष° निपा० । ७. °मन्थोत्पन्न° नि० चौ०; °मथनोत्पन्न° निपा० मु० ।

पृ. २२१. १. °प्रभावादनुरूप° नि० चौ० । २. शशाङ्कमङ्क° पु० निपा० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पृ. २२२. १. परिजने निपा० । २-२ अङ्गभोग्योपभोग° निपा० । ३. कतिचित्काले पु० । ४. क्षणभिव पु० निपा० ।

पृ. २२३ १. °कान्ति° पु० निपा० । २. प्रवर्द्धमाना शश्वदस्मन्मुखानि पु० निपा० । ३. चन्द्रादयो पु० नि० चौ० । ४. समं समुत्पन्नं पु० नि० चौ० । ५. अन्यदपि कापि पु० ।

पृ. २२४ १. °निष्पन्द° नि० चौ० । २. 'लाभ' नास्ति पु० । ३. शुचिकासहास्य योग्य° पु०; स्वविकासहासयोग्य° निपा० ।

पृ. २२५ १. °श्लाघ्याधारतया नि० चौ० । २. विकसितमिव नि० चौ० ।

पृ. २२६ १. 'जन्मनि' नास्ति नि० चौ० । २. सामान्य जनो जनेश्वरः निपा० । ३. प्रचुरामृतसंसिक्ता नि० चौ० । ४. °प्रचारचारुचापल्यलीलाः पु० नि० चौ० । ५. बालकेलि° नि० चौ० । ६. तरत्तरङ्गरिङ्कितेन निपा० । ७. °जनितविस्मयां पु० । ८. 'दुग्धस्निग्ध' नास्ति नि० चौ० । ९. कान्तिजितकुन्द° निपा० ।

पृ. २२८. १. एवमियं पु० नि० चौ; एवमस्याः निपा० । २. °विहाराहारिणि नि० चौ० । ३. शिलाकालेख्येषु पु० । ४. प्रबुद्धा नि० चौ० । ५. चतुर्गातुरानाथजनचिकित्सासु निपा० । ६. चित्रेषु नि० चौ० । ७. कौशलं नि० चौ० । ८. शल्योद्धारेषु निपा० । ९. कामकथासु पु० नि० चौ० ।

पृ. २२९ १. विजृम्भते निपा० । २. °प्रज्ञातव्य° निपा० । ३. °वस्तुव्यतिकर-विस्तरायाः पु० । ४. 'प्रथम' नास्ति पु० । ५. °विगलत्° निपा० । ६. प्रभातप्रभाप्रारम्भप्रसरेण निपा० । ७. विदलित° नि० चौ० । ८. वयः पु० निपा०; वपुः नि० चौ० ।

पृ. २३१. १. मुद्राङ्कित - नि० चौ० पु० । २. ततश्च पु० नि० चौ०; अपि च निपा० । ३. वपुः निपा० ।

पृ. २३२ १. °उज्ज्वलं निपा० । २. तदाकर्ण्य निपा० । ३. 'उच्च' नास्ति निपा० ।

पृ. २३३. १. पुनरेवं निपा०; २. 'तं' नास्ति पु० निपा० । ३. किमेकमुखो मद्विधः पु० । ४. तस्याः पु० । ५. लक्ष्यते नि० चौ० । ६. कुसुमारश्चरणपल्लवाः निपा० । ७. अधरपल्लवः निपा० । ८. सकलाङ्गभोगः नि० चौ० निपा० ।

पृ. २३४ १. 'सा' नास्ति नि० चौ० । २. निर्मिता नि० चौ० पु० । ३. 'तथाहि' नास्ति पु० । ४. आर्द्राहृदये पु० ।

पृ. २३५ १. दृग्विभ्रमाः नि० चौ० । २. 'ततः' नास्ति पु० । ३. स्पृष्टा पु० निपा० । ३. °कुड्मलतुलां निपा० । ५. मुग्ध° पु० ।

पृ. २३६ १. 'सार' नास्ति नि० चौ० । २. जयति निपा० । ३. सोऽपि नि० चौ०; योऽथ निपा० । ४. भट्टविरचितायां पु० । ५. °सरोजाङ्कः पु० ।

● ● ●

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रीः

# चतुर्थ उच्छ्वासः

**अथ चतुर्थोच्छ्वासव्याख्या प्रतन्यन्ते ।**

**एवमेतदाकर्ण्य राजा तत्कालमापूर्णितमाश्चर्येण[1], आकुलितमौत्सुक्येन, आमन्त्रितमुत्कण्ठया, कटाक्षितं[2] कंदर्पेण, अभिवादितं रणरणकेन, ज्योत्कारितमाग्रहग्रहेण[3], पृष्ठ[4]कुशलमकालतरलतया, स्वीकृतमस्वास्थ्येन, आलोकितं मदेन[5], आलोचितं[6] चिन्तया चेतः स्वं स्वयमेव स्वस्थीकृत्य वितर्कितवान् ।**

**एव**मिति । एवं-अमुना प्रकारेण एतत् हंसोक्तं आकर्ण्य-श्रुत्वा राजा-नलः स्वं चेतः स्वयमेव स्वस्थीकृत्य-समाधौ संस्थाप्य वितर्कितवान्-विचारितवान् । किम्भूतं चेतः ? तत्कालं-दमयन्तीकथाश्रवणसमकालमेव आश्चर्येण-अद्भुतेन आपूर्णितं-भृतं, साश्चर्यं जातमित्यर्थः । तथा औत्सुक्येन-रणरणकेन आकुलितं-व्याकुलीभूतम् । तथा उत्कण्ठया-वाञ्छया आमन्त्रितं-अभिमुखीकृतं दमयन्तीं प्रत्यभिलाषुकं विहितमित्यर्थः । तथा कन्दर्पेण-स्मरेण कटाक्षितं-अर्धवीक्षितं, सस्मरं जातमित्यर्थः । तथा रणरणकेन-औत्सुक्येन अभिवादितं-नमस्कृतं, तां प्रति सोत्सुकं जातमित्यर्थः । तथा आग्रहः-हठस्तस्य यो ग्रहः-ग्रहणं तेन ज्योत्कारितं-प्रणतं, तस्यां साग्रहं जातमित्यर्थः । तथा अकाले-असमये या तरलता-चञ्चलता तथा पृष्ठं कुशलं यस्मै तत्पृष्ठकुशलं, चञ्चलं जातमित्यर्थः । तथा अस्वास्थ्येन-असमाधिना स्वीकृतं-आयत्तीकृतं, अस्वस्थं जातमित्यर्थः । तथा मदेन-हर्षेण आलोकितं-वीक्षितं, समदं जातमित्यर्थः । तथा चिन्तया तन्मिलनविकल्पेन आलोचितं-वितर्कितं स चिन्तं जातमित्यर्थः । चेतः स्वास्थ्यं विधाय किं विचारितवानित्याह—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**प्रायः सैव भवेदेषा पान्थादश्रावि या मया ।**
**युगायितं विनिद्रस्य यत्कृते मे त्रियामया ॥ १ ॥**

**प्राय** इति । वृत्तम् । यत्कृते-यदर्थं मे-मम विगता निद्रा यस्याऽसौ विनिद्रस्तस्य-अपगततन्द्रस्य त्रियामया-रात्र्या युगेनेवाचरितं युगायितं, या च मया पथिकात् अश्रावि-श्रुता सैवैषा-इयं हंसेनापि कथिता प्रायो भवेत् । युगं कृत युगायितम् । त्रियामयेति त्रिसंख्यामितप्रहररात्रि. वाचकत्वेन साभिप्रायं । प्रायः शब्दो वितर्के ॥ १ ॥

**तदेतन्मे–**

**तद्वार्तामृतपानार्थि भूयोऽपि श्रवणेन्द्रियम् ।**
**तृप्यते केन वानन्दकन्दे कान्ताकथानके ॥ २ ॥**

**तदेतन्मे**-मम

**तदिति** । वृत्तम् । श्रवणेन्द्रियं भूयोऽपि-पुनरपि तस्याः-दमयन्त्या वार्त्तैव अमृतं-सुधा तस्य यत्पानं-अत्यन्तादरेण श्रवणं तत् अर्थयते-अभिलषतीत्येवं शीलं । तद्वार्त्तामृतपानार्थि वर्तते । पुनरपि तद्वार्तां श्रृणोमि येन तृप्तं स्यामित्यभिलाषुकमस्तीत्यर्थः । वेति-पक्षान्तरे, वा-अथवा आनन्दस्य कन्द इवोत्पादकत्वात् यत्तत् आनन्दकन्दं तस्मिन् आनन्दकन्दे कान्ताकथानके केन तृप्यते-प्रीयते ? अपितु न केनाऽपि ॥ २ ॥

**तत्किमेनं पुनः पृच्छामि ।**

**नेदं नायकस्थानम्[१] ।**

**तत्** किं एनं-हंस पुनः पृच्छामि तद्वार्त्तामिति शेषः ।

**नेदं** नायकस्य-प्रधानस्य स्थानं-स्थितिरौचित्यं नायकस्थानकं, धैर्यं हि नायकपदं परमं वदन्ति । यदि पुनः पृच्छामि तदा नायकत्वं प्रयाति । नायकलक्षणं च **रुद्रटोक्त**-मिदम्–

> **"रत्युपचारे चतुरस्तुङ्गकुलो रूपवानरुक् मानी ।**
> **अग्राम्योज्ज्वलवेषोऽनुल्वणचेष्टः स्थिरप्रवृतिः ॥**
> **सुभगः कलासु कुशलस्तरुणस्त्यागी प्रियंवदो दक्षः ।**
> **गम्यासु च विस्रम्भी तत्र स्यान्नायकः ख्यातः ॥"** [काव्यालङ्कार २।७,८]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अतः सम्प्रति-**

**मण्डली[१]कृतकोदण्डः कामः कामं विचेष्टताम्[२] ।**
**न व्यथिष्ये स्थितः स्थैर्ये धैर्यं धामवतां धनम्'[३] ॥ ३ ॥**

**अतः** अस्माद्धेतोः सम्प्रति-अधुना-

**मण्डलीति** । वृत्तम् । मण्डलीकृतः-आरोपितः कोदण्डः-धनुर्येन ईदृशः कामः-स्मरः काममिति-यथेप्सितं विचेष्टतां-स्वकर्मणि व्याप्रियताम् । अहं स्थैर्ये-स्थिरतायां स्थितः-अवस्थितः, सन् न व्यथिष्ये-न व्यथामनुभविष्यामि । यतो धामवतां-तेजस्विनां धैर्यमेव-दृढतैव धनं-स्वं । तेन ममाऽत्र धैर्यमेव कर्त्तुं श्रेयः । ॥ ३ ॥

**इति वितर्क्य विहसन्हंसमाबभाषे—साधु भोः ! सुभाषितामृतमहोदधे ! साधु । श्रुतं श्रोतव्यम् । इदानीं भद्र[४]भूयिष्ठो दिवसः । तद्वयं वयस्य, समासन्नाह्निकसमये[५] समुचितव्यापारं साधयामः ।**

**इति वितर्क्य**-विचार्य हसत्[१]-हास्यं कुर्वन् सन् हंसं आबभाषे-उवाच । सुभाषितेमेवामृतं-पीयूषं तस्य महोदधिरिव यः स तस्य सम्बुद्धौ भो[२] सुभाषितामृतमहोदधे ! साधु साधु-चारु चारु, श्रोतव्यं-श्रव्यं श्रुतम् । इदानीं भद्र ! गतो भूयिष्ठः-प्रचुरो दिवसः तत्तस्माद्धेतोः हे वयस्य !-मित्र ! वयं समासन्नः-निकटो य आह्निकसमयः-नित्यक्रियावसरस्तस्मिन् समुचितव्यापारः-[३] देवार्चनादिस्तं साधयामः-कुर्मः ।

**भवताऽपि-**

**एताः सान्द्रद्रुमतलचलच्चक्रवाकीचकोराः,**
**क्रीडावापीपरिसरभुवः स्थीयतां स्वेच्छयेति[६] ।**
**यत्रोन्मीलत्कमलमुकुलान्याश्रयन्त्याः कुरङ्ग्यो,**
**भृङ्गश्रेण्याः श्रवणसुभगं गीतमाकर्णयन्ति ॥ ४ ॥**

**भवताऽपि**—

**एता** इति । मन्दाक्रान्ता वृत्तम् । एताः क्रीडावाप्यायाः परिसरभुवः-तीरभूमयस्ता वर्तन्ते, भवताऽपि-त्वयाऽपि स्वेच्छया स्वैरं स्थीयतामिति । किम्भूताः क्रीडावापी-परिसरभुवः ? सान्द्राः-निविडा अनन्तरप्ररूढाः ये द्रुमास्तेषां तलेसु-छायासु चक्रवाक्यश्च

---

१. विहसत् । २. हे अनू. । ३. समुचितो योग्यो यो व्यापारः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चकोराश्च-चक्रवाकीचकोराश्चलन्तश्चक्रवाकीचकोरा यासु ताः । यत्र क्रीडावापीपरिसरभूषु कुरङ्ग्यः-मृग्यः उन्मीलन्ति-विकसन्ति यानि कमलमुकुलानि-पद्मकुड्मलानि तानि आश्रयन्त्याः-अवलम्बमानायाः भृङ्गश्रेण्याः श्रवणयोः-श्रोत्रयोः सुभगं-सुखकारि गीतं-झङ्काररवं[1] आकर्णयन्ति । मृगीणां हि गीतं प्रियं, तत्र च स्वच्छाः सत्यस्ताः भृङ्गाररवं शृण्वन्तीति । एतेन वापीतीरभुवोऽभिगम्यत्वमुक्तम् ॥ ४ ॥

**अपि च–**

**अतिललिततरं तरङ्गभङ्गैरिदमपि तृड्भरवारि वारि वाप्याः ।**
**भ्रमदलिनिवहं वहन्ति यस्मिन्महिमकरं मकरन्दसाम्बुजानि ॥ ५ ॥**

**अपि च**-पुनः–

अतीति वृत्तम् । यस्मिन् वारिणि महिमकरं-माहात्म्यकरं तथा भ्रमन्-सौरभ्यातिशयात् परितः पर्यटन् अलिनिवहः-भृङ्गगणो यत्र ईदृशं मकरन्दं-रसं अम्बुजानि-पद्मानि वहन्ति-धारयन्ति । तदिदं वाप्या वारि "तरङ्गभङ्गैः-वीचिविच्छित्तिभिः अतिललिततरं-अतिचारुतरं वर्तते । किंविशिष्टं वारि ? तृड्भरं-तृष्णातिशयं वारयति-छिनत्ति यत्तत् तृड्भरवारि । पूर्ववृत्तक्रीडावापीभूकथनापेक्षया अपिशब्दोऽत्र समुच्चये ॥५॥

**त्वमपि भद्रे वनपालिके, कृतकमलमालानितम्बकक्रीडमिममादाय भुक्तावसानास्थानगोष्ठीस्थितस्य मम समीपमेष्यसि इत्यभिधाय राजा राजभवनमयासीत् ।**

**गते च राजनि राजीविनीनां जीवितसमाः समास्वादयन्स्वादुकोमलमृणालकन्दलीः, दलयन्द[1]लानि, कवलयन्बहलमधुरस्निग्धमधुमुकुलानि[2], अनुशीलयञ्शीतलशैवलावलीः, विलासेन स हंससरसस्तरङ्गान्तरेषु[3] चिरं चिक्रीड ।**

**चिन्तितवांश्च तेन राज्ञा 'कृतकमलमालानितम्बकक्रीडमिममादाय मत्समीपमेष्यसि' इति श्लिष्टार्थ[4]मिवादिष्टा वनपालिका । तन्न युक्तमिह चिरं स्थातुमिति ।**

**इत्यस्थान[5] एवाशङ्कमानः सह तेन राजहंसकदम्बकेनाम्बरतल[6]मुदपतत् ।**

---

१. झंकारारावं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यभिधाय-उक्त्वा राजा-नलो राजभवनमयासीत्-जगाम । इतीति किम् ? हे भद्रे वनपालिके ! त्वमपि कृता कमलमाला या नितम्बके-जघनप्राये मध्यप्रदेशे क्रीडा येन स तं, इमं-हंसमादाय -गृहीत्वा भोजनं-भुक्तं तस्यावसाने-प्रान्ते आस्थीयते यस्यां ईदृशी या गोष्ठी-पर्षत् तस्यां आस्थानगोष्ठ्य स्थितस्य मम समीपं एष्यसि । मालाशब्दगतस्त्रीत्वेन कमलमालायाः साक्षात् स्त्रीत्वाध्यवसायात् । नितम्बशब्द स्त्र्यवयवोऽपि तदर्थमात्रे प्रयुक्तः ।

राजति-नले च स्ववासभवनं गते सति हंसः[१] विलासेन लीलया सरसः-सरस्या यानि तरङ्गान्तराणि[२]-तरङ्गान्तरालानि तेषु चिरं-चिरकालं चिक्रीड-अक्रीडत् । किं कुर्वन् ? राजीविनीनां-पद्मिनीनां जीवितसमाः-प्राणोपमाः वल्लभा इत्यर्थः, स्वादूनि-मृष्टानि कोमलानि-मृदूनि यानि मृणालानि-विसानि तान्येव कन्दल्यः-नवप्ररोहास्ताः समास्वादयन्-अनुभवन् । आस्वादः सकर्मकादिति आङ्पूर्वात् स्वदतेः, सकर्मकात् णिज् भवति न पुनरकर्मकात् । आस्वादयति यवागूमित्यादिवत्, अत्रापि णिच् । तथा दलानि-पत्राणि दलयन्-विदारयन् । तथा बहलं-निविडं मधु-मकरन्दो यत्र अतएव स्निग्धानि-आर्द्राणि यानि मधुमुकुलानि-मधूकपुष्पकुड्मलानि तानि कवलयन्-अभ्यवहरन् । "**मधुश्चैत्रर्तुदैत्येषु जीवाशाकमधूकयोः । मधुक्षीरे जले मद्ये क्षौद्रे पुष्परसेऽपि च । इत्यनेकार्थः ।**" [२।२४७-२४८] तथा शीतलाः-शिशिरा, या शैवलावल्यः-शैवालपंक्तयस्ता अनुशीलयन्-उपचरन्[३] ।

च-पुनः स-हंस इति चिन्तितवान्[४] । तथा तेन राज्ञा कृतकं-कृत्रिमं कापटिकं तथा अलं-अत्यर्थं आलानितं-बद्धं, तथा बकवत् क्रीडा यस्य तादृशमिमं-हंसं आदाय-गृहीत्वा[५] मत्समीपमायास्यसि इति-अमुना प्रकारेण श्लिष्टार्थमिव यथा भवति तथैव वनपालिका आदिष्टा । राजाभिप्रायस्तु कृता कमलमालाया नितम्बके क्रीडा येन इत्येवं रूपः, हंसेन तु एवं प्रतीतं यथा कृतकमित्यादि ।

तत्-तस्माद्धेतोः इह स्थाने चिरं स्थातुं न युक्तं इति-अमुना प्रकारेण अस्थान एव-दोषानवकाश एव आशङ्कमानः-कृतकमित्यादि शङ्का कुर्वन् तेन-पूर्वोदितेन राजहंस-कदम्बकेन सह अम्बरतलं-गगनं उदपतत्-उड्डीनः । "**स्थानं स्थित्यवकाशयोः । सादृश्ये सन्निवेशे च ।**" [२।२९२] इत्य**नेकार्थः** ।

**तत्र च व्यतिकरे दिवापि स्फारस्फुरत्तारामण्डलमिव, विकचनव-कुवलयवनगहनमिव[१], अन्तरान्तरोन्निद्रकुमुदखण्डमुड्डीनास्ते[२] क्षणम-शोभयन्त नभस्तलम्[३] ।**

---

१. स हंसः अनू. । २. नास्ति अनू. । ३. उपचरन् भजन् अनू. । ४. चिन्तितवान् विचारितवान् अनू. । ५. नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तत्र च** व्यतिकरे-तस्मिंश्चावसरे तत उड्डीनास्ते-हंसाः क्षणं यावन्नभस्तलं अशोभयन्त-अभूषयन् । कथं किम्भूतं नभस्तलम् ? उत्प्रेक्ष्यते, दिवाऽपि-दिनेऽपि स्फाराणि-विशालानि स्फुरन्ति-दीप्यमानानि तारामण्डलानि यत्र ईदृशमिव । मन्ये, अमी हंसा न भवन्ति किन्तु दिनेऽपि तारामण्डलान्युदितानीति, तेषां श्वेतत्वादियमुत्प्रेक्षा । पुनरुत्प्रेक्ष्यते, अन्तरान्तरा-अन्तरन्तः उन्निद्रं-विकस्वरं कुमुदखण्डं-धवलकमलवनं यत्र ईदृशं विकचानि-सविकसानि यानि नवकुवलयवनानि-नीलाब्जखण्डानि तेषां गहनमिव-गह्वरमिव, नीले नभसि श्वेता हंसा इति भ्रान्तिं जनयन्ति । मन्ये, इदं नभो न भवति किन्तु कुवलयवनं विद्यते, तत्र चामी हंसा न भवन्ति किन्तु अन्तरन्तः प्ररूढं कुमुदखण्डमिति ।

**अविलम्बिताश्च न चिराद[1]वापुर्वैदर्भमण्डलमण्डनं कुण्डिनपुरम्[2] ।**

**अवतेरुश्च चकितचलच्चक्रवाकालोक्यमान[3]कृतान्धकारविभ्रम-भ्रमद्भ्रमरभरभज्यमानाम्भोजभाजि[4] राजभवनासन्नकन्यान्तःपुरोद्यान-क्रीडासरसि । सरभस[5]प्रधावितेन सरस्तीरविहारव्यसनिना कन्यकाजनेन निवेदितांस्तांनवलोकयितुमतिकौतुकेन दमयन्ती कन्यान्तःपुरात्पुराण-मदिरारुणायताक्षी[6] क्षिप्रमाजगाम ।**

**अविलम्बिताश्च** विलम्बं-कालक्षेपं अकुर्वाणास्ते-हंसा न चिरादेव-स्तोकेनैव कालेन वैदर्भमण्डलस्य-वैदर्भदेशस्य मण्डनमिव-विभूषकत्वाद् यत्तथाविधं कुण्डिनपुरं अवापुः-प्रापुः ।

**अवतेरुश्च**-अवतीर्णा, नभस्ते । भूमण्डलं दमयन्ती सरभसं सहर्षं यथा भवति तथा प्रधावितेन-समागतेन तथा सरस्तीरे यो विहारः-विचरणं तत्र व्यसनं-आसक्तिर्विद्यते यस्य स तेन सरस्तीरविहारव्यसनिना कन्यकाजनेन निवेदितान्-कथितान् तान्-हंसान् अति-कौतुकेन कुतूहलातिशयेन अवलोकयितुं कन्यान्तःपुरात् राजभवनस्य-नृपमन्दिरस्य आसन्नं-निकटं यत् कन्यान्तःपुरोद्यानं-राजकन्यकानां क्रीडावनं तस्य यत् क्रीडासरः तस्मिन् क्षिप्रं-शीघ्रं आजगाम-आयासीत् । किम्भूते क्रीडासरसि ? चकिताः-भयाकुलाश्चलन्तः-इतस्ततः पर्यटन्तो ये चक्रवाकास्तैरालोक्यमाना-वीक्ष्यमाणा, यतः कृत अन्धकारस्य विभ्रमः-भ्रान्तिर्यैस्ते, ततः कर्मधारयः, ईदृशा भ्रमन्तो ये भ्रमरास्तेषां भरेण-भारेण भज्यमानानि-कुब्जीभवन्ति यानि अम्भोजानि तानि भजति यत् तत् तस्मिन् कृष्णच्छवीन् भृङ्गान् वीक्ष्य । चकवाकाणामन्धकारभ्रमोऽभवत् ततश्चकितास्सन्तस्तान् वीक्षन्त इति । किम्भूता दमयन्ती ? पुराणमदिरावत्-जीर्णसुरावत् आरुणे-ईषद्रक्ते आयते-विशाले अक्षिणी यस्याः सा पुराणमदिरारुणायताक्षी ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**आगत्य च चटुलतरचरणचञ्चूप्रहारविदलितारविन्दकन्दलानुन्नाल-बालनलिनी[१]वनविहारिणस्तान्ग्रहीतुमेकेकशः सखीजनमादिदेश ।**

**स्वयं च चलद्वलय[२]चारुरववाचालितप्रकोष्ठेन सविलासं विस्मयकरं[३] करपल्लवेन तं राजहंसं राजपुत्री[४]मुच्चिक्षेप[५] ।**

**आगत्य** च सा-दमयन्ती तान्-हंसान् ग्रहीतुं एकं एकं प्रति इति एकैकशा वीप्सायां स, पृथक् पृथक् सखीजनं आदिदेश-आज्ञप्तवती । किंभूतान् तान् ? चटुलतराणां-अतिचञ्चलानां चरणानां चञ्चूनां च प्रहारैः-आघातैः विदलितानि-खण्डशः कृतानि अरविन्दकन्दलानि-अब्जप्रोहा यैस्ते तथाविधान् । पुनः किम्भूतान् ? उन्नालानि-ऊर्ध्वमृणालानि यानि बालनलिनीवनानि-नवपद्मिनीखण्डानि तत्र विहर्तुं शीलं येषां ते उन्नालबालनलिनीवनविहारिणस्तान् । **"नालं काण्डे मृणाले च ।"** [२।५०६] इत्य**नेकार्थः ।**

**स्वयं च**-आत्मना सा-राजपुत्री करपल्लवेन-पाणिकिसलयेन सविलासं-सविभ्रमं यथा भवति तथा विस्मयं-आश्चर्यं करोतीति तथाविधं तं राजहंसं यो राजहंसो नलं प्रति एतद्वार्त्तां अचकथत् तं-मरालं उच्चिक्षेप-उद्दध्रे । किम्भूतेन करपल्लवेन ? चलन्ति-करचालनात् कम्पमानानि यानि वलयानि-करकङ्कणानि[१] तेषां यो रवः-स्वनस्तेन चारु यथा स्यात्तथा वाचालितः-मुखरितः प्रकोष्ठः-कलाचिका यस्य स तथा तेन ।

**पाणिपङ्कजस्थित एव सोऽप्यभिमुखीभूय विभाव्य च चेतश्च-मत्कारकारण[६]मस्याः कान्तिविशेष[७]माशिषमदात् ।**

सोऽपि-हंसः पाणिपङ्कजस्थित एव अभिमुखीभूय-सम्मुखो भूत्वा अस्याः-दमयन्त्यांश्चेतश्चमत्कारकारणं कान्तिविशेषं विभाव्य-विलोक्य आशिषं अदात्-ददौ ।

**कंदर्पस्य जगज्जैत्रशस्त्रेणाश्चर्यकारिणी[८]।**
**रूपेणानेन रम्भोरु दीर्घायुः सुखिनी भव ॥ ६ ॥**

**कन्दर्पे**ति । वृत्तम् । हे रम्भोरु ! त्वं दीर्घायुः-चिरञ्जीविनी सुखिनी च भव । किम्भूता त्वम् ? कन्दर्पस्य जगज्जैत्रं-जगज्जयनशीलं शस्त्रं-आयुधं तेन जगज्जैत्रशस्त्रेण अनेन-प्रत्यक्षेण रूपेण-सौन्दर्येण आश्चर्यं करोतीत्येवंशीला आश्चर्यकारिणी । **'जगज्जैत्र-शस्त्रेणाश्चर्यकारिणा'** इति पाठे तु हे रम्भोरु ! त्वं अनेन रूपेण सुखिनी दीर्घायुश्च भव। किम्भूतेन रूपेण ? आश्चर्यकारिणेति व्याख्येयम् ॥ ६ ॥

---

१. कर नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अपि च—**

**निर्माय स्वयमेव विस्मितमनाः सौन्दर्यसारेण यं,**
**स्वव्यापारपरिश्रमस्य कलसं वेधाः समारोपयत्[१]।**
**कंदर्पं पुरुषाः स्त्रियोऽपि दधते[२] दृष्टे च यस्मिन्सति,**
**द्रष्टव्यावधिरूपमाप्नुहि पतिं तं दीर्घनेत्रे[३] नलम्' ॥ ७ ॥**

**अपि च**-पुनराह-

**निर्माये**ति । हे दीर्घनेत्रे ! तं नलं पतिमाप्नुहि । किम्भूतं तम् ? द्रष्टव्यावधि-दर्शनीयेषु परमकाष्ठाप्राप्तं रूपं-आकृतिर्यस्य स तं, प्रकृष्टाकारमित्यर्थः । तमिति कम् ? यं-नलं सौन्दर्यस्य सारः-निष्कर्षस्तेन स्वयमेव निर्माय-निष्पाद्य वेधाः-विधिः विस्मितं-साश्चर्यं मनो यस्या स विस्मितमनाः ईदृग्विधः सन् स्वव्यापारस्य-जगत्सृष्टिकरणस्य यः परिश्रमः-व्यायामस्तस्य कलसं समारोपयत्-अस्थापयत्, यथा देवकुलं निष्पाद्योपरि सौवर्णः कलसो निधीयते तथा धाता यं निर्माय स्वव्यापारश्रमस्य कलसस्थानीयमकरोत्, अतः परमुत्कृष्टो न कश्चिदस्तीत्यर्थः । च-पुनः यस्मिन्-नले दृष्टे सति पुरुषाः कन्दर्पं-अहङ्कारं दधते-पुष्णन्ति न कमपीत्यर्थः, सर्वैरपि सौन्दर्यादिभिर्मदस्थानैः स्वतस्तस्मिन्नाधिक्यदर्शनात् । यस्मिन् दृष्टे स्त्रियः पुनः कन्दर्पं-मन्मथं दधते-धारयन्ति, सकामाः जायन्त इत्यर्थः । अपिः-पुनरर्थे समुच्चये वा ॥ ७ ॥

**दमयन्ती तु तस्मिन्क्षणे 'क्व[४] पक्षिणो विवक्षितवाचश्च' इति विस्मयं[५] भयं च, नामाप्याह्लादजनकं[६] नलस्य' इति वपुषि वेपथुं च[७] रोमाञ्चं च हृदयेऽनुरागमौत्सुक्यं च, समकालमुल्लोलायमानमुद्वहन्ती चिन्तयांचकार ।**

**दमयन्ती** तु तस्मिन् क्षणे पक्षिणः-विहगाः क्व वक्तुमिष्टा विवक्षिता, ईदृश्यो वाचश्च क्व ? क्वशब्द अत्यन्तासांगत्यसूचकौ इति हेतोर्विस्मयं-आश्चर्यं भयं च-भीतिं, तथा नलस्य नामाऽपि-अभिधानमपि आस्ता तां दर्शनस्पर्शने आह्लादजनकं-प्रीत्युत्पादकं इति हेतोः वपुषि वेपथुं च-सात्त्विकभावात्कम्पं रोमाञ्चं च-पुलकं, तथा हृदये-चेतसि अनुरागं-नलं प्रत्यभिलाषं औत्सुक्यं च-उत्कण्ठां, एतत्सर्वं समकालं-युगपत् उल्लोलायमानं-कल्लोलवदाचरमाणं उद्वहन्ती-दधती सती चिन्तयाञ्चकार-वितर्कितवती ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सोऽयं यस्तेन पान्थेन यान्त्या गौरीमहोत्सवे ।**
**नलोऽप्यनल एवासीद्वर्णितो मे पुरः पुरा ॥ ८ ॥**

**सोऽय**मिति । वृत्तम् । यः-नलस्तेन-पान्थेन गौरीमहोत्सवे यान्त्या-गच्छन्त्या मे-मम पुरःपुरा-पूर्ववर्णितः-स्तुतः, सोऽयं नलोप्यनल एव आसीत् । अपिः-विरोधे, यो नलो भवेत् स कथं अनलः ? परिहारे तु अनलः-वह्नि : स्मरसन्तापहेतुत्वात् ॥ ८ ॥

**अथास्याः [१]परिहासशीला नामसखी नाम्नैव नलस्योद्भिन्नबहलपुलकाङ्कुरामिमामवलोक्य नर्मालापमकरोत् ।**

**अथ**-अनन्तरं अस्याः-दमयन्त्याः परिहासशीला नामेति प्रसिद्धा सखी इमां-दमयन्तीं नलस्य नाम्नैव उद्भिन्ना-उद्गता बहलाः-निविडाः पुलकाङ्कुराः-रोमाञ्चप्ररोहा यस्याः सा, तथाविधामवलोक्य-दृष्ट्वा नर्मालापं-परिहाससम्भाषणमकरोत् । तद्यथा-

**कोष्णं किं नु निषिच्यते तव बलातैलं सखि श्रोत्रयो-**
**रन्तस्तित्तिरि[२]पक्षिपत्रमथवा मन्दं मृदु भ्राम्यति ।**
**येनाङ्गेषु निखातमन्मथशरप्रस्फार[३]पिच्छच्छवि-**
**र्नीलीमेचकितोच्चकञ्चुकरुचं[४] रोम्णां वहत्युद्गमः ॥ ९ ॥**

**कोष्ण**मिति वृत्तम् । सखीत्यामन्त्रणे हे सखि ! नु-इति वितर्के तव श्रोत्रयोः-कर्णयोरन्तः-मध्ये किं कु-ईषद् उष्णं कोष्णं बला-औषधिविशेषस्तस्य तैलं निषिच्यते-निक्षिप्यमाणं वर्तते ? अथवा मृदु-सुकुमारं तित्तिरिपक्षिणः पत्रं-पिच्छं मन्दं-शनैर्भ्राम्यति ? कथमेतदवगम्यते ? येन हेतुना अङ्गेषु-शरीरावयवेषु निखाताः-निमग्ना ये मन्मथशराः-कामबाणास्तेषां प्रस्फाराणि-विपुलानि यानि पिच्छानि-पत्राणि तद्वच्छविः-शोभा यस्य स, तथोक्तो रोम्णां-तनूरुहाणामुद्गमः-प्रादुर्भावो नील्या-औषधिविशेषेण मेचकितस्य-श्यामलितस्य उच्चकञ्चुकस्य रुचं-कान्तिं वहति-धारयति[१] । प्रस्फारत्वं हि पिच्छानामप्रवेशो हेतुः, अन्यथा शरेषु प्रविष्टेषु पुङ्खपिच्छान्यपि कथं न प्रविशन्ति, तेन पिच्छच्छविरिति कविराचष्टे । येन रोमोद्गमः सञ्जातोऽस्ति तेनावगम्यते । किं ते कर्णयोर्बलातैलं निषिच्यते ? किं वा मृदुतित्तिरिपिच्छं भ्रमदस्ति ? बलातैलनिषेके तित्तिरिपिच्छभ्रमे च रोम्णामुद्भवात् ॥ ९ ॥

---

१. दधाति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**दमयन्ती तु तस्याः सवैलक्ष[1]स्मितमेवोत्तरं कल्पयन्ती शनैः[2] शिरःकम्पतरलितावतंसोत्पला सलज्जा चलद्विलोचनान्तेन तामतर्जयत् ।**

**अवादीच्च तं राजहंसम्–अहो महानुभाव, सर्वथाश्चर्यहेतुरसि ।**

**तथाहि–**

**द्रष्टव्यानुरूपं रूपम्, महाश्चर्यगर्भाः प्रपञ्चितवाच्या वाचः, सूचित-संस्कारातिरेको विवेकः, सौजन्याश्रयः प्रश्रयः, निष्कारणोपकारधात्री मैत्री ।**

**तत्त्वमनेकधा[3] जनितविस्मयो बहु प्रष्टव्योऽसि ।**

**किं तु प्रस्तुतं पृच्छामः ।**

**कथय कोऽयमात्मरूपसम्भावितकंदर्पदर्पदावानलो नलो नाम ।**

**यस्यैतानि मन्दरमथन[4]क्षणक्षुभितक्षीरसागरतरङ्गभ्रमभ्रान्तिः[5] भ्रमन्ति यशांसि ।**

**दमयन्ती** तु तस्याः-कोष्णमित्यादिवादिन्याः सख्याः विलक्षं-वीक्षापन्नं अनयाऽपि मम स्मरविकारावगमात् तस्य भावो वैलक्ष्यं तेन सह-युक्तं यत् स्मितं-ईषद्धास्यं तदेव उत्तरं-प्रतिवचः कल्पयन्ती-रचयन्ती अब्रुवाणैव शनैः-मन्दं शिरःकम्पेन तरलितं-अन्दोलितं अवतंसोत्पलं-शेखरीकृतकमलं यया सा, ईदृशी सलज्जा-तद्वाक्यश्रवणात् ह्रीणा सती चलन् यो विलोचनान्तः-नेत्रप्रान्तस्तेन तां-सखीमतर्जयत्-निरभर्त्सयत् ।

च-पुनस्तं-हंसमवादीत् । अहो-विस्मये, हे महानुभाव !-महाप्रभाव ! सर्वथा-सर्वप्रकारेण त्वं आश्चर्यस्य हेतुः-कारणमसि, भवता दर्शनादाश्चर्यं जायत इत्यर्थः ।

**तथाहीति** । उक्तमेव दृढीकरोति–

हे हंस ! तव रूपं-आकारः द्रष्टव्यस्य-द्रष्टुं योग्यस्य वस्तुनः अनुरूपं-सदृशं, यथा अन्यदपि[1] द्रष्टव्यं वस्तु साभिलाषं वीक्ष्यते तथा त्वद्रूपमपि । तथा त्वदीयाः प्रपञ्चितं-विस्तारितं वाच्यं-वक्तव्यं याभिस्ता ईदृश्यो वाचो महाश्चर्यगर्भाः-महत् आश्चर्यं गर्भे-मध्ये यासां तास्तथाविधाः सन्ति । तथा सूचितः-दर्शितः संस्कारस्य-भावनाख्यस्य मानसकर्मणो वा अतिरेकः-आधिक्यं येन ईदृशस्तव विवेकः-सदसद्विवेचनम् । यदनेकार्थः-"**संस्कारः**

---

१. अन्येषु अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**प्रतियत्नेऽनुभवे मानसकर्म्मणि । गुणभेदे**" [३।६५२-६५३] इति । तथा तव प्रश्रयः-प्रणयः सौजन्यस्य-सुजनतायाः आश्रयः । तथा तव मैत्री-सुहृत्ता निःकारणं-कारणं विनाऽपि उपकारं दधाति-पुष्णातीति निःकारणोपकारधात्री ।

**तत्**-तस्माद्धेतोः हे हंस ! त्वं अनेकधा-बहुभिर्प्रकारैः जनितो विस्मयो येन ईदृग्विधः सन् बहु-प्रचुरं प्रष्टव्योऽसि, किन्तु प्रस्तुतं-प्राकरणिकं पृच्छामः ।

त्वं **कथय** कोऽयं नलो नामेति प्रसिद्धः ? किम्भूतः ? आत्मरूपेण सम्भावितः-सदृक्रूपतया[१] ज्ञातो यः कन्दर्पस्तस्य दर्प एव दवः-वनं तत्र अनल इव-अग्निरिव यः स, तदधिकरूपवत्वात् । यो ह्यधिको भवति स स्वस्पर्द्धिनो दर्पं स्फेटयत्येव ।

तथा नलोऽपि यस्य एतानि मन्दरेण-मेरुणा यन्मथनं-विलोडनं तस्य क्षणे-अवसरे क्षुभितो यः क्षीरसागरः-क्षीराब्धिस्तस्य ये तरङ्गाः-वीचयस्तेषां यो भ्रमः-भ्रमणं तस्य भ्रान्ति-सन्देहं कुर्वन्ति यानि तानि ईदृंशि यशांसि भ्रमन्ति, मन्ये अमूनि यशांसि न भ्रमन्ति[२] किन्तु क्षीराब्धेरमी तरङ्गा एव भ्रमन्तीति । यशसः श्वेततया वर्णनमिति कविसमयः ।

**इत्येवमुक्तः सोऽपि 'सुन्दरि, यद्येवमुपविश्यताम् । अवधीयतां मनः । श्रूयतां[१] सविश्रब्धम्[२]' इत्यभिधाय कथयितुमारब्धवान्[३] ।**

**इत्येवं** दमयन्त्या उक्तः-कथितः, सोऽपि-हंस उवाच—हे सुन्दरि ! यद्येवं तद्वार्त्ताश्रवणे मनो विद्यते तर्हि उपविश्यतां-स्थीयतां, तथा मनः अवधीयतां-एकाग्रीक्रियतां, अन्यस्थानान्निवर्त्यतामित्यर्थः । तथा सविश्रब्धं-विश्रम्भणं विश्रब्धं "**भावे क्तः**" [ ] तेन सहितं सविश्रब्धं-सविश्वासं यथा भवति तथा श्रूयतां-आकर्ण्यतां इति अभिधाय कथयितुमारब्धवान् ।

**'अस्ति समस्तसुरासुरलोककर्णपूरीकृतकान्तकीर्तिकुन्दकुसुमः, कुसुमायुधरूपरमणीयदेहप्रभः, प्रभावयुक्तो विप्रभावश्च, शुचिरनुपतापकारी च, घनागमसमयो न[४] वारिबहुलश्च, शिशिरस्वभावो न जाड्ययुक्तश्च, रामः कुशलवयोरामणीयकेन, जनको वैदेहभागेन, नैषधः प्रजानां पतिः[५], विरिञ्चि[६] इव नाभिभूतः समरे, वीरो वीरसेनो नाम ।**

---

१. रूपं नास्ति अनू. । २. भवन्ति अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अस्तीति** । वीरः-शूरो वीरसेनो नाम प्रसिद्धः प्रजानां पती-राजा अस्ति । किम्भूतो वीरसेनः ? समस्ता ये सुराश्च असुराश्च लोकाश्च तैः कर्णपूरीकृतं-अवतंसीकृतं कान्तकीर्त्तिरेव-विशदयश एव कुन्दकुसुमं यस्य स, यत्कीर्त्तिः सर्वैरपि श्रुतास्तीत्यर्थः । तथा कुसुमायुधः-कामस्तस्य रूपवद् रमणीया-चार्वी देहप्रभा-तनुकान्तिर्यस्य सः । तथा प्रभावः-अनुभावो माहात्म्यं तेन युक्तः । तथा विप्राणां भा-तेजो अवति-रक्षतीति विप्रभावः । च-विरोधार्थः, सचेत्थं–यः प्रभावयुक्तो भवति स विगतप्रभावः कथं भवेत् किन्तु सप्रभाव एव स्यात् । तथा शुचिः-पुण्यः, तथा न उपतापं-लोकानां सन्तापं करोतीत्येवंशीलः अनुतापकारी । विरोधे तु, शुचिः ग्रीष्ममासः, यः शुचिर्ग्रीष्मो भवेत् स कथं अनुतापकारी[१] भवेत्, किं उपताप-औष्ण्यं तत्करणशील एव स्यात् । "**शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोः सिते । ग्रीष्मे हुतवहेऽपि**" [चान्त० द्वि० ६] इति **विश्वप्रकाशः** । तथा घनः-प्रचुर आगमः-सिद्धान्तः समयश्च-सम्पत् यस्य स घनागमसमयः । "**समयः शपथे भाषासम्पदोः कालसम्विदोः । सिद्धान्ताचारसङ्केतनियमावसरेषु च । क्रियाकारे निदेशे च**" **इत्यनेकार्थः** [३।५४१-५४२] । तथा वा-समुच्चये, अरिभिः-शत्रुभिर्बहुलः-व्याप्तो अरिबहुलस्तथाविधो न, प्रतिपन्थिरहित इत्यर्थः । विरोधे तु, यो घनागमसमयो वर्षाकालो भवति स वारिबहुलः कथं न भवेत् ? किन्तु जलप्रचुर एव स्यात्। तथा शिशिरः-शीतलः स्वभावः-प्रकृतिर्यस्यासौ शिशिरस्वभावः, तथा जाड्यं-मौर्ख्यं तेन युक्तो न । विरोधे तु, शिशिरो माघफाल्गुनौ यः शिशिरस्वभावो-माघफाल्गुनस्वरूपो भवेत् स जाड्ययुक्तो हिमसहितः कथं न स्यात् ? इत्युष्णवर्षाशीतकालत्रयव्यतिरेकः । तथा कुशलेन-चतुरेण वयोरामणीयकेन-अवस्थासौन्दर्येण रामः-चारु। तथा विदेहादेशास्तेषामयं वैदेहो भागस्तेन जनकः-जनकाख्यनृपप्रतिमः। यथा जनको वैदेहभागस्वामी तथाऽयमपि । तथा नैषधः-निषेधदेश्यः । पक्षे-रामः-दाशरथिः वै-तर्के देहस्य भा-कान्तिस्तां गच्छति-व्याप्नोतीति कृत्वा डप्रत्यये देहभागस्तेन शरीरकान्त्यनुहारिणा रामणीयकेन-सौन्दर्येण उपलक्षितस्थथा कुशलवयः-कुशस्य लवस्य च जनकः-जनयिता । "**रामः श्यामे हलायुधे । पशुभेदे सिते चारौ राघवे रेणुकासुते ॥**" [२।३२७-३२८] **इत्यनेकार्थः** । तथा समरे-युद्धे न अभिभूतः-पराभूतः । क इव ? विरिञ्च इवः धातेव । स च किम्भूतः ? प्रजानां पतिर्जनकत्वात्, नाभेः-विष्णुनाभेर्भूतः-जातः ।

**यस्य च बहुशोभयाङ्गप्रभया सह स्फुरत्युदारा[१] मनोवृत्तिः, अखण्ड-**

---

१. अनुपतापकारी अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**नयाज्ञया सदृशी राजते राज्यस्थितिः, सज्जया सेनया सह श्लाघनीया[१] कृपाणयष्टिः ।**

**यस्य** चेति । अत्र प्रथमातृतीययोः श्लेषः । तथाहि-

**यस्य**-राज्ञा उदारा-सरला मनोवृत्तिः-चेतोव्यापारः अङ्गप्रभया सह स्फुरति-विजृम्भते। किम्भूता मनोवृत्तिः ? बहुशः-बहुभिः प्रकारैः अभया-भयरहिता । किम्भूतया अङ्गप्रभया ? बह्वी शोभा यस्यां सा तया बहुशोभया । तथा यस्य आज्ञया सदृशी राज्यस्थितिः-राज्यव्यवस्था राजते-शोभते । किम्भूता राज्यस्थितिः ? अखण्डः-अप्रतिहतो नयः-षाड्गुण्यं सन्धिविग्रहयानासनद्वैधाश्रयरूपं यस्यां सा अखण्डनया । किम्भूतया आज्ञया ? न विद्यते खण्डनं-उल्लघनं यस्याः सा तया, तथा यस्य सेनया सह श्लाघनीया-वर्णनीया कृपाणयष्टिः-असिलता । किम्भूता कृपाणयष्टिः ? सत्-शोभनो जयो यस्याः सा तया सज्जया । किम्भूतया सेनया ? सज्जया-सन्नद्धया । "**सज्जौ सन्नद्धसम्भृतौ**" [२।७८ **अनेकार्थः**] ।

**यश्च सशृङ्गारो नारीषु, वीरो वैरिषु, सुबीभत्सुः[२] परदारेषु, रौद्रो द्रोहिषु[३], सहास्यो नर्मालापेषु, भयानकः संग्रामाङ्गणेषु, सकरुणः शरणागतेषु ।**

तथा **यश्च** राजा नारीषु सह शृङ्गारेण-सुरतेन रसभेदेन वा विद्यति इति सशृङ्गारः । "**शृङ्गारो गजमण्डने सुरते रसभेदे च**" [३।६५०] इत्य**नेकार्थः** । तथा वैरिषु-शत्रुषु वीरः-शूरस्तज्जेतृत्वात् । तथा परदारेषु सुष्ठु बीभत्सः-अहृद्यदर्शनः । तथा द्रोहिषु रौद्रः-भृकुटीकरणामर्षादिव्यंग्यरसविशेषवान् । तथा नर्म्मालापेषु-परिहासवाक्येषु सहास्यः-हास्यरसोपेतः । तथा सङ्ग्रामाङ्गणेषु भयानकः-भीष्मः, बिभेति अस्मादिति भयानकः, "**आनकः शीङ् भिय इति शेतेर्बिभतेश्चानकः स्यात्**, [ ] इति **उज्ज्वलदत्तः** । तथा शरणार्थमागतेषु नरेषु सकरुणः-सदयः । एवं शृङ्गारादिरसमयत्वमस्य निवेदितम् । शृङ्गारादिषु सप्तस्वपि पदेषु अद्भुतत्वादनुक्तोऽपि अद्भुतो ग्राह्यः । शान्तस्य च विरक्ता एवाधिकारिणोऽतस्तदनुक्तिः ।

**यस्य[४] चतुरुदधितटीटीकमानशरच्चन्द्रविशदयशोराशिराजहंसस्य, निस्त्रिंशता कृपाणेषु, कुचातुर्यं कलत्रेषु, कूपदेशसेवा[५] पापर्धिकेषु[६], लुब्धकपर्यायः कैवर्तकेषु[७], तीक्ष्णता शस्त्रेषु, धर्मच्छेदो धनुर्विद्यायाम् ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एवमस्य[१] हरस्येव करस्थं कृत्वाशेषमण्डलमनवरतविख्यातविजयाभिनन्दिनः[२], सुन्दरकैलासनाभिरम्यवनान्तरेषु विहरतः, मदननिरुद्धनैषधीपीनोच्चकुचकुम्भावष्टम्भमसृणित[३]वक्षःस्थलस्य सुखेनातिक्रामन्ति दिवसाः ।**

**यस्येति** । चतुरुदधितटीषु-चतुःसमुद्रकूलेषु टीकमानः-परिभ्रमन् शरच्चन्द्र-वद्विशदः-उज्ज्वलो यशोराशिरेव राजहंसो यस्य स, तत्रापि यद्यशो गीयत इत्यर्थः । तथाविधस्य यस्य-राज्ञः कृपाणेषु निस्त्रिंशता-खड्गत्वं । तथा कलत्रेषु-दारेषु कुचाभ्यामातुर्यं-पीडितत्वं, दुर्वहभरत्वात् । तथा पापर्द्धिकेषु-मृगयाभ्यासिषु कूपप्रदेशसेवा जलार्थं मृगादीनां तत्रागमनात् । तथा कैवर्तकेषु मत्स्यबन्धिषु लुब्धक इति पर्याया एकार्थं शब्दान्तरं । अत्र कैवर्तकेषु लुब्धकपर्यायत्वं सोल्लुण्ठं तस्य व्याधेषु **अभिधानकोषे**ऽ[१] भिधानात् । तथा शस्त्रेषु-प्रहरणेषु तीक्ष्णता-निशितत्वं । तथा धनुर्विद्यायां धर्मनामा द्रुमो यन्मयं धनुर्विधीयते तस्य छेदनं-कर्त्तनम् । एवं कृपाणादिष्वेव निस्त्रिंशतादीनां परि-संख्योक्ता, न तस्मिन्निति शेषः । तद्यथा—न तस्मिन् राज्ञि निस्त्रिंशता-क्रूरकर्मत्वं, तथा न कुत्सितचातुर्यं, तथा कुत्सित उपदेशः-प्ररूपणं येषां ते, कूपदेशाः-दाम्भिकास्तेषां सेवा-सेवनं न, तथा कुत्सितो लुब्धः-लुब्धकः "**कुत्सायां कः**" [ ] तस्य पर्यायः-परिणामो न, तथा तीक्ष्णता आयः शूलिकत्वं च न, तथा धर्मस्य-पुण्यस्य छेदो न ।

**एवं**-अमुना प्रकारेण अस्य-वीरसेनस्य सुखेन दिवसा अतिक्रामन्ति-गच्छन्ति । किम्भूतस्य ? अशेषं-समस्तं मण्डलं-देशं करे-राजभागे स्थितं-कृत्वा, करदं विधायेत्यर्थः । अनवरतं-निरन्तरं विख्यातविजयैः आनन्दतीत्येवंशीलः अनवरतविख्यातविजयानन्दी तस्य प्रथितविजयैर्हृष्टस्येत्यर्थः । पुनः किम्भूतस्य ? कं-जलं एला-लता असनः-पीतमालस्तैः सुन्दरैः कैलासनैः अभिरम्येषु-मनोज्ञेषु वनान्तरेषु-काननविशेषेसु विहरतः-विचरतः । तथा मदनेन निरुद्धाः-व्याप्ताः सकामा या नैषध्यः-निषधदेशोत्पन्नस्त्रियस्तासां पीनोच्चकुचकुम्भयोरवष्टम्भेन—आश्रयेण मसृणितं-सुकुमारीकृतं वक्षःस्थलं येन स तथा तस्य । कस्येव ? हरस्येव शम्भोरिव विहरणकृतमिह हरेण सहौपम्यम् । किम्भूतस्य हरस्य ? शेषं-शेषाख्यनागं मण्डलं-कुण्डलाकारं करस्थं-पाणिस्थितं कृत्वा सुन्दरो यः कैलासः-रजताद्रिस्तस्य नाभौ-मध्यभागे रम्याणि यानि वनान्तराणि तेषु विहरतः, नाभिर्मुख्यार्थो वा । पुनः किम्भूतस्य ? अनवरतं विख्यातौ-प्रसिद्धौ विजया-गौरी नन्दी च हरप्रतीहारस्तौ यस्य स तस्य । पुनः किम्भूतस्य ? मदनेन निरुद्धा या नैषधी-निषधस्य गिरेरर्थाद् हिमाद्रेरपत्यं स्त्री नैषधी-गौरी तस्याः कुचकुम्भयोरवष्टम्भेन मसृणितं वक्षःस्थलं यस्य स तथा तस्य ।

---

१. 'व्याधो मृगवधा जीवी लुब्धको मृगयुश्च सः' अभिधानचिन्तामणिनाममाला मर्त्यकाण्ड पद्य–९२७. । २. °कुच° नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदनेकार्थतलिकः-"निषधः कठिने देशे निषधे शेखरे गिरौ । हस्तके करिभेदे च ।" [३।५६] इति ।

**कदाचि[१]च्चतुरुदधिवेलावलयितवसुन्धराविख्यातमपत्यमभिलषन्नादरचरणाङ्गुष्ठनिष्ठ्यूतकैलासोन्मूलनागतपतद्दशवदनविरसविरुत-[२]विहसितामरमण्डलीमहितमहिमानमविरत[३]विरिञ्चि[४]विरचित[५]-विचित्रनामसामवस्तुस्तुतिमनवरत[६]सकललोककल्याणकामधेनुमनुपमवर्चसमर्चयांचकार भगवन्तमम्बिकापतिम् ।**

**कदाचित्**-कस्मिंश्चित्प्रस्तावे चतुरुदधिवेलाभिर्वलयिता-वेष्टिता या वसुन्धरा तस्यां विख्यातं-प्रसिद्धं अपत्यं-सन्तानं अभिलषन्-वाञ्छन् स-राजा भगवन्तं अम्बिकापतिं-महेशं अर्चयाञ्चकार-पुपूज । किम्भूतं शम्भुम् ? अनादरेण-अवहेलया चरणाङ्गुष्ठेन यन्निष्ठ्यूतं-निरसनं तेन कृत्वा कैलासोन्मूलनाय आगतः पतन् यो दशवदनः-रावणस्तस्य विरसा-परुषा या विरुतिः[१]- आरटनं तया विहसिता-हास्यं कुर्वती या अमरमण्डली-देवश्रेणिस्तया महितः-अर्चितः । महिमा अनुभावो यस्य स तम् । महतीशक्तिर्भगवतो येनाऽसौ रावणः कैलासोन्मूलनायाऽऽगतः, स्वचरणाङ्गुष्ठेन निरस्य आरटन् मुक्त इति अमरैः कृता स्तुतिः । **निष्ठापितपाठे** तु निःशेषेण स्थापनं, शेषं पूर्ववत् । तथा अविरतं-निरन्तरं विरिञ्चेन-ब्रह्मणा विरचिता-कृता विचित्रनामभिः-भर्गभवत्रिनेत्रादिभिः सामवस्तुभिश्च-सामवेदार्थैः स्तुतिर्यस्य स तम् । तथा अनवरतं-सततं सकलानि लोके यानि कल्याणानि तेषां पूरणे कामधेनुरिव यः स तथा तम् । तथा अनुपमं वर्चः-तेजो यस्य स तम् ।

**अतिभक्तितोषितहरलब्धवरश्च निरुपमरूपयानुरूपया च[७] रूपवत्यभिधानया प्रधानया[८] प्रियया सह मकरकेतनकेलि[९]मनुभवन्नतिचिरमासांचक्रे ।**

**अतिक्रामति तु कियत्यपि समये संपन्नसत्वा समपद्यत रूपवती ।**

**तेन च समस्त[१०]संसारवस्तूद्धृतकान्तिकणकलित[११]गर्भारम्भेण, नारायणनाभिरिव विरिञ्चो[१२]त्पत्तिकमलकन्दबन्धेन, कल्पपादपलतेव पल्लवारम्भोच्छ्वासेन, मनाङ्मेदुरितोदरा रराज राजीवनयना राजपत्नी[१३] ।**

**क्रमेण च मेचकोच्चचूचुककुचकुम्भकपोलिपाण्डिम्ना निम्नयन्ती**

---

१. विरतिः अनू. ।

**मृगलाञ्छनच्छायाम[1]वाच्छदच्छामृतपयःपिष्टमूर्तिमन्मधुसमयमदनमृगाङ्कमण्डलरसेनात्मानमालेप्तुम्[2] ।**

**अग्रतः सखीजनविधृतमपास्य मणिमयं[3]मुकुरमण्डलमनवरतनिशात[4]निर्मलकरवालतलेष्वात्ममुख[5]कमलमवलोकयांचकार ।**

**निरस्य [6]नीलोत्पलं जरठकण्ठीरवकण्ठकेसरस्तबकमकरोत्कर्णावतंसम् ।**

**अतिबहल[7]कुङ्कुमाङ्ककस्तूरिकापङ्कमपहाय मत्तमातङ्गमदकर्दमेन निजभुजशिखरयोर्विरचयांचकार विचित्रपत्रभङ्गान् ।**

ततः **अतिभक्त्या** तोषितः-प्रमोदितो यो हरस्तस्माल्लब्धः-प्राप्तो वरः-पुत्रप्राप्तिलक्षणो येन ईदृग्विधश्च स-राजा निरुपमं-अतुल्यं रूपं यस्याः सा तया, च-पुनः अनुरूपया-स्वस्य योग्यया रूपवत्यभिधानया प्रधानया-प्रकृष्टया प्रियया-दमितया सह मकरकेतनकेलिं-मन्मथलीलां अनुभवन्-आस्वादयन् अतिचिरं-चिरकालं आसाञ्चक्रेतस्थितवान् । तुरथार्थः ।

कियत्यपि समये **अतिक्रामति**-गच्छति सति रूपवतीप्रिया सम्पन्नसत्वा-सगर्भा समपद्यत-जाता ।

**तेन च** समस्तानि यानि संसारे वस्तूनि तेभ्य उद्धृताः-उच्चिता ये कान्तिकणाः-दीप्तिलवास्तैः कलितः-युतो यो गर्भारम्भः-दोहदलक्षणप्रथमोत्पत्तिस्तेन मनाक् मेदुरितं-मांसलं जातं उदरं यस्याः सा तथाविधा राजीववद्विशाले नयने यस्याः सा राजीवनयना राजपत्नी-राजमहिषी रराज-शुशुभे । केन ? केव ? विरिञ्चस्य-विधेः उत्पत्तये यत् कमलं तस्य यत्कन्दं-मूलं तस्य यो बन्धः-तदुत्पादकरसकणिकारूपस्तेन नारायणनाभिरिव । यथा नारायणनाभिर्विरिञ्चोत्पत्तिकमलकन्दबन्धेन मनाङ्मेदुरितोदरा राजते तथा तेन साऽपि । पुनः केन केव ? पल्लवारम्भस्य-किसलयप्रथमोत्पत्तेर्य उच्छ्वासः-औन्नत्यं तेन कल्पपादपलतेव, यथा तेन सा राजते तथा सा तेन रराज ।

**क्रमेण च**[1]-गर्भारम्भदिनादारम्य मेचके-कृष्णे उच्चे-उन्नते चूचुके यत्र ईदृशौ यौ कुचकुम्भौ तयोः कपोलपालेश्च-प्रशस्तगण्डस्य पाण्डिम्ना-धवलतया मृगलाञ्छनस्य-चन्द्रमसः[2] छायां-शोभां निम्नयन्ती तिरस्कुर्वती सती सा राज्ञी अच्छं-विमलं अमृतमेव यत्पयः-नीरं तेन पिष्टः-घृष्टो योऽसौ मूर्तिमतां मधुसमयमदनमृगाङ्कमण्डलानां रसस्तेन

---

१. च नास्ति अनू. । २. चन्द्रस्य अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आत्मानं आलेसुं-देग्धुं अवाञ्छन्-इयेष ववाञ्छ। कुचकुम्भस्य चन्द्रमाः, मेचकचूचुकस्य लाञ्छनमुपमानम्।

**अग्रतः**-पुरतः सखीजनेन विधृतं-गृहीतं मणिमयं-रत्नप्रधानं, प्राधान्ये मयट्, मुकुरमण्डलं-आदर्शतलमपास्य-अपनीय अनवरतं-सततं निशाताः-तीक्ष्णाः निर्मलाः-कालिकारहिता ये करवालाः-खड्गास्तेषां तलेषु-उपरिभागेषु आत्मनो मुखकमलं अवलोकयांचकार-ददर्श। एतावता गर्भस्य शौर्यवत्ता दर्शिता।

तथा **नीलोत्पलं**-सख्योपनीतं नीलकमलं निरस्य-अपनीय जरठः-चिरकालीनो यः कण्ठीरवः-सिंहस्तस्य कण्ठे यः केसरस्तबकः-रोमगुच्छस्तं कर्णावतंसं-कर्णशेखरमकरोत्।

तथा सख्योपनीतं **अतिबहलः**-अतिनिविडो यः कुङ्कुमः-घुसृणद्रवस्तस्य अङ्क-स्थानं तत्सहितमित्यर्थः। कस्तूरिकापङ्कमपहाय-परित्यज्य मत्तमातङ्गानां-दृप्तगजानां मदकर्दमेन निजभुजशिखरयोः-आत्मभुजाग्रयोर्विचित्राः-विविधा ये चित्रभङ्गाः-पत्रलतास्तान् विरचयाञ्चकार-व्यधात्। "**अङ्को भूषारूपकलक्ष्मसु। चित्राजौ नाटकाद्यंशे स्थाने क्रोडेन्तिकागसोः**" [२।१-२] इत्य**नेकार्थः**।

**एवं स्फुर[1]द्गर्भानुरूपदोहदसुखमनुभवन्ती कदाचिदुच्चस्थानस्थिते सौम्यग्रहग्रामे, महाराजजन्मोचितेऽह्नि शुभसंभार[2]कारणायां काल-केलायां[3] जातप्राये प्रभाते प्रभाप्रतानजनितपरिवेषमशेषतेजस्वितेजः-पुञ्जापहारिणमालोहितपादपल्लवोल्लसित[4]पङ्कजच्छायम्, द्यौरिव रवि-मण्डलम्, उन्नमन्मेघमालेव विद्युल्लोलम्, अरणिरिव वितानवैश्वानरम्, नरपालप्रिया प्रीणितगोत्रं पुत्रमजीजनत्।**

**एवं**-अमुना प्रकारेण स्फुरन्तः-प्रसरन्तो गर्भानुरूपाः-गर्भानुकुला ये दोहदाः-अभिलाषास्तेषां पूरणे यत्सुखं तदनुभवन्ती सा राज्ञी कदाचित् सौम्यग्रहग्रामे-बृहस्पत्यादिग्रहसमूहे उच्चस्थानेषु स्थिते सति। ग्रहाणां हि द्विविधमुच्चत्वं राशिकृतं भागकृतञ्च। तत्र प्रथमराशौ सूर्यस्योच्चता, दशभागेषु, वृषे शीतगोस्त्रिषु भागेषु, हरौ कुजस्याऽष्टविंशेषु भागेषु, कन्यायां बुधस्य पञ्चदशसु भागेषु, कर्के गुरोः पञ्चसु भागेषु, मीने शुक्रस्य सप्तविंशतिभागेषु, तुलायां शतेर्विंशतिभागेषु। तथा च ज्योतिःशास्त्रम्—

अजवृषमृगाङ्गनाकर्क-मीनवणिजांशकेष्विनाद्युच्चाः।
दशसि ख्यष्टाविंशति[1] तिथीन्द्रियत्रिघनविंशेषु॥" [ ]

---

१. दश शिख्यष्टाविंशति अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवमुच्चस्थानानि । ननु विषयादिष्वसंग्रहात्[1] ग्रामशब्दः कथं वृन्दार्थवाची ? इत्यत्रोच्यते– "**अथ ग्रामो वृन्दे शब्दादिपूर्वके । खड्गादौ संवसथे च**" [२।३२४-३२५] इत्य**नेकार्थः**। "**आदिशब्दात् विषयास्त्रभूतेन्द्रियगुणादिग्रहः**" [ ] इति **तट्टीका**यामादिशब्दग्रहादन्यस्मादपि ग्रामशब्दो वृन्दवाची घटत एव । तथा महाराजस्य जन्मन उचिते–योग्ये अह्रि-दिवसे, यस्मिन् दिने महाराजस्य जन्म भवेत् तथाविधे वासरे सर्वोत्कृष्ट इत्यर्थः । तथा शुभसम्मारस्य-कल्याणसमूहस्य कारणायां-जनयित्र्यां कालकलायां-कालविशेषे त्रुटितवादिरूपे "**सम्भारः सम्भृतौ गणे**" [३।६५२] इत्य**नेकार्थः** । तथा जातप्राये-अल्पशेषे प्रभाते नरपालप्रिया-राज्ञी प्रभाप्रतानेन-दीप्तिसमूहेन जनितः परिवेषः-परिधिर्येन स तं । तथा अशेषतेजस्विनां-समस्तदीप्तिमतां तेजःपुञ्जमपहरतीत्येवंशीलं अधिकतेजस्वित्वात् तान् विच्छायं कुर्वन्तमित्यर्थः । तथा आ-ईषत् लोहितौ यौ पादपल्लवौ तयोरुल्लसिता-उत्सर्पिता पङ्कजवच्छाया-शोभा यस्य स तथाविधं प्रीणितगोत्रं-हर्षितवंशं पुत्रं अजीजनत्-प्रासूत । का ? कमिव ? द्यौः-व्योमरविमण्डलमिव । यथा द्यौः प्रगे रविमण्डलं जनयति, तदपि दीप्तिततिकृतवेष्टनं तथा समस्तदीपप्रभृतितेजस्वितेजोमुषं, तथा आलोहिताः पादाः किरणा एव पल्लवास्तैरुल्लसिता पङ्कजच्छाया यस्मात् स तथाविधं च भवति । मण्डलं पुंस्यपि । पुनः कं केव ? विद्युतां लोलनं लोलः-विलासस्तं उन्नमन्ती-वर्षणार्थं कृतयत्ना मेघमालेव । यथा उन्नमन्मेघमाला विद्युल्लोलं जनयति । तथा वितानं-विशिष्टविस्तारं वैश्वानरं अरणिरग्निः-अघकाष्ठमिव[2] । यथा अरणिर्वितानवैश्वानरं जनयति । तननं तानो विस्तारः घञ् विशिष्टस्तानो वितानः । किम्भूतं रविमण्डलम् ? प्रीणितो गोत्रः-उदयाचलपर्वतो येन तं। विद्युल्लोलपक्षे, प्रीणितो गोत्राङ्गो समूहो[3] येन तं । वितानवैश्वानरपक्षे, प्रीणितगोत्रं-प्रीणितपृथ्वीकं । "**गोत्रं क्षेत्रेऽन्वये छात्रे सम्भाव्यबोधवर्त्मनोः । वने नाम्नि च गोत्रोद्रौ गोत्रा भुवि गवां गणे ॥**" [२।४२४] इत्य**नेकार्थः** ।

**तत्र च दिवसे-**

**सांशुकोन्नतवंशस्य तस्य राज्ञः पुरस्य च ।**
**बभूव लक्ष्मीः सा कापि यया स्वर्गोऽपि निर्जितः ॥ १० ॥**

यस्मिन् दिने स जातः **तत्र च दिवसे**–

**सांशुकेति** । तस्य राज्ञः-वीरसेनस्य पुरस्य च सा काऽपि-काचित् लक्ष्मीः-शोभा बभूव, यया शोभया स्वर्गच्छतीति कृत्वा स्वर्गो देवः-स्वर्गलक्षणो लोकश्च सोऽपि निर्जितः-जितः । राज्ञः श्रिया स्वर्गो देवो जितः, पुरस्य च श्रिया स्वर्गरूपो लोको जित इति।

१. असंग्रहात् ग्रहाद् अनू. । २. अरणिरग्नि मथनकाष्ठमिव अनू. । ३. प्रीणिता गोत्रा गोसमूहो अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**किम्भूतस्य राज्ञः** ? अंशुना-रविणा सह सांशुकः उन्नतः-उदयप्राप्तो वंशः-अन्वयो यस्य स तस्य रवेर्वंशस्य च तुल्यमुदयनमिष्टं, प्रगे तस्याऽपि उदितत्वात् । किम्भूतस्य पुरस्य ? सांशुकाः-सपताकाः उन्नताः-उच्छ्रिताः वंशाः-वेणवो यस्मिंस्तत्तस्य ।

**अपि च–**

**सवृद्धबालाः कालेऽस्मिन्मुक्ताहारविभूषणाः ।**
**प्राप्ताः प्रीतिं पुरे पौरा वनेषु च तपस्विनः ॥ ११ ॥**

**अपि चेति** पुनः–

**सवृद्धेति** । वृत्तम् । अस्मिन्काले-जन्मसमये पौराः-पुरवासिनो लोकाः प्रीतिं प्राप्ताः, वनेषु च तपस्विनः-तापसाः प्रीतिं प्रापुः । किम्भूताः पौराः ? वृद्धः-पितामहादिः बालः-पुत्रादिः ताभ्यां सह-युक्ताः सवृद्धबालाः, तथा मुक्ताहारा-मौक्तिकलता विभूषणं-अलङ्कारो येषां ते मुक्ताहारविभूषणाः । किम्भूताः मुनयः ? सह वृद्धबालैः-प्रलम्बकेशैर्वर्तन्त इति सवृद्धबालाः, कूर्चादिरसंस्कारात्, तथा मुक्तः-त्यक्तः आहारो यैस्ते मुक्ताहाराः, तथा व्यपेतानि भूषणानि-भूषा येभ्यस्ते पश्चात् कर्मधारयः ॥ ११ ॥

**सूतीगृहे च[१]–**

**अलंकृतनिशान्तेन तरुणारुणरोचिषा ।**
**प्रदीपानां प्रभा तेन प्रभातेनेव निर्जिता[२] ॥ १२ ॥**

**सूतीगृहे च**-अरिष्टे–

**अलमिति** । वृत्तम् । तेन-नलेन प्रभातेनेव प्रदीपानां प्रभा निर्जिता-जिग्ये । यथा प्रभातेन प्रदीपानां प्रभा जीयते तथा तेनाऽपि । किम्भूतेन तेन ? अलङ्कृतं-विभूषितं निशान्तं गृहं येन स तेन, तथा तरुणो यो अरुण[१]:-रविस्तरुणारुणः मध्याह्नार्कस्तद्वद् रोचिर्यस्य सः । अतएव महात्मनां हि भूयिष्ठेन तेजसा दीपप्रभाप्यभिभूयते । प्रभातेन तु अलं-अत्यर्थं[२] तरुणया[३]-नूतनया अरुणस्य-रविसारथेः, रोचिषा-कान्त्या कृतो निशायाः-रात्रेरन्तो येन । यदि वा, अरुणरोचिषा-लोहितकान्तिना तरुणा-वृक्षेण उपलक्षितेन प्रभातेन, तत्समये हि दिनकरकरस्पर्शतस्तरवो रक्ता भवन्तीत्यर्थः ॥ १२ ॥

**चिरात्पल्लवितं राजवंशेन, समुच्छ्वसितं राज्यश्रिया, प्रीतं प्रणयिभिः, प्रनृत्तं पौरैः, प्रमुदितं बान्धवैः, विद्राणं द्रोहिजनैः, उन्नदितं वियत्यदृष्ट-**

१. अरुणः नास्ति अनू. । २. अं अत्यर्थं नास्ति अनू. । ३. अरुणया अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**मङ्गलवादित्रैः, चित्रीयितमतिबहुल[१]परिमलपतत्पुष्पवृष्ट्या, विकसितं दिग्वधूवदनारविन्दैः, विलसितमतिसुरभिसुखस्पर्शसमीरणेन, स्वच्छन्दायितं बन्दीकृताराातिरमणीभिः, आढ्यायितमर्थिलोकैषु[२] ।**

तज्जन्मावसरे राजवंशेन-नृपान्वयेन चिरात् पल्लवितं-किसलयितं, वंशे हि पल्लवानां सम्भवात् । तथा राज्यश्रिया-राज्यलक्ष्म्या उच्छ्वसितं-उच्छ्वासः प्राप्तः । तथा प्रणयिभिः-स्नेहलैः प्रीतं तुतुषे । तथा पौरैः-पुरनिवासिभिः प्रनृत्तं-हर्षान्नृत्यं चक्रे । तथा बान्धवैः-स्वजनैः प्रमुदितं-हर्षः प्राप्तः । तथा द्रुह्यन्ति-विजघांसन्तीति[१] द्रोहिणस्त एव जना द्रोहिणजनास्तैः[२] विद्राणं-संकुचितं विशेषेण पलायितं वा । "**द्राल(द्रै) स्वप्ने पलायने च**" [पा० धा० ९७२ ] । तथा वियत्ति-व्योम्नि अदृष्टानि-अवीक्षितानि यानि मङ्गलवादित्राणि तेषां ध्वनिभिः-शब्दैरुन्नदितं-उल्लसितं, तदा अदृष्टान्येव वादित्राणि व्योम्नि अवादिषुः । तथा अतिबहुलः-अतिप्रचुरः परिमलः-आमोदो यस्यां ईदृशी पतन्ती-भूसम्बन्धं प्राप्नुवती[३] या पुष्पवृष्टिस्तया चित्रायितं भक्तिविशेषविन्यासायितं । तथा दिग्वधूनां यानि वदनारविन्दानि तैर्विकसितं-विकासः प्राप्तः, दिशः प्रसेदुरित्यर्थः, अरविन्दानां हि विकसनधर्मत्वात् । तथा सुखयतीति सुखः सुखकारी "पचाद्यच्" तथाविधः स्पर्शो यस्याऽसौ सुखस्पर्शः, अतिसुरभिः-सुगन्धिश्चासौ सुखस्पर्शश्च, तथाविधो यः समीरणः-वायुस्तेन विलसितं-विलासं[४] प्राप्तस्तेन, वातुं प्रवृत्तमित्यर्थः । तथा बन्दीकृताः-हठाद् गृहीता या अरिरमण्यः-शत्रुस्त्रियस्ताभिः स्वच्छन्दायितं-स्वच्छन्दाभिरिव आचरितं स्वच्छन्दायितं, कुमारजन्मोत्सवे हि गुप्तिमोक्षणात् बन्दीनां स्वाच्छन्द्यं । तथा अर्थिलोकैः-याचकजनैः आढ्यायितं-आढ्यैरिवाचरितं आढ्यायितं, धनवद्भिर्जातं । आढ्यत्वे त्यागातिशयो हेतुः ।

**किं बहुना—**

किम्बहुना-किम्बहूक्तेन—

**अवृष्टिनष्टधूलीकमशरन्निर्मलाम्बरम् ।**
**अपीतमत्तलोकं च जगज्जन्मोत्सवेऽभवत् ॥ १३ ॥**

**अवृष्टी**ति । वृत्तम् । तस्य जन्मोत्सवे जगदीदृशमभवत्-जातम् । किम्भूतम् ? अवृष्ट्या-वृष्ट्यभावेनाऽपि नष्टा धूलिर्यत्र तत्, अशरदा-शरत्कालाभावेनाऽपि निर्मलं-विशदं अम्बरं-नभो यत्र तत्, तथा पानं-पीतं "**भावे क्तः**" [      ] न पीतं अपीतं

---

१. जिघांसंतीति अनू. । २. द्रोहिजनाः अनू. । ३. आप्नुवती अनू. । ४. विलासः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुरापानभावस्तेन मत्तः-क्षीबो लोको यस्मिंस्तत् अपीतमत्तलोकं । अन्यथा हि वृष्ट्या धूली नश्यति, शरदाद्योरमलता, पानान्मदः, अत्र तु तदन्तरेणापि ईदृशं जगदजायत स तदुत्पत्तिप्रभावः ॥ १३ ॥

**भूते च विभवभूयिष्ठे षष्ठीजागरणव्यतिकरे, अतिक्रान्तेषु च सूतकदिवसेषु नामकरणोचितेऽह्नि[1] 'न [2]लास्यति धर्मधनान्येष[2] साधुभ्यः' इति ब्राह्मणाः[3] प्रविश्य तस्य 'नलः' इति नाम प्रतिष्ठापयामासुः ।**

**विभवेन**-धनेन भूयिष्ठः-प्रचुरो विभवभूयिष्ठस्तथाविधे देयबहुलधने इत्यर्थः । षष्ठीजागरणस्य महोत्सवे शेषस्य[1] व्यतिकरः-प्रस्तावस्तस्मिन् भूते च-जाते सति । तथा सूतकदिवसेषु अतिक्रान्तेषु-निवृत्तेषु सत्सु नाम्नः करणं-अभिधानदानं तस्योचिते-योग्ये प्रधाने अह्नि-दिवसे एषः-अर्भकः साधुभ्यः-ब्राह्मणादिभ्यो दत्तानि धम्मार्थधनानि[2]-धर्मधनानि न लास्यति-न ग्रहीष्यति इति हेतोः ब्राह्मणाः प्रविश्य-राजमन्दिरान्तःप्रवेशं विधाय तस्य-अर्भकस्य नल इति नाम प्रतिष्ठापयामासुः-निमित्तात् सामुद्रिकलक्षणात् जन्मलग्नाद्वा साधूनां धर्मधनाग्रहणे अन्तर्मुख अभिधायमाश्रित्य[3] 'नल' इति अभिधानं प्रतिष्ठितवन्त इत्यर्थः ।

**क्रमेण च चतुरुदधिवेलावनविकासोचितकीर्तिकुन्द[4]कन्दलैर्विश्वविश्वंभराभिलम्भ[5]लम्पाकैः कुमारसेवकैरिव सकलचक्रवर्त्ति चिह्नैरलङ्कृतावयवो[6] विस्तर[7]जटालवालः कल्पपादपाङ्कुर इव वर्धितु-आरभत ।**

**विरचितचूडाकरणादिसंस्कारक्रमश्च प्राप्ते विद्याग्रहणसमये[8] निमित्तमात्रीकृतोपाध्यायः स्वयमेव समस्ता[9]नवद्यविद्याम्भोनिधेः परंपारमवाप ।**

**क्रमेण च**-दिनपक्षादिपरिवर्तनपरिपाट्या स नलः कल्पपादपाङ्कुर इव वर्द्धितुमारभत-प्रावर्त्तत । किम्भूतो नलः ? विस्तरन्तः-प्रसरन्तो जटालाः-स्वभावजटाबन्धाः बालाः-कचा, यस्य स, वृत्तचूडाकरणे हि केशा विजटी भवति । किम्भूतः कल्पपादपाङ्कुरः ? विस्तरन्त्यो जटामूलानि यस्मिन्नेवंविध आलवालः-तरुमूलकृतोदकाधारगर्भो[4] यस्य सः, प्रसरन् मूलालवालः । पुनः किम्भूतः ? सकलानि-समस्तानि यानि चक्रवर्त्तिचिह्नानि-रेखारूपाणि चक्रचापकुलिशादीनि तैः अलङ्कृताः-विभूषिता, अवयवाः-हस्तपादादयो यस्य स अलङ्कृतावयवाः[5] । राजचिह्नैः कैरिव ? उत्प्रेक्ष्यते, कुमारसेवकाः-

---

१. महोत्सवविशेषस्य अनू. । २. धर्मार्थं अनू. । ३. अन्तर्मुखमभिप्रायं अनू. । ४. °दकाधारगर्त्तो अनू°. । ५. अलंकृतावयवः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

युवराजानुचरास्तैरिव, तदुपमैरित्यर्थः । मन्ये, अमूनि राजचिह्नानि न भवन्ति किन्तु अमी युवराजानुचरा इति । किम्भूतैः राजचिह्नै : ? चतुरुदधिवेलावनानां–चतुःसमुद्रतटकाननानां विकाशाय–प्रकाशनाय उचितः–योग्यः कीर्त्तिरेव कुन्दः–पुष्पविशेषस्तस्य कन्दला इव–प्ररोहा इव यानि तानि तथा तैः । पुनः किम्भूतैः ? विश्वस्याः–समस्ताया विश्वम्भरायाः–भुवः योऽभिलम्भः–प्राप्तिस्तस्मै लम्पाकानि–लम्पटानि लालसानि यानि तानि तथा तैः, विश्वविश्वम्भराभोगदायिभिरित्यर्थः । कुमारसेवका अपि एवंविधा एव भवन्तीति ।

तथा चूडाकरणं–सांवत्सरिकस्य काकचूडाख्यं कर्म तदादौ यस्य एवंविधो यः संस्कारक्रमः–व्रतबन्ध–व्रतादेश–व्रतविसर्गादिकर्मपरिपाटी[१] चूडाकरणादिसंस्कारक्रमः विरचितः–कृतः चूडाकरणादिसंस्कारक्रमो यस्य स, ईदृग्विधश्च स नलः विद्याग्रहणस्य–शास्त्राध्ययनस्य समये–अवसरे प्राप्ते निमित्तमात्रीकृत उपाध्यायः–पाठको येन स, उपाध्यायस्य आयासमनुत्पादयन् सन् स्वयमेव समस्ता अनवद्याः–निर्दोषा या विद्या–आन्वीक्षिक्यादयस्ता एव दुर्लभपरभागत्वात् अम्भोनिधिः–समुद्रस्तस्य परं–उत्कृष्टं पारं–परतीरं[२] अवाप, समस्ता अपि विद्या अधीतवानित्यर्थः ।

**तथाहि–**

तथा हीति । उक्तमेव दर्शयति–

**प्रबुद्धबुद्धिर्बौद्धे[१], सविशेषशेमुषीको वैशेषिके, विख्यातः सांख्ये, रञ्जितलोको लोकायिते[२], प्राप्तप्रभः[३]प्राभाकरे[४], [५]प्रतिच्छन्दकश्छन्दसि, अनल्पविकल्पः कल्पज्ञाने[६], शिक्षाक्षमः शिक्षायाम्, अकृतापशब्दः शब्दशास्त्रे, अभियुक्तो निरुक्ते, सज्जो ज्योतिषि, तत्त्ववेदी वेदान्ते, प्रसिद्धः सिद्धान्तेषु[७], स्वतन्त्रस्तन्त्रीवाद्येषु[८], पटुः पटहे, अप्रतिमल्लो झल्लरीषु, निपुणः पणवेषु, प्रवीणो वेणुषु[९], चित्रकृच्चित्रविद्यायाम्, उद्दामः कामतन्त्रे[१०], कुशलः शालिहोत्रे[११], श्रेष्ठः काष्ठकर्मणि, सावलेपो लेप्ये, पण्डितः कोदण्डे, शौण्डः शारिषु[१२], गुणवान्गणिते[१३], बहुलो[१४] बाहुयुद्धेषु[१५], चतुरश्च[१६]तुरङ्गद्यूतक्रीडायाम्, उपदेशको देश[१७]भाषासु, अलौकिको लोकज्ञाने ।**

**बौद्धे**–बुद्धशास्त्रे प्रबुद्धा–जागरुका स्फुरन्ती बुद्धिर्यस्य स प्रबुद्धबुद्धिः, बौद्धशास्त्रावगन्तेत्यर्थः । तथा वैशेषिके–काणादशास्त्रे सविशेषा–तत्त्वपर्यालोचनसहिता

---

१. व्रतविसर्गाकर्मपरिपाटी अनू. । २. पर नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शेमुषी-मतिर्यस्य स । तथा सांख्ये-कपिलशास्त्रे विख्यात:-प्रसिद्ध:, सांख्यशास्त्रवेत्तेत्यर्थ: । तथा लोकायिते-चार्वाकशास्त्रे रञ्जित:-आवर्जित: प्रमोदितो लोको येन स रञ्जितलोक:, बार्हस्पत्यशास्त्रे प्रवीण इत्यर्थ: । तथा प्राभाकरे-प्रभाकरशास्त्रे प्राप्ता प्रभा-स्फूर्तिर्येन स प्राप्तप्रभ: । तथा चित्रवृत्तलक्षणं छन्दस्तस्मिन् प्रतिच्छन्दक:-प्रतिबिम्ब छन्दस्तत्प्रतिभायां प्रतिभातमित्यर्थ:, तथा कल्प:-पितृदेवताद्याराधनविधिशास्त्रं तस्य ज्ञाने अनल्प:-बहु: विकल्प:-वितर्को यस्यासौ अनल्पविकल्प: । तथा अकारादिवर्णजन्मस्थानानां कण्ठताल्वादीनां बोधिका शिक्षा तस्यां विषये शिक्षा-शिक्षणं तत्र क्षम:-समर्थ:, सर्वाक्षरोत्पत्तिस्थानविनेतेत्यर्थ: । तथा शब्दशास्त्रे व्याकरणे न कृत: अपशब्द:-विपरीतशब्दो येन स: नापशब्दभाषीत्यर्थ: । अपशब्देत्यत्र अपशब्दो विपरीतार्थ: । यदुक्तं प्रसादे—

**"आपो वियोगे निकृतौ विपरीते निदर्शने ।**
**आनन्दे वर्जने चौर्ये वारणे सम्यगीरित: ॥ १ ॥"** [ ]

**अपयाति, अपकृतवान्, अपशब्द:, अपदिशति, अपहसति, अपत्रिगर्त्ता दृष्टो देव:, अपहरति, अपसरतीति** ।" तथा अन्वर्थस्य प्रकाशकं निरुक्तं तत्र अभियुक्त:-उपयोगी । तथा अतीन्द्रियशुभाशुभप्रकाशकं[१] ज्योतिषं "**अर्श आदित्वादच्**" [ ] तस्मिन् सज्ज:-सावधान:, परिच्छेत्तेत्यर्थ: । तथा वेदान्ते-शास्त्रविशेषे तत्त्वं वेत्तीत्येवंशीलस्तत्त्ववेदी, रहस्यपरिज्ञाता । तथा सिद्धान्तेषु-मूलशास्त्रेषु प्रसिद्ध:-ख्यात: । तथा तन्त्रीवाद्येषु-वीणावादित्रेषु स्वतन्त्र:-परानपेक्ष:, स्वयमेव वीणां वादयतीत्यर्थ: । तथा पटहेषु-पटहवादनेषु पटु:-कुशल: । तथा झल्लरीषु-झर्झरीषु अप्रतिमल्ल:-अनन्यसदृश:, झल्लर्या: सम्यक्वादयितेत्यर्थ:। तथा पणवेषु-वाद्यविशेषेषु निपुण:-निष्णात: । पणवेष्विति "**पणि व्यवहारस्तुत्यो:, वडिचटिपेलृचणि-पणिपल्लिवल्लेरव**" [ ] इति पणेरव-प्रत्यय:' । औणादिक: । तथा वेणुषु-शुषिरवंशेषु प्रवीण: । तथा चित्रविद्यायां-आलेख्यशास्त्रे चित्रकृत्-आश्चर्यकर्त्ता, सम्यक्चित्रयितेत्यर्थ: । तता कामतन्त्रे-कामशास्त्रे[२] उद्दाम:-उत्कटस्तत्र प्रवीण इत्यर्थ: । शालिहोत्रे-अश्वलक्षणशास्त्रे कुशल:-चतुर: । तथा काष्ठकर्मणि-काष्ठतक्षणे श्रेष्ठ:-उत्तम: । तथा लेप्ये-लेपनकर्मणि सावलेप:-सगर्व:, सम्यक्लेसेत्यर्थ: । तथा कोदण्डे-धनुर्विद्यायां पण्डित: । तथा शारिषु-द्यूतोपकरणेषु शौण्ड:-विख्यात: । "**शौण्डो विख्यातमत्तयो:**" [२।१३०] **इत्यनेकार्थ:**। तथा गणिते-संख्याशास्त्रे गुणवान्-कुशल: । तथा बाहुयुद्धेषु बहुल:-प्रचुर:, भूरिबाहुयुद्धकर्त्तेत्यर्थ:। तथा चतुरङ्गद्यूतक्रीडायां-चतुरङ्गाभिधद्यूतविशेषे चतुर:-निपुण: । तथा देशानां या भाषा-वाग्विशेषास्तासु उपदेशक:-वक्ता । तथा लोकज्ञाने-विश्वविशेषपरिच्छेदे अलौकिक:-लोकोत्तर: प्रधान उत्यर्थ: ।

---

१. शुभाशुभकर्मणां प्रकाशकं अनू. । २. कामशास्त्रे नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किं बहुना–

रसे रसायने ग्रन्थे शस्त्रे शास्त्रे कलास्वपि ।
नले न लेभिरे लोकाः प्रमाणं निपुणा अपि ॥ १४ ॥

**किम्बहुना**-किम्बहूक्तेन–

**रसेति** । वृत्तम् । रसः-पारदः, रसायनं-जरामरणापह औषधयोगः, ग्रन्थः-काव्यशास्त्रादिरचना, शस्त्रं-खड्गादि, शास्त्रं-व्याकरणतर्कादि, कला-गीतनृत्यादिका एतेषु निपुणा अपि सन्तो लोका नले राज्ञि प्रमाणमियत्तां अर्थाद्रसादीनामेव न लेभिरे-न प्रापुः । एतावद्रसादिपरिज्ञानमस्यास्तीत्येवं नाज्ञासिषुः, अतिशयेन रसादिपरिच्छेत्तेत्यर्थः ॥ १४ ॥

क्रमेण च शैशवमतिक्रामतोऽस्य सेवकैरिवाङ्गावयवैरप्यनुवृत्तिः कृता ।

तथाहि–

श्रवणासक्तस्य तस्य[१] लोचनद्वयमपि श्रवणसंगति[२]मकरोत् ।

उन्नतस्वभावस्य नासावंशोऽप्युन्नतिं जगाम ।

वक्रोक्तिकुशलस्य केशकलापोऽपि वक्रतां भेजे ।

शङ्खनिर्मलगुणस्य कण्ठोऽपि शङ्खाकारमधारयत् ।

पृथुलमतेरंसकूटद्वयमपि पृथुलमभूत् ।

प्रमाणवेदिनो[३] वक्षःस्थलमपि सुप्रमाणमजायत[४] ।

मध्यस्थस्य तस्य रोमराजिरपि मध्यस्थिता[५] शुशुभे ।

सुवृत्तस्य बाहूरुयुगलमपि सुवृत्तमभवत् ।

गम्भीरप्रकृतेर्तस्य[६]नाभिरपि गम्भीरा व्यराजत ।

पल्लवसुकुमारहृदयस्य करचरणैरपि[७] पल्लव[८]सौकुमार्यमङ्गीकृतम् ।

**क्रमेण** च-दिनपक्षमासादिपरिपाट्या शैशवं-बालत्वं अतिक्रामतः-मुञ्चतो अस्य-नलस्य अङ्गावयवैः-शरीरावयवैर्नेत्रादिभिरनुवृत्तिः-अनुगामित्वं कृता । यथा अनेनाक्रियत तदा[१] तदङ्गावयवैरपि । कैरिव ? सेवकैः-अनुचरैरिव । यथा अनुचरैः राज्ञोऽनुवृत्तिः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्रियते, यदि राजा गच्छेत्तदा तेऽपि गच्छन्ति, यदि तिष्ठेत्तदा तेऽपि तिष्ठन्तीत्येवमनुगमनं कुर्वन्ति तथाऽङ्गावयवा अपि ।

**तथाहीति** । तमेवानुवर्त्तन प्रकारमाह—

**श्रवणे**-शास्त्राकर्णने आसक्तः-लग्नो यः स तस्य नलस्य लोचनद्वयमपि श्रवणसङ्गतिं-कर्णसम्बन्धमकरोत्, आकर्णान्तं लोचनद्वयागमनस्य प्रशस्यलक्षणत्वात् । अनुवृत्तिस्तु सर्वत्र तुल्यार्थे व्याख्येया ।

तथा **उन्नतः**-उदारः स्वभावो यस्य स, तस्य नासावंशोपि नासिकादण्डोऽपि-औन्नत्यं जगाम । यदि अस्मत्स्वाम्युन्नतस्वभावस्तर्हि मयाप्युन्नतेनैव भाव्यमिति वितर्क्य नक्रमप्युन्नतं जातम् ।

तथा **वक्रोक्तौ**-भङ्गश्लेषोक्तौ कुशलः-चतुरो यः स, तस्य नलस्य केशपाशोऽपि-प्रशस्तकेशसमूहोऽपि वक्रतां-कुटिलतां भेजे-शिश्राय । यद्यसौ वक्रोक्तिषु कुशलस्तर्हि अस्माभिरपि वक्रैर्भाव्यमिति केशा अपि वक्रा बभूवुः ।

तथा **शङ्खवत्**-कम्बुवन्निर्मलाः-विशदा, गुणा यस्य स तस्य-नलस्य कण्ठोऽपि शङ्खाकारं-शंङ्खवद् रेखात्रयमधारयत्-बभार । यद्यसौ शङ्खवन्निर्मलगुणस्तर्हि मयाऽपि शङ्खाकृत्यैव भाव्यमिति कण्ठोऽपि शङ्खाकारमभजत् ।

तथा **पृथुला**-विशाला मतिः-बुद्धिर्यस्य स तस्य पृथुलमतेर्नलस्य अंसकूटद्वयमपि-स्कन्धशिखरद्वन्द्वमपि पृथुलं-विशालं अभूत् । यद्यस्य मतिर्विशाला तदा मयापि विशालेनैव भाव्यमिति स्कन्धकूटद्वयमपि विशालमभूत् । कूटशब्दः शिखरार्थः ।

तथा **प्रमाणं**-तर्कशास्त्रं वेत्त्यवश्यमिति प्रमाणवेदी तस्य प्रमाणवेदिनो नलस्य वक्षःस्थलमपि सुष्ठु, प्रमाणं-मानं यस्य तत् सुप्रमाणं अजायत । यद्यसौ प्रमाणवेदी तर्हि अहमपि सुप्रमाणं भविष्यामीति आकलय्य हृदयेनाऽपि सुप्रमाणता अश्रियत ।

तथा **मध्यस्थस्य**-अकृतपक्षपातस्य तस्य-नलस्य रोमराजिरपि मध्ये-उदरे तिष्ठतीति मध्यस्था शुशुभे-रराज । यद्यसौ मध्यस्थस्तदा मयापि मध्यस्थया भाव्यमिति रोमराजिरपि माध्यस्थ्यमाप ।

तथा शोभनं वृत्तं-शीलं यस्य स तस्य नलस्य बाहूरुयुगलमपि-भुजसक्थिद्वन्द्वमपि सुष्ठु वृत्तं-वर्त्तुलमभवत् ।

तथा **गम्भीरा**-अस्ताधा प्रकृतिः-स्वभावो यस्य स गम्भीरप्रकृतिः-अलक्ष्यकोप-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रसादस्तस्य नलस्य नाभिरपि गम्भीरा-निम्ना व्यराजत-शुशुभे ।

तथा **पल्लव**वत्-किसलयवत् सुकुमारं-कोमलं सकरुणं हृदयं-चेतो यस्य स तस्य नलस्य करचरणैरपि पल्लववत् सौकुमार्यमङ्गीकृतं-मार्दवं स्वीचक्रे ।

**अथ[1] किं बहुना—**

**सोष्णीषमूर्धा ध्वजचक्र[2]पाणिरूर्णाङ्कविस्तीर्णललाटपट्टः ।**
**सुस्निग्धमूर्तिः ककुदुन्नतांसः कस्यैष न स्यान्नयनाभिरामः ॥ १५ ॥**

**अथ किम्बहु**ना-अश किम्बहूक्तेन-

**सोष्णीषे**ति वृत्तम् । एष-नलः कस्य-नरस्य नयनाभिरामः-नेत्रसुखकृन्न स्यात् ? किम्भूतः । उष्णीषाकारं-मुकुटाकारं शारीरिकं लक्षणं उष्णीषं, उष्णीषेण सह-युक्तो मूर्धा-शिरो यस्य स सोष्णीष मूर्धा, तथा ध्वजचक्रे रेखारूपे पाणौ यस्य स ध्वजचक्रपाणिः, तथा ऊर्णा-भ्रूमध्ये शुभरोमावर्त्तः **"स्वार्थे कः"** [ ] ऊर्णाकेन उपलक्षितो विस्तीर्णः-विशालो ललाटपट्टः-अलिकं यस्य स, तथा सुष्ठु-अतिशयेन स्निग्धा-अरूक्षा मूर्त्तिः-शरीरं यस्य सः, तथा ककुदवत्-वृषस्कन्धवत् उन्नतौ-मांसलौ अंसौ-स्कन्धौ यस्य सः ॥ १५ ॥

**अपि च—**

**आस्यश्रीः संनिभेन्दोः समदवृषककुद्बन्धुरः स्कन्धसंधिः,**
**स्निग्धा रुक्कुन्तलानामनुहरति दृशोर्द्वन्द्वमिन्दीवरस्य ।**
**स्थानं वक्षोऽपि लक्ष्म्याः स्पृशति भुजयुगं जानुनी वृत्तरम्ये,**
**जङ्घे क्षामोऽवलग्नः[3] किमु निषधपतेः श्लाघनीयं न तस्य ॥१६ ॥**

**अपि च**-पुनः—

**आस्ये**ति । तस्य निषधपतेः-नलस्य किमु-किं न श्लाघनीयं-न वर्णनीयं ? अपि तु सर्वमपि । तद्यथा—यस्य आस्यश्रीः-मुखलक्ष्मीः इन्दोः-चन्द्रस्य सन्निभा-सदृशी, आह्लादकत्वात् । तथा यस्य स्कन्धसन्धिः-अंसभागः समदः-दृप्तो यो वृषस्तस्य ककुदवत्-स्कन्धवत् बन्धुरः-रम्यः । ककुच्छब्देनैव वृषस्कन्धे प्राप्तेऽपि वृषग्रहणं हयहेषितादिवदुक्तपोषकत्वान्न दुष्टम् । तथा यस्य कुन्तलानां-केशानां रुक्-कान्तिः स्निग्धा-चकचकायमाना । तथा यस्य दृशोर्द्वन्द्वं इन्दीवरस्य-पद्मस्य अनुहरति-अनुकरोति, तत्समं विशालं वर्त्तत इत्यर्थः । तथा यस्य वक्षोऽपि लक्ष्म्याः-शोभायाः स्थानं-आश्रयः । तथा

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भुजयुगं जानुनी स्पृशति दीर्घत्वात् । तथा यस्य जङ्घे वृत्ते-वर्त्तुले ये ते रम्ये च वृत्तरम्ये। तथा यस्य अवलग्नो मध्यप्रदेशः क्षामः-तनुः ॥ १६ ॥

**अस्ति च तस्य नरपतिसूनोः समानशीलवयोविद्यालंकारकान्ति-कला[१]कलापरि[२]पूर्णदेहः शरीरमात्रद्वितीयोऽप्यद्वितीयं[३] हृदयमेकं जीवितमपर उच्छ्वासः सालङ्कायनसूनुः श्रुतशीलो नाम मन्त्री मित्रं च[४] ।**

**अस्ति चेति** । तस्य नरपतेः सूनोः-नलस्य सालङ्कायनस्य मन्त्रिणः सूनुः श्रुतशीलो नाम मन्त्री-सचिवो मित्रं च-सखा अस्ति-विद्यते । किम्भूतः ? समानः-तुल्यो यः शील च-सद्वृत्तं, वयश्च-कालावस्था, विद्याश्च-शास्त्राणि, अलङ्काराश्च-विभूषणानि, कान्तिश्च-देहदीप्तिः, कला च-गीतनृत्यादिका तासां कलापः-समूहस्तेन परिपूर्णः-व्याप्तो देहो यस्य सः, तत्समानशीलादियुत इत्यर्थः । तथा शरीरमात्रेण-शरीरेणैव द्वितीयोऽपि अद्वितीयं अभिन्नं हृदयं-चित्तं एकं जीवितं प्राणाः, अपर इति न परोऽस्मादिति अपरः-उत्कृष्टः, यद्वा, अपरः-अनन्य उच्छ्वास-परस्परं स्नेहलत्वादित्यर्थः ।

**एकदा तु पूर्वदिग्वधूकुङ्कुमपङ्कपल्लवितवदनायमाने निरुद्धान्धतमसे[५] सौगन्धिकबन्धुनि बन्धूककुसुमारुणे वियति तरतीव तरुणतरे तरणिमण्डले, मण्डयति कुसुम्भकुसुम[६]केसरप्रकरायमाणे[७] गगनाङ्गणमम्भोजमुकुल-निद्रा[८]मुषि रोचिषां चये, चलिते च चरितु[९]मुपवनतरुराजिकर्णोत्पले निद्राविरामविधुत[१०]पक्षे पक्षिकुले, कृतप्राभातिकर्मणः सभामणि-[११]मण्डप[१२]मध्यवर्तिनो दत्तसेवावसरस्य राज्ञः प्रविष्टे मन्त्रिणि सालङ्कायने, प्रणामपर्यस्तकर्णोत्पलधवलित[१३]सभाङ्गणे यथासनमुपविष्टे प्रस्तुत-सेवालापरञ्जितराजनि राजन्यचक्रे, प्रक्रान्ते शास्त्रीयविनोदे, श्रुतशीलेन सममन्यैरपि[१४] क्रीडासहायैरनुचरैरनुगम्यमानो नलः सेवासुखमनुभवितु-मागतवान् ।**

**आगत्य च क्षितितलमिलन्मौलिमण्डलः प्रणम्य पितुः पादारविन्द-[१५]द्वयमदूरदत्तमासनं[१६] भेजे ।**

**एकदा** तु-एकस्मिन् कस्मिंश्चित्प्रस्तावे एवमेवं जायमाने सति श्रुतशीलेन समं अन्यैरपि क्रीडासहायैः-केलिसखैरनुगम्यमानः-अनुश्रियमाणो नलः सेवासुखं-पितृ-पर्युपास्तिसौख्यं अनुभवितुं-अनुशीलयितुं आगतवान् । क्व सति ? एवंविधे तरुणतरे-प्रत्यग्रे

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तरणिमण्डले-रविबिम्बे सति । किम्भूते ? उत्प्रेक्ष्यते, वियति-आकाशे तरतीव उन्मज्जतीव। पुनः किम्भूते तरणिमण्डले ? पूर्वदिग्वध्वाः कुङ्कुमपङ्केन-घुसृणकर्दमेन पल्लवितं-किसलयितं रक्तजातमित्यर्थः। यद्वदनं-मुखं तदिवाचरत् पूर्वदिग्वधूकुङ्कुम-पङ्कपल्लवितवदनायमानं यस्मिन्[१]। मन्ये, प्राचीनवध्वाः कुङ्कुमद्रवलिप्तं वदनमिति । तथा निरुद्धं-अपाकृतं अन्धतमसं-अन्धकारं येन तत् तथाविधे, "**अवसं अन्धेभ्यस्तमसः**" [पा० सू० ५।४८७९] इति अन्धशब्दात्तमसोऽच् । तथा सौगन्धिकानां-कल्हाराणां बन्धुरिव-भ्रातेव विकासकत्वाद् यत्तत्तथाविधे । तथा बन्धूककुसुमवत्-बन्धुजीवकपुष्पवत् अरुणे-लोहिते । पुनः क्व सति ? रोचिषां चये दिनकरकरनिकरे गगनाङ्गणं-नभस्तलं मण्डयति-भूषयति सति। किम्भूते रोचिषां चये ? कुसुम्भकुसुमानां यानि केसराणि-किञ्जल्कानि तेषां यः प्रकरः-पटलं स इव आचरन् रक्ताभत्वात् कुसुम्भकुसुमकेसरप्रकरायमाणस्तस्मिन् । तथा अभोजमुकुलानां-पद्मकुड्मलानां निद्रां-संकोचं मुष्णाति-हर अभोजमुकुलनिद्रामुट् तस्मिन्, अभोजविकासकारिणीत्यर्थः । पुनः क्व सति ? पक्षिकुले-*पतत्रिपटले उपवने-कानने चरितुं-विहर्त्तुं चलिते सति । किम्भूते पक्षिकुले*? तरुराजेः-वृक्षश्रेणेः कर्णोत्पलमिव-अवतंसपद्ममिव यत्तत्तस्मिन्, तत्प्रान्ते निविष्टत्वात् तेषाम् । तथा निद्राविरामेण-तन्द्राव्यपगमेन विधुतौ-कम्पितौ पक्षौ-पक्षती येन तत्तस्मिन् । पुनः क्व सति ? राज्ञः-वीरसेनस्य सालङ्कायने मन्त्रिणि प्रविष्टे सति, प्रकरणात् राजसभान्तः । किम्भूतस्य राज्ञः ? कृतं प्राभातिकं-प्रभातसमये भवं कर्म-सन्ध्यावन्दनादि येन स तस्य, प्राभातिकेति "**अध्यात्मादित्वाट्ठञ्**" [पा० सू० वा० शैषिक०]। तथा सभायां यो मणिमण्डपः-मणिनिर्मित आश्रयः तस्य मध्ये वर्तितुं शीलं यस्याऽसौ सभामणिमण्डपमध्यवर्ती तस्य सभायां निषण्णस्येत्यर्थः। अतः[२] पुनः किम्भूतस्य ? दत्तः सेवाया अवसरो येन स तस्य, यदुत भवद्भिर्मम सम्प्रति सेवा विधेयेति। पुनः क्व सति ? राजन्यचक्रे-नृपसमूहे यथासनं यद्यस्मै आसनं प्रदत्तमस्ति तत् अनतिक्रम्य यथासनं स्वस्वपीठं उपविष्टे-निषण्णे सति **राजश्वशुराद्यदिति** [पा. सू. ४/१/१३७] अपत्येऽर्थे यत् राजन्यः-क्षत्रियः। किम्भूते राजन्यचक्रे ? प्रणामेन-नृपाय नमस्कारेण पर्यस्तानि-पतितानि यानि कर्णोत्पतानि तैर्धवलितं-पाण्डुरीकृतं सभाङ्गणं येन तत्तस्मिन्, यदा ते नृपतिं प्रणेमुस्तदा तेषां कर्णेभ्यः श्वेतकर्णोत्पलानि पेतुः, ततः शुभ्रं राजाङ्गणं बभूव । पुनः किम्भूते ? प्रस्तुतः-प्रारब्धो यः सेवालापः-चाटुवाक्यं तेन रञ्जितः-आवर्जितो राजा-वीरसेनो येन तत्तथा तस्मिन् । पुनः क्व सति ? शास्त्रीयः-शास्त्रसम्बन्धी यो विनोदः-क्रीडास्थानं सुभाषितादिस्तस्मिन् प्रक्रान्ते-आरब्धे सति ।

**आगत्य** च क्षितितले मिलत्-संयुज्यमानं मौलिमण्डलं-मस्तकं यस्य स तथाविधः

१. तस्मिन् अनू. । *-* चिह्नान्तर्गतपाठो नास्ति अनू. । २. अतएव अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सन् पितुः पादारविन्दद्वयं प्रणम्य-प्रकर्षेण नत्वा अदूरदत्तं-राज्ञो निकटे वितीर्णं आसनं-पीठं भेजे-शिश्राय ।

**उपविष्टे च[१] तस्मिन्ननभिवादनादुत्पन्नमन्युरीषत्कोपकम्पित-[२]करपरामृष्टकूर्चाग्रिमग्रन्थिरग्रणी[३]र्मन्त्रिमण्डलस्य भ्रूभङ्गभीषणया शोण-कोणान्तरतरत्तरलतारया दृशाऽभिमुखमस्यावलोक्य[४] सालङ्कायनः प्रणय-परुषाक्षरमभाषत ।**

तस्मिन्-नले उपविष्टे च सति अनभिवादनात्-आत्मनोऽप्रणामात् उत्पन्नः-जातो मन्युः-कोपो यस्य सः, ईदृग्विधः सन् सालङ्कायनः पैतृको मन्त्री भ्रूभङ्गेन-भ्रुकुटीकरणेन भीषणा-रौद्रा तया दृशा अस्य-नलस्य अभिमुखं-सम्मुखमवलोक्य शिक्षाबुद्ध्या प्रणयेन-स्नेहेन परुषाक्षरं-रूक्षवर्णं यथा भवति तथा अभाषत-अवादीत् । किम्भूतः सालङ्कायनः ? ईषत्कोपेन-मनाङ् मन्युना कम्पितः-चलितो यः करस्तेन परामृष्टः-स्पृष्टः कूर्चस्य-श्मश्रुरोम्णा[१] अग्रिमग्रन्थिः-प्रान्तभागो येन सः । पुनः किम्भूतः ? मन्त्रि-मण्डलस्य-सचिववृन्दस्य अग्रणीः-मुख्यः । किम्भूतया दृशा ? शोणकोणान्तरे-रक्तनेत्रप्रान्तरूपावकाशे तरला-चपला तरन्ती-विलसन्ती तारा-कनीनिका यस्याः सा तया ।

अथ यदवादीत्तदाह--

**'कुमार, राजहंसोऽपि 'अहंसरूपः' इति मा स्म मोहवान्भूः ।**

**अनुभवति च मूढः शस्त्रसंघात इव कोशशून्यताम् ।**

**अविभवः पुरुषो मेष इव कम्बलस्योपयोगं गच्छति ।**

**प्रद्युम्नजातोऽपि बाणयुद्धव्यतिकरकारिण्या सदोषया यौवनावस्थया निरुद्धोऽनिरुद्ध इव को नाम न[५] क्लेशमनुभवति ।**

**तत्तात, सुविषमेघवर्त्तिनि विद्युद्विलास[६] इवास्थिरे स्थितस्तारुण्ये मा स्म विस्मर स्मयेन विनयम् ।**

**कुमारेति** । हे कुमार ! त्वं राजहंसोऽपि-राजमुख्योऽपि सन् सरूपः-रूपवानहं इत्यमुना प्रकारेण मोहवान् मा स्म भूः-मोहं मागाः । रूपमदो हि नीचचिह्नम् । यश्च राजहंसः स कथं अहंसस्वरूप इति विरोधद्योतको अपि शब्दः ।

---

१. कूर्चश्मश्रुरोम्णां अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ननु यदि रूपाऽहङ्कारान्नृपो मूढः स्यात् तदा को दोषः ? इत्याशंक्याह–

**अनुभवति**[१] स च रूपाहङ्कारान् मूढः कोशशून्यतां अनुभवति, चकारो यौगपद्ये यदेव कुतोऽपि मुह्यति तदेव कोशेन-भाण्डागारेण शून्यतां-व्यतिरेकं प्राप्नोति, कोशरहितो भवतीत्यर्थः। क इव ? शस्त्रसंघात इव-प्रहरणसमूह इव। यथा चम्वा-सेनया ऊढः-धृतः शस्त्रनिचयः कोशशून्यतां-प्रत्याकारराहित्यमायाति।

भ्रष्टकोशस्यापि किं तदाह–

**अविभवः**-निर्धनः पुमान् बलस्य-सैन्यस्य शक्तेर्वा कमुपयोगं-साफल्यं गच्छति-याति ? न कमपीत्यर्थः। निर्धनत्वात् सर्वमपि सैन्यं शक्तिश्च ततः प्रयाति, ततो जयादिकां तत्फलं क्व तस्येति। एतेन निःकोशस्य अबलत्वमिति ख्यापितम्। क इव ? मेष इव-अज इव। स च किम्भूतः ? अवेः-मेण्ढाद् भवति स्मेति अविभवः, तथा कम्बलस्य-आच्छादनविशेषस्य उपयोगं-निमित्तत्वं गच्छति-याति, तद् रोमभिः कम्बलोत्पत्तेः।

तस्मात् अबलस्य का कथा ? यतः–

**प्रद्युम्नजातो**ऽपि-प्रकृष्टौजः पुञ्जोऽपि बाणैः-शब्दैर्यद् युद्धं-कोलाहलस्तद् व्यतिकरकारिण्या-तत्सम्पर्कविधायिन्या सह दोषैरिति दोषान्वितया यौवनावस्थया-तारुण्यावस्थया निरुद्धः-आत्मवशीकृतः को नाम क्लेशं-दुखं नानुभवति ? अपितु सर्वोप्यनुभवत्येवेत्यर्थः। नामेति अभ्युपगमे द्युम्नं-द्रव्यमपि बाणधातुः शब्दार्थो घञन्तः। क इव ? अनिरुद्ध इव। सोऽपि प्रद्युम्नः-कामस्तस्माज्जातो अनिरुद्धाभिधो बाणाख्येन दैत्येन समं युद्धव्यतिकर- विधायिन्या यौवनेऽवतिष्ठत इति कृत्वा तारुण्ये स्थितया उषया-उषाख्यया पत्न्या सदा निरुद्धः-आत्मवशीकृतो दुःखमनुभूतवानित्यागमः। युद्धव्यतिकरोऽनङ्गसूनोः क्लेशानुभव- हेतुः।

**तत्तातेति**। तदिति-उपसंहारे तातेति-प्रणयपूर्वामन्त्रणे तस्माद् वत्स ! सुष्ठु-अतिशयेन विषमे-असाधुनि तथा अघवर्त्तिनि पापकारयितरि अस्थिरे-चञ्चले तथा विशेषेण द्योतन्त इति विद्युतः-रोचमाना विलासाः-शृङ्गारादयो यस्मिन् तथाविधे तारुण्ये-यौवने स्थितः सन् स्मयेन-गर्वेण विनयं मा स्म विस्मरः-मा स्म विस्मार्षीः। कस्मिन्निव ? अस्थिरे विद्युद्विलासे इव, सोऽपि सुष्ठु विषं-जलं यत्रेति कृत्वा सुविषे-सुजले मेघे वर्तत इति। तथा अस्थिरः-लोलः।

अथ विनयविस्मृतौ दूषणमाह–

---

१. अनुभवेति अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अविनीतोऽग्निरिव[१] दहति ।**

**अजातनय[२]श्च्छाग इव नास्तूयते[३] जनेन ।**

**किं च ब्रूमः—**

**सुसहायशून्यस्य भवतो यस्यामीमांसाभियोगा राक्षसा इव, अन्यायाः पारदारिका इव, अयोगक्रिया लोहकारा इव, अश्रुतागमाः शोकवेगा इव सहायाः ।**

**अविनीतः**-अविनयी पुमान् अग्निरिव दहति-दाहं उत्पादयति आत्मनः परस्य वा। पक्षे, अविः-ऊर्णायुस्तेन नीतो यथा अग्निस्तन्नेतारं दहति । "**ज्वलन्ती हि गड्डरिका स्वीकृता दहतीति**" [ ] लोकोक्तिः । अथवा अविरग्निदाहनं न तु आत्मदाहकाः पतिविपत्तौ स्त्र्यादयः परदाहकाः कामत्रिपुरान्तकप्रभृतयश्च स्तूयन्ते ।

ततश्च अविनयाद्दाहात्मकमपि मां जनः स्तोष्यतीति निरस्यन्नाह—

**अजाते**ति । न जातो नयो यस्य स छाग इव न स्तूयते, जनेन स्तुतिमपि न प्राप्नोतीत्यर्थः । छागस्तु अजायास्तनयः-सुतः ।

आत्मनः स्वामी यादृक् तादृग् वा भवतु चेत् सुसहायस्तदपि नास्तीत्याविः-कुर्वन्नाह-

**किञ्च**-पुनः वयं ब्रूमो भवन्तं प्रति—

**सुसहायैः**-शोभनानुचरैः शून्यस्य-रहितस्य यस्य भवतः ईदृशा अमी सहायास्तद्यथा— न मीमांसाभियोगः-विचारोत्साहो येषां ते तथाविधाः । क इव ? राक्षसा इव ? ते किम्भूताः ? मांसे अभियोगः-उद्यमो येषां ते मांसाभियोगाः । अत्र पक्षे अमी इति पूर्वपक्षीयसहायविशेषणम् । तथा न विद्यते न्यायः-नीतिर्येषां ते इत्यन्यायाः-न्यायरहिताः । के इव ? पारदारिका इव-परदारलम्पटा इव, परदारान् गच्छतीति पारदारिकः, "**गच्छतौ परदारेभ्यः**" [पा० सू० वार्तिक] इति ठक् । ते किम्भूताः ? अन्यां-अन्यसम्बद्धां कान्तां आयन्ते-गच्छन्तीति अन्यायाः परस्त्रीरता इत्यर्थः । तथा अलब्धलाभो लब्धपरिरक्षणं रक्षितविवर्द्धनं य योगस्तस्य क्रियाकरणं नास्ति येषां ते अयोगक्रियाः असम्बद्धकर्माणो वा। के इव ? लोहकारा इव ? ते किम्भूताः ? अयः-लोहं गच्छन्तीति अयोगा लोहगता क्रिया-कुट्टनादिरूपा येषां ते अयोगक्रियाः । तथा न श्रुत आगमः-शास्त्रं यैस्ते अश्रुतागमाः । के इव ? शोकवेगा इव-शोकप्रसरा इव । ते किम्भूताः ? अश्रुतायाः-भावप्रत्यया विवक्षया

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नयनजलस्य आगमः-आगमनं येषु ते तथाविधाः ।

एवं सहायसम्पदं निषिध्य मित्रमण्डलीमवद्यन्नाह—

**न च ते दुःशिक्षितनृपकलभव्याकरणमार्गेषु निपुणा नर्तकीव मित्रमण्डली ।**

**तदायुष्मन्नहितया प्रकृत्यायुक्तो[१] भुजङ्ग इव भयाय लोकस्य ।**

**न चेति** । हे दुःशिक्षित !-असाधुतया अभ्यस्तविध ! हे नृपकलभ ! ते-तव मित्रमण्डली न च व्याकरणमार्गेषु-शब्दशास्त्रपद्धतिषु निपुणा-कुशला । शब्दशास्त्रावबोधे[१] हि नीतिशास्त्रावगमः, नीत्यवगमेव कृत्याकृत्यविमर्शनं, तस्माच्च सम्पदः । न च तन्नैपुण्यं, तव मित्रमण्डल्यामस्तीति भावः । केव ? नर्त्तकीव ? तत्पक्षे, हे दुःशिक्षितनृपकल !-दुष्टा शिक्षिता नृपकला येन इति सम्बोधनं । सा च भरतोक्तेषु करणमार्गेषु भव्या-प्रशस्या ।

**तत्** इति उपसंहारे हे आयुष्मन् ! तत्-तस्माद्धेतोः अहितया-हितेतरया प्रकृत्या-अविनयादिस्वभावेन अयुक्तसहायमित्रलक्षणया अमात्यादिकया च युक्तः सम्बद्धो भवान् लोकस्य भुजङ्ग इव भयाय हेतुः[२] । भुजगस्तु अहेर्भाव अहिता तया दशनलक्षणया प्रकृत्या च युक्तः । दुष्टप्रकृतिर्नृपश्चेत् लोकस्य भयाय ।

ततः किमित्याह—

**उग्रसेना इव[२] कंसानुरागं जनयेत् ।**

**अमृतमथनो[३]द्यतहरिबाहुपञ्जर इव मन्दरसानुगतः को न घृष्यते ।**

**शुनीमिवास्थिरतां परिहर ।**

**कुशीलताग्राही मा स्म तैलिक इव केवलं खलोपभोगाय भूः ।**

**उग्रा** सेना-अमात्यादिका यस्य स कं-प्राणिनं सानुरागं जनयेत्-कुर्यात्, न कमपीत्यर्थः विरागहेतुरेवेति भावः । उचितपरिवारो हि जनानुरागाय, परिवार एव हि लोकस्योपद्रवं रक्षणं च कुरुते । क इव ? उग्रसेन इव-उग्रसेनो दैत्यविशेषः स कंसासुरस्यानुरागं जनयति इत्यागमोक्तोल्लिङ्गनम् ।

चेदमी विरुद्धबुद्धयः सहायादयः पृथ्वी वा मयि मन्दानुरागा, ततः किं ममेति निरस्यन्नाह—

---

१. शब्दतत्त्वावबोधे अनू. । २. भयाय भयहेतुः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अमृतेति** । मन्दो रसः-प्रीतिर्येषां ते मन्दरसाः-मन्दानुरागास्तैर्मन्दया मन्दानुरागया रसया-पृथ्व्या वा अनुगतः-सङ्गतः को न घृष्यते-को न हीयते, अपितु सर्वोऽपि । क इव ? अमृतमथनाय उद्यतः-सावधानो यो हरेः-विष्णोर्बाहुपञ्जरः स इव । पुरा हि देवैर्दैत्यैश्च अमृतायाम्भोधिर्ममन्थ तत्र च मुख्यो बलिष्ठो विष्णुस्तस्य भुजपञ्जरो मन्दरनाम्नः-गिरेर्मन्थानभूतस्य[१] सानूनि-तटानि गतः-प्राप्तः सन् घृष्टः ।

तस्मादस्थिरतां-चञ्चलत्वं परिहर-त्यज । कामिव ? शुनीमिव सा तु अस्थिनि रता-आसक्ता ।

**कुशीति** । कुत्सितं शीलं-लौल्यादिलक्षणं यस्य स कुशीलस्तस्य भावः कुशीलता तां गृह्णातीत्येवंशीलस्तथाविधस्त्वं केवलं खलोपभोगाय-दुर्जनोपभोगाय मा स्म भूः । कुशीलो हि दुर्जनानामेवोपयोगी, न साधूनां, तस्मात् कुशीलतां त्यजेत्यर्थः । क इव ? तैलिक इव-चाक्रिक इव । स च कुशीलक्षणां-लतां गृह्णाति । तथा खलः-पिण्याकः स एव उपभोगः-उपयोगो यस्य । अयोविकारः कुशी ।

अकृत्यानि परिहार्य कृत्यमुपदिशन्नाह–

**आवर्जय गुणान् ।**

**निर्गुणे धनुषीव सुवंशेऽपि[१] कस्याग्रहो भवति ।**

**अभ्यस्य कलाः ।**

**निष्कलो वीणाध्वनिरिव प्रशस्यते न पुरुषः ।**

**त्यज जाड्यम् ।**

**जाड्ययोगेन हिमानी दुष्यतां याति ।**

**आवर्जयेति** । गुणान् आवर्जय-वशीकुरु ।

सुवंशत्वादेवास्माकं लोकाग्रहो भविष्यतीति न विमृश्यम् । सुवंशेऽपि-शोभनान्वयजातेऽपि निर्गुणे कस्याग्रहो भवति ? यस्माद् गुणानामेवाग्रहः-आदरो जनस्य, न केवलं कुलीनानां । कस्मिन्निव ? सुवंशेऽपि-सुवेणुभूतेऽपि गुणः-ज्या तेन रहिते धनुषीव। यथा सुवंशेऽपि ज्यारहिते धनुषि कस्य आ-आभिमुख्येन बाणाकर्षणाय ग्रहः-ग्रहणं आग्रहो भवेत्, अपितु न कस्याऽपि, तथाऽत्रापि ।

---

१. मथनभूतस्य अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा कला-विद्वत्तादिका तां अभ्यस्य-परिशीलय । असुर्देवादिको लुप्त हि प्रत्ययः ।

यस्मादावर्जितशौर्यादिगुणोऽपि निःकलः-अनभ्यस्तद्द्वासप्ततिकलः पुरुषो न प्रशस्यते-न स्तूयते । क इव ? निःकलः-वीणाध्वनिरिव । यथा निःकलः-कलयितुमशक्यो वीणास्वनो न शस्यते तथा तथाविधः पुरुषोऽपि ।

तथा जाड्यं-मौर्ख्यं त्यज ।

हिः-यस्मात् जाड्ययोगेन मानी-स्तब्धः पुमान् दूष्यतां-दूष्यत्वं याति-आप्नोति । हिमानी-हिमसंहतिः साऽपि जाड्यतः-अतिशैत्यात् दूष्येत्यर्थान्तरम् । "**हिमारण्ययोर्महत्त्वे**" [पा० सू० वार्तिक] आनुक्, महद्धिमं हिमानी, जाड्यपरित्यागे ।

किं पितृमन्त्रिन् मुखरः स्यामित्येतदपि निषिध्यन्नाह—

**मा स्म मुखरो भूः ।**

**कर्णाटचेटीमिव मुखरतां न शंसन्ति साधवः ।**

**[१]धवलबलीवर्दपङ्क्तिरिव समाधुर्या वाणी मनो हरति ।**

**वर्जय वैपरीत्यम् ॥**

**विपरीतं शवमिव[२] को न परिहरति ।**

**मा स्मे**ति । मुखरः-वाचालोऽपि मा स्म भूः ।

यस्मान्मुखरस्य भावो मुखरता तां मुखरतां-वाचालतां साधवो न शंसन्ति-न स्तुवन्ति। कामिव ? कर्णाटचेटीमिव-कर्णाटदेशदासीमिव । यथा कर्णाटचेटीं साधवो न शंसन्ति । किम्भूतां ? मुखे रतं[१] यस्याः सा तां ।

यस्माद् या वाणी सह माधुर्येण वर्तत इति समाधुर्या सा मनोहारिणी न च वाचालतायां, वाचो माधुर्यं । केव ? धवलबलीवर्दपंक्तिरिव-श्वेतवृषभश्रेणिरिव, सा हि समा-अविषमा धुर्य्या-वाहिनीनां धुरं वहतीत्यर्थः । धुरं वहतीति धुर्या "**धुरो यड्ढकौ**" [पा० सू० ४.४.७७] इति यत्, तथा अनशकटं अर्णी वा अक्षाग्रकीलिकां हरति-वहतीत्यर्थः । वा-अथवार्थे ।

**वर्जे**ति । पूर्वस्मात् पूर्वोक्तादस्मादुपदेशात् वैपरीत्यं-अन्यथाभावं वर्जय-त्यज । पूर्वोक्तानुपदेशान् स्वीकुर्वित्यर्थः ।

---

१. रतं सुरतं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यस्मात् विपरीतं-विपरीताचारं को न परिहरति, कमिव ? **शवमिव** । यथा विभिः-पक्षिभिः परीतं-व्याप्तं शवं परिहरन्ति तथैनमपि ।

सुविनीतानां आवर्जितगुणानां अभ्यस्तकलानामपि प्रायः प्रभवन्ति व्यसनानि रक्षितव्यः प्रमादश्च । व्यसनेषु स्त्रीषु अत्यासक्तिर्महद्व्यसनं द्रव्यशरीरयोः क्षयहेतुत्वात् । स्त्रीव्यसने हि राजयक्ष्मोद्भवः । ततः स्त्रीव्यसनं लक्ष्मीप्रमादश्च परिहारयन्नाह—

**कमलदल[१]दीर्घाक्ष, शिक्षाप्रक्रमे[२]ऽस्मिन्न[३]परमप्यभिधीयसे ।**

**मा गाः स्त्रियाः श्रियो वा विश्वासम् ।**

**अधिकमलवसतिरनार्यसंगता स्त्री श्रीश्च कं न प्रतारयति[४] ।**

**या कालकूटद्वितीया नीरोषितापि नार्द्रहृदया भवति । स्वीकृतापि विवाहेन कंसानलङ्घनचापलेनोद्वेजयति ।**

**अस्याः कारणेऽभ्रान्तः समस्तोमन्दरागः सदालोकः, लोलनेत्रीकृता घृष्टा भुजङ्गमण्डली[५], प्राप्तो जलधी राजकुमारपराभवम् ।**

**अनयावष्टब्धः को न गुरुवारणयोग्यो[६] भवति, को न वाजिपृष्ठमारोहति[७], कः कंकणन्नवञ्चनातः प्रकटयति, कः कण्ठे हारावमोचनं न कुरुते, को न काञ्चन शृङ्खलामनुभवति । कुरङ्ग इवान्धीभूतः को वागुरावञ्चनां[८]करोति, कः कार्मुकनिर्मुक्तशिलीमुख इव न वैलक्षमागच्छति ।**

**कस्य न पराभूतिर्भवति । कस्य नापूर्वं यशः समुच्छलति ।**

**किमतोऽप्यस्याः परमुच्यते ।**

**यादवप्रियं शार्दूलमिव शूरं महत्तरं भयान्नोपसर्पति । सुनयनादेवरं सिंहमिव,[९] बलभद्रं दृष्ट्वाऽपि[१०] प्रपलायते[११] । न वसुदेवेऽपि चक्षुः पातयति ।**

**केवलमनवरतशिक्षितवैदग्ध्यकलापराधात्मिकात्रपापरा परिहृत्य गुणिनो गुरून्परपुरुषे मायाविनि कृतकेशिवधे धृतमन्दरागे रागं बध्नाति ।**

**कमले**ति । कमलदलवत्-पद्मपत्रवत् दीर्घे-आयते अक्षिणी यस्य सः कमलदलदीर्घाक्षस्तस्य सम्बोधने हे कमलदलदीर्घाक्ष ! त्वमस्माभिरस्मिन् शिक्षाप्रक्रमे-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शिक्षावसरे अपरमपि-अन्यदपि अभिधीयसे-उच्यसे । रूपवान् भवान् सर्वस्त्रीप्रियः अतस्तासु विश्वासकरणं तत् तव कमलदलेत्यामन्त्रणेनाऽभिहितं कमलेति ।

स्तृणाति-दुर्विनीता सती आत्मनः परस्य वा गुणगणं प्रच्छादयतीति स्त्री, यस्यां तु सती धर्मयोगादस्यार्थस्य अन्यथात्वं तत्र आवृणोति कल्याणपरम्पराभिः स्वकुलं पतिकुलं चेत्यन्वयः। तस्याः दुर्विनीयाः स्त्रियाः-अबलायाः विश्वासं-विस्रम्भं मा गाः-मा व्राजी। स्वलोभात् स्वभावाद्वा ता अतीवानुरागं दर्शयन्ति, परं परिणामे विरुद्धा एवेति भावः । तथा विश्वस्मिन् सर्वत्र निक्षेपस्य योग्ये अयोग्ये वा आस-उपवेशनं विश्वासस्तं श्रियः-लक्ष्म्या मागाः-मा कुर्याः । धनार्थे हि पितरः पुत्रेभ्यः पुत्राश्च पितृभ्यो द्रुह्यन्ति, तस्माद् य एव अद्रोहण उपधाशुद्धश्च तत्रैवासौ निक्षेपणीयेति भावः । आसेरिन् कृदन्तस्य योगे कर्मणि षष्ठी ।

किमिति स्त्रिया न विस्रम्भणीय श्रीश्च सर्वत्राऽपि अनिधेयेत्याह—

अधिको योऽसौ मलः-पापं तस्य वसतिः-आस्पदं, तथा अनार्यैः-असाधुभिः संगता-कृता मैत्री[1], का स्त्री कं पुरुषं न प्रतारयति-न वञ्चयते ? अपितु सर्वमपि विप्रलम्भयतीत्यर्थः। श्रीस्तु अधिकमलं-पद्मे वसतिर्यस्याः सा अधिकमलवसतिः, कमलं हि तरणशीलं सा च तेन अविनाभावसम्बद्धा ततः पद्मासनाश्रीः कं-पुरुषं न प्रकर्षेण तारयतीति। किम्विशिष्टा ? न नारी अनारी-अमानुषी तथा अः-विष्णुस्तेन संगता-सम्बद्धा सम्मिलितेत्यर्थः ।

सम्प्रति स्त्रीपक्षमेव व्याख्यास्यामः, श्रियं तु पश्चात् ।

**या काले**ति । या-स्त्री अकाले-अकस्मात् कूटं-कपटं तत् द्वितीयं यस्याः सा अकालकूटद्वितीया-अकालकपटसहाया, तथा नीरोष्यते स्म इति नीरोषिता-प्रसादिताऽपि आर्द्रहृदया-स्निग्धहृदया न भवति । तथा विवाहेन-उपयामेन साऽनलं-अग्निसाक्षिकं स्वीकृताऽपि-अङ्गीकृताऽपि सा-स्त्री कं पुरुषं घनेन-प्रचुरेण चापलेन-लौल्येन नोद्वेजयति-नोद्वेगं प्रापयति ? अपितु सर्वमपि उद्विग्नं कुरुत इत्यर्थः ।

तथा **अस्याः**-स्त्रिया हेतोर्लोकः समस्तोऽपि-सकलोऽपि अमन्दरागः-दृढानुरागः सन् सदा भ्रान्तः-पर्यटितः । तथा भुजङ्गानां-विटानां मण्डली-पंक्तिः अलोलनेत्रा लोलनेत्राकृता लोलनेत्रीकृता-चपलाक्षीकृता सती धृष्टा-विप्रलब्धा । तथा जडा धीरस्येति जडधीः-जडबुद्धिः मूर्खः स्त्रीवशगः स राज्ञः सकाशात् कुत्सितो योऽसौ मारः-पञ्चबिल्वादिबन्धनेन विगोप्यहिंसा स एव पराभवस्तं प्राप्तः । अथवा राज्ञस्तथा कुत्सिताच्च मारात्-स्मरात्

१. कृतमैत्री अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पराभवं प्राप्नोति कुबुद्धिः ।

**"अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातुलोऽपि वा ।**
**दण्ड्यो नाम न राज्ञोस्ति धर्माद् विचलितः स्वकात् ॥"** [ ]

इति **स्मार्त्ताः** । ततः स्वपितुरपि राज्ञः सकाशात् राजकुमारस्य अन्यायवतः परिभवो युज्यत एवेत्यर्थः ।

तथा **अनया**-स्त्रिया अवष्टब्धः-आश्रितः कः-पुरुषो गुरूणां-पित्रादीनां वारणे-निषेधे योग्यो न भवति, अपितु सर्वोऽपि स्त्रीवशगः, पित्रादिभिरपि स्त्रीव्यसनाद् वार्यते । वा-अथवा कः-स्त्रीवशगः पुरुषः आजिः-सङ्ग्रामस्तस्याः पृष्ठं-मध्यं न आरोहति नाश्रयति[१]। वा-अथवा कः-पुरुषः स्त्रीवशगः वञ्चनातः-वञ्चनायाः **"पञ्चम्यास्तसिल्"** [५।३।७] कं-सुखं-वञ्चनाकृतं सुखमित्यर्थः, कणन्शब्दायमानः सन् न प्रकटयति-प्रकाशयति । तथा कः-पुरुषः कण्ठे-गलान्तः हा-इति य आरावः तस्य मोचनं न कुरुते, स्त्रिया हि वञ्चितः को न रोदितीति । तथा कः-पुरुषः स्त्रीवशगः काञ्चन-काञ्चित् शृङ्खलाबन्धनं[२] नानुभवति। वा-अथवा कः-पुरुषः अनया अन्धीभूतः-विवेकविकलः सन् गुरौ-गुरुविषये अञ्चनां-पूजा करोति । क इव ? कुसङ्ग इव, स च अन्धीभूतः को वागुरा मृगजालिका तस्या वञ्चनां[३]-उल्लंघनं करोति, अपितु तस्यामेव पततीत्यर्थः । तथा कः-पुरुषः स्त्रीवशगः पराभवादिना प्रगेव या[४] विसदृशो लक्ष्यत इति विलक्षस्तस्य भावो वैलक्षं-वीक्षापन्नत्वं गतगौरवत्वं, अत्र भावे "अण्", न आगच्छति-न प्राप्नोति । क इव ? कार्मुकाद्-धनुषो निर्मुक्तः शिलीमुख इव-बाण इव, स च को वै-स्फुटं लक्षं-वेध्यं नाप्नोति, अपितु सर्वोऽपि ।

तथा **कस्य**-स्त्रीवशगस्य पराभूतिः-पराभवो न भवति । तथा कस्य अनिषेधवाची पूर्वो यस्मात् यशःशब्दरूपात् तदपूर्वं यशः अयश इत्यर्थः, न समुच्छलति-नोद्भवति ?

स्वस्थावस्थायां स्त्रैणानि वञ्चनकूटराजपराभवादीनि अभिधाय सम्प्रति परपरिणामे यत् स्यात्तदाह–

**किमतोऽपीति** । अतोऽपि-पूर्वोक्तादपि वञ्चनादिप्रकारात् परं-अन्यत् अस्याः-स्त्रियाः किमपि उच्यते-कथ्यते ।

**यादवेति** । या-स्त्री दवं-उपतापं प्रीणाति दवप्रियं-रोगिणं, अथवा दुनोतीति दवः, कुतश्चिद् वैगुण्यात् उपतापजनको यः प्रियः-कान्तस्तं, शूरं-विक्रान्तं महत्तरं-वृद्धं

---

१. आश्रयति अनू. । २. शृंखलां अनू. । ३. वंचनं अनू. । ४. प्रागवस्थाया ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भयान्नोपसर्पति-न तत्समीपं गच्छति, अगमने वार्द्धकं भये च शूरत्वं हेतुः । कमिव ? शार्दूलमिव-द्वीपिनमिव । यथा द्वीपिनं शूरं महत्तरं प्रति भयान्नोपसर्पति । किम्भूतं दवः ? काननं प्रियः-वल्लभो यस्य स तम् । सुनयेति । नयप्रवर्त्तनप्रोत्साहनायामन्त्रणं हे सुनयनल् ! नादे-शब्दे वरं-प्रधानं प्रियंवदं, तथा बलेन-स्थाम्ना भद्रं-श्रेष्ठं दृष्ट्वाऽपि प्रपलायते, प्रणश्यति प्रियमिति शेषः । कमिव ? सिंहमिव, यथा सिंहं नादे-शब्दविषये वरं-प्रधानं सिंहनादस्य प्रतीत्वात् । तथा बलेन-पराक्रमेण भद्रं दृष्ट्वा पलायते तथा तमपि । तथा वसु ददातीति वसुदे-धनप्रदे अवे-रक्षकेऽपि चक्षुः-नयनं न पातयति-सम्मुखमपि नावलोकयतीत्यर्थः । यदि वा वेपतेऽवश्यमिति कृत्वा वेपीति चक्षुर्विशेषणम् ।

यदीदृशे परमोपकारिणि न प्रेमवती तदा अन्यत्र कस्मिन्नपि गुणिनि प्रेमबन्धं विधास्यतीति निरस्यन्नाह—

**केवलमि**ति । नूयत इति नवं-प्रशस्यं, न नवं अनवं-अप्रशस्यं रतं-सुरतं यस्याः केवलं बीजक्षयहेतुत्वात्, न हि तस्यां सन्ततिः, रतं च सन्तत्या सफलं, तथा विशेषेण दग्धः-निन्द्यो विदग्धस्तस्य भावो वैदग्ध्यं-सन्तापस्तस्य कला वैदग्ध्यकला शिक्षिता-अभ्यस्ता वैदग्ध्यकलाया सा पश्चात् कर्मधारयः, तथा अपराधा एव आत्मा-स्वरूपं यस्याः सा अपराधात्मिका-अपराधमयी, तथा न त्रायते नरकात् अत्रं तथाभूतं यत्पापं-कमप्युपसर्गं तत् राति-ददाति इति अत्रपापरा गुरुन्-पित्रादीन् गुणिनः-सगुणांश्च ग्राह्यपुरुषान् परिहृत्य परस्याः[१] पुरुषे अन्य नारीकान्ते मायाविनि-कापटिके कृतके-कृत्रिमे अशिवं-अकल्याणं ददातीति[२] अशिवधे धृतमन्दरागे-क्षणप्रेमणि रागं बध्नाति-अनुरज्यते । परपुरुष इत्यत्र सर्वनामत्वात् वृत्तौ पूर्वपदस्य पुंस्त्वम् ।

श्रीपक्षे तु—कालकूटं-विषं द्वितीयं अस्यास्तदनन्तरमुत्पन्नत्वात्, तथा नीरे-जले उषिता जलधिपुत्रीत्वात्, परं नार्द्रहृदया भवति किन्तु निर्जलवक्षाः दैवतानुभावात् जलेन तद्वक्षो वैसदृश्यं न नीतमिति भावः ।

स्वीकृतेति । आप्नोत्यवश्यमिति आपी-स्मृतमात्रगामुको यो विः-पक्षी गरुडलक्षणः स वाहः-वाहनं यस्य स आपिविवाहस्तेन, तथा कंसस्य-कंसासुरस्य न अलंघनं अनलंघनं अर्थात् कंसस्य लंघनं-मारणात्मकं तथाभूतं चापलं यस्य, अर्थाद् विष्णुस्तेन स्वीकृता, तथा उश्च-अश्वः वौ-शिवविष्णू उत्कृष्टौ वौ यस्य स उद्वः, ईश्वरो विष्णुश्च यस्य प्रसन्नस्तस्मिन् न जयति, अपितु जयत्येवेत्यर्थः । अथवा या श्रीविष्णुना स्वीकृताऽपि सती नीरे उषिता, अस्वीकृता तु मथनात् पूर्वं नीरे अस्थादेवेत्यप्यर्थः । कालकूटद्वितीयाऽपि सती घनस्य-मेघस्य चापलेन-विलसितेन कंसमेव जगत्सन्ताप-

१. तस्याः अनू. । २. दधातीति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कारित्वात् अनलं-अग्निं उद्वेजयति-पीडयति । अर्थात् शमयितरि विवाहे गरुडवाहने आर्द्रहृदया न न भवति अपितु भवत्येवेत्यर्थः । या कालकूटद्वितीया सा कथमिव आर्द्रहृदयेति विरोधोद्भावनया अपिशब्दो भिन्नक्रमे, आर्द्रशब्दोऽत्र स्निग्धार्थः । यदि वा विवाहो विष्णुस्तेनाऽपि श्रीः स्वीकृता, तत उपादेयेत्यर्थः । अपिरत्रापि भिन्नक्रमे ।

**अस्या** इति । अस्याः-श्रियाः कारणे-निमित्ते इति वाक्यत्रयेऽपि योज्यम् । मन्दरो अगः-पर्वतो अभ्रं-आकाशमन्तेऽस्येति अभ्रान्तः-व्योमावसानः सत्-शोभनः आलोको-ऽस्येति सदालोकः, सम्यगस्तः-क्षिप्तः इत्यर्थः । सम्पूर्वादस्यते क्तः । यदि वा सम्यगस्तः सन् अप्सु-भ्रान्तः क्षुब्धोऽभ्रान्तः, श्लेषे वर्णलोपो न दोषाय । तथा अस्या निमित्ते भुजङ्गमण्डली-वासुकिप्रभृतिनागमण्डली अलोलनेत्रं लोलनेत्रं कृता लोलनेत्रीकृता सती धृष्टा, चापल्यमत्र मथनप्रवर्त्तितत्वात्, नेत्रं-मन्थान रज्जुः । तथा अस्या निमित्ते जलधिः-अब्धिः पराभवं मथनलक्षणक्रियां प्राप्तः, राजकुमारेत्यामन्त्रणे ।

**अनया**-लक्ष्म्या अवष्टब्धः-आश्रितः कः-पुरुषो गुरुः-महान् वारणः-गजस्तस्य योग्यो न भवति, अपितु गजस्कन्धमारोहतीत्यर्थः । तथा अनया अवष्टब्धः को न वाजिपृष्ठं-तुरगपृष्ठं नारोहति । अतः अस्याः-लक्ष्म्याः प्रसादात् कः-पुरुषो नवं-अविच्छायं चः-समुच्चये कङ्कणं-हस्तसूत्रं न प्रकटयति-प्रकाशयति । तथा अस्याः आश्रयणात् कः कण्ठे मुक्ताहारस्य-मुक्तासरस्य अवमोचनं-बन्धनं न कुरुते, अपितु सर्वोऽपि । तथा को न काञ्चनस्य-सुवर्णस्य शृङ्खलां-आभरणविशेषं न अनुभवति-न बध्नाति । को वा अनया अवष्टब्धः अगुरौ-अगौरवार्हे नीचे अन्धीभूतः-निर्विवेकः सन् अञ्चनां-पूजा करोति, अपितु सविवेकः सन् गुरूनेव पूजयति । को वै-स्फुटं लक्षं-शतसहस्रं न आगच्छाति-न प्राप्नोति[१] ।

तथा **कस्य** न परा-उत्कृष्टा[२] भूतिः-उन्नतिर्भवति । तथा कस्य अपूर्वं-उत्कृष्टं यशो न समुल्लसति ।

**किमतो**ऽपीति । यादवाः-यदुवंश्यास्तेषां प्रियः शूरनाम आद्यपुरुषस्तं भयात्-स्थितिलंघनलक्षणात् न उपसर्पति-न तत्समीपे व्रजति । एतेन श्वसुरो वध्वा न स्पृश्यते इति स्थितिरुक्ता । शोभने नयने यस्याः सा देवरं-गदनामानं कृष्णस्य गदाग्रजत्वात् बलभद्रमपि ज्येष्ठसम्बधेन प्रतीतं दृष्ट्वा-वीक्ष्य प्रकर्षेण पलायते स्पर्शभयात् । अपि भिन्नक्रमः । तथा वसुदेवः-कृष्णस्य पिता तत्रापि चक्षुः-अक्षि न पातयति न न्यस्यति । अत्राऽपि स्थितिरेव हेतुः ।

**केवल**मिति । तथा अनवरतं-शश्वत् शिक्षितो वैदग्ध्यकलापः-दक्षतातिशयो यया

---

१. नाप्नोति अनू. । २. प्रकृष्टा अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स चासौ राधात्मिका च-राधास्वरूपा राधा च कृष्णपत्नी साऽपि श्रिया एव भेदः, त्रपापरा-सलज्जा सती गुणिनो गुरून् शूरादीन् यदूनामादिपुरुषा परिहृत्य परपुरुषे मुरारौ रागं-प्रीतिं बध्नाति । किम्भूते विष्णौ ? माया-त्रिलोकीनिर्माणलक्षणा वामननृसिंह-महिलात्वादिलक्षणा वा विद्यते अस्येति मायावी तस्मिन् । "**अस्मायामेधास्त्रजो विनिः**" [पा० सू० ५।२।१२१]। तथा कृतः केशिनः-अश्वरूपस्य दैत्यस्य वधो येन स तस्मिन् । तथा धूतो मन्दरनामा अगः-अद्रिर्येन स तस्मिन् ।

एवं उक्तकपटानां अनार्द्रहृदयत्वादिदोषान्वितानां स्त्रीणां विश्वासं-विस्रम्भं श्रीणां च विश्वासं यत्र तत्र निक्षेपं सर्वथा परिहरन् सर्वोऽपि आयुष्मान् इत्यायुष्मन् इत्यनेन सम्बोधनेनाभिहितम् । तत् इत्युपसंहारे, तस्मात् श्रेयोर्थिनां-पुण्यार्थिनां स्त्री न शरणं-न रक्षित्री, क्षयहेतुत्वात् । यतः कीदृशी ? हृदयं-चेतो हरति हृदयहरा-मोहकारिणी, एतच्च क्षये निदानमुक्तम् । पुनः किंविशिष्टा ? अतिगं-अतिशयेन बिभेतीति भीः- भीरुः स्त्रीस्वभावात्, अथवा भीर्भयहेतुत्वात् दुष्टाशयत्वात् । तथा नास्ति गौः-वाक् यस्य सः अगुस्तं जहाति अगुहा य एव मायामयं वक्तुं वेत्ति, क्षणमात्रमपि तमेवाश्रयति इत्यर्थः । अथवा गौः-धेन्वर्थः, तच्चोपलक्षणं तेन अनु अगुं-निर्धनं विहाय धनिनमेवाश्रयतीति । यदि वा नतौ-नम्रतायां गम्भीरा गौः-वाक् यस्य स, तमपि जहातीत्यर्थः । न च भवादृशाश्चाटूनि वक्तुं प्रभविष्णवः सर्वोन्नतत्वात् । यदि वा अतिगं-अतिशयेन भियं राति-ददातीति भीरा गौर्यस्य तं अतिगम्भीरगुं जहाति, स्त्रियो हि सुकुमारोपक्रमाः । केव ? गिरीन्द्रः-हिमाचलस्तस्य भूः-पृथ्वी सेव । सापि कीदृशी ? अतिगम्भीरा गुहाः-पाषाणसन्धयो यस्यां सा ।

**तदायुष्मन्नतिगम्भीरगुहा गिरीन्द्रभूरिव हृदयहरा श्रेयोऽर्थिनां शरणं न स्त्री श्रीश्च[१] ।**

श्रीश्च अश्रेयोऽर्थितां न शरणं-अगारं किन्तु श्रेयोऽर्थिनां श्रियां श्रेयोऽर्थिन एव तिष्ठन्तीत्यर्थः । किंविशिष्टा ? हृत्हारिणी तथा अयं शुभकर्म हरति, अयहरा-तत्प्राप्त्या शुभकर्मणो भुक्तत्वात् । यदुक्तं **नैषधे**-"**पूर्वपुण्यविभवव्ययसृष्टाः सम्पदो विपद एव विमृष्टाः**" [१।१३३] इति । केव ? गिरीन्द्रभूरिव गिरीन्द्रात्-हिमालयाद् भवति स्मेति कृत्वा गौरीव । सा च किंविशिष्टा ? हृदये हरोऽस्या इति हृदयहरा, तथा नतिगम्भीरः-प्रणामप्रगल्भो गुहः-कार्तिकेयो यस्याः सा, तत्पुत्रत्वात् ।

अधुना दुःस्त्रियं सर्वथा परिहार्यं साध्व्या अपि अत्यन्तविश्वासप्रतिषेधद्वारेण-

**'सैवेति[१] विश्रयान् काले मुक्त्वा तत्परतां वशी ।**
**सुखं हि फलमर्थस्य तन्निरोधे वृथा श्रियः ॥'** [ ]

१. सेवेत अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति पूर्वकविकथितमनुगामुकोऽत्यासक्तिमनासक्तिं च निषेधयन्माह—

**शृङ्गारप्रधानास्तात, गाव एव[१] विचारिताः सरसा भवन्ति न स्त्रियः[२]।**

**तदेताः कन्दर्पकण्डूकषणविनोदमात्रोपकारिण्यो नात्यन्तविश्वास-योग्याः सर्वथा विश्वस्तं[३] विश्वासमेव नरं कुर्वन्ति स्त्रियः[४]।**

**शृङ्गारे**त्यादि । रूक्षशिक्षावचोभिरास्माकीनैरसौ विमनस्को भविष्यतीति चित्ते धारयन् कृत्यं चोपदिशन्, तातेति कोमलमामन्त्रयति हे तात ! शृङ्गारो रसः प्रधानं यासु ताः, तथा विचारिताः-विवेचिता गावः-गिर एव सरसाः-प्रीतिहेतवो भवन्ति, अथवा गावः-धेनवो विशेषेण चारिता-दत्ता स्वादवत्तृणकवलैः। तथा शृङ्गस्यारं-अग्रं शृङ्गारं तत्प्रधानं यासु तास्तथोक्ताः । तथा सरसाः-सदुग्धा भवन्ति । स्त्रियस्तु शृङ्गारः-मण्डनं स प्रधानं यासां एवम्भूता विचारिताः स्तृणान्ति दुःशीलाः सत्यो गुणगणं छादयन्तीति । तत्त्वतो विमृष्टाः सत्यो न सरसाः किन्तु वैराग्यहेतव एव ।

**तत्**-तस्माद्धेतोरेताः स्त्रियो नात्यन्तं-नात्यर्थं विश्वास योग्याः-विस्रम्भार्हाः, किन्तु किञ्चद् विश्वासयोग्या इत्यर्थः । तत्र हेतुमाह—कन्दर्प एव या कण्डूः-खर्जूस्तस्याः कषणेन-घर्षणेन यो विनोदो अपनयनं तन्मात्रं तमेव उपकुर्वन्तीत्येवंशीलाः मन्मथकण्डूयाया अपनोदस्ताभिः क्रियते एतदेव तासामुपकारकत्वमित्यर्थः । सर्वथा विश्वस्तं-विस्रब्धं नरं स्त्रियो विश्वासं-विगतश्वासमेव कुर्वन्ति, तस्मात् साध्व्योऽपि नात्यन्तं विश्वासार्हाः । तथा च **चाणक्यः**-

**"अन्तर्गृहगतस्थविरस्त्री परिशुद्धां देवीं पश्येत्, अपरिशुद्धां न काञ्चिदभि-गच्छेत् । श्रूयते हि-देवीगृहगतो भ्राता भद्रसेनं जघान, मातुः शय्यान्तर्गतश्च पुत्रः का रूपम् ।"** इत्यादि । [ ]

स्त्रीणां दोषान् स्मरकण्डूविनोदमात्रफलं चाभिधाय सम्प्रति श्रियः फलमाह—

**श्रियोऽपि दानोपभोगाभ्यामुपयोगं नयेत् । न लोभं कुर्यात् । बहुलोभानुगतः किरणकलापोऽपि संतापयति जनम् ।**

**श्रियो**ऽपीत्यादि । श्रियोऽपि-लक्ष्म्या अपि दानोपभोगाभ्यां दानं-अर्थिभ्यो वितरणं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उपभोगश्च-स्वशरीरे भोजनाद्यर्थं प्रवर्तनं ताभ्यां उपयोगं-साफल्यं नयेत्-प्रापयेत् । न लोभं तदव्ययबुद्धिं कुर्यात् । लोभदूषणमाह—बहुना लोभेनानुगतः-संगतो नृपः सन्तापयति-दुःखीकरोति जनं, किरणकलापोऽपि-करौघोऽपि बहुलः-प्राज्यः तथा भानुं-रविं गतौ मानवीय इत्यर्थः, जनं सन्तापयत्येव ।

यदि लोभवता मया संतप्यते जनस्तत्किमित्याशंक्याह—

**अतः पुत्र ! प्राप्स्यसि[१] न चिरान्निजकुलकमलराजहंसीं राज्यश्रियम् । अनवरतं कृतयशोदानन्देहि नारायण इव त्वयि चिरं रंस्यते खल्वियं लक्ष्मीः ।**

**अतःपुत्रेति** । अतः- एतस्माज्जनसंतापनात्[१] हे पुत्र ! चिरात्-बहुनाऽपि कालेन निजकुलमेव कमलं तस्मिन् राजहंसीव मण्डनभूतत्वात् तां राज्यश्रियं न प्राप्स्यसि, जनानुरागप्रभवा हि सम्पदः । अथवा अतः-एतस्मात् पूर्वोक्तादस्मदुपदेशात् हे पुत्र ! न चिरात्-स्तोकेनैव कालेन राज्यश्रियं प्राप्स्यसि, प्राप्य य श्रियं अनवरतं-निरन्तरं कृतं यशो येन तद्दानं देहि-धर्मादिपात्रेषु श्रियं नियुंक्ष्व इति भावः । नारायणेति । खलु-निश्चितं इयं लक्ष्मीः पात्रेषु व्यवकलयति त्वयि नारायण इव-विष्णाविव चिरं-चिरकालं सहर्षं रंस्यते-स्थास्यति । यथा विष्णौ लक्ष्मीश्चिरं तिष्ठति तथा त्वय्यपि । कीदृशे विष्णौ ? कृतो यशोदायाः जनन्याया[२] आनन्दो येन स तस्मिन्, हि-स्फुटम् ।

बलादपि प्रजाभ्यो वित्तमादाय पात्रेषु मयोपकरणीयमिति मा कृथा हृदि तदाह—

**पाहि प्रजाः प्रजापो ब्राह्मण इव क्षत्रियोऽपि न लिप्यते पातकैः[२] ।**

**मा च वृद्धिं प्राप्य गुणेषु द्वेषं[३] कार्षीः । व्याकरणे हि वृद्धिर्गुणं[४] बाधते, न सत्पुरुषे[५] ।**

**पाहि**-पालय प्रजाः । अनेन बलात् प्रजाभ्यो वित्तं न ग्रहीतव्यमिति भावः । यस्मात् प्रजां पातीति प्रजापः क्षत्रियः-राजा न पातकैः-पापैर्लिप्यते-उपदिह्यते "**लिप उपदेहे**" [पा० धा० १४३४] । क इव ? ★ब्राह्मणस्तु प्रजपनं प्रजापः, सोपसर्गत्वाद्भावाकर्त्रोरिति घञ् [**घञि च भावकरणयोः**, पा० सू० ६।४।२७] सोऽस्यास्तीति प्रजापः "**अर्श आदित्वादच्, मत्वर्थीयः**" [पा० सू० ५।२।१२७] पापैर्न लिप्यते ।★

**मा चेति** । यः-पुनः वृद्धिं-राज्यादिसमृद्धिं प्राप्य गुणेषु द्वेषं मा कार्षीः-मा विधेहि । हिः-यस्मात् व्याकरणे-शब्दशास्त्रे वृद्धिर्गुणं बाधते, गुणबाधिका वृद्धिरिति वैयाकरणसमयः, न सत्पुरुषे वृद्धिर्गुणं बाधत इति । तेन हि वृद्धौ सत्यामपि गुणा मन्यन्त इत्यर्थः ।

---

१. जनन्या अनू. । ★-★ चिह्नान्तर्गतपाठस्य स्थाने अनू. प्रतौ निम्नपाठो वर्तते—'ब्राह्मण इव, ब्राह्मणस्तु प्रकृष्टो जपो यस्य स प्रजापः पापैर्न लिप्यते । जपनं जपः, व्यधजपमद्भ्य एभ्योऽनुपसर्गेभ्यो भावाकर्त्रोरल् स्यात्, सोपसर्गत्वे तु भावाकर्त्रोरिति घञि प्रजापः। यद्वा प्रजप्यते येनेति ।'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इदानीं शिक्षामभिधाय आत्मोपदेशे आदरपरं कुमारं कुर्वन् मृदुवचोभिः प्रोत्साहयन्नाह—

**वत्स, मा चैवं[१] चेतसि कृथाश्छान्दसोऽयम्[२]। छान्दसश्च गुरुर्वक्रस्वभाव एव भवति तत्किमनेनेति । यस्माच्चतुरानन्दिपदः पुण्यश्लोको भवान् । अतोऽङ्गभावं यान्ति ते वक्रोक्तयोऽपि गुरवः । सरलतया[३] लघवोऽप्यन्तरङ्गा भवन्ति । किंतु ते ह्यवसाने कुटिलतामपि दर्शयन्ति ।**

**मा चैव**मिति । हे वत्स ! मा चैवं वक्ष्यमाणं चेतसि कृथाः यत् छान्दसोऽयं-श्रोत्रियोऽयं मन्त्री छान्दसश्च गुरुः-तत्त्वोपदेष्टा वक्र एव-अनृजुरेव भवति तत्किमनेन मन्त्रिणेति । पक्षे, छन्दसः-शास्त्रविशेषस्याऽयं छान्दसो गुरुराकारादेर्न्यासविशेषो वक्र एव भवतीति । यस्मात् कारणात् भवान् पुण्यश्लोकः-पवित्रयशः तथा चतुरान्-कुशलान् आनन्दयतीत्येवंशीलं चतुरानन्दी, एवंविधं पदं राज्यलक्षणं यस्य स एवंविधः, अतो वक्रोक्तयोऽपि-वक्रवचसोऽपि गुरवस्ते-तव भावं-भावनां यान्ति, त्वयि भावितात्मानो भवन्तीत्यर्थः । अङ्गेति कोमलामन्त्रणे, सरलतया-एकमार्गतया लघवः-लघुवृत्ता अपि अन्तरङ्गाः-चेतोऽभिप्रेताः स्युः, परं ते अन्ते कौटिल्यमपि दर्शयन्ति-प्रकाशयन्ति । अथ च पुण्यः-श्रेयात् श्लोकः-पद्यं, तदा चत्वारि आनन्दीनि पदानि यस्य स तथाविधः, ते प्रसिद्धा गुरवो वक्राकृतयोऽङ्गभावं-अवयवत्वं यान्ति, श्लोकस्येति शेषः । सरलतया-ऋजुतया लघवो लेखाकृतयोऽपि अन्तरङ्गाः-मध्यगताः स्युः, परं ते हि-स्फुटं अवसाने-पादान्ते कुटिला अपि स्युः "**वा पादान्तस्त्वसौग्वक्रः**" इति वचनात् ।

**तत्किं बहुना—**

**तथा भव यथा तात ! त्रैलोक्योदरदर्पणे ।**
**विशेषैर्भूषितस्तैस्तैर्नित्यमात्मानमीक्षसे ॥ १७ ॥**

**ततो** हेतो : किम्बहुना-किम्बहूक्तेन-

**तथा भवे**ति । तातेति कोमलामन्त्रणे हे तात ! तथा-तेन प्रकारेण त्वं भव-न्याये प्रवर्त्तस्वेत्यर्थः । यथा-येन प्रकारेण तैस्तैः-अस्मदुपदिष्टैः प्रजापालनादिभिर्विशेषैरुपलक्षितात्मानं भुवि उषितः-पृथ्वीस्थित एव त्रैलोक्यमेव योऽसौ दर्पणस्तत्र नित्यं-अविनश्वरं ईक्षसे-पश्यसि । अन्योऽपि तैस्तैराकल्पविशेषैर्मण्डितमात्मानं दर्पणे पश्यति । ॥ १७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**किं चान्यत्–**

**बिभर्ति यो ह्यर्जुनवारि पौरुषं, करोति नम्रे च न वा रिपौ रुषम् ।**
**न तेन राज्ञा सहसागराजिता, भवेन्मही किं सहसागरा जिता ॥ १८ ॥**

**किञ्चान्यत्**-किञ्चिदन्यदप्युच्यते–

**बिभर्ती**ति । अर्जुनमपि-पार्थमपि[१] वृणोति-आच्छादयति वारयति वा इत्येवंशीलं निजप्रकर्षेण तच्चारित्रापह्नवकारि पौरुषं-विक्रमं यो राजा बिभर्ति-धत्ते । वा-अथवा नम्रे-नमनशीले रिपौ-शत्रावपि रुषं-कोपं न च-नैव करोति, धर्मविजयित्वात् । तेन-राज्ञा अगैराजिता । अगराजिता-अष्टसंख्यकुलाचलालङ्कृता तथा सागरैः सह-युक्ता ससागरा-ससमुद्रा सहसा-बलेन किं मही न जिता[२]? किन्तु जितैवेति भावः ॥ १८ ॥

**अपि च[१]–**

**'किं तेन जातु जातेन मातुर्यौवनहारिणा ।**
**आरोहति न यः स्वस्य वंशस्याग्रे[२] ध्वजो यथा' ॥ १९ ॥**

**अपि च**-पुनराह मन्त्री–

**किं तेने**ति । मातुः-जनन्या यौवनं हरतीत्येवंशीलो यौवनहारी तेन-तारुण्यमुषा तेन-सुतेन जातेन-उत्पन्नेन किं-न किञ्चिदित्यर्थः । यो जातु कदापि स्वस्य वंशस्य-अन्वयस्य अग्रे नारोहति-अग्रगण्यतां[३] न यातीत्यर्थः । क इव ? ध्वज इव । यथा ध्वजो वंशस्य-वेणोरग्रे-अधिरोहं कुरुते । अत्र इवार्थे यथाशब्दः ॥ १९ ॥

**एवमुक्त्वा विश्रान्तवाचि वाचस्पतिसमे मन्त्रिणि राजापि प्रेम-द्रवार्द्रया[३] दृशा नलमवलोक्य वक्तुमारभत ।**

वाचस्पतिसमे-बुद्ध्या गुरुसमाने मन्त्रिणि सालङ्कायने एवं-अमुना प्रकारेण उक्त्वा विश्रान्ता-उपरता वाक् यस्य स तस्मिन् विश्रान्तवाचि सति, तूष्णीं भजमाने सतीत्यर्थः । राजाऽपि वीरसेनोऽपि प्रेमैव द्रवः-जलं तेन आर्द्रया-स्निग्धया दृशा नलमवलोक्य-नलसम्मुखं वीक्ष्य वक्तुमारभत-यतते स्म ।

**'तात, युक्तमनुयुक्तोऽसि[४] सालङ्कायनेन । कस्यान्यस्य निर्यान्ति वदनारविन्दादेवंविधाः पदे पदेऽर्थसमर्था मृद्व्यो मृष्टाः श्लिष्टाश्च वाचः ।**

---

१. पार्थिवमपि अनू. । २. जिता भवेत् अनू. । ३. अग्रे गण्यतां अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तद्दर्शितस्तवानेन निर्वापितदेहः स्नेहः । स्वीकृतश्चासि[1] मनसा समस्तसाम्राज्यभारोद्वहनधुर्यतां प्रति । तेनायमेवमनुशास्ति[2] ।**

**युज्यते चैतत् ।**

**तातेति** । कोमलामन्त्रणे हे तात ! सालङ्कायनेन मन्त्रिणा युक्तं-उचितं अनुयुक्तोऽसि-शिक्षितोऽसि साधूपदेशैरुपदिष्टोऽसि । एतस्मात् सालङ्कायनादन्यस्य-अपरस्य कस्य जनस्य वदनारविन्दात् एवंविधा वाचः-वाण्यो निर्यान्ति-निस्सरन्ति । किम्भूता वाचः ? विभक्त्यन्तं पदं पदे पदे अर्थेन-अभिधेयेन समर्था-युक्ता अर्थसमर्थास्तथा मृद्व्यः-सुकुमारास्तथा मृष्टाः विशुद्धाः-वाग्दोषरहिताः तथा श्लिष्टाः-भङ्गश्लेषोक्तिसंगताः ।

**तदिति** उपसंहारे, तस्मात्तव अनेन-मन्त्रिणा शिक्षावचांसि वदता निर्वापितः-शान्तीकृतो देहो येन ईदृशः स्नेहो दर्शितः । च-पुनः अनेन मन्त्रिणा मनसा कृत्वा त्वं समस्तो यः साम्राज्यभारः-राज्यभारस्तस्योद्वहने-धारणे या धुर्यता-धौरेयता तां प्रती स्वीकृतोसि-अङ्गीकृतोसि, समस्तं राज्यभारमसौ धारयिष्यतीत्येवं आकलितोसि । तेन कारणेन अयं मन्त्री एवं हितोपदेशेन अनुशास्ति-शिक्षयति, यो हि योग्यो भवति तस्यैव शिक्षा दीयत इत्यर्थः । एतत अनुशासनं च मन्त्रिण एव युज्यते-घटते ।

**तथा हि–**

**संग्रहं नाकुलीनस्य सर्पस्येव करोति यः ।**
**स एव श्लाघ्यते मन्त्री सम्यग्गारुडिको यथा ॥ २० ॥**

**तथा ही**ति-तदेव दर्शयति–

**संग्रह**मिति । स एव मन्त्री सम्यग्गारुडिक इव श्लाघ्यते-प्रशस्यते यः सर्पस्येव दुष्टस्य अकुलीनस्य-अनभिजातस्य संग्रहं-स्वीकारं न करोति । किम्भूतस्य सर्पस्य ? नाकुः-वल्मीकस्तत्र लीनस्य-प्रविष्टस्य, गारुडिको हि नाकुलीनस्य सर्वस्य संग्रहं करोतीति । कर्मणामारम्भोपायः पुरुषद्रव्यसम्पद्देशकालविभागो विनिपातः प्रतीकारः[1] कार्यसिद्धिश्चेति पञ्चाङ्गो मन्त्रः । गारुडिकादिविषयश्चेति योगान् मन्त्रिणावम्मान्या[2] हि तुण्डिको । अत्र यथाशब्द इवार्थः ॥ २० ॥

**किं च–**

**न पश्यसि सांप्रतमिद[3]मस्माकमतिभीरुभूपालमण्डलमिव बलि-**

---

१. विनिपातप्रतीकारः अनू. । २. मन्त्रिणावमात्या अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**भिराक्रान्तम्, अशेषमङ्गम्, अतिजीर्णशीर्णकुथ्यत्कर्पटखण्डमिवावरीतुं न शक्यते। क्वाप्युपरिपतितभ्रूचक्रा भीरुभटपेटीव नष्टादृष्टिः ।**

**ये हितवर्गोपदेशिनो मुख्यास्तेऽपि सालङ्कायनप्रभृतयो मन्त्रिण इव विरलीभूता दन्ताः । शब्दशास्त्रे हि राजादीनामदन्तता श्लाघ्यते । नान्यत्र ।**

**तदिदानीं मम वन्यश्वापदमिव विषयविमुखं मनो वनाय धावति । कृतं च यन्मनुष्यजन्मनि[१] क्रियते ।**

**तथाहि–**

**किञ्च**-पुनस्त्वां साम्प्रतमिदं अस्माकं वलयस्त्वक्शैथिल्यानि तैराक्रान्तं-आश्लिष्टं अशेषं-समस्तं अङ्ग-शरीरं न पश्यसि । किमिव ? अतिभीरु-अतिभीरुकं यद्भूपाल-मण्डलं तदिव । तच्च किम्भूतम् ? बलिभि :-बलवद्भिः नृपैराक्रान्तं । तथा अशेषमङ्ग-मावरीतुं-संवरीतुं न शक्यते वृद्धत्वात्, किमिव ? अतिजीर्ण-पुराणं शीर्ण-स्फटितं कुथ्यत्-शटितं यत् कर्पटखण्डं-वासः-शकलं तदिव यथा तत् आवरीतुं-संव्यातुं न शक्यते । आवरणं-संव्यानं । अङ्गपक्षे, संवरणम् । तथा क्वापीति । उपरिपतितं-शैथिल्यात् स्रस्तं भ्रूचक्रं-भ्रूमण्डलं यस्यां सा, तथाविधा दृष्टिः क्वापि नष्टा येन न दृश्यत इत्यर्थः । केव ? भीरुभटानां पेटीव-भीरुनाहलमण्डलीव सा च उपरिपतितं भ्रूचक्रं यस्याः सा, प्रति-भटानामिति शेषः, तथाविधा न पश्यतीति । भीरवो हि वैरिणि विलोकयति पलायन्ते । पेटशब्दः सङ्घाते त्रिलिङ्गः ।

तथा **ये** हितवर्गं-हितसमूहं उपदिशन्तीत्येवंशीला हितवर्गोपदेशिनो मुख्याश्च-प्रधानास्तेऽपि सालङ्कायनप्रभृतयो मन्त्रिण इव-अमात्या इव विरलीभूता दन्ताः । यथा सालङ्कायनप्रभृतयो मन्त्रिणो विरलीभूताः-विरला एव केचिन्न सर्वे । तथा ये दन्ता हि स्फुटं तवर्गमुपदिशन्ति-उच्चारयन्ति ये ते तथाविधाः, तवर्गस्य दन्त्यत्वात् । तथा चोक्तम्-"**लृतुलसानां दन्ताः**" [पा० सू० ५।१।९] इति । तथा मुखे भवा मुख्यास्तेऽपि अविरला विरलाः-सम्पन्ना विरलीभूताः वलिग्रस्तानां हि मांसमुक्ता दन्ता विरलाः स्युः, मुख्याश्चतुः-संख्या राजदन्ताः । शब्दशास्त्रे हि व्याकरणे राजादीनां-राजादिगणोक्तानां शब्दानां अदन्तता अत्-अन्ते-येषां ते अदन्तास्तद्भावो अदन्तता श्लाघ्यते-प्रशस्यते, न अन्यत्रमुखे अदन्तता-दन्ताभावत्वं श्लाघ्यते, मुखं हि दन्तसङ्गतमेव शोभते ।

**तदिति** उपसंहारे, तस्मात् इदानीं मम वन्यश्वापदमिव मनो वनाय धावति-द्रुतं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गच्छति । किम्भूतं मनः ? विषयेभ्यः-इन्द्रियार्थेभ्यो विमुखं-पराङ्मुखं[१] पराङ्मुखीभूतं विषयोपभोगं नेहत इत्यर्थः, अतएव वनाय धावतीति । किम्भूतं वन्यश्वापदम् ? विषयात्-जनपदात् विमुखं वनप्रियत्वात्, च-पुनः मनुष्यजन्मनि यत् क्रियते परोपकारादि तत्कृतम् ।

**तथाही**ति । तदेव दर्शयति-

**एताः प्राप्य परोपकारविधिना नीताः श्रियः श्लाघ्यता-**
**मापूर्वापरसिन्धुसीम्नि च नृपाः स्वाज्ञां चिरं ग्राहिताः ।**
**भूभारक्षमदोर्युगेन भवता जाता वयं पुत्रिण-**
**स्तत्संप्रत्युचितं यदस्य वयसस्तत्कर्म कुर्मो वयम् ॥ २१ ॥**

**एता** इति । एताः-हस्त्यश्वादिरूपाः श्रियः-लक्ष्म्यः प्राप्य परोपकारविधिना-परोपकारकरणेन श्लाघ्यतां-प्रशंसनीयतां नीताः श्रियस्ता एव प्रशंस्या याः परोपकाराय प्रवर्त्यन्ते[२] । तथा च-पुनः पूर्वापरसिन्धोः सीमानं आमर्यादीकृत्य आपूर्वापरसिन्धुसीम्नि-पूर्वापरसमुद्रपर्यन्तं यावत् नृपाश्चिरं-चिरकालं स्वाज्ञां-स्वादेशं ग्राहिताः, सर्वेऽपि भूपाः स्वाज्ञायां प्रवर्तिता इत्यर्थः । "**अत्युपाङ्भिः पञ्चम्यादयो द्वितीया च**" इति सूत्रात् आङ्योगे सप्तम्यपि । तथा भूभारस्योद्वहने क्षमं-योग्यं दोर्युगं यस्य स तेन भवता वयं पुत्रिणः-प्रशस्यपुत्रवन्तो जाताः । तदिति उपसंहारे, सम्प्रति यत् अस्य वयसः-वृद्धत्वस्य उचितं-योग्यं वनवासादि तत्कर्म वयं कुर्मः । "**वर्त्तमान सामीप्ये वर्त्तमानवद्वा**" [पा० सू० ३।३।१३१] इति भणनादत्र भविष्यति वर्त्तमाना तेन करिष्याम इति ध्येयम् । पुत्रिण इति "**अत इनि ठनौ**" [पा० सू० ५।२।११५] इतीनिः । स चात्र "**भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायिनि । संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः ।**" [पा० सू० ५।२।९४ वार्तिक] भूमनि गोमान् निन्दायां, ककुद्मती कन्याप्रशंसायां, मनस्वी नित्ययोगे, सानुमान्-गिरिः, अतिशायिनि स्तनकेशवती स्त्री, संसर्गे दण्डी, अस्तिमान् सम्पन्नः, इत्युक्तेः प्रशंसार्थो बोद्धव्यः । एतावता यथाक्रम धर्मार्थकाममोक्षाणामुपन्यासः ॥ २१ ॥

**इत्यभिधाय तत्कालमेव मौहूर्त्तिकानाहूयादिदेश-'कथ्यतां यौवराज्याभिषेकोत्सवाय[१] दिवसः' इति ।**

**अथ कथयामासुस्तेऽपि-'देव, श्रूयतामनवद्यमद्यतनमेव[२] राज्या-**

१. नास्ति अनू. । २. प्रवर्तन्ते अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**भिषेकयोग्यमहः । केन्द्रस्थानवर्त्तिनः सर्वेऽप्युच्चग्रहाः[१], पुण्यो मासः, पूर्णा तिथिः, श्लाघ्यो योगः, प्रशस्तो वारः, शुभं नक्षत्रम्, कल्याणी वेला, विधीयतां यद्विधेयम्' इत्यभिधाय स्थितेषु[२] तेष्वनन्तरमेव सुश्रोणि !, श्रूयतां यदस्माभिः श्रुतमाश्चर्यम् ।**

**इति**-पूर्वोक्तमभिधाय-उक्त्वा तत्कालमेव-तस्मिन्नेव समये मौहूर्तिकान्-दैवज्ञान् आहूय-आकार्य आदिदेश-आदिष्टवान् । भो मौहूर्त्तिकाः ! यौवराज्याभिषेकोत्सवाय दिवसः कथ्यतामिति ।

**अथ** सद्दिवसप्रश्नानन्तरं तेऽपि-दैवज्ञाः कथयामासुः-अवादिषुः । हे देव ! श्रूयतां-आकर्ण्यतां अनवद्यं-निर्दोषं अद्यभवं-अद्यतनमेव राज्याभिषेकस्य-नृपपट्टाभिषेकस्य योग्यं-उचितं अहः-दिनं वर्तते । कथं ? सर्वोप्युच्चग्रहाः केन्द्रस्थानवर्तिन कण्टकावस्थिताः, तथा पुण्यः-शुभकर्मकरणार्हो मासः, उत्तरायणत्वात् । तथा पूर्णा तिथिः पञ्चम्यादिः । तथा श्लाघ्यः-प्रशंस्यो योगः शुभादिः । तथा प्रशस्तोऽभिषेकोऽर्हो वारः-बृहस्पत्यादिः । तथा शुभं नक्षत्रं पुष्यादिः । तथा कल्याणी-कल्याणकारिणी वेला-अमृतादिशुभहोरारूपा । तस्माच्छुभमद्य दिनं वर्तते, यद्विधेयं-कर्त्तव्यं तद्विधीयताम् । इत्यभिधाय तेषु दैवज्ञेषु स्थितेषु-तूष्णीमाश्रितेषु सत्सु हे सुश्रोणि !-शोभननितम्बबिम्बे अनन्तरमेव-तेषां कथनादनु यत् अस्माभिराश्चर्यं-अद्भुतं श्रुतं तत्श्रूयताम् । आश्चर्यं अद्भुतेऽर्थे निपात्यते । तद्यथा-

**उचितमुचितमेतद्धैर्यधाम्नां नृपाणां,**
**वयसि कटुनि कान्तालोचनानां तृतीये ।**
**इति रभसमिवास्य प्रस्तुतं श्लाघमानो[३],**
**वियति पटुरकस्मादुत्थितस्तूर्यनादः ॥ २२ ॥**

**उचित**मिति । धैर्यमेव धाम-तेजो येषां ते धैर्यधामानस्तेषां नृपाणां तृतीये वयसि-वार्द्धके एतत्-पुत्रस्य राज्याभिषेचनं, आत्मना च वनाय गमनं उचितं उचितं भृशार्थे द्विरुक्तिः, अतिशयेन योग्यमित्यर्थः । किम्भूते तृतीये वयसि ? कान्तालोचनानां कटूनि-अप्रिये वल्यादिसंवलिताङ्गत्वात् तासां तत्राऽप्रीतेः । इति-अमुना प्रकारेण अस्य-वीरसेनस्य प्रस्तुतं-राज्याभिषेकवनगमनादिकं रभसं-हर्षं श्लाघमान इव-स्तुवन्निव वियति-आकाशे अकस्मात्-अकाण्ड एव पटुः-स्पष्टस्तूर्यनाद उत्थितः-उच्छलति स्म । "रभसो वेगहर्षयोः" [३।७।९५] **इत्यनेकार्थः** ॥ २२ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अपि च–**

**उपरि परिमलान्धैः सस्वरं[1] संचरद्भि-**
**र्मधुकरनिकुरम्बैश्चुम्ब्यमाना[2] भरेण[3] ।**
**अविरलमधुधारासारसंसिक्तभूमिः,**
**सदसि सुरविमुक्ता प्रापतत्पुष्पवृष्टिः ॥ २३ ॥**

**अपि च**-पुनर्यज्जातं तदाह–

**उपरीति** । सदसि-सभायां सुरैः-देवैर्विमुक्ता पुष्पवृष्टि[1] प्रापतत्-पतिता । किम्भूता पुष्पवृष्टिः ? परिमलेन-आमोदेन अन्धाः-आकुलितास्तैः, तथा सस्वरं-सझङ्कारारवं यथा भवति तथा उपरि पुष्पाणामूर्ध्वं सञ्चरद्भिः-परिभ्रमद्भिः मधुकरनिकुरम्बैः-[2] अलि-पटलैर्भरेण-अतिशयेन चुम्ब्यमाना-आस्वाद्यमाना । यतः किम्भूताः ? अविरला-निविडा या मधुधारा-पुष्परसपातः सैव आसारः-वेगवद्वर्षस्तेन संसिक्ता-आर्द्रीकृता भूमिर्यया सा तथाविधा । अथवा भरेण-भारेण प्रापतदित्यन्वयः । "**भरोऽतिशयभारयोः**" [२।४५६] इत्य**नेकार्थः** ॥२३॥

**अवतेरुश्च तत्कालमेवाम्बरतलादुल्लसद्ब्रह्मकान्तिकलापपवित्री-कृताष्टदिग्भागभूमयः सकलसागरसरित्तीर्थाम्बुपूर्णकमण्डलुमृत्कुश-[4]कुसुमौषधिरुद्धपाणयो दर्शनादेवापनीतसमस्तकलिकल्मषाः केऽपि कुतोऽपि ब्रह्मर्षयः ।**

**सहर्षेण सविनयेन सविस्मयेन[5] सपरिवारेण[6] चलत्कर्णोत्पलगलद्-बहल[7]रजःपुञ्जपिञ्जरितकपोलपालिना पृथ्वीपालेन प्रणम्य[8] कृतातिथेयाः समुचितान्यलंचक्रुरासनानि ।**

**कृतकुशलप्रश्नालापाश्च प्रस्तुतकुमाराभिषेकस्य नरपतेः स्वस्व-कमण्डलुवारीणि दर्शयामासुः ।**

**अवेति** । न केवलं पुष्पवृष्टिरपतत्, च-पुनः तत्कालमेव तस्मिन्नेव समये केऽपि कुतोऽपि ब्रह्मर्षयः अम्बरतलात्-नभस्तः अवतेरुः-अवतीर्णाः । किम्भूताः ? उल्लसन्-उत्सर्पन् यो ब्रह्मकान्तिकलापः-तपस्तेजः समूहस्तेन पवित्रीकृताः-शुचिकृताः अष्टदिग्-भागभूमयो[3] यैस्ते तथाविधाः, अष्टस्वपि दिक्षु ब्रह्मकान्तीनां प्रसरणात् । "**ब्रह्मा तु तपसि**

१. पुष्पवृष्टिः अनू. । २. निकुरुम्बैः अनू. । ३. अष्टसंख्या० अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**ज्ञाने**'' [२।२७९] इत्य**नेकार्थः** । तथा सकलानां-समस्तानां सागरसरित्तीर्थानां-समुद्रनदीप्रयागादीनां यानि अम्बूनि तैः पूर्णा-भृता ये कमण्डलवः-कुण्डिकास्तथा तेषामेव या मृत्-मृत्तिका, तथा कुशाः-दर्भाः कुसुमानि-पुष्पाणि औषधयः-वनस्पति-विशेषास्ततो द्वन्द्वस्तै रुद्धौ-भृतौ पाणी-हस्तौ येषां ते तथाविधाः । केचिज्जलभृतकुण्डिका हस्ताः, केचित्तीर्थमृत्सहितहस्ता इत्यादि । तथा दर्शनादेव-स्वरूपालोकनादेव अपनीतानि-दूरीकृतानि समस्तानि कलेः-कलियुगस्य कल्मषाणि-पापानि यैस्ते तथाविधाः । दर्शनादिति ण्यन्ताद् दृशेर्युटि रूपम् ।

अथ **सहर्षेण**-सप्रमोदेन तथा सविनयेन-विनयसहितेन तथा सविस्मयेन-साश्चर्येण तथा सपरिवारेण-सपरिच्छदेन तथा चलतीप्रणामात् कम्पमाने ये कर्णोत्पले-श्रवणाम्भोजे ताभ्यां गलन्-क्षरन् बहलः-निविडो यो रजःपुञ्जः-परागवृन्दं तेन पिञ्जरिते-पिङ्गीकृते कपोलपाली प्रशस्तकपोलौ यस्य स, ईदृग्विधेन तेन पृथ्वीपालेन वीरसेनेन प्रणम्य-शिरसा नमस्कृत्य कृतं आतिथेयं-अतिथिकर्मणि साधु जलाक्षतदानादि येभ्यस्ते कृताऽतिथेयाः सन्तस्ते-ब्रह्मर्षयः समुचितानि-तेभ्यो योग्यानि आसनानि-पीठानि अलञ्चक्रुः-भूषयामासुः । पालिशब्दस्य समासो केशपाशवत् प्रशंसार्थत्वात्, भित्तिपर्यायो लेखापर्यायो वा पालिशब्दस्तः कपोलभित्ती कपोललेखेव इत्यर्थः । अतिथिषु साधु आतिथेयं ''**पथ्यतिथिवसतिस्वपतेर्ढक्**'' [पा० सू० ४।४।१०४] ।

अथ आसनोपवेशानन्तरं **कृतः** कुशलप्रश्नस्य आलापः-भाषणं यैस्ते कृतकुशल-प्रश्नालापाः भवतां कुशलमित्येवं कृतोल्लापा ब्रह्मर्षयः प्रस्तुतः-आरब्धः कुमाराभिषेको येन स तस्य नरपतेः-वीरसेनस्य स्वस्य स्वस्य कमण्डलोः-कुण्डिकाया वारीणि दर्शयामासुः । तथाहि—

**इदं मन्दाकिन्याः सलिलमवगाहागतमरु-**
**त्पुरन्ध्रीणां पीनस्तनशिखरभुग्नोर्मिवलयम् ।**
**इदं कालिन्द्याश्च प्रविकसिततीरद्रुमलता-**
**पतत्पुष्पैरन्तःसुरभिततरङ्गं नृप पयः ॥ २४ ॥**

**इदं गोदावर्यास्त्रिनयनजटाखण्डगलितं[१],**
**महाराष्ट्रीनेत्रैः कृतकुवलयं मज्जनविधौ ।**
**इदं चापि प्रेङ्खन्मुनिजनविकीर्णार्घकमलं,**
**जलं[२] विन्ध्यस्कन्धस्थलविलुलितं नार्मदमपि ॥ २५ ॥ युग्मम्**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इद**मिति । हे राजन् ! इदं मन्दाकिन्या-गङ्गायाः सलिलं । किम्भूतं ? अवगाहाय जलक्रीडार्थमागता या मरुत्पुरन्ध्रयः-देवनार्यस्तासां पीनस्तनशिखरेण-पीवरपयोधराग्रेण भग्न उर्मिवलयः-वीचिमण्डली यस्य तत् । हे नृप ! च-पुनः इदं कालिन्द्याः-यमुनायाः पयः-पानीयम् । किम्भूतं ? प्रविकसितानि-विहसितानि तथा[१] तीरद्रुमलताभ्यः पतन्ति च यानि पुष्पाणि तैः कृत्वा अन्तः-मध्ये सुरभिताः-सुवासितास्तरङ्गा यस्य तत् तथाविधम् ॥ २४ ॥

**इद**मिति । हे नृप ! इदमपि गोदावर्याः-गोदानाम्न्याः सरितः-जलं । किम्भूतम् ? त्रिनयनजटाखण्डात्-शम्भुजटाजूटाः तस्मात् गलितं-पतितम् । पुनः किम्भूतम् ? मज्जन-विधौ-स्नानविधाने महाराष्ट्रीणां-महाराष्ट्रदेशीयस्त्रीणां नेत्रैः कृतानि कुवलयानि नीलोत्पलानि यत्र तत्, तत्र ता मज्जन्ति, ततस्तासां नेत्राणि नीलोत्पलभ्रान्तिं जनयन्तीति भावः । च-पुनः इदं नर्मदायाः-नार्मदमपि जलम् । किम्भूतं ? प्रेङ्खन्तः-दीप्यमाना ये मुनिजनास्तैर्विकीर्णानि-विक्षिप्तानि अर्घार्थं कमलानि यत्र तत् । यद्वा, प्रेङ्खदिति भिन्नं जलविशेषणम् । पुनः किम्भूतम् ? विन्ध्यस्कन्धःस्थले-विन्ध्याचलमध्यभागे विलुलितं-क्षुभितं तत्प्रदेशस्य स्थपुटत्वात् ॥ २५ ॥

**इतश्च–**

**तदेतत्पुण्यानां परममवधिं प्राप्तमुदधेः-**
**पयः प्रक्षाल्याङ्घ्री शयनसमये शार्ङ्गधनुषः ।**
**विहारायोन्मज्जद्वरुणवनितावृन्दवदनैः,**
**क्षणं यत्प्रोत्फुल्ल[१]न्नवकलमखण्डश्रियमधात् ॥ २६ ॥**

**इतश्चे**ति । हे नृप ! इतः-अस्मिन् प्रदेशे वीक्षस्व–

**तदेत**दिति । शयनसमये-युगान्ते शार्ङ्गधनुषः-विष्णोः सम्बन्धिनौ अंह्री-चरणौ प्रक्षाल्य पुण्यानां-पवित्राणां मध्ये परममवधिं परमां सीमानं प्राप्तं-गतं, एतस्मादधिकं पवित्रं न किञ्चिदस्तीत्यर्थः । उदधेः-समुद्रस्य तदेतत् पयो वर्तते, यत्पयःविहाराय-क्रीडार्थं उन्मज्जन्ति-उच्चैर्भवन्ति यानि वरुणवनितावृन्दवदनानि-पाशभृल्ललनावलिवक्त्राणि तैः कृत्वा क्षणं यावत् प्रोत्फुल्लन्नवकमलखण्डश्रियं-विकसदम्भोजखण्डशोभां अधात्-दधौ । मन्ये, वरुणवधूनाममूनि मुखानि न भवन्ति किन्तु विकसन्त्यम्भोजान्यमुनि वर्तन्त इति ॥२६॥

---

१. 'तथा' स्थाने 'यानि' अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

राजा तु तत्कालमुन्मीलद्बहल[१]पुलकाङ्कुरकोरकितकायः[२] किमप्यद्भुतरसेनावेशित इव त्रिधूय शिरं[३] चिन्तयाञ्चकार ।

'नूनमय[४]मस्मद्गृहे हरिहरब्रह्मणामेकतमः[५] कोऽप्यवतीर्णो भविष्यति । यतः । क्वायं शिक्षाक्रम[६]:, क्वेयमस्माकमाकस्मिकी यूनोऽस्या[७]भिषेकाय बुद्धिः, क्व चानुकूलकालसंपत्तिः[८], क्व चामी समस्ताभिषेकोपकरणपाणयो महामुनयः ।

सर्वथा नमोऽस्तु घटितदुर्घटाय वेधसे । यस्यायमेवमद्भुतो व्यापारः, इत्यवधारयन्नुत्थाय गृहीत्वा तानि तीर्थोदकानि कृत्वा कनककुम्भेषु तात्कालिकास्फालितमृदङ्गझल्लरीरवरभसोल्लासि[९]विलासिनीवृन्दैरानन्द्यमानो मङ्गलोद्गारमुखरपरिजनपरिवृतः सह सालङ्कायनेन 'सहस्त्रं समास्तात एवानुपालयतु राज्यम्' इत्यभिदधानमनिच्छन्तमपि नलं बला[१०]न्निवेश्याभिषेकपट्टे स्वयमेवाभिषेकमकरोत् ।

परिधाप्य च मङ्गलाभरणवाससी सिंहासनमारोप्य पुत्रप्रेम्णा पुरः स्थित्वा क्षणं[११] प्रातिहार्य[१२]मन्वतिष्ठत् ।

सालङ्कायनोऽप्यतिस्नेहेनास्योपरिलम्बित[१३]मुक्ताकलापमास्त्रवत्सुधाधारं कनकगिरिशिखरस्थित[१४]मिन्दुमण्डलमिव कनकदण्डमापाण्डुरमातपत्रमधारयत् ।

सामन्तचक्रं[१५] च चलच्चामीकरचारुचामरकलापव्यापृतकरपल्लवमस्याग्रे विनयमदर्शयत्[१६] ।

मुनयोऽप्युच्चारयांचक्रुश्चतुर्वेदसमस्तमन्त्रान्[१७] । उत्थाय च गृहीत्वाक्षताञ्शिरसि विकिरन्तोऽस्य पुनरिदमवोचन्[१८] ।

राजा तु वीरसेनः तत्कालं-ब्रह्मर्षिदर्शितजलविलोकनसमकालमेव उन्मीलन्तः-निर्गच्छन्तो बहलाः-निविडा ये पुलकाङ्कुराः-रोमाञ्चप्ररोहास्तैः कोरकितः-कुड्मलितः कायः-शरीरं यस्य स तथाविधः, किमपि-वक्तुमशक्येन अद्भुतरसेन-आश्चर्यरसेन आवेशित इव-ग्रहगृहीत इव शिरो विधूय चिरं-चिरंकालं चिन्तयाञ्चकार-विचारयामास ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नूनं-निश्चितं अयं-नलो अस्मद्गृहे हरिहरहिरण्यगर्भाणां-विष्णुशम्भुवेधसां मध्ये एकतमः-अन्यतमो हरिर्हरो वेधा वा कोऽपि अवतीर्णो भविष्यति । यतः क्वायं शिक्षाक्रमः-सालङ्कायनोक्तशिक्षापरिपाटी । तथा अस्माकं आकस्मिकी-अकाण्ड एवोत्पन्ना अस्य यूनः-तरुणस्य अभिषेकाय बुद्धिः क्व ? च-पुनः अनुकूलकालस्य-सन्मुहूर्त्तयोगस्य सम्पत्तिः क्व ? तथा समस्तानि अभिषेकोपकरणानि-तीर्थजलौषध्यादीनि पाण्योर्येषां ते ईदृग्विधा अमी महामुनयः-ब्रह्मर्षयः क्व च ।

**घटितं**-योजितं दुर्घटं-घटयितुमशक्यं शिक्षाप्रक्रमादिलक्षणं येन तस्मै वेधसे सर्वथा नमोऽस्तु । यस्य-वेधसो अयं-शिक्षाप्रक्रमादिरूप एवमिति-एवंविधोऽद्भुतो व्यापारः, इत्यवधारयन् मनसि आकलयन्-उत्थाय तानि ऋषिवितीर्णानि तीर्थोदकानि गृहीत्वा, तथा कनककुम्भेषु कृत्वा-स्वीयस्वर्णघटेषु निक्षिप्य तत्काले-अभिषेकसमये भवस्तात्कालिकः-तत्समयोत्थ आस्फालितमृदङ्गझल्लरीणां-वादितमुरजझर्झरीणां यो रवस्तेन रभसात्-हर्षात् उल्लासीनि-उत्प्लवमानानि यानि विलासिनीवृन्दानि-कामिनीसमूहास्तैरानन्द्यमानः-हृष्यमाणः तात्कालिक इति **अध्यात्मादित्वाद्** ठञ् । [पा० सू० वार्तिक] । तथा मङ्गलोद्गारेण-मङ्गलवाक्योच्चारेण मुखरः-वाचालो यः परिजनस्तेन परिवृतः सन् राजा-तात एव सालङ्कायनेन मन्त्रिणा सह सहस्रं समाः-सहस्रवर्षाणि यावत् राज्यमनुपालयतु इति अभिदधानं[१]-वदन्तं अनिच्छन्तमपि-अनीहमानमपि नलं बलाद्-हठाद् अभिषेकपदे-स्नानपीठे निवेश्य-संस्थाप्य स्वयमेव अभिषेकं-अभिषेचनं अकरोत् ।

तथा अभिषेकानन्तरं मङ्गलार्थे ये आभरणवाससी-अलङ्कारवस्त्रे ते परिधाप्य च-पुनः सिंहासनं-नृपासनमारोप्य-अवस्थाप्य पुत्रप्रेम्णा-सुतस्नेहेन सिंहासनोपविष्टस्य पुत्रस्य पुरः स्थित्वा क्षणं-मुहूर्त्तमेकं यावत् प्रातिहार्यं-प्रतीहारकत्वं, दण्डधरत्वं अन्वतिष्ठत्-चकार ।

**सालङ्कायनोऽपि** अतिस्नेहेन-अतिप्रेम्णा अस्य-नलस्योपरि आपाण्डुरं-समन्ताद्धवलं आतपत्रं अधारयत्-बभार । किम्भूतम् ? लम्बितः-प्रान्ते मालावल्लम्बायमानीकृतो मुक्ताकलापः-मौक्तिकसमूहो यस्य तत् । पुनः किम्भूतम् । कनकस्य दण्डः-यष्टिर्यस्य तत्तथाविधं । उत्प्रेक्ष्यते, आस्रवन्ती-गलन्ती सुधाधारा-पीयूषप्रवाहो यस्य तत्, तथा कनकगिरेः-मेरोः शिखरे स्थितं ईदृग्विधं इन्दुमण्डलमिव-चन्द्रबिम्बमिव । छत्रस्य चन्द्रबिम्बं, लम्बितमुक्ताकलापस्य सुधाधारा, कनकदण्डस्य च कनकगिरिशिखरमुपमानम् ।

**सामन्तचक्रं** च-मण्डलेश्वरपटलं चलन्ति-वीजनाय प्रवर्तितमानत्वात्[२] कम्पमानानि चामीकरेण-स्वर्णेन चारूणि-मनोज्ञानि यानि चामराणि-प्रकीर्णकानि तेषां चः-कलापः-वृन्दं

---

१. अभिधानं अनू. । २. प्रवर्तितत्वात् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्मै व्यापारितः-नियोजितः करपल्लवो येन तत्तथाविधं सत् अस्य-नलस्य अग्रे विनयं-सेवां अदर्शयत् ।

**मुनयो**ऽपि चतुर्णां वेदानां समस्ता ये मन्त्रास्तान् उच्चारयाञ्चक्रुः-अवादिषुः, उत्थाय-आसनानि मुक्त्वा अक्षतान्-लाजान् गृहीत्वा अस्य-नलस्य शिरसि विकिरन्तः-विक्षिपन्तः पुनरिदमवोचन् ।

**याः स्कन्दस्य जगाद तारकजये देवः स्वयंभूः स्वयं,**
**स्वःसाम्राज्यमहोत्सवेऽपि च शचीकान्तस्य वाचस्पतिः ।**
**ताभिस्तेऽद्य[1] विरिञ्चि[2]वक्त्रसरसीहंसीभिराशास्महे,**
**वैदीभिर्वसुधाविवाहसमये मन्त्रोक्तिभिर्मङ्गलम् ॥ २७ ॥**

**याः स्कन्दस्ये**ति । हे नृप ! ते-तव वसुधाविवाहसमये-राज्याभिषेकसमये अद्य ताभिर्वैदीभिः-वेदसम्बन्धिनीभिः मन्त्रोक्तिभिः-मन्त्रवाक्यैर्मङ्गलमाशास्महे-मङ्गलाशिषं दद्महे । ताभिरिति काभिः ? या मन्त्रोक्तीर्देवः स्वयम्भूः-ब्रह्मा स्कन्दस्य-गुहस्य तारदैत्यस्य जये स्वयं जगाद-उवाच । अपि च-पुनः या मन्त्रोक्तीः शचीकान्तस्य-इन्द्रस्य स्वः- साम्राजस्य महोत्सवे-स्वर्गराज्याभिषेके वाचस्पतिः-बृहस्पतिर्जगाद । किम्भूताभिर्मन्त्रोक्तिभिः ? विरिञ्चेः-ब्रह्मणो या वक्त्रसरसी-आननमहासरस्तस्यां हंस्य इव यास्तास्ताभिः । यथा सरस्यां हंस्यो विलसन्ति तथा ब्रह्मवक्त्रेषु मन्त्रोक्तय इति । सरसीति "**षिद्गौरादिभ्यश्च**" [पा० सू० ४।१।४] इति सरःशब्दस्य गौरादिपाठात् ङीप् । "**महान्ति सरांसि सरस्यः**" [ ] इति **जिनेन्द्रबुद्धिः** । सरसीशब्दे पिप्पलादित्वान्महत्त्वे स्त्रीप्रत्यय इति केचित् ? **अमरसिंहस्तु** "**कासारः सरसी सरः**" [१।१०।२८] इति निर्विशेषमूचे ॥२७॥

**अन्यदपि तत्र दिवसे सुभ्रु[3] समाकर्ण्यतां यदद्भुतमभूत् ।**
**दिशः प्रसेदुः सुरभिर्ववौ मरुद्दिवो निपेतुः सुरपुष्पवृष्टयः ।**
**कृताभिषेकस्य नलस्य[4] निस्वनाननाहता दुन्दुभयोऽपि चक्रिरे ॥२८॥**

हे सुभ्रु ! दमयन्ति ! तत्र दिवसे अन्यदपि-अस्माद्व्यतिरिक्तमपि यदद्भुतमभूत् तत्समाकर्ण्यतां-श्रूयताम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**दिश** इति । दिशः-आशाः प्रसेदुः-विमला जाताः, तथा मरुद्-वायुः सुरभिः-सुगन्धिर्ववौ-वाति स्म, तथा सुरमुक्ता पुष्पवृष्टयो दिवः-व्योम्नो निपेतुः-पतिताः, तथा कृतोऽभिषेकः-अभिषेचनं यस्य स तस्य नलस्य अनाहता अपि-अताडिता अपि दुन्दुभयः-भेर्यः निस्वनान्-ध्वनीन् चक्रिरे-विदधिरे । अवादिता अपि भेर्यो दध्वनुरित्यर्थः ॥२८॥

**अन्तरिक्षे च कोऽप्यदृश्यमान एवाशीः श्लोकद्वयमपठत् ॥**

**अहीनां मालिकां बिभ्रत्तथापीताम्बरं वपुः ।**
**हरो हरिश्च भूपेन्द्र[1] करोतु तव मङ्गलम् ॥ २९ ॥**

**अपि च[2]—**

**लीलया मण्डलीकृत्य भुजंगान्धारयन्हरः ।**
**देयाद्देवो वराहश्च तुभ्यमभ्यधिकां श्रियम् ॥ ३० ॥**

**अन्तरिक्षे** च-आकाशे कोऽपि अदृश्यमान एव-अनवलोक्यमान एव आशिषा सम्बद्धं श्लोकद्वयं अपठत्- अवादीत् । तद्यथा—

**अहीना**मिति । हे भूपेन्द्र ! हरो हरिश्च तव मङ्गलं कल्याणं करोतु । किं कुर्वन् शिवः ? अहीनां-सर्पाणां मालिकां-स्रजं तथा-तेन प्रकारेण इताम्बरं-ताण्डवादिष्वति-विततमूर्त्तित्वात् व्याप्ताकाशं न केवलं व्याप्तपृथ्वीकं किन्तु इताम्बरमपीत्यर्थ । अष्टमूर्ति-र्भगवान् यत्**प्रल्हणः "उर्वीसमीरणयजमानजलानलार्कसोमाम्बरादिभिः"** [ ] इति । अथवा पराचीनावस्थायां दिगम्बरात्[1] इताम्बरं-गतवस्त्रम् । अत्र पक्षे, अपिः-समुच्चये । यदि वा आ-समन्तात् पीतं-ग्रस्तं अतिविततया छन्नमम्बरं-आकाशं येन तदापीताम्बरं, तथाविधं वपुः-शरीरं बिभ्रन्-धारयन् । हरिश्च-विष्णुर्वनमालीति ख्यातत्वात्, अहीनां-पूर्णामेव मालिकां तथा पीताम्बरं-हारिद्रवसनं वपुर्बिभ्रत् ॥ २९ ॥

**अपि च**-पुनः—

**लीलये**ति । हरः देवो वराहश्च-देवस्तुभ्यं अभ्यधिकां-अतिशायिनीं श्रियं-लक्ष्मीं देयात्-ददातु । किम्भूतो हरः ? लीलया-अवज्ञया भुजङ्गान्-सर्पान् मण्डलीकृत्य-वलयाकारान् विधाय धारयत्-बिभ्रत् । वराहस्तु भुजं-बाहुं मण्डलीकृत्य-वलयीकृत्य गां-भुवं धारयन् । अत्र वराह इति नरवराहमूर्त्तिर्नरसिंहवत् ॥ ३० ॥

---

१. दिगम्बरत्वात् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इत्याशास्य विश्रान्तायां वियद्वाचि स्थित्वा च किंचित्कृतोचितापचितिषु गतेषु क्षणादन्तर्धानं मुनिषु 'समुच्छ्रीयन्तां वैजयन्त्यः, बध्यन्तां तोरणानि, सिच्यंतां चन्दनाम्भोभिः पन्थानः, मण्डयन्तां मसृणमुक्ताफलक्षोदरङ्गावलीभिः प्राङ्गणानि, क्रियन्तां कुसुमप्रकरभाञ्जि चत्वराणि, पूज्यन्तां द्विजन्मानो देवाश्च[1], दीयन्तां दानानि, गीयन्तां मङ्गलानि, विसृज्यन्तां वैरिबन्द्यः, मुच्यन्तां पक्षिणोऽपि[2] पञ्जरेभ्यः' इति श्रूयमाणेषु परितः परिजनालापेषु लास्योन्मादिनि मृदुमङ्गलोद्‌गारमुखरे संचरति पुरपथेषु पौरनारीजने स दिवसः संप्राप्तस्वर्गसुखस्येव भुक्ताशेषभुवनस्येवास्वादितामृतरसस्येवानुभुक्त[3]परमानन्दस्येव राज्ञः कृतकृत्यतां मन्यमानस्यातिक्रान्तवान् ।**

**इति**-अमुना प्रकारेण आशास्य-आशीर्वचनमुक्त्वा वियद्वाचि-गगनवाण्यां विश्रान्तायां-उपरतायां सत्यां तथा किञ्चित् कालं स्थित्वा च क्षणादेव मुनिषु अन्तर्धानं-अदृश्यीभावं गतेषु सत्सु । किम्भूतेषु मुनिषु । कृता-राज्ञा विहिता उचिता-मुनिजनयोग्या अपचितिः-पूजा येषां ते कृतोचितापचितयस्तेषु । तथा इति-अमुना प्रकारेण परितः-समन्तात् परिजनानां-परिच्छदलोकानां आलापेषु-वचनेषु श्रूयमाणेषु सत्सु । इतीति किम् ? केचित् परिजनाः इत्थं वदन्ति यदद्य वैजयन्त्यः पताकाः समुच्छ्रीयन्तां-वंशाग्रेषु न्यस्यताम् । तथा केचिद् वदन्ति-तोरणानि-वन्दनमालाः बध्यन्तां-रच्यन्ताम् । "**बुधैर्वन्दनमाला च तोरणं परिकीर्त्यते**" [२।३०१] इति **हलायुधः** । तथा चन्दनाम्भोभिः-गोतीर्थजलैः पन्थानः- मार्गाः सिच्यन्तां-आर्द्रीक्रियन्ताम् । तथा मसृणः-सुकुमारो मुक्ताफलानां-मौक्तिकानां यः क्षोदः-चूर्णं तेन रङ्गः-रञ्जनं धवलीकरणं तस्य आवलयः-पंक्तयः स्थाने स्थाने धवलनमित्यर्थस्ताभिः, प्राङ्गणानि-अजिराणि मण्डयन्तां-भूष्यन्ताम्, मुक्ताक्षोदेनाङ्गणानि धवलीक्रियन्तामित्यर्थः । तथा केचिदेवं वदन्ति-चत्वराणि-संस्कृताभूमीः पन्थांश्लेषान् वा कुसुमानां प्रकरः-विप्रकरणं तं भजन्ति यानि तानि तथा क्रियन्तां, पुष्पोपचितानि विधीयन्तामित्यर्थः। तथा द्विजन्मानः-ब्राह्मणा देवाः तांश्च[1] पूज्यन्तां-अर्च्यन्ताम् । तथा दानानि दीयन्ताम् । तथा मङ्गलानि-मङ्गलवाक्यानि गीयन्तां-रागवद्ध्वनिना उच्चार्यन्ताम् । तथा वैरिणां या बन्द्यः-हठाद् गृहीताः स्त्रियो बलवतो हस्ते क्षिप्ता राजपुत्रादयश्च ता विसृज्यन्तां-उच्छृंखल्यन्ताम् । तथा पञ्जरेभ्यः-वीतंसेभ्यः पक्षिणोऽपि मुच्यन्ताम् । तथा पौरनारीजने पुरपथेषु-नगरवर्त्मसु सञ्चरति-परिभ्रमति सति। किम्भूते पौरवधूलोके ? लास्येन-नृत्येन उन्माद्यति-हृष्यतीत्येवंशीलो लास्योन्मादी तस्मिन्।

१. देवालांश्च अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुनः किम्भूते ? मृदुः-मधुरो यो मङ्गलोद्गारः-मङ्गलवाक्योच्चारस्तेन मुखरः-वाचालस्तस्मिन् । स-नलराज्याभिषेकदिवसः राज्ञः-वीरसेनस्य कृतकृत्यतां-आत्मनः सफलतां मन्यमानस्य-जानतो अतिक्रान्तवान्-जगाम । अद्याऽहं कृतकृत्यो जातो यदेतस्य नलस्य राज्याभिषेकं कृतवान् इत्येवं चिन्तयतस्तद्दिनं अयासीत् । किम्भूतस्य राज्ञः ? उत्प्रेक्ष्यते, सम्प्राप्तं स्वर्गसुखं येन तस्येव, यद्वा भुक्तं अशेषं-समस्तं भुवनं-भूमण्डलं येन तथाविधस्येव, अथवा आस्वादितः-पीतो अमृतरसो येन तथाविधस्येव, यद्वा अनुभुक्तः-अनुभूतः परमानन्दः-सुखोत्कर्षो येन तथाविधस्येव, एतावता तस्य वाचामगोचरं सुखमभूदित्यर्थः ।

**एवमतिक्रामत्सु केषुचिद्वासरेषु[१], जरठीभूते महोत्सवव्यतिकरे, गतवति यथायथ[२]मामन्त्रितायात[३]समस्तसामन्तलोके, यौवराज्यरञ्जिते च परितः परिजने जनेश्वरो रिपुपयोधि[४]वडवानलं नलमाबभाषे[५] ।**

**एवं**-अमुना प्रकारेण केषुचिद् वासरेषु-दिवसेषु अतिक्रामत्सु-गच्छत्सु सत्सु । तथा महोत्सवस्य-राज्याभिषेकमहस्य यो व्यतिकरः-सम्पर्कस्तस्मिन् जरठीभूते-चिरकालीने जाते सति । तथा स्वं स्वं पन्थानमनतिक्रम्य यथायथं-येन येन मार्गेण आयातस्तं तं मार्गं प्रतिपूर्वमामन्त्रितः-आहूतः पश्चादायातः इत्यामन्त्रितायातस्तथाविधो यः समस्तः सामन्तलोकः-मण्डलेश्वरसमूहस्तस्मिन् गतवति-गते सति । तथा चोक्तं **रघुवृत्तौ-** **"त्रिचतुराणां मण्डलानामीश्वराः सामन्ताः"** [ ] इति । च-पुनः परिजने-सेवकादिलोके परितः-समन्तात् गतवति सति । किम्भूते ? यौवराज्येन-युवराजभावेन रञ्जितः-आनन्दितो यौवराज्यरञ्जितस्तस्मिन् । जनेश्वरः-वीरसेनो रिपव एव पयोधिः-अब्धिस्तत्र शोषणाय वडवानल इव-वाडवाग्निरिव यः स तथा तं नलं आबभाषे-उवाच ।

**'तात ! किमपि ब्रूमो यदि न खिद्यसे । संप्रति सख्यं[६] श्रेयस्करमस्माकमैणम्, न स्त्रैणम् । आभरणाय योग्या जटाभाराः, न हाराः[७]। साहाय्याय[८] साधवो बुधाः, न बान्धवाः । शयनायोचिता कुशपूलिका, न तूलिका । क्रीडायै[९] वरा[१०] वेगवन्तो निर्झरप्रवाहाः न वाहाः । प्रार्थनीयाश्च हरप्रसादाः, न प्रासादाः ।**

**तदायुष्मन्नेष दृष्टोऽस्यापृष्टोऽस्याश्लिष्टोऽसि क्षमितोऽसि दुरुक्तमुक्तः'[११] इत्यभिधायोत्सङ्गमारोप्य च तत्कालगलद्बहलबाष्पाम्बुप्लवप्ला-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**विते[१२] वक्षसि निधाय परिष्वज्य च पुनः पुनः पुलककोरकित[१३]-भुजलताभ्यामन्तर्मन्युभरनिरुध्यमानोत्तरमजस्रमास्रवदश्रुक्लिन्नकपोल-माविर्भवन्मोहमूर्छान्धकारकुञ्चित[१४]लोचनमिममाघ्राय मूर्ध्नि वनाय वनिता-सहायः[१५] प्रतस्थे ।**

हे नल ! किमपि वयं ब्रूमो यदि खिद्यसे-न मनस्तापं दधासि । तद्यथा—सम्प्रति-अधुना अस्माकं एणानां-मृगाणामिदं एणं सख्यं-मैत्री श्रेयस्करं-कल्याणकारि, न स्त्रैणं सख्यम् । स्त्रीणामिदं स्त्रैणं "**स्त्रीपुंसाभ्यां नञ्स्नञौ**" [पा० सू० ४।१।८७] तथा अस्माकं आभरणाय-अलङ्करणाय योग्या जटाभाराः जटा-सत्कवीवधाः, न हाराः-मुक्तालता योग्याः। तथा अस्माकं साहाय्याय-आलम्बनाय बुधाः-पण्डिताः साधवः-भद्राः, न बान्धवाः-स्वजनाः साधवः । तथा अस्माकं शयनाय-स्वापाय कुशपूलिका-दर्भपूलिका उचिता, न तूलिका-तूलशय्या उचिता । तथा अस्माकं क्रीडायै-केलये वेगवन्तः-द्रुतगामिनो निर्झरप्रवाहा वराः-प्रधानाः, न वाहाः-अश्वा वराः । तथा अस्माकं हरेः-विष्णोः प्रसादाः-अनुग्रहाः प्रार्थनीयाः-अभिलषणीयाः, न प्रासादाः-धवलगृहाणि अभिलषणीयाः ।

**तत्**-इति उपसंहारे, तस्मात् हे आयुष्मन् !-चिरञ्जीविन् ! एष त्वं दृष्टोऽसि-अवलोकितोसि, तथा एष त्वं आपृष्टोसि यदहं वनाय यामि इत्येवं, तथा एष त्वं आश्लिष्टोसि-आलिङ्गितोसि, तथा एष त्वं दुरुक्तं-दुर्वचनमुक्तः क्षमितोसि-नीरोषितोसि, इतीमं नलं प्रत्यभिधाय-उक्त्वा, च-पुनः उत्सङ्गं-स्वीयक्रोडमारोप्य-संस्थाप्य, च-पुनः तस्मिन् काले-नलस्योत्सङ्गारोपणसमये गलन्-क्षरम् बहलः-निविडो यो बाष्पाम्बुप्लवः-अश्रुजलप्रवाहस्तेन प्लाविते-स्नपिते वक्षसि-निधाय, च-पुनः पुलकैः-रोमाञ्चैः कोरकिते-कुड्मलिते ये भुजलते ताभ्यां पुनः पुनः परिष्वज्य-आश्लिष्य पुनर्मूर्ध्नि आघ्राय वनितासहायः-स्त्रीसखो वनाय प्रतस्थे । गुरवः पुत्रं मूर्ध्नि जिघ्रन्तीत्याचारः । किम्भूत-मिमम् ? अन्तः-मध्ये मन्युभरेण दैन्यातिशयेन निरुध्यमानं-निषेध्यमानं[१] उत्तरं-प्रतिवचो यस्य स तं, तथा अजस्रं-निरन्तरं आस्रवन्ति-क्षरन्ति यानि अश्रूणि तैः क्लिन्नौ-आर्द्रौ कपोलौ यस्य स तं, तथा आविर्भवन्ती-समुल्लसन्ती या मोहमूर्छा-मूर्छाधिक्यं सैव अन्धकारं तेन आकुञ्चिते-ईषत् संकुचिते लोचने यस्य स तथा तम् ।

**प्रस्थिते च तस्मिन्परिहृतराज्ये राजनि, रजनीवियुज्यमानचक्रवाकी-ष्विव[१६] कृतकरुणाक्रन्दासु प्रजासु, [१७]प्रतिगृहमुच्चलितेषु जरत्पौरजनेषु, 'कल्याणिन्, एष पितृप्रणयप्रणामाञ्जलि एतदस्य[१८] क्रमागतकर्मकारिणः**

---

१. निषिध्यमानं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**श्रुतशीलस्य कृतापराधस्यापि त्वया सहनीयाः कतिपयेऽप्यस्मदनुकम्पया-ऽपराधाः । पश्य[१]। पयोराशेर्नोद्वेगाय मृगाङ्कस्य मीलयन्तोऽपि कमला-करान्कराः । किं न सहन्ते सुमनसोऽपि भ्रमरभरभञ्जनानि' इत्यभिधाय समर्प्य च स्वसुतमुच्चलिते च प्रेम्णानुगतभूभुजि भुजायामनिर्जितसाले[२] सालङ्कायने, बालमत्स्य इव शुष्यत्सरःसलिलसंतापवेपिताङ्गः, करिकलभ इव वियुज्यमानयूथपतिः[३], पतद्[४]बहल[५]बाष्पबिन्दुसंदोहैर्वक्षसि विधीयमानहारः 'हा तात' इति ब्रुवन्नलो न लोचने तं दिवसं उद-मीलयत्[६] ।**

**केवलममन्दमन्यु[७]द्गारगद्गदया गिरा पुनः पुनरिमं[८] श्लोकम-पठत् ।**

परिहृतं-त्यक्तं राज्यं येन तथाविधे तस्मिन् राजनि-वीरसेने वनाय प्रस्थिते च सति, तथा कृतः करुणः-दयोत्पादक आक्रन्दः-आरटनं याभिस्तास्तथाविधासु प्रजासु सतीषु । प्रजासु कास्विव ? रजन्यां वियुज्यमानाः-वियोगमाप्नुवत्यो याश्चक्रवाक्यस्तास्विव । यथा यामिन्यां भर्तृभ्यो वियुज्यमानाश्चक्रवाक्य आरटन्ति तथा नृपवियोगात् प्रजा अपि रुदन्तीति। तथा प्रतिगृहं-प्रतिभवनं[१] जरन्तः-वृद्धा ये पौरजनास्तेषु उच्चलितेषु-वनाय गच्छत्सु सत्सु ।

अथ सालङ्कायनः स्वसुतं नलं प्रति समर्पयन्नाह—हे कल्याणिन् ! नल ! एष पितुः-जनकस्य प्रणयस्य-स्नेहस्य प्रणामाञ्जलिः-नमस्करणार्थकरसम्पुटयोजनं एतदर्थं अस्माभिः प्रणामः क्रियत इत्यर्थः, शिक्षयितुः पितृसमानत्वात् मन्त्रिणः पितृप्रणयेत्युक्तं । तथाहि—अस्य क्रमेण-अस्मद्वंशपरिपाट्या आगतं यत् कर्म-सामादि तत्कर्त्तुं शीलं यस्य स तथाविधस्य, श्रुतशीलस्य कृतापराधस्य-विहितागसोऽपि त्वया अस्माकमुपरि या अनुकम्पा-दया तथा कतिपयेऽपि-कियन्तोऽपि अपराधाः सहनीयाः-क्षम्याः । किं वत् ? त्वं पश्य-अवलोकय मृगाङ्कस्य-चन्द्रस्य कराः-किरणाः कमलाकरान्-कमलखण्डानि मीलयन्तोऽपि-संकोचयन्तोऽपि पयोराशेः-समुद्रस्य उद्वेगाय-दुःखाय न । यथा कमलाकरान् स्वसन्तानभूतान् संकोचयन्तोऽपि चन्द्रकराः पयोधिना सह्यन्ते । तथा सुमनसः-पुष्पाणि भ्रमराणां यो भरः-भारस्तेन यानि भञ्जनानि-कुब्जीकरणानि तानि किं न सहन्ते ? अपितु सहन्ते एव, न तु तान् निर्वासयन्ति । तथा भवतापि एतस्य अपराधाः सहनीया इति भावः । इत्यभिधाय स्वसुतं श्रुतशीलं नलं प्रति समर्प्य च-दत्वा प्रेम्णा-स्नेहेन अनुगतः-अनुयातो भूभुक् येन स तस्मिन् सालङ्कायने उच्चलिते च-प्रस्थिते च सति पुरतो राजपथात्

---

१. प्रतिभवनं—प्रतिगृहं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सालङ्कायन इत्येवं वनाय प्रवृत्ते सति । किम्भूते सालङ्कायने ? भुजायामेन-बाहुदैर्घ्येण निर्जितः सालः-सर्जतरुर्येन स तस्मिन्, प्रलम्बबाहावित्यर्थः । नलः पतन्तः-गलन्तो बहलाः-निविडा ये बाष्पबिन्दुसंदोहाः-अश्रुजलप्रवाहास्तैर्वक्षसि विधीयमानः-क्रियमाणो हारो येन स ईदृग्विधो हा ततेति ब्रुवन् लोचने तं दिवसं न उद्मीलयत्-नोद्घाटयामास । किम्भूतो नलः ? उत्प्रेक्ष्यते, शुष्यत् रविकरैः शोषं प्राप्नुवत् यत्[१] सरः-सलिलं तत्र यः सन्तापः-औष्ण्यं तेन वेपितं-कम्पितं अङ्गं-शरीरं यस्य ईदृग्विधो बालमत्स्य इव । यथा बालमत्स्यः शुष्यत् सरसि वेपिताङ्गस्तिष्ठति तथाऽयमपि । पुनरुत्प्रेक्ष्यते, वियुज्यमानः-वियोगमासादयन् यूथपतिः-यूथनाथो यस्मात् ईदृशः करिकलभ इव-हस्तिपोत इव ? यथा यूथनाथात् परिभ्रष्टः करिकलभो दुःखी भवति तथाऽयमपि ।

महाराज-महामन्त्रिवियोगाद्दुःखमनुभवन् केवलममन्दः-अनल्पो यो मन्युद्गारः-दैन्यवचनोच्चारस्तेन गद्गदया-अव्यक्ताक्षरया गिरा पुनः पुनः इमं श्लोकमपठत् ।

**तत्तातस्य कृतादरस्य रभसादाह्वाननं[१]दूरत-**
**स्तच्चाङ्के विनिवेश्य बाहुयुगलेनाश्लिष्य संभाषणम् ।**
**ताम्बूलं च तदर्धचर्वितमतिप्रेम्णा मुखेनार्पितं,**
**पाषाणोपम हा कृतघ्न हृदय स्मृत्वा न किं दीर्यसे' ॥ ३१ ॥**

**तत्तातेति**। तातस्य कृतादरस्य-दत्तबहुमानस्य दूरतः-दवीयोदेशात् रभसात्-वेगात् तत् आह्वाननं हे तात[२]! इत्यादिना शब्देन आकारणम्। च-पुनः अङ्के-उत्सङ्गे विनिवेश्य-संस्थाप्य बाहुयुगलेन आश्लिष्य-आलिङ्ग्य तत्संभाषणं-मधुरैर्वचनैर्वादनम्। च-पुनः अतिप्रेम्णा-अतिस्नेहेन अर्द्धचर्वितं-अर्द्धास्वादितं मुखेन-स्वीयवक्त्रेण अर्पितं-दत्तं तत्ताम्बूलं स्मृत्वा हे पाषाणोपम !-पाषाणवत्कठिन ! हे कृतघ्न !-दुर्जनहृदय ! हा-इति विषादे त्वं किं न दीर्यसे-किं न द्विदलीभवसि ? "**कर्म्मं कर्त्तरि यक्**" । पूगपत्रचूर्णसंयोगस्ताम्बूलम् ॥३१॥

**एतच्चाकर्ण्य[२] दमयन्ती चिन्तितवती–'अहो, स्नेहवानार्द्रहृदयः खल्वसौ महानुभावः । तत्सर्वथा[३]स्मत्प्रीतिपात्रं भवितुमर्हति' इत्यवधारयन्ती पुनः पप्रच्छ ।**

**'हुं हंस, ततस्ततः'[४] ।**

---

१. यत् नास्ति अनू. । २. पुत्र अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सोऽपि राजहंसः कथामुपसंहर्तु[५]मिच्छन्निमं श्लोकमुच्चारयांचकार ।**

**एतच्च** हंसोक्तं सर्वमाकर्ण्य दमयन्ती चिन्तयति—अहो-इति आश्चर्ये, स्नेहवान्-स्नेहलः आर्द्रहृदयः-स्निग्धचित्तः खलु-निश्चितमसौ महानुभावः । तत्-तस्माद्धेतोः सर्वथा-सर्वप्रकारेण अस्माकं प्रीतिपात्रं-प्रेमभाजनं भवितुमर्हति ? यः स्नेहलो भवति तेनैव सह स्नेहः क्रियते, नान्येन, इति अवधारयन्ती-मनसा आकलयन्ती दमयन्ती पुनः-भूय पप्रच्छ।

**हुं हंस**-हुं इति अव्ययं प्रश्ने, हे हंस ! ततस्ततः किं जातम् ?

इति प्रश्ने कृते **सोऽपि**-नलकथावक्ता हंसः कथामुपसंहर्तुं-समापयितुमिच्छन् इमं श्लोकं-पद्यं उच्चारयाञ्चकार उच्चचार ।

**'सुन्दरोदरि[६], ततश्च[७]—**

**किमपि परिजनेन स्वेन तैस्तैर्विनोदैः,**
**पितृविरहविषादं सोऽपि[८] विस्मार्यमाणः ।**
**गमयति परिवर्त्तं वासराणामिदानीं,**
**हरचरणसरोजद्वन्द्वदत्तावधानः ॥ ३२ ॥**

हे **सुन्दरोदरि** !-क्षमोदरि ! **ततश्च**-ततोऽनन्तरम्-

**[९]इति श्रीत्रिविक्रमभट्टविरचितायां दमयन्तीकथायां**

**हरचरणसरोजाङ्कायां चतुर्थ उच्छ्वासः समाप्तः ॥[९]**

**किमपी**ति । सोऽपि-नलः पितृविरहे यो विषादः-मनःपीडां तं स्वेन-स्वकीयेन परिजनेन तैस्तैर्विनोदैः-गीतसुभाषितादिकौतुकैः किमपि-किञ्चिद् विस्मार्यमाणः-तदवधानात् च्याव्यमानः सन् इदानीं वासराणां परिवर्त्तं-परिवर्त्तनं अतिक्रमणं गमयति-प्रापयति, दिनानि अतिक्रामयतीत्यर्थः । किम्भूतः ? हरचरणसरोजद्वन्द्वे-शम्भुपादपद्मयुग्मे दत्तं अवधानं-चित्तैकाग्र्यं येन स तथाविधः, भगवच्चरणसेवाविहितचित्त इत्यर्थः ॥ ३२ ॥

इति वाचनाचार्यवर्य्यश्रीप्रमोदमाणिक्यगणिशिष्यश्रीजयसोमगणितच्छिष्य-

पण्डितश्रीगुणत्रिनयगणिविरचितायां श्रीत्रिविक्रमभट्टविरचितश्री

दमयन्तीकथाविवृतौ चतुर्थ उच्छ्वासः समाप्तः ।

● ● ●

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# मूलपाठस्य पाठान्तराणि

## चतुर्थ उच्छ्वासः

पृ. २४२. १. आघूर्णितामाश्चर्येण नि० चौ० । २. आकांक्षितं निपा० । ३. क्रात्कारिमाग्रहेण निपा० । ४. आपृष्ठ° पु० निपा० । ५. अवलोकितं मदेन पु०; अलोकितं मदेन नास्ति नि० चौ० । ६. आलोकित निपा०; अवलोकितं नि० चौ० ।

पृ. २४३. १. ०स्थानकं पु० ।

पृ. २४४. १. मण्डलकी° नि० चौ० । २. विचेष्टितां पु० । ३. धैर्यं हि महतां धनं निपा० । ४. गतः पु० निपा० । ५. °समया; नि० चौ०; समयसमुचित° पु० निपा० । ६. स्वेच्छयैव निपा० ।

पृ. २४५. १. 'दलयत्' नास्ति पु० । २. बहुलमधुस्निग्धमुग्धकुलानि निपा०; बहलमधुरस्निग्ध-मुकुलानि नि० चौ०; बहलमधुस्निग्धसुगन्धकुलानि पु० । ३. हंसस्तरंस्तरङ्गान्तरेषु नि० चौ०; हंसः सरस्तरङ्गान्तरेषु पु; हंसस्तरङ्गभङ्गान्तरेषु; हंसस्तरङ्गन्तरेषु निपा० । ४. श्लिष्टाक्षरं निपा० । ५. अस्थानं निपा० । ६. 'तल' नास्ति प्र. निपा० ।

पृ. २४६. १. विकचकुवलयगहनमिव निपा० । २. तत्क्षणं निपा० । ३. नभस्थलं पु० ।

पृ. २४७. १. चिरात् नि० चौ० । २. कुण्डिनं पुरं पु० निपा० । ३. °विलोक्यमान° पु० । ४. °नवाम्भोजराजि-भाजि निपा० । ५. रमस° निपा० । ६. °मदिरारूणितायताक्षी पु० ।

पृ. २४८. १. °कन्दलान्ताल-बालनलिनी° नि० चौ०; २.चलवलय° नि० चौ०; प्रचलद्वलय° पु० । ३. सविलाससविस्मयकरं पु० निपा० । ४. तं राजपुत्री राजहंसं नि० चौ० । ५. समुच्चिक्षेप निपा० । ६. °चमत्कारकारिणं नि० चौ० । ७. कान्तिसदृशं निपा० । ८. °आश्चर्यकारिणा नि० चौ० ।

पृ. २४९. १. समारोपयन् निपा० । २. स्त्रियो विदधते निपा० । ३. दीर्घनेत्रं नि० चौ० । ४. संस्कृतवाचः नि० चौ० । ५. मनसि विस्मयं पु० नि० चौ० । ६. आह्लादजनकं पु० नि० चौ० । ७. 'च' नास्ति नि० चौ० ।

पृ. २५०. १. सखी परिहासशीलानाम पु० नि० चौ० । २. °तित्तिर° पु० । ३. °प्रासार° निपा० । ४. रुचि° निपा० ।

पृ. २५१. १. सवैलक्ष्यं नि० चौ० । २. शनैः शनैः पु० । ३. तदित्यमनेकधा पु० । ४. °मंथान° निपा० । ५. °भ्रमभान्तिभृति° पु०; भ्रमभ्रान्तिभाञ्जि नि० चौ०;

पृ. २५२. १. श्रोतव्यं श्रूयतामिति निपा० । २. विश्रन्धं निपा० । ३. आरमत निपा० । ४. न च पु० । ५. पतिः प्रजानां निपा० । ६. विरञ्च नि० चौ०; विरञ्चिः पु० निपा० ।

पृ. २५३. १. उदार पु० ।

पृ. २५४. ८. श्लाध्या पु० । २. बीभत्सः नि० चौ० । ३. द्रोहेषु निपा० । ४. यस्य च पु० नि० चौ० । ५. कूपसेवा निपा० । ६. पापर्द्धिजनेषु पु० । ७. कैवर्तेषु पु० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पृ. २५५. १. एवं तस्य निपा० । २. "विजयाभिनन्दिनः नि० चौ० । ३. °मसृण° पु० ।

पृ. २५६. १. कदाचिदपि निपा० । २. °विरूत° नि० चौ० । ३. °अनवरत° नि० चौ० । ४. °विरञ्चि° नि० चौ० । ५. °रचित° नि० चौ० । ६. अनवरतमवनत° पु० निपा० । ७. 'च' नास्ति नि० चौ० । ८. 'प्रधानया' नास्ति पु० । ९. °केलिफल° पु० नि० चौ० । १०. सकल° निपा० । ११. °कणकलाप° निपा० । १२. विरञ्च° नि० चौ० । १३. राजानं रञ्जयन्ती राजपत्नी पु० ।

पृ. २५७. १. °छायं° नि० चौ० । २. अनुलेसुं निपा० । ३. मणिमय° नि० चौ० । ४. °निशा° नि० चौ० । ५. °मुखं निपा० । ६ नीलोत्पलमजरठ° नि० चौ० । ७. अतिबहुल° पु० ।

पृ. २५८. १. अन्तः स्फुरत् पु० नि० चौ० । २. °संसार° निपा० ३. कालवेलायां नि० चौ० । ४. °पल्लवोपह्नसि° निपा० ।

पृ. २६०. १. सूतिकागृहे च निपा० । २. प्रभातेन यथा जिता नि० चौ० ।

पृ. २६१. १. चित्रांतमतिबहल° नि० चौ० । २. अर्थिलोकेन पु० नि० चौ० ।

पृ. २६२. १. नामकर्मोचितेऽह्नि पु० । २-२ लात्येष धर्मधनानि निपा० । ३. शुश्रुवाणः पु० । ४. °कीर्तिकन्द° निपा० । ५. °विश्वम्भरालम्भ° निपा० । ६. अलङ्कृताङ्गावयवः निपा० । ७. विस्तर° नि० चौ० । ८. °काले° नि० चौ० । ९. °समस्त° नास्ति पु० ।

पृ. २६३. १. अकलङ्कोऽकलङ्के निपा० । २. लोकायते नि० चौ; चार्वाके पु० । ३. °प्रतिभः निपा० । ४. प्रभाकरे पु० । ५. अप्रतिच्छन्दः पु; छन्दः शास्त्रे निपा० । ६. कल्पजाते निपा० । ७. सिद्धान्ते पु० निपा० । ८. वाद्ये पु० । ९. वीणावेणुषु पु० निपा० । १०. कामतन्त्रेषु पु० । ११. शालिहोत्रेषु, अमुद्रः सामुद्रिके निपा० । १२. शरेषु निपा० । १३. गुणिनि निपा० । १४. बहुगुणो निपा० । १५. बाहुयुद्धे निपा० । १६. तुरङ्गमक्रीडायां; तुरङ्गव्यूहक्रीडायां निपा० । १७. 'देश' नास्ति निपा० ।

पृ. २६५. १. 'तस्य' नास्ति नि० चौ; अस्य पु० । २. श्रवणसम्मतिं नि० चौ० । ३. प्रमाणवादिनो नि० चौ० । ४. अभवत् पु० । ५. मध्ये स्थिता नि० चौ० । ६. 'तस्य' नास्ति नि० चौ० । ७. हस्तचरणेरपि नि० चौ० । ८. 'पल्लव' नास्ति पु० ।

पृ. २६७. १. 'अथ' नास्ति निपा० । २. °चिह्न° निपा० । ३. विलग्नः पु० ।

पृ. २६८. १. °कला° नास्ति नि० चौ० । २. 'परि' नास्ति पु० । ३. अद्वितीयहृदयमेकं नि० चौ० । ४. मित्रं मन्त्री पु०; मित्रं निपा० । ५. °तमसि° पु० । ६. °कुङ्कुम° निपा० । ७. °करायमाणे निपा० । ८. °मुकुलमुद्रा° निपा० पु० । ९. विचरितुं नि० चौ० । १०. °अवधूत° निपा० । ११. सभाङ्गण° नि० चौ० । १२. मण्डस्य पु० । १३. °शबलित° पु० निपा; मकरन्दशबलित° निपा० । १४. समन्यैश्च नि० चौ० । १५. द्वन्द्वं° पु० । १६. अदूरआसनं निपा० ।

पृ. २७०. १. 'च' नास्ति पु० । २. °सकम्प° निपा० । ३. °रमणीः नि० । ४. 'अवलोक्य' नास्ति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नि० चौ० । ५. 'न' नास्ति पु० । ६. °विलासे° पु० ।

पृ. २७२. १. अग्निरिवात्मानं पर च निपा० । २. अजाततनयः नि० । ३. नाभिनन्द्यते नि० चौ; नाभिबन्धते पु० ।

पृ. २७३. १. 'युक्तो' नास्ति नि० चौ० । २. 'इव' नास्ति पु० नि० चौ० । ३. °मन्थन° निपा० ।

पृ. २७४. १. सुवंश्ये नि० चौ० ।

पृ. २७५. १ 'भज माधुर्यं' अधिकपाठः नि० चौ० । २. शिवमिव निपा० ।

पृ. २७६. १. 'दल' नास्ति नि० चौ० । २. शिक्षाक्रमे नि० चौ० । ३. धीमन् निपा० । ४. विप्रतारयति निपा० । ५. भुजङ्गावली निपा० । ६. गुरुवारुणयोग्यो निपा० । ७. अधिरोहति निपा० । ८. वागुरावञ्चनं नि० चौ० । ९. गदभिव निपा० । १०. दृष्ट्वा नि० चौ० । ११. पलायते निपा० ।

पृ. २८१. १. न स्त्री श्रीर्वा नि० चौ; न पुनः स्त्री श्रीश्च; न लक्ष्मीः स्त्री च निपा० ।

पृ. २८२. १. इव नि० चौ० । २. न श्रिय स्त्रियश्च पु० निपा० । ३. विश्वसितं पु० । ४. श्रियः स्त्रियोऽपि निपा० ।

पृ. २८३. १. 'प्राप्स्यसि न' नास्ति पु० । २. पापैः निपा० । ३. प्रद्वेषं निपा० । ४. गुणं वृद्धिः पु० । ५. सत्पुरुषेषु नि० चौ० ।

पृ. २८४. १. एवं पु० । २. 'अयं' नास्ति पु० । ३. सरलतया युक्ताः निपा ।

पृ. २८५. १. 'अपि च' नास्ति पु० । २. वंशास्याग्रं निपा० । ३. प्रेमार्द्रया नि० चौ० । ४. युक्तमुक्तोसि नि० पु० चौ० ।

पृ. २८६. १. स्वीकृतस्त्वं नि० चौ० । २. तेनायमनुशास्ति नि० चौ० । ३. 'इदं' नास्ति निपा० ।

पृ. २८७. १. यन्मर्त्यजन्मनि पु० ।

पृ. २८८. १. अभिषेकाय निपा० । २. अनवधतनमेव नि० चौ० ।

पृ. २८९. १. उच्चगृहाग्रहाः पु० । २. प्रस्थितेषु निपा० । ३. श्लाघ्यमानः निपा० ।

पृ. २९०. १. सस्वनं नि० चौ० । २. चुम्बमाना पु० । ३. दरेण निपा० । ४. 'कुश' नास्ति निपा० । ५. 'सविस्मयेन' नास्ति नि० चौ० निपा० । ६. सपरिवारेण च नि० चौ० निपा० । ७. °बहुल° पु० । ८. प्रणय निपा० ।

पृ. २९१. १. °जटाजूटगलितं पु० निपा० । २. पयो नि० चौ० ।

पृ. २९२. १. यत्रोत्फुल्लन् नि० चौ० ।

पृ. २९३. १. °बहुल° पु० । २. °कोरकितदेहः पु० नि० चौ० । ३. 'चिरं' नास्ति पु० नि० चौ० । ४. 'अयं' नास्ति निपा० । ५. अन्यतमः पु० नि० चौ० । ६. शिक्षाप्रक्रमः पु० निपा० । ७. यूनोप्यस्य निपा० । ८. चाविलम्बितानुकूलकालसंपत्तिः निपा० । ९. °उल्लास्य° पु०

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नि० चौ० । १०. बलान्नालं पु० । ११. कनकदण्डपाणिः क्षणं प्र. नि० चौ० । १२. प्रतिहार्यं पु० । १३. परिलम्बित° पु० । १४. °कनकगिरिशिखरस्थित° नास्ति पु० नि० चौ० । १५. सकलसामन्तचक्रं निपा० । १६. अदर्शयन् पु० । १७. °प्रशस्तमन्त्रान् पु० नि० चौ० । १८. ऊचुः पु० ।

पृ. २९५. १. ताभिस्तस्य निपा० । २. विरञ्चि° नि० चौ० । ३. शुभम निपा० । ४. च तस्य निपा० ।

पृ. २९६. १. भूपाल निपा० । २. 'अपि च' नास्ति पु० ।

पृ. २९७. १. देवताश्च पु० नि० चौ० । २. पक्षिणः पु० । ३. °अनुभूत° नि० चौ० ।

पृ. २९८-२९९. १. केषुचिद्दिवसेषु नि० चौ० । २. यथागतं निपा० । ३. आमन्त्रितायाते नि० चौ० । ४. रिपुपक्षपयोधि° पु० । ५. बभाषे निपा० । ६. प्रियं सख्यं नि० चौ० । ७. आहरणाय योग्या नीवाराः; नाहाराः निपा० । ८. सहाज्याय पु० । ९. क्रीडार्हा पु० निपा० । १०. 'वरा' नास्ति पु० । ११. उक्तं पु० निपा० । १२. स्नपिते च निपा० । १३. °कोरकिताभ्यां पु० निपा० । १४. °मूर्च्छान्धकारष्विव पु० नि० चौ० । १५. वनितासखः पु० । १६. °चलच्चक्रवाकीष्विव पु० नि० चौ० । १७. प्रतिभवन पु० नि० चौ० । १८. अञ्जलिरस्य नि० चौ० ।

पृ. ३००. १. यतः निपा० । २. भुजाभ्यांनिर्जितसाले निपा० । ३. मृगशावक इव मार्गच्युतः निपा० । ४. गलद् निपा० । ५. °बहुल° पु० । ६. समुद्रभीलयत् नि० चौ० । ७. °दैन्य° निपा० । ८. इदं निपा० ।

पृ. ३०१-३०२. १. आवाहनं निपा० । २. एतदाकर्ण्य निपा० । ३. सर्वथाऽपि पु० । ४. हंसं ततस्ततः निपा०; हुं हंस ततस्तः नि० चौ० । ५. उपसंहरन् निपा० । ६. सुन्दरादरि नि० चौ० । ७. ततस्तु पु० निपा० । ८. सोऽथ नि० चौ० । ९-९. इति दमयन्तीकथायां चतुर्थ उच्छ्वासः पु० ।

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रीः

# पञ्चम उच्छ्वासः

अथ पञ्चमोच्छ्वास व्याख्या प्रस्तूयते—

**अथ विश्रान्तवाचि[1] वाचस्पताविवोच्चारितानष्टविस्पष्टवर्णो वर्णित-निषधराजे राजहंसे 'अहं सेवार्थी' इत्यभिधायोपरुध्यमाना[2] कृतोत्तरासङ्गेन द्विजन्मना[3] श्रुतानुरागेण। 'वत्से, चिरान्मिलितासि' इत्युक्त्वैव[4]वाश्लिष्टा हृदये प्रवृद्धया चिन्तया। 'पुत्रि, कथमपि[5] द्रष्टासि' इति संभाष्येवालिङ्गिता सर्वाङ्गेषूत्कम्पजनन्या रोमाञ्चावस्थया। 'तरुणि, त्यज्यता[6]मिदानीं शैशवव्यवहारः[7], इत्यालाप्येव[8] स्पृष्टा[9] प्रमुखेण मुखे वैवर्ण्येन। 'मुग्धे मुच्यतां स्वच्छन्दभावः' इत्यनुशास्येव[10] ग्राहिता निजाज्ञां गुरुणा मकरध्वजेन दमयन्ती। तथापि क्षणमिव महानुभावतामवलम्ब्यानुपलक्षितावस्था[11] अवतस्थे।**

**अथेति**। अथ-अनन्तरं वाचस्पताविव-बृहस्पतिसमाने[1] राजहंसे विश्रान्ता-उपरता वाक् यस्य स तथाविधे तूष्णीं भजमाने सति। किम्भूते राजहंसे? उच्चारिता-उक्ता अनष्टा-विद्यमाना विस्पष्टा-व्यक्ता ये वर्णाः-अक्षराणि तैर्वर्णितः-स्तुतो निषधराजः-नलो येन स तस्मिन्। अहं हंसो नलस्य सेवार्थी-सेवितुकाम इत्यभिधाय-उक्त्वैव कृतः-उत्पादिता उत्तरस्यां दिशि विषये आसङ्गः-आसक्तिर्येन उत्तरस्या नलाधारत्वात् ईदृशेन द्विजन्मना-पक्षिणा उपरुध्यमाना नलं प्रत्यानुकूल्यं नीयमाना। किम्भूतेन हंसेन श्रुतो नलविषये तस्या अनुरागो येन स तथा तेन। अथ च द्वाभ्यां तस्मिन् स्मितमुखे यूनीत्यादि येनोदीच्याध्वगेनोक्तं तस्मादेकस्मात्, द्वितीयाच्च हंसात् जन्म उत्पत्तिर्यस्य स तथाभूतेन श्रुतात्-आकर्णनाद् यो अनुरागः-प्रेमबन्धस्तेन उपरुध्यमाना-व्याप्यमाना। कृतवैकक्षेण अध्ययनानुरागेण विप्रेण दाक्षिण्यं दीयमाना[2], इत्यर्थान्तरं। एवम्भूता सती प्रकर्षेण

---

१. मत्या बृहस्पतिसमाने अनू.। २. नीयमाना अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वृद्धिगतया चिन्तया कदा नलेन सह मिलिष्यामीत्येवंरूपया, हे वत्से-पुत्रि ! चिरात्-चिरकालान्मिलिता त्वं इत्युक्त्वेव हृदये-चित्ते आश्लिष्टा-अवष्टब्धा, सचिन्ता जातेत्यर्थः । असीति अव्ययं त्वमित्यर्थे । तथा हे पुत्रिके ! कथमपि महता कष्टेन इष्टासीति सम्भाष्येव-वादयित्वेव उत्कम्पं जनयतीति उत्कम्पजननी तया रोमाञ्चावस्थया सर्वाङ्गेषु-सर्वावयवेषु आलिङ्गिता-आश्लिष्टा, सर्वाङ्गेषु सकण्टका जातेत्यर्थः । अर्थान्तरे तु, प्रवृद्धया-जरत्या उद्गतकम्पया जनन्या-मात्रा आलिङ्गितेव । तथा हे तरुणि ! इदानी शैशवव्यवहारः-बालत्वव्यवस्था त्यज्यतां इति आलाप्येव-संभाष्येव प्रमुखेण-प्रधानेन मुखवैवर्ण्येन-वक्त्रविच्छायभावेन स्पृष्टा, मुखं विच्छायमभूदित्यर्थः । तथा हे मुग्धे ! स्वच्छन्दभावः-स्वैरगामित्वं मुच्यतां इत्यनुशास्येव-शिक्षयित्वेव गुरुणा-दुर्वहभरेण मकरध्वजेन-कामेन निजाज्ञां ग्राहिता-स्ववशं नीता, कामातुरा जातेत्यर्थः । अर्थान्तरे तु, प्रकृष्टं मुखं यस्य स तेन प्रमुखेण गुरुणा-आचार्येण निजाज्ञां ग्राहितेति । तथापि दमयन्ती क्षणमिव-क्षणमेकं यावत् महानुभावतां-महाशयत्वं अवलम्ब्य-अवष्टभ्य न उपलक्षिता-ज्ञापिता । अवस्था-अभिलाषचिन्तादिका दशसंख्या यया सा तथाविधा अवतस्थे-अस्थात्, स्वाभिलाषाद्यवस्थां नाज्ञापयदित्यर्थः ।

**तां च तथा बलात्सरलीभवन्निश्वाससूचितान्तर्मन्मथव्यथावेगाम्[१] अकाण्डकुण्ठितधैर्यासिधारां, हृत्पुण्डरीके [२]मनोरथानीतनलावलोकनार्थमि-वान्तर्मुखीभूतचक्षुर्व्यापाराम्, आकस्मिकस्मरापस्मारेण [३]दाम्यन्तीं दमयन्तीमवलोक्य तदिङ्गिताकारकुशला परिहासव्यसनिनी परिहासशीला नाम सखी 'महानुभाव, [४]नास्माकमद्यापि तद्गुणश्रवणाय[४] श्राम्यति श्रवणेन्द्रियम्[५] । न तृप्यति प्रश्नरसायने[६] जिह्वा । न सन्तुष्यति विशेषज्ञानाय शेमुषी। नानुरागायोपरमते[७] मनः । तत्कथं[८] कृतवानसि गीतस्येव विस्वरम्, वाद्यस्येव वितालम्, लास्यस्येवान्यथापदप्रचारम्, अत्यन्तरसविच्छेदकारिणं[९] कथाप्रक्रमस्य विरामम्, एतत्परमपि पिपासया पयःपातुमुद्यतस्येवाविरतायां[१०] तृषि वारिधाराविधारणं[११] । इयं सा भुञ्जानस्यार्धतृप्तिः[१२] सोऽयमसमाप्तरतस्य[१३] रिरंसाव्याघातः । तन्न युक्तमन्तरेव[१४]विरन्तुम् । निष्कारणोपकारिन्[१५], पुनः[१६] प्रवर्त्यतां पुण्यराशे[१७]स्तस्य स्वरूपाख्यानामृतप्रपामण्डपो[१८], निर्वान्तु[१९] चिरकालमनङ्गग्रीष्मोपतप्ता एवंविधकन्यकाः प्रसारितश्रवणाञ्जलयः, इति दमयन्तीमर्धेक्षणेन[२०] कटाक्षयन्ती तं राजहंसमालापयाञ्चकार[२१] ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तां चेति** । तथेति मदनातुरां तां च-दमयन्तीमवलोक्य परिहासशीला नामेति प्रसिद्धा सखी इति-वक्ष्यमाणप्रकारेण दमयन्तीं अर्द्धेक्षणेन-अर्द्धनेत्रेण कटाक्षयन्ती-अवलोकयन्ती तं-राजहंसं आलापयाञ्चकार-अवादयत् । किम्भूतां दमयन्तीम् ? बलात्-बलात्कारेण सरलीभवन्तः-दीर्घीभवन्तो ये निःश्वासास्तैः सूचितः-ज्ञापितः अन्तःचेतसि मन्मथव्यथावेगः-कामपीडाप्रसरो यस्याः सा तां, दीर्घनिःश्वासैर्हि ज्ञायते यदेतस्या मान्मथीव्यथा प्रथितास्तीति । तथा अकाण्ड एव-अप्रस्ताव एव कुण्ठिता-भग्ना धैर्य-धीरत्वमेव असिधारा-खड्गधारायस्याः सा तां, विलीनधैर्यामित्यर्थः । तथा अन्तर्मुखीभूतः-अबहिर्मुखीभूतश्चक्षुर्व्यापारः-नेत्रावलोकनं यस्याः सा तां, हृदयं प्रत्यवलोकयन्तीत्यर्थः[१] उत्प्रेक्ष्यते, हृत्पुण्डरीके -हृत्पद्मे मनोरथेन-अभिलाषेण आनीतो यो नलस्तस्य अवलोकनार्थ-मिव । मन्ये, हृदये मनोरथेन नलः समानीतोस्ति तं अवलोकयितुं नेत्रे हृदयाभिमुखे विहिते इति । तथा आकस्मिकः-अकाण्ड एव उत्पन्नो यः स्मर एव अपस्मारः-ग्रहावेशस्तेन दाम्यन्तीं-गृह्यमाणां स्मरपरवशामित्यर्थः । "**अपस्मार आवेशः ग्रहदुःखाद्यैरस्योत्पत्तिः**" इति [ ] **काव्यप्रकाशटीकायाम्** । किम्भूता परिहासशीला ? यस्याः दमयन्त्या इङ्गितं-चेष्टितं आकारे मुखरागादिस्तत्र कुशला-चतुरा, तदिङ्गिताकारपरिच्छेत्री-त्यर्थः । पुनः किम्भूता ? लीलापूर्वको हासः- परिहासतस्मिन् परिहासे व्यसनं-आसक्तिर्यस्याः सा तथाविधा । इतीति किम् ? हे महानुभाव !-महाप्रभाव ! तस्य नलस्य ये गुणास्तेषां श्रवणाय नास्माकं श्रवणेन्द्रियं अद्यापि श्राम्यति-श्रान्तं भवति, विशेषतः श्रवणाय प्रवर्तत इत्यर्थः। तथाऽस्माकं जिह्वा प्रश्नितं तत्कथाप्रकरणमेव रसायनं-जरामरणापहमौषधं तस्मिन् न तृप्यति-न तृप्तिमेति, अद्यापि पुनः पृच्छामीत्येवं साभिलाषेत्यर्थः । तथा अस्माकं शेमुषी-बुद्धिर्विशेषज्ञानाय-तत्कथातात्पर्यपरिच्छेदाय न सन्तुष्यति-न सन्तुष्टा भवति, पुनरपि तद्विशेषावबोधाय प्रवर्तत इत्यर्थः । तथा अस्माकं मनः अनुरागाय-प्रेमबन्धाय नोपरमते-न निवर्तते, पुनरपि तस्मिन् अनुरज्यत इत्यर्थः । तत्-इत्युपसंहारे, तस्मात् कथं अत्यन्तं-अतिशयेन रसविच्छेदं-स्वादभङ्गं करोतीत्येवंशीलं कथाप्रक्रमस्य-कथापरिपाट्याः कथावसरस्य वा विरामं-निवृत्तिं कृतवानसि । "**प्रक्रमोऽवसरे क्रमे**" [३/४९८] इत्य**नेकार्थः** । कस्य ? कमिव ? उत्प्रेक्ष्यते, गीतस्य-गानस्य विस्वरं-विरुद्धस्वरमिव । यथा गीतं गातुं प्रवृत्तस्य अन्तराले विरुद्धस्वरोद्भावो-रसविच्छेदकारी अनुचितस्तथाऽयमपि कथाभङ्गो अनुचित इत्यर्थः । तथा वाद्यस्य-वादित्रस्य वितालमिव-विरुद्धतालमिव, यथा वाद्ये विरुद्धश्चञ्चत्पुटादिस्तालो रसभङ्गकारित्वात् न शोभते तथाऽयमपि । तथा लासस्य[३]नृत्यस्य अन्यथा यथावन्न्यसनाभावेन यः पादप्रचारः-चरणन्यासस्तमिव । यथा लास्येअन्यथा पादन्यासो रसविच्छेदकारित्वात् न शोभते तथाऽयमपि । तदेवं एतत्

---

१. प्रत्यवलोकयन्तीमित्यर्थः अनू. । २. तस्या अनू. । ३. लास्यस्य अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परमपिपासया-उत्कृष्टोदन्यया पयः-जलं पातुं उद्यतस्य-प्रवृत्तस्य पुरुषस्य-अविरतायां अनिवृत्तायां तृषि वारिधाराया विधारणं-विच्छेदस्तदिव । "**निवारणमिति**" वा पाठः तृषितः पुमान् पानीयं पातुं प्रवृतोऽद्यापि यावन्न तृप्तस्तावता अन्तराल एव पानीयपानविच्छेदं कश्चित् करोति तद्वत् भवताऽपि तत्कथामुपसंहरता विहितमिति । तथा इयं सा भुञ्जानस्य-भोजनं कुर्वतः पुंसो अर्द्धतृप्तिः-अर्द्ध आहाराभिलाषविच्छेदः । तथा सोऽयं असमाप्तं-अपूर्णं रतं-सुरतं यस्य तथाविधस्य पुंसो रिरंसायाः-रमणेच्छाया व्याघातः-अन्तरायः। '**रतिव्याघाताय**[१]'पाठे तु स्पष्टमेव । तत्-तस्माद्धेतोरन्तरे-कथाया अन्तराल एव विरन्तुं-निवर्तितुं न युक्तमेव । *निष्कारणोपकारिन्निति निष्कारणं-कारणं विनैव उपकर्तुं शीलं यस्यासौ तस्य सम्बोधने हे* निष्कारणोपकारिन् ! हंस ! त्वया पुनः-भूयस्तस्य पुण्यराशेः पुण्यात्मनः स्वरूपाख्यानमेव-स्वरूपकथनमेव अमृतप्रपामण्डपः-सुधापानीयशालारूपाश्रयविशेषः स प्रवर्त्यतां-विरच्यतां, पुनस्तत्कथा क्रियतामित्यर्थः । अतएव अनङ्ग एव ग्रीष्मः-निदाघस्तेन उपतप्ताः-सन्तापिता एवम्विधा दमयन्तीसदृक्षाश्च ताः कन्यकाश्च एवंविधकन्यकाः प्रसारितौ-विस्तारितौ श्रवणे एव अञ्जली याभिस्तास्तथाविधाः सत्यश्चिरकालं-चिरं निर्वान्तु-शान्तीभवन्तु । अमृतप्रपामण्डपे हि ग्रीष्मोपतप्ता अञ्जलिभ्याममृतं पीत्वा निर्वान्ति तथेमा अनङ्गतापतप्ताः श्रवणाञ्जलिभिस्त-द्वार्ताऽमृतं पीत्वा सुखिन्यो भवन्त्वित्यर्थः । इत्थं परिहासशीलया उक्तः ।

**सोऽपि 'सुन्दरि, किमन्यत्तस्य समस्तस्त्रीहृदयप्रासादप्रतिष्ठापित-प्रतिमस्या[१] किं[२] प्रशस्यते ।**

**यत्र श्रूयमाणे न मधुरो वेणुवीणाक्वणः[३], दृष्टे नाभिरामः कामः । संभाषिते न सारा सरस्वती, परिचिते न श्लाघ्ययममृतम्, अभ्यस्ते नानन्दीन्दुः, प्रसादिते[४] न प्रशंसास्पदं धनदः[५] ।**

**सोऽपि**-हंसः इत्यभाषत-उवाच। इतीति किम्? हे सुन्दरि! तस्य समस्तस्त्रीभिर्हृदयमेव प्रासादः-देवगृहं तत्र प्रतिष्ठापिता-निहिता प्रतिमा-प्रतिबिम्ब यस्य स तस्य, सर्वासामपि स्त्रीणां हृदये संक्रान्तस्येत्यर्थः। नलस्य अन्यत्-अपरं किं प्रशस्यते- किं श्लाघ्यते ? तथाहि—

**यत्र** नले श्रूयमाणे वेणुश्च-वंशः वीणा च-वल्लकी तयोः क्वणः-शब्दो न मधुरः-न सुखकारी, यदा नल इति शब्दः श्रूयते तदा वेणुवीणारवो न मृष्टतां लभत इत्यर्थः । तथा यस्मिन्नले दृष्टे कामो नाभिरामः-न सुन्दरः, ततोऽपि[२] अधिकरूपत्वात्[३] । तथा यस्मिन् नले सम्भाषिते-वदति सरस्वती-भारती न सारा-न प्रधाना, सरस्वतीभाषितादपि

---

१. रतिव्याघात अनू. । ★—★ चिह्नान्तर्गतपंक्तिर्नास्ति अनू. । २. तस्य ततोऽपि अनू. । ३. अधिकरूपवत्वात् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तद्भाषितमत्युदारमित्यर्थः । तथा यस्मिन्नले परिचिते-परिशीलिते अमृतं न श्लाघ्यं, तत्परिचयस्तु अमृतादप्यधिकमित्यर्थः[१] । तथा यस्मिन्नले अभ्यस्ते-सन्निहिते इन्दुः-चन्द्रो न आनन्दी न आनन्दजननशीलः, तत्सन्निधानं तु चन्द्रादप्यधिकाऽऽनन्दजनकमित्यर्थः । तथा यस्मिन्नले प्रसादिते-अनुगृहीते धनदः-कुबेरो न प्रशंसास्पदं-न प्रशंस्यः, धनदप्रसादादपि तत्प्रसादोऽधिकफलप्रदातेत्यर्थः ।

**किं बहुना –**

किम्बहुना-किम्बहूक्तेन–

**भवति यदि सहस्त्रं वाक्पटूनां मुखानां,**
**निरुपममवधानं जीवितं चापि[१]दीर्घम् ।**
**कमलमुखि ! तथापि क्ष्मापतेस्तस्य कर्तुं,**
**सकलगुणविचारः शक्यते वा न वेति ॥ १ ॥**

**भवती**ति । हे कमलमुखि !- पद्मवदने ! यदि वाचि- वाण्यां पटूनि-समर्थानि वाक्पटूनि तेषां वाक्पटूनां-वचनप्रगल्भानां मुखानां सहस्त्रं भवति, अपि च निरुपमं-अत्यद्भुतं अवधानं-तद्गुणवर्णने चित्तैकाग्र्यं यदि भवति, अपि च दीर्घं-चिरंजीवितं-प्राण-धारणं यदि भवति तथापि तस्य क्ष्मापतेः-नलस्य सकलगुणानां विचारः-विमर्शः कर्तुं वा शक्यते-न शक्यते वा इति । एतावता नलस्य गुणानामानन्त्यं दर्शितम् ॥ १ ॥

**अपि च–**

**संसाराम्बुनिधौ तदेतदजनि स्त्रीपुंसरत्नद्वयं,**
**नारीणां भवती नृणां पुनरसौ सौभाग्यसीमा नलः ।**
**सा त्वं तस्य कुरङ्गशावनयने ! योग्यासि पृथ्वीपते-**
**रेतत्ते कथितं किमन्यदधुना यामो वयं स्वस्ति तम् ॥ २ ॥**

**अपि च**-पुनः–

**संसारेति** । हे दमयन्ति ! संसाराम्बुनिधौ तदेतत् स्त्रीपुंसावेव रत्नद्वयं अजनि-जातं स्त्रीपुंसेति "**अचतुर**" [पा. सू. ५/४/७७] इत्यादिना अजन्तो निपात्यते । अब्धावेव रत्नोत्पादात् । किं तद्द्वयम् ? इत्याह–नारीणां मध्ये भवती रत्नं, नृणां मध्ये पुनरसौ । सौभाग्यस्य-सर्वजनवाल्लभ्यस्य सीमा-मर्यादा यत्र स सौभाग्यसीमा, अतोऽधिकं सौभाग्यं न

१. अधिक इत्यर्थः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कस्याप्यस्तीत्यर्थः । ईदृशो नलो रत्नं । फलितमाह—कुरङ्गशावनयनवत्-मृगार्भकनेत्रवत्-चञ्चले नयने यस्याः सा तस्याः सम्बोधने हे कुरङ्गशावनयने ! "**शाकपार्थिवादित्वान्मध्यमपदलोपीसमासः**[१]" [ ] । सा त्वं-दमयन्ती तस्य पृथ्वीपतेः-नलस्य योग्यासि । भवत्या एतावत् पूर्वोक्तं कथितं-अस्मात् पूर्वकथितात् अन्यत्-अपरं उत्कृष्टं किं[२]-न किञ्चिदस्तीत्यर्थः । भवतोर्योग एव श्रेयानिति भावः । अथ वयं यामः ते-तुभ्यं स्वस्ति-कल्याणमस्तु ॥ २ ॥

**अन्यच्च -**

**चन्द्रमुखि, महानाम्नि सुसंधिकृति सुसमासाख्याततद्धिते सत्कारके परिभाषाकुशले बलाबलविचारिणि विचार्यमाणे व्याकरणे प्रेष्यमाणे च दूते नापशब्दसम्बन्धौ[१]भवति । तत्प्रेष्यतां तथाविधस्तस्यान्तिकं कोऽपि दूतः ।**

**अन्यच्चे**ति । हे चन्द्रमुखि !-शशिवदने ! अन्यत्-अपरं च ईदृशे व्याकरणे-शब्दशास्त्रे विचार्यमाणे अपशब्दः-असाधुशब्दस्तस्य सम्बन्धः-सम्यक्बन्धः-रचना स न भवति, साधुशब्दप्रयोगो भवतीत्यर्थः । ईदृशे च दूते प्रेष्यमाण-मुच्यमाने अपशब्दोऽपवादस्तस्य सम्बन्धः-संश्लेष स न भवति, अपवादो न भवतीत्यर्थः । किम्भूते व्याकरणे ? महन्नाम यस्मिन्स्तत् महानाम तस्मिन्, नाम प्रातिपदिकं तद्विषयं प्रकरणमपि नाम इत्युपचारे सति महदिति तद्विशेषणस्य सफलत्वं । नाममात्रस्य तु महच्छब्देन व्यवच्छेद्याभावात् । तथा सुष्ठु सन्धिः-वर्णसंश्लेषः कृत्संज्ञकश्च प्रत्ययो यत्र तत् सुसन्धिकृत् तस्मिन् सुसन्धिकृति । तथा सुष्ठु समासः-तत्पुरुषादिराख्यातं-क्रिया तद्धितोणादिर्यत्र तत्तस्मिन् सुसमासाख्याततद्धिते । तथा सत्-वर्तमानं कारकं-अपादानादि यस्मिस्तत्तस्मिन् सत्कारके । तथा परिभाषाः-न्यायसूत्राणि तया कुशले-भद्रे । तथा बलाबलं-पूर्वपरविधीनां बाधस्थितिस्तस्य विचारः-विमर्शो विद्यते यस्मिस्तत्तस्मिन् बलाबलविचारिणि ।

दूतपक्षे, महन्नाम अभिधानं यस्य स महानामा तस्मिन् । तथा सुष्ठु सन्धि-सम्बन्धं पणबन्धं करोतीति सुसन्धिकृत् तस्मिन् सुसन्धिकृति । तथा सुष्ठु समासेन-संक्षेपेण आख्यातं-कथितं तस्मै नलाय हितं येन स तस्मिन् । तथा सत्कारके-सत्क्रियाजनके तथा परितो भाषाः-संस्कृतप्राकृताद्याः कर्णाटादिदेशभाषा वा तासु कुशले-दक्षे । तथा बलाबले-शक्त्यशक्ती तयोर्विचारो विद्यते यस्यासौ एतस्य शक्तिरस्ति एतस्य नास्तीत्येवं विमर्शके । तत्-तस्माद्देतोः तस्य नलस्य अन्तिकं-समीपं तथाविधः-पूर्वोक्तस्वरूपो दूतः प्रेष्यतां-मुच्यताम् ।

---

१. °मध्यपद° अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ननु यद्यहं दूतं प्रेषयिष्यामि तदा स्वच्छन्दचारिणीयं इति किम्वदन्ती भविष्यति इत्याशंक्याह–

**'न च बृहत्यासंपदान्विते जगत्याख्याते[१] सत्कृत[२]गुरुगणे शार्दूलविक्रीडिताडम्बरिणि पुण्यश्लोके[३] पर्यालोच्यमाने[४] छन्दसि प्रार्थ्यमाने च तस्मिन्निषधेश्वरे वृत्तभङ्गो[५] भवति' इत्यभिधाय गन्तुमुदचलत् ।**

**न चेति** । एवंविधे छन्दसि पर्यालोच्यमाने-विचार्यमाणे वृत्तं-पद्यं तस्य भङ्गो न भवति छन्दोजातिपरिच्छेदात्, तस्मिन् निषधेश्वरे-नले च दूतद्वारा प्रार्थ्यमाने-अभिलष्यमाणे वृत्तस्य-शीलस्य भङ्गो न भवति । किम्भूते छन्दसि ? बृहतीजगतीशब्दौ[१] छन्दोजातिवचनौ तृतीयान्तौ ख्यातपदेन-प्रसिद्धार्थेन योज्यौ । बृहत्या ख्याते-प्रसिद्धे तथा जगत्या ख्याते-प्रतीते, तथा सङ्गतैः-पदैरन्विते । अथवा छन्दसि कथम्भूते ? पदान्विते, कथं ? यथा भवति बृहत्यासं-बृहत्यां जातौ असौ-अवस्थानं यस्येति, पदान्वितक्रियाविशेषणम् । यद्वा, बृहत्या जात्या हेतुभूतया याऽसौ सम्पत्-शोभा तयान्विते । तथा गुरवः-द्विमात्रा वक्राकृतयः सत्कृतो गुरूणां गणो यस्मिंस्तत्तथाविधे । तथा शार्दूलविक्रीडितं नाम छन्दस्तस्य आडम्बरः-गौरवं यत्र तत्तस्मिन् । तथा पुण्यः-पवित्रः श्लोकं-पद्यं यस्मिंस्तत्तथाविधे । इह यद्यपि श्लोकः-अनुष्टुप् छन्दस्त्वेन लोके प्रसिद्धस्तथापि केचित् सर्वमपि पद्यं-श्लोकमाहुः। नलपक्षे किम्भूते नले ? बृहत्या-गुर्व्या सम्पदा-श्रिया अन्विते, तथा जगति-लोके आख्याते-कीर्त्तिते, तथा सत्कृतः-सम्मानितः गुरूणां-गौरवार्हाणां आचार्याणां गणः-वृन्दो[२] येन स तस्मिन्, तथा शार्दूलविक्रीडितं-सिंहविलसितं तद्वत् आडम्बरः-आटोपो विद्यते यस्य स तस्मिन्, तथा पुण्यः-पवित्रः श्लोकः-यशो[३] यस्य स तस्मिन् । इति पूर्वोक्तमभिधाय-उक्त्वा गन्तुं-यातुं उदचलत्-प्रावर्तत ।

उच्चलितं च तं-हंसं परिहासशीला सखी पुनर्बभाषे–

**'महानुभाव ! यथेयमनुरागकन्दलैरालापैस्त्वयोक्ता, तथा सोऽपि स्पृहणीयोक्तिभिरभिधातव्यः । यतो न ह्येकहस्तेन[६] तालिका वाद्यते[७], न चैकं तप्तमतप्तेनापरेण लोहं लोहेन संधीयते, नाप्येकं रक्तमरक्तेनान्येन[८] वस्त्रमपि वाससा संयोजितं शोभां लभते । केवलं वियुगलमेव[९] भवति इति ।**

**एवं वादिनीं दमयन्ती परिहासशीला[१०]मलपत् ।**

हे **महानुभाव** !-हंस ! यथेयं-दमयन्ती अनुरागाय-प्रेमबन्धाय कन्दला इव-प्ररोहा इव तज्जनकत्वात् ये ते तथाविधैरालापैस्त्वया उक्ता, तथा सोऽपि-नलः स्पृहणीया-

---

१. जगती नास्ति अनू. । २. वृन्दं अनू. । ३. यशो नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अभिलषणीया या उक्तयस्ताभिरभिधातव्यः-वाच्यः । यथेयं तस्मिन्ननुरक्ता कृता विद्यते तथा सोप्येतस्यांरागवान् विधेय इति, कन्दलेभ्योपि रागस्य-रक्तताया उत्पत्तिर्भवतीति छायार्थः । यतः, न ह्येकहस्तेन[१] तालिका वाद्यते । न चैकं तप्तं लोहं अपरेण-अन्येन अतप्तेन लोहेन संधीयते-सन्धानं संश्लेषं प्राप्नोति । "**कर्म कर्त्तरि यक्**" [ ]। तथा नाप्येकं रक्तमपि वस्त्र अन्येन-अरक्तेन वाससा संयोजितं-सन्धितं सत् शोभां लभते । केवलं-परं वियुगलं-विरुद्धयुगलमेव भवति, विरुद्धमेव द्वन्द्वं स्यात् ।

इत्येवं वदितुं शीलं यस्याः सा इत्येववादिनी तां परिहासशीलां प्रति दमयन्ती अलपत् ।

**सखि, किमस्य निष्कारणवत्सलस्यैवमभ्यर्थ्यते[१] ।**

**यस्यास्मासु निरपेक्षः पक्षपातः स्वभावजं सौजन्यम्[२], अकृत्रिमः स्नेहभावः, अनुपचरितमुपकारित्वम्, अपरिचया प्रीतिः, अनभ्यासं सौहार्दम्, अदृष्टपूर्वा मैत्री ।**

**तदेवंविधो निर्निमित्तबन्धुः किमर्थ्यते[३] । केन याच्यन्ते चन्द्रचन्दन-सज्जनाः परोपकाराय[४] । किन्तु कतिपयमुहूर्त्तमैत्रीरस[५]रञ्जितास्मन्मनसो दुस्त्यजस्याकाण्ड एवास्य गन्तुमुत्सहमानस्य किं ब्रूमः । मा गा इत्यशकुनः[६], गच्छेति निष्ठुरता, यदिष्टं तद्विधीयतामित्यौदासीन्यम्, आदर्शनात्प्रियोऽसीति क्रियाशून्यालापः, कस्त्वमेवंविधो दिव्यवाक्पक्षिरत्नमित्यप्रस्तुतः[७] प्रश्नः, केनार्थीत्यप्रक्रान्तम्, किं ते प्रियमाचराम[८] इत्युपचार[९]वचनम्, कृतोपकारोऽसीति प्रत्यक्षस्तुतिः ।**

हे **सखि** ! अस्य निष्कारणवत्सलस्य-कारणं विनैव स्निग्धस्य हंसस्य किं-एवमुक्तनीत्या अभ्यर्थ्यते-किं याच्यते ।

**यस्य**-हंसस्य अस्मासु निरपेक्षः-अपेक्षां प्रयोजनं विनैव पक्षपातः-मित्राद्यवष्टम्भः, अन्येषां हि अपेक्षां-अपेक्ष्यैव पक्षपातो भवत्यस्य त्वन्यथापि । तथा अस्य सौजन्यं-सुजनता स्वभावजं-अकृत्रिमम् , अन्येषां हि सौजन्यं कृत्रिमं स्यात् अस्य तु न तथेति । तथा अस्य स्नेहभावः अकृत्रिमः-स्वभावजः । तथा अस्य उपकारित्वं-उपकारजनकत्वं अनुपचरितं-अगौणं मुख्यमित्यर्थः । तथा अस्य प्रीतिः-प्रेम अपरिचयात्-परिचयं विनैव, अन्येषां हि प्रीतिः परिचयात्-सह संवासात् भवति, अस्य तु परिचयं विनाऽपि । तथा अस्य सौहार्दं

१. एकहस्ततलेन अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनभ्यासं-अभ्यासोऽभावः प्रत्ययनिर्देशात् सामीप्य नास्त्यभ्यासो यत्र, तथाविधं अन्येषां हि सामीप्यात् सौहार्दं भवति अस्य तु अन्यथापि । तथा अस्य मैत्री न पूर्वं दृष्टं-दर्शन यस्यां सा अदृष्टपूर्वा । "**भावे क्तः**" [ ] आहिताग्न्यादित्वान्निष्ठान्तं प्राक् प्रयोज्यं, अन्येषां हि मैत्री दर्शनपूर्वा भवति अस्य तु पूर्वमदृष्टायामपि मयि मैत्रीकरणशीलता इति ।

**तत्** इत्युपसंहारे, तस्मात् एवंविधो निर्निमित्तबन्धुः-निमित्तं विनैव बन्धुः-स्वजनः किमर्थ्यते-किं याच्यते । यतः केन याच्यन्ते चन्द्रचन्दनसज्जनाः परोपकाराय, यदुत भवन्त उपकुर्वन्त्विति, किन्तु स्वत एव उपकुर्वन्ति प्रार्थिताः । किन्तु कतिपयान्-कियतो मुहूर्त्तान् यावद् यो मैत्रीरसस्तेन रञ्जितं-आवर्जितं अस्माकं मनो येन स तस्य, दुस्त्यजस्य-त्यक्तुमशक्यस्य अस्य-हंसस्य अकाण्ड एव-अप्रस्ताव एव गन्तुमुत्सहमानस्य उद्यच्छतः-अभिलषतः किं ब्रूमः-किं वच्मः ? मा गा इत्यपशकुनः, गच्छेति निष्ठुरता-कर्कशत्वं । अथ यत् इष्टं-वाञ्छितं तद् विधीयतामित्यौदासीन्यं-उदासीनता । अथ आदर्शनात्-दर्शनं यावत् प्रियोसि-वल्लभोसि इति क्रियाशून्य आलापः, उपविश गच्छ वा इति क्रिया तया रहित आलापः-आभाषणं । अथ कस्त्वं[1] एवंविधो दिव्यवाक्-मधुरगीः पक्षिरत्नमिति अप्रस्तुतः-अप्राकरणिकः प्रश्नः। अथ केनार्थी-केन वस्तुना अर्थी-अर्थोऽस्यास्तीति अर्थी, कि वस्तु अर्थयसे इति अप्रकान्तं-अनावसरिकं । अथ किं ते प्रियं-इष्टं आचरामः-कुर्मः इत्युपचारवचनं-सेवावाक्यं । अथ कृत उपकारो येन स कृतोपकारस्तथाविधोसि इति प्रत्यक्षा-साक्षात् स्तुतिः ।

**तन्न जानीमः कल्याणबन्धो, किमुच्यसे । वरमदर्शनमेव भवादृशाम्[1], न तु लूयमानाङ्गावयवदुःसहो दर्शनव्याघातः । वरमनास्वादितमेवामृतम्, न तु सकृत्पीत्वा पुनरलाभदुःखम्[2] ।**

**तत एष[3] प्रार्थ्यसे भूयो दर्शनार्थम्, इयं च भविष्यति भवत्प्रियस्य कस्याप्युपायनमात्रमस्मदनुस्मरणनाटकसूत्रधारी हारलता[4]' इत्यभिधाय नलमुररीकृत्य 'महानुभाव, द्विधा[5] श्रुतोऽसि पान्थादस्माच्च राजहंसात्[6], द्वाभ्यामुह्यसे वाचा हृदयेन च, द्विकालं[7] स्मर्यसे दिवा नक्तं च, द्वयी गतिरस्माकमिदानीं त्वं[8] वा मृत्युर्वा' इति द्विसंख्यसंदेशार्थमिव[9] द्विगुणीकृत्योन्मुच्य च स्वकण्ठकन्दलादुत्कण्ठामिव[10] स्वां[11] मूर्तिमतीं तस्य[12]मुक्तावलीं गले व्यलम्बयत् ।**

**सोऽपि 'सुन्दरि, सोऽयं[13] स्कन्धीकृतो मया मुक्तावलीच्छलेन तस्य**

---

१. त्वं-नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**पुरो भवद्वर्णनाभारः" इत्यभिधाय सह तेन वियद्[१] विहंग[२]गणेनोत्पपात।**

प्रत्यक्षे स्तुतिरनुचिता, तत् इत्युपसंहारे, तस्माद्धेतोः हे कल्याणबन्धो !-भद्रभ्रातः ! न जानीमः किमुच्यसे-कथं कथ्यसे । यत्र तत्रापि वाक्ये बाधासम्भवात् भवादृशां-सुभगमूर्तीनां अदर्शनं-अवीक्षणमेव वरं-मनागिष्टं, न तु लूयमानाः-छिद्यमाना ये अङ्गावयवास्तद्वद् दुःसहः-सोढुमशक्यो दर्शनव्याघातः-दर्शनविच्छेदो वरं, एकशो मिलित्वा पुनर्वियोगस्तु अतितरां दुःखं जनयतीत्यर्थः । अमृतं अनास्वादितं-अपीतमेव वरं, न तु सकृत्-एकवारं पीत्वा पुनः अलाभेन-अप्राप्त्या दुःखं वरं ।

तत एष त्वं प्राथ्यसे-याच्यसे भूयो दर्शनार्थं-पुनर्दर्शनं देया इत्यर्थः । अस्माकं अनुस्मरणमेव नाटकं-नृत्यं तस्य सूत्रधारीव-सूचिकेव रङ्गाचार्येव अनया दृष्ट्या अस्माकं स्मरणं भविष्यतीत्येवंरूपा इयं च हारलता भवतः प्रियस्य-इष्टस्य कस्यापि उपायनमात्रं-ढौकनिकामात्रं भविष्यतीति अभिधाय-उक्त्वा नलं उररीकृत्य-अधिकृत्य इति द्विसंख्य-संदेशार्थं-द्विप्रकारसन्देशनिमित्तमिव द्विगुणीकृत्य-द्विसरीकृत्य स्वकण्ठकन्दलात्-आत्मकण्ठपीठात् उन्मुच्य च -उत्तार्य मूर्तिमतीं-सदेहां उत्कण्ठामिव-वाञ्छामिव मुक्तावलीं तस्य-हंसस्य गले व्यलम्बयत्-निचिक्षेप । इतीति किम् ? हे महानुभाव ! नल द्विधा श्रुतोऽसि पान्थात् अस्माच्च राजहंसात् । तथा द्वाभ्यामुह्यसे-धार्यसे वाचा हृदयेन च-वाण्या त्वन्नाम गृह्यते मनसा च स्मर्यसे इति । तथा द्विकालं स्मर्यसे दिवा-दिनेन नक्तं- रात्रौ । तथा द्वयीगतिरूपा योऽस्माकं इदानी त्वं त्वदप्राप्तौ मृत्युर्वा ।

**सोऽपि**-हंस इति अभिधाय तेन विहंगगणेन सह वियति-व्योम्नि उत्पपात-उड्डीनः । इतीति किम् ? हे सुन्दरि ! मया मुक्तावलीछलेन-मुक्तालतादम्भेन तस्य-नलस्य पुरः-अग्रे सोऽयं भवद्वर्णनाभारः-त्वदीयस्तुतिसंदोहः स्कन्धीकृतः-अङ्गीकृतः, त्वदीया स्तुतिस्तस्य पुरो वक्तव्येत्यादृतमित्यर्थः । भारो हि उद्वहनाय स्कन्धे क्रियत इति ।

**उत्पतिते च नभस्तलम् 'आगच्छत, संपद्यन्तां[३] सफललोचनाः[४], पश्यतापूर्वं[५] स्त्रीरत्नम्' इति चलत्पक्षपल्लवव्याजेन दूराद्दिक्पालानिवाह्वयति तीव्रब्रध्नमयूखसंतप्तां दिवमिवोपवीजयति, दिक्कुञ्जरनिरुद्धावकाशा आशा इवाश्वासयति, पक्षिपटले[६] तस्मिन्विस्मयोन्मुखी सा भूपालपुत्री निर्निमेषं निक्षिप्य[७] चक्षुश्चिरमूर्ध्वै[८]वावतस्थे ।**

अथ नभस्तलं उत्पतिते च-उड्डीने च तस्मिन् पक्षिपटले-हंसवृन्दे विस्मयेन-आश्चर्येण उन्मुखी-ऊर्ध्वीमुखी सा भूपालपुत्री-दमयन्ती निर्निमेषं-अक्षिसंकोचरहितं चक्षुर्निक्षिप्य-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

संस्थाप्य चिरं-चिरकालं ऊर्ध्वैव-अनुपविष्टैव अवतस्थे-स्थिता । उत्तानितनेत्राभ्यां राजहंसानवलोकयन्ती तस्थौ इत्यर्थः । किम्भूते पक्षिपटले ? उत्प्रेक्ष्यते, चलन्तौ यौ पक्षपल्लवौ-पक्षती तयोर्व्याजतः-दम्भेन दूरात् दिक्पालान् इति आह्वयतीव-आकारयतीव । अनेन भावि दिक्पालागमनसूचा । इतीति किम् ? आगच्छन्त भो दिक्पालाः ! यूयं, तथा सफललोचनाः-सफलनेत्राः भवन्तः सम्पद्यन्तां, नेत्रयोः फलमास्वादयन्तु[१] इत्यर्थः । तथा यूयं अपूर्वं-अद्भुतं स्त्रीरत्नं पश्यत । अन्योपि यो दूरात् कमपि आह्वयति स किल विततकरचालनयाऽऽह्वयति तथैते हंसा अपि । पुनरुत्प्रेक्ष्यते, तीव्राः-उग्रा ये ब्रध्नमयूखाः-रविकरास्तैः संतप्तां दिवं-नभ उपवीजयतीव-व्यजयतीव व्यजनकर्म कुर्वतीव, अन्योपि यस्तप्तो भवति स किल शान्तीकरणाय वीज्यते तथैतत्पक्षिवृन्दमपि चलत्पक्षतिभ्यां रविकरतप्तं व्योमवीजयतीति । पुनरुत्प्रेक्ष्यते, दिक्कुञ्जरैः-दिग्गजैः निरुद्धः-व्याप्तो अवकाशः-अन्तरालं यासां ता ईदृश्य आशाः-दिश आश्वासयतीव-तासां दुःखनिवृत्तिं कुर्वतीव । अन्योपि यः कैश्चिद् बलवद्भी रुद्धो भवति तस्य दुःखनिवृत्यर्थमाश्वासनं क्रियते तथैते राजहंसा अपि चलत्पक्षतिभ्यां दिग्गजाक्रान्तदिशां आश्वासनं कुर्वन्तीति ।

**चिन्तितवती च–**

**तात तावन्ममाप्येवं न विधत्से प्रजापते ।**
**पक्षौ पक्षिवदुड्डीय येन पश्यामि तन्मुखम् ॥ ३ ॥**

**चिन्तितवती** च-विचारयति स्म–

**तातेति** । तावदादौ हे तात-पितः ! प्रजापते !-वेधः ! एवमिति यथैषां पक्षौ विहितौ स्तः तथा ममापि पक्षौ किं न विधत्से-किं न कुरुषे ! किमिति अध्याह्रियते । येन-हेतुना पक्षिवत् उड्डीय-विहायो गतिं विधाय तस्य-नलस्य मुखं पश्यामि ॥ ३३ ॥

**अपि च–**

**उड्डीय वाञ्छितं यान्तो वरमेते विहङ्गमाः ।**
**न पुनः पक्षहीनत्वात्पङ्गुप्रायं कुमानुषम् ॥ ४ ॥**

**अपि च**-पुनः–

**उड्डीयेति** । उड्डीय वाञ्छितं-अभिलषितं देशं यान्तः-गच्छन्त एते विहङ्गमाः-पक्षिणः वरं-मनागिष्टा, न पुनः पक्षहीनत्वात्-पिच्छरहितत्वात् पङ्गुप्रायं-पङ्गुसदृशं कुमानुषं वरं । वरमिति मनागिष्टेऽव्ययम् । यद्यपि मनोरपत्यं स्त्री-मानुषी पुमान्-मानुष इति "**द्विचतुःपद**"

---
१. आसादयन्तु अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ ] इत्यादि लिङ्गसूत्रान् मानुषशब्दस्य स्त्रीपुंसवृत्तिता, तथापि नपुंसकत्वं लिङ्गस्य लोकाश्रयत्वात् । तथा च भवभूतिः-

**"अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्,**
**विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।**
**कालेनावरणात्यया[1] परिणते यत्स्नेहसारे स्थितं,**
**भद्रं तस्य तु मानुषस्य कथमप्येकं हि तद्दुर्लभम् ॥ ४ ॥** [ ]

**इति चिन्तयन्ती[1] गतेष्वपि तेषून्मुखी तां दिशमनुविस्मयविस्फारित-लोचना[2] निष्पन्दतया काष्ठकल्पामवस्थां दधाना चिरात्सखीभिः सम्बोध्य स्वगृहान्[3]अनीयत ।**

**इति**-अमुना प्रकारेण चिन्तयन्ती-विचारयन्ती तथा तेषु-हंसेषु गतेष्वपि उन्मुखी-ऊर्ध्वमुखी सती तां उत्तरां दिशं अनुलक्षीकृत्य विस्मयेन-आश्चर्येण विस्फारिते-विकासिते लोचने यया सा तथाविधा । तथा निष्पन्दतया-निश्चलतया तदवलोकनरसिकत्वेन काष्ठकल्पावस्थां-दारुसदृशावस्थितिं दधाना सती सा -दमयन्ती चिराय-चिरकालं सखीभिः सम्बोध्य 'हे सखि एहि, गृहं यामः' इत्येवं सम्बोधनेन विषयीकृत्य स्वगृहान् अनीयत प्रापिता । **"गृहाः पुंसि च भूम्न्येव"** [ ] इत्यमरः । णीर्द्विकर्मकः ।

**ततः प्रभृति[4] तस्याः सरलीभवन्ति निश्वासा न हासाः, स्खलन्ति वाचो न शुचः, वर्धते तन्द्रा न निद्रा, द्रवति स्वेदाम्भो न स्तम्भः, मन्दायते स्वरो न स्मरः, वाञ्छा चन्दनाय न स्पन्दनाय, सन्तापशान्तये तद्गुणादानं न स्नानम्, प्रीतये[5] हारो नाहारः, सुखायाङ्गे[6] लगन्नुद्यानप्रभञ्जनो न जनः ।**

**पठति च मुहुर्मुहुरिदं श्लोकम् ।**

**ततः प्रभृति**-आगमनदिनादारभ्य तस्याः-दमयन्त्याः निश्वासाः सरलीभवन्ति-दीर्घो भवन्ति, न हासाः-हास्यानि सरलीभवन्ति । तथा तस्याः वाचः-वाण्यः स्खलन्ति-प्रतिघातमाप्नुवन्ति, न शुचः-शोकाः स्खलन्ति, सर्वदापि तासां प्रवृत्तेः । तथा तस्यास्तन्द्रा-आलस्यं वर्धते-स्फीतीभवति, न निद्रा-स्वापो वर्द्धते विरहिणीत्वान्न निद्रातीत्यर्थः । तथा तस्याः स्वेदाम्भः-घर्मजलं द्रवति-क्षरति, न स्तम्भः-जाड्यं द्रवति । तथा तस्याः स्वरः-ध्वनिर्मन्दायते-मन्दीभवति वक्तुं न शक्नोतीति भावः, न स्मरः-कामो मन्दायते, स च दिने दिनेऽधिको भवतीत्यर्थः । तथा तस्याः विरहतापतप्तत्वात् चन्दनाय-गोशीर्षद्रवाय वाञ्छा-

१. °वरणात्ययात् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ईहा, न स्यन्दनाय-रथाय वाञ्छा, न स्यन्दनमारूढवतीत्यर्थः । तथा तस्याः सन्तापशान्तये तस्य-नलस्य ये गुणाः-औदार्यादयस्ते, यदा दानं-ग्रहणं तद्गुणादानं तदभूत्, न स्नानं-सवनं सन्तापशान्तयेऽभूत् । ततः प्रभृति न कदापि स्नाति स्मेत्यर्थः । तथा तस्याः प्रीतये-प्रेम्णे हरः-शम्भुरेवाऽभवत्, न आहारः-भक्षणं प्रीतयेऽभूत् । तथा तस्या अङ्गे-शरीरे उद्यानप्रभञ्जनः-वनवात एव लगन्-आश्लिष्यन् सुखाय, न जनः-परिजनाङ्गे लगन् सुखायेति ।

**मुहुर्मुहुः**-[१] वारम्वारं इदं श्लोकं-पद्यं पठति च–

**विश्राम्यन्ति न कुत्रचिन्न च पुनर्मुह्यन्ति मार्गेष्वपि,**
**प्रोत्तुङ्गेऽपि लगन्ति[१] नान्तरतरुश्रेणीशिखापञ्जरे ।**
**खिद्यन्ते न मनोरथाः कथममी तं देशमुत्कण्ठया,**
**धावन्तः पथि न स्खलन्ति विषमेऽप्यास्ते स यस्मिन्प्रियः ॥५॥**

**विश्राम्यन्ती**ति वृत्तम् । यस्मिन् देशे स प्रियः-नल आस्ते-विद्यते "**सत्तायां अस्ति आस्ते**" [ ] इति **क्रियाकलापे** । तं देशं प्रति उत्कण्ठया-वाञ्छया धावन्तः-द्रुतं गच्छन्तो अमी मनसि रथा इव मनोरथाः-संकल्पाः कथं न कुत्रचित् विश्राम्यन्ति-श्रान्ता[२] भवन्ति । तथा पुनर्मार्गेष्वपि कथं न मुह्यन्ति-मूढा भवन्ति । न चेति सामुदायिको निपातो निषेधार्थः । तथा प्रोत्तुङ्गेऽपि-प्रकर्षेणोच्चेऽपि अन्तरे-तयोरन्तराले यास्तरुश्रेणी-शिखास्ता एव अतिगहनत्वात् पञ्जरमिव पञ्जरं तस्मिन् कथं न लगन्ति-न श्लिष्यन्ति । तथा कथं न खिद्यन्ते-न खिन्ना भवन्ति । तथा कथं विषमे-दुःसंचारे पथि-मार्गे न स्खलन्ति- न प्रतिहता भवन्ति, यत्र गन्तव्यं तत्र गच्छन्तीत्यर्थः । विश्रामादयो रथधर्माः, अन्ये हि रथा विश्राम्यन्ति, तथा विषममार्गेषु मुह्यन्ति, तथा द्रुपंक्तिशिखापञ्जरे लगन्ति, तथा खिद्यन्ते स्खलन्ति च, न पुनरमी मनोरथा इत्याधिक्यमेषां तेभ्यां इति ॥ ५ ॥

**तेऽपि राजहंसाः शशाङ्कधरेषु, सप्रपञ्चपञ्चाननेषु, शिवरूपेषु, वनेषु, सुशोभां कौमुदी दधत्सु, शश्वदनुकृतसामुद्रवृद्धिषु[२], चन्द्रमण्डलरूपेष्विव सरःसलिलेषु [३]विहरन्तस्तुहिनाद्रिनिकुञ्जानिव[४] सत्रिपथगान्नगनगरग्रामाग्रहारपुर[५]पत्तनप्रदेशानुल्लङ्घयन्तः[६] कतिपयदिवसैरासेदुरुद्यानं निषधायाः ।**

**क्रीडितुमारभन्त च स्वच्छन्दम् ।**

अथ **तेऽपि** राजहंसा वनेषु-काननेषु सरःसलिलेषु च -सरसीजलेषु च विहरन्तः-

---

१. मुहुः नास्ति । २. विश्रान्ता अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विचरन्तस्तथा नगाश्च-पर्वता नगराणि च-पुराणि ग्रामाश्च-सवृत्तयो[१] जनावासा अग्रहाराश्च-द्विजस्थानविशेषाः पुराणि च, पत्तनानि च-पुटभेदनानि तेषां प्रदेशान्-स्थानानि उल्लंघयन्तः-अतिक्रामन्तः कतिपयैः-कियद्भिर्दिवसैः निषधाया उद्यानं आसेदुः-आपुः । नगरपुरयोः गुरुलघुत्वकृतो विशेषः । यद्वा, पुराणि-गृहाणि । **यदनेकार्थः**-**"पुरं शरीरे नगरे गृहपाटलिपुत्रयोः"** [२/४५०] इति । **"ग्रामो वृन्दे शब्दादिपूर्वके । षड्जादौ संवसथे च"** [२/३२४-३२५] **इत्यनेकार्थः**। कीदृक्षु वनेषु ? शशा अङ्के-उत्सङ्गे यस्याः सा तथाभूता धरा-भूमि-र्येषु शशासंकुले, इत्यर्थः । तथा सप्रपञ्चाः-सछद्मानः पञ्चाननाः-सिंहा येषु तानि तेषु । पुनः किम्भूतेषु ? शिवरूपेषु-कल्याणस्वरूपेषु । पक्षे, शिवरूपेषु-शम्भुस्वरूपेषु । किम्भूतेषु शिवेषु ? शशाङ्कं-चन्द्रं धरन्ति ये ते तथाविधेषु, तथा सह प्रपञ्चैः-पृथग्मार्गागमोपदेशलक्षणैर्वर्तन्ते यानि तथाभूतानि पञ्चसंख्यानि आननानि-वक्त्राणि येषां ते तथा तेषु। किम्भूतेषु सरोजलेषु ? कुमुदानामियं कौमुदी तां शोभनशोभां दधत्सु-बिभ्रत्सु । तथा शश्वन्-निरन्तरं अनुकृता-अनुहृता समुद्रस्य वृद्धिर्यैस्तानि तथा तेषु, यादृशी अब्धेरम्भसां वृद्धिस्तादृशी सरोजलानामपि । उत्प्रेक्ष्यते, चन्द्रमण्डलरूपेष्विव-शशिबिम्बस्वरूपेष्विव । किम्भूतेषु चन्द्रबिम्बेषु ? शोभना शोभा यस्याः सा तथाविधां कौमुदीं-ज्योत्स्नां दधत्सु, तथा शश्वत् अनु-उदयात् पश्चात् कृता समुद्रस्य वृद्धिर्यैस्तानि तथा तेषु, चन्द्रोदयो हि जलधिवृद्धये । यदि वा, न विद्यन्ते नावो यत्र तत् अनु, अनु यथा भवति, एवं कृतसमुद्रवृद्धिषु, पूरोत्पीडे हि न कोपि नाव क्षिपति । कीदृशो नगनगरादिप्रदेशान् ? सत्राणि-ब्राह्मणादीनां भोजनस्थानानि, यज्ञा वा विद्यन्ते येषु ते सत्रिणः ते च ते पन्थानश्च सत्त्रिपथास्तान् गच्छन्ति-प्राप्नुवन्तीति सत्त्रिपथगास्तान् सत्त्रवन्मार्गसहितानित्यर्थः । कानिव ? तुहिनाद्रिनिकुञ्जानिव- हिमाद्रिकुञ्जानिव । तान् किम्भूतान् ? सह त्रिपथगया-गङ्गया वर्तन्त इति सत्रिपथगास्तथाविधान् ।

**च**-पुनस्ते-हंसाः स्वच्छन्दं-स्वेच्छया क्रीडितुं-रन्तुं आरभन्त ।

**अथ [१]तेषामध्येन्यतमामवलोक्य क्रीडातडागपङ्कजपञ्जरे[२] राजहंसीं समागत्य[३] त्वरया हंसदर्शनोत्सुकं सरोरक्षिका[४] राजानं व्यजिज्ञपन् ।**

**'देव, हंसवार्त्तामनुदिनं[५] संपृच्छति देवस्तदद्य काचित् ।**

**कुरुते नालकवलनं दूरं विक्षिपति गर्भजम्बालम् ।**
**त्वदरिवधूरिव राजन्नुद्यानसरोगता हंसी ॥ ६ ॥**

---

१. सवृतयो अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अपि च –

**अभिलषति नालमशनं स्वपिति नवाम्भोजपत्रशयनेऽपि ।**
**नीरागमना नृपते तव रिपुवनितायते हंसी ॥ ७ ॥**

**अथ** च तेषां हंसानां मध्ये अन्यतमां क्रीडातडागस्य यानि पङ्कजानि-पद्मानि तेषां पञ्जरे-मध्ये राजहंसीमवलोक्य सरोरक्षिका-सरसीरक्षित्री त्वरया-वेगेन समागत्य हंसदर्शनोत्सुकं-मरालावलोकनोत्कण्ठितं राजानं व्यजिज्ञपत्-विज्ञप्तवती ।

**हे देव** ! देवः-भवान् राजा हंसवार्त्तां अनुदिवसं-प्रतिदिनं पृच्छति तदद्य काचित् हंसी ।

**कुरुत** इति वृत्तम् । हे राजन् !-नृप ! उद्यानसरः-वनतडागं गता-प्राप्ता हंसी नालस्य-विसकाण्डस्य कवलनं-ग्रासं कुरुते, तथा गर्भजम्बालं-गर्भे तन्मध्ये यो जम्बालः-कर्दमस्तं च दूरं-अनिकटे विक्षिपति-परिहरति । केव ? त्वदरिवधूरिव-त्वदीयवैरिस्त्रीव । सा च किम्भूता ? उद्यानेन पलायनेन सरोगता सामयता यस्याः सा तथाविधा । तथा अलकानां-केशानां वलनं-सन्मार्जनं न कुरुते । तथा गर्भे जातं बालं-डिम्भं दूर विक्षिपति, भीत्या हि गर्भः पतति ॥ ६ ॥

**अपि** च-पुनः

**अभी**ति ? हे नृपते !-राजन् ! हंसी तव रिपुवनितेव आचरति रिपुवनितायते । कथम् ? या हंसी नालं-कमलकाण्डं अशनं-आहारं अभिलषति-वाञ्छति, तथा नवाम्भोजशयने-नूतनाब्जपत्रशय्यायां स्वपित्यपि, तथा नीरे-जले आगमनं यस्याः सा नीरागमना । रिपुवनिता तु नीरागं-वैराग्योपेतं मनो यस्याः, अतएव अलं-अत्यर्थं, अशनं नाभिलषति नापि कमलदलतल्प शेते । वा-अथवार्थः[१] ॥ ७ ॥

**राजापि तस्याः श्लिष्टार्थमिदमार्यायुगलमवधार्य[१] सावसरं प्रशस्त[२]-स्तोकं स्मितसुधाधवलिताधरपल्लवः 'लवङ्गिके, यथा कथयसि तथा तेऽप्यागता हंसाः कथमन्यथा तस्याः खल्वेकाकिन्याः संभवः' इति तद्वार्त्तया यावदास्ते ।**

**तावन्नीलोत्पलदलदीर्घलोचना चन्द्रमुखी बन्धूकुसुमकान्तदन्तच्छदा नीलांशुकपटीं परिदधाना पक्वकलममञ्जरीगौराङ्गी प्रकाशहासा हंसैर-नुगम्यमाना मूर्त्तिमती शरदिव वनपालिका प्रविश्य 'देव, सोऽयं कथमप्या-**

---

१. अथवार्थे अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**गतो रणरणककारणमपराधी विहंगः' इत्यभिधाय तं राजहंसमुभयकर-कमलाञ्जलिगतमुत्फुल्लपाण्डुपङ्कजार्धमिव पुरः पादारविन्दयोर्निधाय राज्ञः प्रणाममकरोत् ।**

**राजाऽपि** तस्याः-सरोरक्षिकायाः श्लिष्टार्थं-द्व्यर्थमिदं आर्यायुगलं-छन्दोजाति-विशेषनिबद्धपद्यद्वयमवधार्य-मनसि आकलय्य स्तोकं-अल्पं यत् स्मितं-हास्यं तदेव सुधापीयूषं तया धवलितः-पाण्डुरितः अधरपल्लवो यस्य स तथाविधः सन्नुवाच-हे लवङ्गिके ! सावसरं-ससमयं प्रस्तावोचितं प्रशस्तं-प्रधानं यथा भवति तथा कथयसि, तथा तेऽपि हंसा आगताः, अन्यथा तेषामनागमने खलु-निश्चितं तस्याः एकाकिन्याः हंस्याः कथं सम्भवः, इति तद्वार्त्तया-हंसवार्त्तया यावदास्ते ।

हंसगमनवार्त्तां यावत् कुरुते नृपस्तावत् मूर्तिमती-सदेहा शरदिव वनपालिका प्रविश्य- राजाङ्गणान्तः प्रवेशं विधाय हे देव ! सोऽयं यः पूर्वं तद्वार्त्तामकरोत् स एवाऽयं रणरणककारणं-औत्सुक्यनिमित्तं अपराधी-विरहव्यथोत्पादकत्वात् कृतापराधो हंसः कथमपि-केनचित् प्रकारेण आगत इत्यभिधाय-उक्त्वा उभयाभ्यां करकमलाभ्यां यो अञ्जलिस्तत्र गतं-प्राप्तं उभाभ्यां कराभ्यां धृत्वा तं राजहंसं राज्ञः पादारविन्दयोः पुरः-अग्रे निधाय-संस्थाप्य प्रणामं अकरोत्-ननाम । किम्भूतम् ? उत्प्रेक्ष्यते, उत्फुल्लं-विकसितं यत् पाण्डुपङ्कजं-श्वेतपद्मं तदेव अर्धः-पूजाविधिस्तमिव । मन्ये, पाण्डुपङ्कजमेवार्थी कृतमिति । किम्भूता वनपालिका ? नीलोत्पलदलवद् दीर्घे-आयते लोचने यस्याः सा, तथा चन्द्रवद्वर्तुलं मुखं यस्याः सा चन्द्रमुखी, तथा बन्धूककुसुमवत् कान्तौ-रक्तौ दन्तच्छदौ-ओष्ठौ यस्याः सा, तथा नीलं अंशुकं-वासस्तस्य पटी-उत्तरीयं तां परिदधाना-वसाना, तथा पक्वा या कलममञ्जरी तद्वद्गौरं-पीतवर्णं अङ्गं-शरीरं यस्याः सा, परिपाके हि शालयो गौरवर्णा भवन्ति । तथा प्रकाशः-प्रकटो हासः-हास्यं यस्याः सा, तथा हंसैः-अपरैर्मरालैः अनुगम्यमाना-अनुस्रियमाणा, पुरतो वनपालिका पश्चात्ते हंसा आगच्छन्तीति । किम्भूता शरत् ? नीलोत्पलदलान्येव दीर्घे लोचने यस्याः सा, तथा चन्द्र एव मुखं यस्याः सा, शरदि सप्रभवत्वाच्चन्द्रमसः, तथा बन्धूककुसुमान्येव कान्तौ-मनोज्ञौ दन्त-छदौ यस्याः सा, तथा नीलां-नीलवर्णांशुका एव पटी तां परिदधाना-बिभ्रती, तथा पक्वकलममञ्जर्य एव गौरं अङ्गं यस्याः सा, तथा प्रवृद्धाः कासाः-कासपुष्पाण्येव हासो यस्याः सा, तथा हंसैरनुगम्यमाना शरदि मानससरसो हंसानामागमनात् । तदानीमेव अब्जानां विकसनात् उत्फुल्लपाण्डुपङ्कजार्थतापि युक्ता ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**राजाऽपि 'सारसिके, साधु कृतम् । तत्क्रियतामशून्यः स्वाधिकारः । गम्यतामिदानीं 'यथास्थानम्' इत्यभिधाय तुष्टिप्रदानपरितोषितां तां लवङ्गिकासहितां विसृज्य, विरलीकृत्यपरिजनः प्रत्युज्जीवनौषधमिव प्राणरक्षाक्षरमिव स्वस्थीकरणमणिमिवाश्वासनभेषजमिवाह्लादनकन्दमिव तमग्रेस्थितमानन्दनिःस्पन्दपक्ष्मपालिना चिरं चक्षुषाऽविलोक्य बहुमानयन्मुग्धस्मितेन स्वागतमपृच्छत् ।**

**राजाऽपि**-नलः उवाच —हे सारसिके ! त्वया साधु कृतं-चारु चक्रे । तदित्युपसंहारे, तस्मात् स्वाधिकारः-वनपालनलक्षणो निजाधिकारः अशून्यः-अविरहितः क्रियताम् । तथा यथास्थानं स्वं स्वं स्थानमनतिक्रम्य-यथास्थानं स्वीये स्वीये स्थाने इदानीं गम्यतां इत्यभिधाय, तुष्टया-हर्षेण यत्प्रदानं-हारादेर्वितरणं वासनेति यावत् तेन प्रकर्षेण तोषितां-आनन्दितां तां-सारसिकां लवङ्गिकासहितां विसृज्य-मुक्त्वा । तथा परिजनं विरलीकृत्य- स्तोकीकृत्य अग्रे स्थितं तं-हंसं आनन्देन निःस्पन्दे-निश्चले पक्ष्मपाली-प्रशस्तनेत्ररोमाणि यस्य तत्तथाविधेन चक्षुषा चिरं विलोक्य बहुमानयन्-गौरवयन् मुग्धस्मितेन-रम्यहास्येन स्वागतमपृच्छत्-सुखागमनवार्त्तां पप्रच्छेत्यर्थः । पृच्छेर्द्विकर्मकता । किम्भूतं तम् ? उत्प्रेक्ष्यते, प्रत्युज्जीवनस्य-पुनः प्राणधारणस्य औषधमिव-अगदमिव, अनेनागतेन नलस्य प्रत्युज्जीवनमिव जातमित्यर्थः । तथा प्राणरक्षाया अक्षरमिव, यथा प्राणरक्षाक्षरेण गच्छन्तः प्राणास्तिष्ठन्ति तथा अनेन हंसेन नलस्य गच्छन्तः प्राणा धृता इति । तथा स्वस्थीकरणस्य चेतः स्वास्थ्यविधानस्य मणिमिव, यथा स्वस्थीकरणमणिना चेतः स्वास्थ्यं विधीयते तथा अनेनापि । तथा आश्वासनाय-दुःखनिवर्त्तनाय भेषजमिव-औषधमिव, यथा भेषजेन आश्वासो जायते तथा अनेनापि । तथा आह्लादनाय-प्रीतिजननाय कन्दमिव, यथा कन्दात्-प्ररोहोत्पत्तिस्तथाऽस्मान्नलस्य आह्लादो जायत इति ।

**सोऽपि 'देव' त्वद्दर्शनामृतमनुभवतो ममाद्य स्वागतम्' इत्यभिधायोपश्लोकयांचकार ।**

**देव—**

**प्रसृतकमलगन्धं नीरसंसक्तकण्ठं,**
**धृतकुवलयमालं जातभङ्गोर्मिकं च ।**
**त्वयि कृतरुषि भीतास्तावदास्तां तडागं,**
**निजमपि च कलत्रं शत्रवो नाद्रियन्ते ॥ ८ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**किं चान्यत्—**

**असमहरिततीरं विस्रजम्बालशेषं,**
**स्फुटकुमुदपरागोल्लाससंपद्वियुक्तम् ।**
**वयमिह बहुशोकं दृष्टवन्तो वनान्ते,**
**त्वदरियुवतिलोकं ग्रीष्ममासे सरश्च ॥ ९ ॥**

**सोऽपि**-हंस इत्यभिधाय नलं उपश्लोकयाञ्चकार-श्लोकाभ्यां उपस्तौति स्म । इतीति किम् ? हे देव ! तव दर्शनमेव अमृतं अनुभवतः-आस्वादयतः अवलोकयत इत्यर्थः । मम स्वागतं-शोभनमागतं-आगमनम् ।

**हे देव** !

**प्रसृतेति** । त्वयि कृतरुषि-रुष्टे सति आस्तां तावद् यद् भीताः-त्रस्ताः शत्रवस्तडागमेवं[१] नाद्रियन्ते-नादरं कुर्वन्ति यावन्निजं कलत्रमपि-रमणीमपि नाद्रियन्ते । किम्भूतं तडागम् ? प्रसृतः-प्रवृत्तः कमलानां-अब्जानां गन्धो यत्र तत्, तथा नीरेण संसक्तः-संयुक्तः कण्ठः-पालिप्रान्तो यस्य तत्, तथा धृता कुवलयानां-नीलोत्पलानां माला-पंक्तिर्येन तत्, तथा जाता-उत्पन्ना भङ्गाः-तरङ्गाः ऊर्मयश्च-कल्लोला यत्र तत् । एतच्चतुष्टयं तडागादरहेतुः । किम्भूतं कलत्रम् ? प्रसृतः के-मूर्ध्नि मलगन्धो यस्य, तत्स्नानाभावात् । तथा निर्गतो रसो वक्त्रामृतकलाशृङ्गारादिर्वा यस्मात्तत्, तथा [सं]सक्तः-अन्तर्लग्नः कण्ठो यस्य तत् । तथा धृता कुत्सितवलयानां सुवर्णाद्यभावात् काचादिवलयानां माला-पंक्तिर्येन तत् । तथा जातभङ्गा-भग्ना ऊर्मिका-अङ्गुलीयकं यस्य तत् ॥ ८ ॥

**किञ्चान्यत्**-पुनरपरं किम् ?

**असमेति** । हे देव ! वयं इह वनान्ते-वनप्रान्ते एवंविधं त्वदरियुवतिलोकं-त्वदहितस्त्रीलोकं ग्रीष्ममासे एवंविधं सरश्च दृष्टवन्तः-अवलोकितवन्तः । किम्भूतं त्वदहितस्त्रीलोकम् ? हरितते:-सिंहपद्धतेः सकाशात् ईरः-क्षेपस्त्रासो हरिततीरः, असमः-विषमो हरिततीरो यस्य स तम् । अथवा मा-लक्ष्मीस्तया सह वर्तत इति समं न समं असमं-असश्रीकं, तथा हरितती:-वानस्पंक्ती ईरयति-क्षिपयतीति हरिततीरः, पश्चात् कर्मधारयस्तम् । तथा विस्रजं-विगतमालं, तथा बाला एव शेषाः-अवशिष्टा यस्य स तं, हतभर्त्रादित्वात् । तथा स्फुटं कु-कुत्सा यस्य स तं स्फुटकुं, तथा उद्गतोऽपरागस्य-रागाभावस्य उल्लासो यस्य तथाविधश्चासौ सम्पद्वियुक्तश्च । अथवा स्फुटा कुत्सिता उदरभरणादिमात्रजां उद्यस्य स स्फुटकुमुद्, तथा अपगतो रागोल्लासो यस्य स्फुटकुमुच्चासौ

१. एवंविधं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अपरागोल्लासश्च स्फुटकुमुदपरागोल्लासः स चासौ सम्पद्वियुक्तश्च । तथा बहुः-बहुलः शोकः-शुक् यस्य स तं । कीदृशं ग्रीष्मे शरः ? समं हरितं तीरं यस्य तत् समहरिततीरं, न समहरिततीरं असमहरिततीरं-विषमं शुष्कं च तीरं यस्येत्यर्थः । तथा विस्त्रः-आमगन्धिको जम्बालः-कर्दम एव शेषो यत्र तत् । तथा विकसितकुमुदरेणूल्लाससमृद्धिरहितं । तथा नास्ति कं-जलं अत्रेति अकं, बहुश इति क्रियाविशेषणम् ॥ ९ ॥

**राजापि 'श्लेषोक्तिनिधे, तथा गृहीत्वास्मन्मनो गतवानसि, यथा सुखसंपत्तिशून्याः[१] संतापारम्भिणो रणरणकाङ्कुरप्ररोहकाः कथमप्यस्माकमेते[२]ऽतिक्रान्ता दिवसाः ।**

**तत्कथय । का नाम साभिनन्दनीया[३] दिक्, यस्यां विहारमकरोः[४] । ते[५] सफलचक्षुषो जनाः, यैश्चिरमालोकितोऽसि । ते [६]लब्धसुभाषितामृतरसास्वादाः यैः संभाषितोऽसि । ते प्राप्तप्राणितफलाः[७], यैः सह[८]गोष्ठीमनुष्ठितवानसि ।**

**स्पृहणीयसंगम, गते त्वयि तर्कशास्त्रमिव प्रस्तुतपरमोहम्, व्याकरणमिव भूतनिष्ठमिदमस्माकमासीन्मनः ।**

**तदेह्येहि[९] इत्यभिधाय स्वयं करकमलतलेनोत्क्षिप्य सस्नेहं परा-मृशत्[१०] ।**

**राजाप्युवाच**-हे श्लेषोक्तिनिधे ! तथा अस्मन्मनो गृहीत्वा गतवानसि । यथाऽस्माकं कथमपि महता कष्टेन एते सुखसम्पत्त्या-सुखसमृद्ध्या शून्याः-रहिताः तथा सन्तापं-दुःखं आरभन्ते-जनयन्तीत्येवंशीलाः सन्तापारम्भिणः, तथा रणरणकमेव-दमयन्ती[१] प्रत्यौत्सुक्यमेव अङ्कुरास्तेषां प्ररोहकाः-जनकाः दिवसा अतिक्रान्ताः ।

**तत्**-तस्मात् कथय । का नाम साभिनन्दनीया-स्तवनीया दिक् यस्यां दिशि त्वं विहारमकरोः । हे हंस ! ते सफलचक्षुषः-कृतार्थनेत्रा जनाः । यैस्त्वं चिरं आलोकितोसि-वीक्षितोसि । तथा ते लब्धः सुभाषितान्येव अमृतरसस्तस्य आस्वादो यैस्ते लब्धसुभाषितामृतरसास्वादाः जनाः यैः सम्भाषितोसि-वादितोसि । तथा ते प्राप्तं प्राणितस्य-जीवितस्य फलं यैस्ते प्राप्तप्राणितफलाः, यैः सह गोष्ठीं-संलापं अनुष्ठितवान्-कृतवानसि । **"गोष्ठीसंलापे परिषद्यपि" इत्यनेकार्थः** [२/१०७] ।

---

१. दमयन्तीं अनु. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**स्पृहणीयः**-अभिलषणीयः सङ्गमः-सम्बन्धो यस्य स तस्य सम्बोधनं क्रियते हे स्पृहणीयसङ्गम !-हे हंस ! त्वयि गते सति इदं अस्माकं मनः प्रस्तुतः-प्रकृतः परः-उत्कृष्टो मोहः-मूर्छा यस्मिंस्तत्तथाविधं प्राप्तचैतन्यराहित्यं आसीत् , मूर्छितं जातमित्यर्थः । किमिव ! तर्कशास्त्रमिव । किम्भूतं तर्कशास्त्रम् ? प्रस्तुतः परम ऊहः-वितर्को यत्र तत्तथाविधं । तथा त्वयि गते सति अस्मन्मनः भूतनिष्ठं भूता-सञ्जाता निष्ठा-क्लेशो यत्र तत्तथाविधं आसीत् । किमिव ? व्याकरणमिव । किम्भूतं तत् ? भूते-अतीते काले निष्ठा-संज्ञः प्रत्ययो यत्र तत् । "**निष्ठोत्कर्षव्यवस्थयोः, क्लेशे निःपतौ नाशेंते निर्वाहे यातने व्रते**" इत्य**नेकार्थः** [२/१०८] ।

**तत्**-तस्माद्धेतोः हे हंस ! एहि एहि-आगच्छ आगच्छ इत्यभिधाय-उक्त्वा स्वयं करकमलतलेन उत्क्षिप्य-उच्चैर्गृहीत्वा सस्नेहं-सप्रेमं परामृशत्-पस्पर्श ।

**सोऽपि 'एष महान्प्रसादो यदेवमनुकम्पतेऽस्मान्देवः' इत्यभिधाय गमनादारभ्य दमयन्तीदर्शनालापव्यतिकरमशेषं हारलतार्पणपर्यन्तमाचचक्षे ।**

**आख्याय च चरणेनैकेन ग्रीवाग्रादाकृष्य तां तथास्थितामेव मुक्तावलीमिदमवादीत् ।**

**सोऽपि**-हंस, इत्यभिधाय गमनादारम्य-यद्दिने इतो गमनं विहितं तद्गमनदिनादारभ्य दमयन्त्या दर्शनं च-अवलोकनं आलापश्च-सम्भाषणं तयोर्व्यतिकरः-वृत्तान्तस्तं अशेषं-समस्तं हारलताया यत् अर्पणं-दानं तत्पर्यन्तं-तदवसानं आचचक्षे-आख्यातवान् । इतीति किम् ? हे राजन् ! एष महान्प्रसादः-अनुग्रहः यत् एवं करस्पर्शनादिना देवः-भवान् अस्मान् अनुकम्पते-दयां कुरुते ।

**आख्याय** च-उक्त्वा च एकेन चरणेन च तां मुक्तावलीं-हारलतां, तथा स्थितामेव-द्विगुणीकृतामेव ग्रीवाग्राद् आकृष्य-गृहीत्वा इदमवादीत् ।

**उन्मादिनी मदनकार्मुकमण्डलज्या,**
**सौभाग्यभाग्यपरवैभववैजयन्ती ।**
**मुक्तावली कुलधनं नरनाथ सैषा,**
**कण्ठग्रहं तव करोतु भुजेव तस्याः ॥ १० ॥**

**उन्मादिनी**ति वृत्तम् । हे नरनाथ ! सा[1] -एषा मुक्तावली तव कण्ठग्रहं-कण्ठस्वीकारं

---

१. सा नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

करोतु, कण्ठकन्दले निधीयतामित्यर्थः । केव ? तस्याः-दमयन्त्या भुजलतेव, यथा तस्या भुजलता तव कण्ठालिङ्गनं करिष्यति तथेयमपि करोतु । उभयी अपि कीदृशी ? उन्मदयति-हर्षयतीत्येवंशीला उन्मादिनी, तथा मदनकार्मुकमण्डलस्य-कुण्डलीकृतस्मरधनुषो ज्येव-प्रत्यञ्चेव, उभयीभ्यामपि जगज्जयात् । तथा सौभाग्यस्य-सुभगत्वस्य भाग्यस्य च-भागधेयस्य परं-उत्कृष्टं यद्वैभवं-प्रभुत्वं तेन वैजयन्तीव-पताकेव या सा, अतः परं सौभाग्यं भाग्यं च कस्या अपि नास्तीत्यर्थः । तथा कुलस्य-तदन्वयस्य धनं-स्वं कुलधनं तत्कुलसर्वस्वमित्यर्थः । इदं मुक्तावलीमेवापेक्ष्य विशेषणम् ॥ १० ॥

**अपि च–**

**प्रेमप्रपञ्चनवनाटकसूत्रधारी, मूर्त्ता मनोभवनृपस्य नियन्त्रणाज्ञा ।**
**तस्याः स्वयंवरपरिग्रहदूतिरेषा, हारावली हृदि पदं भवतः करोतु ॥ ११ ॥**

**अपि च-पुनः–**

**प्रेमेति** वृत्तम् । हे नृप ! एषा हारावली भवतो हृदि-हृदये पदं-अवस्थानं करोतु, त्वद्हृदयमलङ्करोतु । किम्भूता हारलता ? प्रेमप्रपञ्च एव-प्रीतिविस्तार एव नवं नाटकं-नृत्यं तस्य सूत्रधारीव-रङ्गाचार्येव । यथा सूत्रधारी नृत्यं प्रवर्तयति तथेयं प्रेमप्रपञ्चं प्रवर्तयतीति । तथा मनोभवनृपस्य-कामभूपस्य मूर्त्ता-सशरीरा नियन्त्रणाज्ञा-युवजन-मनोबन्धनरूप आदेशः । तथा तस्याः-दमयन्त्याः स्वयम्वरे यः परिग्रहः-स्वीकारस्तत्र दूतिकेव या सा । यथा दूती प्रियस्य प्रियायाः स्वीकारं कारयति, तथेयमपि दमयन्तीस्वीकारं कारयिष्यतीति ॥ ११ ॥

**राजा तु तामादाय निरूप्य च चिरं चिन्तयांचकार ।**

**राजा तु** तां-हारलतामादाय निरूप्य च-अवलोक्य च चिरं चिन्तयाञ्चकार-विचारयामास ।

**आनन्दिसुन्दरगुणामलकोपमान-मुक्ताफलप्रचयमद्भुतमुद्वहन्ती[1] ।**
**एषा च सा च नयनोत्सवकारिकान्तिश्चेतोहरा हृदि पदं न करोति कस्य ॥१२॥**

**आनन्दीति** वृत्तम् । एषा चेयं-हारलता सा च-दमयन्ती कस्य हृदि-वक्षसि चेतसि च पदं-अवस्थानं न करोति, अपितु सर्वस्यापि करोत्येवेत्यर्थः । किम्भूता हारलता ?

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आनन्दी-आनन्दजनकः सुन्दरो गुणः-तन्तुर्यस्यां सा आनन्दिसुन्दरगुणाः, तथा अद्भुतं-आश्चर्यकारिणं आमलकोपमानानां मुक्ताफलानां-मौक्तिकानां प्रचयं-समवायं उद्वहन्ती-धारयन्ती, तथा नयनयोरुत्सवकारिणी-हर्षविधात्री कान्तिः-छविर्यस्याः सा, तथा चेतोहरा-मनोहरा । किम्भूता सा दमयन्ती ? आनन्दितः सुन्दरा गुणाः-शौर्यौदार्योदयो यस्याः सा तथाविधा, तथा मलात्-पापात् मालिन्याद्वा कोपात्-क्रोधान्मानात्-गर्वात् सादृश्याद् वा मुक्ता-भ्रष्टा, तथा अद्भुतं-चित्रं फलानां प्रचयं उद्वहन्ती परिणेतुरिति शेषः, तथा नेत्रयोरुत्सवकारिणी-हर्षविधायिनी कान्तिः-देहदीप्तिर्यस्याः सा, तथा चेतसि हरो यस्याः सा चेतोहरा ॥ १२ ॥

**इति चिन्तयन्द्विगुणामेकगुणीकृत्य पुनः सस्पृहमैक्षत ।**

**हंसस्तु विहस्य परिहासमकरोत् ।**

**इति**-अमुना प्रकारेण चिन्तयन् सन् स नृपः द्विगुणां तां मुक्तालतां एकगुणीकृत्य-एकसरीकृत्य पुनः सस्पृहं-साभिलाषं ऐक्षत-व्यलोकयत् ।

**हंसस्तु** विहस्य परिहासं-नर्मलीलामकरोत् ।

**तया दत्ता मयानीता स्वयमाह्लादिनी तव ।**
**इत्यनेकगुणाप्येषा कथमेकगुणीकृता ॥१३॥**

**तयेति** । वृत्तम् । हे राजन् ! तया-दमयन्त्या दत्ता, मया-हंसेन आनीता, तव स्वयमाह्लादिनी-प्रीतिजनयित्री इत्येवं अनेके चारुतादयो गुणा यस्याः सा अनेकगुणाः, एवंविधाप्येषा-हारलता कथं एकगुणीकृता-एकचारुत्वादिगुणसंयुता कृता, पक्षे एकसरीकृता ॥ १३ ॥

**राजापि परिहासेनान्तःसूत्रं दर्शयन् 'पक्षिपुंगव, किं न पश्यस्यैकगुणैवेयम्[१] ।**

**राजापि** परिहासेन-लीलापूर्वकहासेन अन्तःसूत्रं-मध्यगतं गुणं दर्शयन् हे पक्षिपुङ्गव !-पक्षिश्रेष्ठ ! किं न पश्यसि एकगुणैवेयम् ।

**अथवा—**

**अथवा**-इति पक्षान्तरे,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कः करोति गुणवान्गुणसंख्यां, श्लाघ्यजन्ममहसः स्फुटमस्याः ।**
**कुम्भिकुम्भपरिणाहिनि तस्याः, स्वैरमास्यत यया कुचयुग्मे' ॥ १४ ॥**

**कः करोतीति** । वृत्तम् । को गुणवान् अस्याः-हारलतायाः स्फुटं-प्रकटं गुणसंख्यां-गुणगणनां करोति । किम्भूताया अस्याः ? श्लाघ्यं-प्रशस्यं जन्म-उत्पत्तिस्थानं महश्च-तेजो यस्याः सा । यया हारलतया तस्याः-दमयन्त्याः कुचयुग्मे-पयोधरद्वन्द्वे स्वैरं-स्वेच्छया आस्यत-आस्थीयत । किम्भूते कुचयुग्मे ? कुम्भिकुम्भवत् परिणाहः-विशालता विद्यते यस्य तत्तस्मिन् कुम्भिकुम्भपरिणाहिनि ॥ १३ ॥

**इत्यभिधाय नीत्वा च निजकण्ठकन्दलम्, 'इहास्ते सा तव पूर्वप्रणयिनी' इत्यन्तःस्थिता दमयन्तीं दर्शयितुमिव हृन्मध्यवर्तिनीं तामकरोत् ।**

**कृत्वा च किंचिदनुच्चस्मितं मधुरमधुरया[१] वाचा 'विहंगमपुंगव[२], पुनः कथ्यतां कीदृशी ? कीदृग्रूपा ? किं[३] वयः ? कीदृशी[४] लावण्यसंपत् ? को विनोदः ? कीदृशं वैदग्ध्यम् ? किं प्रियम्[५] ? का गोष्ठी ? इति [६]श्रुतमप्यपूर्वामिव [७]तद्वार्तामादरेण पृच्छ[८]न्नागच्छंश्च चटुल[९]करकृतशरसंधानस्यानवरतविरचिताद्भुतभ्रमणकर्मकार्मुकवलयस्य लक्ष्यतां मकरकेतोरविदितापक्रमानतिबहून्कालवान[१०]वतस्थे ।**

**स्थिते च विभूष्य मध्यम[११]नभोभागं भगवति भासुरभासि[१२] भास्वति श्रवणपुटपथमवतरति च प्रहरवसानप्रहरभांकारिभेरीरवे, [१३]वयस्य, विश्राम्यमिदानीममन्दमन्दारतरुपरिकरितरोधसि मन्दिरोद्यानारविन्ददीर्घिकायामेव[१४] प्रार्थ्यसे च न गन्तव्यमविसर्जितेन त्वया पूर्ववत्, इति नियम्य तं राजहंसं स्वयमप्याह्निकायो[१५]दतिष्ठत् ।**

**इति**-अमुना प्रकारेण अभिधाय निजकण्ठकन्दलं नीत्वा च हे हारलते ! सा तव पूर्वप्रणयिनी-पूर्वं प्रणयः-स्नेहो विद्यते यस्यां सेति पूर्वप्रणयिनी-पूर्वसहचारिणी दमयन्ती इह-हृदये आस्ते । इति-अमुना प्रकारेण अन्तःस्थितां-चित्तस्थितां दमयन्तीं दर्शयितुमिव तां-हारलतां हृन्मध्ये वर्तितुं शीलं यस्याः सा तां अकरोत्-हृदये न्यधात् ।

**च**-पुनः किञ्चित्-अल्पं अनुच्चस्मितं-अप्रकटं हास्यं कृत्वा मधुरमधुरया-अतिशयेन मृष्टया वाचा उवाच । हे विहङ्गमपुङ्गव !-पक्षिराज ! पुनः कथ्यताम्-कीदृशी

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सा ? कीदृग् रूपा ? कीदृग् आकृतिः ? किं वयः ? कीदृशी लावण्यसम्पत् ? नयनलेह्यं सौन्दर्यं-लावण्यं तस्य सम्पत्-समृद्धिः, को विनोदः ?-सुभाषितादिरसास्वादलक्षणं कौतुकम्, तस्याः कीदृशं वैदग्ध्यं-चातुर्यं ? किं प्रियं-इष्टं ? का गोष्ठी-पर्षत् संलापो वा ? इत्येवं श्रुतामपि अपूर्वामिव-अश्रुतपूर्वामिव तद्वार्तां आदरेण-गौरवेण पृच्छन् । तथा चटुलकराभ्यां-लघुहस्ताभ्यां कृतं शरस्य सन्धानं-संयोजनं येन स तस्य, तथा अनवरतं-अजस्रं विरचितमद्भुतं-आश्चर्यकारि भ्रमणकर्म यत्र ईदृशं कार्मुकवलयं-मण्डलीकृत्य धनुर्यस्य स तथाविधस्य, मकरकेतोः-कामस्य लक्ष्यतां-वेध्यतां आगच्छंश्च-कामकृतां पीडां सहमानश्च स राजा हंसवार्तया न विदितः-ज्ञातोऽपक्रमः-अतिक्रमणं येषां ते तथाविधान् अतिबहून् काललवान्-कालविशेषान् अवतस्थे तस्थिवान् ।

अथ **भास्वरभासि**-दीप्ततेजसि भगवति भास्वति सूर्ये मध्यमं नभोभागं विभूष्य-अलङ्कृत्य स्थिते च सति, मध्याह्ने जाते सतीत्यर्थः । तथा प्रहरस्य-द्वितीययामस्य अवसाने-अन्ते यः प्रहारः-ताडनं तेन भाङ्कारिणी भेरी तस्या यो रवः-ध्वनिस्तस्मिन् श्रवणपुटपथं-श्रोत्रमार्गं अवतरति सति, भेरीशब्दे श्रूयमाणे सतीत्यर्थः । हे वयस्य !-मित्र ! हंस ! मन्दिरोद्यानारविन्ददीर्घिकायां-गृहकाननकमलवाप्यां इदानीं विश्राम्यतां-श्रान्तिच्छेदः क्रियताम् । किम्भूतायाम् ? अमन्दाः-अनल्पा ये मन्दारतरवः-कल्पवृक्षास्तैः परिकरितं-वेष्टितं रोधः-तटं यस्याः सा तस्यां । च-पुनः एष त्वं प्रार्थ्यसे-याच्यसे अविसर्जितेन-मया अमुक्तेन त्वया पूर्ववत् न गन्तव्यं । यथा पूर्वं अविसर्जित एवाऽऽगास्तथाऽद्य अविसर्जितेन न गन्तव्यम् । इति-अमुना प्रकारेण राजहंसं नियम्य-नियन्त्र्य स्वयमपि राजा आह्निकाय-नित्यक्रियायै उदतिष्ठत्-उत्तस्थौ ।

**एवं च**-

**शिथिलितसकलान्यव्यापृतेस्तस्य राज्ञः,**
**परिहतनिजबन्धोर्यान्ति हंसेन सार्धम् ।**
**दिनमनु दमयन्तीवृत्तवार्ताविनोदै-**
**रविदितपरिवर्त्ता वासराः शारदीनाः ॥ १५ ॥**

**एवञ्च**-अमुना प्रकारेण-

**शिथिलितेति** । शिथिलिता-मुक्ताः सकलाः-समस्ता अन्या हंसगोष्ठ्या अपरा व्यापृतयः-राज्यव्यापाराः येन स तस्य राज्ञः हंसेन सार्द्धं दिनं अनुदिनं लक्षीकृत्य एतेन रात्रिनिषेधः । पक्षिणो हि निशि नीडे निलीयन्ते । दमयन्त्या वृत्ताः-भूता ये वार्ता-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विनोदास्तैः । यद्वा, दमयन्त्या या वृत्तवार्ताः-चारित्रवृत्तान्तानि ता एव विनोदाः-कौतुकानि तैः, अविदितः परिवर्त्तः- गमनं येषां ते तथाविधाः, शरदि भवं शारदं रूपं उष्णत्वातिशयादि तद्विद्यते यस्याऽसौ शारदी, शारदी इनः-सूर्यो येषु ते शारदीना वासराः यान्ति । एतेन तद्दिनानां तापहेतुत्वेपि हंसवार्त्तया सुखातिक्रमणमुक्तम् । किम्भूतस्य राज्ञः ? परिहृता-हंसेनैव सह वार्त्ताकरणात् त्यक्ता निजा बन्धवः-स्वजना येन स तस्य । "**वृत्तं वृतौ दृढे मृते । चरित्रे वर्तुले छन्दस्यतीताधीतयोर्वृते**" [२/२०१] इत्य**नेकार्थः** ॥ १५ ॥

**एकदा तु[१] प्रस्फुरत्प्रभातारम्भप्रभया प्रभिद्यमाने नवनीलाञ्जनिका-कुसुम[२]कान्तिनि तमसि, विलीनलाक्षाम्भोभिरिव सिच्यमानायां शनैः[३] शचीदयितदिशि मन्द[४]मुन्मिषत्कमलमुकुलोच्छ[५]लच्चटुलालिचक्र-वालकलकलेनोन्निद्रितेन तन्द्रामुद्रितोन्मिषश्चक्षुषा चलच्चञ्चुकोटिक-ण्डूयनविरामधुतपक्षरोमराजिना राजहंसकदम्बकेना[६]नुगम्यमानो विहंगमो-विहाय[७] सरस्तीरम्, उपसृत्य[८] किंनरमधुर[९]गीतध्वनिविनिद्रितमावश्यक-शौचा[१०]वसाने राजानम्, इद[११]मवादीत् ।**

**एकदा** तु-एकस्मिन् दिने एवम्भूतेन राजहंसकदम्बकेन अनुगम्यमानः-अनुस्रिय-माणः सविहङ्गमः-पक्षी राजहंसः सरः-तीरं विहाय-त्यक्त्वा, उपसृत्य-राज्ञः समीपे समागत्य किन्नराणां मधुरः-मनोज्ञो यो गीतध्वनिः-रागवच्छब्दोच्चारस्तेन विनिद्रितं-प्रबुद्धं आवश्यकः-शौचावसाने-अवश्यकरणीयशुचिकर्मप्रान्ते राजानं इदं वक्ष्यमाणं अवादीत् । क्व सति ? तमसि-अन्धकारे प्रस्फुरन्ती-दीप्यमाना प्रभातारम्भे-प्रत्यूषोदये या प्रभा-दीप्तिस्तया प्रभिद्यमाने-विध्वस्यमाने सति । किम्भूते तमसि ? नवं-नूतनं यन्नीलाञ्जनिका-कुसुमं-तापिच्छतरुपुष्पं तद्वन्नीला कान्तिर्यस्य तत्तथा तस्मिन् । पुनः क्व सत्याम् ? उत्प्रेक्ष्यते, शचीदयितः-इन्द्रस्तस्य दिशि-प्राच्यां शनैः-मन्दं मन्दं विलीनलाक्षाम्भोभिः-गलितजतुपानीयैः सिच्यमानायामिव-प्लाव्यमानायामिव । किल प्रकृत्यैव प्रभाते प्राची लोहिता भवति परं कविरुत्प्रेक्षां कुरुते, मन्ये लाक्षारसेन सिच्यत इति । किम्भूतेन राजहंसकदम्बकेन ? मन्दं-शनैरुन्मिषन्ति-विकसन्ति यानि कमलमुकुलानि-पद्मकुड्मलानि तेभ्य उच्छलत्-निःसरच्चटुलं-चञ्चलं यदलिचक्रवालं-भ्रमरवृन्दं तस्य कलकलेन-झङ्काररवेण कृत्वा उन्निद्रितेन-त्यक्तनिद्रेण, तथा तन्द्रया-आलस्येन मुद्रिते-संकोचिते उन्मिषती-विकसती चक्षुषी येन तत्तथाविधेन, तथा चलन्ती या चञ्चुकोटिः-चञ्च्वग्रं तया यत् कण्डूयनं-खर्जूकरणं तस्य विरामे-निवृत्तौ सति विधूता-कम्पिता पक्षयो रोमराजिः-तनूरुहपंक्तिर्येन तत्तेन ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ हंसो यदुवाच तदाह–

**'देव, विज्ञापयामो[१] देवस्य दर्शनम्, अनालेप्यं चन्दनम्, अस्पर्शं कर्पूरपांशुपटलोद्धूलनम्, अपातव्यममृतम्, अनास्वाद्यं रसायनम्, अलेह्यं[२] मधु, कुतः किलैतदनुभवतामस्माकमपि वर्षसहस्रेणापि परितोषः[३] । किं तु तिरयति स्वातन्त्र्यं प्राणिनां परपरिग्रहो दुस्त्यजाश्च जलजन्मनोऽपि[४] जन्मभूमयो[५] भवन्ति । अवगमिष्यति च विश्रब्धमेतत्सर्वमपि[६] देवो यादृशा । येन[७] ये च जन्मान्तराराधनोपरोधेन[८] प्रेषिता वयम् । अनवसरः खल्वयमस्य कथाप्रक्रमस्य । तदादिशतु देवोऽस्मान्गमनाय । न च प्रस्तुतानुचरालापेषु वयं विस्मरणीयाः । किमन्यज्जन्म च जीवितं च तदेव श्लाघ्यं[९] मन्यामहे, यत्र प्रसङ्गेन[१०] भवादृशा[११] सर्वतः[१२] अनुस्मृतिं कुर्वन्ति । तदेष प्रस्थानप्रार्थनाप्रणामः' इत्युक्तवन्तमिमवनिपालः कथं[१३] कथमपि विसर्जयामास[१४] ।**

हे **देव** ! वयं विज्ञापयामः–निवेदयामः । किम् ? देवस्य भवतो दर्शनं अनालेप्यं चन्दनं–गोशीर्षद्रवः, अन्यत् चन्दनमालेप्यं आलेपनार्हं भवति इदं च न तथा । तथा अस्पर्शं–स्पर्शं विनैव कर्पूरपांशुपटलस्य–घनसारधूलिवृन्दस्य उद्धूलनं–चूर्णं, अन्यत् तदुद्धूलनं सस्पर्शं भवति इदं च तदभावेऽपि । तथा अपातव्यं–अपेयममृतं–पीयूषं, अन्यदमृतं पातव्यं भवति इदं च न तथा । तथा अनास्वाद्यं–अननुभवनीयं रसायनं–जरामरणापहमौषधं, अन्यद्रसायनमास्वाद्यं भवति इदं च न तथा । सर्वत्राप्यानन्दकारित्वादिति हेतुः । किलेति सम्भाव्यते, एतद्दर्शनमनुभवतां वीक्षमाणानां आस्तां मनुष्याणामस्माकमपि पक्षिजातीनामपि कुतो वर्षसहस्रेणापि परितोषः–सन्तोषः । किन्तु हे राजन् ! प्राणिनां–जन्तूनां परेण परिग्रहः–स्वीकारः परवशवर्तित्वं स्वातन्त्र्यं–स्वेच्छया प्रवर्तनं तिरयति–तिरस्करोति, परवशः किल स्वेच्छया प्रवर्तितुं न शक्नोति । एतावता ज्ञापितं त्वया अविसर्जितेन न गन्तव्यमिति नियन्त्रणा दुःसहेति । तथा जलजन्मनोऽपि–जलोद्भवस्यापि जन्मभूमयो दुस्त्यजाश्च भवन्ति । एतत्सर्वमपि विस्रब्धं–विश्वस्तं यथा भवति तथा देवः–नृपः अवगमिष्यति–ज्ञास्यति । एतदिति किम् ? यादृशा ये च वयं येन केनचित् जन्मान्तरे यदाराधनं–सेवनं तस्योपरोधेन, अनुग्रहेन जन्मान्तरप्रीत्या प्रेषिता–भुक्ता । खलु–निश्चितं अस्य कथाप्रक्रमस्य–कथापरिपाट्याः अनवसरः–असमयः । तत्–इत्युपसंहारे, तस्माद्देवः–नृपः अस्मान् गमनाय आदिशतु–आज्ञापयतु । हे राजन् ! वयं–हंसाः प्रस्तुताः–प्रकृता ये

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनुचराणां-सेवकानामालापाः-कथनानि अस्माकमयं सेवकः-अयं च सेवक इत्येवंरूपाणि तेषु न च विस्मारणीयाः-न विस्मार्याः । यथाऽन्ये सेवकास्तथाऽस्माकं ते हंसा अप्यनुचरा इति स्मृतिविषयी कार्याः । किमन्यत्-अपरं किम् ? अस्माकं तदेव जन्म जीवितं च वयं श्लाध्यं मन्यामहे-प्रशस्यं जानीमहे यत्र-जन्मनि जीविते च वर्तमानानस्मान् प्रसङ्गेन-अनुचरगणनाप्रस्तावेन भवादृशाः-महानुभावाः सर्वत इति-सर्वेषां मध्ये अनुस्मर्ति-अनुस्मरणं कुर्वन्ति । सर्वत इति "**सार्वविभक्तिकस्तस्**" [ ] । तत् इत्युपसंहारे, हे राजन् ! एष प्रस्थानप्रार्थनायाः-गमनयाञ्चायाः प्रणामः, इति-अमुना प्रकारेण उक्तवन्तमिमं-हंसं अवनिपालः-नलः कथं- कथमपि महता कष्टेन विसर्जयामास-मुमोच ।

**गते च तस्मिन्नविस्मरणीयोपकारे[१] कादम्बकदम्बकेश्वरे, श्रवण-प्रणालिकया प्रविश्य मानसं [२]सरस्तरलयन्त्यां विदर्भराजहंससुतायां[३] आकर्णपूरीकृतकार्मुकगुणे प्रहरति प्रत्यङ्गमनङ्गधानुष्के समीपवन-विकासिकुन्दमकरन्दास्वादमदमेदुरगिरां गच्छति श्रवणपथमतिमधुरे मधुलिहां झंकारे रणरणकारम्भिणि तत्रावसरे ।**

**गते चे**ति । अविस्मरणीयः-अविस्मार्यः प्रियासन्देश कथनादिरूप उपकारो यस्य स तस्मिन् अविस्मरणीयोपकारे तस्मिन् कादम्बकदम्बकेश्वरे-हंसवृन्दनेतरि गते च सति श्रवणं-आकर्णनमेव प्रणाली-जलमार्गस्तया कृत्वा मानसं-चेत एव सरः-तडागं, अथ च मानसाख्यं देवतडागं कर्म्मतापन्नं प्रविश्य सत्यां[१], विदर्भराज एव हंसस्तस्य पुत्र्यां-दमयन्त्यां, पक्षे हंस्यां तरलयन्त्यां-कम्पयन्त्यां सत्यां, "**हंसो विहङ्गभेदे स्यान्निर्लोभनृपतावपि ।**" [विश्व. सान्त. ८-९] तथा आकर्णपूरीकृत-आकर्षणेन कर्णान्तं प्रापितः कार्मुकगुणः-धनुः प्रत्यञ्चा येन स तस्मिन् अनङ्गधानुष्के-कामधनुर्धरे प्रत्यङ्गं-प्रतिप्रतीकं प्रहरति-प्रहारान् ददति सति, तथा अतिमधुरे मधुलिहां-अलीनां झङ्कारेण श्रवणपथं-कर्णौ गच्छति सति । किम्भूतानां मधुलिहाम् ? समीपवने विकासिनः-विकसनशीलो ये कुन्दाः-पुष्पविशेषास्तेषां यो मकरन्दास्वादः-मधुपानं तेन यो मदः-मत्तता तेन मेदुरा-मांसला पुष्टा गीर्येषां ते तथा तेषां। **सान्द्रः स्निग्धस्तु मेदुरः [ अभि. ३/१४० ] मदोरेतस्य हंकारे मद्ये हर्षेभदानयोः । कस्तूरिकायां क्षैब्ये च । इत्यनेकार्थः** [२/२३४-३५] । तथा रणरणकारम्भिणि-औत्सुक्यकारीणि तत्र अवसरे सति ।

**आविर्भूतविषादकन्दमसमव्यामोहमीलन्मन-,**
**श्चिन्तोत्तम्भितनिर्निमेषनयनं[४] निःश्वासदग्धाधरम् ।**

---

१. सत्यां नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जातं स्थानकमुत्सुकस्य[१] नृपतेस्तत्तस्य यस्मिन्नभू-,**
**त्प्रेयान्पञ्चमराग एव रिपवः शेषास्तु सर्वे रसाः ॥ १६ ॥**

**आविरि**रिति वृत्तम् । उत्सुकस्य-दमयन्तीमिलनाय उत्कण्ठितस्य तस्य नृपतेः-नलस्य तत्स्थानकं-अवस्थानान्तरं जातं यस्मिन् स्थानके पञ्चमराग एव-पञ्चमाख्यरागविशेष एव प्रेयान्-अतिशयेनेष्टोऽभूत्, शेषास्तु सर्वे रसाः-विषयानुरागा रिपवः-अनिष्टा जाताः । किम्भूतं स्थानकम् ? आविर्भूतः-प्रकटीभूतो विषादः-मनःपीडा एव कन्दो यस्मिंस्तत् । तथा असमः-अतुल्यो यो व्यामोहः-मूर्छा तेन मीलत्-संकुचत् उपरतविषयानुरागं मनो यत्र तत् । तथा चिन्तया-तदध्यवसायेन उत्तम्भिते-उच्चैःकृते निर्निमेषे-अक्षिसङ्कोचरहिते नयने-नेत्रे यत्र तत्तथाविधं । तथा निःश्वासेन-विरहोष्ममुखवायुना दग्धौ अधरौ-ओष्ठौ यत्र तत् । उत्तम्भितेति, **स्तम्भुः सौत्रो** धातुः स्वार्थिको णिच् क्तः ॥ १६ ॥

**ततश्च वृश्चिकदंशदुःसहव्यथामवस्थामनुभवन्निव[२], कण्टकैश्चरणमर्मणि विध्यमान इव[३], मुहुर्मुहुर्मुर्मुरपुञ्जराजीवाङ्गानि[४] धारयन्नुष्ण-[५]ग्रीष्मानिलोल्लोलैरिवा[६]लिङ्ग्यमानो, मनागपि न क्वापि शयितो विप्रबुद्धो वा[७] शर्म लेभे ।**

**तत**श्चेति । ततो दमयन्तीविरहात् स राजा मनागपि-स्तोकमपि न क्वापि शयितः-सुप्तो विप्रबुद्धो वा- गतनिद्रः सन् शर्म-सुखं लेभे-प्राप । नलः किं कुर्वन्निव ? उत्प्रेक्ष्यते, वृश्चिकदंशेन-अलिभक्षणेन दुःसहा-सोढुमशक्या व्यथा-पीडा यत्र ईदृशीमवस्यां-दशामनुभवन्निव, मन्ये वृश्चिकेन दष्ट इति । तथा कण्टकैश्चरणमर्मणि-पादमर्मप्रदेशे विध्यमान इव-भिद्यमान इव कामव्यथयातिपीडितत्वात् । तथा मुहुर्मुहुः-वारम्वारं तापातिरेकेण क्षिप्तमात्रशुष्कत्वात् मुर्मुरः- पुञ्जो येषां तानि[१] मुर्मुरपुञ्जानि तथाभूतानि राजीवानि येषु अङ्गेषु तानि च तान्यङ्गानि धारयन् । मुर्मुरस्तुषवह्निः । यद्वि**श्वप्रकाशः**-"**मुर्मुरस्तुषवह्नौ स्यान्मन्मथे रथवाजिनि**" [रान्त. १४०] तथा उष्णां-तप्ता ये ग्रीष्मानिलाः-निदाघवायवस्तेषां ये उल्लोलाः-कल्लोलास्तैरालिंग्यमान इव-आश्लिष्यमाण इव ।

**तथाहि–**

**तथाही**ति । विरहिणोः दुःखमेव दर्शयति–

**श्च्योतच्चन्द्रमणिप्रणाल[८]शिशिराः सौगन्ध्यरुद्धाम्बरै-**
**र्निर्गच्छन्नवधूपधूमपटलैः संभिन्नवातायनाः ।**

---

१. पुंजानि अनू. येषां तानि नास्ति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सौधोत्सङ्गभुवो विकीर्णकुसुमाः पूर्णेन्दुरम्यश्रिया,[१]**
**रम्यायां निशि नो हरन्ति हृदयं हृद्यं किमुद्वेगिनाम् ॥ १७ ॥**

**श्च्योतदिति** वृत्तम् । सौधोत्सङ्गभुवः-नृपमन्दिरमध्यभूमयः पूर्णेन्दुरम्यश्रिया-परिपूर्णचन्द्रचारुशोभया रम्यायामपि-रमणीयायामपि निशि-रात्रौ हृदयं-चेतो न हरन्ति-न वशीकुर्वन्ति, किन्तु उद्वेगाय भवन्तीत्यर्थः, राज्ञ इति शेषः । युक्तं चेतत् उद्वेगिनां-दुःखितानां किं हृद्यं-किं मनोहरं ? न किमपीति भावः । किम्भूताः सौधोत्सङ्गभुवः ? श्च्योतन्तः-जलं क्षरन्तो ये चन्द्रमणिप्रणालाः-चन्द्रकान्तजलमार्गास्तैः शिशिराः-शीताः, तथा सौगन्ध्येन-सौरभ्येण रुद्धं-व्याप्तं अम्बरं यैस्तानि तथा तैः सुगन्धितनभोभिर्निर्गच्छन्ति-गवाक्षमार्गेण निःसरन्ति यानि नवधूपधूमस्य पटलानि वृन्दाति तैः सम्भिन्नानि-मिश्रितानि वातायनाति-गवाक्षा यासां ताः सम्भिन्नवातायनाः, तथा विकीर्णानि-विक्षिप्तानि पुष्पाणि यासु ताः । प्रणालशब्दस्त्रिलिङ्गः ॥ १७ ॥

**अपि च–**

**हृद्योद्यानसरस्तरङ्गशिखरप्रेङ्खोलनायासिताः,**
**संभोगश्रमखिन्नकिंनरवधूस्वेदोदबिन्दुच्छिदः ।**
**सायं सान्द्रविनिद्रकैरववनान्यान्दोलयन्तः[२] शनै-**
**रङ्गेऽङ्गारसमाः पतन्ति पवनाः प्रालेयशीता अपि ॥ १८ ॥**

**अपि** च-पुनः-

**हृद्येति** वृत्तम् । एवंविधाः शनैरङ्गे लगन्तः प्रालेयशीता-हिमसमा अपि पवनाः-वायवः अङ्गारसमा इव पतन्ति, विरहसन्तापोत्पादकत्वात् । किम्भूताः पवनाः ? हृद्यानि-रम्याणि यानि उद्यानसरांसि-वनतडागानि तेषां यानि तरङ्गशिखराणि-ऊर्म्यग्राणि तेषां यत् प्रेङ्खोलनं-तरलनं तेन आयासिताः-खेदिताः, खिन्ना इत्यर्थः, एतेन जलकणवाहित्व-मुक्तम् । अतएव पुनः किम्भूताः ? सम्भोगश्रमेण-सुरतखेदेन खिन्नाः-श्रान्ताः याः किन्नरवध्वस्तासां स्वेदोदबिन्दून्-घर्म्मजलपृषतान् छिन्दन्ति-शोषयन्ति ये ते तथाविधाः । तथा सायं-सन्ध्यायां सान्द्राणि-निविडानि विनिद्राणि-विकस्वराणि यानि कैरववनानि-कुमुदखण्डानि तानि अन्दोलयन्तः-कम्पयन्तः, एतावता शीतो मन्दः सुरभिश्चेति गुणत्रययुतस्यापि वायोर्विरहिणां दुःखजनकत्वमेवोक्तम् ॥ १० ॥

**तदा प्रभृति चास्य प्रायः प्रीतिरभूद्दाक्षिणात्यजनेष्वेव, पुलकमकरोन्ना-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**मापि विदर्भदेशस्य, श्रुतापि श्रवणयोः सुखमजीजनद्दक्षिणा दिक् ।**

**तदा प्रभृति** च-यद्दिने हंसेन प्रतिगतं तद्दिनादारम्य अस्य-नलस्य प्रायः-बाहुल्येन दाक्षिणात्यजनेष्वेव-दक्षिणदिग्वासिपथिकेष्वेव प्रीतिरभूत्, तथा विदर्भदेशस्य नामापि पुलकं-रोमाञ्चं अकरोत्, तथा श्रवणयोः-कर्णयोः श्रुताऽपि दक्षिणदिक्सुखमजीजनत्-उत्पादयामास ।

**किं बहुना—**

**लिप्तेवामृतपङ्केन घृष्टे[१]वानन्दकन्दलैः ।**
**आसीद्दिग्दक्षिणा तस्य कर्णयोर्मनसो दृशोः ॥ १९ ॥**

**किम्बहुना**-किम्बहूक्तेन—

**लिप्तेति** वृत्तम् । दक्षिणा दिक् तस्य-नलस्य कर्णयोर्मनसो दृशोरीदृशी आसीत् । किम्भूता ? उत्प्रेक्ष्यते, अमृतपङ्केन लिप्तेव-दिग्धेव, तथा आनन्दस्य ये कन्दलाः-प्ररोहास्तैः घृष्टेव । **स्पृष्टेवेति** पाठान्तरं परमाह्लादजनकत्वादित्यर्थः ॥ १९ ॥

**दमयन्त्यपि हंसदर्शनदिवसादारभ्य भ्रमद्भृङ्गकुलकलकलोन्नादित-पर्यन्तेषु, प्रत्यग्रोल्लूनपुष्पपल्लवास्तरणेषु, [२]विलसद्विनोदविहंगेषु विहरति नासन्नोद्यानलतामण्डपेषु, न च विकचकुवलयकह्लारकुशेशय[३]सारवारिणि रणश्चटुलचञ्चरीकचक्रवाकचक्रे क्रीडति क्रीडासरसि, न[४] स्पृशति[५] पाणिनापि माणिक्यमालामण्डनानि, न च रचयति रुचिराल-कवल्लरीभङ्गा[६]न्तरेषून्मिषत्कुसुमविन्यासान्, न च क्वचिदुच्चहंसतूलीतल्पेऽपि कोमलकपोलावष्टम्भभाजि निद्रासुखमनुभवति, केवलमधि-पाण्डुगण्डपालिनिहित[७]पाणिपल्लवा प्रेषयन्ती प्रतिक्षणमुत्तरस्यां दिशि दृशं तद्देशागतानागन[८]पक्षिणोऽपि सस्पृहं पश्यन्ती, तत्रत्यानध्वगानपि बन्धुबुद्ध्यालापयन्ती, तन्मण्डलागताय मरुतेऽप्यपनीतोत्तरांशुका[९] स्वयं[१०] हृदयमर्पयन्ती दिनं दिनमनङ्गेनाभ्यभूयत ।**

**दमयन्त्य**पि हंसदर्शनदिवसादारभ्य आसन्नोद्यानलतामण्डपेषु-निकटवर्त्तिवनस्य द्राक्षादिलतामण्डपेषु न विहरति-न विचरति । किम्भूतेषु लतामण्डपेषु ? भ्रमत्-सञ्चरद्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यद्भृङ्गकुलं-भ्रमरसमूहस्तस्य कलकलेन-झङ्काररवेण उन्नादितः-मुखरितः पर्यन्तः-प्रान्तो येषां ते तेषु, तथा प्रत्यग्राणि-नवानि उल्लूनानि त्रोटितानि यानि पुष्पाणि पल्लवाश्च-किसलयानि तेषामास्तरणानि-स्रस्तरा येषु ते तेषु, तथा विलसन्तः-क्रीडन्तो विनोदेन-कौतुकेन विहङ्गाः-पक्षिणो येषु ते तेषु । तथा न च क्रीडासरसि क्रीडति-खेलति । किम्भूते क्रीडासरसि ? विकचानि-सविकासानि यानि कुवलयानि-नीलोत्पलानि कल्हाराणि च-सौगन्धिकानि कुशेशयानि च-कमलानि तैः सारं-प्रधानं वारि-पानीयं यस्य तत्तस्मिन् । तथा रणत्-शब्दं कुर्वत् चटुलचञ्चरीकाणां-चञ्चलालीनां चक्रवाकाणां च चक्रं-वृन्दं यत्र तत्तस्मिन् । तथा माणिक्यमालामण्डनानि माणिक्यानां-रत्नानां या मालास्ता एव मण्डनानि-अलङ्कारास्तानि पाणिनाऽपि न स्पृशति । तथा रुचिरा-सुन्दरा या अलकवल्लरी-वेणीदण्डस्तस्या भङ्गान्तरेषु-विच्छित्त्यन्तरालेषु उन्मिषन्ति-विकसन्ति यानि कुसुमानि तेषां विन्यासान्-रचनानि न च रचयति-न करोति । तथा कोमला-[१] मृदुर्यः कपोलयोरवष्टम्भः-गण्डूकस्तं भजति-आश्रयति यत्तत्तथाविधे क्वचिदपि-कस्मिंश्चिदपि उच्चं-उन्नतं यत् हंसतूलीतल्पं-हंसतूलीशय्या तस्मिन् न च निद्रासुखमनुभवति, न कदापि निद्रातीत्यर्थः । केवलं-परं एवंविधा सती सा दमयन्ती अनङ्गेन-कामेन अभ्यभूयत-पराभूयत । किम्भूता ? विरहात् पाण्डुर्या गण्डपालिः-कपोलोत्सङ्गस्तामधिकृत्य अधिपाण्डुगण्डपालिकपोले निहितः-न्यस्तः पाणिपल्लवो यया सा दत्तकपोलहस्ता । एवंभूता सती प्रतिक्षणं-प्रतिसमयं उत्तरस्यां दिशि दृशं-नेत्रं प्रेषयन्ती-ददती । **पालिर्यूकाश्रिपंक्तिषु । जातश्मश्रु स्त्रियां प्रान्ते सेतौ कल्पितभोजने । प्रशंसाकर्णलतयोरुत्सङ्गे प्रस्थचिह्नयोः** । इत्यनेकार्थः [२/५०८-५०९] । तथा तद्देशागतान्-उत्तरनीवृदायातान् गगनपक्षिणोपि[२] सस्पृहं-साभिलाषं यथा भवति तथा पश्यन्ती-अवलोकयन्ती, नलोक्तानि-वाक्यानि श्रुत्वा आगता भविष्यन्तीत्यभिप्रायेण । तथा तत्रत्यान्-उदीच्यान् अध्वगानपि-पथिकानपि बन्धुप्रीत्या-स्वजनस्नेहेन आलापयन्ती-सम्भाषयन्ती, यथा बन्धुर्मधुरालापेन भाष्यते तथा तानपि । तथा तन्मण्डलागताय-उदीच्यदेशागताय मरुतेऽपि-वायवेऽपि अपनीतं-दूरीकृतं उत्तरांशुकं-उपरिवस्त्रं यया सा । एवम्भूता सती स्वयं आत्मना हृदयं-वक्षो अर्पयन्ती-ददती, वक्षःस्थलं निर्वस्त्रीकृत्य उदीच्यं वायुमपि स्पृशतीत्यर्थः, तदङ्गं स्पृष्ट्वा वायुरागतो भविष्यतीत्यभिप्रायेण ।

**तथाहि—**

**तथाही**ति । तदेव अनङ्गस्य अभिभवनं तस्या दर्शयति—

**लास्यं पांसुकणायते नयनयोः शल्यं श्रुतेर्वल्लकी,**
**नाराचाः कुचयोः सचन्दनरसाः कर्पूरवारिच्छटाः ।**

१. कोमलो अनू. । २. गगन नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तस्याः काप्यरविन्दसुन्दरदृशः सा नाम जज्ञे दशा,**
**प्राणत्राणनिबन्धनं प्रियकथा यस्यामभूत्केवलम् ॥ २० ॥**

[**लास्यमिति** ।] अरविन्दसुन्दरदृशः-कमलविशाललोचनायास्तस्याः-दमयन्त्याः सा कापि-अनिर्वाच्या दशा-अवस्था जज्ञे-जाता । नामेति सम्भाव्यते । यस्यां-दशायां नयनयोः-नेत्रयोर्विषये लास्यं-नृत्यं क्रियमाणं पांशुकण इव-रजोलव इव आचरति पांशुकणायते असुखकारित्वात् । तथा यस्यां वल्लकी-वीणा श्रुतेः-श्रोत्रस्य शल्यं-भल्लीव । तथा यस्यां कुचयोः-पयोधरयोः सचन्दनरसाः-चन्दनद्रवसहिताः कर्पूरवारिच्छटाः-घनसाररससेचनानि नाराचाः-शितबाणप्रहारतुल्याः । तथा यस्यां दशायां केवलं असहायं प्रियकथैव-नलवार्त्तैव प्राणानां-असूनां त्राणे-रक्षणे निबन्धनं-कारणमभूत्, प्रियकथैव तस्याः जीवितमधारयदित्यर्थः। "**नाम प्राकाश्यकुत्सयोः । सम्भाव्याभ्युपगमयोरलीके विस्मये क्रुधि**" इत्य**नेकार्थः** [२/४६-४७] ॥ २० ॥

**एवमनयोरन्योन्यप्रेषितप्रच्छन्नदूतोक्तिवर्धितानुरागयोः चलन्त्य[१]ङ्गानि न मनोरथाः, परिवर्त्तते चक्षुर्न हृदयम्, कृशतामेत्यङ्गयष्टिर्नोत्कण्ठा, मन्दतां यात्युत्साहो नाभिलाषः, स्फारीभवति निःसहता न निद्रा, वर्धते चिन्ता न रतिः, शुष्यत्यधरपल्लवो नाग्रहरसः ।**

**एवं**-अमुना प्रकारेण अन्योन्यं-परस्परं प्रेषिताः-मुक्ताः प्रच्छन्नाः-गुप्ता ये दूतास्तेषां उक्तिभिः-वचनैर्विवर्धितः-अधिकीभूतोऽनुरागः-प्रेमानुबन्धो ययोस्तौ, तथाविधयोरनयोः-दमयन्तीनलयोः अङ्गानि-शरीरावयवाश्चलन्ति, न मनोरथाश्चलन्ति। तथा चक्षुः परिवर्तते-तां दिशं प्रति अभिमुखीभूय निवर्तते, न हृदयं-चेतः परिवर्तते । तथा अङ्गयष्टिः-तनुलता कृशतां-तानवं एति-प्राप्नोति[१], नोत्कण्ठा-वाञ्छा कृशतामेति, उत्कण्ठा-वाञ्छा दिने दिने अधिका जायते इत्यर्थः । तथा उत्साहः-प्रगल्भता मन्दतां-अल्पतां याति-आप्नोति, दिने दिने उत्साहः स्तोकः स्तोकः सञ्जायते, नाभिलाषः-वाञ्छाऽल्पीभवति । तथा निःसहता-विरहस्य असह्यता स्फारीभवति-विशाला जायते, दिने दिने विरहः सोढुमशक्यो जायते, न निद्रा-प्रमीला स्फारी भवति, विरहान्न निद्रात इत्यर्थः । तथा चिन्ता-तत्स्मरणं वर्द्धते न रतिः, कस्मिन्नपि वस्तुनि रागो वर्द्धते । तथा अधरपल्लवो विरहाच्छुष्यति, न आग्रहरसः- आसक्तिरागः शुष्यति, दिने दिने तयोरन्योन्यमासक्तिरसो वर्द्धते इत्यर्थः । "**आग्रहोऽनुग्रहे ग्रहे आसङ्गाक्रमणयोश्चापि**" इत्य**नेकार्थः** [३/८०४] ।

**किं बहुना—**

**किम्बहुना**-किम्बहूक्तेन-

१. आप्नोति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कर्पूराम्बुनिषेकभाजि सरसैरम्भोजिनीनां दलै-**
**राकीर्णेऽपि विवर्त्तमानवपुषोः स्रस्तस्रजि स्रस्तरे[1] ।**
**मन्दोन्मेषदृशोः किमन्यदभवत्सा काप्यवस्था तयो[2]-**
**र्यस्यां चन्दनचन्द्रचम्पकदल[3]श्रेण्यादि वह्नीयते ॥ २१ ॥**

**कर्पूरेति** । अन्यत्-अपरं किम् ? तयोः-नलदमयन्त्योः सा कापि-अनिर्वाच्या अवस्था अभवत् । यस्यां-अवस्थायां चन्दनं च चन्द्रश्च चम्पकदलानि च-चम्पकपत्राणि तेषां या श्रेणिः-पंक्तिः सा आदिर्यस्य कर्पूरादेस्तव[1] चन्दनचन्द्रचम्पकदलश्रेणिकर्पूरप्रभृति वह्निरिवाचरतीति[2] वह्नीयते, तानि शीतान्यपि तयोः दुःखायन्त इत्यर्थः । किम्भूत-योस्तयोः ? कर्पूराम्बुनिषेकं-घनसारद्रवसेचनं भजति यः स त तस्मिन्, कर्पूरद्रवेण सिक्त इत्यर्थः । तथा सरसैः-आर्द्रैः अम्भोजिनीनां-पद्मिनीनां दलैः-पत्रैराकीर्णेऽपि-व्याप्तेपि । तथा स्रस्ताः-विक्षिप्ताः स्रजः-माला यस्मिन् स तथा तस्मिन्, एवंविधेपि स्रस्तरे-संस्तरे स्वास्थ्याभावात् विवर्तमानं-वामपार्श्वाद्दक्षिणपार्श्वे दक्षिणपार्श्वाच्च वामपार्श्वे परावर्तनं कुर्वाणं वपुर्ययोस्तौ तयोर्विवर्तमानवपुषः। पुनः किम्भूतस्योस्तयोः ? मन्दोन्मेषा-अल्पोन्मीलना दृक् ययोस्तयोर्मन्दोन्मेषदृशोः, दृशौ मनागुन्मीलयतः ॥ २१ ॥

**आसीच्च तयोः कृतान्योन्यगुणप्रश्नालापजपयोः पुनरुक्तावर्त्तित-नामधेयस्वाध्याययोः संकल्पसमागमाबद्धध्यानयोः स्मरानले स्वहृदयं[4] जुह्वतोस्तप्यमानयोरङ्गीकृतमौनव्रतयोरपि वियोग एव, न[5] योगः ।**

**आसीदिति** । च-पुनः कृतोऽन्योन्यं-परस्परं यो गुणानां प्रश्नालापः-प्रश्नाभाषणं स एव जपः-जाप्यं यकाभ्यां तयोः । तथा पुनरुक्तावर्तितं-वचनमुक्तं "**भावे क्तः**" [ ], पुनः पुनः कथनेन परावर्तितं नामधेयं-नामैव स्वाध्यायो याभ्यां तयोः, नलो दमयन्त्या नाम पुनः पुनः कथयति दमयन्ती च नलस्य, इत्येवंविध एव यः स्वाध्यायस्तं कुर्वतोः । तथा सङ्कल्पे-चित्तकर्मणि यः समागमस्तत्र आबद्धं-निबद्धं ध्यानं यकाभ्यां तयोः । तथा स्मरानले-कामाग्नौ स्वहृदयं-स्वचेतो जुह्वतोः-होमवतोः, तथा तप्यमानयोः-सन्तापमनुभवतोः। तथा कृतं मौनव्रतं यकाभ्यां तयोर्मौनिनोरपि तयोः-दमयन्तीनलयोर्वियोगः-विरह एव आसीन्न योगः। योगः सम्बन्धोऽध्यात्मविषयश्च, अन्यस्य जपं स्वाध्यायं ध्यानं होमं तपो मौनव्रतं च कुर्वतो योगलाभः स्यात्, अनयोस्तु वियोग एव बभूव, न योग । इति अपिशब्देन व्यज्यते। तप्यमानेति सन्तापपक्षे "**कर्म कर्त्तरि यक्**" [ ] आत्मनेपदादि, अन्यत्र तु कर्त्तरि तपः कर्मविषयत्वात् ।

---

१. तत् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कदाचित्तु तरुणजननयनकुरङ्गवागुरामनङ्गगजेन्द्रमदप्रवाहढक्कामपहसितसुरासुर[1]सुन्दरीरूपश्रियं [2]शृङ्गाररसराजधानीमिवावलोक्य यौवनावस्थां दमयन्त्याः 'कोऽस्याः किलानुरूपः पतिर्भवेत्' इति, चिरं चिन्ताकुलो विदर्भेश्वरः स्वयं स्वयंवरकर्म[3]प्रारम्भाय समं मन्त्रिभिर्मन्त्रनिश्चयं चकार ।**

**न चिराच्च प्राच्योदीच्यप्रातीच्यदाक्षिणात्य[4]नरपतिनिमन्त्रणाय[5] सप्राभृतान्प्र[6]गल्भप्रश्रयान्प्रधानप्रेष्यान्प्रेषयामास ।**

**प्रस्थितं च[7] कंचिदुदीच्यनरपतिनिमन्त्रणाय प्रबुद्धवृद्धब्राह्मणमाप्तसखीमुखेन दमयन्ती श्लिष्टार्थमिदमवादीत् ।**

**कदाचित्तु**-कस्मिंश्चित्प्रस्तावे दमयन्त्या एवंविधां यौवनावस्थां-तारुण्यदशामवलोक्य विदर्भेश्वरः-भीमः को अस्याः-दमयन्त्याः किलेति सम्भावनायां अनुरूपः-गुणादिभिरेतत्सदृशः पतिर्भवेत् ? इति अमुना प्रकारेण चिरं चिन्ताकुलः-सचिन्तः सन् स्वयं-आत्मना स्वयम्वरकर्म्मप्रारम्भाय-स्वयम्वरविधिविधानाय मन्त्रिभिः समं मन्त्रनिश्चयं-गुप्तवादनिर्णयं चकार-व्यधात् । "**मन्त्रो देवादिसाधने । वेदांशे गुप्तवादे च**" इत्य**नेकार्थः** [२/४५७-५८] । किम्भूतां यौवनावस्थाम् ? तरुणजनानां नयनान्येव कुरङ्गास्तेषां वागुरेव-मृगबन्धनमिव यासा ताम्, यथा वागुरया मृगा बध्यन्ते तथाऽनया युवनयनानीति । तथा अनङ्गः-कामः स एव गजेन्द्रस्तस्य मदप्रवाहाय ढक्केव-वाद्यविशेष इव यासा तां । यथा गजेन्द्रस्य मदप्रवृत्तये ढक्का भवति तथा इयं कामस्य मदप्रवृत्तिकारिणी, अस्यां दृष्टायां कामः स्फीतीभवतीत्यर्थः । तथा अपहसिता-तिरस्कृता सुरासुरसुन्दरीणां रूपश्रीः-सौन्दर्यलक्ष्मीर्यया सा तां । तथा शृङ्गाररसस्य राजधानीव सुखावस्थानहेतुत्वात् यासा ताम् ।

ततो मन्त्रिभिर्मन्त्रकरणानन्तरं विदर्भेश्वरो न चिराच्च-स्तोकेनैव कालेन प्राच्याः-प्राच्यां पूर्वस्यां भवाः प्राच्याः, उदीच्याः-उत्तरदिगुत्पन्नाः, तथा प्रतीत्याः-पश्चिमदिगुत्पन्नास्तथा दाक्षिणात्याः-दक्षिणदिगुद्भवास्ततो[1] द्वन्द्वः, एवंविधा ये नरपतयः-राजानस्तेषां निमन्त्रणाय-आह्वानाय सप्राभृतान्-ढौकनिकासहितान् प्रगल्भः-प्रौढः प्रश्रयः-स्नेहो येषु ते तथाविधान् प्रधानाः-वार्त्तासु दक्षा ये प्रेष्याः-दूतास्तान् प्रेषयामास-मुमोच । प्राच्येति, '**द्युप्रागपागुदक्प्रतीचो यत्**' [पा. सू. ४/२/१०१] इति यत्, दाक्षिणेत्येति, **दक्षिणा पश्चात् पुरसस्त्यक्**" [पा. सू. ४/२/९८] इति त्यक्, जातादौ तेषां मध्ये

१. उत्पन्नास्ततो अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उदीच्यनरपतिनिमन्त्रणाय प्रस्थितं च-चलितं कञ्चित्प्रबुधः- पण्डितो वृद्धः-जरत् यो ब्राह्मणस्तं प्रति दमयन्ती आप्तसखीमुखेन-यथार्थवाक् वयस्या द्वारा श्लिष्टार्थं-द्व्यर्थं इदं-वक्ष्यमाणमवादीत् ।

**भूपालमन्त्रणे तात तथा संचर्यतां[१] यथा ।**
**नलोप्यागमबुद्धिः स्यात्प्रार्थ्यसे किमतः परम्' ॥ २२ ॥**

**भूपालेति** वृत्तम् । तातेति सम्बोधने हे तात ! भूपालामन्त्रणे-नृपनिमंत्रणे तथा त्वया सञ्चर्यतां-तथा प्रवर्त्यतां यथा आगमबुद्धिः-आगमावगतिः शास्त्रप्रतीतिर्लोप्या-निषेध्या न स्यात्, इति बाह्योर्थः । इष्टार्थस्तु, नलनामापि नृपो यथा आगमनबुद्धिर्भवेदिति । अतः परं इतोप्यधिकं किं प्रार्थ्यसे-किं याच्यसे न किमपीत्यर्थः ॥ २२ ॥

**सोऽप्यवगतश्लोकार्थस्तथाविधमेव [२]प्रत्युत्तरमदात् ।**

**सोऽपि**-ब्राह्मणो दक्षत्वात् अवगतः-ज्ञातः श्लोकस्य-पद्यस्य अर्थः-तात्पर्यं येन स तथाविधः सन् तथाविधं श्लिष्टमेवैकं प्रत्युत्तरं-प्रतिवचनमदात् ।

**केनापि व्यवहारेण कयापि प्रौढलीलया ।**
**करिष्याम्यागमस्यार्थे रभसेन नलङ्घनम् ॥ २३ ॥**

**केनापीति** वृत्तम् । अहं केनापि-अद्भुतेन व्यवहारेण-व्यापारेण तथा कयापि प्रौढलीलया-प्रगल्भविलासेन आगमस्य-शास्त्रस्य अर्थे-तात्पर्ये न लङ्घनं-अतिक्रमणं करिष्यामीति बाह्योर्थः । इष्टार्थस्तु, आगमनस्यार्थे-निमित्तं रभसेन-औत्सुक्येन घनं-निविडं नलाख्यं नृपं करिष्यामि, यथा आगमननिमित्तं अत्युत्सुको भविष्यति तथा विधास्यामि, आनेष्याम्येवेत्यर्थः ॥ २३ ॥

**तदायुष्मति सुखमास्ताम् इत्यभिधाय गतवान् ।**

**अथ नातिचिरेणागतस्तस्या रहः समाहूय स ब्राह्मणः सोमशर्मा नर्मालापलीलया दमयन्त्या बभाषे ।**

**तत्** इत्युपसंहारे तस्मात् हे आयुष्मति !-दमयन्ति ! भवती सुखमास्तां-सुखं तिष्ठतु, इति-उक्तप्रकारेण अभिधाय-उक्त्वा गतवान् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अथ**-अनन्तरं नातिचिरेण-स्तोकेनैव कालेन तत्र गत्वा आगतस्ततस्तया दमयन्त्या रहः-एकान्ते समाहूय-आकार्य स सोमशर्मा ब्राह्मणः-सोमशर्मा-चन्द्रवच्छीतला या नर्मालापलीला-परिहासवचनविलासस्तया-हेतुभूतया बभाषे-उक्तः ।

**आहूतोदीच्यभूपेन तातादेशविधायिना ।**
**नालीकापि त्वया वार्ता विद्वन्नावेदिता मम ॥ २४ ॥**

**आहूते**ति । आहूताः-आकारिता उदीच्चभूपाः-उत्तरदिग्भवनृपा येन स तथाविधेन, तथा तातादेशं-पित्रादेशं विदधातीत्येवंशीलस्तातादेशविधायी तेन, त्वया हे विद्वन् ! मम अलीकाऽपि-असत्यापि वार्त्ता न आवेदिता-कथिता, इति बाह्योऽर्थः । आन्तरस्तु, नलस्य नृपस्य इयं नालीवार्त्ता सा कापि त्वया न अभ्यधायि ।

**सोऽपि 'एष कथयामि श्लेषोक्तिकुशले, श्रूयताम्' इत्यभिधाय विहसन्नाख्यातुमारब्धवान् ।**

**इतो निर्गत्य मया मण्डलेश्वरामन्त्रणक्रमेण परिभ्रमतां सताऽभ्रंकषानेककूटकोटिस्थपुटितकटकस्य निषधनाम्नो महीध्रस्य दक्षिणारण्यस्थलीषु मृगयासक्तः ।**

**सोऽपि**-ब्राह्मणः एषो अहं कथयामि । हे श्लेषोक्तिकुशले ! द्व्यर्थवचनविलासदक्षे ! श्रूयतामिति अभिधाय विहसन्-किञ्चिद्धास्यं कुर्वन् आख्यातुं-कथयितुमारब्धवान्-प्रायतत ।

**इतः**-स्थानान्निर्गत्य-निःसृत्य मया मण्डलेश्वराणां उदीच्यनृपाणां आमन्त्रणस्य-आह्वानस्य यः क्रमः-परिपाटी पूर्वं तेषां आह्वानं पश्चात्तेषामित्येवंरूपा तेन, परिभ्रमता-पर्यटता सता अभ्रङ्कषाणि-अभ्रंलिहानि अत्युच्चानि अनेकानि-बहूनि यानि कूटानि-शिखराणि तेषां याः कोटयः-अग्रभागास्ताभिः । यद्वा, कोटिः संख्याविशेषस्तया स्थपुटत्वं-विषमोन्नतत्वं जातं यस्मिन्नसौ स्थपुटितः "**तारकादित्वादितच्**"[**तदस्य सञ्जातं तारकादिभ्य इतच्** पा. सू. ५/२/३६]। एवंविधः कटकः-निनन्दो यस्यासौ, एवम्भूतस्य निषधनाम्नो महीध्रस्य-पर्वतस्य सम्बन्धिनीषु दक्षिणारण्यस्थलीषु मृगयायामासक्तः-लग्नः ।

**माद्यन्मांसलतुङ्गपुंगवककुत्कूटोन्नतांसस्थलः,**
**कालिन्दीजलकान्तिकुन्तलशिराः पूर्णेन्दुबिम्बाननः ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एकः कोऽपि मनोहरः पथि युवा दृष्टः स यस्मिन्सकृद्-**
**दृष्टे नष्टनिमेषया मम दृशा लब्धं फलं जन्मनः ॥ २५ ॥**

**माद्यदिति** पद्यम् । एकः कोऽपि मनोहरः-सुन्दराकृतिः पथि-मार्गे स युवा दृष्टः । यस्मिन्-यूनि सकृद्-एकवारं दृष्टे सति नष्टः कौतुकावलोकनाद् गतो निमेषः-अक्षिसंकोचो यस्याः सा तया विस्फारितया मम दृशा जन्मनः-उत्पत्तेः फलं लब्धं, तद्दर्शनेन सा कृतकृत्या बभूवेत्यर्थः । किम्भूतो युवा ? माद्यन्-दृप्यन् मांसलः-मेदुरस्तुङ्गः-उन्नतो यः पुङ्गवः पुमांश्चासौ गौश्च पुङ्गवः-वृषभ इत्यर्थस्तस्य यत्ककुत्-कूटं स्कन्धः-शिखरं तद्वदुन्नतं अंसस्थलं-स्कन्धौ यस्य स । पुङ्गवेति "**गोरतद्धितलुकि**" [पा. सू. ५/४/९२] इति गोन्तात् तत्पुरुषादच्समासान्तः । तथा कालिन्दीजलवत्-यमुनानीरवत् कान्तिः-कृष्णा छविर्येषां ईदृशाः कुन्तलाः-केशाः यस्मिन्नेवंविधं शिरो यस्य सः । तथा पूर्णेन्दुबिम्बवत् राकाशशाङ्कमण्डलवत् वर्तुलं आननं-मुखं यस्य सः ॥ २५ ॥

**तेनापि 'दाक्षिणात्योऽयम्' इति[१] निश्चित्य साभिलाषमाभाषितो-ऽस्मि[२] । मयापि[३] कृतोचितालापेनो[४]क्तम् ।**

**तेनाऽपि**-यूना दाक्षिणात्योऽयमिति निश्चित्य-निर्णीय साभिलाषं-सस्पृहं यथा भवति तथा अस्मि-अहं आभाषितः-वादितः । मयाऽपि कृत उचितो "**ब्राह्मणं कुशलं पृच्छेत् क्षत्रं बन्धुमनामयं । वैश्यं क्षेमं समागम्य शूद्रमाहूयमेव[१]च ।**" [ ] इति मनुवाक्यात् क्षत्रिययोग्य आलापः-अनामयत्वप्रश्नरूपं आभाषणं येन स तथाविधेन उक्तम् ।

**'यथेयमाकृतिर्लोकलोचनानन्ददायिनी ।**
**तव भद्र तथा सत्यं सत्त्यागोऽसि नलोभवान्' ॥ २६ ॥**

**यथेति** । हे भद्र !-कल्याणिन् ! तव लोकलोचनानां आनन्दं-आह्लादं ददाती'ति लोकलोचनानन्ददायिनी यथा-येन प्रकारेण इयं आकृतिः-आकारो दृश्यते सत्यं-अवितथं तथा-तेन प्रकारेण सत्-शोभनस्त्यागः-दानं यस्य स सत्त्यागो वर्त्तसे तथा न त्वं लोभवान् असीति अव्ययं युष्मदर्थे । पक्षे, सत्त्यागस्त्वं नलः-नलाख्यो भवान्, इति पृथक्वाक्यद्वयं एकवाक्यतायां तु भवानसीति मध्यमपुरुषो दुर्लभः ॥ २६ ॥

**एवमुक्तः सोऽपि मनाङ्मुग्धस्मितमेवोत्तरं कल्पितवान् ।**

**अथ [५]प्रथमवयोविशेषविभूषिताङ्गस्तु[६]ङ्गतुरंगमारूढो [७]गाढग्रथित-**

---

१. शूद्रमारोग्यमेव च अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**परिकरः करेण कोदण्डमास्फालयंस्तद्द्वितीयो युवा तमेवोद्देशमायातवान्[१] ।**

**आगत्य च बालनीलनलशाद्वलशालिनि शिलोच्चयस्थलीप्रदेशे कांचित्काञ्च[२]नकुम्भकान्ति[३]कुचकुम्भ[४]लुठित[५]कुसुममालिकामवलोकयन्निदमवादीत् ।**

**एवं**-अमुना प्रकारेण उक्तः, सोऽपि युवा मनाक्-ईषत् मुग्धस्मितमेव-रम्यहास्यमेव उत्तरं कल्पितवान्-रचितवान् अब्रुवन्, ईषज्जहासेत्यर्थः ।

**अथ**-अनन्तरं, तद्द्वितीयः-स एव-नल एव द्वितीयो यस्य स तद्द्वितीयः-नलस्य सखा, यद्वा, तस्मात्-नलाद् द्वितीयः-अन्यस्तद्द्वितीयः, यद्वा स एव-नल एव द्वितीयस्तद्द्वितीयो-नलसमानो युवा तमेवोद्देशं-यस्मिन् प्रदेशे नलस्तमेव प्रदेशं आयातवान्-आगतः । किम्भूतः ? प्रथमवयोविशेषेण-नवयौवनारम्भेण विभूषितं अलङ्कृतं अंगं यस्य सः, तरुण इत्यर्थः । तथा तुङ्गं उन्नतं तुरङ्गं-अश्वमारुढः, तथा गाढं-अत्यर्थं ग्रथितः-बद्धः परिकरः-कटिवेष्टनपटी येन सः, तथा करेण-शयेन कोदण्डं-धनुरास्फालयन्-टङ्कारयन् ।

**आगत्य** च बालाः-प्रत्यग्रा नीलाः-नीलवर्णा ये नलाः-नडाः शाद्वलाश्च-बालतृणानि तैः शालते-शोभते इत्येवंशीलस्तस्मिन्, तथाभूते शिलोच्चयस्य-पर्वतस्य यः स्थलीप्रदेशस्तस्मिन्, काञ्चित्काञ्चनकुम्भवत्-सौवर्णकलसवत् कान्तौ-मनोज्ञौ यौ कुचकुम्भौ तयोर्लुठिता-परिवर्तमाना कुसुममालिका यस्याः सा तथाविधां गोपबालिकां अवलोकयन्निदमवादीत् ।

**'युवराज, पश्य–**

हे **युवराज** ! कुमार ! नृप ! पश्य-अवलोकय–

**नद्यास्तीरे विदर्भायाः कापि गोपालबालिका ।**
**गाः समुच्चारयत्येषा क्षेत्रीकृत्य नलं वरम् ॥ २७ ॥**

**नद्या** इति । विशिष्टो दर्भो यस्यां सा विदर्भा तस्या नद्याः-सरितस्तीरे एषा प्रत्यक्षा कापि-अनिर्दिष्टनाम्नी गोपालबालिका-गोपी वरं-श्रेष्ठं नलं-तृणविशेषं क्षेत्रीकृत्य-केदारीकृत्य समुद्-सहर्षा सती गाः-धेनुः चारयति ॥ २७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एतदाकर्ण्य मयाप्युक्तम्– 'महानुभाव, न केवलमियमन्यापि[१] क्वापि[२] कापि' इति[३] ।**

**इत्युक्तवन्तं मामवलोक्य भावितार्थः स पुनः युवा[४] सस्मितमवोचत् ।**

**एतत्**युवोक्तं आकर्ण्य-श्रुत्वा श्लेषवक्रोक्त्या मयाप्युक्तं-हे महानुभाव ! न केवलमियं गोपालबालिका, अन्यापि कापि क्वापि नद्या इति विदर्भाभिधानाया नद्यास्तीरे कापि महनीयमहिमा गोपालस्य राज्ञो बालिका-सुता नलं-राजानं वरं-वरयितारं क्षेत्रीकृत्य-आश्रयीकृत्य गाः-गिरः सम्यगुच्चारयति । "**वर ईप्सायाम्**" [धा. धा. १८५३] वर्यत इति वरः । क्षेत्रं सद्भूमिः ।

**इति**-अमुना प्रकारेण उक्तवन्तं मामवलोक्य भावितार्थः-यदयं नलमधिकृत्यैवं वदतीति विदितपरमार्थः । स पुनर्युवा सस्मितं-सहास्यं यथा भवति तथा अवोचत् ।

**'इयं च सा च[५]–**

**अनुभवतु चिराय चञ्चलाक्षीरसपरिणामफलानि गोपपुत्री ।**
**अपसरति महोद्यमेन यस्याः कथमपि संप्रति नैषधेऽनुरागः' ॥ २८ ॥**

**इयं च सा च–**

**अनुभवे**ति । गोपपुत्री-गोपालिका क्षीरस्य-दुग्धस्य सपरिणामानि-परिणतानि यानि फलानि-दधिघृतक्षैरेयीप्रभृतीनि तानि अनुभवतु-आस्वादयतु । किम्भूता ? चिराय-चिरकालं चञ्चला-लोला गोचारणवशात् । यस्याः-गोप्याः सम्प्रत्येषः-धेनुरागो महोद्यमेन हेतुना कथमपि-केनापि प्रकारेण न अपसरति-न निवर्तते । श्लेषे तु-गोपपुत्री-भूपपुत्री दमयन्तीलक्षणा चञ्चलाक्षी-चञ्चलनेत्रा शृङ्गारादिरसपरिपाकफलानि अनुभुङ्क्तां, यस्याः साम्प्रतं महोद्यमे-महाप्रयत्नवति नैषधे-नलेऽनुरागः-प्रेमबन्धः कथमपि नाऽपसरति, तत्रैवानुरागः प्रवर्तत इत्यर्थः ॥ २८ ॥

**आस्तां च[६] तावदन्यत्[७] । अध्वन्य, कथय कुतः प्रष्टव्योऽसि, किंच कियद्वाद्यापि[८] वर्त्मातिक्रमितव्यम्' इति ।**

**एवं[९] कथितस्ववृत्तान्तेन मयापि 'कोऽयमशेषमनुष्यमस्तकमणिः,**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कश्च भवानपि स्वप्रज्ञाप्राग्भारपराङ्मुखीकृतपुरंदरगुरुः' इति पर्यनुयुक्तः स पुनरुक्तवान् । 'अयमसौ[१०] सौम्य[११], समस्तशास्त्रशस्त्रकोविदो[१२] विदारितवैरी वैरसेनिर्नलः[१३] । किमन्यदहमपि श्रुतशील[१४]नामा-स्यैवाज्ञाकारी, इत्यभिधाय विश्रान्तवान् ।**

**नलोऽपि कृत्वा त्वदाश्रयास्तास्ताः प्रकटितप्रेमकन्दलाः कथाः, समर्थ्य च[१५] स्वयंवरामन्त्रणमुत्सुकतया तत्कालमेवोड्डीयेवागन्तु[१६]मीहमानः संभाषितेन स्मिते[१७]नालोकितेन[१८] च माममृतवर्षेणेवाह्लादयन्ननिच्छन्तमपि प्रतिग्राह्य च बलादनर्घ्याणि स्वाङ्गाभरणानि चिरादेव[१९] व्यसर्जयत् ।**

**आस्ता**मिति । तावत्-आदौ अन्यत्-अपरं च प्रष्टव्यान्तरं आस्तां-तिष्ठतु । हे अध्वन्य! कथय-कुतः-कस्माद्देशात् त्वं प्रष्टव्योसि, कुतः समागतोसीत्यर्थः । तथा किञ्च कियद्वा-कियत्प्रमाणं अद्यापि वर्त्म अतिक्रमितव्यं-उल्लंघितव्यमिति ।

**एवं** कथितं स्ववृत्तान्तं यत आगतं यद् यावदागन्तव्यमित्येवंरूपं येन स तथाविधेन मयाऽपि । इति पर्यनुयुक्तः-पृष्ठः सन्[१] स पुनः श्रुतशील उक्तवान् । ईतीति किम् ? कोऽयमशेषमनुष्याणां-समस्तमनुजानां मस्तकमणिरिव-चूडामणिरिव यः स प्रधानत्वात् । तथा च-पुनः स्वप्रज्ञाप्राग्मारेण-स्वबुद्धिवैभवेन पराङ्मुखीकृतः-निर्जितः पुरन्दरगुरुः-बृहस्पतिर्येन ईदृग्विधो भवानपि कः । हे सौम्य !-सुन्दर ! अयं-असौ समस्तानि-यानि शास्त्राणि च-आगमाः शस्त्राणि च-आयुधानि तेषु कोविदः-दक्षः । तथा विदारिता-विध्वस्ता वैरिणो येन ईदृशो वीरसेनस्यापत्यं वैरसेनिः-नलः । किमन्यत् अहमपि श्रुतशीलनामा अस्यैव आज्ञाकारी-आदेशकारी इत्यभिधाय विश्रान्तवान्-विशश्राम, तूष्णीं बभाजेत्यर्थः । वैरसेनिरिति "**अत इञ्**" [पा. सू. ४/१/९५] इत्यपत्येर्थे इञ् ।

**नलोऽपि** त्वं दमयंत्येव आश्रयो यासां तास्त्वदाश्रयास्त्वामधिकृत्य प्रवृत्ता इत्यर्थः, तास्ताः प्रकटिताः-प्रकाशिताः प्रेमकन्दलाः-स्नेहप्ररोहा यासु तास्तथाविधाः कथाः कृत्वा । च-पुनः स्वयम्वरामन्त्रणं समर्थ्य यदहमेष्यामीति अङ्गीकृत्य उत्सुकतया तत्कालं-तस्मिन् समये उड्डीय इव आगन्तुमीहमानः वाञ्छन्, तथा सम्भाषितेन-आलापितेन स्मितेन-ईषद्धास्येन आलोकितेन-वीक्षितेन च मां अमृतवर्षेण-पीयूषसेचनेनेव आह्लादयन्-आनन्दयन् सन्, अनिच्छन्तं-अनभिलषन्तमपि मां अनर्घ्याणि-बहुमूल्यानि स्वाङ्गाभरणानि-हारकेयूरादीनि बलाद्-हठात् प्रतिग्राह्य च-ग्राहयित्वा चिरादेव व्यसर्जयत्-मुमोच ।

---

१. सन् नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**स्वयं च मृगयाव्यसनितया मृगयालुभिः सह–**

**स्वयं** च मृगया व्यसनं–आसक्तिर्विद्यते यस्यासौ मृगयाव्यसनी तद्भावस्तया–आखेटकरसिकतया मृगयालुभिः–आखेटकारिभिः सह–

**धीरं रङ्गन्तमारुह्य सारं रहसि वाजिनम् ।**
**हारं रम्यं गले बिभ्रत्स्वैरं रन्तुमगात्पुनः ॥ २९ ॥**

**धीर**मिति । धीरं–अत्रासं रङ्गन्तं–वल्गन्तं तथा रंहसि–वेगे सारं–उत्कृष्टं ईदृशं वाजिनं–अश्वमारुह्य–अधिष्ठाय गले–कण्ठे हारं–गुणं बिभ्रत्–बिभ्राणः स्वैरं–स्वच्छन्दं रन्तुं–क्रीडितुं पुनरपि अगात्–अयात् ॥ २९ ॥

**तदायुष्मति, स्वामिसुते यथा मया तत्कथाप्रश्नानुराग उपलक्षितस्तथा निश्चितमचिरादयमेष्यति[१]' इत्यभिधाय स ब्राह्मणः स्वगृह[२]मगात् ।**

**तत्** इत्युपसंहारे, हे आयुष्मति !–चिरञ्जीविनि ! स्वामिसुते !–भर्तृदुहितः ! यथा–येन प्रकारेण मया तस्य–नलस्य यः कथाप्रश्ने–भवद्वार्त्ताप्रच्छन्नेऽनुरागस्तत्कथाप्रश्नानुराग उपलक्षितः–ज्ञातस्तथा तेन प्रकारेण निश्चितमचिरात् अयं–नल एष्यतीति अभिधाय स ब्राह्मणः–सोमशर्मा स्वगृहमगात् ।

**गते च तस्मिन्दमयन्ती 'श्लाध्यः स कः कालः, धन्यः स कतरो[३] वासरः, सलक्षणा[४] सा का नाम वेला[५], यस्या[६]मिन्दुदर्शनेनेव कुमुदमस्मच्चक्षुस्तदालोकनेन कम[७]प्यानन्दमनुभविष्यति, इति चिन्तयन्ती कान्यपि दिनानि कयाप्यवस्थया अनैषीत्[८] ।**

**गते च** तस्मिन्–ब्राह्मणे दमयन्ती इति–अमुना प्रकारेण चिन्तयन्ती कान्यपि दिनानि कयापि–अनिर्वाच्यया अवस्थया–दुःखावस्थानेन अनैषीत्–अतिवाहयामास । इतीति किम् ? स कः श्लाघ्यः–प्रशंस्यः कालः तथा स कतरो धन्यो वासरः ? तथा सा का सलक्षणा–लक्षणोपेता, '**शुभलक्षणे**ति' पाठान्तरं, नामेति कोमलामन्त्रणे वेला ? यस्यां–वेलायां अस्मच्चक्षुस्तस्य–नलस्य आलोकनेन–वीक्षणेन कमपि–अद्भुतं आनन्दं–आह्लादं अनुभविष्यति । केन ? किमिव ? इन्दुदर्शनेन कुमुदमिव । यथा चन्द्रदर्शनेन कुमुदं–कैरवं आह्लादमाप्नोति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ नलोऽप्यामन्त्रितस्तेन ब्राह्मणेन रणरणकेन च, प्रेरितो मन्त्रिणा मदनेन च, सेनयोत्कण्ठया [१]च परिवृतः, तत्कालमेव विदर्भमण्डलाभिमुखमुदचलत् ।

चलिते च [२]चतुरङ्गबल[३]चलनचूर्णितशिलोच्चयचक्रवाले चक्रिचक्रचङ्क्रमणचीत्कारबधिरितककुभि विषमवैरिवृन्दवनवैद्युतानले नले, चलन्तश्चटुलतरचरणप्रहाररणितधरणिमण्डलाः कान्तकाञ्चनरचनारोचिष्णवश्चकासांचक्रुश्चक्रवर्त्तिवाहनोचिताः साश्चर्यमपर्यन्तपर्याया:[४] पर्याणितास्तुरङ्गाः, शृङ्गारिताश्च चलच्चारुचामरावचूलवालंकृत[५]कपोलभित्तिभाग[६]मिलितभृङ्गसंगीतमुखरितमुखमण्डलाः कथमप्याधरोरण[७]निरुध्यमानशौर्यविकारविस्फुरणाः[८] स्फुरत्कुम्भभित्तिसिन्दूरा दूरापसारितस्यन्दनाः स्यन्दमानामन्दमदकर्दमितमेदिनीकाः कम्पयांबभूवुर्भुवं भूरिभारभुग्नाङ्गपन्नगशिरः[९]शिथिलवष्टम्भामिभेन्द्राः ।

**अथ**-अनन्तरं नलोपि तत्कालमेव-तत्समयमेव विदर्भमण्डलाभिमुखं-विदर्भदेशं प्रति उदचलत्-प्रतस्थे । किम्भूतेन ! तेन-ब्राह्मणेन आमन्त्रितः, तथा रणरणकेन च उत्कण्ठया च आमन्त्रितः-आहूतः, तद्दिशायै उत्कण्ठापि जातेत्यर्थः । तथा **मन्त्रिणा**-श्रुतशीलेन प्रेरितः यथा—स्वामिन् ! तत्र गम्यतामिति, मदनेन च-कामेन च प्रेरितः, मदनातुरो जात इत्यर्थः। तथा सेनया-चम्वा परिवृतः-परिकारितः तथा उत्कण्ठया च-वाञ्छया परिवृतः-वेष्टितः, तस्यै वाञ्छा बभूव इत्यर्थः ।

नले **चलिते** च सति चलन्तः-गच्छान्तः पर्याणिताः-पल्ययनितास्तुरङ्गाः साश्चर्यं-साद्भुतं यथाभवति तथा चकासाञ्चक्रुः-शुशुभिरे । किम्भूते नले ? चतुरङ्गबलस्य-हस्त्यश्वरथपदातिरूप[१]सेना यश्चलनेन-चंक्रमणेन चूर्णितं-पिष्टं शिलोच्चयानां-गिरीणां चक्रवालं-वृन्दं येन स तस्मिन् । एतावता सेनाबाहुल्यमुक्तम् । तथा चक्रिचक्रस्य-स्यन्दनसमूहस्य यच्चंक्रमणं-गमनं तस्मिन् यश्चीत्कारस्तेन बधिरिताः-[२] शब्दान्तर-श्रवणागोचरीकृताः ककुभः-दिशो येन स तस्मिन् । तथा विषमं-दुःसहं यद्वैरिवृन्दं-प्रत्यर्थिसमूहस्तदेव वनं तत्र वैद्युतानल इव-वज्रवह्निरिव यः स तस्मिन् । यथा वैद्युतानलेन वनं भस्मसात् क्रियते तथा येन वैरिवृन्दनिहतमिति[३] । एतावताऽस्य शौर्याधिक्यं वर्णितम् । किम्भूतास्तुरंगाः ? चटुलतराः-अतिचञ्चला ये चरणप्रहाराः-खुराधातास्तै रणितं-शब्दितं

१. रूपायाः अनू. । २. बधरिताः अनू. । ३. वैरिवृन्दं निहतमिति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

धरणिमण्डलं-भूतलं यैस्ते । तथा कान्ता-मनोज्ञा या काञ्चनरचना-मुखादिविभूषार्थं सौवर्णभूषणपरिधापनं तया रोचिष्णवः-शोभनशीलाः । तथा चक्रवर्तिनः-सार्वभौमस्य वाहनाय-धारणाय, यद्वा चक्रवर्तिनो वाहनानीव-पत्राणीव उचिताः-योग्याः प्रधाना इत्यर्थः । तथा अपर्यन्ताः-विशाला हृदयादयः पर्यायाः-धर्म्मा येषां ते, यद्वा अपर्यन्तः-दीर्घः पर्यायः-निर्माणं येषां ते, अत्युच्चा इत्यर्थः । **यदनेकार्थः-"पर्यायोऽवसरे क्रमे निर्माणे द्रव्यधर्मे च"**[३/५२५] इति । तथा शृङ्गारिताश्च-विभूषिता इभेन्द्राः-महाहस्तिनो भुवं कम्पयाम्बभुवुः-कम्पयन्तिस्म । किम्भूता इभेन्द्राः ? चलती-चलनवशादेजमाने चारुणी-मनोज्ञे चामरे यत्र । तथा अवचूलाभ्यां-अधोमुखकुर्चकाभ्यां अलङ्कृतः-मण्डितः पश्चात्कर्मधारयः ईदृग्विधो यः कपोलभित्तिभागः-गण्डस्थलं तत्र मिलिताः-समवेता ये भृङ्गास्तेषां सङ्गीतेन-झङ्काररवेण मुखरितं-वाचालितं मुखमण्डलं येषां ते । तथा कथमपि-महता कष्टेन आधोरणेन-हस्तिपकेन निरुध्यमानं-निवार्यमाणं शौर्यविकारस्य-मदवशात् गमनचाञ्चल्यस्य विस्फुरणं-व्यापारो येषां ते, तथा स्फुरद्-दीप्यमानं कुम्भभित्तौ सिन्दूरं-नागजं येषां ते, तथा दूरे अपसारिताः-अपनीताः स्यन्दनाः-रथा येभ्यस्ते । तथा स्यन्दमानः-क्षरन् अमन्दः-अनल्पो यो मदः-दानं तेन कर्दमिता-पङ्किलीकृता मेदिनी-भूर्यैस्ते, बहुव्रीहौ कः । किम्भूतां भुवम् ? भूरिभारेण-बहुवीवधेन भुग्नं-[१] कुब्जीकृतं[२] अङ्गं-शरीरं यस्य ईदृशो यः पन्नगः-शेषस्तस्य यच्छिरः-मूर्धा तदेव शिथिलः-अदृढः अवष्टम्भः-आधारो यस्याः सा तां, भूरिभारमसहमानेन शेषेण वपुर्वक्रीकृतं तेन शिरोऽपि मनाग् निम्नीभूतं ततो धरावष्टम्भभूतस्य शेषशिरसः शिथिलत्वम् ।

**किंबहुना । तत्रावसरे—**

किम्बहुना-किम्बहूक्तेन, तत्रावसरे-सेनायाः प्रस्थानसमये—

**पूर्वापरपयोराशिसीमासंक्रान्तसैनिके ।**
**तस्मिन्सस्मार भूर्भाराद्वराहवपुषो हरेः ॥ ३० ॥**

**पूर्वे**ति । पूर्वापरपयोराश्योः सीमानं-पर्यन्तं यावत् संक्रान्ता-चलिताः सैनिकाः-चमूचरा यस्य स तस्मिन् पूर्वापरसागरावधिसंक्रान्तचमूचरे तस्मिन्-नले सतिभूः-मेदिनीभारात्-हेतोः वराहवपुषः-वराहावतारस्य हरेः-विष्णोः सस्मार-स्मृतवती । यद्ययं वराहवपुर्हरिरधुना भविष्यत् तदा एनं भारं उदवक्ष्यत्, मया तु वोढुं न शक्यते, इत्येवं वराहरूपधारिणं नारायणं स्मरति स्म । हरेरिति स्मृत्यर्थकर्मणि षष्ठी ॥ ३० ॥

---

१. भुग्नं-रुग्नं अनू. । २. कुब्जीभूतं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अपि च–**

**आसीत्पिण्डितपाण्डुपङ्कजवनं श्वेतातपत्रैः क्वचि-**
**न्मायूरातपवारणैः क्वचिदभूदुन्नालनीलोत्पलम् ।**
**उन्मेघं क्वचिदूर्ध्वधूलिपटलैस्तस्य प्रयाणेऽभव-**
**त्प्रोद्वीचि क्वचिदम्बरं सर इव प्रेङ्खत्पताकापटैः ॥ ३१ ॥**

**अपि च**-पुनः

**आसी**दिति । तस्य-नलस्य प्रयाणे-प्रस्थाने सर इव-तडागमिव अम्बरं-आकाशम-भवत्-जातम् । सरोधर्मान् नभस्यवतारयन्नाह–क्वचित्-प्रदेशे अम्बरं श्वेतातपत्रैः-धवलच्छत्रैः कृत्वा पिण्डितानां-मिलितानां पाण्डूनां-सितानां पङ्कजानां वनं यत्र ईदृशं आसीत् । मन्ये, अमूनि सितातपत्राणि न भवन्ति किन्तु पिण्डितसिताब्जवनमिति । तथा क्वचिन्नभः मायूरातपवारणैः-श्रीकरिभिः कृत्वा उन्नालानि-ऊर्ध्वकाण्डानि नीलोत्पलानि यत्र ईदृशमासीत् । तथा क्वचित्प्रदेशे नभः ऊर्ध्वं-नभोगामीनि यानि धूलीपटलानि-रेणुसमूहास्ते कृत्वा उन्मेघं-उन्नतमेघं जातम् । तथा क्वचित्प्रदेशे नभः प्रेङ्खन्तः वायुवशात् कम्पमाना ये पताकापटाः-ध्वजवस्त्राणि तैः कृत्वा प्रकृष्टाः ऊर्ध्वं वीचयः-कल्लोला यत्र तत् प्रोद्वीचि आसीत् । यथा सरःपिण्डितपाण्डुपङ्कजवनं भवति, तथा उन्नालनीलोत्पलं च भवेत्, तथा उन्मेघमपि । प्राच्यदेशमहासरस्सु मेघा अम्भो ग्रहीतुं उन्नमन्ति इति प्रसिद्ध्या उन्मेघत्वमुक्तम् । तथा उदीच्यपि भवेत्तथाम्बरमेभिरिति: ॥ ३१ ॥

**जाताश्च जङ्घाजघनस्पृशो, वक्षःस्थलीलोलनलम्पटाः, ग्रीवाग्रहणग्रहिण्यः, प्रसभं लगन्त्यो वस्त्रेषु, निस्त्रपाः स्त्रिय इव, नखपदाभिघातोद्यताः, चुम्बन्त्यश्चिबुककपोलाधरचक्षूंषि सैनिकानाम्, अतिप्रसरेण शिरोऽवलग्नाः, प्रबला धूलयो, वियदावरणाश्च चक्रुरुच्चैरतिप्रसङ्गमासन्नवननिकुञ्जेषु ।**

**कूजन्तश्च कोटिशः कोदण्डमण्डलाग्रव्यग्रपाणयः, पाणिनीया इवाधिकरणकर्मकुशलाः [1]समुल्ललन्तो विचेरुर्वल्गानपटवो लाम्पट्यो-ल्लुण्ठितारिपुरः[2] पुरः पदातयः ।**

धूलयो निस्त्रपाः-निर्लज्जाः स्त्रिय इव जाताः । उभयोऽपि कीदृश्यः ? जङ्घाजघने

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्पृशन्तीति जङ्घाजघनस्पृशः । तथा वक्षःस्थल्यां यल्लोलनं-विलसनं तत्र लम्पटाः-लालसाः । तथा ग्रीवायाः-कन्धरायाः ग्रहणे-स्वीकारे आग्रहः-हठो विद्यते यासां ताः ग्रीवाग्रहणग्रहिण्यः । तथा वस्त्रेषु प्रसभं-हठात् लगन्त्यः । पुनः किम्भूता, धूलयः ? नखाः-अश्वादीनां खुराः पदं-पादविन्यासस्तेषां अभिघातात्[१]-प्रहारदानात् उद्यताः-उत्थिताः । किम्भूता निस्त्रपाः स्त्रियः ? नखाभिघाते-नखक्षते पदयोश्चाभिघाते उद्यताः-सोद्यमाः । तथा सैनिकानां-चमूचराणां चिबुकं च-असिकाधःकपोलो च- गण्डौ अधरौ च-ओष्ठौ, चक्षुषी च-नेत्रे तानि चुम्बन्त्यः, निस्त्रपाः स्त्रियोप्येवंविधा एव भवन्ति । धूलिपक्षे, चुम्बन्त्य इत्यत्र चुम्बनं-वक्त्रसंयोगः स चात्रानुपपन्न इति, तस्य स्पर्शनमात्रं लक्षयति, तेन चुम्बन्त्यः-स्पृशन्त्य इति चुम्बितपदमत्यन्ततिरस्कृतवाच्यम् । तथा चोक्तं **काव्यप्रकाशे**– "**एतच्चकास्ति च रवेर्नवबन्धुजीव-पुष्पच्छदाममुदयाचलचुम्बिबिम्बम् ।**" [५/१५] इति, स्त्रीपक्षे तु, चुम्बनं धात्वर्थपरं व्याख्येयम् । तथा अतिप्रसरेण-अतिप्रसक्त्या शिरोवलग्नाः-शिरसि लग्नाः, स्त्रियोप्येवंविधा एव स्युः । तथा बलात्-सैन्यात् प्रवृद्धाः प्रबलाः, स्त्रियश्च प्रवृद्धवीर्याः । तथा धूलयो वियत्-नभ आवृण्वन्तीति वियदावरणाः-नभश्छादिन्यः । विपूर्वस्येणः शतृङावियदिति, स्त्रियश्च वियच्छद्वस्त्राः । तथा धूलय आसन्नवननिकुञ्जेषु उच्चैः-अतिशयेन अतिप्रसङ्गं -अतिव्याप्तिं चक्रुः । पक्षे स्त्रियः-आसन्नकाननकुञ्जेषु रतिप्रसङ्गं-सुरतप्रसङ्गं कुर्वन्ति ।

तथा पुरःप्रस्थितस्य नृपस्य अग्रे पदातयः-पादचारिणः समुल्ललन्तः-समुच्छलन्तो विचेरुः-चलन्ति स्म । किं कुर्वन्तः पदातयः ? कोटिशः-अनेकधा कूजन्तः शब्दायमानाः । तथा कोदण्डेन-धनुषा मण्डलाग्रेण च-असिना व्यग्राः-व्याकुला रुद्धाः पाणयो येषां ते । तथा अधिकं-अतिशयेन रणकर्मणि-संग्रामक्रियायां कुशलाः-दक्षाः । के इव ? पाणिनीया इव-पाणिनिशिष्या इव । ते किम्भूताः ? कर्मणि[२] कारके तयोः कुशलाः । तथा वल्गने-कूर्दने पटवः-चतुराः । तथा लाम्पट्येन-तदीयधनादिवस्तुग्रहणलम्पटतया उल्लुण्ठिताः-विध्वस्ता अरिपुरः-अरिनगर्यो यैस्ते तथाविधाः ।

**तत्र च व्यतिकरे–**

तत्र च व्यतिकरे-तस्मिन्नवसरे–

**मन्दं मन्दरमन्दिरेषु शयितानुन्निद्रयन्किनरा-**
**न्मेरोर्मस्तककन्दरे[१] प्रतिरवानुत्थापयन्नुल्बणः ।**

---

१. अभिघातास्तत् अनू. । २. अधिकरणकर्मणी अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**आध्वं धावत यात मुञ्चत पुनः[१] पन्थानमेवंविध-**
**स्त्रैलोक्यं बधिरीचकार वहतः[२] सैन्यस्य कोलाहलः ॥ ३२ ॥**

**मन्द**मिति वृत्तम्। भो सैनिकाः ! यूयं प्राध्वं-आनुकूल्येन धावत-शीघ्रं गच्छत। "**धावुञ् जवे**" [ ]। तथा यातः-इतः स्थानादन्यत्र गच्छत। तथा पुरः-अग्रतः पन्थानं-मार्गं मुञ्चत। एवंविधः-एवंप्रकारो वहतः-गच्छतः सैन्यस्य कोलाहलः-कलकलस्त्रैलोक्यं-त्रिभुवनं बधिरीचकार-श्रवणापटु अकार्षीत्। किम्भूतः कोलाहलः ? मन्दं-शनैः मंदरमन्दिरेषु-मेरुसदनेषु शयितान्-सुप्तान् किन्नरान् उन्निद्रयन्-जागरयन्। यतः पुनः किं कुर्वन् ? मेरोर्मस्तके कन्दरे-शिखरदर्यां प्रतिरवान्-प्रतिशब्दान् उत्थापयन्-उद्भावयन्। तथा उल्वणः-उत्कटः। प्राध्वं **नर्म्मानुकूल्ययोः**[१]", [अने. परि. ४७] प्राध्वं उपविशत वा, "**आसू उपवेशने**[२]" [ ] आशिषि मध्यमपुरुषबहुत्वे भाष्यकारमतेन सलोपे आध्वमिति रूपम्। ॥ ३२ ॥

**एवमसौ क्रीडितानेकपामरान्गिरीन्ग्रामांश्च[३] बहुतरङ्गोपशोभिताः सरितः सीम्नश्च[४] व्यूढपत्त्ररथान्पथःपादपांश्च लङ्घयन्, सालसहिताः पुरीर्नारीश्च सेवमानः, पच्यमानगोधूमश्यामलाः क्षेत्रभुवो भिल्लपल्लीश्च[५] परिहरन्, विधवाः शत्रुसीमन्तिनीरटवीश्चातिक्रामन्[६], परिवारीणि बन्धुकुलानि सरांसि च बहुमानयन्, नातिचिरेण रविरथतुरंगमपरिहृतविषमशिरःशिखरसहस्त्रम[७]-मरगणगन्धर्वसिद्धरुद्धस्कन्धमध्यं विन्ध्याचलमनुससार ।**

**एवं**-अमुना प्रकारेण असौ-नल इदं इदं कुर्वन् नातिचिरेण-स्तोकेनैव कालेन विन्ध्याचलं-विन्ध्याद्रिं अनुलक्षीकृत्य ससार-चचाल। किं कुर्वन्। लङ्घयन्-अतिक्रामन्। कान् ? गिरीन् ग्रामांश्च। किम्भूतान् गिरीन् ? क्रीडिताः-खेलिताः अनेकपाः-गजा अमराश्च-देवा येषु तान्। किम्भूतान् ग्रामान् ? क्रीडिता अनेके-बहवः पामराः-ग्राम्या येषु तान्। तथा सरितः-नदीः सीम्नश्च-ग्रामावधीन् लंघयन्। किम्भूताः सरितः ? बहुभिस्तरङ्गैरुप-शोभिताः-अलङ्कृताः। किम्भूताः सीम्नः ? बहुतरं यथा भवति तथा गोपैः-गोपालैः शोभिताः। तथा पथः-मार्गान् पादपांश्च-तरून् लंघयन्। किम्भूतान् पथः[३]। विशेषेण ऊढानि-प्रवृत्तानि पत्राणि-वाहनानि हस्त्यश्वादीनि रथाश्च येषु ते तथाविधान्। किम्भूतान् पादपान् ? व्यूढाः-धारिताः पत्ररथाः-पक्षिणो यैस्ते तथाविधान्। तथा एवंविधाः पुरीः नारीश्च वनिताः सेवमानः-भजमानः। किम्भूताः पुरीः ? सालेन-प्रकारेण सहिताः। किम्भूता नारीः ? सालसाः-आलस्योपेताः हिताश्च-अनुकूलाः पश्चात् कर्मधारयः। अलसशब्दोऽत्र भावप्रधानः लवणादिशब्दवत्। तथा एवंविधाः क्षेत्रभुवः-केदारभूमीः भिल्लपल्लीश्च-शबर-

---

१. नर्म्मानुकूलयोः अनू.। २. आस् अनू.। ३. तरून् अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निवासस्थानानि परिहरन्-त्यजन् । किम्भूताः क्षेत्रभुवः ? पच्यमानैः-पाचलिमैर्गोधूमैः-सस्यविशेषैः श्यामलाः-नीलवर्णाः । पच्यमानेति "**कर्म कर्त्तरि यक्**" [ ] । किम्भूताः भिल्लपल्लीः ? गोः-भूमेर्धूमो गोधूमः ततः पच्यमानः-परिपाकं गच्छन् बहुलीभवन् योऽसौ गोधूमस्तेन श्यामलाः, न तु पच्यमाना यासौ गौश्चेति अदन्तता प्रसङ्गात् । कृष्णावती हि दग्धा सती समधिकं फलतीति । तथा चोक्तं **रघुकाव्ये** [९/८०] **शरवणवधाकारे, कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धो, बीजप्ररोहजननीं ज्वलनः करोति ।**" गोशब्दोऽत्र भूम्यर्थो, न धेन्वर्थोऽनौचित्यात् । तथा एवंविधाः शत्रुसीमन्तिनीः-प्रत्यर्थिकामिनीः अटवीश्च अतिक्रामन्-लंघयन् । किम्भूताः शत्रुस्त्रीः ? विगता धवा-भर्त्तारो यासां ताः विधवास्तां हतभर्तृकत्वात् । किम्भूता अटवीः ? विशिष्टा धवाः-तरुविशेषा यासु ता विधवास्ताः। तथा एवंविधानि बन्धुकुलानि-स्वजनवंशान् सरांसि च बहुमानयन्-गौरवयन् । बन्धुकुलानां हिरण्यादिदानेन बहुमाननं सरसां च अवस्थाने न बहुमाननम् । किम्भूतानि बन्धुकुलानि ? परिवृण्वन्ति-परिवारी भवन्ति यानि तानि तथा तानि परिवारीणि । किम्भूतानि सरांसि ? परि-समन्ताद् वारि-जलं येषु तानि तथा तानि परिवारीणि । किम्भूतं विन्ध्याचलम् ? रविरथतुरङ्गमैः-तरणिरथाश्वैः परिहतं-त्यक्तं विषमशिरः शिखराणां-दुर्गाग्रकूटानां सहस्रं यस्य स तं, रविरथाश्वास्तत्र गमनस्य विषमत्वात् तदधित्यकामध्यं परित्यज्य अन्यमार्गेण गच्छन्तीति भावः । सहस्रशब्दोऽत्र बहुत्ववचनः । तथा अमरगणाश्च-देवसमूहाः गन्धर्वाश्च-देवगायनाः सिद्धाश्च-देवविशेषास्तै रुद्धः-व्याप्तः स्कन्धः-मध्यभागो यस्य स तथा तम् ।

**ततश्च—**

> **दिशि दिशि किमिमानि प्रच्यवन्तेऽन्तरिक्षा-**
> **दविरतमुत देवी भूतधात्री प्रसूते ।**
> **इति शबरवधूभिस्तर्क्यमाणान्यवापुः,**
> **सपदि विपुलविन्ध्यस्कन्धमध्यं बलानि ॥ ३३ ॥**

**ततश्च**-ततोनन्तरम्—

**दिशी**ति । शबरवधूभिः-भिल्लीभिः इति-अमुना प्रकारेण तर्क्यमाणानि-ऊह्यमानानि बलानि-सैन्यानि सपदि-शीघ्रं विपुलं-विशालं यद्विन्ध्यस्कन्धमध्यं तत् अवापुः-प्रापुः । इतीति किम् ? अन्तरिक्षात्-आकाशात् किम्-इति वितर्के, दिशि दिशि-सर्वासु दिक्षु इमानि बलानि प्रच्यवन्ते-भ्रश्यन्ति पतन्ति । उत— अथवा भूतधात्री-भूर्देवी इमानि अविरतं-निरन्तरं प्रसूते-जनयति । एतावता सैन्यजनानां बाहुल्यं दर्शितम् ॥ ३३ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**श्रुतशीलस्तु तुङ्गशृङ्गरङ्गत्सारङ्गाङ्गनासु [१]नक्षत्रासन्नाकाशावकाश-विशदवंशजालजटिलासु[२] चलच्चित्रचित्रककरिकलभकदम्बकसंचार-शबलासु हारिहरिताङ्कुररमणीयासु वनस्थलीषु निक्षिप्तचक्षुषमवलोक्य राजानमिदमवादीत् ।**

**श्रुतशीलस्तु** एवंविधासु वनस्थलीषु निक्षिप्ते-निहिते चक्षुषी येन तथाविधं तत्र दत्तदृष्टिं राजानं-नलमवलोक्य इदमवादीत् । किम्भूतासु वनस्थलीषु ? तुङ्गशृङ्गेषु-उच्च-गिरिशिखरेषु रङ्गन्त्यः-क्रीडन्त्यः सारङ्गाङ्गनाः-मृग्यो यासु तास्तासु । तथा नक्षत्राणामासन्नः-निकटवर्ती य आकाशावकाशः-नभोऽन्तरं तेन विशदं-सप्रकाशं यद्वंशजालं-वेणुवृन्दं तेन जटिलासु-व्याप्तासु 'एतावता वंशानां नक्षत्राणि यावदुच्चत्वं आख्यातम्' । "**जट झट कट संघाते**" [पा. धा. ३०५-३०७] औणादिक इल्लप्रत्ययः । तथा चलन्तः-विचरन्तश्चित्राः-आश्चर्यकारिणो ये चित्रकाश्च- द्वीपिनः करिणश्च-गजाः कलभाश्च-करिपोतास्तेषां यत्कदम्बकं-वृन्दं तस्य सञ्चारेण-प्रवर्तनेन शबलाः-कर्बुरवर्णास्तासु । तथा हारिणः-मनोहरा ये हरिताङ्कुराः-नीलप्ररोहास्तै रमणीयासु-रम्यासु ।

अथ श्रुतशीलो यदुवाच तदाह—

**'देव'—**

**माद्यद्दन्तिकपोलपालिविगलद्दानाम्बुसिक्तद्रुमाः,**
**क्रीडत्क्रोडकुलार्धचर्वितपतन्मुस्तारसामोदिताः ।**
**अन्तःसुस्थितपान्थमन्थरमरुल्लोलल्लतामण्डपाः,**
**कस्यैता न हरन्ति हन्त हृदयं विन्ध्यस्थलीभूमयः ॥ ३४ ॥**

हे **देव** !-नृप !

**माद्यदिति** । हन्त इति प्रमोदे, एता-इमा विन्ध्यस्थलीभूमयः कस्य हृदयं-चेतो न हरंति-न वशीकुर्वन्ति । "**हन्त दानेऽनुकम्पायां वाक्यारम्भविषादयोः । निश्चये च प्रमोदे च**[१]" इत्य**नेकार्थः** [परि. ३३.] । किम्भूताः ? माद्यन्तः-दृप्यन्तो ये दन्तिनः-गजास्तेषां कपोलपालिभ्यः-गण्डप्रान्तेभ्यो विगलत्-क्षरत् यद्दानाम्बुः-मदजलं तेन सिक्ताः-आर्द्रीकृता द्रुमा यासां ताः । तथा क्रीडत्-खेलत् यत क्रोडकुलं-वराहवृन्दं तेन अर्धचर्विताः-अर्धास्वादिताः पतन्त्यो या मुस्ताः-कन्दविशेषास्तासां रसेन-निर्यासेन आमोदिताः-सुगन्धिताः । तथा अन्तः-मध्ये सुस्थिताः-सुखेनावस्थिताः पान्था येषां

१. चापि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवंविधाः मन्थरमरुता-मन्दानिलेन लोलन्तः-चलन्तो लतामण्डपा यासु ताः ॥ ३८ ॥

**इतश्च पश्यतु देवः—**

**एषा सा विन्ध्यमध्यस्थल[1]विपुलशिलोत्सङ्गरङ्गत्तरङ्गाः,**
**सम्भोगश्रान्ततीराश्रयशबरवधूशर्मदा नर्मदा च ।**
**यस्याः सान्द्रद्रुमालीललिततलमिलत्सुन्दरीसंनिरुद्धैः,**
**सिद्धैः सेव्यन्त एते मृगमृदितदलत्कन्दलाः कूलकच्छाः[2] ॥ ३५ ॥**

**इतश्च**-अस्मिन् देशे देवः-नृपः पश्यतु—

**एषेति** । सा एषा नर्मदा वर्तते । किम्भूता ? विन्ध्यमध्यस्थले विपुलाः-विशाला ये शिलोत्सङ्गाः-शिलाक्रोडास्तेषु रङ्गन्तः-विलसन्तस्तरङ्गाः-वीचयो यस्याः सा । तथा सम्भोगेन-सुरतेन श्रान्ताः-खिन्नास्तथा तीरं-तटमाश्रयन्ते यास्तास्तीराश्रयाः, यद्वा तीरे आश्रयः-गृहं यासां तास्तीराश्रयाः, पश्चात् कर्मधारयः । एवंविधाः याः शबरवध्वस्तासां शर्म ददातीति सम्भोगश्रान्ततीराश्रयशबरवधूशर्मदा । सेति का ? यस्याः-नर्मदाया एते कूलकच्छाः-तटानुपप्रायदेशाः सिद्धैः-देवविशेषैः सेव्यते[1] । किम्भूतैः सिद्धैः । सान्द्रा-निविडा या द्रुमाली-वृक्षपंक्तिस्तस्या ललितं-मनोहरं यत्तलं-अधोभागस्तस्मिन् मिलन्त्यः-पुञ्जीभवन्त्यो याः सुन्दर्यस्ताभिः सन्निरुद्धैः-आश्रितैः, स्त्रीभिः सहितैरित्यर्थः । किम्भूताः कूलकच्छाः ? मृगैर्मृदिता-दलिता दलन्तः-विकसन्तः कन्दलाः-प्ररोहा येषु ते तथाविधाः । "**कच्छो द्रुभेदे नौकाङ्गेऽनूपप्राये तटेऽपि च**" इत्यनेकार्थः [२/६३] ॥ ३५ ॥

**अपि च । अन्तरेऽप्यस्या[3]:-**

**मज्जत्कुञ्जरकुम्भ[4]मण्डलगलद्दानाम्बुनः सौरभाद्-**
**भ्राम्यद्भृङ्गकुलावली[5] कुवलयश्रेणीः समाबिभ्रतः ।**
**कल्लोलाः कलिकालकल्मषमुषः प्रोल्लोललीलाकृतः[6],**
**स्वःसोपानपरम्परा इव वियद्वीथीमलंकुर्वते ॥ ३६ ॥**

हे देव ! **अस्याः**-नर्मदाया अन्तरेपि-मध्येपि—

**मज्जदिति** । कल्लोला वियद्वीथीं-नभोमार्गं अलङ्कुर्वते-शोभयन्ति । किम्भूताः ? प्रकर्षेण ऊर्ध्वं लोलत्वलीलां-चञ्चलत्वविलासं कुर्वत इति प्रोल्लोल-लीलाकृतः-ऊर्ध्वमुच्छलन्त इत्यर्थः । लोलशब्दोऽत्र भावप्रधानो लवणादिशब्दवत्, अतएव

---

१. सेव्यन्ते अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उत्प्रेक्ष्यते, स्वः-स्वर्गस्य सोपानपरम्परा इव । मन्ये, अमी कल्लोला न भवन्ति किन्तु स्वर्गमारुह्यतां[१] एता आरोहणपरिपाट्य इति । किं कुर्वन्तः कल्लोलाः ? मज्जन्तः-स्नानं कुर्वन्तो ये कुञ्जरास्तेषां कुम्भमण्डलात् गलत्-क्षरद् यद् दानाम्बुः-मदजलं तस्य सौरभात्-सौगन्ध्यात् भ्राम्यन्त्यः-उपरि सञ्चरन्त्यो या भृङ्गाकुलावल्यः-मधुकरवृन्दपंक्तयो भ्राम्यद्भृङ्ग कुलावल्यस्ता एव कुवलयश्रेणीः-नीलोत्पलराजीः समा बिभ्रतः-दधतः, भृङ्गकुलानां कुवलयान्युपमानं । तथा कलिकालस्य-कलियुगस्य कल्मषं-पापं मुष्णन्ति स्नानादपनयन्तीति कलिकालकल्मषमुषः ॥ ३६ ॥

**इतश्चास्यास्तीरेषु[१]**

**अंसस्रंसिजलार्द्रजर्जरजटाजूटैर्मनाङ्मन्थरा-**
**स्तिम्यत्तारवतन्तुनिर्मितकुथत्कौपीनमात्रच्छदाः।**
**शीतोत्कण्टकितास्थिशेषतनवः स्नात्वोत्तरन्तः शनै-**
**रेते पश्य पतन्ति पिच्छिलशिलाजाले जरत्तापसाः ॥ ३७ ॥**

हे देव ! **इतश्च**-अस्मिन्प्रदेशे अस्याः-नद्यास्तीरेषु-तटेषु—

**अंसेति** वृत्तम् । पश्य-अवलोक्य एते जरत्तापसाः जरन्तः-वृद्धाश्च ते तापसाश्च-तपस्विनो जरत्तापसाः पिच्छिलं-मसृणं कर्दमिलं यत् शिलाजालं-शिलावृन्दं तस्मिन् पतन्ति-स्खलन्ति । किम्भूताः ? अंसयोः-स्कन्धयोः स्रंसिनः-पतनशीला जलार्द्राः-जलक्लिन्ना जर्जराः-धवलीभूता ये जटाजूटाः-जटाबन्धास्तैर्मनाक्-ईषन् मन्थराः-अलसगतयः, आर्द्रजटानां भारोद्वहनात् मन्दं मन्दं गच्छन्त इत्यर्थः । तथा तरुषु भवास्तारवास्ते च ते तन्तवश्च तारवतन्तवस्तैर्निर्मितं-रचितं कुथत्-शटितं यत्कौपीनं-कक्षापटः तिम्यत्-आर्द्रीभवद् यत्तारवतन्तुनिर्मितकुथत्कौपीनं तिम्यत्तारवतन्तुनिर्मितकुथत्कौपीनं तन्मात्रमेव तदेव छदः-आवरणं येषां ते । तथा शीतेन-हिमवायुना उत्कण्टकिता-ऊर्ध्वं पुलकिता अस्थिशेषा तनुर्येषां ते, तथाविधा, अजस्रं तपः करणादस्थिशेषत्वं । तथा शनैः स्नात्वा स्नानं विधाय उत्तरन्तः-तटं प्रति गच्छन्तः पश्य । इत्यत्र वाक्यार्थस्यैव कर्मत्वं पश्य मृगो धावतीत्यादिवत् ॥३७॥

**इतोऽपि—**

**पश्यैताः करिकुम्भसंनिभकुचद्वन्द्वोल्लसद्वीचयः,**
**क्रीडन्त्यब्जविकासभाजि[२] पयसि स्वैरं पुलिन्दस्त्रियः ।**

---

१. स्वर्गमारुहतां अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**उन्मीलन्नवनीलनीरजधिया पक्ष्मान्तरे नेत्रयो-**
**र्यासां हस्ततलाहता[१] अपि परिभ्राम्यन्ति भृङ्गाङ्गनाः ॥ ३८ ॥**

हे देव ! **इतोऽपि**-अस्मिन्नपि प्रदेशे-

**पश्येति** । वृत्तम् । हे देव ! त्वं पश्य, एताः पुलिन्दस्त्रियः-शबरनार्यः अस्याः पयसि स्वैरं-स्वेच्छया क्रीडन्ति-रमन्ते । किम्भूते पयसि ? अब्जविकासं भजतीति यत्तत्तस्मिन् विकसितपङ्कजवति । किम्भूताः पुलिन्दस्त्रियः । करिकुम्भसन्निभं-हस्तिमस्तकसदृशं यत् कुचद्वन्द्वं-पयोधरद्वन्द्वं तेन उल्लसन्तः-उच्छलन्तो वीचयो याभ्यस्ताः । यासां-पुलिन्दवनितानां नेत्रयोः पक्ष्मान्तरे-नेत्ररोम्णां मध्ये भृङ्गागनाः-भ्रमर्यः हस्ततलेन आहता अपि-अपनीता अपि उन्मीलत्-विकसन्नवं-नूतनं नीलवर्णं यन्नीरजं पद्मं तस्य धिया-बुद्ध्या परितः-समन्तात् भ्राम्यन्ति-सञ्चरन्ति । नेत्ररोम्णां नीलत्वत् कुवलयमिदमिति बुद्ध्या मुग्धत्वात् भृङ्गागनाः परिभ्रमन्तीति भावः ॥ ३८ ॥

**इतोऽप्यवलोकयतु देवः-**

**बालोन्मीलत्कुवलयवनं विस्तरद्गन्धरुद्ध-**
**भ्राम्यद्भृङ्गैरनुकृतपयःपूर्णमेघान्धकारम् ।**
**हर्षात्पश्यत्ययमतितरां तीरचारी मयूरो,**
**मुग्धः पार्श्वे भ्रमति नितरां चक्रवच्चक्रवाकः ॥ ३९ ॥**

**देवः**-नृपः इतोपि-अस्मिन्नपि प्रदेशे अवलोकयतु ।

**बालेति** वृत्तम् । अयं तीरचारी-तटसञ्चरिष्णुर्मयूरः अतितरां-अतिशयेन हर्षात्-प्रमोदात् बालं-नवं उन्मीलद्-विकसद् यत् कुवलयवनं-नीलोत्पलखण्डं तत्पश्यतु[१]-अवलोकयतु[२] । किम्भूतं वनम् ? विस्तरता-प्रसरता गन्धेन-सौरभ्येण रुद्धा-अन्यत्रगमनान्निषिद्धा अतएव भ्राम्यन्तो ये भृङ्गास्तैः कृत्वा अनुकृतः-तुलितः पयःपूर्णमेघोन्धकारश्च येन तत् । मयूरचक्राभ्यामित्यवगम्यन्ते[३] सभृङ्गमिदं वनं न, किन्तु पयःपूर्णो मेघोऽन्धकारश्चेति । तथा तीरचारी मुग्धश्चक्रवाको नितरां-भृशं चक्रवत्-कुलालोपकरणवत् पार्श्वे-वनस्य समीपे भ्रमति । मेघाद्धि मयूरस्य हर्षो भवति, अन्धकाराच्च रात्रिशंकया चक्रवाकस्य भ्रमः ॥ ३९ ॥

**इदं च-**

**कुररभरसहं सहंसमालं मुदितमयूरचकोरचक्रवाकम् ।**
**क इह सुरुचिरं चिरं विलोक्य प्रवरमते रमते नरो न रोधः ॥ ४० ॥**

---

१. पश्यति अनू. । २. अवलोकयति अनू. । ३. अवगम्यते अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हे **देव** ! इदञ्च–

**कुररेति** वृत्तम् । प्रवरा-प्रकृष्टा मतिर्यस्य तस्य सम्बोधने हे प्रवरमत ! इह-नद्यां इदं च रोधः-तटं विलोक्य चिरं-चिरकालं को नरो न रमते-न क्रीडति ? अपितु सर्वोऽपि क्रीडत्येव । किम्भूतं रोधः ? कुरराणां-उत्क्रोशाभिधपक्षिणां भरं-अतिशयं सहते इति कुररभरसहं । तथा सह हंसमालया वर्तत इति सहंसमालं । तथा मुदिताः-हृष्टा मयूराश्च चकोराश्च चक्रवाकाश्च यत्र तत् । यतः सुष्ठु रुचिरं मनोहरम् ॥ ४० ॥

**इतश्च–**

**बककृतनिनदं नदं न दम्भात्कृतसवनं सवनं भजन्त एते ।**
**निरुपमविभवं भवं स्मरन्तः प्रशमधना मुनयो नयोपपन्नाः ॥ ४१ ॥**

**इतश्च**-अस्मिन्प्रदेशे हे देव !

**बकेति** वृत्तम् । प्रशम एव धनं येषां ते प्रशमधना, एते मुनयः निरुपमविभवं-अनुपम-सामर्थ्यं भवं-ईश्वरं स्मरन्तः-ध्यायन्तः, ईदृशं नदं-जलाश्रयविशेषं[1] भजन्ते-सेवन्ते । किम्भूताः ? नयेन-न्यायेन उपपन्नाः-युक्ता नयोपपन्नाः । किम्भूतं नदम् ? बकैः कृतो निनदः-शब्दो यत्र तं । तथा न दम्भात्-न कपटात्, अपितु धर्मवासनया कृतं सवनं-स्नानं यत्र तं । तथा वनै सह युक्तं सवनम् ॥ ४२ ॥

**विधूतपाप्मानः खल्वमी महानुभावाः ।**

**तथाहि–**

**मुहुरधिवसतां सतां मुनीनामपविपदां विपदाङ्कपङ्कभाञ्जि ।**
**तटनिकटवनानि नर्मदायाः कथमिभवन्ति भवन्ति कल्मषाणि ॥४२॥**

**खलु**-निश्चितं अमी महानुभावाः-मुनयो विधूतः-अपाकृतः पाप्मा-पापं यैस्ते विधूतपाप्मानः ।

**तथाहि**-तदेव दर्शयति–

**मुहुरिति** वृत्तम् । नर्मदायास्तटनिकटवनानि-तीरसमीपकाननानि कर्मभूतानि मुहुः-वारम्वारं अधिवसतां[2]-आश्रयतां सतां-विदुषां मुनीनां कथं कल्मषाणि-पापानि भवन्ति ? अपितु न भवन्त्येवेत्यर्थः । किम्भूतानि तटनिकटवनानि ? इभवन्ति-गजवन्ति तथा वीना-

१. जलाधारविशेषं अनू. । २. अधिकवसतां अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पक्षिणां पदं-अङ्को यत्र त१. नयति अनू. ।थोक्तं पङ्कं भजन्ते यानि तानि तथा तानि विपदाङ्कपङ्क-भाञ्जि। किम्भूतानां मुनीनाम् ? अपगता विपयेभ्यस्ताहशम् ॥ ४२ ॥

**इतश्च—**

**क्वचित्प्रवरगैरिकासमसमुल्लसत्पल्लवं,**
**लवङ्गलवलीलतातलचलच्चकोरं क्वचित् ।**
**क्वचिद्गिरिसरित्तटीतरुणविस्फुरत्कन्दलं,**
**दलन्निचुलमञ्जरीमधुनिरुद्धभृङ्गं क्वचित् ॥ ४३ ॥**

**क्वचिच्चटुलकोकिलाकुलितनूतचूताङ्कुरं,**
**कुरङ्गकुलसेवितप्रदल[१]सालमूलं क्वचित् ।**
**क्वचित्प्रवरसंचरत्सुरवधूपदैः पावनं,**
**वनं नयति विक्रियामिह मनो मुनीनामपि ॥ ४४ ॥ युग्मम् ॥**

**इतश्च**-अस्मिंश्च प्रदेशे हे देव !

**क्वचिदिति** । इह-नर्मदायास्तीरे वनं मुनीनामपि मनोविक्रियां नयन्ति[१]-सविकारं कुरुते। अथ वनविशेषणानि, किम्भूतं वनम् ? क्वचित् प्रदेशे प्रवरं गैरिकं-धातुविशेषो यत्र तत्।तथा असमं-अप्रतिमं सर्वोत्कृष्टमिति यावत् । तथा समुल्लसन्तः पल्लवाः-किसलयानि यत्र तत् पश्चाद्यथायुक्तिकर्मधारयः । गैरिकशब्दो नपुंसकः । **प्रवरगैरिकोपमेति** वा पाठः। तथा क्वचित् लवङ्गानि-देवकुसुमद्रुमाः लवलीलताश्च-द्रुविशेषास्तेषां तले चलन्तः-सञ्चरन्तश्चकोरा यत्र तत् । तथा क्वचिद् वनं गिरिसरित्तट्यां -पर्वतनदीतटे तरुणाः-अभिनवोद्गता विस्फुरन्तः-चकचकायमानाः कन्दलाः-प्ररोहा यत्र तत् । तथा क्वचिद्वनं दलन्ती-विकसन्ती या निचुलमञ्जरी तस्या यन्मधुः-मकरन्दस्तेन निरुद्धाः-अन्यत्रगमनान्निवारिताः भृङ्गा यत्र तत् ॥ ४३ ॥

**क्वचिदिति** । तथा क्वचिद्वनं चटुलकोकिलाभिः आकुलिताः-व्याकुलीभूताः सन्तापिताः नूताः-स्तुताश्चूताङ्कुराः-आम्रप्ररोहा यत्र तत् । "**णू स्तवने**, [पा धा. १३९८] निष्ठायां रूपम्"। तथा क्वचिद्वनं कुरङ्गकुलैः सेवितं प्रदलानां-प्रकृष्टपत्राणां शालानां-तरुविशेषाणां मूलं-निकुञ्जो यत्र तत् । "**मूलं पार्श्वाद्ययोरुद्रौ । निकुज्जशफयोः**" इत्**यनेकार्थः** [२/५१८-१९] । तथा क्वचिद्वनं प्रवराः-प्रधानाः सञ्चरन्त्यो याः सुरवध्वस्तासां पदैः-चरणन्यासैः पावनं-पवित्रम् ॥ ४४ ॥ युग्मम् ।

१. नयति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तदिदमद्यतनं[1] दिवस[2]मस्य सैन्यस्याध्वश्रमापनुत्ति[3]निमित्तमधिवसतु देवः ।**

**यत्र—**

**वायुस्कन्धमवष्टभ्य स्फारितैः पुष्पलोचनैः ।**
**वियद्विस्तारमेते हि वीक्षन्त इव पादपाः ॥ ४५ ॥**

**तत्**-तस्माद्धेतोः देवः-नृपः अद्यतनं दिवसं अस्य-सैन्यस्य अध्वनः-मार्गस्य यः श्रमः-खेदस्तस्य या अपनुत्तिः-अपनोदस्तन्निमित्तं इदं वनं अधिवसतु-आश्रयतु । "**उपान्वध्याङ्वसः**" [पा. सू. १/४/४८] इति उपादिपूर्वस्य वसतेराधारस्य कर्मसंज्ञा ।

ननु सैन्यस्य कुतो[1] आवासस्तमाह—**यत्रे**ति ।

**वायु**रिति । हिः-यस्मात् यत्र-वने एते पादपाः, स्कन्धशब्दः संहत्यर्थो सार्थश्च, वायोः स्कन्धमवष्टभ्य-अवलम्ब्य स्फारितैः-विकसितैः पुष्पाण्येव लोचनानि तैः कृत्वा वियद्विस्तारं-नभोविशालत्वं वीक्षन्त इव । अन्योऽपि उच्चैर्यो वीक्षते सोऽपि कस्यचित् स्कन्धमवष्टभ्यैव वीक्षत इति । एतावताऽत्र तरवस्तुङ्गाः पुष्पिताश्च सन्ति अतो निवासास्पदमेतदिति भावः ॥ ४५ ॥

**अपि च येषाम्[4]—**

**स्कन्धशाखान्तरालेषु पश्य जीमूतपङ्क्तयः ।**
**लम्बमाना विलोक्यन्ते चलद्वल्गुलिका[5] इव ॥ ४६ ॥**

**अपि** च-पुनः येषां—

स्कन्धमिति । हे राजन् ! त्वं पश्य । येषां तरूणां शाखान्तरालेषु-शाखाभ्यन्तरेषु जीमूतपंक्तयो लम्बमानाः-अधो दोलायमाना वीक्ष्यन्ते । उत्प्रेक्ष्यते-चलन्त्यो या वल्गुलिकाः-तैलपायिकास्ता इव, ता अपि शाखान्तरालेषु लम्बमाना एव तिष्ठन्तीति तासां भ्रमं कुर्वते मेघपंक्तय इति । मन्ये, एता वल्गुलिका इति ॥ ४६ ॥

**येषां च—**

**उच्चैः शाखाग्रसंलग्ना मन्ये नूनं नगौकसाम् ।[6]**
**कुर्वन्ति पुष्पसंदेहं निशि नक्षत्रपङ्क्तयः ॥ ४७ ॥**

---

१. कुतोऽत्र अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

येषां चेति—

उच्चैरिति । हे देव ! अहमेवं मन्ये-सम्भावयामि नूनं-निश्चितं येषां च तरूणां उच्चैः-ऊर्ध्वं शाखाग्रेषु संलग्नाः-प्राप्ताः निशि-रात्रौ नक्षत्रपंक्तयो नगौकसां नगे-पर्वते ओकः-निवासो येषां ते नगौकसस्तेषां गिरिशिखरनिवासिनां पुरुषाणां पुष्पसन्देहं-कुसुमभ्रान्तिं कुर्वन्ति-जनयन्ति । ते जानन्ति एता नक्षत्रराजयो न भवन्ति, किन्तु पुष्पाण्येव लग्नानि सन्तीति ॥ ४७ ॥

इतश्च—

एतेषु प्रचण्डपवनाहततरुतल[1]गलितसुगन्धिविकच[2]कुसुमप्रकरमकरन्दमापीय[3] पुनः शिखरशाखाभिमुखमुत्पतन्त्यो विभान्ति दुरारोहतया कृताः केनापि निःश्रेणय इव श्रेणयो मधुलिहाम् ।

इतश्च—

निश्चलानां सैन्यभयेन [4]तुङ्गतरुशिखरपञ्जरपुञ्जितगोलाङ्गूलमण्डलानां निर्यन्नवप्ररोहाङ्कुराकाराः कुर्वन्ति वनदेवतानां[5] क्रीडान्दोलनदोलारज्जुशङ्कामधोलम्बिलाङ्गूललतिकाः[6] ।

इतश्च—

चकासत्युड्डीयमानास्तरुशिखर[7]शाखाग्रस्खलनविलग्नग्रहगणविमानपङ्क्तिपताका इव विहंगावलयो[8] ।

इतश्च—

विजृम्भमाण[9]मञ्जरीजालेषु सर्वर्तुविकासिसहकारवनेषु वनदेवताभिरुद्दामदवदहनप्रतीकारार्थमनागतमेव सुगृहीत[10]वारिगर्भाम्भोदपटलमिवा-[11]लोक्यते[12]कोकिलाकुल[13]कदम्बकम् ।

इतश्च—

विकसितसितपुष्पपिण्डपाण्डुरशिखराः[14] सुधाधवलितोर्ध्वभूमयो विलासप्रासादा इव कुसुमसायकस्य जराधवलमौलयः कञ्चुकिन इव

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**वनदेवतानाम् उन्मादयन्ति मनोऽमन्दमुचुकुन्दपादपाः ।**

**तदेवंविधेषून्मिषन्मुकुलविगलितमकरन्द[१५]सीकरासारसुरभितभूतलेषु मुग्धमृगपरिहृतदावानलज्वालायमानोन्मदश[१६]बरसीमन्तिनीचरण-प्रहारविकसिताशोककाननेषु नवजलधरनिकुरम्बकान्तितमालतरुशिरः-[१७] स्थितशब्दानुमेयमाद्यन्मयूरमण्डलेषु मदनालसपुलिन्दराजसुन्दरीशिक्ष्यमाण[१८] नवकपोतकुक्कुटकुक्कुहकलकुहरितेषु[१९] कूजत्कुररपरिवारितसरःपरिसरेषु चलच्चकोरसारसरवरमणीयेषु विहरतु देवः सह सैन्येन नर्मदोर्मिमन्दानिलान्दो-लितलतापल्लवेषु वनेषु ।**

हे देव ! **इतश्च**-अस्मिन्प्रदेशे-**एतेषु** वृक्षेषु मधुलिहां-भ्रमराणां श्रेणयः प्रचण्डपवनेन-वेगवद्वायुना आहताः-कम्पिता ये तरवः-वृक्षास्तेषां तलेषु-अधोभागेषु गलितः-क्षरितो यः सुगन्धीनां सुरभीणां विकचानां-सविकासानां कुसुमानां प्रकरस्य-वृन्दस्य मकरन्दः-मधु तं आपीय-ईषत्पीत्वा, पुनः शिखरशाखाभिमुखं अग्रशाखासम्मुखं उत्पतन्त्यः-उड्डीयमाना विभान्ति-शोभन्ते । उत्प्रेक्ष्यते, केनापि दुरारोहतया-दुःखेन आरोहः-उपरि चटनं येषु ते दुरारोहास्तद्भावस्तया, पादपानामत्युच्चत्वात् तत्र आरोढुं न शक्यते, अतएव निःश्रेणयः-अधिरोहिण्यः कृता इव । मन्ये, उत्पतन्त्य एता अलिपंक्तयो न भवन्ति किन्तु तरुषु आरुहता[१] पुंसा केनापि एता निःश्रेणयः कृताः सन्तीति ।

हे देव ! **इतश्च**-प्रदेशे **सैन्यभयेन** निश्चलानां-निःप्रकम्पानां तुङ्गानि उच्चानि यानि तरुशिखराणि-वृक्षाग्राणि तेषां पञ्जरे-मध्ये पुञ्जिताः-मिलिता ये गोलाङ्गूलाः-कृष्णमुखमर्कटास्तेषां यानि मण्डलानि-समूहास्तेषां अधोलम्बिन्यः-अधोदोलायमाना या लाङ्गूललतिकाः-पुच्छवल्ल्यस्ता वनदेवतानां क्रीडायै-खेलनाय यदन्दोलनं-ऊर्ध्वाध-उत्सर्पणं तदर्थं या दोलारज्जवस्तासां शङ्कां-भ्रमं कुर्वन्ति । ता जानन्ति एता लाङ्गूललता न भवन्ति किन्तु इमा अस्माकं क्रीडनाय दोलारज्जव इति । किम्भूता ? अतिलोमशत्वात् निर्यन्तः-निस्सरन्तो ये नवप्ररोहाङ्कुरास्तेषां आकारः-आकृतिर्यासां ताः । प्ररोहाङ्कुर-योर्लघुगुरुत्वकृतो भेदः ।

हे देव ! **इतश्च**-प्रदेशे उड्डीयमानात्[२] तरुशिखरात् उत्पतन्त्यो विहङ्गावलयः-पक्षिपंक्तयश्चकासति-शोभन्ते । उत्प्रेक्ष्यते, उच्चत्वात् तरुशिखरशाखाग्रेषु यत् स्खलनं-प्रतिघातस्तेन विलग्नाः-आश्लिष्टाः ग्रहाः-मङ्गलादयो गण्यन्ते अष्टाविंशतिसंख्ययेति गणानि अभीच्यादीनि नक्षत्राणि बहुलवचनादल् ग्रहाश्च-गणानि चेति द्वन्द्वस्तेषां, यद्वा ग्रहाः-नक्षत्राणि

१. आरुहतां अनू. । २. उड्डीयमानाः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तेषां गणः-वृन्दं ज्योतिषीभःुडुग्रह इत्युक्तेः, तस्य या विमानपंक्तयस्तासां पताका इव-ध्वजपटा इव । उत्पततां पतत्रिणां तदाकृत्या प्रतिभासात् ।

हे देव ! **इतश्च**-प्रदेशे **विजृम्भाय**माणानि-विकस्वरीभवन्ति मञ्जरीजालानि येषु ईदृशेषु सर्वेषु ऋतुषु विकासीनि-विकसनशीलानि यानि सहकारवनानि तेषु निश्चलं-स्थिरं कोकिलकुलकदम्बकं-पिकान्वयवृन्दं आलोक्यते । कोकिलवृन्दं किमिव ? उत्प्रेक्ष्यते, वनदेवताभिः उद्दामः-उत्कटो यो दवदहनः-दावाग्निस्तस्य प्रतीकारार्थ-शमनाय अनागत-मेव दवोद्भवात् पूर्वमेव सुष्ठु गृहीतं वारिगर्भे-मध्ये यस्येदृशं अम्भोदपटलमिव-जलवृन्दमिव[१] । कृष्णत्वान्निश्चलत्वाच्च पिकानां जलदभ्रान्तिजनकत्वम् ।

**इतश्च**-प्रदेशे **विकसितानि**-विहसितानि यानि सितपुष्पाणि-श्वेतकुसुमानि तेषां पिण्डेन-समवायेन पाण्डुरं शिखरं-अग्रं येषां ते ईदृशाः अमन्दाः-अनल्पा ये मुचुकुन्द-पादपास्ते मन उन्मादयन्ति-उन्मत्तं कुर्वन्ति, सकामं कुर्वन्तीत्यर्थः । उत्प्रेक्ष्यते, कुसुमसायकस्य-कामस्य सुधया-लेपविशेषेण धवलिता ऊर्ध्वभूमिर्येषां ईदृशा विलासार्थ-रमणार्थं प्रासादा इव । सितपुष्पाणां सुधाधवलनमुपमानम् । "**पिण्डो वृन्दे जपापुष्पे गोले बोर्लेगसिल्हयोः कवले**" [२/१२४-२५] इत्य**नेकार्थः** । पुनरुत्प्रेक्ष्यते, वनदेवतानां जरया-विस्रसया धवलः-पलितवान् मौलिः-मस्तकं येषां ते ईदृशाः कञ्चुकिन इव सौविदल्ला इव । सितपुष्पाणां धवलकेशा उपमानम् ।

**तत्** इत्युपसंहारे, तस्मात् **एवंवि**धेषु-एवंप्रकारेषु वनेषु देवः-नृपः सैन्येन सह विहरतु-क्रीडतु । किम्भूतेषु वनेषु ? उन्मिषन्ति-विकसन्ति यानि मुकुलानि-कुड्मलानि अतएव तेभ्यो विगलिताः-क्षरिता ये मकरन्दशीकराः-मधुपृषतास्तेषां य आसारः-वेगवद्वर्षस्तेन सुरभितानि-सुवासितानि भूतलानि येषु तानि । तथा तेषु, मुकुलं-अर्धविकसितं पुष्पं । तथा मुग्धमृगैः परिहृतानि-त्यक्तानि । तथा दावानलज्वालेव आचरन्ति दावानलज्वालायमानानि । तथा उन्मदाः-दृप्ताः याः शबरसीमन्तिन्यस्तासां चरणप्रहारेण-पादाघातेन विकसितानि प्रफुल्लानि ततः कर्मधारयः । ईदृशानि अशोककाननानि येषु तानि तथा तेषु लोहित्यान्मुग्धमृगैर्दावानलभ्रान्त्या कुसुमिताशोककाननानि परिहृतानीति भावः । तथा नवजलधराणां यन्निकुरुम्बं-वृन्दं तद्वत् कृष्णा कान्तिः-छविर्येषामेवंविधा ये तमालतरवस्तेषां शिरसि-अग्रे स्थिताः शब्देन-केकया अनुमेया-अनुमातुं योग्या माद्यन्तः-दृप्यन्तो मयूरा यत्र तेषु, नवमेघाभतमालावलोकनात्ते माद्यन्ति ततः केकायन्ते, ततश्चोभयोरपि नीलवर्णत्वेन विशेषपरिच्छेदाभावात् केकायन्ते-अनुमीयन्ते यथाऽत्र बर्हिणः क्रीडन्तीति । तथा मदनेन-कामेन अलसाः-मन्थरा याः पुलिन्दराजस्य सुन्दर्यस्ताभिः शिक्ष्यमाणा-विनीयमाना ये

१. जतदवृन्दमिव अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नवाः-नूतनाः कपोलाश्च-पारापताः कुक्कुटाश्च-ताम्रचूडाः कुकुहाश्च-पक्षिविशेषास्तेषां कलं-मधुरं कुहरितं-शब्दितं येषु तानि तथा तेषु। "**कुहरितं तु रटिते पि कालापे रतस्वने**" इत्य**नेकार्थः** [४/११०]। तथा कूजन्तः-शब्दायमाना ये कुरराः-पक्षिभेदास्तैः परिवारितः-वेष्टितः सरःपरिसरः-सरसीसमीपं येषु तानि तेषु। तथा चलन्तः-विचरन्तो ये चकोराश्च सारसाश्च तेषां यो रवः-कूजितं तेन रमणीयानि-रम्याणि यानि तानि तथा तेषु। पुनः किम्भूतेषु वनेषु? नर्मदोर्मिभिः-नर्मदावीचिभिर्मन्दाः-तत्संघट्टनादनल्पवेगा ये अनिलाः-वायवस्तैरन्दोलिताः-कम्पिता लतापल्लवा येषु तानि तथा तेषु। एतेन वातानां शैत्यं मान्द्यं च दर्शितं, अतएव च ते ऽध्वश्रमापनयने हेतवोऽपि भवन्तीति।

**राजापि श्रुतशीलेन दर्शितांस्तास्तांनुद्देशानवलोक्य चिन्तितवान्।**

**कृतक्रीडाः क्रोडैर्मदकलकुरङ्गीक्षितमृगाः[१],**
**परिभ्राम्यद्भृङ्गाः परभृतकुलाक्रान्ततरवः।**
**वनोद्देशाः पौष्पैः सुरभितदिगन्ताः परिमलै-**
**र्न चेतः कस्यैते विलसितविकारं विदधति॥ ४८॥**

**राजापि** नलः श्रुतशीलेन मन्त्रिणा दर्शितान् अवलोकितान् तांस्तानुद्देशान्-प्रदेशान् अवलोक्य चिन्तितवान्-विचारितवान्। किं चिन्तितवान् इत्याह—

**कृतेति**। एते वनोद्देशाः-वनप्रदेशाः कस्य चेतः-मनः विलसितः-उल्लसितो विकारः-विक्रिया यत्र ईदृशं न विदधति-न कुर्वन्ति, सर्वस्यापि मनः सविकारं कुर्वन्तीत्यर्थः। किम्भूता वनोद्देशाः? क्रोडैः-वराहैः कृता क्रीडा-केलिर्यत्र ते तथाविधाः। तथा मदकलं-मदेन उन्मत्ततया कलं-मनोज्ञं सकामं यथा भवति तथा कुरङ्गीभिः ईक्षिता मृगा येषु ते तथाविधाः। तथा परितो भ्राम्यन्तः-सञ्चरन्तो भृङ्गा येषु ते तथाविधाः। तथा परभृतकुलेन[१]-पिकवृन्देन आक्रान्ताः-अध्यासितास्तरवो येषु ते तथाविधाः, तथा पौष्पैः-पुष्पसम्बन्धिभिर्परिमलैः-आमोदैः सुरभिताः-सुवासिता दिगन्ताः-दिश एव येषु ते तथा विधाः। अत्र अन्तशब्दः स्वरूपार्थः। "**अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः**"। **अवयवेऽपि**" [२/१५९] इत्य**नेकार्थः**॥ ४८॥

**इतश्च—**

**वीचीनां निचयाः स्पृशन्ति जलदानुद्गन्धिसौगन्धिका-**
**नृत्यत्केकिकदम्बकानि विकसद्वीरुन्धि रोधांसि च।**

---

१. परिभृतकुलेन अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**धत्ते सैकतमुन्न[१]दन्मदकलक्रौञ्चावलीसारसा[२]-**
**नस्याः पद्मपरागपिङ्गपयसः सेव्यं च[३] सिन्धोर्न किम्[४] ॥ ४९ ॥**

**इतश्च**-अस्मिन्प्रदेशे, **वीचीना**मिति । अस्याः-नर्मदाया वीचीनां निचयाः-समूहा जलदान्-मेघान् स्पृशन्ति-आश्लिष्यन्ति उच्चत्वात् । किम्भूताः ? उद्गन्धीनि-उद्गतसुरभिगन्धीनि सौगन्धीनि-सौगन्धिकानि कल्हाराणि येषु ते तथाविधाः । "**उद्गन्धिरिति गन्धस्येदुत्पूतिसु सुरभिभ्यः**" [ ] इतीदन्तः । च-पुनः वीचीनां निचया रोधांसि तटानि स्पृशन्ति । किम्भूतानि रोधांसि ? नृत्यत्-ताण्डवयत् केकिनां कदम्बकं-वृन्दं येषु तानि, तथा विकसन्त्यः-पुष्पन्त्यो वीरुधः-लता येषु तानि । तथा अस्याः-नद्याः सैकतं जलोज्झिततटं[१] क्रौञ्चावल्यश्च सारसाश्च क्रौञ्चावलीसारसाः उन्नदन्तः-उच्चैः कूजन्तो मदेन कला-मनोज्ञा ये क्रौञ्चावलीसारसास्तान् धत्ते-बिभर्त्ति । चकारो वार्थे, वा- अथवा, अस्यां-नद्याः सिन्धोः-नर्मदायाः किं न सेव्यन्ते[२] । अपितु सर्वमपि । किम्भूतायाः सिन्धोः ? पद्मानां परागः-रजस्तेन पिङ्गं -पिञ्जरं पयः-जलं यस्याः सा तस्याः ॥ ४९ ॥

**तदुचितमिहाद्य[५] दिवसमावासं कर्तुम्' इति विचिन्त्य भ्रूकोणसंज्ञाज्ञापितसेनासन्निवेशस्तत्कालमेव 'विरचयत तुरङ्गमन्दुराः[६] सरसदीर्घदूर्वानल[७]नीलनिम्नस्थलीषु, कुरुत कायमानानि, सरित्सेव्यसैकतेषु, उन्नमयत पटकुटीः, कूलकाननेषु आलानयत [८]समदमत्तमतङ्गजान्मदकन्डूलकपोलकाषसहेषु सरलशालसल्लकीसर्जार्जुनस्कन्धेषु, दूरमुत्सारयत शैवलशिलाजालकाष्ठकूटकण्टकपटलानि, समीकुरुत विषमभूभागान्' इति सेनापतिप्रमुखमुखरलोककलकलमुत्तालमुत्थितमसहमानस्तद्विरामावसरं प्रतिपालयन्नेकान्तेऽन्यतमप्रदेशे तस्याः सरितः सूक्ष्ममुक्ताफलक्षोदधवलबालुकापुलिनपृष्ठ एवास्था गोष्ठीं बबन्ध ।**

**तत्**-तस्माद्धेतोः इह प्रदेशे अद्य दिवसमावासं-निवासं कर्त्तुमुचितमिति विचिन्त्य-विचार्य भ्रूकोणेन-भ्रूकोट्या या संज्ञा-प्रयोजनसूचनं तया भ्रूप्रान्तसंकेतेन ज्ञापितः सेनासन्निवेशः-चम्ववस्थानं येन सः, ईदृशो नल इति-अमुना प्रकारेण तत्कालमेव-सेनासन्निवेशसमय एव उत्तालं-शीघ्रं उत्थितं-उच्छलितं सेनापतिप्रमुखाः- चमूपतिप्रभृतयो मुखराः-वाचालाः ये लोकास्तेषां कलकलं-कोलाहलं असह्यमानस्तस्य कोलाहलस्य विरामावसरं-निवृत्तिसमयं प्रतिपालयन्-प्रतीक्षमाणः तस्याः सरितः एकान्ते-विजने अन्यतरप्रदेशे सूक्ष्मः-तनुर्यो मुक्ताफलक्षोदः-मौक्तिकचूर्णं तद्वद्धवला-श्वेता बालुका यत्र

---

१. जलोज्झितं तटं अनू. । २. सेव्यं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ईदृशं यत् पुलिनपृष्ठं तस्मिन्नेव आस्थानगोष्ठीं-सभासंलापं बबन्ध-रचयामास । यावत्सैन्यस्य कोलाहलनिवृत्तिर्न भवति तावदत्रैव विद्वद्गोष्ठीं करिष्याम इति भावः । इतीति किम् ? भो किङ्कराः ? तुरङ्गाणां मन्दुरा-वाजिशाला विरचय-कुरुत । मन्दुरापदेनैव वाजिशालात्वे लब्धे तुरङ्गपदं करिकलभवदुक्तपोषकत्वान्न दुष्टम् । तथा सरसाः-आर्द्राः दीर्घाः-प्रलम्बा या दूर्वाश्च अनन्ता नलाश्च-नड्डास्तैर्नीलाः-नीलवर्णा या निम्नस्थल्यः-नीचैर्भूमयस्तासु कायमानानि-तृणौकांसि कुरुत । कायमानं माहिषादितृणमयावास[1]विशेषः । तथा सरितः-नद्याः सेव्यानि-सेवितुं योग्यानि यानि सैकतानि-जलोज्झिततटानि तेषु पटकुटीः-वस्त्रगृहाणि उन्नमयत-वंशैरुत्तम्भयत । तथा समदाः-सदानाम्बवो मत्ताः-दृप्ता ये मतङ्गजाः-हस्तिनस्तान्, क्वचित् **मदमत्तेति** पाठस्तत्र मदेन-वीर्यविपाकेन मत्ता नत्वौषधादिप्रयोगात् ये मतङ्गजास्तान् कूलकाननेषु-सरित्तटवनेषु मदेन-दानेन कण्डूलयोः-कण्डूयावतोः कपोलयोः-गण्डयोः काषं-कषणं सहन्ति ये ते तथाविधेषु, सल्लक्यश्च-गजप्रियाः सर्जाश्च-सालाः अर्जुनाश्च-कुकुभाख्यद्रुमाः[2] सल्लकीसर्जार्जुनाः, सरलाः-प्रलम्बाः शालाः-स्कन्धाशाखा येषां एवंविधा ये सल्लकीसर्जार्जुनास्तेषां स्कन्धेषु-प्रकाण्डमस्तकेषु आलानयत-बध्नीत । **सरलसालेति** पाठे सरलसालाः-देवदारुतरवः । "**सालः सर्जतरौ वृक्षमात्रप्राकारयोरपि**" **इत्यनेकार्थः** [२/५२७] । कण्डूः खर्जूरस्यास्तीति कण्डूलः, "**सिध्मादित्वात्**"[पा. सू. ५/ /२/९७] मत्वर्थे लप्रत्ययः । तथा शैवलानि-शेवालानि शिलाश्च- दृषदः जालानि च-मर्कटिकाख्यकृमिकृतगृहाणि काष्ठानि च दारुणि कूटञ्च-वप्रं कण्टकानां पटलं च-वृन्दं एतानि दूरं इतः स्थलाद्विप्रकृष्टं देशं उत्सारयत-अपनयत । तथा विषमा निम्नोन्नता ये भूभागाः-भूप्रदेशास्तान् समीकुरुत-समारचयत ।

**अथ नातिदूरे पुरोऽस्य शीतशैवलचक्रवाले चरतश्चक्रवाककदम्बकस्य मध्ये कोऽप्युत्क्षिप्य पक्षपुटम्, उन्नमय्य ग्रीवाग्रम्, अनङ्गपरवशो दूरादुपसर्पन्ननुरागिणीं काञ्चिञ्चक्रवाकीं, दर्शितचाटुचातुर्यश्चक्रवाकयुवा दृष्टिपथमवातरत् ।**

**अपरे च चत्वारो राजहंसास्तामेव चक्रवाकीं कामयमानास्तमापतन्तमन्तरान्तरा[1] निपत्य स्खलयाम्बभूवुः ।**

---

१. रोहिषादि° अनू. । २. ककुभारन्यद्रुमाः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तांश्च विलोक्य[1] राजा विहसन्नासन्नवर्तिनं श्रुतशीलमाबभाषे ।**

**'वयस्य, विलोक्यतामिदमसमञ्जसम् ।**

**अमी राजहंसाः सतीष्वपि स्वजात्युचितानुचरीषु कथमन्यासक्ता-मपीमां चक्रवाककामिनीं कामयन्ते[2] ।**

**न खल्वेषा[3]मियमनङ्गक्रीडा[4]भूमिः । ।**

**अथ**-एकान्ते आस्थानगोष्ठीरचनानन्तरं अस्य नलस्य पुरः-अग्रे नातिदूरे-समीपे शीतं यच्छैवलचक्रवालं-शेवालवृन्दं तस्मिन् चरतः-सञ्चरतः चक्रवाककदम्बकस्य मध्ये कोऽपि चक्रवाकयुवा-तरुणचक्रवाकः पक्षपुटं-पक्षतिद्वन्द्वं उत्क्षिप्य-उच्चैर्विधाय तथा ग्रीवाग्रमुन्नम्य-उच्चैर्दीर्घं कृत्वा अनङ्गेन-कामेन परवशः-पराधीनो अनुरागिणीं-स्वस्मिन्ननुरक्तां काञ्चि-च्चक्रवाकीं प्रति दूरादुपसर्पन्-समीपमागच्छन् दर्शितं चाटु-प्रियप्रायं चातुर्यं-कौशलं येन ईदृग्विधः सन् दृष्टिपथं-दृष्टिमार्गं अवातरत्-अवतीर्णं, दृष्ट इत्यर्थः ।

**अपरे** च चत्वारो राजहंसास्तामेव चक्रवाकीं कामयमानाः-अभिलषन्तः तं-चक्रवाकयुवानं आपतन्तं-आगच्छन्तं अन्तरान्तरा-अन्तरन्तर्निपत्य स्खलयाम्बभूवुः-तत्प्रतिघातं चक्रुः ।

**तांश्च**-राजहंसान् विलोक्य राजा विहसन् आसन्नवर्त्तिनं-निकटस्थितं श्रुतशीलमा-बभाषे-अवदत् ।

हे **वयस्य** ! मित्र ! इदं असमञ्जसं-अन्यायो विलोक्यतां । को अन्यायः । इत्यत्राह–

**अमी** राजहंसाः स्वजातेः-हंसजातेरुचिता योग्या या अनुचर्यः-हंस्यस्तासु सतीष्वपि-विद्यमानास्वपि कथं-इति प्रश्ने अन्यस्मिन् चक्रवाके आसक्तां-बद्धप्रीतिमपि इमां चक्रवाककामिनीं-चक्रवाकीं कामयन्ते-अभिलषन्ति ।

**एषां**-हंसानां इयं-चक्रवाकी न खलु-नैव अनङ्गक्रीडाया भूमिः-स्थानं नात्र एषां सुरतक्रीडा युज्यत इत्यर्थः । एतावता यथा चक्रवाकी चक्रवाकस्य सजातीया एवं मनुष्यजातेर्नलस्य मानुषी दमयन्ती उचिता, यथा हंसानामनुचिता एवं लोकपालानां दमयन्तीति सूचितम् ।

**अथवा–**

**अथवा**-इति पक्षान्तरे

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**किमु कुवलयनेत्राः सन्ति नो नाकनार्य-**
**[१]स्त्रिदशपतिरहल्यां तापसीं यत्सिषेवे ।**
**हृदयतृणकुटीरे दीप्यमाने स्मराग्ना-**
**वुचितमनुचितं वा वेत्ति कः पण्डितोऽपि ॥५०॥**

**किम्विति** । कुवलयनेत्राः-नीलोत्पलोपमलोचना नाकनार्यः-देवाङ्गनाः किमु-किं नो सन्ति-न विद्यन्ते ? यत् त्रिदशपतिः-इन्द्रः अहिल्यां-गौतमजायां तापसीं सिषेवे-भेजे । परं हृदयमेव तृणकुटीरं-तृणाश्रयस्तस्मिन् स्मर एव अग्निस्तस्मिन् दीप्यमाने-ज्वलति सति कः पण्डितोऽपि-विद्वानपि उचितं-इदं योग्यं अनुचितं वा-इदं अयोग्यं इति वेत्ति ? अपितु न कोऽपि । अतएव स्मराकुला अमी अपि स्वानुचितामपि चक्रवाकीं कामयन्त इति, न कामिनां काऽपि असमञ्जसतेति । **"हस्वा कुटी कुटीरं कुटी शुण्डाभ्यां ह्रस्वे रः"** [**कुटीशमीकुण्डाभ्यो** रः पा. सू. ५/३/८८] ॥ ५० ॥

**एवम्वादिनि राजनि, अकस्मात्कोमलकण्ठकुहरप्रेङ्खोलनालंकार-सुन्दरोऽमन्दमूर्छनावच्छिन्नसरसरसस्वरूपः प्रसन्नप्रयुज्यमानतानविशेषा-भिव्यक्तस्पष्टश्रुतिसुभगो गगने गान्धारग्रामगामी गीतध्वनिरुदचरत् ।**

**अवाच्च[२] चलदलिपटलपीयमानापूर्वपरिमलोद्गारिपारिजातमञ्ज-रीमकरन्दबिन्दुवर्षवाही वायुः ।**

**एवं**-अमुना प्रकारेण वदतीत्येवंशील, एवंवादी तस्मिन् एवम्वादिनि राजनि-नले सति अकस्मात्-अकाण्ड एव गगने-व्योम्नि गान्धार एव ग्रामः-ग्रामविशेषस्तं गच्छति-प्राप्नोतीति गान्धारग्रामगामी गीतध्वनिरुदचरत्-उच्चचार, ऊर्ध्वं जगामेत्यर्थः । *उदश्चरः सकर्मकात् उत्पूर्वाच्चरतेः सकर्मकात् तङानौ स्तः, धर्ममुच्चरते उत्क्रम्य यातीत्यर्थः, सकर्मकात् किं धूम उच्चरति ऊर्ध्वं गच्छतीत्यर्थः ।* **"गान्धारो रागसिन्दूरस्वरेषु नीवृदन्तरे"** **इत्यनेकार्थः** [३/५८५] । **"ग्रामो वृन्दे शब्दादिपूर्वके षड्जादौ संवसथेच"** [ ] इति। **गान्धारगामी**ति पाठान्तरम् । किम्भूतः ? कोमलं-मृदु कण्ठकुहरे-गलनाले यत् प्रेङ्खोलनं-घोलनं तदेवालङ्कारस्तेन सुन्दरः-मनोज्ञः, तथा अमन्दाः-अनल्पा या मूर्छनाः-षड्जगान्धारमध्यमप्रभृतिस्वरेषु एकस्मात् स्वरात् स्वरान्तरगमनरूपाः स्वरसारणास्ताभिरवच्छिन्नाः-क्रोडीकृताः सरसाः-मधुरा ये स्वराः-षड्जादयः सप्त

★-★ चिह्नान्तर्गतपाठोनास्ति अनू. ।

तत्स्वरूप:-तदात्मक:, तथा प्रसन्ना:-विशदा: प्रयुज्यमाना:-क्रियमाणा ये तान-विशेषास्तैरभिव्यक्ता:-प्रकटाः स्पष्टा:-अहीना या श्रुतय:-द्वाविंशतिप्रभेदा: सङ्गीतशास्त्रे[1] प्रसिद्धास्ताभि: सुभग:-अभिराम: । तथा चोक्तम्-

**सप्त स्वरास्त्रयो ग्रामाः मूर्छनास्त्वेकविंशतिः ।**
**ताना एकोनपञ्चाशदेतद् गेयस्य लक्षणम् ॥ २ [ ]**

स्वरा:-षड्जऋषभगान्धारमध्यमपञ्चमधैवतनिषधा: सप्त । षड्जऋषभौ द्वौ ग्रामौ गान्धारश्च । अस्य तु स्वरूपं स्वर्गादेव ज्ञातुं शक्यते, तत्स्थत्वात् ।

**च**-पुनरेवम्विधो वायुरवात्-वाति स्म । किम्भूत: ? चलत्-सञ्चरद् यदलिपटलं-भ्रमरवृन्दं तेन पीयमाना:-चुम्ब्यमाना अपूर्वपरिमलोद्गारिण:-अद्भुतामोदप्रवर्तका ये पारिजातमञ्जरीणां कल्पतरुमञ्जरीणां मकरन्दबिन्दव:-रसकणास्तेषां वर्ष-वर्षणं सेचनं वहतीत्येवंशील:, मकरन्दबिन्दुभिर्भुवं सिञ्चन्नित्यर्थ: ।

**अथ[1] कौतुकोत्तानिताननेन नरपतिनाप्यदृश्यत, शातकुम्भ-[2]भङ्गपिशङ्गप्रभामण्डलमध्यवर्तिन: प्रधानपुरुषस्याग्रे गृहीतजात्यजाम्बूनददीर्घदण्ड: कुण्डलालंकारवानुन्मिषन्मन्दारमुकुलमालामण्डितमौलिरवतरन्नम्बरान्निर्निमेष: सुवेश: पुरुष: ।**

**अवतीर्य च सोऽतिविस्मयविस्फारितलोचन[3]मवनिपालमवादीत् ।**

**'निषधेश्वर, त्वरितमुत्तिष्ठ । अर्घाय सज्जो भव ।**

**अथ**-दिव्यध्वनेरुच्चारादेवम्विधवायोश्च वानात् अनन्तरं कौतुकेन उत्तानितं-उच्चैर्विहितं आननं-मुखं येन एवंविधेन नरपतिनापि-नलेनापि अम्बरात् अवतरन् निर्निमेष:-अक्षिसंकोचरहित: सुवेष:-शोभनाकल्प: पुरुष: अदृश्यत-दृष्ट: । किम्भूत: ? शातकुम्भं-स्वर्णं तस्य यो भङ्ग:-विच्छेदस्तद्वत् पिशङ्गं-पिङ्गलं यत्प्रभामण्डलं-कान्तिवृन्दं तस्य मध्ये वर्तितुं शीलं यस्य स तथाविधस्य, प्रधानपुरुषस्य अग्रे गृहीत:-धृतो जात्यजाम्बूनदस्य-शुद्धस्वर्णस्य दीर्घ:-प्रलम्बो दण्ड:-यष्टिर्येन स:, तथा कुण्डलालङ्कारवान्-कुण्डलालङ्कृतगण्ड:, तथा उन्मिषन्ती-विकसन्ती या मन्दारमुकुलमाला-कल्पतरुकुड्मलस्रक् तथा मण्डित:-विभूषितो मौलि:-मस्तकं यस्य स: ।

**अवतीर्य** च स-पुरुष: अतिविस्मयेन-अत्याश्चर्येण विस्फारिते-विकासिते लोचने येन तं अवनिपालं-नलमवादीत् ।

---

१. शास्त्र° अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हे **निषधेश्वर** !-नल ! त्वरितं-शीघ्रं उत्तिष्ठ-उत्थानं कुरु । अर्घाय-पूजाविधये सज्जो भव ।

**किं न पश्यसि—**

**अवतरति घृताचीस्कन्धविन्यस्तहस्तः,**
**श्रुतिसुखकृतगीते किंनरे दत्तकर्णः ।**
**किमपि सपरिरम्भं रम्भयारभ्यमाण-**
**व्यजनविधिरधीशः स्वर्गिणामेष देवः ॥५१॥**

**किं न** पश्यसि-नावलोकयसि ?

**अवतरेति** । एष स्वर्गिणां देवानामधीशः-स्वामीरेव-पुरन्दरः अवतरति । किम्भूतः ? घृताच्याः-इन्द्राण्याः स्कन्धे अंशे लीलया विन्यस्तः-दत्तो हस्तो येन सः । तथा श्रुतीकर्णौ सुखयतीति श्रुतिसुखं-श्रवणसुखकारि "**पचाद्यच्**" [ ], एवम्विधं कृतं गीतं-गानं येन स तस्मिन्, किन्नरे दत्तौ कर्णौ येन सः, तथा किमपि-कथञ्चित् सपरिरम्भं-सालिङ्गनं यथा भवति तथा रम्भया-अप्सरो विशेषेण आरभ्यमाणः-क्रियमाणो व्यजनविधिः-वीजनप्रकारो यस्य सः ॥ ५१ ॥

**अपि च[१]—**

**विरचितपरिवेषाः स्वामिरङ्गप्रभाभि-**
**भुवनवह[२]नभारोद्धारधुर्यांसपीठाः ।**
**उरसि परिविलोलद्दी[३]र्घदामान एते,**
**यमवरुणकुबेराः स्वामिनो लोकपालाः ॥ ५२ ॥**

**अपि च**-पुनः—

**विरचितेति** । एते यमवरुणकुबेराः स्वामिनः-अधीशा लोकपाला अवतरन्तीति गम्यते । किम्भूताः ? स्वाभिः-स्वीयाभिः अङ्गप्रभाभिः-देहकान्तिभिः विरचितः-कृतः परिवेषः-परिवेष्टनं[१] येषां ते, कान्तिकलापकलिता इत्यर्थः । तथा भुवनस्य-जगतो यद्वहनं-निर्वाहस्तदेव भारस्तस्य उद्धारे-उद्धरणे धुर्य इव धौरेय इव अंसपीठं-स्कन्धकूटं येषां ते तथाविधाः, यथा धुर्येण भार उद्ध्रियते तथा यैर्जगत्पालनादिभारः स्वस्कन्धपीठे व्यूढोस्ति । तथा उरसि- हृदये परिविलोलद्-दोलायमानं दीर्घं प्रलम्बं दाम-माला येषां ते तथाविधाः ॥ ५२ ॥

---

१. परितो वेष्टनं. अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

राजा तु तदाकर्ण्य ससंभ्रमोत्थानवशवल्गितोत्तरीयाञ्चल-स्खलत्कनककंकणरणत्कारमुखरितमाधाय मूर्ध्नि संपुटित[१]पाणिपल्लव-युगलमाश्चर्यरसरभसोच्छ्वास्यमान[२]सर्वाङ्गपुलकः कतिपयपदान्यभि[३]मुखः परिजनेन सहो[४]च्चलितवान् ।

**राजा** तु-नलः तद्देवोक्तमाकर्ण्य-श्रुत्वा सम्भ्रमः-भयादिभिश्चित्तव्याक्षेपात् त्वरणं तेन सहितं सादरं वा यथा भवति तथा यदुत्थानं तद्वशात्-तन्निमित्ताद् वल्गितः-उच्छलितो य उत्तरीयाञ्चलः-वैकक्षपटप्रान्तस्तेन स्खलद् यत्कनककङ्कणं-स्वर्णकटकं अतएव तस्य यो रणत्कारस्तेन मुखरितं-वाचालितं एवंविधं सम्पुटितं-मीलितं यत्पाणिपल्लवयुगलं तन्मूर्ध्नि आधाय-संस्थाप्य आश्चर्यरसस्य-अद्भुतरसविशेषस्य यो रभसः-वेगस्तेन उच्छ्वास्यमानाः-उल्लास्यमानाः सर्वाङ्गे पुलकाः-रोमाञ्चा यस्य स एवम्विधः सन् परिजनेन-परिवारेण सह कतिपयपदानि अभिमुखः-पुरन्दरादीनां सम्मुख उच्चलितवान्-जगाम । "**सम्भ्रमो भीतौ संवेगादरयोरपि**" इत्य**नेकार्थ** [३/५०४] । "**रभसो वेगहर्षयोः**" [३/७९५] इत्य**नेकार्थः** ।

अथ सकलसुरशिरःशेखरायमाणचरण[५]रेणुरनेकनाकि[६]कामिनीकुच-कुम्भकुङ्कुममञ्जरीमुद्राङ्कितविपुलवक्षःस्थलीदृश्यमानमहानीलमणि-मण्डननिभ[७]भव्यवृत्रशस्त्रव्रणः, श्रवणशिखरारोपितप्रत्यग्रपारिजातमञ्जरी-गलद्बहलकिंजल्ककणानुपान्ते गायतस्तुम्बुरोः[८] साक्षादमृताय-मानगीतरसतुषारानिव परिपूर्णकर्णोद्गीर्णान्कपोलपालिलग्नानुद्वहन्, अनवरतशचीचुम्बनसंक्रान्तताम्बूललाञ्छनायमानाच्छाच्छ[९]हरिचन्दन-निरुद्धबन्धुरस्कन्धसंधिः, अन्धक इव हारयष्ट्यास्फालितवक्षःस्थलः, विन्ध्यगिरिरिव सहस्राक्षः, पन्नगेन्द्र इव कुण्डली पातालमुद्धासमानश्च, कलिकालशापावतीर्णसरस्वतीगीतप्रवाह इव मत्तमातङ्गगामी, दिशि दिशि विकीर्णकनककपिशांशुरंशुमानिवाविकृतपद्मरागारुणप्रभामण्डलमण्डनः, सह लोकपालैर्भगवा[१०]न्पुरंदरः पूर्वदिग्भागाम्बरादवातरत् ।

**अथ**-अनन्तरं लोकपालैः- यमादिभिः सह भगवान् पुरन्दरः-इन्द्रः पूर्वदिग्भागा-म्बरात्-पूर्वदिग्भागव्योम्नः अवातरदित्यन्वयः । किम्भूतः शक्रः ? सकलसुराणां शिरस्सु शेखरायमाणः-अवतंसोपमः चरणरेणुर्यस्य सः, सर्वैरपि सुरैर्यत्पादौ नम्येते इत्यर्थः । तथा अनेका या नाकिकामिन्यः-अप्सरसस्तासां कुचकुम्भयोर्या कुङ्कुममञ्जरीघुसृणपङ्कस्तस्या

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आलिङ्गनात् या मुद्रा-लाञ्छनं तया अङ्किता-चिह्निता विपुला-विशाला या वक्षःस्थली तस्यां दृश्यमानः-ईक्ष्यमाणो महानीलमणिमण्डननिभः-इन्द्रनीलरत्नालङ्कारसदृशो भव्यः-सुन्दरो वृत्रस्य-दैत्यविशेषस्य शस्त्रव्रणः-शस्त्रकृतं यस्य सः, वीराणां हि वपुरग्रभागे शत्रुशस्त्रव्रणोऽलङ्कारायते, अतएव वक्षो व्रणस्य भव्यत्वमुक्तम् । तथा श्रवणशिखरे आरोपिताः-न्यस्ता प्रत्यग्राः-नवोत्पन्ना या पारिजातमञ्जरी तस्या गलन्तः-क्षरन्तो बहलाः-निविडा ये किञ्जल्ककणाः-केसरलवास्तान् उद्वहत्-बिभ्रत् । उत्प्रेक्ष्यते, परिपूर्णौ-समन्ताद्भृतौ यौ कर्णौ श्रवसी अतएव ताभ्यां उद्‌गीर्णान् अधिकत्वान्निःसृतान् कपोलपाली-गण्डपर्यन्तौ आमर्यादीकृत्य आकपोलपालिकपोलपर्यन्तं यावत् लग्नान् उपान्ते-श्रवःसमीपे गायतस्तुम्बुरोः-देवगायनस्य साक्षात्-प्रत्यक्षं अमृतायमाना-अमृतमिव आचरन्तो ये गीतरसतुषाराः- गानरसजलकणास्तानिव मन्ये, अमूनि कल्पतरुमञ्जरीकिञ्जल्कानि न भवन्ति किन्तु तुम्बुरोर्गायतो गीतरसतुषारा एव कर्णयोरमान्तः-सन्तो निर्गताः कपोलयोर्लग्नाः सन्तीति । तथा अनवरतं-निरन्तरं यच्छच्याः-घृताच्याश्चुम्बनं तेन संक्रान्तं-लग्नं यत्ताम्बूलं तस्य लाञ्छनमिव-लक्ष्मेव आचरत् रक्तत्वाद् यत् अच्छाच्छहरिचन्दनं-अतिशयेन स्वच्छगोशीर्षद्रवस्तेन निरुद्धः-लिप्तो बन्धुरः-रम्यः स्कन्धयोर्सन्धिर्यस्य स । तथा हारयष्ट्या-मुक्तालतया आस्फालितं-चलनवशादास्फोटितं वक्षःस्थलं यस्य सः । क इव ? अन्धक इव-दैत्यविशेष इव ? स च किम्भूतः ? हरस्येयं हारी-यष्टिः शूललक्षणा तथा आस्फालितं-आहतं वक्षःस्थलं यस्य सः । तथा सहस्रं अक्षीणि यस्य स सहस्राक्षः "**समासान्तोऽच्**" [ ] । क इव ? विन्ध्यगिरिरिव । स च किम्भूतः ? सहस्रं-बहवो अक्षाः-बिभीतका यस्मिन् स तथा, सहस्रशब्दः-प्राचुर्यवचनः । तथा कुण्डलीकर्णालङ्कारवान् तथा पाताः-रक्षिता तथा अलं-अत्यर्थं उद्भासमानश्च-रोचमानः । क इव ? पन्नगेन्द्र इव-शेष इव । स च किम्भूतः ? कुण्डली-कुण्डलाकारो अस्ति अस्येति कुण्डली, तथा पाताले मुत् पातालमुत् तया भासमानः-दीप्यमानः पातालवासित्वात् । तथा मत्तमातङ्गः-औचित्यादैरावणस्तेन गच्छतीत्येवंशीलो मत्तमातङ्गगामी । क इव ? कलिकाले-कलियुगे शापेन-दधीचिमुनेः आक्रोशेन-अवतीर्णा-आयाता या सरस्वती-वाग्देवी तस्या गीतप्रवाह इव-गाननैरन्वर्थ्यमिव । स च किम्भूतः ? मत्तमातङ्गः-क्षीबचाण्डालस्तस्मिन् गच्छतीत्येवंशीलो मत्तमातङ्गगामी । किल पुराणादौ श्रूयते—पुरा सरस्वतीदधीच्योर्देवत्वविषये संवादे जायमाने क्रुद्धेन दधीचिना शप्ता सती सरस्वती कलिकाले चाण्डालकुलेऽवततार । अतएव कलिकाले चाण्डाला एव मधुरं गायन्तीति । तथा दिशि दिशि-सर्वासु दिक्षु विकीर्णाः-विक्षिप्ताः कनकवत् कपिशाः-पिङ्गलवर्णा अंशवः-किरणा येन सः, तथा आविष्कृतं-प्रकटितं पद्मरागस्य-लोहितमणेर्यत् अरुणं-लोहितं प्रभामण्डलं-कान्तिवृन्दं तदेव मण्डनं यस्य सः । क इव ? अंशुमान इव-रविरिव । स च किम्भूतः ? आविष्कृतो यः पद्मानां रागः-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रक्तता तथा अरुणस्य-सारथेर्या प्रभा-कान्तिः तथा मण्डलं-बिम्बं ततो द्वन्द्वः, एतानि मण्डनं-अलङ्करणं यस्य सः ।

**अवतीर्य चक्षुषां सहस्त्रेणोन्मीलन्नीरजवनानुकारिणा निरूप्य पादयोः पुरः पतितमष्टाङ्गाश्लिष्टभूतलमिमम्, ऐरावतकुम्भकूटास्फालनकर्कशाङ्गुलिना, दुर्दान्तदैत्यदानववधूवैधव्यदानशालामूलस्तम्भेन, शचीकुचकलशसंस्पर्शसंक्रान्तकुङ्कुमपत्रवल्लीकेन, दक्षिणपाणिना, सहेलमुन्नमय्य मूर्ध्नि पस्पर्श ।**

**कृत्वा च कुशलप्रश्नालापव्यतिकरानुच्चैः[१] काञ्चनासनसमुल्ल[२]सन्मणिमयूखमञ्जरीजालजटिलमवनिभुजा [३]स्वहस्तापनीतमध्यतिष्ठत् ।**

**चोपविष्टेषु[४] यथोचितासनमासन्नेषु[५] यमवरुणकुबेरप्रमुखेषु देवेषु क्रमेण कृतोचिताचारः[६] पुरः पृथ्वीपृष्ठ एव विनयान्निषद्य[७] निषधेश्वरः पुरंदरमवादीत् ।**

**अथ अम्बरादवतीर्य**-उत्तीर्य पुरन्दरः उन्मीलद्-विकसत् नीलं-नीलवर्णं यन्नीरजवनं-कमलखण्डं तत् अनुकरोतीत्येवंशीलं नीलकमलखण्डतुल्यं तेन चक्षुषां सहस्रेण पादयोः पुरः-अग्रे पतितं अष्टभिरङ्गैः-शिरोनासाकूर्प्परजानुपादद्वयरूपैः श्लिष्टं-आश्लिष्टं भूमितलं येन स तथा इमं-नलं निरूप्य-अवलोक्य, एवम्विधेन दक्षिणपाणिना-अपसव्यहस्तेन सहेलं-सविलासं यथा भवति तथा उन्नमय्य-उच्चैः कृत्वा मूर्ध्नि-शिरसि पस्पर्श-परामृशत् । किम्भूतेन दक्षिणपाणिना ? ऐरावतकुम्भकूटस्य-ऐरावणकुम्भस्थलस्य यत् आस्फालनं-तत्प्रोत्साहनाय ताडनं तेन कर्कशाः-कठोरस्पर्शा अङ्गुलयो यस्य स तेन । तथा दुर्दान्ताः-उत्कटास्तथा दितेरपत्यानि दैत्या एवम्विधा ये दानवाः-असुरास्तेषां या वध्वस्तासां वैधव्यरूपं यद्दानं तस्य या शाला तस्या मूलस्तम्भ इव-मूलस्थूणेव यः स तेन । यथा दानशालामूलस्तम्भेन ध्रियते तथा येन स्वपाणिना तद्वधूवैधव्यदानशाला अध्रियत, स्वकरेण दानवानां हननात् तासां वैधव्यदत्तमित्यर्थः । दैत्येति "**दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः**" [पा. सू.४/१/८५] इति प्राग्दीव्यतीयार्थेषु ण्यः। अत्र पदसंस्कारपक्षाश्रयणाद्-दैत्यपदस्य विशेषणत्वं बोद्धव्यं, अन्यथा **असुरादिति दनुजाः** [२/१५२] इत्य**भिधान कोष**प्रामाण्यात् उभयोः पर्यायरूपत्वेनैकत्रयुगपदुपन्यासेऽन्यतरस्य वैयर्थ्यमापद्येत । तथा

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शच्याः-इन्द्राण्याः कुचकलशयोर्यः संस्पर्शः-संघट्टनं तेन संक्रान्ता-प्रतिबिम्बिता कुङ्कुमपत्रवल्ली-घुसृणपत्रलता यस्मिन् स तेन। "**बहुव्रीहौ कः**" [ ]।

च-पुनः कुशलप्रश्नालापस्य यो व्यतिकरः-सम्पर्कः भवतां कुशलमित्येवंरूपस्तं कृत्वा अवनिभुजा-नलेन स्वहस्ताभ्यामुपनीतं दत्तं उच्चैः-उत्कृष्टं काञ्चनासनं-सौवर्णपीठमध्यतिष्ठत्-अशिश्रयत्। किम्भूतं काञ्चनासनम्? उल्लसन्ती-निर्गच्छन्ती या मणिमयूखमञ्जरी-रत्नकिरणमञ्जरी तस्या यज्जालं-वृन्दं तेन जटिलं-व्याप्तम्।

**च**-पुनः यमवरुणकुबेरप्रमुखेषु देवेषु यथोचितासनं-यथायोग्यपीठं आसन्नेषु इन्द्रस्य निकटेषु उपविष्टेषु सत्सु क्रमेण-यथा ज्येष्ठादिपरिपाट्या कृत उचितः-योग्य आचारः-पादधावनादिर्येन सः, एवम्विधो निषधेश्वरः-नलः पुरस्तेषामेव अग्रे विनयात् पृथिवीपृष्ठे एव-भूतले[१] एव निषद्य-उपविश्य पुरन्दरं-इन्द्रमवादीत्।

**दिष्ट्या दिवौकसां नाथ जातो युष्मत्समागमात्।**
**आकल्पं कीर्तनीयानां श्रेयसामस्मि भाजनम्॥ ५३॥**

**दिष्ट्येति**। हे दिवौकसां नाथ!-शक्र! युष्माकं समागमात्-आगमनात् अस्मि-अहं दिष्ट्या-आनन्देन आकल्पं-आयुगान्तं कीर्त्तनीयानां-प्रशस्यानां[२] श्रेयसां-कल्याणानां भाजनं-आश्रयो जातः। "**दिष्टिरानन्दे माने च**" [२/९३] इत्य**नेकार्थः**। अस्मीति अव्ययमहमर्थे[३] ॥५३॥

**अपि च–**

**इष्ट्वा क्रतून्युगशतानि तपश्चरित्वा,**
**वाञ्छन्ति संगमसुखं मुनयोऽपि येषाम्।**
**तेषामनुग्रहकृतां स्वयमेत्य[१] मेऽद्य,**
**युष्माकमादिशत किं प्रियमाचरामि॥ ५४॥**

**अपि च**-पुनः

**इष्ट्वेति**। हे भगवन्! येषां-भवतां मुनयोऽपि क्रतून्-यागान् इष्ट्वा यागान् विधायेत्यर्थः। यथा[४] युगशतानि तपश्चरित्वा-तपोविधाय संगमः-संयोग एव सुखं तद् वाञ्छन्ति-ईहन्ते। अद्य-स्वयमेत्य-आगत्य न तु यागादिप्रेरणया मे-मम अनुग्रहं-प्रसादं कुर्वन्तीति अनुग्रहकृतस्तथाविधानां तेषां युष्माकं किं प्रियं-इष्टं आचरामि-करोमि,

१. भूतल अनू.। २. प्रशंस्यानां अनू.। ३. अहमित्यर्थे अनू.। ४. तथा अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यूयमादिशत आज्ञापयत । अन्येषां हि यूयं बहुभिर्यागादिभिः कृतैर्दर्शनं दध्वे मम तु तदभावेऽपि दर्शनमदध्वं । ततो वदत किमिष्टं करोमीति भावः ॥ ५४ ॥

**इति प्रकाशितप्रश्नालापे[१] पार्थिवपुंगवे पुरंदरो दरदलितकुन्दकलिकाकान्तदन्तद्युतिद्योतिताधरदलमीषद्विहस्य लीलावलितकंधरः कुबेरमुखमवलोकयांचकार ।**

**सोऽपि 'निषधेश्वर, श्रूयतामस्मदागमनकारणम् ।**

**'अस्ति विदर्भाधिपतेर्भीमभूमिपालस्य सुता सुतारनयननिर्जितेन्दीवरा वरार्थिनी निजकान्तितिरस्कृत[२]त्रिदिवनारीरूपसंपत्तिः कुन्ददन्ती दमयन्ती नाम ।**

**तस्याश्च[३] चम्पकदलावदातदेहायाः किल स्वयंवरमहोत्सवः सांप्रतं प्रस्तुतः' इति नारदादधिगम्य वयमपि विदर्भाधिपतिपुरं[४] प्रस्थिताः ।**

**किंतु पुरुषं लघयति स्वमुखेनार्थिभावो यतस्तत्र गत्वापि दमयन्तीं किं ब्रूमो वयमिन्द्रादयो [५]लोकपालास्त्वामर्थयामह इत्यसदृशं महिम्नोऽस्मद्विधेषु[६], स्पृहणीयरूपासि कं नोत्सुकयसी[७]त्यनुचितमपरिचितेषु चाटुचातुर्यम्, अजरसः खल्वमरा वयमिति ग्राम्यः स्वप्रशंसोप्रकमः[८], प्राप्नुहि त्रयाणामपि लोकानामाधिपत्यमस्मत्संगमादिति महत्प्रागल्भ्यप्रलोभनम्[९], अल्पायुषो मानुषा[१०]स्तदस्माकं देवानां मध्ये कंचिद्[११]वृणीष्वेति पापीयः परदोषोदाहरणद्वारेणाभ्यर्थनम् ।**

**पार्थिवपुङ्गवे**-नले इति-अमुना प्रकारेण प्रकाशितः-[१] प्रकटितः प्रश्नालापः किं प्रियमाचरामीत्येवंरूपो येन स तथाविधे सति पुरन्दरः-शक्रो दरः-ईषत् दलिता-विकसिता या कुन्दकलिका कुन्दः-पुष्पविशेषस्तस्य कलिका-कोरकस्तद्वत् कान्ता- श्वेता या दन्तद्युतिः-दशनदीधितिस्तया द्योतितं-प्रकाशितं[२] अधरदलं यस्मिन् कर्मण्येवं यथा भवति तथा ईषद्विहस्य-स्मितं विधाय लीलया-विलासेन वलिता-परिवर्तिता वक्रीकृता कन्धरा-ग्रीवा येन ईदृग्विध सन् कुबेरमुखं आलोचयाञ्चकार-ददर्श । दरेत्यव्ययमीषदर्थे ।

---

१-२. प्रकासितः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शक्रेणावलोकितः सन् **सोऽपि**-कुबेर इत्यभिधाय उक्त्वा व्यरंसीत्-विरराम, तूष्णीमस्थात् । ईतीति किम् ? हे निषधेश्वर !-नल ! अस्माकं यदागमनं तस्य कारणं-निमित्तं श्रूयतां-आकर्ण्यतां-त्वयेति विशेषः ।[१] आगमनकारणमेवाह—

**विदर्भाधिपतेः**-भीमभूपालस्य सुता दमयन्ती नामेति प्रसिद्धा अस्ति । किम्भूता ? सुताराभ्यां-शोभनकनीनिकाभ्यां नयनाभ्यां निर्जितं इन्दीवरं यया सा । तथा वरं- वरयितारं अर्थयते-अभिलषतीत्येवंशीला या सा वरार्थिनी । तथा निजकान्त्या आत्मशरीरशोभया तिरस्कृता-निर्जिता-त्रिदिवनारीणां-अप्सरसां रूपसम्पत्तिः-सौन्दर्यसम्पद् यया सा तथा कुन्दवत् दन्ता यस्याः सा कुन्ददन्ती । "**स्त्रियां संज्ञायाम्**" [पा. सू.५/४/१४३] इति दत्रादेशः नासिकोदरोष्ठेत्यादिना नदादित्वादीः ।

**तस्याश्च** चम्पकदलवत्-चम्पकपत्रवत् अवदातः-विमलो मनोज्ञो वा देहो यस्याः सा तस्याः-गौराङ्ग्याः दमयन्त्याः, किलेति वार्त्तायां स्वयम्वरमहोत्सवः साम्प्रतं प्रस्तुत इति नारदात् अधिगम्य-ज्ञात्वा वयमपि विदर्भाधिपतेः-भीमस्य पुरं प्रति प्रस्थिताः । "**अवदातं तु विमले मनोज्ञेप्सितपोतयोः**" [४/९६] इत्**यनेकार्थः** ।

तर्हि भवद्भिरेव किमिति तत्र न गम्यते ?

तत्राह—

**किन्त्विति** । स्वमुखेन-निजवक्त्रेण अर्थिभावः-याचकत्वं यतः पुरुषं लघयति-लघुं करोति-हीनी करोति, यदा स्वमुखेनैव याच्यते तदा गुरोरपि लाघवं स्यात् । लघयतीति "**तत्करोति तदाचष्टे**" [पा. गण. चुरादि.] इति णिच् । पुनस्तत्रागमने हेत्वन्तरमाह-तत्रेति । तत्र गत्वापि दमयन्तीं प्रति किं ब्रूमः-किं वदामः ? वयं इन्द्रादयो लोकपालाः त्वां दमयन्तीं अर्थयामह इति अस्मत्विधेषु-अस्मत्सदृक्षेषु महिम्नः-अनुभावस्य असदृशं-अतुल्यं, एतदर्थनम-स्मन्महिमाया अनुचितमित्यर्थः । अथ स्पृहणीयं-अभिलषणीयं रूपं यस्याः सा एवंविधा त्वं कं नोत्सुकयसि-नोत्सुकं कुरुषे, इति अपरिचितेषु-असंस्तुतेषु चाटुचातुर्यं-प्रियवचनकौशलं अनुचितं, परिचितानामेव पुरश्चाटु-चातुर्यं दर्श्यते नापरिचितानाम् । अथ खलु-निश्चितं वयं अमराः अजरसः-जरया रहिता, जराराहित्यं स्त्रीणां प्रलोभकमिति वचनात्, इति स्वप्रशंसायाः-स्वीयवर्णनायाः प्रक्रमः-अवसरो ग्राम्यः-अनुचितः । "**प्रक्रमोऽवसरे क्रमे**" [३/४९८] इत्**यनेकार्थः** । अथ त्रयाणामपि लोकानां-स्वर्गमर्त्यपातालानां आधिपत्यं ऐश्वर्यमाप्नुहि, अस्मत्सङ्गमात् इति महता प्रागल्भ्येन-उत्साहेन प्रलोभनं-विमोहनं । "**लुभ विमोहने**" [पा. धा. १३०६] । अथ अल्पायुषाः-अल्पजीवितधारिणो मानुषास्तत्तस्माद्धेतोः

१. शेषः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अस्माकं देवानां मध्ये कञ्चित्[१]-कमपि वृणीष्वेति पापीयः-अतिशयेन पापं-अनिष्टं परदोषाणां यदुदाहरणं-कथनं यथा अल्पायुषा नरा इत्येवंरूपं तस्य द्वारेण-मुखेन अभ्यर्थनं-यदस्मान् वृणीष्वेत्येवंरूपम् ।

**अतो[१] देशकालकार्योक्तिकुशलस्त्वमुच्यसे । गच्छाग्रे, भव दूतो देवानामशेषवैदग्ध्यविशेषोक्तिकोविदः[२] किमन्यदिह शिक्ष्यसे, तैस्तै-रुपायैः, ताभिस्ताभिः कलाभिः, तैस्तैः प्रलोभनप्रकारैः, क्रियतां देव-कार्यम्, आर्याणां प्रायः[३] परोपकारकरणार्थमेव जन्म च जीवितं च, न च भवन्तमस्मदनुभावादन्यः कोऽपि कन्यान्तःपुरे रहस्यमपि वर्त्तमानां विदर्भेश्वरसुतामुपसर्पन्तमुपलक्षिष्यते[४] इत्यभिधाय व्यरंसीत् ।**

**अतो**[२] अस्माकं कथनविधेरभावो अतोऽस्माद्धेतोः अस्माभिर्यस्मिन् देशे यस्मिन्काले यस्मिंश्च कार्ये या उक्तिः-कथनं तस्यां कुशलः-दक्षस्त्वमुच्यसे-कथ्यसे । यथा अग्रे गच्छ-पुरो याहि, अशेषं-समस्तं यद् वैदग्ध्यं-चातुर्यं तस्य ये विशेषाः-परमार्थास्तेषां या उक्तयः-वचनानि तत्र कोविदः-पण्डितस्त्वं देवानां दूतो भव । अन्यत्-अपरं इह दूत्ये किं शिक्ष्यसे-किं विनीयसे ? तैस्तैः-अद्भुतैरुपायैः, ताभिस्ताभिः कलाभिः, तैस्तैः प्रलोभनप्रकारैः अस्मासु गार्द्ध्यजनकविधिभिर्देवकार्यं क्रियताम् । यतः- प्रायः-बाहुल्येन आर्याणां-सतां परोपकरणार्थमेव-परहितविधानार्थमेव जन्म च जीवितञ्च-प्राणधारणं "**आर्यो सज्जनसौविदौ**" **इत्यनेकार्थः** [२/३४९] । तर्हि मया तत्र कन्यान्तःपुरे कथं गंस्यते ? इत्यत आह—न चेति। न च अस्मदनुभावात्-अस्मत्प्रभावादन्यः कोऽपि मनुष्यः कन्यान्तःपुरे रहस्यपि-एकान्तेपि वर्त्तमानां-विद्यमानां विदर्भेश्वरसुतां दमयन्तीं प्रति उपसर्पन्तं-समीपे गच्छन्तं भवन्तं त्वां उपलक्षिष्यते-ज्ञास्यते । एतावता तत्र गतस्य तव दूत्यं सुखेन साध्यं भविष्यतीति ।[३]

**नलोऽप्येतदाकर्ण्य तदिदं संकटम् 'इतो व्याघ्र इतो दुस्तटी[५], इतो दावाग्नि[६]रितो दस्यवः, इतो दुष्टदन्दशुक इतोऽप्यन्धकूपः' इति न्यायात्। इतः कर्णान्ताकृष्टशरासनो[७] मर्मप्रहारी प्रहरति मकरध्वज इतश्चायमेतेषा[८]मलङ्घनीय आदेशः[९] । तत्र जानीमः किमत्रोत्तरम् । एक-त्रार्थेऽस्माकं भवतां च प्रवृत्तिरिति प्रणयप्रार्थनाभङ्गकारिणी विहतविनया प्रतिकूलोक्तिः, अनभिज्ञोऽस्मि दूतोक्तीनामिति शाठ्यम्, असमर्थोऽस्मि संदिग्धक्रियाकारितायामित्याज्ञालङ्घनम्, आज्ञालङ्घनं[१] च सेतुबन्धनमिव**

१. नास्ति अनू. । २. यतो अनू. । ३. भविष्यन्तीति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**स्खलयति श्रेयःस्त्रोतांसि[११] षण्ढमुख[१२]दर्शनमिव वर्धयत्यलक्ष्मीम्, रजस्वलाभिगमनमिव हरत्यायुः, इत्यनेकविधमवधार्य न नाम दुरधिगमाः केऽपि पदार्थास्तत्रभवतामशेषजगदीश्वराणाम्, न च न जानीथ ममापि प्रसिद्धमध्यवसायम्, एवं स्थितेऽप्येष वः करोम्यादेशम्, आदिष्टपरामर्शो न श्रेयानादेशकारिणः, किं तु बलीयान्परतो विधिः प्रमाणम्' इत्यभिधाय भक्त्या भयेन च देवानां दौत्यादेशं समर्थितवान् ।**

**स्थित्वा च [१३]किंचित्क्षणमुचितालापलीलया कृत्वा च कांश्चिदन्योन्यप्रस्तुतप्रियव्यवहारान्, आपृच्छ्य, यथागतं गतेष्वथ तेषु देवेषु[१४] निषधेश्वरश्चिरं चिन्तयांचकार ।**

**अथ नलोऽपि** एतत्-कुबेरोक्तं आकर्ण्य-चिन्तितवान् । तदिदं संकटं-सम्बाधं आपतितं । इतः-अस्मिन् प्रदेशे व्याघ्रः, इतो दुस्तटी-भ्रश्यत्प्रदेशत्वात् दुष्टतटिनीतटं । इतो दावाग्निः-दावानलः, इतो दस्यवः-चौराः । इतो दुष्टो दन्दशूकः-सर्पः, इतोऽपि अन्धकूपः-सान्धकारोऽन्धुः । इति न्यायात्-इति निदर्शनेन । इतः कर्णान्तं यावदाकृष्टं शरासनं-धनुर्येन ईदृशो मर्मप्रहारी-अरुन्तुदो मकरध्वजः-कामः प्रहरति । शरा अस्यन्ते-क्षिप्यन्ते अनेनेति शरासनं-धनुः । इतश्च एतेषां-देवानामयमादेशः अलङ्घनीयः-दुर्ल्लंघ्यस्तन्न जानीमः, किमत उत्तरं-प्रतिवचः । एकत्रार्थे-दमयन्तीवरणलक्षणे एकस्मिन्नेवार्थे अस्माकं भवता च प्रवृत्तिरिति प्रणयप्रार्थनायाः-स्नेहयाञ्चायाः भङ्गं करोतीत्येवंशीला विहतः-[१] निरस्तो विनयो यया सा एवंविधा प्रतिकूलोक्तिः-प्रतिकूलकथनं यदैवमुच्यते,[२] तदा एभिः स्नेहेन या प्रार्थना कृता सा भग्नैव विनयोप्यपास्त एव । अथ दूतोक्तीनां-दूतवचनपद्धतीनां अनभिज्ञः-अचतुरः, दौतीयवचनानि वक्तुं न जानामीति शाठ्यं धूर्तता, जानन्नपि अजानोस्मीत्युक्तौ हि स्पष्टा धूर्तता । अथ सन्दिग्धक्रियायां-दमयन्ती भवतः परिणेष्यति न वा इति संशयितविधौ या कारिता भवतां तां लम्भयिष्यामीति निश्चयकरणशीलता तस्यां असमर्थोस्मि-अप्रभुरस्मि, विवाहलक्षणं सन्दिग्धं, कार्यं कर्त्तुं न शक्नोमीति आज्ञालंघनं, अस्माकमिदं कार्यं कुरु इत्येवंरूपादेशप्रतिषेधनं । आज्ञालंघनं च सेतुबन्धनमिव-पालिकरणमिव श्रेयांस्येव स्त्रोतांसि जलप्रवाहास्तानि स्खलयति-प्रतिघातयति, यथा आगच्छत् स्रोतः सेतुबन्धनेन प्रतिषिध्यते । तथा महतामाज्ञालंघनं आगच्छत् श्रेयः प्रतिघातयतीति । तथा आज्ञालंघनम् षण्ढस्य-नपुंसकस्य यन्मुखदर्शनं-वक्त्रावलोकनं तदिव अलक्ष्मीं-अश्रियं वर्द्धयति, यथा षण्ढ-मुखदर्शनादलक्ष्मीर्जायते तथाऽऽज्ञालंघनादपि । तथा आज्ञालंघनं रजस्वलायां-पुष्पवत्यां

१. विहितः अनू. । २. यदानीमेवं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदभिगमनं-विषयोपभोगासेवनं, गमनं हि लोके परिभोग एवोच्यते, तदिव आयुः-जीवितं हरति, यथोदक्यागमनादायुः क्षीयते तथा आज्ञालंघनादपि । इति-अमुना प्रकारेण अनेकविधं-अनेकप्रकारं अवधार्य-मनसि आकलय्य इति अभिधाय य-उक्त्वा स-नलः भक्त्या भयेन च देवानां दूत्यादेशं-दूतकर्मकरणाज्ञां समर्थितवान् -अङ्गीकृतवान् । दूतस्य कर्म दूत्यं दूतवणिग्भ्यां च यः । इतीति किम् ? नामेति, नामेति अभ्युपगमे, अशेषजगतां-समस्तभुवनानामीश्वराः- अशेषजगदीश्वरास्तेषां तत्र भवतां-पूज्यानां न केपि पदार्था दुरधिगमाः-दुर्ज्ञेयाः, अशेषभुवनाधिपत्वात् । ममापि प्रसिद्धं-प्रकटमध्यवसायं-मनोवृत्तिं न जानीथ-न वित्थ ? इति न च अयमपि परिणयनार्थमेव प्रवृत्त इत्येवं मम मनोवृत्तिमपि अवगच्छथ । एवं स्थितेऽपि एष-अहं वः-युष्माकं आदेशं करोमि **"वर्त्तमानसामीप्ये वर्त्तमानवद्वा"** [पा. सू. ३/३/१३१] इति वचनात् भविष्यति वर्त्तमाना करिष्यामीत्यर्थः । यस्मात् आदेशकारिणः-आज्ञाकरणशीलस्य पुरुषस्य आदिष्टस्य-आज्ञापितस्य वस्तुनः परामर्शः करोमि, न करोमीत्येवंरूपो विचारो न श्रेयान्, किन्तु अविमर्शं कर्त्तव्यमेवेत्यर्थः । यत उक्तम्-**"आज्ञा गुरूणां ह्यविचारणीया"** [ ] इति । किन्तु परतः-पश्चात् बलयान् विधिरेव-दैवमेव प्रमाणं, मया तु भवदादेश करिष्यते, परं पश्चाद् विधिः किं विधास्यतीति न जानामि । चः-अथार्थः ।

अथ **उचितालापलीलया**-योग्याभाषणविलासेन किञ्चित्क्षणं-कियन्तं कालं स्थित्वा, तथा कांश्चित् अन्योन्यं-परस्परं प्रस्तुताः-प्रकृता ये प्रियव्यवहाराः-इष्टव्यापारा उचित-प्रतिपत्तिरूपास्तान् कृत्वा च । अथ आपृच्छ्य-नलं पृष्ट्वा यथागतं-यथायातं गतेषु तेषु-पुरन्दरप्रमुखेषु देवेषु निषधेश्वरः-नलश्चिन्तयाञ्चकार-विचारितवान् ।

किं चिन्तितवान् ? इत्याह—

**तदिदम्, अनुच्छ्वासविरामं मरणम्, अमोहं मूर्च्छनम्, अरोगमङ्ग-व्यथनम्, अशल्यप्रवेशमन्तःशूलम्, अदारिद्र्यो[1] निद्राविघातः ।**

**किमन्यत्—**

**तस्यामाकर्णितानुरागायां यन्ममाद्य दीर्घदौर्जन्य[2]दोहदिना दैवेनाक-स्मिकमौत्सुक्यानुरागव्यवसायं वन्ध्यमध्यवसितं कर्तुम् ।**

**इदानीं किमत्र श्रेयो यस्माद्, अनुपयोगं गमनम्, अश्लाध्यं[3] निवर्तनम्, अपार्थकमासनम्, असाधीयानध्यवसायः ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तदिद**मित्यादि । तत् इदं-दूत्यं अनुच्छ्वासविरामं-उच्छ्वासनिवृत्तिं विना मरणं, अन्यस्मिन् मरणे उच्छ्वासनिवृत्तिर्भवति, अत्र तु न तथेति । तथा अमोहं-मोहं वैचित्यं विना मूर्छनं, अन्यन्मूर्छनं समोहं भवति इदं च तदभावेपि । तथा अरोगं-रोगं विना अङ्गव्यथनं-तनुपीडनं, अन्यदङ्गव्यथनं रोगाद् भवेत्, इदञ्च तदभावेपि । तथा अशल्यप्रवेशं-शल्यप्रवेशं विनाऽपि अन्तःशूलं- अङ्गमध्यवर्त्तिशूलाख्यं अस्त्रं, शल्यप्रवेशे हि अङ्गमध्ये शूलं भवत्येव, परमत्र शल्यप्रवेशाभावेपि इदं अन्तःशूलमिति । यद्वा, शूलाख्यो रोगः । "**शूलं रुगस्त्रयोः**" इत्य**नेकार्थः** [२/५२६] । तथा अदारिद्र्यः-दारिद्र्यं विनापि निद्राव्याघातः । अन्यो हि निद्राव्याघातो दारिद्र्येण भवति अत्र तु तदभावेपि ।

**अन्यत्** किं-अपरं किम् ?

**यत्** आकर्णितः-श्रुतः अनुरागः-मयि प्रेमबन्धो यस्याः सा तथाविधायां तस्यां-दमयन्त्यां विषये दीर्घ-चिरकालस्थायि यद् दौर्जन्यं-दौरात्म्यं तस्य दोहदं-श्रद्धा वाञ्छा यस्य तत् तेन दैवेन-विधिना मम अद्य आकस्मिकं-अकस्माद्भवं औत्सुक्यानुरागव्यवसायं-औत्सुक्येन-उत्कण्ठया यो दमयन्त्यां अनुरागव्यवसायः-प्रेमबन्धोद्यमस्तं वन्ध्यं-निष्फलं कर्तुं अध्यवसितं-अध्यवसायः कृतः । एषामेतस्यामभिलाषे ममोद्यमस्तु निःफल एव जात इत्यर्थः ।

**इदानीं** किमत्र श्रेयः । यद् यस्माद्धेतोरस्मात्प्रदेशात् गमनं तत्र यानं अनुपयोगं-निः-प्रयोजनं, तान् मुक्त्वा न मां अङ्गीकरिष्यतीति । तर्हि पश्चान्निवर्त्ते ? तत्राह-अश्लाघ्यं-अप्रशस्यं[१] निवर्तनं, निवर्तनेन लोके अयशो भविष्यतीति । तर्हि अत्रैव तिष्ठामि ? इत्य-त्राह-आसनं-अत्रैवावस्थानं अपार्थकं-निरर्थकं । तर्हि अत्रैव म्रिये ? इत्यत्राह-अयं अध्यवसायः-मरणाभिप्रायः असाधीयान्-न सुन्दरः ।

**इति चिन्ताकुले नले मनाङ्[१]मूकीभूतेष्वासन्नवर्तिषु परिजनेषु प्रणयात्प्रावरणप्रान्तप्रच्छादित[२]वदनभागं किमप्यासन्नमुपसृत्य शनैस्त-त्कालयोग्यालापैरनुशीलयञ्शीलज्ञः श्रुतशीलो नलमाबभाषे ।**

**इति**-अमुना प्रकारेण नले चिन्ताकुले सति तथा आसन्नवर्तिषु-निकटस्थितेषु परिजनेषु मनाक्-ईषत् मूकीभूतेषु अवदत्सु सत्सु शीलं-साधुवृत्तं जानातीति शीलज्ञः श्रुतशीलः प्रावरणप्रान्तेन-उत्तरीयपटाञ्चलेन प्रच्छादितः-आवृतो वदनभागः-वक्त्रदेशो यस्य स, तथाविधं नलं किमपि-स्तोकं आसन्नं-समीपमुपसृत्य-आगत्य शनैः-मन्दं मन्दं तत्काले-

१. न नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्मिन् विषादावसरे योग्या ये आलापास्तैरनुशीलयन्-प्रसादयन् सन् प्रणयात्-स्नेहेन आबभाषे-उवाच।

किमवादीत्? इत्याह—

**'देव, जानामि देवस्य देहं दहति दहन इव दारुणो[१] दौत्य[२]-चिन्ताभारः। को नाम सामान्योऽपि स्वयमभिलषिते[३]ऽर्थे दूतत्वदा[४]सभाव-मङ्गीकुर्यात्। विशेषतोऽनुरागिण्यङ्गनाजने। तथापि किं न जानाति देवो, यथा याचको ब्राह्मण इव निर्वेदः कस्य संतोषाय, विषवैद्य इव विषादः संदेहकारी शरीरस्य, भीमाभिमन्युनिरुद्धं कुरुबलमिव मनो महान्तं संतापमनुभवेत्[५]।**

**तदलमनेन वातूलीभ्रमेणेव मीलयता चक्षुरुद्वेगेन।**

देवेति। हे देव!-नृप! अहं जानामि-वेद्मि यत् देवस्य देहं दारुणः-उग्रो दूत्यचिन्ताभारो दहन इव-अग्निरिव दहति-भस्मीकरोति। नामेति सम्भाव्यते, कः पुमान् सामान्येपि-अविशिष्टेपि स्वयं-आत्मनाऽभिलषिते[ऽर्थे]-वाञ्छितार्थे[१] दूतरूपं- दासभावं अङ्गीकुर्यात्? अपि तु न कोपि कुर्यात्, विशेषतोऽनुरागिणि स्वस्मिन्ननुरक्ते अङ्गनाजने को दूतदासत्वं यथा स त्वां वाञ्छन्तीत्येवंरूपं दूतकर्म विदधीत। तथापि देवः-नृपः किं न जानाति? अपि तु जानात्येव। यथा निर्वेदः- खेदः कस्य सन्तोषाय भवति? अपि तु न कस्यापि। क इव? याचको ब्राह्मण इव। यथा अर्थो द्विजो निर्वेदः-वेदरहितः कस्य सन्तोषकृत्? अपि तु न कस्यापि। तथा विषादः-अतीतशोचनं शरीरस्य सन्देहं करोतीत्येवंशीलः सन्देहकारी, विषादपन्नः प्राणी शरीरमपि त्यजेत् इत्यर्थः। क इव? विषवैद्य इव। स च विषं-कालकूटमादयतीति, विषादः शरीरस्य सन्देहं करोत्येव, कदाचिद्विषादिनः शरीरं त्याजयत्येवेत्यर्थः। तथा भीमः-रौद्रो यो अभितो मन्युः-दैन्यं तेन निरुद्धं-व्याप्तं मनो महान्तं सन्तापं अनुभवेत्। किमिव? कुरुबलमिव-कुरुक्षत्रियसैन्यमिव, तदपि भीमेन मध्यमपाण्डवेन अभिमन्युना च-अर्जुनसुतेन निरुद्धं सत् महान्तं सन्तापं अनुबभूव।

**तदि**त्युपसंहारे, तस्मात् अनेन उद्वेगेन-दुःखेन अलं-पर्याप्तं उद्वेगं मा कुरु इत्यर्थः। किम्भूतेन? चक्षुः-नेत्रं मीलयता-संकोचयता। केनेव? वातुलीभ्रमेणेव-वात समूहभ्रान्त्येव। तेनापि किम्भूतेन? चक्षुर्मीलयता तथा उत्-ऊर्ध्वं वेगो यस्य स तेन।

---

१. वांछितेऽर्थे अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किं च[१] देवेन न श्रुतम्, अमृतमथनावसरे सुरासुरकरपरिवर्त्यमानमन्दरमन्थाननिर्घोषबधिरित[२]समस्तरोदःकंदरादिवापि दूरोच्छलितदुग्धतुषारासारतारकितनभसः, समुत्पन्नानेककौस्तुभादिवस्तुविस्तारादुद्गच्छदप्सरोमुखमण्डलैः क्षणमिव विहितविकचनलिना[३]खण्डशोभाद्, अनेकाश्चर्यकुक्षेः क्षीरसागरादजनि [४]जनितजगद्विस्मया स्मरजननी हस्तस्थिततरुणारविन्दा देवी देदीप्यमानपुण्यलक्ष्मा लक्ष्मीः।

यस्याः सर्वाङ्गलावण्यमधुविकचलोचनचषकैरापीय पीयूषजुषो मदनमदपरवशा[५]: परस्परमेवेर्ष्यन्तश्चक्रुश्चक्रपाणिना समं सङ्गरम्।

अथ[६] सा सर्वानप्यन्तरान्तरापततस्तानुल्लङ्घ्य मन्दरगिरिशिखरशातकुम्भनिकषोपलायित[७]बाहोर्भगवत[८]श्चिक्षेप क्षेपीयः कण्ठे वैकुण्ठस्य स्वयंवरकुसुममालाम्[९]।

एवं साऽपि[१०] कदाचिच्चम्पककलिकाकलापगौराङ्गी रागिणी त्वयि वञ्चयिष्यति देवान्। वञ्चितो यतः पूर्वमात्मुखमण्डलश्रिया शशी, तिरस्कृतो मदनः सौभाग्येन। असकृत्प्रनृत्तायाश्च[११] किमवगुण्ठनेन। विधेरिव वामभुवा[१२]मचिन्त्यानि चरितानि भवन्ति।

**किञ्च**-पुनः देवेन-राज्ञा न श्रुतम्? अमृतमथनावसरे अमृताय-पीयूषार्थं यन्मथनं तस्यावसरे-समये एवम्विधात् क्षीरसागरात् जनितः-कृतो जगति विस्मयः-आश्चर्यं यया सा, तथा स्मरस्य जननीमाता, तथा हस्ते स्थितं तरुणं-नवं अरविन्दं पद्मं यस्याः सा हस्तस्थिततरुणारविन्दा, तथा देदीप्यमानानि पुण्यानि-पवित्राणि लक्ष्माणि-चिह्नानि यस्याः सा एवम्विधा लक्ष्मीः-देवी-अजनि-जाता। किम्भूतात् क्षीरसागरात्? सुरासुरैः करैः कृत्वा परिवर्त्यमानः-परिभ्रम्यमाणो यो मन्दर एव-मेरुरेव मन्थानः-मन्थदण्डकः तस्य यो निर्घोषः-स्वनः तेन बधिरितः[१]- श्रवणापटूकृतः समस्तो रोदः कन्दरः-दिवस्पृथिवीदरी येन स तस्मात्, यत् स्वनाद् अन्यत्र किमपि श्रूयत इत्यर्थः। तथा दिवापि-दिनेपि दूरं-अतिशयेन उच्छलिताः-निःसृता ये दुग्धतुषाराः-पयःकणास्तेषां य आसारः-वेगवद्वर्षस्तेन तारकितं-तारका जाता अस्मिन्निति तारकितं नभो यस्मात् स तस्मात्। "**तारकादिभ्य इतच्**"[**तदस्य सञ्जातं तारकादिभ्य इतच्** पा. सू. ५/२/३६] तथा समुत्पन्नः-जातः अनेकः कौस्तुभादिवस्तूनां विस्तारो यस्मात् स तथा तस्मात्। तथा उद्गच्छन्त्यः-तन्मथनान्निः-

१. बधरितः अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सरन्त्यो यो अप्सरसस्तासां मुखमण्डलैः क्षणमिव क्षणमेकं यावत् विहिता विकचनलिनखण्डस्य -सविकासपद्मवनस्य शोभा यस्मिन् स तस्मात्, मन्ये आसां मुखमण्डलानि न भवन्ति किन्तु अमूनि सविकासानि कमलानीति । तथा अनेकाश्चर्याणां कुक्षिरिव-उदरमिव यः सः तथा तस्मात्, यथा कुक्षेः सन्तानोपत्तिस्तथाऽस्मादनेकान्यद्भुतानि उद्भूतानि । इति ।

**यस्याः**-लक्ष्म्याः पीयूषं-अमृतं जुषन्ते-सेवन्त इति पीयूषजुषः-देवाः सर्वाङ्गाणां-सर्वशरीरावयवानां यल्लावण्यं-नयनलेह्यं सौन्दर्यं तदेव मधुः- मद्यं तत् विकचानि-सविकासानि यानि लोचनानि तान्येव चषकाणि-मद्यपात्राणि तैरापीय-पीत्वा, तल्लावण्यं दृष्ट्वेत्यर्थः । चषकैरेव मधु पीयत इति छायार्थः । मदनमदेन-कामोन्मत्ततया परवशाः-परतन्त्राः सन्तः परस्परमेव-अन्योन्यमेव ईर्ष्यन्तः-एको ब्रूते अहमेनां परिणेष्यामि, अन्यो ब्रूते अहं, इत्येवं क्रुध्यन्तः चक्रपाणिना-विष्णुना समं सङ्गरं-रणं चक्रुः-कुर्वन्ति स्म ।

**अथ**-अनन्तरं सा-लक्ष्मीः सर्वानपि अन्तरान्तरा-अन्तरन्तः आपततः-परिणयनार्थमागच्छतस्तान्-देवान् उल्लंध्य अतिक्रम्य मन्दरगिरिशिखरस्य यच्छातकुम्भं-स्वर्णं तस्य निकषोपलौ इव-कषपट्टपाषाणौ इव आचरन्त्यै[१] बाहू-भुजौ यस्य स तस्य । कृष्णाभत्वात् भुजयोर्निकषोपलोपमानम् । मथनावसरे मेरोः बाहुभ्यां संघर्षश्च भवेदेव । भगवतो वैकुण्ठस्य-हरेः कण्ठे क्षेपीयः-अतिशयेन क्षिप्रं-शीघ्रं स्वयम्वरस्य-स्वत एव वरणस्य या कुसुममाला तां चिक्षेप -न्यधात् ।

**एव**मिति । यथा श्रीरन्यान्-देवान् परित्यज्य विष्णुमेव उपायत-परिणीतवती[२] तथा साऽपि चम्पककलिकाकलापवद् गौरं- पीतं अङ्गं यस्याः सा, तथाविधा दमयन्ती त्वयि रागिणी-अनुरक्ता सती देवान् वञ्चयिष्यति । यतः-यस्मात् कारणात् अनया पूर्वमपि आत्ममुखमण्डलस्य याः श्रीः-शोभा तया शशी देवो वञ्चितः-तिरस्कृतः । तथा अनया सौभाग्येन-सौन्दर्येण मदनः-स्मरो देवस्तिरस्कृतः । असकृत्-पुनः-पुनः प्रनृत्तायाः-नर्तितुं प्रवृत्तायाश्च नर्त्तक्याः किं अवगुण्ठनेन-कौसुम्भवस्त्रेण[३] नीरंग्या घुंघटकरणेन ?[४] तथा तया[५] पूर्वमेव देवा वञ्चितास्तद्धेषां वञ्चने का तस्यास्त्रपेति भावः । अथवा वामभ्रुवां-रमणीनां विधेरिव-ब्रह्मण इव अचिन्तनीयानि-कलयितुमशक्यानि चरितानि-वृत्तानि भवन्ति ।

**किमु न स्मरति देवो दिवि विश्रुत[१]मर्थसारं स्वर्लोकादवतीर्य पुरा गीतं गन्धर्वगायनै[२]र्गीतगोष्ठीस्थितस्याग्रे युगलमिदमार्याया देवस्य[३] ।**

**किम्विति** । पुरा-पूर्वं गन्धर्वगायनैः-देवगायनैः स्वर्लोकात्-स्वर्गादवतीर्य दिवि-आकाशे गीतं-रागवत् ध्वनिनोच्चरितं गीतगोष्ठ्यां-गानपर्षदि स्थितस्य देवस्य-नृपस्य अग्रे विश्रुतं-

---

१. आचरन्तौ अनू. । २. परिणीतवती नास्ति अनू. । ३. कौसुम्भवस्त्रेण नास्ति अनू. । ४. घुंघुटकरणेन अनू. । ५. अनया अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विख्यातम् । तथा अर्थेन-तात्पर्येण सारं-प्रधानं इदं आर्यायाः-छन्दोविशेषस्य युगलं देवः किमु-किं न स्मरति ? तदेव आर्यायुगलमाह—

**क्वचिदपि कार्यारम्भेऽकल्पः कल्याणभाजनं भवति ।**
**न तु पुनरधिकविषादान्मन्दीकृतपौरुषः पुरुषः ॥ ५५ ॥**

**अपहस्तियान्तरायानर्थानुररीकृतान्प्रसाधयतः ।**
**विधिरपि बिभेति तस्मान्निरतिशयं साहसं यस्य ॥ ५६ ॥**

**क्वचिद**पीति । क्वचिदपि-कस्मिंश्चिदपि कार्यारम्भे-कार्यप्रवृतौ अकल्पः-अनिर्विण्णः पुमान् कल्याणभाजनं भवति । यो हि कार्यं कुर्वन् न निर्विद्यते स श्रेयःपात्रं भवति । तु पुनरिति शब्दो सम्भूयवाचकत्वात् पुनरर्थमेव द्योतयतः । पुनः-अधिकविषादात् मन्दीकृतं-अल्पीकृतं पौरुषं-विक्रमो येन, एवंविधः पुरुषः अल्पोद्यमः कल्याणभाजनं न । पुरुषाणां कर्म पौरुषं "**युवादित्वादण्**" [**हायनान्तयुवादिभ्योऽण्** पा. सू. ५/१/१३०] ॥५५॥

**अपेति** ? यस्य पुंसो निरतिशयं-सर्वाधिकं साहसं धाष्टर्यं तस्मात् पुंसो विधिरपि-वेधा अपि बिभेति । किम्भूतात् तस्मात् ? अपहस्तिता-दूरीकृता अन्तरायाः-विघ्ना येषु तान् तथाविधान् उररीकृतान् अङ्गीकृतान् अर्थात्-कार्याणि प्रसाधयतः-निष्पादयतः । एतावता धैर्यं बिभृहि, येन भवतोप्यर्थसिद्धिर्भवेदिति द्योतितम् । "**साहसं तु दमे दुष्करकर्मणि अविमृशाकृतौ धाष्टर्ये**" [३/८०१-८०२] इत्य**नेकार्थः** ॥ ५६ ॥

**एवमनेकधा प्रस्तुतपुराणपुरुषाख्यानप्रपञ्चक्रमेणा[१]तिक्रान्ते भूम्नि दिवसे मङ्गलोद्‌गार इव वाञ्छितार्थसिद्धेः, तर्जनहुंकार इवान्तरायाणाम्, ओंकार इवोत्साहस्मृतेः, पुण्याहध्वनि[२]रिव हृदयप्रसादप्रासादस्य, पुनर्नवी-कृतानुरागस्तम्भोत्तम्भनस्य तस्य[३] नरपतेः शिश्राय[४] श्रुतिं श्रुतशीलेन श्रावितमिममेवार्थं समर्थयन्निव मध्याह्नशङ्खध्वनिः[५] ।**

**एवं**-अमुना प्रकारेण अनेकधा प्रस्तुतानि-प्रकृतानि यानि पुराणपुरुषाख्यानानि-चिरन्तनपुरुषकथानकानि तेषां यः प्रपञ्चः-विस्तारस्तस्य क्रमेण-कथनपरिपाट्या भूम्नि-भावप्रत्यया विवक्षया बहौ-बहुले दिवसे अतिक्रान्ते-व्यतीते सति, यद्वा दिवस इति दिवसविषये भूम्नि-बहुत्वे अतिक्रान्ते सति, स्तोके दिने अवशिष्टे सतीत्यर्थः । बहोर्भावो भूमा, "**बहोर्लोपो** भू च **बहोः** [पा. सू. ६/४/१५८] इति बहोर्भूरादेशः इमन् प्रत्ययश्च

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भावार्थः । मध्याह्नशङ्खध्वनिर्नरपतेः-नलस्य श्रुतिं-कर्णं शिश्राय-श्रुत इत्यर्थः । किंभूतो मध्याह्नशङ्खध्वनिः ? वाञ्छितार्थस्य-दमयन्तीप्राप्तिलक्षणस्य सिद्धेः-निष्पत्तेर्मङ्गलोद्गार इव-मङ्गलवाक्योच्चार इव, यथा मङ्गलवाक्योच्चारे वाञ्छितार्थसिद्धिस्तथाऽनेनापि । तथा अन्तरायाणां-विघ्नानां तर्जनाय हुङ्कार इव-निषेधमन्त्राक्षरमिव, यथा हे अन्तरायाः ! यूयं दूरे यातेति । तथा उत्साहस्य-उद्यमस्य स्मृतेः-स्मरणस्य ओङ्कार इव-प्रणवाक्षरमिव, अनेन श्रुतेन पुनरप्युत्साहः सञ्जात इत्यर्थः, यद्वा उत्साह एव स्मृतिशास्त्रविशेषस्तस्य ओंकार इव। तथा पुनर्नवीकृतं-पुनरुत्पादितं अनुराग एव-प्रेमबन्ध एव स्तम्भः-स्थूणस्तेन[1] उत्तम्भनं-ऊर्ध्वं नयनं यस्य, एवंविधस्य हृदयप्रसाद एव-चेतः प्रसन्नतैव प्रासादस्तस्य पुण्यध्वनिरिव-पुण्यं च तत् अहश्च पुण्याहं "**पुण्यसुदिनाभ्यामह्नः**" [पा. वा, तत्पु.] ★सुदिनशब्दः शोभावाची यथा सुदिना सुप्रभास्विति★, क्लीबतेष्टा, तस्य ध्वनिरिव । अद्य[३] पुण्यदिनं विद्यते हृदयप्रसादप्रासाद उद्ध्रियतामिति शङ्खध्वनिना निवेद्यत इति भावः । यद्वा, 'पुण्याहं पुण्याहं प्रीयन्तां प्रीयन्तां' इत्यादिरूपो मन्त्रध्वनिः-पुण्याहध्वनिः । किं कुर्वन् शङ्खध्वनिः ? उत्प्रेक्ष्यते, श्रुतशीलेन श्रावितमिममेव-आर्यायुगलोक्तमेवार्थं 'साहसं कुरु' इत्येवंरूपं समर्थ्ययन्ति- द्रढयन्निव । यथा कस्यचिदुक्तमर्थं अन्यस्तथैव ब्रुवन् समर्थयति तथा अयमपि समर्थयतीति । अनेनापि बोध्यते यथा साहसमेव विधेहीत्यर्थः ।

**राजा तु तमाकर्ण्य विसर्जितपरिजनस्तत्रैव पुलिनमध्ये मध्याह्नसमय-समुचितव्यापारमकरोत् ।**

**राजा** तु-नलस्तं-शङ्खध्वनिमाकर्ण्य-श्रुत्वा विसर्जितः-प्रेषितः परिजनो येन स एवंविधः सन् तत्रैव पुलिनमध्ये जलोज्झिततटमध्ये मध्याह्नसमयस्य समुचितो यो व्यापारः-अनुष्ठानं तं अकरोत् ।

**अनन्तरमतिक्रान्तेषु केषुचिन्मुहूर्तेषु गगनमध्यतलाद्विलम्बमाने मनाङ्मार्तण्डमण्डले चण्डवात्याहतशुष्कपत्रमिव दण्डप्रान्तप्रचलितकु-लालचक्रमिव तेन पुरंदरादेशभ्रमेण भ्रान्तमात्मनो मनः क्वाप्येकान्तक-मनीयनर्मदाप्रदेशप्रदर्शन[१]विनोदेन स्वस्थीकर्तुमिच्छन्निच्छानुकूलक-तिपयाप्तपरिजन[२]परिवृतः श्रुतशीलस्कन्धावष्टम्भविहारी[३] विहाय दूरमिव शिबिरसंनिवेशम्, इतस्ततस्तरुणतमालमण्डपमण्डलितमयूरहारिणा चलच्चकोरचक्रवाकचक्रवालवलयितेन स्नानागततापसपदपङ्क्ति-**

---

१. स्थूणा अनू. । ★-★ चिह्नान्तर्गतपाठो नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**खर्वितदूर्वाङ्कुरेणापसरत्पयःपूरतरङ्गितवालुकेन[4] पुलिनप्रान्तेन प्राचीं दिशमयासीत् ।**

**अनन्तरं**-मध्याह्नानुष्ठानकरणात् पश्चात् केषुचित् मुहूर्त्तेषु-कालविशेषेषु अतिक्रान्तेषु सत्सु मनाक्-स्तोकं मार्तण्डमण्डले-रविबिम्बे गगनमध्यतलाद् विलम्बमाने सति-अचलति सति, मध्याह्ने घटिकाद्वयं रविर्निश्चली भवतीत्यागमः । तेन पुरन्दरस्य-शक्रस्य आदेश एव भ्रमः-कुन्दाख्ययन्त्रं तेन भ्रान्तं अनवस्थितमात्मनो मनः क्वापि-कस्मिंश्चिदपि प्रदेशे एकान्ते- विजने कमनीयाः-रम्या ये नर्मदाप्रदेशास्तेषां यत्प्रदर्शनं-अवलोकनं तस्य विनोदेन-कुतूहलेन स्वस्थीकर्तुं-स्वस्थं विधातुं इच्छन्-वाञ्छन् इच्छायाः-आत्मनः अभिलाषस्य अनुकूलाः-तदनुवर्तिनः स्वाभिलाषमनुप्रवर्तमाना इत्यर्थः । एवंविधाः कतिपये-कियन्तः आप्ताः-यथार्थवादिनो ये परिजनास्तैः परिवृतः-परिवारितः श्रुतशीलस्कन्धस्य यो अवष्टम्भः-आलम्बनं तेन विहर्तुं शीलं यस्यासौ श्रुतशीलस्कन्धावष्टम्भविहारी-मन्त्रिस्कन्धमवष्टभ्य नलः दूरमिव इवशब्दोऽत्र वाक्यालङ्कारार्थः । दूरदेशस्थितमेव शिबिरसन्निवेशं-सेनास्थितिप्रदेशं विहाय-परित्यज्य पुलिनप्रान्तेन-तटपर्यन्तपथेन प्राचीं-पूर्वां दिशमयासीत्-जगाम । भ्रान्तं मनः किमिव ? चण्डवात्यया-प्रचण्डवातसमूहेन आहतं-कम्पितं यत् शुष्कपत्रं तदिव । तथा दण्डप्रान्तेन-दण्डाग्रेण प्रचलितं-प्रेरितं यत् कुलालचक्रं तदिव । यथा तत्भ्रान्तं भवति तथेदमपि । पुरन्दरादेशभ्रमेति "**भ्रमस्तु स्याद्भ्रमणे वारिनिर्गमे । भ्रान्तौ कुन्दाख्य यन्त्रे च**" [२/३३३-३३४] **इत्यनेकार्थः** । किम्भूतेन पुलिनप्रान्तेन ? इतस्ततः-सर्वतः तरुणाः-नवा ये तमालमण्डपास्तेषु जलदभ्रमान्मण्डलिताः-एकत्रमिलिता ये मयूरास्तैर्हारिणा-मनोज्ञेन, तथा चलन्तो ये चकोराश्च चक्रवाकाश्च तेषां यच्चक्रवालं-वृन्दं तेन वलयितेन-वेष्टितेन, तथा स्नानाय आगता ये तापसास्तेषां पदपंक्तिभिः-पादन्यासश्रेणिभिः खर्विताः-कुब्जीकृता दूर्वाङ्कुरा यस्मिन् स तेन, तथा अपसरन्-पश्चान्निवर्तमानो यःपयःपूरः-जलप्रवाहस्तेन तरङ्गिता-जाततरङ्गाकारा वालुका यस्य स तेन । यस्या उपरि जलप्रवाहो व्यूढो भवति सा वालुका तरङ्गाकारा दृश्यते । तरङ्गितेति "**तारकादित्वादितच्**" [पा. सू. प./२/३६] ।

**तत्र च चटुलचञ्चरीककुलाकुलितविविधवीरुधां तलेषु विचरतोऽस्य रसातलनिर्गताः[5] पन्नगाङ्गना इव नागमदहारिण्यस्तमालकन्दलीकोमलाङ्गयष्टयः श्रोणीभारालसगमनास्त्रिवलीतरङ्गिततनुमध्यलतिकाः, काश्चित्कण्ठकन्दलीलम्बित[6]मातङ्गमौक्तिकलताः स्फुरन्नक्षत्रवलयाः कृष्णपक्षरात्रय इव कृतक्रीडाशरीरपरिग्रहाः, काश्चिदुभयश्रवणासक्त[7]दन्तिदन्तपत्त्र-प्रभाधवलितमुखमण्डलाः सुरसरित्सलिलसंवलित[8]कालिन्दीजलदेवता इव**

नर्मदयामन्त्रिताः[१], काश्चित्परिधानीकृतरक्तपल्लवस्फुरत्त[२]डित्लेखा[३]मेखला-श्चलदम्बुवाहपङ्क्तय इव विन्ध्यस्कन्धानुबन्धिन्यः, काश्चिन्मातङ्गमदमण्ड[४]-नमिलन्मधुकरकरालिताः सकलनीलोत्पलवनलक्ष्म्य इवान्यजलाशयेभ्यो महानदीमवतरन्त्यः, काश्चिल्लोहिताशोककुसुम[५]स्तबककृतकर्णावतं-सोत्तंसास्त्रिपुरपुरन्ध्रय इव हरशरानलज्वालाकुलितशिरसो धूमध्यामलाः[६] सलिलमनुसन्त्यः, काश्चिल्ललितलीलामृगैरनुगम्यमानाः शरीरवत्यो-ऽञ्जनशैलस्थलाधिदेवता इव तीर्थावगाहनानुरागिण्यः, काश्चिज्जरराज-र्जरशबरकञ्चुकिकरावलम्बलीलागामिन्यः स्फुरदिन्द्रनीलशिलापुत्रिका इवेन्द्रजालिकैः संचार्यमाणाः कृष्णाञ्जनिकाकुसुमकान्तयः, [७]काश्चिच्चिपिटनासाः कुन्दकान्तदन्तपङ्क्तयो मायूर[८]पिच्छगुच्छावन-द्धकर्बुरकबरीकलापाश्चलद्वलयमुखरकरतलोत्तालतालिकारम्भरमणी-यरसिकरासकक्रीडानिर्भराः [९]कादम्बरीमधुपानमद[१०]घूर्णितदृशो दृष्टिपथमवतेरुरपराह्णमज्जनागतास्तरुणकिरातकामिन्यः ।

**तत्र च**-पुलिनप्रान्ते चटुलं-चञ्चलं यच्चञ्चरीककुलं- मधुकरवृन्दं तेन आकुलिताः-व्याकुलीकृताः सन्तापिता विविधाः-अनेकप्रकारा या वीरुधः-लतास्तासां तलेषु-छायासु विचरतः-विहरतो अस्य-नलस्य एवंविधा अपराह्णमज्जनाय-सन्ध्याकालीनस्नानाय आगतास्तरुणाः-नवयौवनाः याः किरातकामिन्यः-भिल्लस्त्रियस्ता दृष्टिपथं अवतेरुः-अवतीर्णः, दृष्टा इत्यर्थः । किम्भूतास्तरुणकिरातकामिन्यः ? नागमदेन-हस्तिदानाम्बुना हारिण्यः-मनोहरास्तेन अलङ्कृतत्वात् । का इव ? रसातलात्-पातालात् निर्गताः पन्नगाङ्गना इव । ताः किम्भूताः ? नागानां-वासुकिप्रभृतीनां मदं-गर्वं हरन्ति-मुष्णन्तीत्येवंशीला नागमदहारिण्यः तान् स्ववशे नयन्ति[१] इत्यर्थः । तथा तमालकन्दलीवत्-तापिच्छप्ररोहवत् कोमला-मृद्वी अङ्गयष्टिः-देहो यासां ताः, कृष्णदेहच्छवय इत्यर्थः । यष्टिशब्दस्तनुलतादि-वच्छोभावाची । तथा श्रोणीभारेण-पृथुलनितम्बगौरवेण अलसं-मन्थरं गमनं यासां ताः । तथा त्रिवल्याः-तिसृभिरुदरलेखाभिस्तरङ्गिता-जाततरङ्गाकारा तन्वी-सूक्ष्मा मुष्टिग्राह्या मध्य-लतिका अवलग्नं यासां ताः त्रिवलीविभूषितमध्या इत्यर्थः । तथा तासां मध्ये काश्चित्तरुण्यः कण्ठकन्दल्या लम्बिता-लम्बायमानी कृता मातङ्गमौक्तिकलता-गजसम्बन्धिमुक्तास्रक् याभिस्तां एवंविधा वर्तन्ते । मौक्तिकानां हि अष्टौ योनयस्तथा चोक्तम्—

१. नयन्त्य अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**"गजे[१] वराहदंष्ट्रायां[२] मण्डूके[३] सर्पमस्तके[४] ।**
**वंशे शङ्खे[६] घने[७] शुक्तौ[८] मुक्तानामष्टयोनयः ॥"** [ ]

इति । उत्प्रेक्ष्यते, ताः का इव ? कृतः क्रीडया शरीरपरिग्रहः-तनुस्वीकारो याभिस्ता मूर्ताः स्फुरन्-दीप्यमानो नक्षत्राणां वलयः-मण्डलं यासु एवंविधाः कृष्णपक्षस्य-रात्रय इव-निशा इव । मुक्तानां नक्षत्राणि स्त्रीणां च रात्र्य उपमानम् । तथा काश्चित् उभययोः श्रवणयोरासक्ते-लग्ने ये दन्तिदन्तपत्रे-करिदन्तघटितकर्णाभरणे तयोः प्रभया-श्वेतकान्त्या धवलितं-पाण्डुरितं मुखमण्डलं यासां ताः, एवंविधा वर्तन्ते । उत्प्रेक्ष्यते, नर्मदया आमन्त्रिताः-आहूताः स्फुरत्-विशदीभवत् यत् सुरसरित्सलिलं-गङ्गाजलं तेन सम्वलिता-मिश्रिता याः कालिन्दीजलदेवता-यमुनास्ता इव । दन्तपत्राणां सुरसरित्स्त्रीणां च कालिन्द्युपमानम् । तथा काश्चित्तरुण्य परिधानीकृताः-अधो निवसनीकृता रक्ताः पल्लवाः-किसलयानि याभिस्ता रक्तपल्लवाच्छादितकटीभागाः, एवंविधा वर्तन्ते । उत्प्रेक्ष्यते, विन्ध्यस्कन्धस्य-विन्ध्याचलमध्यस्य अनुबन्धः-सम्बन्धो विद्यते यासां ता विन्ध्य-स्कन्धानुबन्धिन्यः, विन्ध्यस्कन्धलग्ना इत्यर्थः । स्फुरन्ती-दीप्यमाना तडिल्लेखेव-विद्युदेव मेखला-कटिभूषणं यासां, एवंविधाश्चलन्त्यो या अम्बुवाहपंक्तयस्ता इव । रक्तपल्लवानां तडिल्लतास्त्रीणां चाम्बुवाहपंक्तिरुपमानम् । तथा काश्चित् तरुण्यः मातङ्गमदेन-करिदानेन यन्मण्डनं-मुखादेरलङ्करणं तेन मिलन्तः-पुञ्जीभवन्तो ये मधुकरास्तैः करालिताः-व्यग्रीकृताः खेदं प्रापिता वर्तन्ते । उत्प्रेक्ष्यते, अन्यजलाश्रयेभ्यः-अपरजलाशयेभ्यो महानदी-नर्मदामवतरन्त्यः-आगच्छन्त्यः सकला या नीलोत्पलवनलक्ष्म्यः-कुवलयखण्डशोभास्ता इव । स्त्रीणां कुवलयखण्डलक्ष्म्य उपमानम् । तथा काश्चित् तरुण्यः लोहिता ये अशोकस्य-कङ्केल्लेः कुसुमस्तबकाः-गुच्छपुच्छास्तैः कृत्वः कर्णयोः अवतंसः-कर्णपूरः उत्तंसश्च-शिरसि शेखरो याभिस्ताः लोहिताशोककुसुमस्तबककृतकर्णावतंसोत्तंसाः, एवंविधा सन्ति । "**आपीड शेखरोत्तंसावतंसा शिरसि स्त्रजि, उत्तरो कर्णपूरेऽपि**" [३/३१८] इति **हैमः कोषः** । अत्रावतंसोत्तंसयोरेकार्थत्वप्रतीतिनिवृत्त्यर्थं अवतंसपदस्य सविशेषणत्वं । यद्वा, कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितेः[१] संनिधानादिबोधार्थं **अवतंसादीनि कर्णाद्या-भरणान्येव** उच्यंते । तत्र कर्णादिशब्दाः कर्णादिस्थितिप्रतिपत्तये । यथा—

अस्याः कर्णावतंसेन जितं सर्वं विभूषणम् ।
**तथैव शोभतेऽत्यन्तमस्यां श्रवणकुण्डलं ।** **[ काव्यप्रकाश-७/२८७ ]**
**अपूर्वमधुरामोदप्रमोदितदिशस्ततः ।**
**आययुर्भृङ्गमुखराः शिरः शेखरशालिनः ।** **[ काव्यप्रकाश-७/२८८ ]**

---

१ °निर्मितिः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अत्र कर्णश्रवणशिरःशब्दाः सन्निधानप्रतीत्यर्थमिति **काव्यप्रकाशोक्तः** । समाधिविधिरत्रावसेयः । उत्प्रेक्ष्यते, हरस्य-शम्भोः शरानलज्वालाभिः-बाणहुताशनार्चिभिराकुलितं-व्यग्रीकृतं-शिरो यासां ताः, एवंविधां धूमेन-अग्निलिङ्गेन-ध्यामला-कृष्णवर्णा सलिलमनुलक्षीकृत्य सरन्त्यः-आगच्छन्त्यः त्रिपुरस्य-दैत्यविशेषस्य पुरन्ध्रय इव -कुटुम्बिन्य इव। लोहिताशोककुसुमानां हरशरज्वालास्त्रीणां च श्यामत्वे धूमध्यामलत्वं उपमेति । पुरन्ध्रय इति पुरं धत्त इति पुरन्ध्रिः, "**पृषोदरादित्वात् ध्र्यां**[३]" [**पृषोदरादीनि यथोपदिष्टम्** पा. सू. ६/३/१०९] पुरन्ध्री, तथा काश्चित् तरुण्यः लालिताः-लघुवयस्तः पालिताः ये लीलामृगाः केलिकुरङ्गास्तैरनुगम्यमानाः-अनुस्त्रियमाणाः वर्तन्ते पुरतस्ता आगच्छन्ति पश्चाल्लीलामृगा इति । उत्प्रेक्ष्यते, शरीरवत्यः-देहधारिण्यो मूर्तास्तीर्थावगाहने-तीर्थमज्जने अनुरागः-प्रेम विद्यते यासां ताः, एवम्विधा अञ्जनशैलस्थलस्य-सौवीरगिरिस्थल्या अधिदेवता इव-अधिष्ठातृदेव्य इव, ता अपि अनुगतमृगाः कृष्णाभाश्च भवन्तीति । तथा काश्चित् तरुण्यः जरया-जर्जरा जीर्णा ये शबरकञ्चुकिनः-शबरसौविदल्लास्तेषां करावलम्बलीलया-करावष्टम्भविलासेन गच्छन्तीत्येवंशीलास्तथा कृष्णाञ्जनिका तापिच्छलतिका तस्याः कुसुमवन्नीला कान्तिर्यासां एवम्विधा वर्तन्ते । उत्प्रेक्ष्यते, इन्द्रजालिकैः-असद्वस्तुदर्शिभिर्मायिभिः सञ्चार्यमाणाः-चाल्यमानाः स्फुरन्त्यः-दीप्यमाना या इन्द्रनीलाशिलापुत्रिकाः-नीलमणिशिलापाञ्चालिकास्ता इव । कञ्चुकिनां इन्द्रजालिकाः स्त्रीणां च इन्द्रनीलशिलापुत्रिका उपमानम् । तथा काश्चित्तरुण्यः[१] चिपिटा पिच्चिततता नासिका यासां ताः, "**चिपिटं पुनः । पृथुके पिच्चिततते**" **इत्यनेकार्थः** । [३/१५८] "**पिच्चितं-कुट्टितं सन्ततं-विस्तीर्णं पिच्चिततंतं, यथा केचिच्चिपिट नर्कुटा**" [ ] इति **तद्वृत्तिः** । तथा कुन्दवत्-पुष्पविशेषवत् कान्ता- विशदा दन्तपंक्तिर्यासां ताः, तथा मयूरपिच्छगुच्छेन-मयूरसम्बन्धिपत्रसमूहेन अवनद्धः-बद्धः अतएव कर्बुरः-शबलवर्णः कवरीकलापः-केशविन्याससमूहो यासां ताः, तथा चलद्भिर्वलयैः-कङ्कणैर्मुखरौ-वाचालौ यौ करतलौ-पाणितलौ ताभ्यामुत्तालः-त्वरितः श्रेष्ठो वा यस्तालिकारम्भः-तालिकादानं तेन रमणीया-रम्या, तथा रसिका-रसवती, एवम्विधा या रासकक्रीडा लोकप्रसिद्धा तया निर्भराः-अतिशायिन्यः ।"**उत्तालस्त्वरिते कपौ । श्रेष्ठोत्कटकरालेषु**" [३/६६३-६४] **इत्यनेकार्थः** । **रासः क्रीडानुगे द्रुहां, इत्यनेकार्थः** [२/६०२] । तथा कादम्बरी-मदिरा मधुः-क्षौद्रं तयोः पानेन यो मदः-मत्तता तेन घूर्णिते-घूर्णायमाने प्रचलायिते दृशौ यासां ताः ।

**ततश्च ताः सूक्ष्ममुक्ताफलधवलवालुकापुलिनपृष्ठे लब्धपरभागाः स्वैरं स्वैरमनुच्चचरणचलनक्रम[१] क्रेंकारितनूपुररवाकृष्टकलहंसकुलमनाकुल-कलगीततरङ्गासन्नरङ्गितकुरङ्गमनङ्गभावभूयिष्ठ[२]मनुभूय तीरविहारसुखम्,**

---

१. तरुण्यः नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अनन्तरमक्रूरजलचरमवेगवहत्सलिलमुत्फुल्लविविधविकसिताम्बुजजातिजीवितजीवंजीवकमुत्कूजितकुररमारसितसारसमुन्मदहासिहंसावतंसमुर:प्रमाणाच्छोदकमतिरमणीयं हृदमवातरन् ।**

**तत:**- अनन्तरं ता:-किरातकामिन्य: सूक्ष्मा:-तनवो मुक्ताफलवद्धवला:-श्वेता: वालुका[१] यत्र एवम्विधे पुलिनपृष्ठे सैकतप्रदेशे लब्ध: परभाग:[२]- गुणोत्कर्ष: शोभातिशयो-याभिस्ता एवम्विधा: सत्यं, एवम्विधं तीरविहारस्य-तटविचरणस्य सुखं अनुभूय, अनन्तरं-पश्चात् एवम्विधं अतिरमणीयं-अतिशयेन रम्यं हृदं-जलाधारविशेषं अवातरन्-प्राविशन् । किम्भूतं तीरविहारसुखम् ? स्वैरं स्वैरं-स्वेच्छया स्वेच्छया अनुच्चचरणाभ्यां-भूसन्निहित-पादाभ्यां यश्चलनक्रम:-गमनपरिपाटी तेन क्रेंकारिते-शिञ्जिते ये नूपुरे-तुलाकोटी तयो रवेण-स्वरेण आकृष्टं-स्वसमीपे आनीतं कलहंसकुलं यत्र तत्, नूपुरस्वरं[३] श्रुत्वा राजहंसास्तासां समीपमागता: सन्तीत्यर्थ: । तथा अनाकुलानि-अन्तरितानि कलानि-मधुराणि यानि गीतानि-गानानि तेषां ये तरङ्गा:-लहर्य: परम्परा इत्यर्थ:, क्रमेण लीलया समुल्लसनात् तैरासन्ना:-निकटा रङ्गिता:-आगता: कुरङ्गा यत्र तत् ताभिस्तथा कलङ्गीयते, यथा मृगा अपि तासां समीपे सञ्चरन्तीति । रगुत् गुलिगु गतौ क्ते रंगित: । तथा अनङ्गभावेन-स्मरचेष्टया भूयिष्ठं-बहुलं, तत्र स्मरचेष्टा बह्वीस्ताभिर्दर्श्यत इत्यर्थ: । "**भावोभिप्रायवस्तुनो: । स्वभावजन्मसत्तात्मक्रियालीलाविभूतिषु । चेष्टयोन्योर्बुधे जन्तौ शृङ्गारादेश्च कारणे**" इत्यनेकार्थ: **[ २/५४५-५४६ ]** । किम्भूतं हदम् ? अक्रूरा:-अनुग्रा: जलचरा:-मत्स्या, यस्मिन् स तं, अनेनाभिगम्यत्वं हदस्योक्तम् । तथा अवेगं-वेगरहितं वहत्सलिलं यत्र स तम् । तथा उत्फुला विविधा:-अनेकप्रकारा, विकसिता या अम्बुजजातय:-श्वेतारुणादिपद्मप्रकारास्ता-भिर्जीविता-वर्तिता उपकृता जीवंजीवा:-पक्षिविशेषा येन स तम् । "**शेषाद्वा क:**" [**शेषाद्विभाषा** पा. सू. ५/४/१५४] । यद्वा, अम्बुजजातिरेव जीवितं येषामतिप्रियत्वात्, एवंविधा जीवंजीवा यत्र तम् । अत्र उत्फुल्लविकसितशब्दौ एकार्थौ विकासस्य आधिक्यं द्योतयत: । तथा उत्कूजिता:-शब्दिता: कुररा यत्र स तम् । तथा आरसिता:-शब्दं कुर्वाणा: सारसा यत्र स तम् । तथा उन्मदा:-दृप्तास्तथा हासिन:-हसनशीला: एवंविधा: हंसा एव अवतंस:-शेखरो यस्य स तम्, तन्मण्डिततीरत्वात् । तथा उर:प्रमाणं वक्षोदघ्नं अच्छं उदकं यत्र स तं, अगाधे हि पयसि न जलक्रीडा ।

**अवतीर्य च ता: काश्चित्पन्नगप[२]तिपुरन्ध्र्य इवोद्गीर्णविषगण्डूषा:, काश्चिद्राक्षसप्रमदा इव रक्तोत्पलाकृष्टिव्यसनिन्य:, काश्चिद्गोपाङ्गना[३] इव**

---

१. श्वेता: वालुका अनू. । २. परिभाग: अनू. । ३. °स्वनं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**गृहीतपुण्डरीकाक्षाः, काश्चित्कार्तिकेयशरपङ्क्तय इव विश्लेषित-क्रौञ्चाः, काश्चित्कुरुसेना इव [१]धृतराष्ट्रशकुनिमार्गेणानुधावमानाः, काश्चिद्रात्रय इव विघटितचक्रवाकमिथुनाः, काश्चिच्चकोराङ्गना इव चञ्चूकृतदीर्ध-कमल[२]नालैः शशधर[३]करनिकरनिर्मलजलमास्वादयन्त्यः, काश्चित्करिण्य इव सरसबिसाग्राणि ग्रसमानाः, काश्चिज्जलयन्त्रपुत्रिका[४] इव संपुटितमुखपाणिपल्लवयुगलाग्ररन्ध्रोन्मुक्तसूक्ष्मवारिधाराः, काश्चिद्धीरुनार्य इव प्रियवारितरणाः, स्तनगण्डशैलशिखरास्फालनोल्ललत्तरङ्गान्तर-तरत्तरुणतामरसरससुरभिसलिलमवगाहमानाश्चिरं चिक्रीडुः ।**

**अवतीर्य च**[१]-ह्रदान्तः प्रविश्य ताः-कामिन्यः स्तनावेव गण्डशैलौ-पर्वतच्युत-स्थूलपाषाणौ तयोः शिखराभ्यां-अग्राभ्यां यदास्फालनं-जलप्रतिघातस्तेन उल्ललन्तः-उच्छलन्तो ये तरङ्गास्तेषां अन्तरे-मध्ये तरन्ति-उन्मज्जन्ति तरुणानि-नवानि यानि तामरसानि- महोत्पलानि तेषां रसेन-मकरन्देन सुरभिः-सुगन्धि यत्तत्, एवंविधं सलिलमवगाहमानाः-विलोडयन्त्यः सत्यश्चिरं चिक्रीडुः-क्रीडन्ति स्म । क्रीडनप्रकारानेवाह-किम्भूतास्ताः ? काश्चिद् उद्गीर्णाः-विक्षिप्ताः विषस्य-जलस्य गण्डूषाः-चुलुका याभिस्ताः । का इव ? पन्नगपतेः-नागराजस्य पुरन्ध्रय इव-स्त्रिय इव । किम्भूताः ? उद्गीर्णा, विषस्य-गरस्य गण्डूषा याभिस्ताः । तथा काश्चित् रक्तोत्पलं-रक्ताब्जं तस्य आकृष्टिः-आकर्षणं, तत्र व्यसनं-आसक्तिर्विद्यते यासां ताः। का इव ? राक्षसानां प्रमदा इव ? ताः किम्भूताः ? रक्तेन-रुधिरेण उत्कृष्टं यत् पलं-मांसं तस्या कृष्टौ-बलाद्ग्रहणे व्यसनं विद्यते या सा ताः । तथा काश्चित् गृहीतं-अवलोकितं पुण्डरीकं-सिताम्भोजं याभ्यां एवम्भूते अक्षिणी नेत्रे यासा ताः । चक्षुषो हि ग्रहणं अवलोकनमेव, यथा श्रोत्रग्रहणमाकर्णनं । अथवा शैत्यान्नेत्रन्यस्ताब्जाः । यद्वा, गृहीतः-आत्तः पुण्डरीकाणामक्षः-बीजकोशो याभिस्ताः । "**अक्षो बिभीतके कर्षे रावणौ शकटात्मनोः । रथस्यावयवे तुच्छे व्यवहारवराटयोः । पाशके य**" [२/३-४] इति **अनेकार्थतिलकः** । का इव ? गोपाङ्गना इव-गोप्य इव। ताः किम्भूताः ? गृहीतः पुण्डरीकाक्षः-विष्णुर्याभिस्ताः। तथा काश्चित् विश्लेषिताः-वियोजिताः क्रौञ्चाः-पक्षिविशेषा याभिस्ताः । का इव ? कार्तिकेयस्य-कुमारस्य शरपंक्तय इव । ताः किम्भूताः ? विश्लेषितः-विभिन्नः क्रौञ्चाख्यो गिरिर्याभिस्ताः । क्रौञ्च इति "**प्रज्ञादित्वादण्**" [**प्रज्ञादिभ्यश्च** पा. सू. ५/४/३८] । "**क्रोञ्चोद्वीपे खगे गिरौ**" इत्य**नेकार्थः** [२/५९] । तथा काश्चित् धृतराष्ट्रशकुनयोः हंसपक्षिणस्तेषां मार्गेण-वर्त्मना अनुपश्चाद् धावमानाः-गच्छन्त्यः, का इव ? कुरुसेना इव ? ताः किम्भूताः ? धृतराष्ट्रः-दुर्योधनपिता शकुनिः-कौरवमातुलस्तयोर्मार्गेण पाण्डवचमूहननलक्षणेन अनुधावमाना

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदनुवर्तित्वात्तासाम् । **"धृतराष्ट्रः सुराज्ञि स्यात् पक्षिक्षत्रियभेदयोः"** [रान्त.२७६] इति **विश्वः** । **"शकुनि खगे करणभेदे कौरवमातुले"** [३/४५२] इत्य**नेकार्थः** । तथा काश्चित् विघटितं-वियोजितं चक्रवाकाणां मिथुनं-दम्पतीरूपं द्वन्द्वं याभिस्ताः । अन्यत्र चक्रवाकी उड्डायिता, अन्यत्र चक्रवाक इति । का इव ? रात्रय इव ? ता अपि विघटितचक्रवाकमिथुना एव भवन्ति, रात्रौ हि श्रीरामशापेन तद्दम्पतीवियोगस्य भणनात् । तथा काश्चित् अचञ्चूनि चञ्चूनि कृतानि चञ्चूकृतानि एवंविधानि यानि कमलनालानि[१] तैः कृत्वा शशधरकरनिकरवत् निर्मलं यज्जलं तद् आस्वादयन्त्यः-पिबन्त्यः । का इव ? चकोराङ्गना इव-चकोर्य इव । ताः किं कुर्वन्त्यः ? चञ्च्वा कृतानि-धृतानि यानि कमलनालानि तैः कृत्वा शशधरस्य करनिकर एव निर्मलजलं तदास्वादयन्त्यः, चकोर्यो हि चन्द्रकरान् पिबन्ति । तथा काश्चित् सरसानि आर्द्राणि यानि बिसाग्राणि-कमलतन्तुप्रान्तास्तानि ग्रसमानाः-भक्षयन्त्यः । का इव ? करिण्य इव-हस्तिन्य इव । ताः किम्भूताः ? सरसबिसाग्राणि ग्रसमानाः । तथा काश्चित् सम्पुटितं-संयोजितं मुखं-अग्रं यस्य तादृशं यत् पाणिपल्लवयुगलं-करद्वयं तस्याग्रे यानि रन्ध्राणि-विवराणि तेभ्य उन्मुक्ताः-विक्षिप्ताः सूक्ष्माः-तन्व्यो वारिधारा याभिस्ताः । का इव ? जलयन्त्रस्य पुत्रिकाः-पाञ्चालिकास्ता इव । ता अपि एवम्भूता एव भवन्तीति । तथा काश्चित् प्रियं-इष्टं वारिणः-जलस्य तरणं यासां ताः प्रियवारितरणाः, का इव ? भीरुनार्य इव-भीलुकरमण्य इव । ताः किम्भूताः ? वारितः-निरुद्धो रणः-कलहो याभिस्ता वारितरणाः प्रियाणां वारितरणाः, प्रियवारितरणाः-यूयं वैरिभिः सह युद्धं मा कुरुध्वमिति ।

**अवनिपतिरपि विस्मयविस्मृतनिमेषोन्मेषनयनस्ताश्चिर[१]मवलोक्य चिन्तयांचकार ।**

**अवनिपतिरपि** विस्मयेन-अवलोकनाश्चर्येण विस्मृतौ-मुक्तौ निमेषोन्मेषौ-संकोच-विकासौ नयनयोर्येन सः, विस्फारितनेत्र इत्यर्थः । एवंविधः सन् ताः-किरातकामिनीश्चिरं अवलोक्य चिन्तयाञ्चकार ।

**'जातिर्यत्र न तत्र रूपरचना नेत्रोत्सवारम्भिणी,**
**रूपश्रीरपि यत्र तत्र सुलभः श्लाघ्यो न जन्मोदयः ।**
**इत्येकस्थसमस्तसुन्दरगुणप्रद्वेषमभ्यस्यतो,**
**धातस्तात वृथाश्रमस्य भवतः सृष्टिक्रमो दह्यताम् ॥ ५७ ॥**

---

१. कमलानि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जातिरिति** । तातेति कोमलामन्त्रणे हे धातः ! -विधातः ! भवतः-तव सृष्टिक्रमः-सर्गपरिपाटी ब्राह्मणादिरूपा दह्यताम्-भस्मसाद् भवतु । "**कर्मकर्त्तरि यक्**" [ ] । एतदुक्तौ कारणमाह– किम्भूतस्य भवतः ? यत्र जातिः-क्षत्रियादिस्तत्र नेत्रयोरुत्सवं-हर्षं आरभते-कुरुते इत्येवंशीला नेत्रोत्सवारम्भिणी रूपरचना-सौन्दर्यघटना न । अपिः-अथार्थः । अथ यत्र भिल्लादौरूपश्रीः-सौन्दर्यलक्ष्मीस्तत्र न सुलभः-सुप्रापः श्लाघ्यः-प्रशस्यो जन्मोदयः-जन्मप्राप्ति जातिरित्यर्थः, आसां म्लेच्छजातित्वात् । इति-अमुना प्रकारेण एकस्मिन् तिष्ठन्तीति एकस्था ये समस्ताः सुन्दरगुणा यत्र जातिस्तत्रैव रूपश्रीरित्येवं-रूपास्तेषामुपरि प्रद्वेषं-ईर्ष्यां अभ्यस्यतः-अनुशीलयतः वियोगीकरणात् । अत एव पुनः किम्भूतस्य ? वृथा-निष्फलः श्रमः-सृष्टिप्रयासो यस्य स तस्य अभिलषितार्थासिद्धेः ॥५७॥

**अपि च–**

**ग्रीवालम्बितपद्मनालललतिकाः कर्णावतंसीकृत-**
**प्रत्यग्रोन्मिषितासितोत्पलदलैः संदिग्धनेत्रद्वयाः ।**
**कस्यैता जलदेवता इव कुचप्राग्भारभुग्नोर्मयः[१],**
**स्नानासक्तपुलिन्दराजवनिताः कुर्वन्ति नोत्कं मनः ॥ ५८ ॥**

**अपि च**-पुनः

**ग्रीवेति** । एताः-प्रत्यक्षतो वीक्ष्यमाणाः स्नाने-मज्जने आसक्ता -गाढबद्धानुरागा याः पुलिन्दराजवनितास्ताः कस्य-पुरुषस्य मन उत्कं-उत्सुकं कामाभिलाषि न कुर्वन्ति ? अपितु सर्वस्यापीति[१] । किम्भूता वनिताः ? ग्रीवायां-कन्धरायां लम्बिता-लम्बायमानीकृता पद्मनाललतिका याभिस्ताः। तथा कर्णयोरवतंसीकृतानि-कर्णपूरीकृतानि प्रत्यग्राणि-नवानि उन्मिषितानां-विकसितानां असितोत्पलानां-कुवलयानां यानि दलानि-पत्राणि तैः कृत्वा सन्दिग्धं-संशयितं नेत्रद्वयं यासां ताः, उत्पलदलानां नीलवर्णत्वेन विशालत्वेन च नेत्रनिभत्वात् नेत्रद्वयसन्देहः, किन्तु एतासां द्वे एव नेत्रे उत बहूनि[२] ? तथा कुचप्राग्भारेण-पयोधरपीवरत्वेन भग्ना ऊर्मयो याभिस्ता वनिताः । का इव ? उत्प्रेक्ष्यते, जलदेवता इव-ह्रदाधिदेवता इव, ता अपि एवम्भूता एव भवन्तीति प्राग्भारो महत्त्वम् ॥ ५८ ॥

**अपि च –**

**एतस्याः करिकुम्भसंनिभकुचप्राग्भारपृष्ठे लुठद्,**
**गुञ्जागर्भगजेन्द्रमौक्तिकसर[२]श्रेणीमनोहारिणि ।**

१. इति नास्ति अनू. । २. बहूनीति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**दूरादेत्य तरङ्ग एष पतितो वेगाद्विलीनः कथं,**
**को वान्योऽपि विलीयते न सरसः सीमन्तिनीसंगमे ॥ ५९ ॥**

**अपि च**–पुनः-

**एतस्या** इति । एष तरङ्गो दूरादेत्य-आगत्य एतस्याः-किरातवनितायाः गुञ्जाः-कृष्णला गर्भे-मध्ये येषां ते गुञ्जागर्भाः लुठन्ती- हृदये दोलायमाना गुञ्जागर्भाणां गजेन्द्रमौक्तिकसराणां-दन्तिमौक्तिकदाम्नां या श्रेणी-राजिस्तया मनोहारिणि-मनोज्ञे करिकुम्भेन सन्निभः-सदृशो यः कुचप्राग्भारः-पयोधरमहत्त्वं तस्य पृष्ठे-उपरिभागे पतितः-लग्नः सन्, कथमिति प्रश्ने वेगात्-शीघ्रं विलीनः-गलितः । वेति पक्षान्तरे, वा-अथवा अन्योपि कः सरसः-सशृङ्गारः सीमन्तिनीसङ्गमे-स्त्रीसंयोगे न विलीयते-गलितवीर्यो न भवेत् ? अपितु सर्वोपि । अयमपि सरसः-सजलः अतएव तत्सङ्गात् विलीन इत्यर्थः ॥५९॥

**इयं च–**

**निजप्रियमुखभ्रान्त्या हर्षेणाचुम्बदम्बुजम् ।**
**दष्टाधरा तु भृङ्गेण सीत्कारमकरोन्मृदु ॥ ६० ॥**

**इयं च**-एषा शबरी–

**निजेति** । निजप्रियस्य-आत्मीयवल्लभस्य मुखभ्रान्त्या-आननभ्रमेण अम्बुजं-पद्मं हर्षेण अचुम्बत्-स्ववक्त्रसंयुक्तमकरोत् । सा जानात् इदं अम्बुजं न, किन्तु स्वप्रिया-ऽऽननमिति ततस्तद् अचुम्बदित्यर्थः । तु-पुनः भृङ्गेण दष्टः अधरो यस्याः सा, एवंभूता सती मृदु-अकर्कशं यथा भवति तथा सीत्कारमकरोत् ॥ ६० ॥

**अनयापि–**

**अविरतमिदमम्भः स्वेच्छयोच्छालयन्त्या,**
**विकचकमलकान्तोत्तानहस्तद्वयेन ।**
**परिकलित इवार्घः कामबाणातिथिभ्यः,**
**सलिलमिव वितीर्णा बाल्यलीलासुखाय ॥ ६१ ॥**

**अनयापीति** ।

**अविरतमिति** । विकचं-सविकासं यत्कमलं तद्वत् कान्तं-मनोज्ञं उत्तानं-ऊर्ध्वीकृतं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यत् हस्तद्वयं तेन अविरतं-निरन्तरं इदमम्भः-जलं कर्म स्वेच्छया-स्वकामेन अनयापि कामिन्या कर्त्र्या उच्छालयन्त्या-उल्लालयन्त्या, उत्प्रेक्ष्यते, कामबाणातिथिभ्यः कामस्य बाणाः-मोहनादय एव अतिथयस्तेभ्यः, अर्घः-पूजाविधिः परिकलित इव-दत्त इव ते सत्कृता इत्यर्थः । पुनरुत्प्रेक्ष्यते, बाल्यलीलासुखाय सलिलं वितीर्णमिव-जलाञ्जलिर्दत्त इव, हे बाल्यलीलासुख त्वं दूरे याहीत्यर्थः ॥ ६१ ॥

**अस्याश्च–**

**कर्णमूलविषये मृदु गुञ्जन्पाणिपल्लवहतोऽपि हठेन ।**
**एष षट्पदयुवा हरिणाक्ष्याश्चुम्बति प्रिय इवास्यसरोजम् ॥ ६२ ॥**

**अस्याश्चे**ति ।

**कर्णेति** । च-पुनः एष षट्पदयुवा कर्णमूलविषये-श्रवणसमीपे मृदु-मधुरं यथा भवति तथा गुञ्जन्-शब्दं कुर्वन् पाणिपल्लवेन-करकिसलयेन हतोऽपि-ताडितोऽपि अस्याः हरिणाक्ष्याः-कुरङ्गलोचनायाः प्रिय इव-भर्त्तेव आस्यसरोजं-मुखपद्मं हठेन-बलात्कारेण चुम्बति । यथा प्रियः पाणिपल्लवेन हतोपि हठात् प्रियाया मुखं चुम्बति तथाऽयमपि ॥६२॥

**इतोप्येषा–**

**भ्रमकरं मकरं मकरन्दिनीं कमलिनीमलिनीमलिनीकृताम् ।**
**तरलयन्तमवेक्ष्य महाभयादुदतरत्सरितस्त्वरितैः पदैः ॥ ६३ ॥**

**इतोऽपि**-अस्मिन्नपि प्रदेशे एषेति–

**भ्रमेति** । मकरन्दः-मधु अस्ति अस्यामिति मकरन्दिनीनां तथा अलिनीभिः-भृङ्गीभिर्मलिनीकृता-कृष्णीकृता या सा, अलिनीमलिनीकृता तथाभूतां कमलिनीं-पद्मिनीं तरलयन्तं-क्षिपन्तं भ्रमकरं-आवर्त्तकरं मकरं-यादोविशेषं अवेक्ष्य-विलोक्य महाभयात्-तदवलोकनोत्पन्नमहाभीतेर्हेतोः त्वरितैः-उत्तालैः पादैः-क्रमैः एषा-किरातकामिनी सरितः-नद्याः उदतरत्-उत्तीर्णा ॥ ६३ ॥

**एताश्च–**

**मन्दायते दिनमिदं मदनोतिसज्ज–**
**स्तत्किं न गच्छत गृहानिति पद्मिनीभिः ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**मीलत्सरोजगतभृङ्गरुतैरिवोक्ताः,**
**स्नात्वा शनैरनुसरन्ति तटं तरुण्यः ॥ ६४ ॥**

**एताश्चे**ति ।

**मन्दे**ति । एतास्तरुण्यः स्नात्वा-स्नानं विधाय शनैः-मन्दं मन्दं तटं-कूलं अनुलक्षीकृत्य सरन्ति-आगच्छन्ति । एकशोपि प्रयुज्यमानो शनैरिति शब्दो मुहुः शब्दवत् अभ्यासवृत्तिवचनः । किम्भूतास्तरुण्यः ? उत्प्रेक्ष्यते, पद्मिनीभिः-कमलिनीभिः मीलन्ति-संकुचन्ति यानि सरोजानि तद्गताः-तत्प्रविष्टा ये भृङ्गास्तेषां रवैरिति उक्ता इव-कथिता इव। इतीति किम् ? हे स्त्रियः ! इदं दिनं मन्दायते-अल्पीभवति, तथा मदनः-कामः अतिसज्जः-अतिशयेन सावधानो जायते तत्तस्माद्चोतोर्गृहान् किं न गच्छत-न यात, भृङ्गाः, किल सायं स्वत एव गुञ्जन्ति । परं उत्प्रेक्ष्यते, पद्मिनीभिस्तद् रवेण तासां शिक्षाप्रदीयत इवेत्यर्थः ॥ ६४ ॥

**एवमनेकविधविलासासक्तशबरसुन्दरीदर्शनाल्हादपुलकिते विविधवितर्ककारिणि पङ्कनिमग्नजरत्करेणुकायमाननिःस्पन्ददृशि तत्काल-मुत्पन्नया मन्मथव्यथया[1] धीरतया च स्पृहया च विचिकित्सया[2] च जिघृक्षया च जिहासया च समकालमाकुलितहृदये संकीर्णभावभाजि राज्ञि[3], राजीववनविराजिते तस्मिन्नर्मदाहृदे सलिलक्रीडासुखमति-चिरमनुभूय[4] तीरभुवि सेव्यसितसैकतस्थलीमलंकुर्वाणासु च तासु शबरराजसुन्दरीषु श्रुतशीलश्चिन्तितवान् ।**

**एव**मिति । राज्ञि एवम्विधे सति च-पुनः तासु-शबरराजसुन्दरीषु तस्मिन्-नर्मदाहृदे अतिचिरं-बहुकालं सलिलक्रीडायाः सुखमनुभूय-आसेव्य, तीरभुवि-कूलभूमौ सेव्या-सेवितुं योग्या सिता-श्वेता या सैकतस्थली-सिकतावद्देशस्तां अलंकुर्वाणासु विभूषयन्तीषु सतीषु श्रुतशीलश्चिन्तयाञ्चकार-विचारयामास । **"सिकताशर्कराभ्यां च"** [पा. सू. ५/२/१०४] इति मत्वर्थे अण्। सैकतः-सिक्तावान् देशः । किम्भूते नर्मदाहृदे ? राजीववनेन विराजिते-शोभते। किम्भूते राज्ञि ? एवमिति-पूर्वोक्तप्रकारेण अनेकविधविलासेषु-विविधविभ्रमेषु आसक्ताः-बद्धरागा याः शबरसुन्दर्यास्तासां दर्शनेन य आह्लादः-प्रमोदस्तेन पुलकिते-रोमाञ्चिते। तथा विविधान् वितर्कान्-ऊहान् करोतीत्येवंशीलो विविधवितर्ककारी तस्मिन्। तथा पङ्के-कर्दमे निमग्ना-ब्रुडिता जरती-वृद्धा या करेणुका-हस्तिनी सेव आचरन्ती करेणुकायमाना

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवंविधा निःस्पन्दा-निश्चला दृक् यस्य स तस्मिन्, यथा जरतीकरेणुः पङ्कनिमग्ना सती निःस्पन्दा भवति तथा नलस्यापि दृक् तासां वीक्षणे निःस्पन्दाऽभवत् । तथा तत्कालं-तत्समय एव उत्पन्नया-जातया मन्मथव्यथया धीरतया च-धैर्येण कथमेताः स्पृश्यामीति । तथा स्पृहया तासामुपरि वाञ्छया विचिकित्सया च-एता मया प्राप्स्यन्ते न वा इति संशयेन, तथा जिघृक्षया च-तासां ग्रहीतुमिच्छया, जिहासया च चाण्डालीत्वाद्धातुमिच्छया चेत्युभयप्रकारेण समकालं-एकसमय एव आकुलितं-व्यग्रीकृतं हृदयं-मनो यस्य स तस्मिन्। तथा संकीर्णः-जिघृक्षया जिहासया च मिश्रितो यो भावः-अभिप्रायस्तं भजतीति संकीर्णभावभाक् तस्मिन् । यदचिन्तयत्तदाह–

**उन्मादि यौवनमिदं शबराङ्गनानां,**
**देवोऽप्ययं नववयाः कमनीयकान्तिः ।**
**रेवातटं चलचकोरमयूरहारि,**
**किं स्यान्न वेद्मि जयिनी च मनोभवाज्ञा ॥६५॥**

**उन्मादीति** । शबराङ्गनानां इदं उन्मादयति उन्मादं करोतीत्येवंशीलं उन्मादियौवनं-तारुण्यं, तथा अयं देवोऽपि-राजापि नववयाः-यौवनस्थाः । किम्भूतः ? कमनीया-रम्या कान्तिर्यस्य स तथाविधः । तथा चलाः-चपला ये चकोराश्च मयूराश्च तैर्हारि-मनोज्ञं इदं रेवातटं, तथा च-पुनः मनोभवस्य-कामस्य आज्ञा मनोभवाज्ञा जयिनी जयतीत्येवंशीला जयिनी-जगद्वशविधायिनी, ततोऽहं न वेद्मि-न जाने, न सम्भावयामि[१] किं स्यात्-किं भविष्यति ? सर्वस्यापि उन्मादकारणस्य मिलितत्वात् मा कदाचिदकार्यं करोत्विति भावः । ★किं स्यादिति अनवक्लृप्त्यमर्षयोरकिं वृत्तेपीति किं वृत्ते किंवृत्तेपि "**लिङ् लृटौ स्तः**" [ ] असम्भावनामर्षयोस्त्रिषु कालेषु सर्वलकारापवादः इति असम्भावने भविष्यति लिङ् ★॥६५॥

**तथाहि–**

**विकलयति कलाकुशलं, हसति शुचिं पण्डितं विडम्बयति ।**
**अधरयति धीरपुरुषं, क्षणेन मकरध्वजो देवः ॥ ६६ ॥**

**तथाही**ति । तदेव जगज्जयित्वं तस्या दर्शयति–

**विकले**ति । मकरध्वजः-कामो देवः कलासु कुशलं-दक्षं पुरुषं विकलयति-

---

१. संभावयामि नास्ति अनू. । ★–★ चिह्नान्तर्गतपंक्तिर्नास्ति अनू. किन्तु अस्य स्थाने इयं पंक्तिर्वर्तते "स्यादित्यव्ययं तिङन्तप्रतिरूपकम्" अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निःकलं कुरुते । तथा शुचिं-शुद्धं अनुपहतं वा पुरुषं हसति-तर्जयति । तथा पण्डितं विडम्बयति-लघूकरोति । तथा धीरपुरुषं अधरयति-गलहस्तयति विधुरयतीत्यर्थः । **"शुचिः शुद्धे सितेऽनिले । ग्रीष्माषाढानुपहतेषूपधाशुद्धमन्त्रिणि । शृङ्गारे"** इत्य**नेकार्थः** [२/६१-६२] ॥ ६६ ॥

**अपि च–**

**मध्ये[१] त्रिवलीत्रिपथे पीवरकुचचत्वरे च चपलदृशाम् ।**
**छलयति मदनपिशाचः पुरुषं हि मनागपि स्खलितम्[२] ॥ ६७ ॥**

**अपि** च-पुनः–

**मध्येति** । चपलदृशां रमणीनां मध्येऽवलग्ने या त्रिवली सैव त्रिपथं तस्मिन्, च-पुनः पीवरौ कुचावेव चत्वरं-पथां श्लेषः तस्मिन्, हि-निश्चितं मनागपि-स्तोकमपि स्खलनं[१]-तद्दत्तदृष्टिं पुरुषं मदन एव पिशाचो मदनपिशाचश्छलयति-वशीकरोति । अन्योपि पिशाचस्त्रिपथे चत्वरे च ईषत्स्खलितमपि भूपातादिना पुरुषं छलयति- विकलीकरोति । त्रयाणां पथां समाहारस्त्रिपथं **ऋक्पूरब्धूः पथमानक्षे** [पा. सू. पू. ५/४/७४] । इति अप्रत्ययः समासान्तः, पात्रादित्वात् स्त्रीत्वं न ॥ ६७ ॥

**तदस्तु प्रस्तुतरसानुनयेनैव प्रभूणां मतयो निवर्त्यन्ते निषिद्धनिषेवणात,**

**न प्रतिकूलतया' इत्यवधारयन्नवनिपति[३]मवादीत् ।**

**'देव' रमणीयः खल्वयं प्रदेशः ।**

**तत्**-एतत् सर्वमुन्मादकारणमस्तु, परं निषिद्धस्य निषेवणं-सेवनं आग्रहस्तस्मात् सकाशात् प्रभूणां-स्वामिनां मलयः-प्रस्तुतरसानुनयेनैव-प्रकृतरसानुमत्यैव निवर्त्यन्ते-व्यावर्त्यन्ते, न प्रतिकूलतया हठात् । निषिद्धस्य निन्द्यजातिसङ्गमादेराग्रहं-स्वीकारं कुर्वाणः प्रभुः सहायसम्पदानुजीविना निवार्यः, परं तदभिमतं प्राक् पुरस्कृत्य दोषं च दर्शयित्वा सहसा निवार्यमाणोपि हि प्रभुः पराभवमिव मन्येत । इति अवधारयन्-मनसि आकलयन् श्रुतशीलः अवनिपतिं-नलं अवादीत् ।

**हे देव** ! रमणीयः खलु-निश्चितं अयं प्रदेशः ।

---

१. स्खलितं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तथाह्यत्र–**

**आह्लादयन्ति मृदवो मृदितारविन्द-**
**[1]निष्यन्दमन्दमकरन्दकणान्किरन्तः।**
**एते किरातवनितास्तन[2]गण्डशैल-**
**संघट्टजर्जररयः[3] सरितः समीराः ॥ ६८ ॥**

**तथाहीति** । तदेव रमणीयत्वं दर्शयति । अत्रेति हे देव ! अत्र-नर्मदातीरे-

आह्लादेति[1]। एते मृदवः-सुखस्पर्शाः सरितः-नद्याः समीराः-वाताः आह्लादयन्ति-प्रमोदयन्ति । एतावता शैत्यं दर्शितम् । किं कुर्वन्तः समीराः ? मृदितानि-दोलितानि यानि अरविन्दानि तेषां निष्यन्दाः-रसरूपाः मन्दाः- तनवो ये मकरन्दकणास्तान् किरन्तः-विक्षिपन्तः । एतावता सौरभ्यमदर्शि । तथा किरातवनितानां-शबरवधूनां स्तनावेव गण्डशैलौ तयोः संघट्टनेन[2]-संश्लेषेण जर्जरः-मन्दीभूतो रयः-वेगो येषां ते एवम्विधाः । अनेन मान्द्यं दर्शितम् ॥ ६८ ॥

**एताश्च–**

**उपनदि पुलिने पुलिन्दवध्वः स्तनपरिणाहविनिर्जितेभकुम्भाः ।**
**शिथिलितसलिलार्द्रकेशबन्धाः किमपि मनोभववैभवं वहन्ति ॥६९॥**

**एताश्चेति** । च-पुनः एताः-पुलिन्दवध्वः–

[**उपनदीति**] उपनदि-नद्याः समीपे पुलिने-सैकते किमपि-अद्भुतं मनोभवस्य-कामस्य वैभवं-ऐश्वर्यं वहन्ति-धारयन्ति । किम्भूताः ? स्तनपरिणाहेन-पयोधरविशालतया विनिर्जित इभ[3]कुम्भो याभिस्ताः । तथा शिथिलितः-श्लथितो विरलीकृतः सलिलेन आर्द्रः-क्लिन्नः केशानां बन्धः-बन्धनं अन्योन्यग्रथनं याभिस्ताः ॥ ६९ ॥

**इतश्चावलोकयतु देवः–**

**सरसिजमकरन्दामोदमत्तालिगीत-**
**श्रवणसुखनिमीलच्चक्षुषः किंचिदेते ।**
**अपि दिवसमशेषं निश्चलाङ्गाः कुरङ्गाः,**
**पुलिनभुवि विहाराहारवन्ध्या वसन्ति ॥७०॥**

**इतश्च**-अस्मिन्प्रदेशे अवलोकयतु-पश्यतु देवः-

---

१. नास्ति अनू. । २. संघट्टेन अनू. । ३. निर्जित इव अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सरसीति । पुलिनभुवि-तटभूमौ एते कुरङ्गाः अपिः-भिन्नक्रमे अशेषमपि-समस्तमपि दिवसं विहारेण-विचरणेन आहारेण च-भक्षणेन वन्ध्या-रहिता वसन्ति-तिष्ठन्ति। तत्र कारणमाह—किम्भूताः ? किञ्चित्-अल्पं सरसिजानां-पद्मानां यो मकरन्दस्तस्य यः आमोदः-परिमलस्तेन मत्ता ये अलयः-भृङ्गास्तेषां यद्गीतं-झङ्कारारवस्तस्य श्रवणे यत्सुखं-सौख्यं तेन निमीलती-संकुचती चक्षुसी येषां ते तथाविधाः। पुनः किम्भूताः ? तद्गानरसादेव निश्चलानि अकं-प्राणि अङ्गानि-शरीरावयवा येषां ते । मृगा भृङ्गझङ्कारारवश्रवणरसिकतया विहारमाहारं च न कुर्वन्तीति समुदायार्थः ॥ ७० ॥

**इतोऽपि—**

**पद्मान्यातपवारणानि नलिनीपत्राणि पर्यङ्किका,**
**दोलन्दोलनदोहदोऽपि च चल[1]द्वीचीचयैः पूर्यते ।**
**आहारो बिसपल्लवाः[2] पुलिनभूर्लीलाविहारास्पदं,**
**रेवावारिणि राजहंसशिशवस्तिष्ठन्ति धन्याः सुखम् ॥ ७१ ॥**

हे देव ! **इतोपि—**

**पद्मेति** । रेवावारिणि धन्याः-पुण्यवन्तो राजहंसशिशवः सुखं-स्वेच्छया तिष्ठन्ति । अथ सुखावस्थानप्रकारानाह—येषां पद्मानि-अम्भोजानि आतपवारणानि-छत्राणि, तेषां तदधः स्थितत्वात् पद्मानां छत्राकृतित्वम् । तथा येषां नलिनीपत्राणि-कमलिनीदलानि पर्यङ्किका-पल्यङ्कस्तेषामुपरि शयितत्वात् । तथा च-पुनः येषां चलन्तः-प्रेङ्खन्तो ये वीचीचयाः-ऊर्मिसमूहास्तैः कृत्वा दोलया-प्रेङ्खया यद् अन्दोलनं-क्रीडनं तस्य दोहदः-अभिलाषोपि पूर्यते-सम्पद्यते । तथा येषां बिसानि-कमलतन्तवः पल्लवाश्च-किसलयानि ते आहारः-भक्ष्यम् । तथा येषां पुलिनभूः-तटभूमिर्लीलाविहारस्य-लीलाविचरणस्य आस्पदं-आश्रयः, तत्र क्रीडन्तीत्यर्थः । अत्राऽऽतपत्रप्रभृतयो राजधर्मा राजहंसशिशुषु राजपुत्रेष्वपि उद्भावनीयाः । पर्यङ्किका आहारास्पदानामजहल्लिङ्गता ॥ ७१ ॥

**इहापि—**

**चिरविरचितचाटुश्चन्द्ररेखायमाणं[3],**
**प्रथमरसबिसाग्रग्रासलीलार्पणेन ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इह रमयति हंसीं राजहंसो रिरंसुः,**
**पुलकयति च चञ्चूकोटिकण्डूयनेन ॥७२॥**

हे देव !-नृप ! **इहापीति**

**चिरेति** । इह रेवातटे रिरंसुः-रन्तुमिच्छुः राजहंसो हंसी श्वेतत्वात् श्लक्ष्णत्वाच्च चन्द्ररेखेव आचरत् चन्द्ररेखायमाणं प्रथमरसं-प्रकृष्टास्वादं यद् बिसाग्रं-कमलतन्तुप्रान्तस्तस्य यो ग्रासः-कवलस्तस्य लीलया-विलासेन यदर्पणं वितरणं तेन रमयति-क्रीडयति, बिसग्रासं तस्या आनने अर्पयतीत्यर्थः । च-पुनः चञ्चूकोट्या-चञ्च्वग्रभागेन यत्कण्डूयनं-खर्जूकरणं तेन पुलकयति-रोमाञ्चयति । किम्भूतो राजहंसः ? चिरं-चिरकालं विरचितं-कृतं चाटुप्रियवचनं येन सः ॥ ७२ ॥

**अपि च—**

**इह चरति चकोरः कोरकं पङ्कजाना-**
**मिह चलदलिचक्राच्चक्रवाको बिभेति ।**
**इह रमयति जीवंजीवको जीवितेशा-**
**मिह वहति विकारं हारि हारीतकोऽपि ॥७३॥**

**अपि च**-पुनः-

**इहेति** । हे देव ! इह-प्रदेशे चकोरः पङ्कजानां-पद्मानां कोरकं-कुड्मलं चरति-भक्षयति । तथा इह प्रदेशे चक्रवाकः चलद्- विचरद् यदलिचक्रं-भृङ्गवृन्दं तस्माद् बिभेति-त्रस्यति, तमस्विनी भ्रान्त्येति शेषः । तथा इह प्रदेशे जीवंजीवकः-पक्षी जीवितेशां-प्रियां रमयति । तथा इह प्रदेशे हारी-मनोहरो हारीतकः-पक्षिविशेषः सोऽपि विकारं-स्मरकेलिं वहति-बिभर्त्ति ॥ ७३ ॥

**एवमसौ निषधेश्वरः श्रुतशीलेन प्रज्ञापूर्वमपररमणीयप्रदेशान्तरदर्शन-व्याजेनान्तरितशबरसुन्दरीदिदृक्षाग्रहो गृहान्प्रतिप्रत्यावृत्तः ।**

**एवं**-अमुना प्रकारेण असौ निषधेश्वरः श्रुतशीलेन प्रज्ञापूर्वं-बुद्धिपूर्वकं यथा भवति तथा स्वबुद्ध्येत्यर्थः । अपराणि-शबरवधूरमणप्रदेशादन्यानि यानि रमणीयप्रदेशान्तराणि तेषां दर्शनव्याजेन-अवलोकनदम्भेन अन्तरितः-व्यवहितः शबरसुन्दरीणां दिदृक्षाग्रहः-अवलोकनेच्छाहठो यस्य सः, श्रुतशीलदर्शितप्रदेशान्तरदर्शनेन विस्मृत तदवलोकनरसः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यर्थः । एवंविधः सन् गृहान् प्रति-शिबिरसन्निवेशं प्रति प्रत्यावृत्तः-पश्चादायातः ।

**चिन्तितवांश्च[१]–**

**'कथं नु[२] सा दमयन्ती पुरंदरप्रमुखेषु लोकपालेष्वर्थिषु मया मनुष्यजन्मना लब्धयेति । निवारयिष्यन्ति च तां खलु दिव्यसम्बन्धार्थिनो[३] बान्धवाः । तत्किमिह शरणम्' इति विमुक्तदीर्घनिःसहनिःश्वासमसकृच्चिन्तयति राजनि[४] राजन्, रामाजनः पद्म इव वारितः सुतरां प्रवर्तते । नालमस्य दीर्घमनुरक्तस्य जायतेऽपरागो[५]ऽलीकामि- निवेशोऽस्य हीयते । किंचान्यदन्यपरिग्रहवर्तिनीनामपि स्त्रीणामन्यत्रापि रागाग्रहो[६] भवति[७] । यतः पश्यवरुणपरिग्रहेऽपि[८] प्रतीचीयं मय्यपि[९] रागिणी भविष्यति' । इत्येवमेनं[१०]माश्वासयन्निव[११] भगवान्भानुरु[१२]त्तुङ्गतरुशिखराणि करैः पतनभयादिवालम्बमानः[१३] शनैर्गगनतलादवतीर्य प्रतीचीं दिशमयासीत् ।**

इति **चिन्तितवांश्च**-विचारितवान् । इतीति किम् ? नु-इति वितर्के, सा दमयन्ती पुरन्दरप्रमुखेषु पुरन्दरः प्रमुखः-मुख्यो येषां तेषु लोकपालेषु-कुबेरादिषु अर्थिषु-अभिलाषिषु सत्सु कथं मया मनुष्येषु जन्म-उत्पत्तिर्यस्यासौ मनुष्यजन्मा तेन लब्धव्या-प्राप्तव्या, इन्द्रादिवरेषु सत्सु मयि विषये कीदृगनुराग इत्यर्थः । च-पुनः दिवि भवा दिव्याः-इन्द्रादयः **"द्युप्रागपागुदक्प्रतीचो यत्"** [पा. सू. ४/२/१०१] इति यत् शेषेऽर्थे, तैः सह यः सम्बन्धः-स्वजनता तं अर्थयन्ते-अभिलषन्तीत्येवंशीला ये ते दिव्यसम्बन्धार्थिनस्तस्या बान्धवाः-भ्रात्रादयः, खलु-निश्चितं मत्तस्तां-दमयन्तीं निवारयिष्यन्ति-प्रतिषेधयिष्यन्ति । 'अयं मनुजः इमे[१] देवाः ततो वरमेभिः सह सम्बन्ध' इति विमृश्य बान्धवा अपि तां तेष्वेव प्रोत्साहयिष्यन्तीति । तत्तस्माद्धेतोः इह-प्रस्तावे किं शरणम् ? इति हेतोर्विमुक्तो दीर्घो निस्सहः-सोढुमशक्यो निःश्वासः-मुखमारुतो, यत्र चिन्तने एवं यथा भवति तथा राजनि-नले असकृत्-वारंवारं चिन्तयति सति, शनैः-क्रमेण गगनतलाद् अम्बराद् अवतीर्य भगवान् भानुः प्रतीचीं-पश्चिमां अयासीत् अगात् । किं कुर्वन् ? एनं-नृपं एवं-अमुना प्रकारेण आश्वासयन्निव-दुःखनिवृत्तिं कारयन्निव । तमेव प्रकारमाह–अहो राजन् ! त्वया स्वचेतसि न एवं चिन्तनीयं यद्दिव्यसम्बन्धार्थिनो बान्धवा अपि तां वारयिष्यन्ति तदैषाऽस्मत्तो विरंस्यतीति । यतो रामाजनो वारितः-निषिद्धः सुतरां-अतीव प्रवर्तते । तथा अस्य-स्त्रीजनस्य दीर्घमनुरक्तस्य-बहुकालं सानुरागस्य सतो अलं-अत्यर्थं न अपरागः-रागापायो जायते, न तस्या, रागस्ततो निवर्तत इत्यर्थः । तथा अस्य-रामाजनस्य अलीकोपि-असत्योपि

---

१. अमी च अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अभिनिवेशः-आग्रहो हठो न हीयते-नाल्पीभवति, किं पुनर्यादृक् त्वयि अभिनिवेशः । क इव ? पद्म इव । यथा पद्मः-अब्जं वारितः-जलात् प्रवर्तते तथा अस्य पद्मस्य रक्तस्य सतो नालं-काण्डं दीर्घमनु-सह परागः-मकरन्दो जायते, नालेन सह मकरन्दोपि वर्द्धत इत्यर्थः । सहार्थेनानुयोगेन द्वितीया । तथा अली-भृङ्गी कं-जलं तयोरभिनिवेशः-प्रवेशो यः सोप्यस्य पद्मस्य न हीयते-न हीनः स्यात् । पद्मशब्द उभयलिङ्ग । "**पद्मोऽब्जसंख्यो**" [५७] इति **लिङ्गानुशासनोक्तेः** । किञ्च-पुनरन्यत् उच्यते, अन्यस्य परिग्रहे-स्वीकारे वर्तन्त इत्येवंशीलाः अन्यपरिग्रहवर्त्तिन्यस्तासां अन्यपुरुषस्वीकृतानामपि स्त्रीणामन्यत्रापि-पुरुषान्तरे रागग्रहो भवति-रागानुबन्धः स्यात्, किं पुनरनया स्वीकृतायास्तस्या इत्यपि शब्दार्थः । यतः-यस्मात् सम्प्रति-अद्यापि पश्य त्वं वरुणस्य-पश्चिमाधिपतेः परिग्रहेपि- वरुणस्वीकृतापि इयं प्रतीची-पश्चिमाशा मय्यपि-ममापि विषये रागिणी-रक्ता भविष्यति तथा सापि त्वयि रागिणी भविष्यतीति भावः । पुनः किं कुर्वन् ? उत्तुङ्गानि-उन्नतानि यानि तरुशिखराणि-वृक्षप्रान्तास्तानि करैः-किरणैरालम्बमानः-आश्रयन्, वृक्षप्रान्तेषु सायं रविरुचिरवलोक्यते । उत्प्रेक्ष्यते, पतनभयादिव, अन्योपि पतनभीत्या कराभ्यां-पाणिभ्यां किञ्चिदालम्बत एव तथाऽयमपि ।

**अम्बरान्तःप्रसारितकरे रागिणि रक्तया परियुक्ते[१] पश्चिमककुभा-ऽम्भोजिनीजीवितेश्वरे ।**

तदानीं **अम्बरान्तः**-नभोऽन्तः प्रसारिताः कराः-अंशवो येन स तस्मिन्, तथा रागिणि-रक्तयान्विते तथा रक्तया पश्चिमककुभा- प्रतीची दिशा परियुक्ते-सहिते, एवंविधे अम्भोजिनीजीवितेश्वरे-रवौ सति प्राच्या चिन्तितं तदाह-

**पूर्वाहं विहितोदयाहमसकृत्तन्मां[२] विहायाधुना,**<br>
**यस्यामस्तमुपैति तां कथमयं रागी जघन्यामगात् ।**<br>
**इत्येवं श्लथितांशुके दिनपतौ याते दिशं पश्चिमा-**<br>
**मीर्ष्यारोषविषादिनीव तमसा प्राची ककुब्लक्ष्यते[३] ॥ ७४ ॥**

**विश्लेषाकुलचक्रवाकमिथुनैरुत्पीड[४]माक्रन्दिते,**<br>
**कारुण्यादिव मीलितासु नलिनीष्वस्तं च मित्रे[५] गते ।**<br>
**शोकेनेव दिगङ्गनाभिरभितः श्यामायमानैर्मुखै-**<br>
**र्निःश्वासानलधूमवर्तय इवोद्गीर्णास्तमोराजयः ॥ ७५ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**पूर्वाह**मिति वृत्तम्। पूर्वा-आद्या अहं तथा असकृद्-वारम्वारं विहितः-कृत उदयो यया सा तथाविधा अहं, तत्तस्मात् मां विहाय अधुना यस्यां अस्तमुपैति-प्राप्नोति तां जघन्यां-निकृष्टां अयं रविः रागी-आरक्तः सन् कथं अगाद्-ययौ । इत्येवं-अमुना प्रकारेण पश्चिमामाशां गते श्लथितांशुके-शिथिलतांशौ दिनपतौ-रवौ विषये ईर्ष्या-रोषोऽसूया- कोपस्तस्माद् विषादिनी वसती प्राचीककुब्-पूर्वादिक् तमसा-अन्धकारेण कृत्वा लक्ष्यते-ज्ञायते । अन्योऽपि प्रथमां कृतोदयां विहाय अन्यामस्तंकारिणी निकृष्टां च यदा रागी विलासी याति तदा तस्मिन् शिथिलितवाससि पूर्वा स्त्री ईर्ष्याविषादिनी तमसा-तमोभावेन प्राप्यते ॥ ७४ ॥

**विश्लेषेति** वृत्तम् । नलिनीषु-पद्मिनीषु मीलितासु-संकुचितासु सतीषु, उत्प्रेक्ष्यते-विश्लेषेण-वियोगेन आकुलानि- दुःखानि तानि[१] यानि चक्रवाकमिथुनानि तैः उत्कृष्टा पीडा यत्रेत्युत्पीडं यथा भवति तथा आक्रन्दिते-रटिते सति कारुण्यादिव-चक्रवाकद्वन्द्ववृन्दं दुःखितं दृष्ट्वा समुत्पन्न कृपारसादिव अन्योपि सदयः परं दुःखिनं दृष्ट्वा संकुचयत्येव । च-पुनः मित्रे-सूर्ये अस्तंगते सति, उत्प्रेक्ष्यते-दिगङ्गनाभिः शोकेनेव यदयं सर्वाशाप्रकाशकः सूर्यो अस्तंगत इति शुचेव अभितः कार्त्स्न्येन श्यामायमानैः-अश्यामानि श्यामानि भवन्ति श्यामायमानानि तैर्मुखैः निःश्वासानलस्य-निःश्वासाग्नेर्धूमवर्त्तय इव-धूमरूपा वर्त्तयः-दशा इव तमोराजय उद्गीर्णाः-उद्वान्ताः । मन्ये, इमास्तमोराजयो न भवन्ति किन्तु दिगङ्गनाभिरेनं-रविं अस्तमितं दृष्ट्वा स्वमुखेभ्यः शोकान्निःश्वासाग्रे धूमा मुक्ताः सन्तीति समुदायार्थः । "**वृत्तिर्गात्रानुलेपिन्यां दशायां दीपकस्य च । दीपे भेषजनिर्माणे नयनाञ्जनलेखयोः**" [२/१९६-९७] इत्य**नेकार्थः** । श्यामायमानानीति "**डाच् लोहितादिभ्यः**" [**लोहितादिडाज्भ्यः क्यष्** पा. सू. ३/१/१३] इति क्यष । ॥ ७५ ॥

## तथाविधे च वेलाव्यतिकरे राज्ञः संध्यावसरमावेदयितुमासन्न[१]विहारि[२] लीलाकिंनरमिथुनमिदमगायत्–

**तथाविधे** च-एवंरूपे वेलाव्यतिकरे-सन्ध्यासमयसम्बन्धे सति राज्ञः-नलस्य सन्ध्यावसरमावेदयितुं-ज्ञापयितुं आसन्ने-निकटे विहर्तुं शीलं यस्य एवंविधं यल्लीलायै-केलये किन्नरमिथुनं तत् इदं-वक्ष्यमाणं वृत्तमगायत्-गायति स्म ।

**रक्तेनाक्तं विनिहितमधोवक्त्रमेतत्कपालं,**
**तारामुद्राः किमु कलयता कालकापालिकेन ।**

१. दुःखितानि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**संध्यावध्वाः किमु विलुठिता कौंकुमी शुक्तिरेवं,**
**शङ्कां कुर्वज्जयति जलधावर्धमग्नार्कबिम्बम् ॥ ७६ ॥**

**रक्तेने**ति । एवं इत्थं शङ्कां कुर्वत्-उत्पादयत् जलधौ-समुद्रे अर्धं-शकलं मग्नं-ब्रुडितं यदर्कबिम्बं-रविमण्डलं तदधुना जयति । एवमिति कथम् ? काल एव-अनेहा एव कापालिकः-महाव्रतिकस्तेन[१] ताराः-नक्षत्राण्येव मुद्राः-रुचकाख्यानि हस्तपदादीनां अस्थ्याभरणानि कलयता-युञ्जानेन सता अधस्ताद् वक्त्रं यस्य तदधोवक्त्रं-अधोमुखं तथा रक्तेन -रुधिरेण अक्तं-लिप्तं तत्तथाभूतं एतत् किमु[२]-किं कपालं-नरशिरोऽस्थि विनिहतं-न्यस्तं । कपालेन चरति कापालिकः चरतीत्यर्थे ठक् । किम्विति वितर्के वेत्याकृष्यते । किं वा सन्ध्यैव या वधूस्तस्याः सम्बन्धिनी कुङ्कुमेन रक्ता कौङ्कुमी शुक्तिर्विपरीता अधोमुखी लुठिता-विलुठिता ॥ ७६ ॥

**अथ क्रमेण गगनमन्दाकिनीतीरतापसैर्विकीर्णेषु[१] संध्यार्घाञ्जलि-जलबिन्दुबुद्बुदेष्विव किंचिदुन्मीलत्सु [२]विरलतरतारास्तबकेषु, वासर-विरामवादितवाद्येष्वमरसदनेषु, दह्यमानबहलधूपधूममञ्जरीष्विव वियति विहरन्तीषु तनुतिमिरवल्लरीषु, स्वप[३]त्पतत्रिकुलकोलाहलेन वासार्थि-श्रान्ता[४]ध्वगस्वागतालापमिव कुर्वाणासु वनराजिषु, अन्यत्र परिभ्रमण-परिहारार्थमिव पद्मिनीनां[५] कोशपानमाचरत्सु चञ्चलचञ्चरीकेषु, रत्युत्सवोत्सा-हावेशमन्त्राक्षरेष्विव[६] श्रूयमाणेषु [७]सरित्कूलकुलायनिलीनजल-कुक्कुभ[८]कुहरितेषु, रामायणव्यतिकरेष्विव मन्दोदरीप्रहस्तप्रबोधितोत्सिक्त-दशाननेषु संध्याप्र-दीपेषु जाते जरत्कुम्भकारकुक्कुटकुटुम्ब[९]पक्षपिच्छविच्छाये मनाक्तमोनुविदधे संध्यारागे राजा विषादविस्मृतसंध्याह्निकः[१०] परिजनानु-बन्धात्संध्यां ववन्दे[११]।**

**अथ**-अनन्तरं राजा-नलः विषादेन-मनःपीडया विस्मृतं सन्ध्याया आह्निकं-अनुष्ठानं यस्य स एवम्विधः सन् परिजनानुबन्धात्-परिजनाग्रहात् सन्ध्यां ववन्दे-सन्ध्यावन्दनां चकार। केषु सत्सु ? क्रमेण-क्षणातिक्रमपरिपाट्या विरलतराः-अतिशयेन विरलाः पृथक् पृथक् वर्त्तमानास्तारा एव स्तबकाः-गुच्छास्तेषु, किञ्चित्-स्तोकं उन्मीलत्सु-विकसत्सु सत्सु। उत्प्रेक्ष्यते, गगनमन्दाकिन्याः-नभोगङ्गायास्तीरे ये तापसास्तैर्विकीर्णेषु-विक्षिप्रेषु सन्ध्यायै ये अर्घाञ्जलिबिन्दवस्तेषां ये बुद्बुदाः-स्थासकास्तेष्विव । मन्ये, इमास्तारा

१. तेन नास्ति अनू. । २. किं किमु अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न भवन्ति किन्तु नभोगङ्गातटनिवासितापसैः सन्ध्यायै अर्घाञ्जलिर्ददे तस्य बुद्बुदा अमी सञ्जाता इति। तथा वियति-आकाशे तन्व्यः-सूक्ष्माः किञ्चित्प्रकाशात् यास्तिमिरवल्लर्यः-अन्धकारलतास्तासु विहरन्तीषु-विचरन्तीषु सतीषु। उत्प्रेक्ष्यते, अमरसदनेषु-देवगृहेषु दह्यमानो बहुलः-प्रचुरो यो धूपः-गन्धद्रव्ययोगविशेषस्तस्य या धूममञ्जर्यस्तास्विव। किम्भूतेषु अमरसदनेषु ? वासरविरामे-दिन-निवृत्तौ वादितानि वाद्यानि-वादित्राणि येषु तेषु। तथा उत्प्रेक्ष्यते, वनराजिषु-वनश्रेणिषु स्वपत्-शयनं कुर्वद् यत् पतत्त्रिकुलं-पक्षिवृन्दं तस्य यः कोलाहलस्तेन कृत्वा वासार्थिनः-वासाभिलाषुकाः श्रान्ताः-अध्वातिक्रमणेन खिन्ना ये अध्वगाः-पान्थास्तेषां स्वागतालापं-सुखागमनप्रश्नं कुर्वाणास्विव। मन्ये, वनराजिभिः पक्षिकूजितेन श्रान्तागतपथिकानां स्वागतं पृच्छ्यत इति भावः। तथा चञ्चलचञ्चरीकेषु-चपलभृङ्गेषु पद्मिनीनां कोशः-कुड्मलं तस्य पानमाचरत्सु-कुर्वत्सु सत्सु, पक्षे-कोशः-शपथविशेषः। उत्प्रेक्ष्यते, अन्यत्र जात्यादौ परिभ्रमणस्य-गमनस्य परिहारार्थमिव-निषेधार्थमिव, यथा वयमन्यत्र यास्यामः[१] इत्यर्थे पद्मिनीनां समीपे कोशपानं कुर्वन्तीति। अन्योपि विलासी पद्मिन्याः पुरतो अन्यत्रगमनस्य प्रतिषेधं कुर्वन् कोशपानं-शपथविशेषं कुरुत एव। "**कोशः कोष इवाण्डके। कुड्मले चषके दिव्येऽर्थे चये योनिशिम्बयोः। जातीकोषे सिपि धाने**" [२/५५९-५६०] इत्य**नेकार्थः**। तथा सरित्कूले- रेवातटे ये कुलायाः-नीडानि तेषु निलीनाः-स्थिता ये जलकुक्कुभाः-कोयष्टिपक्षिणस्तेषां कुहरितेषु-शब्दितेषु श्रूयमाणेषु सत्सु, उत्प्रेक्ष्यते, रत्युत्सवस्य-सुरतोत्सवस्य उत्साहः-उद्यमः स एव आवेशः-ग्रहप्रवेशस्तस्मै मन्त्राक्षरेष्विव-मन्त्रवर्णेष्विव। मन्ये, अमूनि तत्कुहरितानि न, किन्तु रत्युत्सवोत्साहावेशाय मन्त्राक्षराणि गीयन्त इति। यथा मन्त्राक्षरैर्ग्रहप्रवेशः संजायते तथा तच्छब्दितश्रवणात् सुरतोत्सवोत्साहो जायत इत्यर्थः। तथा मन्दोदरीभिः-क्षामोदरीभिः प्रहस्तेन-प्रकृष्टपाणिना प्रबोधितानि-ज्वालितानि उत्सिक्तानि-तैलसिक्तानि दशाननानि-वर्त्तिमुखानि येषु एवम्विधेषु सन्ध्या-प्रदीपेषु सत्सु, केष्विव ? रामायणव्यतिकरेष्विव-रामायणवृत्तान्तेष्विव। तेषु किम्भूतेषु ? मन्दोदरीनाम्न्या पत्न्या प्रहस्तेन च सेनान्या प्रकर्षेण बोधितः-ज्ञापितः उत्सिक्तः उद्रिक्तः सन् दशाननः-" रावणो येषु ते तथा तेषु। "**सम्बन्धे संकरवृत्तान्तयोः अपि व्यतिकरः**" [ ] **हेमानेकार्थवृत्तौ**[२] तथा जरन्तः-वृद्धा ये कुम्भकाराश्च कुक्कुटाश्च-पक्षिविशेषास्तेषां यत्कुटुम्बं-समूहस्तस्य पक्षौ-पक्षती पिच्छानि च-पत्राणि तद्वद् विच्छाये-धूम्रवर्णे, तथा मनाक्-स्तोकेन तमसा[२] अनुविद्धे-व्याप्ते एवम्भूते सन्ध्यारागे जाते सति।

---

१. न यास्यामः अनू.। २. नास्ति अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**रजनिमवनिनाथः सांध्यकर्मावसाने,**
**हरचरणसरोजद्वन्द्वसेवां विधाय ।**
**मृदुकलितविपञ्चीपञ्चमप्रायगीत-**
**श्रवणसुखविनोदैस्तां स तस्मिन्ननैषीत् ॥ ७७ ॥**

**इति श्रीत्रिविक्रमभट्टविरचितायां दमयन्तीकथायां**
**हरचरणसरोजाङ्कायां[१] पञ्चम**
**उच्छ्वासः समाप्तः ॥**

रजनिमिति । स अवनिनाथः-नलः तस्मिन्वने सान्ध्यकर्मणः-सन्ध्यावन्दना-देरवसाने-प्रान्ते हरचरणसरोजद्वन्द्वस्य-शम्भुपादपद्मयुगस्य सेवां विधाय-कृत्वा मृदु-मधुरं यथा भवति तथा कलिता-वादिता या विपञ्ची-वीणा तया, तथा पञ्चमरागः प्रायः-बाहुल्येन यत्र एवंविधं यद्गीतं-गानं तेन च श्रवणे-श्रोत्रे सुखयतीति[१] श्रवणसुखा, एवम्विधा ये विनोदाः-कौतुकानि तैः कृत्वा रजनीं अनैषीत्-अत्यवाहयत् । श्रवणसुखेति "**पचाद्यच्**" [ ] ॥७७॥

इति वाचनाचार्यश्रीप्रमोदमाणिक्यगणिशिष्यश्रीजयसोम-
गणितच्छिष्यपण्डित-श्रीगुणविनयगणिविरचितायां
श्रीत्रिविक्रमभट्टविरचितश्रीदमयन्ती-
कथाविवृतौ पञ्चम उच्छ्वासः
समाप्तः ।

●●●

---

१. सुखयन्तीति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# मूलपाठस्य पाठान्तराणि

**पञ्चम उच्छ्वासः**

३०७. १. वचसि निपा० । २. अभिधायेवोपरुध्यमाना; अभिधायोपसृत्य निरुध्यमाना निपा ३. द्विजन्मनेव निपा० । ४. इत्युक्तेव पु०; इत्युक्त्येव निपा० । ५. कथं कथमपि नि० चौ० । ६. त्यजतां पु० । ७. शैशवव्यतिकारः पु० । ८. इत्यभिधायेव नि० चौ० । ९. मुग्धे स्पृष्टा नि० चौ० । १०. इत्यनुशास्यैव निपा० । ११. °अवस्थं नि० चौ० ।

३०८. १. °अवस्थां निपा०। २. मनोरथपथानीत° निपा० । ३. ताम्यन्ती पु० । ४. नास्माकं तद्गुण श्रवणायाद्यापि पु० । ५. श्रोत्रेन्द्रियं नि० चौ० । ६. प्रश्नरसायनाय नि० चौ० । ७. न विरमत्यनुरागाय पु० निपा० । ८. तत्कथं कथय निपा० । ९. कारिणः निपा० । १०. °अविगतायां पु०; अर्धगतायां निपा० । ११. निवारणं पु० नि० चौ०। १२. अर्धे तृप्तिः पु० । १३. अप्राप्तरतस्य नि० चौ० । १४. युक्तमिवान्तरे नि० चौ०; युक्तमत्रान्तरे पु० निपा०; १५. अकारणोपकारिन् पु० निपा० । १६. 'पुनः नास्ति नि० चौ०; प्रवर्त्यतां पुनः निपा० । १७. पुण्यरासैः पु० । १८. मण्डये निपा० । १९. निर्वान्तुं च नि० चौ० । २०. दमयन्ती तामर्धेन; दमयन्तीमर्धेक्षितेन निपा० । २१ समालापयांचकार निपा० ।

३१०. १. प्रतिमस्याद्यापि नि० चौ०; २. 'किं' नास्ति पु० नि० चौ० । ३. वेणुवीणाक्वाणः पु० निपा०; । ४. अनुप्रसादिते निपा० । ५. धनद इत्यभाषत निपा० ।

३११. १. चाति पु० ।

३१२. १. सम्बाध्ते; सम्बोधां निपा० ।

३१३. १. सुष्ठुक्तेऽतिसुप्रतिष्ठिते जगत्याख्याते निपा० । २. सात्कृति० निपा० । ३. स्वार्थे सद्वंशस्थे विलसत्करकंकणस्थे पुण्यश्लोके निपा० । ४. विचार्यमाणे निपा० । ५. न वृत्तभङ्गो पु० निपा० । ६. ह्येकहस्ततलेन नि० चौ०; एकहस्ततलेन पु० । ७. न वाद्यते पु० । ८. अपरेण निपा०। ९. विफलमेतद् निपा० । १०. परिहासलीलां निपा० ।

३१४. १. अभ्यर्थिते पु० । २. सौन्दर्यं निपा० । ३. किमभ्यर्थ्यते पु० नि० चौ० । ४. परोपकारकरणाय निपा० । ५. 'रस' नास्ति नि० चौ० । ६. अशुकनं नि० चौ० । ७. अप्रस्तुतप्रश्नं नि० चौ० पु० अप्रस्तुत निपा० । ८. आचरामि नि० चौ० । ९. उपचारः निपा० ।

३१५. १. भवादृशानां निपा० । २. अलाभस्तद्दुःखमेव निपा०। ३. अतः प्रार्थ्यसे नि० चौ०; एष प्रार्थ्यसे पु० निपा० । ४. हारलते पु० । ५. द्वाभ्यां नि० चौ० । ६. अस्माद्राजहंसाच्च नि० चौ० पु० । ७. द्विः कालं निपा; द्विकालं च पु० । ८. त्वं मृत्युश्च निपा० । ९. द्विसंख्यासंदेशनार्थमिव निपा० । १०. उत्कण्ठितामिव नि० चौ० । ११. 'स्वां' नास्ति पु० निपा० । १२. 'तस्य' नास्ति पु० । १३. सौयं सुन्दरि पु० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

३१६. १. 'वियद्' नास्ति नि० चौ० । २. विहंगम° नि० चौ० । ३. संपद्यतां निपा० । ४. सफललोचनानि; सफललोचनता निपा० । ५. अपूर्व° पु० । ६. पक्षिमण्डले नि० चौ० । ७. निक्षिप्त° निपा० । ८. ऊर्द्धैव पु०; ऊर्ध्वमुखैत निपा० ।

३१८. १. संचिन्तयन्ती निपा० । २. °विस्मयविस्फारलोचना नि० चौ०; विस्मयेन विस्फारित-विलोचना निपा०; विस्तारितलोचना निपा० । ३. स्वगृहं नि० चौ० । ४. प्रभृति च नि० चौ० । ५. प्रीयते नि० चौ० । ६. सुखायांगेषु पु० ।

३१९. १. प्रोत्तुङ्गे विलगन्ति नि० चौ०; प्रोत्तुङ्गेऽपि गलन्ति निपा० । २. सामुद्रवृद्धिषु नि० चौ० । ३. विहरन्तो बिसशकलानि कवलयन्तः कूजन्तः निपा०; विहरन्तस्तुहिनाचल° पु० । ४. कुञ्जानिव पु० नि० चौ० । ५. 'पुर' नास्ति नि० चौ० । ६. लंघयन्तः पु० ।

३२०. १. तेषामन्यतमां नि० चौ० । २. °पंकजपिञ्जरां पु:; पंकजपुञ्जपञ्जरे निपा० । ३. आगत्य पु० नि० चौ० । ४. राजहंसं निपा० । ४. सरोरक्षिका लवङ्गिका पु० । ५. अनुदिनं पु० नि० चौ० ।

३२१. १. अवधारयन् नि० चौ०; २. 'सावसरं प्रशस्त' नास्ति नि० चौ० ।

३२५. १. सुखसंवित्तिशून्याः नि० चौ० । २. कथमप्येते निपा० । ३. अभिनन्दनीया सा नि० चौ० । ४. अकरोत् पु० । ५. के ते पु० नि० चौ० । ६. के पु० नि० चौ० । ७. प्राप्तप्राणितव्यफलाः नि० चौ० । ८. समं निपा० । ९. तदेहि निपा० । १०. परामृशत निपा० ।

३२७. १. उद्गतमावहन्ति निपा० ।

३२८. १. एकगुणेयं पु० निपा० ।

३२९. १ मधुमधुरया पु० । २. विहंगपुंगव पु० नि० चौ० । ३. किं च नि० चौ०; कीदृग्वयाः; किं वयाः निपा० । ४. कीदृश निपा० । ५. वाग्वेदग्ध्यं नि० चौ०; वा वैदग्ध्यं पु० । ६. श्रुतां श्रुतामपि; अतिभूयाः श्रुतामपि निपा० । ७. 'तत्' नास्ति पु० । ८. अपृच्छत् निपा० । ९. चटुलतर° पु० । १०. वेलालवान् नि० चौ० । ११. मध्यं निपा० । १२. भासुरमासि पु० नि० चौ० । १३. विश्राम्यतां वयस्य पु०; विश्रम्यतां नि० चौ० । १४. एवं नि० चौ० । १५. माध्याह्नाह्निकाय निपा० ।

३३१. १. एकदा नि० चौ० । २. °कुसुम्भ° निपा० । ३. शनैः शनैः पु० निपा० । ४. मन्दं मन्दं निपा० । ५. उच्वलत् पु० । ६. °कदम्बेन निपा० । ७. विहाय विहंगमः नि० चौ० । ८. उपगम्य निपा० । ९. मधुमधुर निपा० । १०. 'शौच' नास्ति नि० चौ० । ११. 'इदं' नास्ति पु० ।

३३२. १. विज्ञापयामः नि० चौ० । २. अनालेह्यं निपा० । ३. परितः परितोषः निपा० । ४. जलजन्मानोऽपि निपा० । ५. निजजन्मभूमयो निपा० । ६. सर्वमेतदपि पु० । ७. येन च नि० चौ०; । ८. अपरोधितेन पु० उपारोधिता निपा० । ९. वयं श्लाध्यं निपा० । १०.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रस्तावेन पु० निपा० । ११. भवन्तः पु० निपा० । १२. 'सर्वतः' नास्ति पु० नि० चौ० । १३. 'कथं' नास्ति नि० चौ० । १४. विसर्जयांचकार निपा० ।

३३३. १. अस्मरणीयोपकारे निपा०; अविस्मरणीयपरोपकारे पु० । २. मानससरः पु० निपा० । ३. 'आकर्णपूरीकृत-कार्मुकगुणे' पाठो नि० चौ० मध्ये अत्र स्थाने वर्तते परं 'मधुलिटां क्रंकारे' पाठस्थानन्तरं प्राप्यते । ४. चिन्तोत्तानितनिर्निमेषनयनं पु० नि० चौ० ।

३३४. १. उच्छकस्य पु० । २. अनुभवन भिन्न इव पु०; अनुभवन्निव भिन्न इव निपा० । ३. 'विध्यमान इव' नास्ति पु० निपा० । ४. °पुञ्जभाञ्जीवाङ्गानि निपा० । ५. उग्र° नि० चौ० । ६. 'इव' नास्ति नि० चौ० । ७. 'शयितो विप्रबुद्धो वा' नास्ति नि० चौ० । ८. प्रणालि° पु० निपा० ।

३३५. १. रश्मिश्रिया पु० नि० चौ:; राश्मिश्रियो निपा० । २. आन्दोलयन्तः नि० चौ० ।

३३६. १. स्पृष्टेव नि० चौ०; सृष्टेव पु० निपा० २. विचलत् पु० नि० चौ० । ३. °कुशेशयचारु निपा० । कुशेशये चारु निपा० । ४. न च नि० चौ० । ५. स्पृहयति निपा० । ६. भंगान्तरालेषु पु० नि० चौ० । ७. गण्डस्थलस्थापित नि० चौ० । ८. गगने पु० नि० चौ० ९. उत्तरीयांसुका नि० चौ० । १०. 'स्वयं' नास्ति नि० चौ० ।

३३८. १. स्खलन्ति; वलन्ति निपा० ।

३३९. १. प्रस्तरे निपा० । २. द्वयोः निपा० । ३. चम्पकवन निपा० । ४. स्वं हृदयं नि० चौ० । ५. नियोगः निपा० ।

३४०. १. सकलसुरासुर पु० । २. श्रृंगारस्य राजधानीं पु०; श्रृंगाररसराजधानीं नि० चौ०:, श्रृंगाररसराजधानी निपा० । ३. धर्म° नि० चौ० । °धर्मकर्म° निपा० ।

४. प्राच्यप्रतीचोदीच्यदाक्षिणत्य नि० चौ०; प्राच्योदीच्यवाच्यदाक्षिणात्य निपा० । ५. निमन्त्रणे नि० चौ० । ६. प्रगल्भप्रायात् पु० नि० चौ० । ७. 'च' नास्ति नि० ।

३४१. १. संचार्यतां पु० नि० चौ० । २. उत्तरं निपा० ।

३४३. १. 'इति' नास्ति पु० । २. 'अस्मि' नास्ति पु० । ३. ततो मया निपा० । मया च निपा० । ४. कृतोचिताचारलायेन निपा० । ५. प्रथमवयो विभूषितांगः नि० चौ:; प्रथमवयोविशेषभूषिताङ्गः; प्रथमवयोभूषितांगः निपा० । ६. 'तुङ्ग' नास्ति निपा० । ७. ग्रन्थिग्रथितपरिकरः निपा०; प्रथितपरिकरः निपा० ।

३४४. १. आयतवान् पु०; आगतवान् नि० चौ० । २. 'शाद्वल' नास्ति नि० चौ० । ३. °कान्त° निपा० । ४. °कुचकण्ठ° नि० चौ० । ५. °लुलित° निपा० ।

३४५. १. इयमेवान्यापि निपा० । २. 'क्वापि' नास्ति पु० । कापि क्वापि, नद्यास्तीरे विदर्भायाः कापि गोपालवालिकाः । गाः समुच्चारयत्येषा क्षेत्रीकृत्य नलं वरं । निपा० । ३. 'इति' नास्ति पु० । ४. 'युवा' नास्ति नि० चौ० । ५. 'च' नास्ति पु० । ६. 'च' नास्ति पु० नि० चौ० । ७. 'अन्यत्' नास्ति पु० । ८. कियच्चाद्यापि निपा० । ९. अथ नि० चौ० । १०. 'असौ' नास्ति पु० । ११. सौम्यः निपा० । १२. समस्तशास्त्रकोविदो नि० चौ०;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

समस्तशस्त्राशास्त्रकोविदो निपा० । १३. नलोनाम पु० निपा० । १४. श्रुतशीलो नि० चौ० । १५. च स्वयं निपा० । १६. उड्डीय गन्तुं नि० चौ० । १७. सस्मितेन निपा० । १८. अवलोकितेन निपा० । १९. चिरादिव निपा० ।

३४७. १. अचिरादेष्यति निपा० । २. स्वगृहान् निपा० । ३. कतमो नि० चौ; कः निपा० । ४. सुलक्षणा निपा० । ५. का नाम सा वेला पु० । ६. यस्यामिदं नि० चौ० । ७. कथमपि निपा० । ८. व्यनैषीत् नि० चौ० ।

३४८. १. परिवृतः सेनयोत्कण्ठ या च नि० चौ०। २. चलच्चतुरङ्ग निपा० । ३. बलचमूचलन° निपा० । ४. साश्चर्यापर्यन्तपर्यायाः पु० । ५. °चामरावधूलनालंकृत° नि० चौ०; चामरावधूननालंकृत° निपा० । ६. °संलगित° नि० चौ०; संकलित पु०; संमिलतमद-मिलित; संगलितमदजललुलित निपा० । ७. °आधोरणा° पु० । ८. स्फुरणाः नि० चौ०। ९. °पन्नगशिरः सहस्र° निपा० ।

३५०. १. समुल्लसन्तो नि० चौ० । २. उल्लुण्ठितनिपुपुरः नि० चौ० ।

३५१. १. °कन्दर° निपा० ।

३५२. १. पुनः चौ० । २. बहलः नि० चौ० । ३. गिरीन्द्रान् निपा० । ४. सीमाश्च निपा० । ५. 'च' नास्ति पु० । ६. अतिलंधयन् पु० । ७. °सहस्रमजस्रनमर° पु० नि० चौ० ।

३५४. १. नक्षत्रावसन्नकाशावकाश° पु० । २. विशद्वंशजालजटिलासु नि० चौ०; विशद-विकसितवंशजालजटिलासु निपा० ।

३५५. १. विन्ध्यशैलस्थल° निपा०; विन्ध्यमध्ये स्थल° पु०। २. कूटकच्छाः पु० । ३. अन्तरे च यस्याः पु; अपि च अन्तरेप्यस्यां नि०चौ०; अपि च अन्तरेऽपि यस्याः निपा० । ४. °गण्ड° पु० निपा० । ५. भृंगकुलावलीः नि० चौ० । ६. लीलाभृतः निपा०।

३५६. १. तीरे नि० चौ० । २. भासि नि० चौ० ।

३५७. १. हस्तलताहता नि० चौ० ।

३५९. १. °प्रबल° नि० चौ० ।

३६०. १. अद्यतन निपा० । २. दिनं पु० । ३. °श्रमापन्नखेदापनुत्ति° नि० चौ० । ४. 'येषा' नास्ति पु० । ५. वल्गद्वल्गुलि; वटवल्गुलि निपा० । ६. वनौकसां नि० चौ० ।

३६२. १. °पवनाहतितल° पवनाहतलतागलि° निपा० । २. °सुगन्धिविविधविकाच° नि० चौ०; सुगन्धिविवधविकच° पु० । ३. मकरन्दामोदमापीय निपा० । ४. तुंगतरतरु° निपा० । ५. वनदेवताया° पु० । ६. अधोविलम्बि नि० चौ०; अधोलम्बित निपा० । ७. तरूशिरः शिखर° पु० नि० चौ० । ८. विहगावलयो निश्चल नि० चौ०; विहंगावलयो निश्चलं पु० । ९. जृम्भमाण निपा; विजृम्भाय पु० । १०. संगृहीत नि० चौ०; संगृहीतमिव निपा०; सुगृहीतमिव पु० । ११. 'इव' नास्ति पु० । १२. अवलोक्यते निपा० । १३. कोकिलाकुल° नि० चौ० । १४. पाण्डुशिखराः निपा० । १५. °विगलितबहलमकरंद° पु०

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नि० चौ० । १६. °उन्माद° पु० । १७. °तरुशिखरशिरः निपा० । १८. वनकपोत पु० नि० चौ० । १९. °कुक्कुलकुल° नि० चौ०; कुक्कुहकुहरितेषु पु० ।

३६४. १. ह्रतमृगाः पु० नि० चौः, वृतभृगाः निपा० ।

३६५. १. उन्नमन् निपा० । २. क्रौंचावलीः सालसास्तस्य निपा० । ३. न पु० निपा० । ४. सिन्धोः किमु पु० निपा० । ५. अद्यतन पु० । ६. तुरंगममन्दुराः नि० चौ० । ७. °नाल° निपा० । ८. मदमत्तमतंगजान् नि० चौः; समदमतंगजान् निपा० ।

३६६. १. आपतन्तमन्तरा निपा० ।

३६७. १. तांश्चावलोक्य पु० नि० चौ० । २. कामयन्ति पु० । ३. एतेषां निपा० । ४. 'क्रीडा' नास्ति नि० चौ० ।

३६८. १. त्रिदिवपतिः पु० नि० चौ० । २. अवादीच्च नि० चौ० ।

३६९. १. अग्रे अथ पु० । २. °कुंभनिभांग° निपा० । ३. °विलोचन° नि० चौ० ।

३७०. १. 'अपि च' नास्ति पु० । २. °धरण° पु० निपा०; °भरण° निपा० । ३. °दीप्य° पु० ।

३७१. १. °सम्पुट° निपा० । २. रभसवशमुच्छ्वास्यमान नि० चौ०; रभसोत्थाप्यमान निपा० । ३. अभिमुखं नि० चौ० । ४. सह परिजनेन नि० चौ० । ५. °शिरःशायिचरण पु० निपा० । शिरः पर्यस्तचरण°; °शयनचरण° निपा० । ६. °नाक° नि० चौ० । ७. निरुद्ध; निभस्य निपा० । ८. तुम्बरोः पु० । ९. °ताच्छानाच्छाच्छ° निपा० । १०. सभगवान् पु० ।

३७३. १. व्यवहारानुच्चैः नि० चौ; व्यवहाराद्युच्चैः पु० । २. काञ्चनासनं समुल्लसन् नि० चौ० । ३. स्वभुजोपनीतं नि० चौ० । ४. उपविष्टेषु पु० नि० चौ० । ५. यथोचितासन्नमासनेषु नि० चौ०; ६. कृतोपचिताचारः पु० । ७. सविनयान्निषद्य निपा० ।

३७४. १. स्वयमेव निपा० ।

३७५. १. प्रकाशितप्रश्रयालापे नि० चौ०; प्रकाशितप्रश्रये निपा० । २. निजकान्तिनिर्जित° निपा० । ३. 'च' नास्ति पु० । ४. विदर्भाधिपतिपुरं नि० चौ०; विदर्भाधिपपुरं निपा० । ५. स्वयं पु० । ६. मद्विधेषु निपा० । ७. नोच्छास्त्रयसि पु० । ८. स्वप्रशंसोपक्रमः नि० चौ० । ९. महत्प्रागल्भ्यप्रभं प्रलोभनं निपा० । १०. मनुष्याः पु० नि० चौ० । ११. किञ्चिद् पु० ।

३७७. १. अथोद्देश° निपा० । २. विशेषोक्तिकोविद नि० चौ०; विशेषकोविदः निपा० । ३. 'प्रायः' नास्ति पु० । ४. उपलक्ष्यते पु०; उपलक्षिष्यते निपा० । ५. इतस्तटी नि० चौ० । ६. दवाग्निः नि० चौ० । ७. कर्णान्तकृष्टशरासनो नि० चौ० । ८. अमीषां पु० । ९. अलंघनीयादेशः निपा०; अलंघनीयो निदेशः निपा० । १०. 'आज्ञालंघनं' नास्ति निपा० ।

३७८ १. श्रेयः स्रोतः नि० चौ० । २. 'मुख' नास्ति निपा० । ३. कंचित् नि० चौ० । ४. 'देवेषु' नास्ति पु० निपा० ।

३७९. १. अदारिद्रो पु० । २. 'दौर्गत्य' निपा० । ३. श्लाघ्य नि० चौ० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

३८०. १. भयान् मूकीभूतेषु नि० चौ०; भयान्मौकीभूतेषु पु० । २. प्रावरणप्रान्तच्छादित° निपा० ।

३८१. १. दहन इव दारु दारुणो नि०चौ०; दहनदाहदारूणो निपा० । २. दौत्ये पु० । दूत्य निपा०। ३. अभिलिखिते पु० । ४. 'दास' नास्ति पु० । ५. अनुभवति नि० चौ० ।

३८२. १. 'च' नास्ति नि० चौ० । २. °बधरित° पु० । ३. °विरुचनवनलिन° पु० निपा० । ४. 'जगत्' नास्ति पु० । ५. मदनपरवशाः निपा० । ६. अथाभिलषतः सा निपा०; अथ सा समभिलषतः सर्वान् निपा० । ७. °पलायत° पु० । ८. 'भगवतः' नास्ति निपा० । ९. कुसुममालिकां निपा० । १०. सापि कदाचित् पु० नि० चौ० । ११. सकृत्प्रनृत्तायाश्च नि०चौ०; असकृत्प्रवृत्तायाश्च निपा० । १२. वामभ्रुवां पु० ।

३८३. १. दिवि श्रुतं पु० निपा० । २. गान्धर्वगायकैः पु० गन्धर्वगीयमानं निपा० । गन्धर्वैः समापन्नैः निपाः । ३. युगलमिदमार्ययोर्देवस्य नि० चौ० ।

३८४. १. प्रक्रमेण नि० चौ० । २. °स्मृतिरिव निपा० । ३. 'तस्य' नास्ति निपा० । ४. प्रियाय निपा० । ५. ध्वनिरुदियाय निपा० ।

३८५-३८६. १. °प्रदेशदर्शन° नि० चौ० । २. °पौरजन° पु० । ३. °विहारो नि० चौ० ।. ४. तरंगितधवलबालुकेन निपा० । ५. विनिर्गताः नि० चौ०; विनिर्गत पु० । ६. °कन्दलावलम्बित° नि० चौ० । ७. °श्रवणावसक्त° पु० नि० चौ० । ८. संकलित; संमिलित निपा० ।

३८७. १. नर्मदामन्त्रिताः निपा० । २. 'स्फुरत्' नास्ति. नि० चौ: । ३. तडिल्लतालेखा नि० चौ० तडिल्लवलेखा निपा० । ४. °मण्डल° नि० चौ० । ५. °अशोककुलकुसुम° निपा० । ६. धूमश्यामलाः निपा० । ७. काश्चित्किंचित् निपा० । ८. मयूर° निपा० । ९. कादम्ब नि० चौ० । १०. 'मद' नास्ति नि० चौ० निपा० ।

३८९. १. क्रमात् नि० चौ० । २. भूयिष्ठं पु० नि० चौ० ।

३९०. १. 'ताः' नास्ति पु० । २. नागपति° निपा० । ३. गोपालाङ्गना नि० चौ० ।

३९१. १. धार्तराष्ट्र नि० चौ० । २. दीर्घकमलनालैः पु० नि० चौ० । ३. 'निकर' नास्ति नि० चौ० । ४. पुत्तिका निपा० ।

३९२. १. अवलोक्य चिरं निपा० ।

३९३. १. भुग्नोर्मयः नि० चौ० । २. °सरि° पु० ।

३९६. १. मनाङ्मन्मथव्यथया नि० चौ० । २. विचिकित्सया पु० । ३. राजनि पु० नि० चौ० । ४. अतिभूय निपा० ।

३९८. १. मध्यमिवली° पु० निपा० । २. स्खलितं नि० पु० चौ० । ३. अवनिपालं निपा० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

३९९. १. °निष्यन्दि° नि० चौ० । २. °शैलगण्ड° नि० चौ० । ३. रुचः नि० चौ०; रयाः पु० निपा; जवाः निपा० ।

४००. १. दोहदोऽपि विचलद् निपा० । २. बिसलपल्लवं नि० चौ० । ३. चन्द्ररेखायमाणः नि० चौ०; चन्द्ररेखायमाण पु० ।

४०२. १. 'च' नास्ति पु० । २. 'नु' नास्ति निपा० । ३. त्रिदशसम्बन्धार्थिनो पु० । ४. राजनि श्रुतशील एवं बभाषे राजन् पु० । ५. परागो पु० । ६. रागपरिग्रहो पु० । ७. स्यात् निपा० । ८. प्रतिग्रहेपि नि० चौ०; परिग्रहोपि निपा० । ९. मयि रागिणी नि० चौ० मय्यनुरागिणी निपा० । १०. इत्येवमिमं नि० चौ० । ११. आश्वासयन्निव पु० । १२. भातुर्भगवान् पु० । १३. अवलम्बमानः पु० नि० चौ० ।

४०३. १. परियुक्ते तु नि० चौ० । २. तां मां निपा० । ३. लभ्यते निपा० । ४. रुत्पक्ष निपा० । ५. मित्रं पु० ।

४०४. १. निवेदयितुमस्यासन्न° नि० चौ० । २. °विहारिहारि नि० चौ० ।

४०५. १. विकीर्यमाणेषु नि० चौ० । २. विचल° निपा० । ३. स्वपतत्; आपतत् निपा० । ४. °श्रान्तागताध्वग° नि० चौ० । ५. पद्मिनी पु० । ६. महामन्त्राक्षरेष्विव नि० चौ० । ७. महासरित्कूल° नि० चौ० । ८. कुक्कुह नि० चौ० । ९. °कुटम्ब° पु० । १०. सान्ध्याह्निकः पु० । ११. ववन्दे, ततश्चक्रमेण नि० चौ० ।

४०७. १. °सरोजाङ्कः पु० ।

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रीः

# षष्ठ उच्छ्वासः

अथ षष्ठोच्छ्वास व्याख्या प्रस्तूयते—

**अथ द्विजजननिकायकीर्णसंध्याञ्जलिजलैरिव क्षाल्यमाने मनाग्विमलतां व्रजति तिमिरमलिनेऽम्बरे, मालाकारेणेव[१] प्रभातप्रभोद्भेदेनावचीयमानेषु गगनपुष्पवाटिकाकुसुमेष्विव[२] नक्षत्रेषु, निद्रापहारहुङ्कार इवोत्थिते प्रभातभेरीशंख[३]ध्वनौ, नरपतेः[४]प्रबोधार्थमदूरे वैतालिकः पपाठ।**

**अथेति** । अथ-निशातिवाहनानन्तरं स्वभावस्वच्छेऽपि तिमिरेण मलिने-कृष्णे अम्बरे-आकाशे मनाक्-स्तोकं विमलतां- निर्मलतां भजति सति । उत्प्रेक्ष्यते, द्विजजननिकायेन-ब्राह्मणजनसमूहेन विकीर्णानि-विक्षिप्तानि यानि सन्ध्याञ्जलिजलानि तैः क्षाल्यमाने इव-शोध्यमाने इव । अन्यदपि अम्बरं-वस्त्र स्वभावस्वच्छमपि तिमिरवन्मलिनं सत् क्षाल्यमानं मनाक् निर्मलं भवति । तथा गगनमेव पुष्पवाटिका तस्यां कुसुमानीव यानि तानि गगनपुष्पावाटिकाकुसुमानि तेषु नक्षत्रेषु मालाकारेणेव-मालिकेनेव प्रभातस्य या प्रभा तस्या उद्भेदः-उल्लासस्तेन अवचीयमानेषु- गृह्यमाणेषु सत्सु, यथा मालिकः पुष्पवाटिकातः कुसुमानि उच्चिनोति तथा गगनमपि[१] प्रभातप्रभया नक्षत्राणि उच्चीयन्ते, अतएव अल्पान्यल्पानि जायन्त इति भावः । तथा प्रभातस्य भेरीखो यः शङ्खध्वनिस्तस्मिन् उत्थिते सति-जाते सति । उत्प्रेक्ष्यते, निद्राया यो अपहारः-अपहरणं तत्र हुङ्कार इव निषेधशब्द इव, अस्मिन् जाते निद्रा दूरतोऽपयातेत्यर्थः । नरपतेः-नलस्य प्रबोधार्थं-जागरणाय अदूरे-समीपे वैतालिकः-सौखसुप्तिकः पपाठ ।

**उदयगिरिगतायां प्राक्प्रभापाण्डुताया-**
**मनुसरति निशीथे[५] शृङ्गमस्ताचलस्य ।**

---

१. गगनेपि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जयति किमपि तेजः सांप्रतं व्योममध्ये,**
**सलिलमिव विभिन्नं जाह्नवं यामुनं च ॥ १॥**

**उदये**ति । प्राक्प्रभापाण्डुतायां-प्रथमप्रभापाण्डिम्नि उदयगिरिगतायां-उदयाद्रिप्राप्तायां सत्यां, तथा निशीथे च अन्धकारे अस्ताचलस्य शृङ्गं अनुसरति-गन्तुं प्रवृत्ते सति किमपि सर्वोत्कृष्टं तेजो जयति । तत्र कविरुत्प्रेक्ष्यते, तेजः किमिव ? साम्प्रतं-इदानीं व्योममध्ये जाह्नवं-गाङ्गं यामुनं च-कालिन्दीयं विभिन्नं-सङ्गतं सलिलमिव । व्योम्नि जाह्नव्येवासीत् यमुनया सह सम्भेदः । साम्प्रतमेव अतएवास्मिन् वृत्ते वेणीकृपाणो **अमर** इतिवत्, धूम **कालिदास**वत्, घण्टा **माघ**वत्, छत्र **भारवि**वत् च यमुना **त्रिविक्रम** इति नाम कविरवापत् । तथा च स्तुतिवरः—

> **"प्राच्याद् विष्णुपदी हेतोरपूर्वोऽयं त्रिविक्रमः ।**
> **निर्ममे विमलं व्योम्नि यत्पदं यमुनामपि ॥"** [ ]

प्रभायाः पाण्डुता प्रभाकृत उद्योतः-प्रकाश इति यावत् । न तु प्रभायाः पाण्डुते'ति समासः । उदये प्रभाया आरक्तत्वात् । प्रकाशस्तु इन्द्रनीलादीनामपि पाण्डुरेव । जाह्नवीदेवता-अधिष्ठात्री । अस्येति **"देवतार्थे अण्"** [**सास्य देवता**, पा. सू. ४/३/२४] अन्यथा शैषिका इयः स्यात् ॥ १ ॥

**अपि च—**

**यात्यस्ताचलमन्धकारपटले जातेऽरुणस्योदये,**
**तापिच्छच्छदपद्मरागमहसोर्मध्ये ककुब्भागयोः ।**
**अन्तर्विष्णुविरिञ्चयोरिव[1] मनाग्लिङ्गोद्भवभ्रान्तिकृ-**
**त्तेजः पाण्डु[2]च पिञ्जरं च किमपि श्यामं च तद्वोऽवतात् ॥ २ ॥**

**अपि** च-पुनः—

**याती**ति । अन्धकारपटले-तमःसमूहे अस्ताचलं अस्तगिरिं याति-गच्छति सति, तथा अरुणस्य-रवेरुदये जाते, सति, तापिच्छस्य यानि छदानि-पत्राणि पद्मरागश्च-लोहित-मणिस्तयोरिव महः-तेजो ययोस्तयोः ककुब्भागयोः पश्चिमायाः कृष्णायाः सम्पनारुणो-दयायाः पूर्वभ्याश्च लोहिताया दिशोर्मध्ये पाण्डु च-धवलं पिञ्जरं च-पीतरक्तं श्यामं च-कृष्णं किमपि तत् दुर्लक्षं, मनाक्-स्तोकोदयं तेजोऽर्थात् प्रकाशात्मकं वः-युष्मान् पातु । प्रकाशारुणोदयतमः शेषसमुदायरूपत्वात् पाण्डु पिञ्जरं श्याम चेत्युक्तं । तत्-इत्यनेन

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आक्षिप्तं यच्छन्दवाच्यमुपमानमाह–उत्प्रेक्ष्यते, यत्तेजः विष्णुविरिञ्चयोरन्तः-मध्ये लिङ्गोद्भवस्य-शिवलिङ्गोदयस्य भ्रान्ति-सन्देहं करोतीति लिङ्गोद्भवभ्रान्तिकृत् तदिव दिग्भागयोर्विष्णुविरिञ्चौ । प्रकाशात्मनश्च तेजसो लिङ्गोद्भव उपमानम् । अथवा सत्वं पाण्डु तदेव विष्णुः, रञ्जः-पिञ्जरं तदेव च स्रष्टा, तमः-श्यामं तदेव च हरः एतत् त्रयीमयश्च रविरित्यागमिंकसमयः । तदुक्तम्-

> **"सत्वं शुभ्रं स हरिर्लोहित पीतं रज स जगत्कर्त्ता ।**
> **कृष्णं तु तमः स भवो भानुरप्येतत् त्रयीमूर्त्तिः ॥"** [ ]

**अभिधानकारोप्याह–"द्वादशात्मा त्रयीतनुः"** [हलायुध. १/३७]। एतेन पाण्डुतेजः इत्युक्ते, सत्वस्य पिञ्जरमित्युक्ते, रजसः श्याममित्युक्ते च तमसः प्रतीतिरिति । ततश्च तमोऽन्विताया अपाच्या अरुणान्वितायाश्च प्राच्यामध्ये मनाक्-ईषल्लक्ष्यं किमपि-अद्भुतं वैभवं तदुत्कृष्टं पाण्डु-पिञ्जरं श्यामं च तेजोऽर्थात् सत्वरजस्तमस्त्रयीमयं-त्रयीतनुलक्षणं वः-युष्मान् अवतु। अमुमेवार्थं सत्वरजस्तमसां संज्ञान्तरेण विष्णुविरिञ्चिलिङ्गोद्भवलक्षणेन द्रढयन्नाह– अन्तरित्यादि । पुरा स्वमाहात्म्यार्थं विवदमानयोर्द्रुहिणनारायणयोः शिवेन स्वस्य लिङ्गस्य ऊर्ध्वाधोमानविज्ञानं महत्त्वहेतुः पण उक्त इत्यागमः ॥ २ ॥

**अनन्तरमुत्तिष्ठतोत्तिष्ठतानयत गजवाजिवेसरीः[१], संयोजयत शकटानि, वेष्टयत पटकुटीः, मुकुलयत मण्डपिका काण्डपटान्[२], उन्मूलयत कीलकान्, उद्वहत वेगाद्वहनीयभाण्डम्, भारयत करभकलभान्, उत्क्षिपत क्षीणोक्षकान्, उत्तरत सरितम्, अपसरत पुरतः, कुरुत संचारसहं मार्गम्, इत्यनेकविधप्रयाणाकुललोककोलाहले समुच्छलति, नदत्सु[३] प्रस्थानवादित्रेषु, समुत्थाय नरपतिरावश्यकशौचावसाने[४] नर्मदाम्भोभिषेकपूततनुरवन्ध्यं[५] सांध्यं विधिरधिकृत्य[६] भगवन्तमुदयगिरिशिखरभाजं[७] भास्करम्, इमं श्लोकमपठत् ।**

**अनन्तरं**-सूर्योद्गमादनु इति-अनेन प्रकारेण विविधप्रकारो यः प्रयाणाकुलानां-प्रस्थानव्यग्राणां लोकानां-सैनिकानां कोलाहलः-कलकलस्तस्मिन् समुच्छलिते-उत्थिते सति, तथा प्रस्थानस्य-प्रयाणस्य यानि वादित्राणि-तूर्याणि तेषु नदत्सु सत्सु, नरपतिः-नलः समुत्थाय-शयनादभ्युत्थानं विधाय आवश्यकशौचावसाने-अवश्यकरणीयमुखपादधावना-द्यनुष्ठानकरणप्रान्ते नर्मदाम्भसा यो अभिषेकः-स्नानं तेन पूजा-पवित्रा तनुः-शरीरं यस्य सः, तथा अवन्ध्या-सफला या सन्ध्या-"**पदैकदेशे पदसमुदायोपचारात्**" [ ] सन्ध्यावन्दनं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्र अवधिः-अवधानं चित्तैकाग्र्यं यस्य स, फलवत्सन्ध्यावन्दननिहितचित्त इत्यर्थः। एवम्विधः सन् भगवन्तं उदयगिरिशिखरं भजतीति तथाविधं भास्करं उदयाद्रिचूलाप्राप्तं रविमधिकृत्य-आश्रित्य इमं श्लोकं अपठत्। **अवधिः स्यादवधाने कालसीमबिलेष्वपि [ ३/३६९ ] इत्यनेकार्थः**। इतीति किम्? भोः सैनिकाः! यूयं उत्तिष्ठत उत्तिष्ठत, तथा गजाश्च वाजिनश्च वेसर्यश्च-वेगसर्यस्ता आनयत, तथा शकटानि-अनांसि संयोजयत-संघटयत वृषभैः सहेति शेषः, तथा पटकुटीः वेष्टयत-मीलयत्, तथा मण्डपिकानां ये काण्डपटाः-गुणलयन्यस्तान् मुकुलयत-वेष्टयत, तथा कीलकान्-शङ्कून् उन्मीलयत-उत्खातयत, तथा वेगात्-त्वरितं वहनीयं-विहङ्गिकादिना वाह्यं यद् भाण्डं-भाजनं तत् उद्वहत-धारयत, तथा करभाः-त्रिहायणाः दासेराः कलभाश्च-त्रिंशदब्दिकाः हस्तिनस्तान् भारयतः-भारवतः कुरुत, भारवन्तं करोति भारयति "**तत्करोति तदाचष्टे**" [ ] इति णिच् "**विन्मतोर्लुक्**" [पा. सा. ५/३/६५] इति मतुप्प्रत्ययस्य लुक्। तथा क्षीणाः-अतिभारोद्वहनात् ग्लाना ये उक्षकाः-वृषभास्तान् उत्क्षिपत-उच्चैः कुरुध्वं, तथा सरितं-नदीं उत्तरतः-पारे यातेत्यर्थः। तथा पुरतः-अग्रतो अपसरत-गच्छत तथा सञ्चारसहं-कण्टकाद्यपनयनाद् गमनयोग्यं मार्गं कुरुत।

अथ यं श्लोकमपठत् तमाह—

**जयत्यम्भोजिनीबन्धुर्बन्धूकारुणरश्मिकः।**
**वैद्रुमो वासरारम्भकुम्भः पल्लववानिव ॥ ३ ॥**

**जयती**ति। अम्भोजिनीबन्धुः श्रीसूर्यो जयति-सर्वोत्कर्षेण वर्तते। किम्भूतः? बन्धूकपुष्पवत्-बन्धुजीवककुसुमवत् अरुणाः-रक्ता रश्मयः-किरणा यस्य स। उत्प्रेक्ष्यते, पल्लववान्-किसलयमालोपशोभितकण्ठो वैद्रुमः-विद्रुमसम्बन्धी वासरारम्भस्य-दिनप्रारम्भस्य कुम्भ इव। अन्यत्रापि विवाहाद्यारम्भे मङ्गलार्थं पल्लववान् कुम्भः क्रियत एव तथा दिनारम्भस्यायं रविः कुम्भ इव। अरुणकराणां पल्लवा रवेः वैद्रुमः कुम्भ उपमानम् ॥ ३ ॥

**अभ्यर्च्य च पञ्चोपचारैः सुरासुरगुरुं गौरीपतिं तत्प्रियस्य भगवतो नारायणस्यापि[१] वाञ्छितार्थसिद्धये[२] स्तुतिमकरोत्।**

**च**-पुनः सुरासुराणां गुरुः सुरासुरगुरुस्तं गौरीपतिशम्भुं पञ्चभिरुपचारैः-उपचर्याभिरभिषेकघुसृणाद्यनुलेपमाल्यगन्धधूपरूपाभिरभ्यर्च्य-पूजयित्वा तस्य शम्भोः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रियस्य-इष्टस्य तन्मूर्त्तित्वात् तस्य भगवतो नारायणस्यापि वाञ्छितार्थसिद्धये-अभिलषित-वस्तुनिष्पत्तये स्तुतिमकरोत् । यद्वा, पञ्चोपचारा इमे-पूजाश्च गन्ध १ माल्या-२ धिवास ३ धूप ४ प्रदीपाद्याः[५] । अधिवासः-गन्धमाल्यादिभिः संस्कारविशेषः इति ।

अथ श्रीनारायणस्तवनाष्टकम्-[१]

जयत्युदधिनिर्गतस्मरविलोललक्ष्मीलल-[१]
द्विलासरसमन्थरस्फुटकटाक्षलक्षीकृतः ।
अमन्दरयमन्दरभ्रमनिघृष्ट[२]हेमाङ्गदः,
सुरारिवधनाटकप्रथमसूत्रधारो हरिः ॥ ४ ॥

जयत्यमलकौस्तुभद्युतिविराजितोरःस्थलः,
सहेलहतदानवो नवतमालनीलद्युतिः ।
विनम्रसुरमस्तकच्युतविकासिपुष्पावली-
विकीर्णमधुसीकरस्नपितपादपीठो हरिः ॥ ५ ॥

जयत्युदरनिःसरद्वरसरोजपीठीपठ-
श्चतुर्मुखमुखावलीविहितसारमरम्यस्तुतिः[३] ।
अलब्धमहिमावधिर्मधुवधूविलासान्तकृ-
ज्जगत्त्रितयसम्भवो भवभयापहारी हरिः ॥ ६ ॥

जयत्यसुरसुन्दरीनयनवारिसंवर्धित-
प्रतापतरुरुल्लसत्तरुणकेकिकण्ठच्छविः ।
दलत्कनककेतकीकुसुमपत्रपीताम्बरः,
सुराधिपनमस्कृतः सकललोकनाथो हरिः ॥ ७ ॥

जयत्यखिललोकजिन्नरककालकेतूद्गमो,
मदान्धदशकन्धरद्विरददुष्टपञ्चाननः ।
हिरण्यकशिपुप्रियामुखसरोजचन्द्रोदयः,
सुरेन्द्ररिपुसिंहिकासुतशिरःकुठारो हरिः ॥ ८ ॥

---

१. श्रीनारायणवर्णनाष्टकम् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जयत्यमरसारथिर्मदनतप्तलक्ष्मीलस-**
**त्पयोधरयुगस्थलीसरसचन्दनस्थासकः ।**
**अचिन्त्यगुणविस्तरः सकलकेशिकंसाङ्गना-**
**कपोलफलकोल्लसत्तिलकभङ्गहारी हरिः ॥ ९ ॥**

**जयत्यमलसाहसः[४]सकललोकशोकान्तकृ-**
**त्सहस्त्रकरभासुरस्फुरित[५]चारु[६]चक्रायुधः ।**
**विहङ्गपतिवाहनः कलुषकन्दनिर्मूलनः,**
**समस्तभुवनावलीभवनशिल्पधारी[७] हरिः ॥ १०॥**

**जयत्यमलभावनावनतलोककल्पद्रुमः,**
**पुरन्दरपुरःसरत्रिदशवृन्दचूडामणिः[८] ।**
**अरातिकुलकन्दलीवनविनाशदावानलः,**
**समस्तमुनिमानसप्रवरराजहंसो हरिः' ॥ ११ ॥**

**जयतीति** । हरिः-विष्णुर्जयति-सर्वोत्कर्षेण वर्तते । किम्भूतो हरिः ? उदधेः-क्षीरसागरान्निर्गता स्मरेण विलोला-चपला या लक्ष्मीस्तस्या ललन्-उल्लसन् यो विलासरसः-विभ्रमरसस्तेन मन्थराः-अलसाः स्पृहाः-प्रकटा ये कटाक्षाः-दृष्टि-विक्षेपास्तैर्लक्षीकृतः-अवलोकितः । तथा अमन्दः-अनल्पो रयो यस्मिन् स । अमन्दरयः-अनल्पवेगो यो मन्दरस्य-मेरोर्भ्रमः-भ्रमणं तेन निघृष्टं-उत्पीडितं हेमाङ्गदं-सौवर्णकेयूरं यस्य सः । तथा सुरारीणां-दैत्यानां वध एव नाटकं तस्य प्रथमः-प्रस्तावनायां सूत्रधार इव-रङ्गाचार्य इव यः स । यथा सूत्रधारेणैव नाटकस्य प्रस्तावना क्रियते तथा अनेनैव सुरारिवधरचनाचक्र इति भावः ॥४॥

**जयती**ति । हरिर्जयति । किम्भूतः ? अमलः-निर्मलो यः वक्षो कौस्तुभः-मणिस्तस्य या द्युतिः-कान्तिस्तया विराजितं उरस्थलं-वक्षो यस्य सः । तथा सहेलं-सविलासं न तु दुःखेन हता दानवा येन सः । तथा नवतमालवत्-नीला द्युतिर्यस्य सः । तथा विनम्राः-नमनशीला या पुष्पावली तस्या विकीर्णाः-निःसृता ये मधुशीकराः-मकरन्दलवास्तैः स्नपितं-क्षालितं पादपीठं यस्य सः ॥ ५ ॥

**जयतीति** । हरिर्जयति । किम्भूतः ? उदरात्-नाभेः निःसरन्ती-निर्गच्छन्ती वरा-प्रधाना या सरोजपीठी-सरोजरूपमासनं तस्यां पठन् यश्चतुर्मुखः-वेधास्तस्य या मुखावली

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तया विहिता सामाख्यवेदेन रम्या स्तुतिर्यस्य सः । अत्र ग्रामपटैकदेशदाहेपि ग्रामो दग्धः पटो दग्धः इत्यादिवदुदरैकदेशभूतायां नाभावपि उदरशब्दो न दुष्टः । पीठशब्दः स्त्रीक्लीब-लिङ्गः[१] । तथा न लब्धौ महिमायाः-अनुभावस्याऽवधिः-प्रान्तो यस्य सः अलब्ध-महिमावधिः, एतावत्यस्य महिमास्तीति सीमानं न कोपि प्रापेत्यर्थः । तथा मधुनाम्नो दैत्यस्य या वध्वस्तासां सम्बन्धिनो ये विलासास्तेषां अन्तं-विनाशं करोतीति तद्भर्तुर्हननात् । तथा जगत्त्रितयस्य-त्रिभुवनस्य सम्भवः-उत्पत्तिकारणं, अस्मादेव जगतामुत्पत्तेः । तथा भवभयं अपहरतीत्येवंशीलो भवभयापहारी ॥ ६ ॥

**जयेति** । हरिर्जयति । किम्भूतः ? असुरसुन्दरीणां नयनवारिणा सम्वर्द्धितः प्रताप एव तरुर्यस्य सः, तद्भर्त्तारो भगवता हता अतएव ता रुदन्ति । तत एव च प्रतापाधिक्यं, वारिणा च तरुर्वर्धत् एवेति छायार्थः । तथा उल्लसन्-दीप्यमानस्तरुणः-नवो यः केकी तस्य कण्ठवन्नीला छविर्यस्य सः । तथा दलन्ति-विकसन्ति यानि कनककेतक्याः कुसुमानि पत्राणि च-दलानि तद्वत् पीतं-गौरवर्णं अम्बरं वासो यस्य सः । तथा सुराधिपेन-शक्रेण नमस्कृतः । तथा सकललोकस्य नाथः-स्वामी ॥ ७ ॥

**जयेति** । हरिर्जयति । किम्भूतः ? अखिलान्-समस्तान् लोकान्-प्रतिपक्षजनान् जयतीति तथाविधो यो नरकः-भौमासुरस्तस्य काले-विनाशे केतूद्गम इव-केतुग्रहोदय इव यः स, यथा केतूद्गमे लोकानां संहारस्तथा नरकासुरस्य संहारकृदित्यर्थः । तथा मदान्धो मदेन-अहङ्कारेण अन्ध इव यो दशकन्धरः-रावणः स एव द्विरदः-हस्ती तत्र दुष्टपञ्चानन इव-उग्रसिंह इव यः सः, यथा सिंहेन करी हन्यते तथा येन रामावतारे स निहत इति । तथा हिरण्यकशिपोर्दैत्यस्य याः प्रियास्तासां मुखान्येव सरोजानि-पद्मानि तत्र चन्द्रोदय इव-चन्द्रोद्गम इव यः सः, यथा चन्द्रोदये सरोजं म्लानं भवति तथा येन तद्भर्तृवधात् तासां मुखानि विच्छायानि कृतानि । तथा सुरेन्द्रस्य-शक्रस्य रिपुर्य सिंहिकासुतः-राहुस्तस्य शिरसि- कुठार इव यः सः, यथा परशुना तरुश्छिद्यते तथा येन राहोः शिरश्छिन्नमिति । अमृतविभागकाले देवरूपी राहुरर्केन्दुभ्यां असुरमथनाय विष्णवे कथितस्ततस्तेन अनिगीर्णामृतस्यैव तस्य राहोः शिरःकृत्तमित्यागमः ॥ ८ ॥

**जयेति** । हरिर्जयति । किम्भूतः ? अमराणां सारथिः-नेता अग्रणीरिति यावत् । तथा मदनेन तप्ता-सन्तापिता या लक्ष्मीस्तस्या लसन्ती-विलसन्ती या पयोधरयुगस्थली तस्यां सरसस्य-आर्द्रस्य चन्दनस्थासको हस्तबिम्ब इव यः सः, यथा तप्तमङ्गं चन्दनस्थासकेन शीतली क्रियते तथा तस्याः स्मरतापापहरणेन पयोधरयुगस्थली शीतीकृता । तथा अचिन्त्यः-अनाकलनीयो गुणानां-शौर्यादीनां विस्तरः-प्रपञ्चो यस्य सः, असंख्यगुण

---

१. सेठिया-'पीठ शब्दो पुंनपुंसकः' पृ. १०८

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यर्थः । अत्र विस्तर इति चिन्त्यं, विस्तीर्णार्थे "**प्रथनेवाव शब्दे**" [पा. सू. ३/३/३३] इति सूत्रेण घञः प्रतिपादनात् तथा च विस्तार इति स्यात् । यथा पटस्य विस्तारः शब्दे वचो विस्तर इति । तथा सकलाः केशिनः कंसस्य च या अङ्गनास्तासां कपोलफलकयोः-गण्डस्थलयोरुल्लसन्तो ये तिलकभङ्गाः-विशेषकविच्छित्तयस्तान् हरतीत्येवंशीलः, केशिकंसयोर्वधात् तत्स्त्रियोऽनलङ्कारा एव तिष्ठन्तीति भावः ॥ ९ ॥

**जयेति** । हरिर्जयति । किम्भूतः ? अमलसाहसः-निर्दोषाभिमानः अविचार्य या प्रवृत्तिः-हिताहितमनपेक्ष्य यत्कर्म तत्साहसं अमलं साहसं यस्य स । तथा सकललोकानां शोकस्य अन्तं-विनाशं करोतीति तथाविधः । तथा सहस्रकरवत्-भानुवद् भासुरं-दीप्यमानं स्फुरितं-करे विलासितं चारु-रम्यं चक्रं-सुदर्शनाख्यं आयुधं यस्य सः । तथा विहङ्गपतिः-गरुडः सवाहनं-पत्त्रं यस्य सः । तता कलुषं-पापमेव यः कन्दः-मूलं तं निर्मूलयति-उन्मूलयति यः स कलुषकन्दनिर्मूलनः । तथा समस्ता या भवनावली सैव भवनं-गृहं तस्य शिल्पधारी-विवर्धकिरिव[१] यः सः । यथा शिल्पधारिणा गृहं निष्पाद्यते तथा येन ब्रह्मरूपेण जगत्त्रयी निष्पादितेति ॥ १० ॥

**जयेति** । हरिर्जयति । अमलभावनया-निर्मलाध्यवसायेन अवनताः-प्रणता ये लोकास्तेषां कल्पद्रुम इव यः सः, यथा कल्पतरुणा कामितं दीयते तथा येन लोकानां कामितानि पूरितानीति भावः । तथा पुरन्दरः-शक्रः पुरस्सरः-अग्रेसरो यस्य ईदृशं यत् त्रिदशवृन्दं-देवसमूहस्तस्मिन् चूडामणिरिव यः स, इन्द्रप्रमुखदेवानां मध्ये प्रधान इत्यर्थः । तथा अरातिकुलं-वैरिवृन्दमेव कन्दल्यः-वृक्षविशेषास्तासां यद् वनं तस्य विनाशे दावानल इव यः सः । यथा दावाग्निना कन्दलीवनं दह्यते तथा येन प्रत्यर्थिसमूहो निहत इत्यर्थः । तथा समस्तमुनीनां मानसे प्रवरराजहंस इव यः सः । यथा मानसे-सरसि राजहंसः क्रीडति तथाऽयं मुनीनां मानसे-चित्ते इति ॥ १२ ॥

**एवमभिनन्द्य देवताः,[१] समारुह्य विजयिवार[२]णेन्द्रस्कन्धम्, अग्रतः प्रधावितानेककरितुरगपरिजनः, पुरः[३] पुरोधसा निर्वर्त्तिते महानदीयागे' युगसहस्रपरिवर्त्तवृत्तान्तसाक्षिणीम्, अनवरततपस्य[४]द्ब्रह्मर्षिप्रतिष्ठित-शिवलिङ्गरुद्धरोधसम्, अनेकसुर[५]सुन्दरीसेविततीरसंकेतलतामण्डपाम्, अनवरतमज्जद्वनगज[६]मदामोदसुरभिततरङ्गाम्[७], अपरसागरराजमहीषीम्, अमरमार्कण्डेयतपःसिद्धिसखीम्, समुत्तीर्य भगवतीं मेकलकन्याम्,**

---

१. शिल्पधारीव-वर्द्धकिरिव अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उत्फुल्लपल्लविताङ्कोठ[१]सल्लकीसरलसालसर्जार्जुननिम्बकदम्बजम्बूस्तम्बोदुम्बरखदिरकरञ्जाञ्जनसौभाञ्जनक[२]प्रायैस्तरुभिराकीर्णम्, अभिमतं मतङ्गजानाम्, अनुभूतसारं सारङ्गैः, शिशिरतरं तरङ्गानिलैः, स्वर्गवनसमं समञ्जरीकैर्लताजालकैरुल्लङ्घ्य दक्षिणं नर्मदातीरं पुण्यारण्यम्, अग्रतो, गगनवीथिमिव सिंहराशिराजितामुत्पतत्पतङ्गामुत्थितवृश्चिकामाविर्भूतसार्द्ररोहिणीमूलां च, छन्दोजातिमिव शार्दूलविक्रीडितमनोहरां हारिहरिणीमन्दाक्रान्तामनवरतवसन्ततिलकोद्भासितामतिविचित्रचम्पकमालां च[३], सीतामिव बहुकोट-[४]रावणवृतामुत्पन्नकुशलवां च, लङ्कामिव संचरद्द्विगुणपञ्चाननविभीषणां चारुपुष्पकामकाण्डाडम्बरितमेघनादां च, गीतविद्यामिव ततावनद्धघनसुषिरवंशस्वनमनोहरामनेकतालभेदां निषादमध्यमग्रामयुक्तां च, चित्र-[५]विद्यामिवानेककण्टकपत्रलतास्थामकविषमामृज्वागत[६]तापसां च, कलियुगशिवशासनस्थितिमिव महाव्रतिकान्तःपातिभिः कालमुखैर्वानरैः संकुलामनेकधाभिन्नस्रोतसं च, [७]कापालिकखट्वाङ्गयष्टिमिव समुद्रोपकण्ठलग्नाम्, मायामिव शम्बराधिष्ठिताम्, मरुभूमिमिव करीरैः केसरिप्रसवैरसंचाराम्, अतिचारुचन्दनैः कृतगोरोचनाविशेषकैरक्षतदूर्वावाहिभिरारब्धमङ्गलाचारैरिव तृणस्थलैरलंकृताम्, [८]विन्ध्याटवीमवगाहमानो मेषवृषमिथुनयुजः सधनुषः सकुम्भकन्यानेकत्रराशीभूतान्गिरिग्रामपामरलोकानालोकयन्, 'इयं गगनवीथीव चित्रशिखण्डिमण्डिता सरित्तीरभूमिः, इयं सरिदिव बहुतरङ्गोपशोभिता गोष्ठभूमिः[९], इयं च नक्षत्रमध्यगतापि न विशाखा तरुपङ्क्तिः[१०], इयं पुष्पवत्यपि न दूषितस्पर्शा वीरुत्[११], इयं संनिहितमधुदानवापि हरिप्रिया वंशजालिः, इयं कृतमातङ्गसङ्गापि न परिहृता द्विजैः सल्लकीसंततिः, इमे च केचित्सशिखण्डिनो महाद्रुपदाः, केऽपि विच्छिन्नकीचकवंशा वृकोदराः, केऽपि सपुण्डरीकाक्षाः पाण्डुसंतानकाः, केऽप्युद्धृतभुवो महावराहाः, केऽप्युत्कृष्टसुरभिश्रीद्रुमावलिहरिकराकृष्टपन्नगनेत्राः स्फुरन्मणिभित्तयोऽमन्दरागाः, केऽपि सस्थाणवो दुर्गाश्रयाः, श्रूयमाणगजवदनचीत्काराः सगुहाः कैलासकूटायमानाः सेव्याः खल्वमी

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**विन्ध्यस्कन्धसंधिसानवः' इति मन्त्रिसूनुना श्रुतशीलेन सह विहितविदग्धालापः, कयापि वेलया कमप्यध्वानमतिक्रम्य क्वाप्यपरिमितपतत्रिर्जरजलतुषारस्पर्शमञ्जरितपादपपुष्पपरिमलमिलन्मधुकरझङ्का[१]रहारिणि रममाणशबरमिथुनसंमर्दमृदितामन्द[२]मृदुशाद्वले जलस्थलीप्रदेशे श्रान्तसैनिकानुकम्पया प्रयाणविच्छेदमकरोत् ।**

**एवं**-अमुना प्रकारेण देवताः-सुरान् अभिनन्द्य स्तुत्वा, तथा विजयवारणेन्द्रस्य-विजयगजेन्द्रस्य स्कन्धं समारुह्य-अधिष्ठाय, अग्रतः-पुरतः प्रधाविताः-शीघ्रं गच्छन्तो अनेके करिणः-हस्तिनः तुरङ्गाश्च-अश्वाः परिजनश्च यस्य स, एवंविधः सन् नलः पुरः-अग्रे पुरोधसा-पुरोहितेन महानद्याः-मेकलकन्याया यागः-पूजाविशेषस्तस्मिन् निर्वर्तिते सति, एवंविधां भगवतीं मेकलकन्यां समुत्तीर्य, तथा नर्मदाया दक्षिणभागे स्थितं तीरमुल्लंध्य अग्रतः-पुरतः, एवम्विधां विन्ध्याटवीं अवगाहमानः-अतिक्रामन् इति सम्बन्धः । किम्भूतां मेकलकन्याम् ? युगसहस्त्रेषु परिवृत्तानि-अतिक्रान्तानि यानि वृत्तान्तानि तेषां साक्षिणी-प्रतिभूस्तां या सर्वकालं वहन्तीत्यर्थः[१] । तथा अनवरतं-निरन्तरं तपस्यन्तः-तपस्यां कुर्वन्तो ये ब्रह्मर्षयस्तै प्रतिष्ठितानि-स्थापितानि यानि शिवलिङ्गानि तै रुद्धं-व्याप्तं रोधः-तटं यस्याः सा ताम् । तथा अनेकाभिः सुरसुन्दरीभिः सेवितास्तीरे संकेतस्य लतामण्डपा यस्याः सा ताम्, मया तत्र गंस्यते त्वयापि तत्रागन्तव्यमिति सङ्केतः । तथा अनवरतं-असक्तं मज्जन्तः-स्नानं कुर्वन्तो ये वनगजास्तेषां मदः-दानं तस्य आमोदेन-परिमलेन सुरभिताः-सुगन्धितास्तरङ्गा यस्यां सा ताम् । तथा अपरसागरराजस्य-पश्चिमसमुद्रनृपस्य महिषीव-पट्टराज्ञीव या सा ताम्, सर्वासामपि सरितं मध्ये एतस्या महत्त्वात् । तथा अमरमार्कण्डेयस्य ऋषेस्तपः सिद्धेः सखीव या सा तां, तेन ऋषिणा अत्र तपस्तप्तमित्यर्थः । अथ किम्भूतं नर्मदादक्षिणतीरम् ? उत्फुल्लाः-विकसिताः पल्लविताः-किसलयिता ये अङ्कोठाश्च सल्लक्यश्च-गजप्रियाः सरलसालाश्च देवदारुस्तरवः सर्जाश्च-सालाः अर्जुनाश्च-ककुभाः निम्बाश्च-अरिष्टाः कदम्बाश्च-नीपाः जम्बूस्तम्बाश्च-गुल्माः उदुम्बराश्च खदिराश्च करञ्जाश्च-अञ्जनकाश्च शोभाञ्जनकाश्च-वृक्षविशेषास्ते प्रायः-बाहुल्येन विद्यन्ते येषु ते तथाविधैस्तरुभिः-वृक्षैराकीर्णं-व्याप्तं, अत्र ल्लकारानुप्रासहेतोः केचिदङ्कोल्ल इति पठन्ति तच्च प्राकृते संस्कृते तु अङ्कोठ इति । तथा मतङ्गजानां-करिणामभिमतं इष्टं । तथा सारङ्गैः-हरिणैः अनुभूतं-आस्वादितं पीतं सारं-जलं यत्र तत्तथाविधम् । **"सारं तु द्रविणन्यायवारिषु"** [२/४७८] इत्य**नेकार्थः** । तथा तरङ्गाणां-वीचीनां ये अनिलाः-वातास्तैः शिशिरतरं-अतिशयेन शीतलम् । तथा समञ्जरीकैः-मञ्जरीसहितैर्लताजालकैः-लताकुड्मलैः कृत्वा

---

१. वहतीत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वर्गवनसमं-नन्दनवनतुल्यं, यथा नन्दनवनं समञ्जरीकैर्लताजालकैः सहितं भवति तथा इदं नर्मदादक्षिणतीरमपि । "**जालं तु गवाक्षे क्षारके गणे**" इत्य**नेकार्थः** [२/५००] । "**क्षारकं कुड्मलं तत्समूहो वा**" [ ] इति **तद्वृत्तिः** । तथा पुण्यं-पवित्रं अरण्यं-काननं यस्मिन् तत् । अथ किम्भूतां विन्ध्याटवीम् ? सिंहराशिना-मृगेन्द्रवृन्देन राजितां-शोभितां, तथा उत्पतन्तः-उड्डयमानाः पतङ्गाः-शलभा यत्र तां, तथा उत्थिताः वृश्चिकाः-द्रुणा यस्यां सा तां, तथा आविर्भूता सह आर्द्रेण-शृङ्गबेरेण रोहिणीऔषधिविशेषो मूलः-मूलकश्च यस्यां सा ताम् । कामिव ? गगनवीथीमिव-नभोमार्गमिव । तां किम्भूताम् ? सिंहराशिः-ज्योतिषोक्तः पञ्चमो राशिस्तेन राजितां, तथा उत्कृष्टः पतङ्गः-सूर्यो यस्यां सा तां, तथा उत्थितः-उदयं प्राप्तो वृश्चिकः-अष्टमराशिर्यस्यां सा तां, तथा आविर्भूता आर्द्रा सहिता रोहिणीमूलश्च यस्यां सा ताम् । पुनः किम्भूतां विन्ध्याटवीम् ? शार्दूलविक्रीडितेन सिंहविलसितेन मनोहरां, तथा हारिणीभिः-चारुभिर्हरिणीभिः मन्दं-शनै यथा भवति तथा आक्रान्ता-आश्रिता तां, शार्दूलभयादेव, तथा अनवरतं-सदा वसन्तैस्तिलकैश्च-तरुविशेषैसद्भासितां-भूषितां, तथा अतिविचित्रा-नानाविधा चम्पकानां माला-श्रेणी यस्यां सा ताम् । कामिव ? छन्दोजातिमिव । किम्भूतां ताम् ? शार्दूलविक्रीडितेन-छन्दोविशेषेण मनोहरां, तथा हारिण्यौ-मनोज्ञे हरिणीमन्दाक्रान्ते जाती यस्यां सा तां, तथा अनवरतं वसन्ततिलकया उद्भासितां, तथा अतिविचित्रा अत्याश्चर्यकारिणी चम्पकमाला यस्यां सा ताम्। पुनः किम्भूतां विन्ध्याटवीम् ? बहुभिः कोटरावणैर्वृत्तां-छन्नां, कोटराणां-तरूणां वनमिति कृत्वा कोटरादीनां वने दीर्घः, तथा उत्पन्नः कुशानां-दर्भाणां लवः-लेशो यस्यां सा ताम् । कामिव ? सीतामिव जनकतनयामिव । किम्भूतां ताम् ? बहुकोटेन-प्राज्यकौटिल्येन रावणेन- रक्षसा वृतां-प्रार्थितां, तथा उत्पन्नौ कुशश्च लवश्च सुतौ यस्याः सा ताम् । "**कुशो रामसुते दर्भे पापिष्ठे योक्त्रमत्तयोः**" [२/५५८] "**लवः कालभिदि च्छिदि । विलासे रामजे लेशे**"[२/५४८] इत्य**नेकार्थः** । पुनः किम्भूताम् ? सञ्चरद्भिः-प्रवर्तमानैर्विगुणैः-विरज्जुभिः पञ्चाननैः-सिंहैर्विशेषेण भीषणां-रौद्रां, तथा चारुपुष्पं अर्थान्मनोहरसरोजं कं-जलं यस्यां सा तां, अतएव अकाण्डेपि अनवसरेपि आडम्बरितः-विस्तृतो मेघनादः तण्डुलीयको यस्यां सा ताम् । कामिव ? लङ्कामिव । तां किम्भूताम् ? द्वौ गुणौ येषां पञ्चानां ते द्विगुणाः-द्विघ्नाः पञ्चदशेत्यर्थः, तत्संख्यानि आननानि यस्य तद्[१]द्विगुणपञ्चाननः दशमुखो विभीषणश्च-तद्भ्राता सञ्चरन्तौ द्विगुणपञ्चाननविभीषणौ यस्यां सा ताम्, तथा विमानं यस्यां सा तां, तथा अकाण्डे-अनवसर एव आडम्बरितः-बद्धपरिकरो मेघनादः-रावणात्मजो यस्यां सा ताम् । श्लेषे वर्णलोपो न दोषाय । पुनः किम्भूतां विन्ध्याटवीम् ? तताः-विस्तीर्णा अवनद्धाः-सुश्लिष्टा घनसुषिराः-बहुविवरा ये

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वंशाः-वेणवस्तेषां स्वनेन-ध्वनिना मनोहरां-रम्यां, तथा अनेके तालानां-तरुविशेषाणां भेदा यस्यां सा तां, तथा निषादाः-शबराः मध्ये भवो मध्यमः ग्रामः-खेटकं तैर्युक्तां च । कामिव ? गीतविद्यामिव । तां किम्भूताम् ? ततेन तन्त्रीगतेन अवनद्धेन-पौष्करेण घनेन-कांस्यकृतेन शुषिरसंज्ञकवंशस्वनेन च मनोज्ञां, यद्यपि –

"**ततं तन्त्रीगतं ज्ञेयमवनद्धंतु पौष्करम् ।**
**घनं कांस्यकृतं प्रोक्तं शुषिरं वांश्यमेव च ।।**" [नाट्यशास्त्र २८/२]

**इति भरते** । तथाप्यनेकविषयत्वात् वंशस्वनोपादानमसन्देहार्थमुचितमेव । तथा अनेके-बहवस्तालभेदाश्चञ्चत्पुटादयो यस्यां सा तां, तथा निषादेन-स्वरेण मध्यमसंज्ञग्रामेण च युक्तम् । पुनः किम्भूतां विन्ध्याटवीम् ? अनेकैः कंटकैः-सूचैः पत्रैः-पर्णैः लताभिः-वल्लीभिः शाखाभिर्वा स्थानकैः-चालवालैर्विषमां-दुर्गमां, तथा ऋजवः-अकुटिला आगतास्तपोर्थं प्राप्तास्तापसाः-मुनयो यस्यां सा ताम् । कामिव ? चित्रविद्यामिव । तां किम्भूताम् ? कलिकाकण्टकशाखात्रिभङ्गिसंज्ञाभिश्चत्वारः पत्रावयवा एतैर्मिलित्वा शिशुशकलस्वस्तिकवर्द्धमानसर्वतोभद्राख्यानि पञ्चपत्राणि निष्पाद्यन्ते, तदत्र शाखापर्यायो लताशब्दः तथा स्थानकानि पार्श्वागत ऋजु-ऋज्वागत द्व्यर्धाक्ष, अर्धऋजुगमनालीढ-त्वरितत्रिभङ्गिसंज्ञानि, तथा च अनेकैः कण्टकैः पत्रैर्लताभिः स्थानकैश्च विषमां, स्थानकशब्देनैव ऋज्वागतं गतार्थमपि व्यापकत्वात् पृथगुक्तं, प्रायो हि चित्रे ऋज्वागतमेव लिख्यते, तथा तपसि भवानि तापसानि मयूरासनोष्ट्रासनादीनि करणानि तापसाख्यानि, ततः ऋज्वागते तापसानि यस्यां सा ताम् । यद्वा, ऋज्वागते तापसानि यस्यां सा ताम् । यद्वा, ऋज्वागतेन **तापंस्यती**ति केचित्, ऋज्वागतेन दुःखापहारिणीमित्यर्थः । पुनः किम्भूतां विन्ध्याटवीम् ? अप्सुरतिः अव्रतिर्महती अव्रतिर्येषां ते महाव्रतिकाः-वृक्षास्तेषामन्तः-मध्ये पतन्त्यभीक्ष्णमेवंविधैः कालमुखैः-कृष्णमुखैः वानरैः-मर्कटैः संकुलां-अशून्यां, तथा अनेकधा-बहुधा भिन्नस्रोतसं,-स्फुटितप्रश्रवणां । कामिव ? कलियुगे शिवशासनस्य स्थितिमिव-मर्यादामिव, तां किम्भूताम् ? महाव्रतिकाः-कापालिकास्तदन्तःपातिभिः-तदन्तर्भूतैः कालमुखैर्वा शैवदर्शनविशिष्टैर्नरैः सङ्कुलां-आचितां, तथा बहुधा भिन्नप्रवाहां, स्रोतोऽत्र लक्षणया प्रवाह आम्नाय इति यावत् । कृतयुगे हि[१] एकमेव शिवशासनमभूत् कलौ तु बह्वाम्नायमिति भावः । श्लेषचित्रादिषु बवयोरैक्यम् । तथाहि–

"**मालामुत्पलकन्दलैः प्रविकचैरायोजितां बिभ्रती,**
**वक्त्रेणासमदृष्टिपात सुभगेनो[२]द्दीपयन्ती स्मरम् ।**
**काञ्चीदामनितम्बसङ्गिदधती व्यालम्बिना वाससा,**
**मूर्तिः कामरिपोः सितांशुकधरा पायादुमा वा जगत् ।।**" [ ]

१. हि नास्ति अनू. । २. सुमुखेनो° अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कामरिपोः-शिवस्य मूर्त्तिः पायात् । कीदृशी ? विगतकेशैः-उत्क्रान्तपलशिरोदलैरायोजितां मालां बिभ्रती । तथा विषमदृष्टिपातसुभगेन वक्त्रेण स्मरं दहन्ती । तथा नितम्बसङ्गि-काञ्चीदामप्रायं व्यालं-सर्पं दधती । तथा वाससा-वस्त्रेण विना व्यतिरिक्ता । तथा सितां-शुद्धं-चन्द्रं धरतीति । पलं-मांसं । कमित्यव्ययं शिरोऽर्थम् । उमापक्षे-व्यालम्बिना-लम्बमाने । शेषं सुगमम् ।

पुनः किम्भूताम् ? समुद्रस्य-अम्भोधेरुपकण्ठे-कूले लग्नां । कामिव ? कापालिकस्य खट्वाङ्गयष्टिमिव । तां किम्भूताम् ? समुद्रं-मुद्रान्वितं यत् उपकण्ठं-गलसमीपं तत्र लग्ना तां । मुद्रा भूषणास्थिग्रन्थिः। पुनः किम्भूताम् ? शम्बरः-श्वापदविशेषस्तेन अधिष्ठितां-आश्रितां । कामिव ? मायामिव । तां किम्भूताम् ? शम्बरेण-दानवविशेषेण अधिष्ठितां अङ्गीकृतां । शम्बरेण हि विनिर्मिता माया, अतएव शाम्बरीत्युच्यते। पुनः किम्भूतां विन्ध्याटवीम् ? न विद्यते सम्यक्-सुखं चारः-गतिर्यस्यां सा तां । कैः कृत्वा ? केसरिणां-सिंहानां प्रसवैः-पोतैः कृत्वा । कीदृग्भिः ? करिण ईरयन्ती- कम्पयन्तीति करीरास्तैः । कामिव ? मरुभूमिमिव । तां किम्भूताम् ? केसरिणः-किञ्जल्कोपेताः प्रसवाः-पुष्पाणि यत्र तथाविधैः करीरैः-तरुविशेषैरसञ्चारां-दुर्गमां । पुनः किम्भूताम् ? एवम्विधैस्तृणस्थलैरलङ्कृतां-भूषितां । किम्भूतैः । अतिचारुणि चन्दनानि तरवो यत्र तानि तथाविधैः, तथा कृतो गवां रोचनाविशेषः-अभिलाषातिशयो यैस्तानि तैः, तथा अक्षतां-अलूनां दूर्वां वहन्त्यभीक्ष्णं यानि तानि तथा तैः । कैरिव ? आरब्धाः-कृता मङ्गलार्था आचाराः आरब्धमङ्गलाचारास्तैरिव । तैः किम्भूतैः ? अतिचारुश्चन्दनरसो येषु तैः, तथा कृतो गोरोचना-गन्धद्रव्यविशेषः सा चातीवमंगल्या तस्या विशेषकः-तिलकं यत्र तैः, तथा अक्षतान् तण्डुलान् दूर्वां च-अनन्तां वहन्त्यभीक्ष्णमिति अक्षतदूर्वावाहिनस्तैः । पुनर्नलः किं कुर्वन् ? एकत्र-एकस्मिन् स्थाने राशीभूतान्-समूहीभूतान् गिरेः-पर्वतस्य ग्रामाणां च ये पामरलोकाः-प्राकृतजनास्तान् आलोकयन् । कीदृशान् ? मेषाणां वृषाणां च मिथुनानि युञ्जन्ति-धारयन्ति ये ते तथाविधान् । तथा सह धनुषा-कोदण्डेन सधनुषस्तान् । तथा सकुम्भाः-मङ्गलार्थं मस्तकन्यस्तकलशाः कन्याः-कुमार्यो येषु ते तथाविधान् । पक्षे, राशिर्ज्योतिषिकोक्ता[1] मेषादिः-मेषवृषमिथुनकुम्भकन्याराशेर्विशेषसंज्ञाः । तथा मन्त्रिसूनुना-श्रुतशीलेन सह इति वक्ष्यमाणप्रकारेण विहितो विदग्धः-चतुर आलापः-सम्भाषणं येन एवम्विधः सन् नलः कयापि वेलया-समयेन कमप्यध्वानं-वर्त्म अतिक्रम्य-उल्लंध्य क्वापि जलस्थलीप्रदेशे श्रान्ता ये सैनिकाः-चमूचरास्तेषु या अनुकम्पा-कृपा तथा प्रयाणविच्छेदं-अवस्थानमकरोत् । इतीति किम् ? हे मन्त्रिन् ! इयं सरित्तीरभूमिर्वर्तते । किम्भूताः ? चित्राः-चित्रवर्णाः शिखण्डिनः-मयूरास्तैर्मण्डिता । केव ? गगनवीथीव-नभोमार्ग इव । सा

१. ज्योतिषोक्तो अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किम्भूता ? चित्रशिखण्डिनः-सप्तर्षयस्तैर्मण्डिता-शोभिता । तथा हे मन्त्रिन् ! इयं गोष्ठभूमिः-गोकुलभूर्बहुतरं यथा भवति तथा गोपैः-वल्लवैरुपशोभिता वर्तते । केव ? सरिदिव । सा किम्भूता ? बहुभिस्तरङ्गैः-वीचीभिरुपशोभिता । तथा हे मन्त्रिन् ! इयं तरुपंक्तिः नक्षत्रमध्यं गता-प्राप्ता न विगतशाखा च वर्तते, एतेन तरूणामुच्चता सुभगता चोक्ता । अपिशब्दो विरोधसूचकः । या विशाखा भवेत् सा नक्षत्रमध्यगता कथं न स्यात् ? किन्तु नक्षत्रमध्यगतैव स्यादिति विरोधः, परिहारस्तु पूर्वोक्त एव । तथा हे मन्त्रिन् ! इयं पुष्पवती-कुसुमिता वीरुद् न दूषितः-निन्दितः स्पर्शो यस्याः सा मृदुत्वात् एवम्विधा वर्तते। अपिशब्दो विरोधार्थः । या पुष्पवती-रजस्वला भवेत् सा न दूषितस्पर्शा कथं भवेत् ? किन्तु दूषितस्पर्शैव-अस्पृश्यैव भवेत् । तथा हे मन्त्रिन् ! इयं वंशजालिः सन्निहितेभ्यो मधुः-क्षौद्रं ददातीति सन्निहितमधुदा तथा नवा-अविच्छाया तथा हरेः-सिंहस्य प्रिया-दृष्टा वर्तते । अपिशब्दो विरोधे । या हरेः-विष्णोर्प्रिया-वल्लभा सा कथं आसन्नमधुसंज्ञदैत्या भवेदिति विरोधः । तथा हे मन्त्रिन् ! इयं सल्लकीसन्ततिः-गजप्रियाराजिः कृतो मातङ्गैः-गजैः सङ्गमः-संयोगो यस्याः सा, तथा द्विजैः-पक्षिभिर्न परिहृता न त्यक्ता वर्तते । विरोधे तु, या कृतो मातङ्गेन-श्वपचेन सह संगमो मया सा एवम्विधा भवति सा कथं द्विजैः-विप्रैः परिहृता न भवेदिति विरोधः । तथा हे मन्त्रिन् ! इमे च केचित् विन्ध्यस्कन्धसन्निवेशो[1] महत् द्रुपदं-वृक्षस्थानं येषु तथाविधाः सन्ति, तथा सह शिखण्डिभिः-मयूरैर्वर्तन्त इति सशिखण्डिनः । अथ च महाद्रुपदाः-क्षत्रविशेषाः द्रुपदतनयश्च सारथिः शिखण्डी तेन सहिता सशिखण्डिनः । चित्रशिखण्डिमण्डितेत्यनेन पूर्वमटव्यां मयूरसद्भाव उक्तः । इदानीं तु विन्ध्यस्कन्धेषु इति न पौनरुक्त्यम् । तथा हे मन्त्रिन् ! केपि विन्ध्यस्कन्धप्रदेशाः विच्छिन्नाः-पृथग्भूताः कीचकाः-सच्छिद्रा-वंशाश्च निश्छिद्रा येषु ते तथाविधाः, तथा वृकाः-अरण्यश्वानमुदरे[2]-मध्ये येषां ते एवम्विधाः सन्ति । अथ च वृकोदरः-भीमः स च विशेषेण छिन्नः कीचकाख्य राजान्वयः । तथा केऽपि विन्ध्यस्कन्धप्रदेशाः पाण्डवः सन्तानकाः-तरुविशेषा येषु ते, तथा पुण्डरीकैः-सिताब्जैः अक्षैश्च-विभीतकैः सह युक्ताः सपुण्डरीकाक्षाः सन्ति । अथ च पाण्डोः सन्ताना एव सन्तानकाः-सुताः पाण्डवास्तेषु पुण्डरीकाक्षेण-विष्णुना सह-सहिताः सपुण्डरीकाक्षाः । तथा हे मन्त्रिन् ! केपि विन्ध्यस्कन्धप्रदेशाः महान्तो वराहा येषु ते तथाविधाः, तथा उत्कर्षेण हृताः-विस्तारेण रुद्धा भूर्यैस्ते एवम्विधाः सन्ति । अथ च महावराहः-विष्णुः स चोत्क्षिप्तपृथ्वीकः । तथा केऽपि विन्ध्यप्रदेशा अमन्दः-अधिको रागः-प्रेम येभ्यस्ते अमन्दरागाः, तथा उत्कृष्टाः-मनोज्ञा सुरभयः-चम्पकाः श्रीद्रुमाश्च-पिप्पलास्तेषां या आवलिः-श्रेणिस्तत्र ये हरयः-कपयस्तेषां ये कराः-पाणयस्तैराकृष्टानि-

---

१. सन्निवेशा अनू. । २. °श्वान उदरे अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निष्कासितानि पन्नगनेत्राणि-सर्पाक्षीणि येषु ते एवम्विधाः, इत्यमन्दरागत्वे हेतुः । तथा स्फुरन्ती-दीप्यमाना मणीनां भित्तिः-कुड्यं येषु ते तथाविधाः सन्ति । पक्षे-मन्दरः-मन्दराख्यो अगाः-पर्वताः[1] । ते किम्भूताः ? उत्कृष्टा-उद्भृता सुरभिः-धेनुः श्रीः-लक्ष्मीः द्रुमः-पारिजातश्च यैस्तथाविधाः । मन्दरेण हि सुरभिप्रभृतीन्यम्भोधेरुद्भृतानि[2] । सुरभिः-धेनुः, इह तु प्रस्तावात् कामधेनुः । **यद्विश्वप्रकाशः-"सुरभिश्चम्पके स्वर्णे जाती पुष्पवसंतयोः । गन्धोत्पले सौरभेय्यां"** [भान्त. ३१] इति । तथा बलिः-दैत्यस्य हरेश्च-विष्णोः करैराकृष्टं-भ्रमितं पन्नगः-वासुकिलक्षणं नेत्रं मन्थाना-कर्षणरज्जुर्यत्र ते स्फुरन्मणिभित्तयश्च । तथा केपि कैलासकूटा इव आचरन्तः कैलास-कूटायमानाः-कैलाशशिखरोपमाः । किम्भूताः ? सह स्थाणुभिः-स्थिरपदार्थैर्वर्तन्त इति सस्थाणवः, तथा दुर्गा-विन्ध्यवासिनी देवी तस्याः- आश्रयाः दुर्ग आश्रय आश्रयणं-आरोहणं येषां ते इति वा । तथा श्रूयमाणाः-आकर्ण्यमाना गजानां वदनचीत्काराः-बृंहितानि येषु ते, तथा सगुहाः-अखातविवरसहिताः, **"गुहा पुनः । गह्वरे सिंहपुच्छ्यां च"** [२/६११-१२] इत्य**नेकार्थः** । किम्भूताः कैलासकूटाः ? सस्थाणवः-सशिवाः, तथा दुर्गा-गौरी तस्या आश्रयाः, तथा श्रूयमाणो गजवदनस्य-हेरम्बस्य चीत्कारो येषु ते, तथा सगुहाः-सकार्त्तिकेयाः । ततः खलुर्वाक्यालङ्कारे । हे मन्त्रिन् ! अमी विन्ध्यस्कन्धस्य सन्निवेशाः-प्रदेशाः सेव्याः-सेवितुं योग्याः । किम्भूते जलस्थलीप्रदेशे ? अपरिमिताः-बहवः पतन्तो ये निर्झरजलतुषाराः-प्रस्रवणाम्भोलवास्तेषां स्पर्शेन-सम्पर्केण मञ्जरिताः-सम्जातमञ्जरीका ये पादपास्तेषां यानि पुष्पाणि तेषां परिमलेन-आमोदेन मिलन्तः- राशीभवन्तो ये मधुकरास्तेषां झङ्कारेण हारिणि-मनोज्ञे, तथा रममाणानि-क्रीडन्ति यानि शबरमिथुनानि-शबरशबरीरूपाणि युग्मानि तेषां सम्मर्देन-अङ्गपरिमलेन मृदिता-विच्छायीभूता अमन्दाः-अनल्पा मृदवः-सुकुमाराः शाद्वलाः-नीलतृणानि यस्मिन् स तथा तस्मिन् ।

**तैस्तैश्चिरन्तनवासरव्यापारैरहःशेषसहितामतिवाह्य तां[1] निशामनन्तरमुन्मिषत्पक्ष्मपक्षिपक्षावधूनन[2]पवनैरिवापनीयमानेषु गगनचत्वरचर्चाप्रकारपाण्डुपुष्पपुञ्जेषु[3] नक्षत्रेषु, स्वविरहोत्पन्नतमःकलङ्ककलुषितानि मनाक्कुङ्कुमपङ्कपिञ्जरकरैः[4] परामृश्य प्रसादयति दिननाथे दिङ्मुखानि, पुनः पूर्वक्रमेण प्रस्थानमकरोत् ।**

अहःशेषेण-दिवसावशिष्टभागेन सहितां तां निशान्तैस्तैरद्भुतैश्चिरन्तनवासराणां-पूर्वकालीनदिवसानां ये व्यापारास्तच्चिन्तनरूपास्तैः कृत्वा अतिवाह्य-अतिक्रम्य अनन्तरं-रात्रिगमनात् पश्चात् पुनर्भूयः पूर्वक्रमेण-पूर्वदिवसप्रस्थानपरिपाट्या प्रस्थानं-चलनमकरोत् ।

---

१. मन्दरागाः-मन्दराख्यपर्वताः अनू. । २. उद्धृतानि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

केषु सत्सु ? गगनमेव चत्वरं-संस्कृताभूमिस्तस्मिन् चर्चाप्रकाराय-पूजाविशेषार्थं यानि पाण्डुपुष्पाणि तेषां पुञ्ज इव यानि तानि तथा तेषु नक्षत्रेषु अपनीयमानेषु दूरीक्रियमाणेषु सत्सु । उत्प्रेक्ष्यते उन्मिषती-उड्डयनाय वितती भवती पक्ष्मणी-पक्षती येषां एवम्विधा ये पक्षिणस्तेषां पक्षयोरवधूननेन कम्पनेन ये पवनाः-वातास्तैरिव । अन्यान्यपि पुष्पाणि पवनेन अपनीयन्ते तथाऽमूनि पुष्पोपमानानि नक्षत्राणि प्रातःकालोड्डीनपक्षिपक्षवातैरिव किमु अपनीतानीति भावः । **"प्रकारः सदृशे भेदे" "पक्ष्माक्षि लोम्नि तन्त्वादिसूक्ष्मांशे कुसुमच्छदे । गरुत्किञ्जल्कयोश्चापि"** इत्यनेकार्थः [३/६०८] । पुनः क्व सति ? दिननाथे-रवौ दिङ्मुखानि प्रसादयति-विमलयति सति । किम्भूतानि दिङ्मुखानि ? स्वस्य विरहेण-वियोगेन उत्पन्नो यस्तम एव कलङ्कस्तेन कलुषितानि- श्यामलीभूतानि[१] । किं कृत्वा ? मनाक्-स्तोकं कुङ्कुमपङ्कवत्-घुसृणकर्दमवत् पिञ्जराः-पिङ्गलवर्णा ये कराः- किरणास्तैः कृत्वा परामृश्य-संस्पृश्य । अन्योपि विलासी कुङ्कुमपङ्कपिञ्जरकराभ्यां परामृश्य स्ववियोगोत्पन्नतामसभावकलुषितं स्वप्रियाया मुखं प्रसादयति-प्रसन्नं करोति तथैतस्मिन् रवौ प्रसादयति सति, सूर्ये उद्गते इत्यर्थ ।

**एवमपसरन्मार्गान्मार्गान्नीवारिणि वारीणि सहंसनिनदान्नदान् सकरेणु-रेणुस्थलमाच्छादितदिशि खराणि शिखराणि[१] लङ्घयन् सुनीरागान् गिरिगहनग्रामाँस्तपस्विनश्च मानयन्नेकदा नातिदूर इवोत्कैः कादम्बकदम्ब-चुम्ब्यमानाम्बुजराजिरजोरञ्जिताम्भसि सरिति तीरे तरु[२]तलोपविष्टमेक-मध्वश्रान्तमध्वनीनमिदं[३] चाटुश्लोकयुगल[४]मतिमधुरगीततरङ्गरङ्गिताक्षरं[५] गायन्तमद्राक्षीत् ।**

**एवं**-अमुना प्रकारेण मार्गादीनां लङ्घनादिकं कुर्वन् एकदा-एकस्मिन् दिने नातिदूर इव-स्वसमीपे एव सरिति-नद्यां तीरतरोः-तटवृक्षस्य तले-अधोभागे उपविष्टं-निषण्णं एकमध्वश्रान्तं-मार्गातिक्रमणखिन्नं अध्वानमलंगामी इत्यध्वनीनस्तं इदं-वक्ष्यमाणं चाटुश्लोकयुगं-प्रियवाक्यपद्यद्वयं अतिमधुरैः-श्रवणानुकूलैः गीततरङ्गैः-गानपरम्पराभिः-रङ्गितानि-क्रीडितानि अक्षराणि यत्र एवं यथा भवति तथा गायन्तं अद्राक्षीत्-ददर्श । एवमिति कथम् ? अपसरत्-सैन्यभयान्निवर्तमानं मार्गं मृगसमूहो येभ्यस्तथाविधान् मार्गान् लंघयन्-अतिक्रामन् तथा नीवारः-वनव्रीहिरस्त्येष्विति नीवारीणि एवम्भूतानि वारीणि। जलानि उल्लंघयन्, तथा सह हंसानां निनदैः-शब्दैर्वर्तन्त इति सहंसनिनदास्तथाविधान् नदान्-जलाधारान् उल्लंघयन्, तथा करेणुभिः-गजैः सह-युक्तं रेणुस्थलं लंघयन्, तथा आच्छादिता दिशो यैस्तानि आच्छादितदिशि एवंभूतानि खराणि-तीक्ष्णानि शिखराणि-कूटानि लंघयन् । पुनः किं कुर्वन् ? एवंभूतान् गिरिगहने-

---

१. श्यामीभूतानि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पर्वतगह्वरे ये ग्रामांस्तान् तपस्विनश्च-तापसान् मानयन्, ग्रामाणां च माननमवस्थानविधानेन तापसानां च माननं शिरोनमनादिना। किम्भूतान् ग्रामान् ? सुष्ठु नीरं-जलं अगाश्च-तरवो येषु इति सुनीरागास्तान्। किम्भूतान् तपस्विनः ? सुष्ठु निर्गतरागान्। मानयन्निति मानिरुपभोगार्थः पूजार्थश्च। उपभोगे यथा-"**मानयिष्यन्ति सिद्धाः**" [ ] "**सोत्कण्ठानि प्रियसहचरी सम्भ्रमालिङ्गितानि**" [ ]। किम्भूतायां सरिति ? उत्कैः-उत्कण्ठितैः कादम्बकदम्बकैः[1]-हंसवृन्दैश्चुम्ब्यमानः-आस्वाद्यमानो यो अम्बुजराशिः-पद्मपंक्तिस्तस्य रजसा-परागेण रञ्जितं-पिञ्जरितमम्भः-जलं यस्याः सा तस्याम्।

अथ श्लोकद्वयमाह—

**तव सुहृदनुरक्त[1]श्रीफलः कामकेलिं,**
**जनयति वनितानां कुङ्कुमालोहितानाम्।**
**श्रयति स च समूहो मेखलाभूषितः सन्-**
**जनयति वनितानां कुंकुमालोऽहितानाम् ॥ १२ ॥**

**अपि च –**

**त्वत्तो भयेन नृप पश्य जनो वनेषु,**
**कान्त्या जितस्मर तिरोहित-वानरीणाम्।**
**शाखामृगश्चपल एष गिरेरुपत्य-**
**कां त्याजितः स्मरति रोहित-वानरीणाम् ॥ १३ ॥**

**तवेति**। तव सम्बन्धी सुहृत्-मित्रजनो अनुरक्त[2]:-उपभुक्तः श्रियः-लक्ष्म्याः फलं: दानभोगादि येन स एवम्विधः सन् कुङ्कुमेन-घुसृणेन आ-ईषल्लोहितानां वनितानां-जनितात्यर्थरागाणां योषितां कामकेलिं-मन्मथलीलां जनयति। "**वनिता-जनितात्यर्थ-रागयोषिती**" इति **विश्वप्रकाशः** [तान्त. १४६]। स च अहितानां-वैरिणां समूहो मेखलायां-गिरिमध्यभुवि उषितः-स्थितः। कुमालः-कुत्सित स्रक् सन् वैरत्यागात् सज्जनतायाः शबरत्वस्य कुं-भूमिकां श्रयति। स चेति चकारात् सुहृदहितसमूहयोः अन्योन्यं अयमाङ्कितपादस्थितविशेषणाभ्यां शब्दश्लेषद्वारेण सम्बन्धः। तद्यथा—मेखलया-कटिपट्टिकया भूषितः सुहृत् अहितसमूहोपि अनुभुक्तः-बिल्वः। अत्र प्रथमतृतीयपादौ विशेषणगतश्लेषेणालङ्कृतौ द्वितीयतुर्यौ तु सम्पूर्णयमकेन। यद्वा, जनः-प्राकृतलोकः भार्याभावात् यतिः, वनमस्ति निवासार्थं येषां ते वनिनः-शबरास्तेषां तानः-विस्तारो यस्याः सा ताम्। कुं विशेषणम्। पालिनीवृत्तम् ॥ १२ ॥

---

१. कादम्बककदम्बकैः अनू.। २. अनुभुक्तः अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अपि** च-पुनः-

**त्वत्त** इति । हे कान्त्या-सौन्दर्येण जितस्मर ! हे नृप ! त्वं पश्य-इति आभिमुख्यकरणे अवलोकय । अरीणां-शत्रूणां जनः-लोकस्त्वत्तो भयेन-त्वद्भयेन वनेषु तिरोहितवान्-अदृश्यतां प्राप्तः । जितस्मर इत्यनेन स्मरोऽपि किल त्वया जित इति तिरोहितोऽभूत् इति प्रतीयते । स्मृतिगोचर एव, न तु दृश्यत इत्यन्वर्थात् । तथा एष-प्रत्यक्षवर्ती शाखामृगः-वानरः चपलः-लोलः अनेनैव वनवासिना रिपुजनेन गिरेरुपत्यकां-अधोभूमिकां त्याजितो रोहितवानरीणां-रक्तमर्कटीनां स्मरति । वानरीणामिति स्मृत्यर्थकर्मणि षष्ठी । वसन्ततिलकावृत्तम् ॥ १३ ॥

**'अहो नु खल्वयमनल्पशास्त्रीयसंस्कारामृतसंपर्कपल्लवितप्रज्ञाङ्कुरः कोऽपि कुशलः काव्यवक्रोक्तिषु पथिकयुवा योग्यः सम्भाषणस्य' इत्यवधारयति राजनि ससंभ्रमं समुत्थाय[१] स्थित्वा च पुरः स पान्थः सप्रणाममिमं श्लोकमपाठीत् ।**

**अहो**-इति आश्चर्ये । नु इति वितर्के । खलु इति वाक्यालङ्कारे । अयं अनल्पः-बहुलो यः शास्त्रीयः-शास्त्रसम्बन्धी संस्कारः-वासना स एव अमृतं जलं तस्य सम्पर्केण-सम्बन्धेन पल्लवितः-किसलयितो वर्द्धित इत्यर्थः, प्रज्ञैव अङ्कुरो यस्य सः । अन्योऽपि अङ्कुरः अमृतसम्पर्केणैव सपल्लवो भवति तथा बुद्ध्यङ्कुरोपि शास्त्रसम्पर्केणेति[१] । पल्लवितशब्दो लक्षणया प्रवृत्तार्थः । एवंविधः कोपि पथिकयुवा काव्यवक्रोक्तिषु-काव्येषु या वक्रोक्तयः-श्लेषरचनास्तासु कुशलः-दक्षः, सम्भाषणस्य-वादनस्य योग्य इति-अमुना प्रकारेण राजनि अवधारयति-चिन्तयति सति, ससम्भ्रमं-सादरं यथा भवति तथा समुत्थाय च-पुनः पुरः-राज्ञो अग्रे स्थित्वा स पान्थः सप्रणामं-नमस्कारसहितं यथा भवति तथा इमं वक्ष्यमाणं श्लोकं अपाठीत्-पपाठ ।

**वेधा वेदनयाश्लिष्टो गोविन्दश्च गदाधरः[२] ।**
**शंभुः शूली विषादी च देव केनोपमीयसे ॥ १४ ॥**

**वेधा** इति । हे देव !-राजन् ! त्वं मया केन सह उपमीयसे-केन सहोपमानं तव क्रियते । कथम् ? वेधा-ब्रह्मा वेदनया-पीडया श्लिष्टः-सम्बद्धः । गोविन्दोपि-विष्णुरपि गदेन-रोगेण अधरः-विधुरः । शम्भुः- शूली शूलं-रुग्विशेषोऽस्ति अस्येति शूली, अतएव विषादी च-विषादान्वितः । त्रयोऽपि ब्रह्मविष्णुशम्भवो जगति मुख्यास्तेषां चैवंविधत्वं, अतस्तव केनोपमानं निर्दोषत्वादिति बाह्योर्थः । तत्त्वतस्तु—वेधाः वेदानां नयेन-मतेन

१. शास्त्रसंस्कारेणेति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आश्लिष्टः । गोविन्दस्तु गदा-कौमोदकी तां धरतीति गदाधरः, अथवा गदो भ्राताऽसौ अधरः-अनुजो यस्य सः । शम्भुश्च शूलमायुधमस्यास्तीति शूली, तथा विषं अत्तीति विषादी अतएव नीलकण्ठः स उच्यते ॥ १४ ॥

**राजा तु तदाकार्ण्य क्षणमाग्रहोपरोधविस्मयहर्षरसैः समकाल-माप्लावितमनाः, प्रथममुत्फुल्लया दृशा, ततो मुग्धस्मितार्घेण, तदनु सर्वाङ्गीण भूषणप्रदानेन, तमभ्यर्च्य 'पान्थ, कथय केयमुत्तुङ्गकल्लोल-दोलाधिरूढानुच्चचञ्चूत्क्षिप्तमृदुमृणालवलयानुत्कूजतः[१] कलहंसानक्षसूत्रिणः प्रवर्त्तितब्रह्मयज्ञोद्गारमुखरमुखांस्तीरतापसानिव दिवमारोपयितुमुद्वहन्ती सरित्, तरुणतर[२]तरु-तलमलंकुर्वाणः प्रसन्नसरस्वतीकः कश्च[३] भवान्' इति सप्रणयमपृच्छत् ।**

**राजा** तु-नलस्तत्पथिकोक्तं आकर्ण्य-श्रुत्वा क्षणं यावत् आग्रहः-आदरः उपरोधः-अनुग्रहः विस्मयं[१]-आश्चर्यं हर्षश्च-प्रमोदस्त एव रसाः-अभिप्रायविशेषास्तैः समकालं युगपत् आप्लावितं-आपूरितं मनो यस्यासौ । अन्योपि रसेन-जलेन आप्लायत[२] एव । युगपदुत्पन्नाग्रहादिरसयुतचेताः । प्रथमं-पूर्वं उत्फुल्लया-विकसितया दृशा । ततो मुग्धस्मितमेव-मनोहरहास्यमेव अर्घः-पूजाविधिस्तेन । तदनु-ततः सर्वाङ्गीणानि-सर्वशरीरव्यापीनि भूषणानि तेषां प्रदानेन च तं पान्थं अभ्यर्च्य-पूजयित्वा इति वक्ष्यमाणं सप्रणयं-सस्नेहं यथा भवति तथा अपृच्छत्-पप्रच्छ[३]। पृच्छिर्द्विकर्मकः । सर्वाङ्गं व्याप्नोतीति सर्वाङ्गीण । **तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोतीति** । [पा. सू. ५/२/७] व्याप्नोतीत्यर्थे खः, खस्य चेनः । इतीति किम् ? हे पान्थ! त्वं कथय । केयं ? सरित् । किं कुर्वती ? कलहंसान् उद्वहन्ती-बिभ्रती । किम्भूतान् कलहंसान् ? उत्तुङ्गाः-उन्नता ये कल्लोलास्त एव दोला-प्रेङ्खा तस्यामधिरुढान्-आश्रितान्, तथा उच्चचञ्च्वा उत्क्षिप्तः-उद्भृतो मृदुः-सुकुमारो मृणालवलयं-बिसमण्डलं यैस्ते तान्, तथा उत्कूजतः-शब्दायमानान्। हंसान् कानिव ? उत्प्रेक्ष्यते, दिवं-स्वर्गं आरोपयितुं-प्रापयितुं एतान् तीरतापसानिव-तटनिवासितपस्विन इव। किम्भूतान् तीरतापसान् ? अक्षसूत्रं-उपवीतं एषामस्तीति अक्षसूत्रिणस्तान् । तथा प्रवर्तितः-विहितो यो ब्रह्मयज्ञोद्गारः-वेदाध्ययनोच्चारस्तेन मुखराणि-वाचालानि मुखानि येषां ते तथाविधान् । मृणालवलयानां अक्षसूत्रम् उत्कूजनस्य ब्रह्मयज्ञोद्गारो हंसानां च तापसा उपमानम् । मन्ये, उत्तुङ्गकल्लोलैरमी हंसा नोत्क्षिप्यन्ते किन्तु तीरतापसा एव स्वर्गं नीयन्त इति । कश्च भवान्? किम्भूतः ? तरुणतरोः-नवतरोः यस्तरुस्तस्य तलं-अधोभागं अलङ्कुर्वाणः-भूषयन्, तथा प्रसन्ना सरस्वती यस्य स

१. विस्मय अनू. । २. आप्लाव्यत अनू. । ३. नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथाविधः । "नद्यृदन्ताद् बहुव्रीहौ कः" [ ]।

**सोऽपि 'सभ्रमरया क्वणत् [१]कीचकवेणुलतया सदृशी नावा-तरणयोग्या किमियमप्रसिद्धा महानदी देवस्य' इत्यभिधाय कथयितु-मारब्धवान् ।**

**सोऽपि** पथिक इत्यभिधाय कथयितुमारब्धवान् । इतीति किम् ? हे देव ! किमियं महानदी देवस्य-राज्ञः अप्रसिद्धा-न विदिता याऽसौ नदी नावा-बेडया तरणयोग्या, तथा सभ्रमरया -सभृङ्गया क्वणत् कीचकवेणुलतया-शब्दायमानसच्छिद्रवंशवल्ल्या सदृशी । वंशवल्ल्यपि अवाते-वाताभावे रणस्य-शब्दस्य योग्या न भवति किन्तु वाते सति शब्दयोग्या सरिदपि सभ्रमः-सावर्त्तो रयः-जवो यस्या इति सभ्रमरया ।

अथ यत् कथयितुमारब्धवांस्तदाह–

**भानोः सुता संवरणस्य भार्या, तापी सरित्सेयमघस्य हन्त्री ।**
**यस्याः कुरुः सूनुरभूत्स यस्या नाम्ना कुरुक्षेत्रमुदाहरन्ति ॥ १५ ॥**

**भानोरिति** । हे देव ! सा इयं तापी सरित् । किम्भूता ? भानोः-सूर्यस्य सुता, तथा सम्वरणस्य-क्षत्रियविशेषस्य भार्या, तथा अघस्य-पापस्य हन्त्री-विनाशिका । सा इति का ? यस्याः सूनुः कुरुरभूत् । स इति कः ? यस्य कुरोर्नाम्ना कुरुक्षेत्रमुदाहरन्ति-कथयन्ति कवय इति शेषः । इन्द्रवंशावृत्तम् ॥ १५ ॥

**एतस्याः सलिलावगाहसमये कुर्वन्ति नित्यं नृणां,**
**नीरन्ध्रोन्नतकर्कशस्तनतटीसंघट्टपिष्टोर्मयः ।**
**भ्राम्यद्भृङ्गनिभालकैः क्षणमिव व्यालोलनेत्रैर्मुखै,**
**रुत्फुल्लोत्पलगर्भपङ्कजवनभ्रान्ति महाराष्ट्रिकाः ॥ १६ ॥**

**एतस्या** इति । एतस्याः-सरितः सलिले यो अवगाहमज्जनं तस्य समये-अवसरे महाराष्ट्रिकाः-महाराष्ट्रदेशीयाः स्त्रियो भ्राम्यन्तो ये भृङ्गास्तन्निभाः-तत्तुल्या अलकाः-चूर्णकुन्तला येषु तैः, तथा अतिव्यालोलानि-अतिचञ्चलानि नेत्राणि येषु एवम्विधैर्मुखैः कृत्वा नृणां नित्यं क्षणं-एकं उत्फुल्लानि-विकसितानि उत्पलानि गर्भे-मध्ये यस्य एवम्विधं यत्पङ्कजवनं तस्य भ्रान्ति-सन्देहं कुर्वन्ति । जनाः शंकन्ते अमूनि मुखानि न, किन्तु पद्मानीति । नेत्रयोर्नीलोत्पलं मुखानां च पद्मवनमुपमानम् । पद्मेषु किल भृङ्गैर्भाव्यमत्र तु अलका एव भृङ्गस्थानीया इति । किम्भूता महाराष्ट्रिकाः ? नीरन्ध्रा -निविडा उन्नता-उच्चा

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कर्कशा-कठिना या स्तनतटी तस्याः संघट्टेन-संश्लेषेण पिष्टाः-चूर्णिता ऊर्मयः-वीचयो याभिस्ताः । शार्दूलविक्रीडितम् ॥ १६ ॥

**अपि च–**

**यद्येतस्याः सकृदपि मरुन्नर्तिताम्भोजराजि[1]-**
**प्रेङ्खत्पत्रव्यजनविधुतं वारि नीहारहारि ।**
**रोधोभाजां पिबति कुसुमैर्वासितं पादपानां,**
**पीयूषाय स्पृहयति ततः किं क्वचिन्नाकिलोकः ॥ १७ ॥**

**अपि च–**

**यद्येतस्या** इति । हे देव ! नाकिलोकः-अमरजनो यद्येतस्याः-सरितः सकृदपि-एकवारमपि वारि-जलं पिबति, ततस्तदा किं क्वचित् कुत्रापि पीयूषाय-अमृताय स्पृहयति-वाञ्छति, अपितु पीयूषं न वाञ्छति । एतावता अमृतादप्यस्या जलस्य रसाधिक्यं दर्शितम् । स्पृहेरीप्सित इति । स्पृहयतेरिष्टः सम्प्रदानं स्यादिति । किम्भूतं वारि ? मरुता-वायुना नर्त्तिता-तरलिता या अम्भोजराजिः-पद्मश्रेणिस्तस्याः प्रेङ्खन्ति-कम्पमानानि यानि पत्राणि-दलानि तान्येव व्यजनं-तालवृन्तं तेन विधुतं-कम्पितं । वायोर्नर्त्तनं तरलमेव । तथा नीहारवद्-हिमवद् हारि-मनोहरं, श्वेतवर्णत्वात् । तथा रोधः-तटं भजन्तीति रोधोभाजस्तेषां पादपानां-तरूणां कुसुमैर्वासितं-सुरभितम् ॥ मन्दाक्रान्ता वृत्तम् ॥ १७ ॥

एतावता 'केयं सरित्' इति प्रश्नस्योत्तरमदायि । अथ कश्च भवान् ? इति प्रश्नस्योत्तरमाह-

**मामपि पुष्कराक्षनामानं वार्तिकमवगच्छतु देवः ।**

**माम**पीति । मामपि पथिकं देवः पुष्कराक्षनामानं वार्त्तायां नियुक्तः-अधिकृतो वार्त्तिक**मिति "तत्र नियुक्तः"** [पा. सू. ४/४/६९] इति ठक् ।

**तथाहि –**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**स्थित्वा त्वदागमनमार्गमुखे गवाक्षे,**
**वार्ताविशेषमधिगन्तुमिहायताक्ष्या ।**
**संप्रेषितो निषधनाथ तयास्मि यस्याः,**
**क्रीडागिरिस्त्वमसि मुग्धमनोमृगस्य ॥ १८ ॥**

**तथा हीति**-तदेव दर्शयति-

**स्थित्वेति** । हे निषधनाथ !-हे नल ! तव आगमनस्य यो मार्ग:-त्वदागमनमार्गस्तस्मिन् मुख-द्वारं यस्य स तस्मिन् गवाक्षे-वातायने स्थित्वा तया आयताक्ष्या-दीर्घदृशा दमयन्त्या वार्ताविशेषं-वार्त्तान्तरं अधिगन्तुं-ज्ञातुं अहं इह सम्प्रेषितोस्मि-मुक्तोस्मि । तयेति कया ? यस्या मुग्धो मन एव मृगस्तस्य त्वं क्रीडागिरिरसि । यथा मृग: क्रीडागिरौ रमते तथा तस्या: मनस्त्वयि रमत इति । वसन्ततिलका वृत्तम् ॥ १८ ॥

**एष्यति च श्वस्तनेऽहनि मार्गश्रमक्लान्तमितो नातिदूर इवोत्तुङ्गसरलसालसर्जार्जुननिचुलनिचयान्तरचलच्चकोर[१]मयूरहारीतहंसकुलकोलाहलिनि पयोष्णीपुलिनपरिसरे स्थितं तया प्रहितमाप्तं क्रीडाकिंनरमिथुनम् ।**

**'इयं च वाच्यतां तया स्वहस्तकिसलयलिखिताक्षरगर्भा भूर्जपत्त्रिका' इत्यभिधाय पुरोऽस्य लेखपत्त्रिकां व्यसृजत् ।**

**एष्यति** चेति । च-पुन: श्वस्तने-अहनि आगामिनि दिने मार्गश्रमेण क्लान्तं-ग्लानं, अत:-अस्मात्प्रदेशान्नातिदूर इव-समीपे एव पयोष्णीपुलिनपरिसरे स्थितं तया-दमयन्त्या प्रहितं-प्रेषितं आप्तं-यथार्थवचनं क्रीडाकिन्नरमिथुनं एष्यति-समागमिष्यति । श्वो भवं श्वस्तनम् । **"सायं चिरं प्राह्णे प्रगे व्ययेभ्यस्तनट्"** [पा.सू. ४/३/२३] । किम्भूते पयोष्णीतीरपरिसरे ? उत्तुङ्गा-उन्नता ये सरलसालाश्च-देवदारुतरव: सर्जाश्च-साला: अर्जुनाश्च-ककुभा: निचुलाश्च-हिज्जलास्तेषां निचया:-समूहास्तेषां अन्तरेषु-अन्तरालेषु चलन्तो ये चकोराश्च मयूराश्च हारीताश्च हंसाश्च तेषां यत्कुलं-वृन्दं तस्य कोलाहल:-कूजितं यस्मिन् स तथा तस्मिन् । नदीतटे वृक्षान्तरेषु यत्रामी पक्षिण: शब्दायन्त इत्यर्थ: ।

**च**-पुन: इयं भूर्जपत्रिका वाच्यताम् । किम्भूता ? तया-दमयन्त्या स्वहस्तकिसलयेन-स्वपाणिपल्लवेन लिखितानि अक्षराणि गर्भे-मध्ये यस्या: सा । इति-अमुना प्रकारेण अभिधाय-उक्त्वा अस्य-नलस्य पुर:-अग्रे लेखपत्रिकां-सन्देशपत्रं व्यसृजत्-मुमोच । लिख्यत इति लेख:-सन्देश: ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**राजाऽपि पार्श्वपरिजनेनोत्क्षिप्यार्पितां तामतिबहल[१]पुलकाङ्कुर-कण्टकितप्रकोष्ठकाण्डेन पाणिना स्वयमुन्मुच्य सादरमवाचयत् ।**

**राजाऽपि**-नलः पार्श्वे-समीपवर्ती यः परिजनस्तेन उत्क्षिप्य-ऊर्ध्वीकृत्य अर्पितां-दत्तां तां भूर्जपत्रिकां पाणिना स्वयं उन्मुच्य-उन्मुद्र्य च सादरं-सरभसं अवाचयत्-वाचयति स्म । किम्भूतेन पाणिना ? अतिबहलाः-अतिघना ये पुलकाङ्कुराः-रोमाञ्चास्तैः कण्टकितं-प्राप्तसूचं प्रकोष्ठकाण्डं-कलाचिकानालं यस्य स तेन । अन्यस्मिन्नपि नाले कण्टका भवन्ति । तथा चोकतम्-"**कण्टकाः पद्मनाले**" इति । तथा रोमाञ्चा एव प्रकोष्ठकाण्डे कण्टका इति ।

अथ यत्तत्र भूर्जपत्रिकायां तथाऽलेखि तदाह—

**नलोऽपि मां प्रत्यनलोऽसि यत्स्याद्भवादृशां नैषध नैष धर्मः ।**
**तवाबलानां बलवद् ग्रहीतुं न मानसं मानसमुद्र युक्तम् ॥ १९ ॥**

**नलोपीति** । नैषध इत्यभिजननामामन्त्रणेन कुलीनत्वम्, हे नैषध ! त्वं नलोऽपि-नलाख्योपि सन् मां प्रति अनलः-वह्निरस्मि, उत्कण्ठाजनकत्वेन सन्तापक इत्यर्थः । अपिः-विरोधे, यो नलः स कथं अनलः ? न नलो अनलः इति ? परिहारस्तु प्रागेवाख्यातः । न च एष भवादृशां-महाशयानां धर्मो यस्मादहं अबला तस्मात्तव हे मानसमुद्र ! अबलानां-दुर्बलानां मानसं-चेतो बलवत्-हठात् ग्रहीतुं न युक्तम् । मानसमुद्र इत्यनेन च सबलानामेव पराजयो युक्तो नाऽबलानाम् । अतो मम अबलाया । मानसग्रहणं न युक्तमिति भावः । बलवदिति हठादित्यर्थे अव्ययम् । मन एव मानसं "**प्रज्ञादिभ्यश्च**" [पा. सू. ५/४/३८] इति अण् । उपेन्द्रवज्रावृत्तम् ॥ १९ ॥

**अपि च-**

**निपपति किल दुर्बलेषु दैवं तदवितथं ननु येन कारणेन ।**
**बलवति न यथा तथाबलानां[२] प्रभवति कृष्टशरासनो मनोभूः ॥२०॥**

**अपि** च-पुनः

**निपेति** । किल इति आप्तोक्तौ । दैवः-विधि दुर्बलेषु निपतति, दैवो दुर्बलान् घातयतीत्यर्थः । तत् अवितथं-सत्यं । ननु-निश्चितं येन कारणेन कृष्टं-प्रगुणीकृतं शरासनं-धनुर्येन एवम्विधो मनोभूः-कामो अबलानां-स्त्रीणां, पक्षे-अशक्तानां च यथा प्रभवति-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

समर्थो भवति तथा बलवति-शक्तिमति न प्रभवति । ततो अहमपि अबला, अतो मां मनोभूः पीडयतीति ज्ञापितम् । देवशब्दः पुन्नपुसंकः ॥ २० ॥

**अपि च–**

**कदा किल भविष्यन्ति कुण्डिनोद्यानभूमयः ।**
**उत्फुल्लस्थलपद्माभभवच्चरणरङ्गिताः ॥ २१ ॥'**

**अपि च**-पुनः

**कदेति** । हे नल ! किलेति सम्भावनायां, कुण्डिनाख्यनगरस्य उद्यानभूमयः उत्फुल्लौ-विकसितौ यौ स्थलपद्मौ तदाभौ तत्सदृशौ यौ भवच्चरणौ ताभ्यां रङ्गिताः-शोभिताः कदा भविष्यन्ति इति सम्भाव्यते । यूयं कदा समागमिष्यथ इति भावः ॥ २१ ॥

**इति लेखलिखितप्रणयसुभाषितामृतरसप्लवेनाप्लावितहृदयः, 'विधे विधेहि मे पक्षिण इव पक्षयुगलमुड्डीय येन तां पश्यमि' इति चिन्तयन्नरपतिः पुरतः स्थितं तं प्रियवर्ति[१]कमाश्लिष्यन्निवरोमाञ्चनिचयेन, पिबन्निवाभिलाषतृषितया दृशा, स्नपयन्निव मधुरस्मितामृतरसेन, पुनः पुनः सादरमभाषत ।**

**इति**-अमुना प्रकारेण लेखे-भूर्जपत्रे लिखितानि यानि प्रणयसुभाषितानि-स्नेहसूक्तानि तान्येव अमृतरसः-सुधारूपं जलं तस्य प्लवेन-पूरेण आप्लावितं-आपूरितं हृदयं-चेतो यस्य सः। अन्योपि जलपूरेणाप्लाव्यत एव स्नेहसुभाषितवासितान्तःकरण इत्यर्थः । एवम्विधो नरपतिः-नल इति चिन्तयन्-विचारयन् पुरतः-अग्रतः स्थितं वार्त्तायां नियुक्तो वार्त्तिकः प्रियस्य वार्त्तिकः प्रियवार्त्तिकः तं, पुष्कराक्षं पुनः पुनः सादरं यथास्यातथा अभाषत-अवादीत् । इतीति किम् ? हे विधे ! -ब्रह्मन् ! मे-मम पक्षिण इव पक्षयुगलं[१] विधेहि-कुरु, येन पक्षयुगलेन कारणेन वा उड्डीय तां दमयन्तीं पश्यामि । नलस्तं किं कुर्वन्निव ? उच्चो यो रोमाञ्चनिचयः-उद्गतपुलकसमूहस्तेन आश्लिष्यन्निव-आलिङ्गन्निव, तदभिमुखरोमाञ्चोच्छ्वसनादालिङ्गनं । उत्प्रेक्ष्यते, तथा अभिलाषेण-अवलोकनवाञ्छया तृषिता-पिपासिता अभिलाषतृषिता तया दृशा पिबन्निव । अन्योपि तृषित एव जलं पिबति तथा तं अतिशयेन अवलोकयन्नित्यर्थः । तथा मधुर-मृष्टो यः स्मितमेव अमृतरसः-पीयूषजलं तेन स्नपयन्निव-क्षालयन्निव । अन्योपि रसेनैव क्षाल्यत इति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ यदुवाच नलस्तदाह–

**'पुष्पकराक्ष, सर्वथा[१] विजयते राजपुत्री । यस्याः प्रसन्नमुदार-[२]सत्कान्तिश्लिष्टं सुकुमारमनेकालंकारभाजनं वयो वचनं च, प्रश्रयः[३] प्रगल्भो विवेकवान्विदग्धबुद्धिर्भवद्विधः परिजनश्च ।**

**तत्कथय 'कथनीयकीर्तिः क्वास्ते ! कथमास्ते ! कं विनोदमनुतिष्ठति ! केन व्यापारेण परिगमयति[४] वासरमसौ[५] भवत्स्वामिसुता[६]' इत्येवमुक्तः स पुनः पल्लवयन्ननुरागकन्दलं नलमलपत् ।**

हे पुष्कराक्ष ! राजपुत्री-दमयन्ती सर्वथा सर्वप्रकारेण विजयति-जयवती वर्तते । यस्या राजपुत्र्याः एवम्विधं वयो वचनं च, वचःशब्देन तदाधारभूतं शरीरमुच्यते । किम्भूतं वयः ? प्रसन्नं-निर्मलं, तथा उदारं रम्यं, तथा सत्कान्तिः-तेजस्वि, तथा श्लिष्टं-सुघटितसर्वावयवं, तथा सुकुमारं-मृदुः, तथा अनेकालङ्कारभाजनं-बहुभूषणपात्रं । पक्षे किम्भूतं वचनम् ? प्रसन्नं झगित्यर्थप्रतीतिकृत् उदारं-महार्थं सत्कान्तिः-औज्ज्वल्यवत् श्लिष्टं-मसृणं, अज ठं-सुकुमारं अनेके अनुप्रासोपमादयो अलङ्कारास्तेषां भाजनम् । च-पुनः यस्या भवद्विधः-युष्मत्सदृशः परिजनः-परिवारः । किम्भूतः । प्रश्रयेण-स्नेहेन प्रगल्भः-प्रौढः, तथा विवेकवान्-विवेकी, तथा विदग्धा-कुशला बुद्धिर्यस्य स तथाविधः ।

हे पुष्कराक्ष ! त्वं कथय-वद । असौ कथनीया-कथयितुं योग्या कीर्त्तिर्यस्याः सा एवम्विधा भवत्स्वामिनः-भीमस्य सुता-भैमी क्व-कुत्र आस्ते-तिष्ठति ? कथं-केन प्रकारेण आस्ते ? कं विनोदं-कौतुकं अनुतिष्ठति-करोति ? अथ केन व्यापारेण-चेष्टया वासरं-दिनं परिगमयति-अतिवाहयति ? इत्येवं प्रकारेण उक्तः स पुष्कराक्षः पुनः-भूयः अनुराग एव भैम्यां प्रेमबन्ध एव कन्दलः-प्रोहस्तं पल्लवयन्-किसलयन् वर्द्धयन्नित्यर्थस्तं नलं अलपत् ।

**त्वद्देशागतवायसाय ददती दध्योदनं पिण्डितं,**
**त्वन्नाम्नः सदृशं दृशं निदधती वन्येऽपि मुग्धा नले ।**
**त्वत्संदेशकथार्थिनी मृगयते तान्राजहंसान्पुनः,**
**क्रीडोद्याननरङ्गिणीतरुतलच्छायासु वापीषु च ॥ २२ ॥**

**त्वद्देशेति** । तव यो देशः-उदग्लक्षणस्तस्मादागतो यो वायसः-काङ्कस्तस्मै पिण्डितं-मिश्रितं दध्योदनं-दधि च ओदनं च दध्योदनं समाहारद्वन्द्वः ददती-प्रयच्छन्ती ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा तव नामापि दुर्लभं ततस्त्वन्नाम्नः-त्वदभिधानस्य सदृशे-समुचिते वन्येपि वनोद्भवेपि नले-नडाख्ये तृणे दृशं निदधती-स्थापयन्ती । यतः किम्भूता ? मुग्धा-अप्रौढा एवम्विधा भैमी तव या सन्देशकथा-त्वत्सन्देशकथा प्रियोक्तवार्त्ता तां अर्थयते-श्रोतुमभिलषतीत्येवंशीला या सा, त्वत्सन्देशकथार्थिनी सती । पुनस्तान्-पूर्वकथितप्रियवार्त्ताकदम्बकान् राजहंसान्-कादम्बकान् क्रीडोद्याने-केलिवने या तरङ्गिणी-सरित् तस्यास्तरुतलच्छायासु वापीषु य मृगयते अवलोकयति । वन्येपीत्यत्र यद्यपि भवार्थे वनशब्दस्य नद्यादौ पठितत्वात् ढक् स्यात्, तथा च वाने ये इति रूपं स्यात्, तथापि 'तत्र भव' इत्यस्मिन्नर्थे दिगादित्वात् यत् [**दिगादिभ्यो** यत्, पा. सू. ४/३/५४]। "**वन्यं वनेभवो वन्यो वनचारिसमूहयोः**"[यान्त. १२] इति **विश्वप्रा**माण्याच्च त्वमिदं वचनं ब्रूया इत्येष शब्दः सन्देशः ॥ २२ ॥

**अपि च । सांप्रतं तया—**

**त्वद्देशागतमारुतेन मृदुना संजातरोमाञ्चया,**
**[1]त्वद्रूपाङ्कितचित्रचारुफलके[2] निर्वापयन्त्या दृशम् ।**
**त्वन्नामामृतसिक्तकर्णपुटया त्वन्मार्गवातायने,**
**नीचैः पञ्चमगीतिगर्भितगिरा नक्तंदिनं स्थीयते ॥ २३ ॥'**

**अपि च**-पुनः, **साम्प्रतं तया**-भैम्या

**त्वद्देशे**ति । त्वन्मार्गवातायने-यस्मिन् मार्गे भवान् एष्यति तन्मार्गगवाक्षे नीचैः-निभृतं प्रच्छन्नरागत्वात् मुग्धत्वाच्च पञ्चमगीत्या-पञ्चमरागेण गर्भिता-सहिता या गीस्तया नक्तं -दिनं-अहर्निशं स्थीयते, पञ्चमरागेण गायन्ती दिनानि गमयतीत्यर्थः । किम्भूतया तया ? मृदुना-सुस्पर्शेन तव देशः-त्वद्देशः-उत्तरो देशस्तस्मादागतो यो मारुतस्तेन सञ्जाता रोमाञ्चाः-पुलका यस्याः सा तया । तथा तव रूपेण-आकृत्या अङ्कितः-चित्रितः चित्रचारुरालेख्यप्रधानो यः फलकस्तस्मिन् दृशं-स्वीयं नेत्रं निर्वापयन्त्या-शीतली कुर्वत्या, त्वद्रूपाङ्कितफलकावलोकनादेव स्वीयां दृशं तोषयन्त्येति भावः । तथा तव नामैव अमृतं तेन सिक्तौ-उक्षितौ कर्णपुटौ-श्रोत्रकपाटौ यस्याः सा तया, श्रोत्रसुखकारित्वान्नामश‍ृण्वत्या उभे अपि । शार्दूलविक्रीडितवृत्ते । ॥ २३ ॥

**एवमनु[3]गुणमनुरागस्य, सदृशं शृङ्गारस्य, सहोदरमादरस्य, प्रियं प्रेमप्रपञ्चस्य[4], प्रोत्साहनमनङ्गस्य, अनुकूलमुत्कण्ठायाः, समुचितमभिनिवेशस्य, कौतुकजननं[5] जल्पति पुष्कराक्षे, श्रवणकुतूहलिनि**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**विस्मृतान्यव्यापारे तन्मयतामिवानुभवति भूभुजि, जरठीभवत्सु पूर्वाह्ण-वेलालवेषु, गगनमध्यासन्नवर्त्तिनि व्रजति तीव्रतां ब्रध्नमण्डले, स्खलयति पथि पथिकानसह्योर्मिणि[१] घर्मजाले, जलाशयमनुसरत्सु[२] पिपासाकूतत-रलिततारकेषु श्वासितश्वापदेषु[३], पङ्किलकूलकर्दम[४]विमर्दोद्यतेषु सरित्परिस-रवनविहारिकरिवराहमहिषमण्डलेषु, विटपिकोटरकुटीरनीडनिलयनिलीय-मानेषु संपुटितपक्षेषु पक्षिषु, कूलकुलायकोणकूणितकोकूयमानकुक्कुहेषु गिरिसरित्सुरङ्गाङ्गणेषु[५], रङ्गत्कुरङ्गचर्वितखर्वदूर्वानलनीलनिम्नगाशा-द्वल[६]स्थलस्थितये हिण्डमानासु कारण्डवशिखण्डिमण्डलीषु, शिशिरनिवासवाञ्छया कूजत्सु करञ्जनिकुञ्जपुञ्जितकपिञ्जलकपोतेषु[७], वहति मनाङ्म्लानकोमलकुसुम[८]कोशकोष्णमकरन्दबिन्दूद्गारिणि तापीतीर-तरङ्गस्पर्शशैत्ये मध्याह्नमरुति, श्रमवशविलोलमीलन्नयननीलोत्पलासु [९]बहलतरतरुच्छायामाश्रयन्तीषु सीदत्सैनिकनितम्बिनीषु प्रस्तावपाठकः पपाठ।**

**एवं**-वक्ष्यमाणप्रकारेण इतीति जायमाने सति प्रस्तावपाठकः पपाठ। क्व सति ? पुष्कराक्षे जल्पति सति। कथम् ? अनुरागस्य-प्रेमबन्धस्य अनुगुणं-अनुकूलं यथा भवति तथा एवं अग्रेष्वपि पदेषु क्रियाविशेषणत्वं वाच्यम्। एतद् वाक्यात् अनुरागवृद्धिः। तथा शृङ्गारस्य सदृशं शृङ्गाररूपमित्यर्थः। तथा आदरस्य सहोदरं भ्रातरं सादरम्। तथा प्रेमप्रपञ्चस्य[१]-स्नेहविस्तरस्य[२] प्रियं-इष्टं, अस्माज्जल्पनात् तस्यां स्नेहवृद्धेः। तथा अनङ्गस्य-कामस्य प्रोत्साहनं-प्रोल्लासनम्। तथा उत्कण्ठायाः-तन्मिलन्वाञ्छया अनुकूलं, तदुत्कण्ठाकारित्वात्। तथा अभिनिवेशस्य-हठस्य समुचितं, तस्याः परिणयने गाढाग्रहजनकत्वात्। तथा कौतुकजननं-कुतूहलोत्पादनं यथा भवति तथेति। पुनः क्व सति ? भूभुजि-नले तन्मयतामिव-भैमीरूपतामिव अनुभूतवति सति, सर्वत्रापि मैत्रीमेव पश्यतीत्यर्थः। किम्भूते भूभुजि ? श्रवणे-तद्वार्त्ताकर्णने कौतूहलं विद्यते यस्यासौ तस्मिन्। अतएव पुनः किम्भूते ? विस्मृता -अन्ये व्यापाराः-अवलोकनादिरूपा यस्य स तस्मिन्। पुनः केषु सत्सु ? पूर्वाह्णस्य-पूर्वयामद्वयस्य ये वेलालवाः-कालविशेषास्तेषु जरठीभवत्सु बहुषु अतिक्रान्तेषु सत्सु। पुनः क्व सति ? ब्रध्नमण्डले-सूर्यबिम्बे तीव्रतां-उग्रतां व्रजति-प्राप्नुवति सति। गत्यर्थानां धातूनां प्राप्त्यर्थत्वात्। किम्भूते ब्रध्नमण्डले ? गगनमध्यस्य-नभोमध्यभागस्य आसन्ने-निकटे वर्तितुं शीलं यस्य तत्तस्मिन्, किञ्चिन्न्यूनमध्याह्ने जाते इत्यर्थः। पुनः क्व सति ? घर्मजले-स्वेदाम्भसि पथिमार्गे पथिकान् स्खलयति-पीडयति सति, पथिकानां तापाधिक्यात् प्रस्वेदे बहौ जायमाने सतीत्यर्थः।

१. प्रेमप्रपञ्चनस्य अनू.। २. स्नेहविस्तरणस्य अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किम्भूते घर्मजले ? असह्याः-सोढुमशक्या, ऊर्मयः-वीचयो यस्य तत्तस्मिन्, एतावता घर्मस्याधिक्यं दर्शितमं । पुनः केषु सत्सु ? श्वासिताः-तापयोगात् प्रवृद्धश्वासान्विताः, ये श्वापदाः-हिंस्रा जन्तवस्तेषु जलाशयं ह्रदादिकं अनुलक्ष्यीकृत्य सत्सु-गच्छत्सु सत्सु । किम्भूतेषु श्वासितश्वापदेषु ? पिपासायाः-उदन्याया आकूतेन-अभिप्रायेण, न तु भयादिना तरलिताः-इतस्ततः कम्पिता तारा-कनीनिका यैस्ते तेषु । पुनः केषु सत्सु ? सरित्परिसरवने-नदीतटकानने विहर्तुं शीलं येषां ते सरित्परिसरवनविहारिण एवम्विधा ये करिणश्च वराहाश्च महिषाश्च तेषां यानि मण्डलानि -वृन्दानि तेषुं पङ्किलं-कर्दमवत् यत्कूलं-तटं तत्र यः कर्दमस्तस्य यो विमर्दो अंगलोठनेन परिमलनं तस्मै उद्यतेषु-सावधानेषु सत्सु, कूलकर्दमे विलुठनं कुर्वत्सु इत्यर्थः । पङ्किलेति "**पिच्छादित्वात्**" [**लोमादिपामादिपिच्छादिभ्यः शनेलचः**,पा. सू. ५/२/१००] इलच् । पुनः केषु सत्सु ? पक्षिषु विटपिनां-तरूणां यः कोटरः-निष्कुहस्तरुगर्त्त इति यावत् स एव कुटीरं-ह्स्वाकुटी तत्र ये नीडनिलयाः-कुलायरूपगृहास्तेषु निलीयमानेषु-अवस्थितिं कुर्वाणेषु सत्सु । किम्भूतेषु पक्षिषु ? सम्पुटितौ-तापाभिभूतत्वान् मीलितौ पक्षौ-पक्षती यैस्ते तेषु । पुनः केषु सत्सु ? गिरिसरितां- पर्वतनदीनां याः सुरङ्गाः सन्धयस्तासां यानि अङ्गणानि। तेषु गिरिसरित्सु रङ्गाङ्गणेषु, कूलेषु-तटेषु ये कुलायः-नीडास्तेषां कोणेषु-अश्रिषु कूणिताः-संकुचिताः कोकूयमानाः-शब्दायमानाः कुकुहाः-पक्षिविशेषा येषु तानि तथाविधेषु सत्सु, गिरिसरित्सन्धिभूमिसम्बन्धिकूलविहितनीडकोणसम्मिलिताः कुकुहाः कोकूयन्त इत्यर्थः । "**सुरङ्गा सन्धिरुच्यते**" [४/७७१] इति **हलायुधः** । पुनः कासु सतीषु ? कारण्डवाश्च शिखिनश्च-मयूरास्तेषां[1] मण्डलीषु-श्रेणिषु रङ्गन्तः-क्रीडन्तो ये कुरङ्गाः-मृगास्तैर्चर्विता-भक्षिता अतएव खर्वा-लघ्वी या दूर्वा तया । तथा नलैश्च-नडैर्नीलानि-नीलवर्णानि या निम्नगायाः-नद्याः शाद्वलस्थलानि- नवतृणभूभागास्तेषु या स्थितिः-अवस्थानं तस्यै हिण्डमानासु-भ्रमन्तीषु सतीषु । पुनः केषु सत्सु ? करञ्जानां-नक्तमालानां निकुञ्जेषु-कुञ्जेषु पुञ्जिताः-मिलिता ये कपिञ्जलाश्च-श्वेततित्तिरयः कपोताश्च पारापतास्तेषु शिशिरनिवासस्य-शीतलवासस्य वाञ्छया कूजत्सु शब्दायमानेषु सत्सु । पुनः कस्मिन् सति ? मध्याह्नमरुति-मध्यन्दिनवायौ वहति-वाति सति। किम्भूते मध्याह्नमरुति ? मनाक्-स्तोकं म्लानानि-तापयोगात् संकुचितानि कोमलानि-मृदूनि यानि कुसुमानि तेषां कोशेषु-कुड्मलेषु कोष्णा-ईषदुष्णा ये मकरन्दबिन्दवस्तान् उद्गिरति-उद्वमति इत्येवंशीलस्तस्मिन्, तदन्तरेव वायोर्वहनात् तदुद्गिरणं । तथा तापीतीरे ये तरङ्गाः-वीचयस्तेषां स्पर्शेन-सम्पर्केण शैत्यं विद्यते यस्मिन् स तथा तस्मिन् । पुनः कासु सतीषु ? सीदन्त्यः-मार्गश्रमाद् विषादं प्राप्नुवत्यो याः सैनिकनितम्बिन्यः-चमूचरकामिन्यस्तासु बहलतरां अतिनिविडां तरुच्छायां आश्रयन्तीषु सतीषु । किम्भूतासु ? श्रमवशेन-खेदेन विलोले-चञ्चले मीलती-संकुचती नयननीलोत्पले यासां तास्तासु ।

---

१. शिखण्डिनश्च अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ मागधो यदुवाच तदाह—

**विचित्राः पत्रालीर्दलयति गलत्स्वेदसलिलै-**
**रमन्दं मृद्नाति प्रमदकरिकुम्भस्तनतटीः ।**
**प्रबन्धेनाक्रामञ्जनजघनजङ्घोरुयुगलं,**
**श्रमः सेनाङ्गेषु प्रसरति शनैः कामुक इव ॥ २४ ॥**

**विचित्रा** इति । शिखरिणीवृत्तम् । हे राजन् ! श्रमः-खेदः सेनायाः अङ्गेषु-हस्त्यश्वादिषु कामुक इव-कामीव शनैः प्रसरति । यथा कामी सह इनेन-पतिना वर्तत इति सेना-सभर्तृका स्त्री तस्या अङ्गेषु साशङ्कत्वात् शनैः प्रसरति । कथं प्रसरतीत्याह- गलन्ति-क्षरन्ति यानि स्वेदसलिलानि-घर्मजलानि तैः कृत्वा विचित्राः-अनेकप्रकाराः पत्रालीः-पत्रावलीर्वाहनश्रेणीः विलेपनपत्रवल्लीश्च दलयति-म्लानी कुरुते । तथा प्रमदाः-मत्ता ये करिणः-हस्तिनस्तेषां कुम्भा एव स्तनतट्यास्तां । कामुकपक्षे, प्रमदकरिकुम्भवत् या स्तनतट्यस्ता अमन्दं बहु यथा भवति तथा मृद्नाति- म्रदयति खेदयति । तथा प्रबन्धेन सातत्येन प्रयाणारूढत्वात् । कामुकपक्षे, प्रकृष्टबन्धेन-करणविशेषेण कन्दर्पभावात् जघनं च, जङ्घे च-ऊरुयुगलं च प्राण्यङ्गत्वात् समाहारस्ततो जनानां-चमूचरलोकानां पक्षे, जनानां-स्त्रीलोकानां यज्जघनजङ्घोरुयुगलं तत् आक्रमन्-आश्रयन् ॥ २४ ॥

**अपि च-**

**कूजत्क्रौञ्चं चटुलकुररद्वन्द्वमुन्नादिहंसं,**
**क्रीडत्क्रोडं निपतितलतापुष्पकिञ्जल्कहारि ।**
**अस्याः सान्द्रद्रुमवनतलश्रान्तसुप्ताध्वनीनं,**
**रोधः सिन्धोः स्खलयति[१] भवत्सैनिकानां प्रयाणम् ॥ २५ ॥**

**अपि च**-पुनः-

**कूजदि**ति । मन्दाक्रान्ता । हे देव ! अस्याः सिन्धोर्नद्या रोधः-तटं भवत्सैनिकानां-त्वच्चमूचराणां प्रयाणं-गमनं स्खलयति रम्यत्वात् पुरतो गन्तुं न ददातीत्यर्थः । रम्यत्वमेवाह-किम्भूतं रोधः ? कूजन्तः-शब्दायमानाः क्रौञ्चा यत्र तत् । तथा चटुलं-चपलं कुरराणां पक्षिविशेषाणां द्वन्द्वं-दम्पतीरूपं यत्र तत् । तथा उन्नादिनः-उन्नदनशीला हंसा यस्मिंस्तत् । तथा क्रीडन्तः-रममाणाः क्रोडाः-वराहा, यत्र तत् । तथा निपतितं-गलितं लतापुष्पाणां च किञ्जल्कं-केसरं तेन हारि-मनोहरं । तथा सान्द्राः-निबिडा द्रुमा यत्र एवम्विधं यद्वनं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्य तले श्रान्ताः सन्तः सुप्ता अध्वनीनाः-अध्वगा यत्र तत् । क्रौञ्चकूजनादीनि विशेषणानि रम्यताहेतुत्वात् सैन्यप्रयाणस्खलनसाधनानि ॥ २५ ॥

**राजा तु तदाकर्ण्य 'बाहुक, बहूनां बहुमतो बाहुल्यादिहैव वासः, तद्वद सैनिकान्, अवतरत तापीतीरतरुलताश्रयान्[१], आश्रयत श्रमच्छिदच्छायाः, कुरुत पटकुटीः, कारयत कायमानानि, [२]मुञ्चत शाद्वलेष्वबलान्बलीवर्दान्[३], कूर्दयत कर्दमे माहिषान्[४], खादयत वंशंकरीराङ्कुरान्, प्रचारयत क्रमेण[५] क्रमेलकान्, अवगाहावसाने पृष्ठावकीर्णपुलिनपङ्कपांसवो विहरन्तु स्ववशं वंशास्तम्बेषु[६] स्तम्बेरमाः, तरुबुध्नेषु बध्नीत तीव्रवेगान्वेसरान्[७], अवतरन्तु तापीतीर[८]तरङ्गेषु तुरंगाः, शिशिरतर[९]तरङ्गानिलान्दोलितविविधविकचमञ्जरी-जालजटिलेषूत्फुल्लताखण्डमण्डपेषु[१०] मध्याह्नसमयमतिवाहयन्तु[११] किंनरमिथुनानि' इति सेनापतिमादिदेश ।**

**राजा** तु-नलस्तन्मागधोक्तं आकर्ण्य-श्रुत्वा इति सेनापतिं आदिदेश-आदिष्टवान् । इतीति किम् ? हे बाहुकसेनापते ! बाहुल्यात् प्रायो अतिशयेनेत्यर्थः, बहूनां-चमूचराणां इहैव रोधसि वासो बहुमतः । तत्तस्मादेवं त्वं सैनिकान् वदत । तद् यथा-भोः सैनिकाः ! ताप्यास्तीरे ये तरवः-वृक्षा लता च-वल्लयस्ता एव आश्रयाः-स्थानानि तान् प्रति अवतरत-आश्रयत । तथा श्रममार्गं-खेदं छिन्दन्ति-अपनयन्तीति, श्रमच्छिदस्ताश्छाया आश्रयत । तथा पटकुटीः-पटगृहान् कुरुत । तथा कायमानानि-तृणमयगृहाणि कारयत । तथा शाद्वलेषु-नीलतृणेषु अबलान्-अशक्तान् बलीवर्दान्-वृषभान् मुञ्चत-प्रेषयत । शाद्वलशब्दो मध्यतवर्गीयः, यदुक्तं **शब्दप्रभेदे**-"**एतौ मध्यतवर्गीयौ वैदूर्यमणि-शाद्वलौ**" [५०] इति। तथा महिषाणां समूहो माहिषं "**समूहार्थेऽण्**"[**तस्य समूहः** पा. सू. ४/२/३७] ततः "**स्वार्थे कः**" तत् कर्दमे-पङ्के कूर्दयत-उप्लावयत, तेषां कर्दमलुठनस्य प्रीतिजनकत्वात् । तथा क्रमेलकान्-उष्ट्रान् प्रकृष्टश्चारः-भक्षणं तस्य क्रमेण-परिपाट्य वंशाःवेणवः करीराश्च-वृक्ष-विशेषास्तेषामङ्कुरान्-प्ररोहान् खादयत-चारयत । तथा स्तम्बेरमाः-हस्तिनो अवगाहः-मज्जनं तस्यावसाने प्रान्ते-पृष्ठे अवतीर्णाः[१]- विक्षिप्ताः पुलिनपङ्कस्य पांशवः-धूलयो यैस्ते, एवम्विधाः सन्तो वंशीस्तम्बेषु-वेणुगुल्मेषु स्ववशं[२]-स्वेच्छं यथा भवति तथा विहरन्तु-विचरन्तु । तथा तीव्रः-अधिको वेगः-रयो येषां ते एवम्विधान् वेसरान्-वेगसरान् तरूणां बुध्नेषु-मूलेषु बध्नीत-संयच्छत । "**बुध्नो गिरिशमूलयोः**" **इत्यनेकार्थः** [२/२७९ ] । तथा तुरङ्गाः-वाजिनो ताप्यास्तीरे ये तरङ्गाः-

१. अवकीर्णाः अनू. । २. स्ववंश अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वीचयस्तेषु अवतरन्तु-प्रविशन्तु । तथा किन्नरमिथुनानि उत्फुल्ला-विकसिता ये लताखण्डस्य-वीरुद्वनस्य मण्डपाः-आश्रयविशेषास्तेषु मध्याह्नसमयं अतिवाहयन्तु-अतिक्रामयन्तु । किम्भूतेषु मण्डपेषु ? शिशिरतराः-अतिशीतला ये तरङ्गानिलाः वीचीवायवस्तैरन्दोलितं-कम्पितं विविधानां-अनेकप्रकाराणां विकचानां-सविकासानां मञ्जरीणां यज्जालं-वृन्दं तेन जटिलेषु-व्याप्तेषु ।

**स्वयमपि पुष्कराक्षसूचितार्धपथश्रमखिन्नकिंनरमिथुनदिदृक्षया कृत-मृगया विनोदव्यपदेशो[१] दिशि[२] दक्षिणस्यामाप्तस्तोकपरिवार[३]परिवृतो ज्झन्निर्ज्झरझात्कारिवारिरमणीयासु विहितविहारहारिहरिणीनेत्रोत्पल-स्तबकितासु रममाणपुलिन्दनितम्बिनीवदनबिम्बचन्द्रिकासु सान्द्रद्रुम-द्रोणीषु विचरितुमारभत ।**

**स्वयम**पि राजा-नलः पुष्कराक्षेण सूचितं-कथितं, तथा अर्द्धपथे-अर्द्धमार्गे एव श्रमेण खिन्नं एवंविध यत् किन्नरमिथुनं तस्य दिदृक्षया-द्रष्टुमिच्छया, कृतो मृगयाविनोदस्य-मृगयाकौतुकस्य व्यपदेशः-छलं येन स, वयं मृगयाक्रीडायै याम इति मिषं विधाय, दक्षिणस्यां दिशि आप्तः-यथार्थवाक् स्तोकः-अल्पो यः परिवारः-परिजनस्तेन परिवृतः-परिकरितः सन्, सान्द्राः-निबिडा द्रुमा यासु एवम्विधासु द्रोणीषु-शैलसन्धिषु विचरितुं-विहर्तुं आरभत-प्रायतत । किम्भूतासु द्रोणीषु ? झरन्तः-श्रवन्तो ये निर्झराः-प्रस्रवणानि तेषां झात्कारि-प्रस्फुरणशीलं यद् वारि-जलं तेन रमणीयासु-रम्यासु । तथा विहितः-कृतो विहारः-विचरणं याभिरेवंम्विधा हारिण्यः-मनोहरा या हरिण्यः-मृग्यस्तासां नेत्रोत्पलैः स्तबकितासु-कर्बुरितासु । तथा रममाणाः-क्रीडन्त्यो याः पुलिन्दनितम्बिन्यः-शबर-स्त्रियस्तासां वदनबिम्बमेव चन्द्रो यासु तास्तासु ।

**पुरः स्थितश्चास्य वर्त्म दर्शयन् दर्शनीयजविनं जात्यतरतुरंग-[४]मारोपितः पुष्कराक्षोऽप्यभाषत ।**

**'देव, मार्कण्डेयप्रमुखमहामुनिनिवासपवित्रिताः पुण्याः खल्विमाः पयोष्णीपरिसरवनभूमयः ।**

**अस्य** नलस्य पुरस्थितश्च वर्त्म दर्शयन् सन्, दर्शनीयं-द्रष्टुं योग्यं अद्भुतं जविनं-वेगप्रधानं जात्यतरतुरङ्गं-अतिमनोहरसप्तिं आरोपितः-अवस्थापितः पुष्कराक्ष इति अभाषत-अवादीत् । इतीति किम् ?

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हे **देव** !- राजन् ! खलु - निश्चितं इमाः पयोष्णी परिसरस्य वनभूमयः पुण्याः पवित्राः । किम्भूताः ? मार्कण्डेयः प्रमुखः-प्रधानं येषु एवम्विधा ये महामुनयस्तेषां निवासेन पवित्राः-शुचीकृताः ।

**तथाहि—**

तथाहीति-महामुनिनिवासमेव दर्शयन्नाह—

**श्रूयते किलास्माद्देशात्पूर्वदिग्भागे भगवतः पुराणपुरुषावतारस्य परशुरामस्य जनयितुर्जमदग्नेराश्रमः । ततो[1] नातिदूरे[2] प्रणतसुरासुरमौलिमालामुकुलमुक्तमकरन्दबिन्दुस्नपितपादारविन्दस्य भगवतः स्वस्वेदप्रसरप्रवर्तितपयोष्णीप्रवाहस्य महावराहस्यायतनम् ।**

**श्रूयत**[1] इति । किलेति आप्तोक्तौ, आप्ता इति वदन्ति । अस्माद्देशात् पूर्वदिग्भागे भगवतः-ऐश्वर्यादिवतस्तथा पुराणपुरुषस्य-विष्णोरवतारो यः स तस्य परशुरामस्य जनयितुः-पितुः जमदग्नेराश्रमः-मुनिस्थानं श्रूयते । ततः-आश्रमान्नातिदूरे-समीपे महावराहस्य-लब्धवराहावतारस्य भगवतः विष्णोरायतनं-आश्रमः श्रूयते । किम्भूतस्य ? प्रणता ये सुराश्च असुराश्च तेषां मौलिषु -शिरस्सु या मालाः-पुष्पस्रजस्तासु यानि मुकुलानि-अर्धविकसितानि कुसुमानि[1] तैर्मुक्ताः-त्यक्ता ये मकरन्दबिन्दवस्तैः स्नपितं-प्रक्षालितं पादारविन्दं यस्य स तस्य । **"निरुपपदो हि भाषाशब्दः पुष्पस्रजमेवाभिधत्ते"** इति **काव्यप्रकाशे** [काव्यालंका सूची व्याख्या २/२/१६] । तथा स्वस्वेदप्रसरेण स्वघर्मजलनिर्गमनेन प्रवर्तितः-प्रारब्धः पयोष्ण्याः प्रवाहो येन स तस्य, तावत् प्रमाणं स्वाङ्गप्रस्वेदजलं निर्गतं येन पयोष्णीप्रवाहः प्रावर्त्ततेति ।

**इतोऽप्यवलोकयतु देवः—**

**सैषा चलच्चन्द्रकिचक्रवाकचञ्चच्चकोराकुलकूलकच्छा ।,**
**स्वःसीमसोपानसदृक्तरङ्गा गङ्गाप्रतिस्पर्धिपयाः पयोष्णी ॥ २६ ॥**

तथा **इतोऽपि**-अस्मिन्नपि प्रदेशे देवः-नृपो अवलोकयतु-पश्यतु ।

**सैषेति** । हे देव ! सा एषा पयोष्णी-सरित् वर्तते । किम्भूता पयोष्णी ? चलन्तो ये चन्द्रकिनश्च-मयूराश्च चक्रवाकाश्च-रथाङ्गाः चञ्चन्तः-दीप्यमानाः चकोराश्च-विषसूचकास्तैराकुलाः-संकीर्णाः कूले-तटे कच्छाः-शाकादिक्षेत्रप्रदेशा यस्याः सा । तथा स्वः-स्वर्गस्य

---

१. अर्धविकसितकुसुमानि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सीमानं-अवधिं यावत् सोपानसदृशः-आरोहणसमानास्तरङ्गा यस्याः सा । एतावता उत्कल्लोलया वर्तत इति । स्वरिति अव्ययं स्वर्गार्थे । तथा गङ्गायाः प्रतिस्पर्द्धि-प्रतिस्पर्द्धनशीलं जित्वरं पयः-पानीयं यस्याः सा, विशदाम्भोधरत्वात् । इन्द्रवज्रावृत्तम् ॥२६॥

**यस्याः पश्यैते-**

**मुक्तास्त्रैः श्रूयमाणं सिकतिलपुलिनप्रान्तविश्रान्तपान्थै-**
**रुन्धानं मञ्जुगीतप्रियहरिणकुलान्यम्बुपानागतानि ।**
**सांध्यध्यानावसाने क्षणमिव मुनयः संनिधौ पङ्कजानां-**
**मोङ्कारोच्चाररम्यं मधुकरमधुरध्वानमाकर्णयन्ति ॥ २७ ॥**

**यस्या** इति ? **मुक्ते**ति । हे देव ! तं पश्य । यस्याः सरितः पङ्कजानां सन्निधौ-समीपे एते मुनयः सान्ध्यध्यानस्य-सायन्तनध्यानस्य अवसाने-प्रान्ते क्षणमिव-क्षणमेकं ओंकारस्य य उच्चारः-उच्चरणं तद्वद् रम्यं मधुकराणां मधुरं-मृष्टं ध्वानं-झङ्काररवं आकर्णयन्ति- शृण्वन्ति । मुनीनां च वेदत्रयीवाचिनि ओंकारे लीनत्वात् तत्प्रतिनिधौ मधुकरध्वाने बहुमानः । तथा च-

**"त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि पुरा-**
**नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृतिः ।**
**तुरीयं ते धाम ध्वनिभिरिव सन्धानमणुभिः,**
**समस्तव्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥"** [ ]

किम्भूतं मधुकरमधुरध्वानं ? मुक्तानि अस्त्राणि-अश्रूणि यैस्ते एवम्विधैः, सिकता अस्मिन् देशेऽस्तीति सिकतिलः । सिकतावान् यः पुलिनप्रान्तः-तटावसानं तस्मिन् विश्रान्ताः-खेदमपनयन्तो ये पान्थास्तैः श्रूयमाणं, मधुकरध्वानस्य प्रियोत्कण्ठाजनकत्वात् पान्थानां मुक्ताऽश्रुत्वं । सिकतिलः- सिकतावान् देशः **"सिकताशर्कराभ्यां"** [पा. सू. ५/२/१०४] मत्वर्थे देशे इलच् । तथा अम्बुपानाय-जलपानार्थमागतानि मञ्जुः-मनोज्ञा गीतिः-गानं प्रिया-इष्टा येषां एवम्विधानि यानि हरिणकुलानि तानि सन्धानं-अन्यत्र गन्तुं न ददतं । गीतप्रियत्वात् हरिणां रोधः । स्रग्धरा ॥ २७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**राजा तु नमस्याः खल्वमी महानुभावाः ।**

**तथाहि–**

**मृगेषु मैत्री मुदितात्मदृष्टौ कृपा मुहुः प्राणिषु दुःखितेषु ।**
**येषां न ते कस्य भवन्ति वन्द्याः कौशैयकौपीनभृतो मुनीन्द्राः ॥२८॥**

**राजेति** । राजा तु-नल इत्यवधारयन्-विचारयन् तान्-मुनीन् ववन्दे-नमश्चकार । इतीति किम् ? अमी महानुभावाः खलु-निश्चितं नमस्याः-नमस्करणीयाः ।

**तथाहीति** । नमस्यत्वमेवाह–

**मृगेष्विति** । ते मुनीन्द्राः कस्य वन्द्याः-नमस्या न भवन्ति ? अपि तु सर्वस्यापि । येषां-मुनीन्द्राणां मृगेषु मैत्री-प्रीतिः सुहृद्भावः । तथा आत्मनः-स्वस्य दृष्टौ-अवलोकने आत्मसाक्षात्कारे मुदिता-हर्षिता । तथा मुहुः-वारम्वारं दुःखितेषु-पीडितेषु प्राणिषु जन्तुषु कृपा-दया । मैत्रीमुदिताकरुणा इति तिस्रोऽपि चेतः प्रसादिन्यो भावनाः । किम्भूताः मुनीन्द्राः ? कौशेयं-दार्भं कौपीनं-कक्षापटं बिभ्रति-धारयन्तीति कौशेयकोपीनभृतः । इति निःसंगत्वोक्तिः । मैत्रीति "**वर्णदृढादिभ्यःष्यञ् च**" [पा. सू. ५/१/१२३] इति ष्यञ्, भावार्थे मित्रस्य भावो मैत्री षित्वात् ङीप् "**हलस्तद्धितस्य**" [पा. सू. ६/४/१५०] इति यलोपः । मुदितेति मोदनं मुदिः "**इकिस्तिवस्वरूपार्थे** [**इकश्तिपौ धातुनिर्देशे**, पा. सू. वा. उ. कृ.] इति इक्, तद्भावो मुदिता ॥ २८ ॥

**इत्यवधारयँस्तान्वन्दे ॥**

**मुनयोऽपि 'सोऽयं सोमपीती निषधनाथः[१]' इत्यनुध्यानादवगम्य प्रयुक्तब्रह्मोक्ताशिषः, अनुगृह्णन्त इवार्द्राद्रैर्दृष्टिपातैः[२], आश्वासयन्त इव स्वागतप्रियप्रश्नालापेन[३], स्नपयन्त इव दरहसितदन्तज्योत्स्नामृतप्लवेन, आह्लादयन्त इवादरेण, दत्वार्धमनन्तरमिदमवोचन् ।**

राज्ञो वन्दनानन्तरं, मुनयोऽपि सोऽयम् सोमात् -चन्द्रात् अन्वयः-वंशो यस्य स सोमान्वयः-सोमवंश्यस्तथा सोमस्य-वल्ली रसस्य यः पानमस्यास्तीति सोमपी "**सोमपीथी यज्वेति**" [ ] सोमपीति प्रयोगः । "**सोमपः सोमपा**" [२/८/९][१] इत्यमरः । तत्र पानं पाथः "**पातृतुदिवचीति** थक्," [पा. उ. १६४] "**घुमास्थे तीत्वम्**" [पा. सू. ६/४/६६] । सोमस्य पाथः पानमस्यास्तीति सोमपीथी, सोमपीति प्राच्याः पेठु इति **क्षीरस्वामिटीकावा**क्यात् साधुः । तथा निषधनाथ इति अनुध्यानात्-विमर्शविशेषादवगम्य-ज्ञात्वा प्रयुक्ता

---

१. सोमपोथी तु सोमपाः, अमरकोष कां. २, ब्रह्मवर्ग पद्य ९.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ब्रह्मोक्ता-वेदोक्ता आशीर्यैस्ते एवम्विधाः सन्तः अर्घं-पूजाविधिं पुष्पादिकं दत्त्वा । अनन्तरं-पश्चात् इदं-वक्ष्यमाणमवोचन् । "**ब्रह्मा तु तपसि ज्ञाने वेदेऽध्यात्मे द्विजे विधौ**" [ ] इत्य**नेकार्थः** [२/२७९] । मुनयः किं कुर्वन्तः ? उत्प्रेक्ष्यते,-आर्द्रार्द्रैः-अतिस्निग्धैर्दृष्टिपातैः-अवलोकनैः अनुगृह्णन्त इव-अनुग्रहं कुर्वन्त इव । सादरावलोकनं हि अनुग्रहस्य बीजम् । तथा स्वागतं भवतां, शोभनमागतं इति, प्रियः-इष्टो यः प्रश्नालापः-प्रश्नाभाषणं तेन आश्वासयन्त इव-दुःखापनयनं कुर्वन्त इव । तथा दरः-ईषत् यत् हसितं-हास्यं तेन या दन्तज्योत्स्ना- दशनदीधितिः सैव अमृतप्लवः-पीयूषप्रवाहस्तेन स्नपयन्त इव-प्रक्षालयन्त इव । दरेति अव्ययं ईषदर्थे । तथा आदरेण-बहुमानदानेन आह्लादयन्त इव-प्रीणयन्त इव ।

मुनयो यदवादिषुस्तदाह–

**'आयुष्मन्, अस्मदीयमिह धर्मोपदेशप्रदानमेव[१] प्रथममातिथेयमतिथिजनेष्वतोऽभिधीयसे । पुण्यं पयोऽस्याः सरितः तदेतदवगाह्य कुरु पुण्यमयमात्मानम् ।**

हे **आयुष्मन्** !-चिरंजीविन् ! इह-प्रस्तावे अस्मदीयं-अस्माकमिदं अस्मदीयं धर्मस्योपदेशः-कथनं धर्मोपदेशस्तस्य प्रदानमेव प्रथमं-पूर्वं अतिथिजनेसु आतिथेयं आतिथ्यं अतिथिषु साधुकर्म, अतिथौ समायाते अस्माभिर्धर्म्मवाचैव[१] तस्य पुरः प्रोच्यते, इदमेव अस्माकमातिथ्यं । आतिथेयमिति "**पथ्यतिथिवसतिस्वपतेर्ढञ्**" [पा. सू. ४/४/१०४] । अतः-अस्माद्धेतोरस्माभिस्त्वं धर्मोपदेशेनैव अभिधीयसे-कथ्यसे । अस्याः-पयोष्ण्याः पयः-जलं पुण्यं-पवित्रं । तत्-तस्मादेतत् पयोऽवगाह्य-विलोड्य आत्मानं पुण्यमयं कुरु ।

**तथाहि–**

**तथाहीति** । तस्या एवाम्भसः पावित्र्यं दर्शयन्नाह–

**पर्वतभेदिपवित्रं जैत्रं नरकस्य बहुमतङ्गहनम् ।**
**हरिमिव हरिमिव हरिमिव वहति पयः पश्यत पयोष्णी ॥ २९ ॥**

**पर्वतेति** । हे राजन् ! यूयं पश्यत-आलोकयत । इयं पयोष्णी एवम्भूतं पयः पाथो वहति-धारयति । किम्भूतं पयः ? पर्वतं भिनत्ति-विदारयति इत्येवंशीलं पर्वतभेदि-गिरिविदारकं, तथा पवित्रं पावनं, तथा नरकस्य-दुर्गतेर्जैत्रं-पराभविष्णुः । एतत्स्नानात् नरके न कश्चिद् यातीति । अत एव बहुमतं-माननीयं, तथा गहनं-अगाधं । कमिव ? हरिमिव-

---

१. °वार्त्तैव अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इन्द्रमिव, तथा हरिमिव-विष्णुमिव, तथा हरिमिव-सिंहमिव । एतदुपमानत्रयं क्रमेण विशिष्यते, तद्यथा— किम्भूतं हरिम् ? पर्वतभेदी-गिरिविदारको यः पविः-वज्रं तं त्रायते-धारयति यः सः तं पर्वतभेदिपवित्रम् । किम्भूतं हरिम् ? नरकस्य— भौमासुरस्य जैत्रं-अभिभावुकं विष्णुम् । किम्भूतं हरिम् ? मतङ्गान्-मुनिविशेषाद् ईषदूना बहुमातङ्गाः-गजाः मतङ्गादुत्पन्नत्वात् तान् हन्तीत्यच् क्विप् वा[१], "**कर्मण्यण्**" इत्यस्यापवादः[१]। अथवा बहून् मतङ्गान्-गजान् हन्तीति बहुमतङ्गहनं-सिंहं । पूर्वव्याख्यायां "**विभाषासुपो बहुच् पुरस्तात् इति, ईषदूनार्थे बहुच्, स च प्रागेव स्यात्**" [ ] इति **प्रक्रियाकौमुद्याम्** ॥ २९ ॥

**राजापि 'एवमेतत्—**

**महावराहाङ्गविनिर्गतायाः[१] किमन्यदस्याः परतः[२] पवित्रम् ।**
**यदीयमालोकनमप्यघानि निहन्ति पुंसां चिरसंचितानि ॥ ३० ॥**

**राजाऽपि**-नलोपि इत्यभिधाय उक्त्वा यथाविधिस्नानविधिं अनतिक्रम्य स्नानाय-मज्जनाय सरिन्मध्यं अवातरत्-प्रविवेश । इतीति किम् ? हे मुनय ! एवमेतत्-यद्भवद्भिरुच्यते तत्तथैव । कथम् ?

**महावरे**ति । महावराहाङ्गात्-आदिवराहशरीरात् विनिर्गतायाः-विनिःसृताया अस्याः-अमुष्याः पयोष्ण्याः परतः परं-प्रकृष्टं अन्यत् अपरं किं पवित्रम् ? न किमपीत्यर्थः । यस्याः-नद्या इदं यदीयं आलोकनमपि आस्तां अवगाहनादिदर्शनमपि पुंसां चिरसञ्चितानि-बहुकालसम्भूतानि अघानि-पापानि निहन्ति-अपनयति । उपेन्द्रवज्रा ॥३०॥

**तदेष करोमि भवतामादेशम्' इत्यभिधाय यथाविधि स्नानाय सरिन्मध्यमवातरत् ।**

**अवतीर्य च मन्त्रमार्जनप्राण[३]संयमसंध्यासूक्तं परिजप्य पितृतर्पणादि-समुचिताह्निकावसाने रक्तकमलगर्भमर्घाञ्जलिमुत्क्षिप्य भगवतो भास्व-तस्य[४] स्तुतिमकरोत् ।**

**तत्**-तस्माद्धेतोरेषो अहं भगवतां-महर्षीणां आदेशं करोमि ।

**अवतीर्य** च-नद्यां प्रविश्य च, तथा मन्त्रमार्जनं-मन्त्रस्नानं, तथा प्राणसंयमः-श्वासप्रश्वासरोधने करन्यासोऽङ्गन्यासश्च तौ विद्येते यत्र एवम्विधं यत्सन्ध्यासूक्तं-सन्ध्यावन्दनादिपाठस्तत् परिजप्य-समन्तान्मनसि उक्त्वा पितृतर्पणादेः समुचितं-योग्यं

---

१-१. नास्ति पाठः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदाह्निकं -नित्यक्रिया तस्य अवसाने-प्रान्ते रक्तं कमलं गर्भे-मध्ये यस्य एवंविधो यो अर्घः-पूजाविधिर्जलपुष्पादिस्तेन युक्तो यो अञ्जलिः-कुब्जितयुतपाणिद्वयरूपो हस्तन्यासस्तं उत्क्षिप्य-उच्चैर्विधाय भगवतो भास्वतः-सूर्यस्य स्तुतिमकरोत् ।

**जयति जगदेकचक्षुर्विश्वात्मा वेदमन्त्रमयमूर्तिः ।**
**तरणिस्तरणतरण्डकमघपटलपयोनिधौ पुंसाम् ॥ ३१ ॥**

**जयतीति** । तरणिः-श्रीसूर्यो जयति । किंभूतः । जगति एकं-अद्वितीयं चक्षुरिव प्रकाशकत्वात् । तथा विश्वं-त्रिभुवनमेव आत्मा-स्वरूपं यस्य स विश्वात्मा, ब्रह्मविष्णु-शङ्करात्मकत्वात् रवेः विश्वस्य च तेभ्योऽनतिरिक्तत्वं, अतो रवेरपि विश्वात्मकत्वम् । तथा वेदमन्त्रमयी-वेदमन्त्रस्वरूपा मूर्त्तिर्यस्य सः । तथा पुंसां- भक्तपुरुषाणां अघपटलं-पापसमूह एव पयोनिधिः-समुद्रस्तस्मिन् तरणाय तरण्डक इव-उडुप इव यः स तं । यथा तरण्डकेन अब्धिस्तीर्यते तथा रविप्रसादेन अघपटलाब्धिस्तीर्यत इति । उडुपेन सागरतरणस्य असम्भवात् तरण्डक शब्देनात्र पोत एव गृह्यते । ॥ ३१ ॥

**तदनु च चटुलचञ्चरीककुलाकुलितकमलकुड्मलगलद्बहल-मकरन्दसुरभिततरङ्गमुत्पतत्कपिञ्जलं जलमवगाह्य चिरमुत्तीर्य तीरमापृच्छ्य मुनिजनमभिवाद्य च पुनः पुलिनपालिपर्यटनाय प्रस्थितः प्रणयादनुव्रजतो मुनिन्निवर्तयन्निदमवादीत् ।**

**तदनु**-रविस्तुत्यनन्तरं नृपतिः चटुलं-चपलं यच्चञ्चरीकाणां-भृङ्गाणां कुलं तेन आकुलितानि-आक्रमणादिनोत्पीडितानि यानि कमलानि-सरोजानि दिनविकासीनि, कुमुदानि च-श्वेतकमलानि रात्रिविकासीनि तेषां कुड्मलेभ्यः-मुकुलेभ्यो गलन्-क्षरन्, बहुलः-घनो यो मकरन्दस्तेन सुरभितास्तरङ्गा यस्मिंस्तत् । तथा उत्पतन्तः-उड्डीयमानाः कपिञ्जला यस्मिंस्तत्तथाविधं, जलं चिरकालं अवगाह्य । तथा तीरमुत्तीर्य-तटमासाद्य । तथा मुनिजनमापृच्छ्य-पृष्ट्वा च यथा अहं यामीति तथा अभिवाद्य च-मुनिजनमेव नमस्कृत्य । च-पुनः पुलिनपालौ-सैकतप्रान्ते पर्यटनाय-भ्रमणाय प्रस्थितः सन् प्रणयात्-स्नेहात् अनुव्रजतः-अन्वागच्छतो मुनीन् निवर्तयन्-व्यावर्तयन् यथा यूयमत्रैव तिष्ठतेति इदं वक्ष्यमाणं अवादीत् ।

**चक्रधरं विषमाक्षं कृतमदकलराजहंससंचारम्[१] ।**
**हरिहरविरिञ्चिसदृशं भजत पयोष्णीतटं मुनयः ॥ ३२ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**चक्रेति** । हे मुनयः ! यूयं पयोष्णीतटं भजत । किम्भूतं पयोष्णीतटम् ? चक्रधरं-चक्रवाकधरं, तथा विषमाक्षं-विषमबिभीतकं, तथा कृतो मदेन-हर्षेण कलैः-मधुरध्वनिभिः राजहंसैः सञ्चारः-गमनं यस्मिन् तत् । पुनः किम्भूतं पयोष्णीतटम् ? हरिहरवि रिञ्चिभिः-विष्णुशम्भुब्रह्मभिः सदृशं-समानं । किम्भूतं हरिम् ? चक्रं-सुदर्शनं धारयतीति चक्रधरम् । किम्भूतं हरम् ? विषमाणि अक्षीणि यस्येति विषमाक्षं, त्रिनेत्रत्वात् । किम्भूतं विरिञ्चिम् ? कृतो मदकलराजहंसेन कृत्वा सञ्चारः-गमनं येन स तं, हंसवाहनत्वात् ॥ ३२ ॥

**एवमुक्तास्तेऽप्यार्द्रहृदयाः[1] स्वल्पपरिचयेनाप्युपचितोचितप्रेमाण[2] प्रियंवदतया प्रियमाशशंसुः ।**

**एवं**-अमुना प्रकारेण राज्ञा उक्ताः-कथितास्तेऽपि आर्द्रहृदयाः-स्निग्धचेतसो महामुनयः स्वल्पपरिचयेनापि-स्तोकसंस्तवेनापि उपचितं-मेदस्विवृद्धं उचितं-योग्यं राज्ञा सह प्रेम-स्नेहो येषां ते उपचितोचितप्रेमाणः, एवम्विधाः सन्तः प्रियं वदन्तीति प्रियम्वदाः "**प्रियवशे वदः खच्**" [पा. सू. ३/२/३८] इति खच्, खित्वान्मुगागमस्तद्भावः प्रियंवदता तया प्रियं-इष्टं आशशंसुः-कथयामासुः ।

**सुगमस्तवास्तु पन्थाः क्षेमा दिग्देवताः शिवाः शकुनाः ।**
**अभिलषितमर्थमचिरात्साधयतु भवान्विघ्नेन ॥ ३३ ॥**

**सुगम** इति । हे राजन् ! तव पन्था-मार्गः सुखेन गम्योऽस्तु-त्वं[1] सुखेन मार्गं लंघयेत्यर्थः । सुगम इति "**ईषद्दुःसुषु**" [पा. सू. ३/३/१२६] इति सुपूर्वाद् गमेः खल् । तथा दिशां अधिष्ठात्र्यः-देवता दिग्देवताः क्षेमाः-कल्याणकारिण्यो भवन्तु । तथा शकुनाः-भाविशुभाशुभसूचकाः पक्षिणः शिवाः-निरुपद्रवाः सन्तु, शुभाः शकुनाः भवन्त्वित्यर्थः । **यदनेकार्थः-शकुरं स्याद दैवशंसि निमित्ते च शकुनं पुंसि पत्रिणि**" [३/४५२] इति। अत एव भवान्-त्वं अविघ्नेन-विघ्नाभावेन अभिलषितं-इष्टमर्थं-अचिरात्-स्तोकेनैव कालेन साधयतु-निष्पादयतु ॥३३॥

**इत्यभिधाय व्यावृत्तेषु मुनिषु कौतुकादितस्ततः संचरच्चटुल-षट्चरणचक्रचुम्बनाकूततरलितपुष्पपरागपटलपांसुलिततरुतलेषु वहत्सुरभि-शिशिरकोमलपवनेषु वनेषु, वनेचरमिथुनमन्मथक्रीडानुकूलेषु कूलेषु, पुलिन्दडिम्भकाध्यासितफ लवद् बदरीषु दरीषु, पुञ्जितकुञ्जरेषु निकुञ्जेषु, दुर्दर्शभानुषु सानुषु, सानुचरश्चरन्नेकस्मिन्नतिनिबिडसंधिसंनिवेशे**

---

१. त्वं नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**शिलान्तरालप्रदेशे, प्रियतममुद्दिश्य पठन्त्याः किंनर्याः साश्चर्यमार्यागीतिमिमशृणोत् ।**

**इति**-अमुना प्रकारेण अभिधाय-उक्त्वा मुनिपुङ्गवेषु व्यावृत्तेषु-व्याघुट्य गतेषु सत्सु, कौतुकात्-कुतूहलात् इतस्ततः-एवम्विधेषु स्थानेषु सानुचरः-अनुचरैः सहितश्चरन्-विहरन् सन् नलः एकस्मिन् अतिनिबिडः-अतिघनः सन्धेः-संश्लेषस्य सन्निवेशः-संस्थानं यस्मिन्, अत्यर्थं सम्मिलिते इत्यर्थः, एवंविधे शिलयोरन्तरालप्रदेशे-मध्यप्रदेशे प्रियतमं-पतिं किन्नरं-किंपुरुषं उद्दिश्य-अधिकृत्य पठन्त्याः किन्नर्याः इमां-वक्ष्यमाणां आर्यागीतिं-छन्दोविशेषनिबद्धं पद्यं साश्चर्यं-साद्भुतं यथा भवति तथा अशृणोत्-अश्रौषीत् । केषु केषु स्थानेषु चरन् ? इत्याह—वनेषु चरन् । किम्भूतेषु वनेषु ? सञ्चरद्-विचरद् चटुलं-चपलं यत् षट्चरणचक्रं-भृङ्गवृन्दं तेन कर्त्रा चुम्बने-आस्वादने यदाकूतं-अभिप्रायस्तेन साधनभूतेन तरलितानि कम्पितानि यानि पुष्पाणि तेषां यत्परागपटलं-रजोवृन्दं तेन पांसुलितानि-सरेणूकृतानि तरुतलानि येषां तानि तथा तेषु । पुनः किम्भूतेषु वनेषु ? वहन् सुरभिः-सुगन्धिः शिशिरः-शीतलः कोमलः-मन्दः पवनः-वायुर्येषु तानि तथा तेषु । तथा एवम्विधेषु कूलेषु-नदीतटेषु चरन् । किम्भूतेषु कूलेषु ? वनेचरमिथुनानां या मन्मथक्रीडा-सुरतकेलिस्तस्या अनुकूलेषु-प्रवर्तकेषु रम्यत्वात् । तथा पुलिन्दडिम्भकैः शबरार्भकैः अध्यासितासु-आश्रितासु । कासु ? फलवद् बदरीषु, न केवलं फलवद्बदरीषु, तथा दरीषु सञ्चरन् । अत्र चकारादिमन्तरेणापि समुच्चयः स्यादेव, यथा **माघे दशमसर्गे—**

> "**सावशेषपदमुक्तमुपेक्षा स्रस्तमाल्यवसनाभरणेषु ।**
> **गन्तुमुत्थितमकारणतः स्म द्योतयन्ति मदविभ्रममासाम्** ॥" [१०/१६]

**"सावशेषाणि-ऊनानि पदानि यत्र तत् अर्धोक्तपदं उक्तं-कथितं वचनं, तथा स्रस्तमाल्यवसनाभरणेषु उपेक्षा-अग्रहः, तथा अकारणं-निःप्रयोजनमेव गन्तुं उत्थितं गमनाद्युत्थानं, एते पदार्थाः आसां अङ्गनानां मदविभ्रमं-मद्यपानविलासं द्योतयन्ति स्म-प्रकटीचक्रुः ।"** [ ] अत्र स्थानत्रयेऽनुक्तमपि चकारद्वयमवसेयम् । अध्यासितासु इति उभयत्र योज्यः, तेन च फलवन्त्यो बदर्यो यासु इति दरीविशेषणं । "**नद्यृदन्ताद्बहुव्रीहौ कः**" [ ] इति कप्रत्ययस्य दुर्निवारत्वात् बाहुलकाश्रयणात् क प्रत्ययाभाव इति तु न युक्तं । तथा निकुञ्जेषु-वृक्षगहनेषु चरन् । किम्भूतेषु निकुञ्जेषु ? पुञ्जिताः-मिलिताः कुञ्जराः-स्तम्बेरमा । येषु तथा तेषु । तथा सानुषु-गिरिशिखरेषु चरन् । किम्भूतेषु सानुषु ? दुर्दर्शः-उच्चत्वात् द्रष्टुमशक्यो भानुः-सूर्यो येषु यैर्वा तानि तथा तेषु ।

अथ किन्नर्योक्तामार्यागीतिमाह—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**'विपिनोद्देशं सरसं केतकमकरन्दवासितवियत्ककुभम् ।**
**ग्राममिमं वा सर संकेतकमकरन्दवासितवियत्ककुभम् ॥ ३४ ॥**

**विपिने**ति । हे प्रिय ! इमं प्रत्यक्षग्राह्यं विपिनोद्देशं-काननप्रदेशं, वा-अथवा इमं पुरोवर्त्तिनं ग्रामं सर-व्रज । किम्भूतं विपिनोद्देशम् ? सरसं-सजलं वियच्च-नभः ककुभश्च-दिशो वियत्ककुभः केतकमकरन्देन वासिताः-सुरभिताः वियत्-नभःककुभो येन स तं । किम्भूतं ग्रामम् ? संकेतयति-निवासयति अनुकूलत्वान्निवासहेतुर्भवतीति संकेतकं, तदेवानुकूल्यमाह । पुनः किम्भूतम् । न विद्यते करः-राजग्राह्यो अंशो यत्र तं, पर्वतीयत्वात् अकरं । तथा आसनमासितं सद्भावः दवस्य आसितान् वियन्तः-विश्लिष्यन्तः ककुभाः-तरवो यत्र तं । यदि वा "**षिञ् बन्धने**" [पा. धा. १२४९] आङ्पूर्वस्य आसयनमासितं आबन्ध इत्यर्थः । यद्वा, सिताः-सम्बद्धाः दवेन आसिताः-असम्बद्धा वयः-पक्षिणो यत्र, तथा यत् वहत् कं-पयो यस्यां सा चासौ कुश्च तया भातीति [१]यत्ककुभः, पश्चात् कर्मधारयस्तं, इणः शतृ ङि यत् [**इणो यण्**, पा. सू. ४/८१]वहदित्यर्थः ॥ ३४ ॥

**तदनु पुनस्तां प्रतिवादिना किंनरेण च पठ्यमानामिमामार्यामश्रौषीत् ।**

तदनु-तस्याः-किन्नर्या आर्यागीतेः कथनादनु-पश्चात् पुनस्तां प्रति-किन्नरीमभि-वदितुं शीलं यस्यासौ तत्प्रतिवादी तेन-तत्प्रतिवादिना किन्नरेण च पठ्यमानां-कथ्यमानां इमां-आर्यां अश्रौषीत् । किञ्चिन्नराः किञ्चित्पक्ष्यश्वादिरूपमिश्राः किन्नराः । तामेवाह—

**अजनि रजनिः किमन्यत्तरणिस्तरतीव पश्चिमपयोधौ ।**
**घनतरुणि तरुणि विपिने क्वचिदस्मिन्नेव निवसावः[१] ॥ ३५ ॥**

**अजनी**ति । हे तरुणि ! रजनिः अजनि-जज्ञे । अन्यत् किम्- अपरं किं उच्यते ? तरणिः-सूर्यः पश्चिमपयोधौ-पश्चिमसमुद्रे तरतीव-उन्मज्जतीव तस्मात् अस्मिन्नेव विपिने-वने क्वचित् प्रदेशे आवां निवसावः-तिष्ठावः । किम्भूते विपिने ? घनाः-बहवस्तरवो यस्मिन् तत्तस्मिन् घनतरुणि "**नामिनः स्वरितोऽन्तः**[२]" [ ] ॥ ३५ ॥

**एवमन्योन्यालापमाकर्ण्य किन्नरमिथुनस्य विस्मितो नरपतिः अहो-माननीयमहिमोद्दामा दमयन्ती यस्याः परिचारिणः पक्षिणोऽपि श्रवणस्पृ-हणीयामेवंविधसुभाषितामृतमुचं वाचमुच्चारयन्ति ।**

---

१. यत् नास्ति अनू. । २. स्वरेनोन्तः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**प्रथममिह तावदाभिजात्यवित्तविद्याविवेकविभवैरनाकुले कुले जन्म ततोऽप्य[1]सरूपसंपत्तिस्तदनु श्लाघ्यानुगुणगुणलाभस्ततोऽपि च [2]सुविदग्धस्निग्धपरिजनावाप्तिरिति महती भाग्यपरम्परा' इति चिन्तयन्नातिदूरवर्तिनः[3] पुष्कराक्षस्य मुखमवलोकयांचकार ।**

**एवं**-अमुना प्रकारेण किन्नरमिथुनस्य अन्योन्यं-परस्परं प्रश्नोत्तररूपं आलापं आकर्ण्य-श्रुत्वा विस्मितः-साश्चर्यो नरपतिः-नल इति चिन्तयन् सन् नातिदूरे वर्तितुं शीलं यस्य स तस्य नातिदूरवर्तिनः-समीपस्थितस्य पुष्कराक्षस्य मुखं अवलोकयाञ्चकार-ददर्श । इतीति किम् ? अहो ! इति आश्चर्ये । माननीयेन-पूजनीयेन उत्कृष्टेनेत्यर्थः, महिम्ना-अनुभावेन उद्दामा-उत्कटा दमयन्ती यस्या दमयन्त्याः परिवृण्वन्ति-परिकुर्वन्तीत्येवंशीलाः परिवारिणः परिवारभूताः पक्षिणोऽपि-विहगा अपि श्रवणयोः स्पृहणीयां-अभिलषणीयां श्रव्यामित्यर्थः । एवंविधं श्लिष्टार्थं सुभाषितं आर्याद्वयरूपमेव अमृतं मुञ्चति-श्रवतीति, एवंविधं सुभाषितामृतमुक् तां वाचं-वाणीमुच्चारयन्ति ।

तथा यस्याः **प्रथमं**-पूर्वं इह अस्मिन् कुले जन्म । किम्भूते कुले ? आभिजात्यं-कुलीनता वित्तं च-धनं विद्याश्च-आन्वीक्षिक्यादयः विवेकश्च-हेयोपादेयविमर्शस्तैरनाकुले , सुस्थिते, कौलीन्यादि सम्पूर्णे इत्यर्थः । आभिजात्यादीनि तु अहङ्कारकृत वैक्लव्यस्य कारणानि भवन्ति । कुले तु एभिरनाकुले इति । ततोपि एवंविधकुले जाताया अपि पसम्पत्तिः कुतः ? परं यस्या असरूपा-असदृशी रूपसम्पत्तिः-सौन्दर्यसम्पत् । अथ रूप-सम्पत्तौ जातायामपि गुणलाभः कुतः ? परं यस्याः तस्याः रूपसम्पत्तेरनु-तदनु श्लाघ्यानुगुणः-प्रशंसानुरूपः श्लाघ्य इत्यर्थः । एवम्विधो गुणानां-औदार्यादीनां लाभः-प्राप्तिः । अथ गुणप्राप्तावपि सुसहायसंपत् कुतः ? परं यस्याः ततोऽपि गुणलाभात् पश्चादपि सुविदग्धः-श्लेषोक्तिषु छेकः स्निग्धः-स्नेहलो यः परिजनः-परिवारस्तस्य अवाप्तिः-प्राप्तिरिति । उक्तप्रकारेण महती-गुर्वी भाग्यस्य-भागधेयस्य परम्परा-परिपाटी ।

नरपतिना पुष्कराक्षस्य मुखेऽवलोकिते सतिः

**पुष्कराक्षोऽपि पुरस्कृत्य[4] तं किंनरमभाषत ।**

**'सुन्दरक, कान्तामुखावलोकनासक्तः समीपमागतानप्यस्मान्न पश्यसि ।**

**तदितो दत्तदृष्टिर्भव ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**पुष्कराक्षो**ऽपि किन्नरं पुरस्कृत्य-अधिकृत्य अभाषत ।

हे **सुन्दरक** ! किन्नरकान्तायाः-प्रियाया मुखावलोकने अवसक्तः-आसक्तः सन् समीपं-निकटमागतानपि अस्मान् न पश्यसि ? तत्-तस्मात् इतः-अस्मिन्प्रदेशे दत्ता-दृष्टिर्येन एवम्विधो भव, इतः पश्येत्यर्थः ।

**स एष निषधेश्वरः कुसुमचापचक्रं विना,**
**प्रसादितमहेश्वरः स्मर इवागतो मूर्तिमान् ।**
**विलोकय विलोचनामृतसमुद्रमेनं नृपं,**
**विधेहि नयनोत्सवं कुरु कृतार्थतामात्मनः ॥ ३६ ॥**

**स** इति । या दमयन्त्याः पुरो व्यावर्णितः एष प्रत्यक्षो निषधेश्वरः-नलो मूर्त्तिमान् देहभृत्-स्मर इव आगतः । किम्भूतः ? कुसुमचापचक्रं विना-रहितो भूतः । तथा प्रसादिताः-प्रसन्नीकृता महान्तः-ईश्वरा येन सः । एतावता पूर्वस्मरात् व्यतिरेकोक्तिः । यतः, पूर्वः स्मरः कुसुमचापचक्रं धत्ते न च मूर्तिमान् दग्धाङ्गत्वात् प्रकोपितमहेश्वरश्च । यदा **प्रसाधिते**ति पाठस्तदा प्रसाधिता-अलङ्कृता महान्तः-ईश्वरास्त्राणादिना येन सः, तादृक् निषधेश्वरः । स्मरस्तु साधयितुं-वशीकर्तुं प्रारब्धो महेश्वरः-शिवो येन सः । कुसुमान्येव चापचक्रं-धनुर्मण्डलं । विलोकयेति, विलोचनयोः-नेत्रयोरमृतसमुद्र इव आह्लादजनकत्वात् यः स तं एनं नृपं-नलं विलोकय-पश्य । तथा नयनयोरुत्सवं, नयनोत्सवं-नेत्रानन्दं विधेहि-कुरु । तथा आत्मनः-स्वस्य कृतार्थां-सम्पन्नमनोरथतां कुरु ॥ ३६ ॥

**त्वमपि विहंगवागुरे, परमरहस्य[1]सखी देव्याः सा हि त्वच्चक्षुषा पश्यति, त्वत्कर्णाभ्यामाकर्णयति, त्वन्मनसा मनुते ।**

**तदेहि दमयन्तीमनोरथपान्थपिपासाच्छिदि लावण्यपुण्यहृदेऽस्मिन् राजनि निर्वापय चक्षुः' इति किंनरमिथुनमभिमुखीकृत्य नरपतिमवादीत् ।**

हे **विहङ्गवागुरे** ! त्वमपि देव्याः-दमयन्त्याः परमरहस्यस्य-उत्कृष्टतात्पर्यस्य सखी-वयस्या परं रहस्यं त्वामेव वदतीत्यर्थः । कथं परमरहस्यसखीत्याह—हिः-यस्मात् सा दमयन्ती त्वच्चक्षुषा-त्वल्लोचनेन पश्यति, यत्त्वया दृष्टं तत्तयापि दृष्टं, त्वद्दृष्टं सर्वमपि यथार्थं मन्यत इत्यर्थः । तथा सा त्वत्कर्णाभ्यां-त्वदीयश्रोत्राभ्यां आकर्णयति, यत्त्वया श्रुतं तदवितथमेव मन्यमानया तया त्वत्तः श्रूयते । तथा सा त्वन्मनसा-त्वदीयचेतसा मनुते-जानाति, यत्त्वया

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बुद्धं तत्तयापि बुद्धमितिभावः ।

**तत्**-तस्मात् त्वं एहि-आगच्छ । अस्मिन् राजनि-नले चक्षुर्निर्वापय-शीतली कुरु । किम्भूते राजनि ? दमयन्त्या मनोरथाः-अभिलाषा एव पान्थास्तेषां पिपासां-उदन्यां छिनत्ति-अपनयतीति तस्मिन्, यथा जलाशये पान्थस्य पिपासा छिद्यते तथा अस्मिन् नले दृष्टे दमयन्तीमनोरथपिपासा छिद्यते, भैमीमनोरथाः पूर्यन्त इति भावः । यद्वा, दमयन्तीमनोरथा एव पान्थपिपासा तां छिनत्तीति तस्मिन् । पुनः किम्भूते ? लावण्यस्य-सौन्दर्यस्य पुण्यः-पवित्रो ह्रद इव-जलाधारविशेष इव यः सः तस्मिन् ह्रदस्य निर्वापणकारणत्वात् चक्षुर्निर्वापणं तत्र घटत एव । इति-अमुना प्रकारेण किन्नरमिथुनमभिमुखीकृत्य-राज्ञः सम्मुखं विधाय पुष्कराक्षो नरपतिं-नलमवादीत् ।

**'देव, तदेतत्किनरमिथुनम्, इदं हि द्वितीयमिव हृदयं देव्याः, प्रियं प्राणेभ्योऽपि प्रेम्णा प्राभृतमेतत्प्रहितं तुहिनाचलचक्रवर्तिना[१] परमं पात्रं मन्त्रगीतेः।**

**तथाहि–जातख्याति जातिषु, गीतयशो गीतकेषु, वर्धितमानं वर्धमानेषु, सारमासारितकेषु, निपुणं पाणिकासु, धाम साम्नम्, आचार्यकमृचाम्, आलयः कलादिभेदानाम्, स्वरसंगीत्यामपि सुस्वरं स्वरालापेषु, अग्राम्यं[२] ग्रामरागेषु, विचित्रभाषं भाषासु, प्रवर्तकं नर्तकीनाम्[३], कारणं करणमार्गस्य, वाद्येष्वपि प्रवीणं वीणावेणुषु, लब्धपाटवं पटहेषु, अप्रतिमल्लं झल्लरीषु ।**

हे **देव** ! तत्-इति पूर्वं यन्मया भवतामुक्तमासीत् तत् एतत् प्रत्यक्षं-किन्नरमिथुनं। इदं किन्नरमिथुनं हि-निश्चितं देव्याः-दमयन्त्या द्वितीयं हृदयमिव, प्रियत्वात् । तथा प्राणेभ्योपि-असुभ्योपि सकाशात् प्रियं-इष्टं, प्राणेभ्योप्यधिकमित्यर्थः। तथा प्रेम्णा-स्नेहेन तुहिनाचलस्य-हिमाचलस्य चक्रवर्तिना नृपेण एतत् किन्नरमिथुनं प्राभृतं-ढौकनं प्रहितं-प्रेषितं भीमायेति शेषः । तथा मन्त्रा गीयन्ते अस्यामिति मन्त्रगीतिस्तस्याः मन्त्रगीतेः परमं पात्रं ।

**तथाही**ति । ते देवकिन्नरमिथुनं व्याख्यानयन्नाह–किम्भूतं किन्नरमिथुनं ? जातयः-नन्दयन्तीप्रभृतयस्तासु जाता-भूता ख्यातिः-प्रसिद्धिर्यस्य तत्, तत्र कुशलमित्यर्थः । तथा **गीतकेषु**-गानेषु गीतं-ख्यातं यशो यस्य, तत्प्रकृष्टगानकृदित्यर्थः । तथा वर्द्धमानेषु वर्द्धितः-अधिकीभूतो मानः-चित्तोन्नतिर्यस्य तत् । "**मानश्चित्तोन्नतौ ग्रहे**" [३/२८१] इत्य**नेकार्थः** । तथा आसारितेषु सारं-प्रधानं । तथा पाणिकासु निपुणं-रक्षम् । तथा साम्नां धाम-गृहम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा ऋचां आचार्यकम् । तथा कलादिभेदानां आलयः-आश्रयः । वर्द्धमानान्यासारितकानि पाणिकाः सामानि ऋचः । कलादिभेदाश्च गीतविषया भरतशास्त्राद् गम्याः । तथा गीत्यामपि सरसं-समाधुर्यं तथा स्वराः-मध्यमादयस्तेषां ये आलापाः-भाषणानि तेषु सुस्वरं शोभन-ध्वनिः । तथा षड्जमध्यमगान्धारास्त्रयो ग्रामास्त एव रागास्तेषु अग्राम्यं-उचितं, निपुणमित्यर्थः । तथा भाषाः-षट्त्रिंशत्तासु विचित्रा-नानाविधा भाषा-भाषणं यस्य तत् । तथा नर्त्तकीनां प्रवर्तकं-प्रवर्त्तयितृ । तथा करणानि-तलपुष्पपुटादीनि अष्टोत्तरशतसंख्यानि तेषां यो मार्गः-पद्धतिस्तस्य कारणम् । तथा वाद्येष्वपि-आतोद्येष्वपि वीणावेणुषु प्रवीणं-चतुरम् । तथा पटहेषु लब्धं पाटवं-पटुत्वं येन तत् । तथा झल्लरीषु अप्रतिमल्लं-असदृशम् ।

**किंबहुना—**

**कालमिव कलाबहुलं सर्वरसानुप्रवेशि लवणमिव ।**
**तव नृप सेवां कर्तु किंनरयुगलं तया प्रहितम् ॥ ३७ ॥**

**किम्बहुना**-किम्बहूक्तेन—

**काल**मिति । हे नृप !-राजन् ! तव सेवां कर्त्तुं तया दमयन्त्या इदं किन्नरयुगलं प्रहितं-प्रेषितम् । किम्भूतम् ! कलाः-गीतवाद्याद्याः मुहूर्त्तभेदाश्च तां विदन्ती अधीयन्ते[१] वा, कालाः-कलाविदस्तेषां समूहः कालं तदिव कलाबहुलं । तद्यथा-कलायां-शास्त्रविषये बहुलं तन्निष्ठं भवति तथेदमपि समग्रकलाप्रवीणं । तथा लवणमिव सर्वरसानुप्रवेशि, यथा लवणं सर्वे च ते रसाश्च तिक्ताद्यास्तान् अनुप्रविशतीत्येवंशीलं सर्वरसाभिव्यञ्जकत्वात् तथा इदमपि सर्वे च ते रसाश्च शृङ्गाराद्यास्तान् अनुप्रविशतीति सर्वरसानुप्रवेशि तदभिज्ञत्वात् । समयार्थे तु कालशब्दे पुंस्त्वं स्यात् । यदा तु '**काल इव कलाबहुलं**' इति पाठस्तदा कालः कलाभिः-निमेषोन्मेषाद्यंशरूपाभिर्बहुलः-व्याप्तः । इदं तु कलाभिः-गीतनृत्यादिभिर्व्याप्तं । कालः-अवसरः, आत्मसमर्पणाय अवसर इव प्रेषित इति भावः ॥ ३७ ॥

**'तदेतदात्मपरिग्रहेणानुगृह्यताम्' इत्यभिधाय विश्रान्तवाचि तस्मिन्स किंनरयुवा किमप्युपसृत्य मृगमदमिलन्मलयजरसोल्लासिलेखाला-ञ्छितललाटपट्टार्पितकरकमलमुकुलं[१] प्रणतिप्रेङ्खितमणिकर्णावतंसतया सह प्रियया प्रणाममकरोत् ।**

**तत्**-इत्युपसंहारे । तस्मात् एतत् किन्नरमिथुनं आत्मनः परिग्रहेण-स्वीकारेण

१. अधीयते अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मदीयमिदमिति आत्मसात्करणेन अनुगृह्यतां-अनुग्रहः-प्रसादः क्रियतां, इत्यभिधाय तस्मिन्-पुष्कराक्षे विश्रान्ता वाक् यस्य स तस्मिन् मौनं भजमाने सति, स इति दमयन्त्याः प्रेषितः किन्नरयुवा किमपि-किञ्चित् उपसृत्य-राज्ञः समीपमागत्य[१] मृगमदेन-कस्तूरिका-द्रवेण मिलत्-संयुज्यमानो यो मलयजरसः-चन्दनद्रवस्तेन उल्लासिनी-शोभनशीला या लेखा-रेखा तथा लाञ्छितः-अङ्कितो यो ललाटपट्टः-अलिकफलकस्तस्मिन् अर्पितं-न्यस्तं करकमलमुकुलं संयोजित कुब्जितपाणियुगं येन सः, एवम्विधः सन् प्रणत्या-राज्ञो नमस्कारेण प्रेङ्खितः-कम्पितो मणिखचितः कर्णयोरवतंसः-कर्णपूरो यस्याः सा तथा प्रियया किन्नर्या सह प्रणाममकरोत्-नमश्चकार ।

अथ स्तुतिपूर्वकं तद्दत्तप्राभृतं यथा तद्ददौ, तथाह—

**लब्धार्धचन्द्र ईशः कृतकंसभयं च पौरुषं विष्णोः ।**
**ब्रह्मापि नाभिजातः केनोपमिमीमहे नृप भवन्तम् ॥ ३८ ॥**

**लब्धेति** । हे नृप ! भवन्तं केन उपमिमीमहे-केनोपमानं दद्महे । कथम् ? यतो भवत उपमानं शम्भुविष्णुब्रह्मणामेव घटते । ते च एवम्विधास्तद्यथा—ईशः-शम्भुः लब्धः-प्राप्तो अर्धचन्द्रः-गलापहस्तनं येन सः एवंविधः । तथा विष्णोः पौरुषं-विक्रमः कृतकं-कृत्रिमं तथा सभयं-भयान्वितं च । तथा ब्रह्मापि न अभिजातः-कुलीनो न । अतस्तव केनोपमानम् ? इति निन्दाभासपक्षः- ।

स्तुतिपक्षे तु—अर्धे चन्द्रस्य अर्धचन्द्रः शशिकलालब्धः अर्धचन्द्रो येन स एवम्विध ईशः । तथा कृतं कंसस्य भयं येन तत् एवंविधं विष्णोः पौरुषं । तथा वैष्णवनामेर्जातो ब्रह्मा ॥ ३८ ॥

**इदं च—**

**अरुणमणिकिरणकलि[१]तलिखिताक्षरमङ्गुलीयकाभरणम् ।**
**तस्याः करकिसलयमिव तव करकमले चिरं लगतु ॥ ३९ ॥**

**इदं** चेति । हे नृप ! इदं च अङ्गुलीयकाभरणं तस्याः-दमयन्त्याः करकिसलय-मिव-पाणिपल्लव इव तव करकमले चिरं- चिरकालं लगतु-आश्लिष्यतु, यथा तस्याः करकिसलयं त्वत्करे लगिष्यति तथेदमपि लगतु । किम्भूतं अङ्गुलीयकाभरणं ? अरुणमणिः-पद्मरागादिस्तस्य किरणैः-अंशुभिः कलितं-सहितं । तथा लिखितान्यक्षराणि यस्मिन् तत् लिखिताक्षरं । किम्भूतं करकिसलयं ? अरुणं तथा मणिकिरणैः-अरुण-

---
१. समीपं समागत्य अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रत्नकान्तिभिः फलितं पश्चात् कर्मधारयः । तथा लिखितानि अक्षराणि येन तत् । अनया आशिषा पाणिग्रहणं सूचितम् ॥ ३९ ॥

**अनया च–**

**तव सुभग रम्यदशया तयेव[१] रक्तान्तनेत्रमण्डनया ।**
**चीनांशुकयुगलिकया क्रियतामङ्गे परिष्वङ्गः ॥ ४० ॥**

**अनया** चेति । हे सुभग ! चक्षुष्य ! अनया चीनांशुकस्य-चीनदेशोद्भववाससो युगली-युग्मं चीनांशुकयुगली सैव चीनांशुकयुगलिका तया तयेव-दमयन्त्येव तव अङ्गे परिष्वङ्गः-आश्लेषः क्रियताम्, यथा त्वया[१] परिष्वङ्गः करिष्यते तथा अनया अपि क्रियताम्, इयं परिधीयतामित्यर्थः । किम्भूतया चीनांशुकयुगलिकया ? रम्या दशा वस्त्रान्तसूत्रं यस्याः सा तया । तथा रक्तोऽन्तः-अवसानं यस्य एवंविधं यन्नेत्रं-चित्रवस्त्रविशेषस्तदेव मण्डनं-अलङ्करणं यस्याः सा तया । किम्भूतया तया ? रम्या-रमणीया दशा-अवस्था यस्याः सा तया । तथा रक्तो अन्तः-पर्यन्तो ययोस्ते रक्तान्ते एवम्भूते नेत्रे-अक्षिणी मण्डनं यस्याः सा तया, पद्मिनीजातित्वात् रक्तान्तनेत्रत्वम् ॥ ४० ॥

**अयं च–**

**उज्ज्वलसुवर्णपदकस्तस्याः संदेशकथनदूत इव ।**
**रुचिरमणिकर्णपूरः श्रयतु श्रवणान्तिकं भवतः ॥ ४१ ॥**

**अयञ्च–**

**उज्ज्वलेति** । तस्याः-दमयन्त्या अयं रुचिरा मणयो यत्र एवम्विधः कर्णपूरः-अवतंसः भवतः श्रवणयोः-कर्णयोरन्तिकं- समीपं श्रयतु, कर्णयोर्निधीयतामित्यर्थः । क इव ? तस्याः-दमयन्त्याः सन्देशाः-उदन्तास्तेषां कथनाय दूतः सन्देशकथनदूतः स इव, यथा स दूतः श्रवणान्तिकं नीयते तथाऽयमपि । किम्भूतो रुचिरमणिकर्णपूरः ? उज्ज्वलं सुवर्णं पदं-स्थानकं यस्य स, सुवर्णाश्रित इत्यर्थः । किम्भूतो दूतः ? उज्ज्वलानि-अग्राम्याणि शोभनवर्णानि पदानि-वचनानि यस्य स उज्ज्वलसुवर्णपदकः ॥ ४१ ॥

**किंचान्यत्–**

**आनन्ददायिनस्ते कुण्डिननगरे कदा भविष्यन्ति ।**
**त्वन्मुखकमलविलोलन्नागरिकानयनषट्पदा दिवसाः ॥४२॥**

---

१. तया अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**किञ्चान्यत्**। **आनन्दं**-प्रमोदं ददतीति आनन्ददायिनस्ते दिवसाः कुण्डिननगरे कदा भविष्यन्ति ? किम्भूता दिवसाः ? त्वदीयं मुखमेव कमलं त्वन्मुखकमलं तत्र लावण्यमधुपानेच्छया विलोलन्तः-भ्रमन्तो नागरिकाणां-पौररमणीनां नयनान्येव षट्पदा येषु एवम्विधाः । कुण्डिनपुरनागरिका त्वन्मुखं वीक्षिष्यन्ते येषु दिनेषु तानि दिनानि कदा भविष्यन्तीति भावः ॥ ४२ ॥

**एवमाविर्भावितप्रश्रयमुज्ज्वलितानुरागमुद्दीपितादर[१]माप्यायितप्रणयम[२]भिधाय स्थितवति किंनरे, नरेश्वरो दमयन्तीप्रहितप्राभृतानि स्वयमादरेण गृहीत्वा, 'सुन्दरक, तस्याः संदेश एवास्माकं कर्णपूरः, परिकरोऽयं मणिकर्णावतंसः । तस्याः सुगृहीतेन नाम्नैव वयं मुद्रिताः प्रपञ्चोऽयमङ्गुलिमुद्रालंकारः। तदनुरागेणैव वयमाच्छादिताः पुनरुक्तमिद[३]माच्छादनयुगलमपरं च युवां प्रेषयन्त्या तया किं न प्रहितमस्माकम्, किमन्यत्त्वत्तोऽपि परं[४] प्रियं प्राभृतं भविष्यतीति। तदेहि शिबिरमनुसरामः इत्यभिधाय बहुमानयन्तत्[५]किंनरमिथुनमतिचपलकपिकरा[६]न्दोलिततरुशिखराग्रगलिततल[७]शिलास्फालनस्फुटत्फलरससुगन्धिना स्रवत्कुसुममकरन्दद्रवार्दितपांसुपटलेन वर्त्मना निजावासमुदचलत् ।**

**एवं**-उक्तप्रकारेण आविर्भावितः-प्रकटितः प्रश्रयः-स्नेहो यत्राभिधाने एवं यथा भवति तथा । तथा उज्ज्वलितः-उद्दीपितो अनुरागः-प्रेमबन्धो यत्रैवं यथा स्यात्तथा । तथा उद्दीपितः-प्रकाशित आदरः-बहुमानो यत्र एवं यथा भवति, तथा आप्यापितः-वृद्धिं नीतः प्रणयः-स्नेहो यत्र एवं यथा भवति, तथा अभिधाय-उक्त्वा किन्नरे स्थितवति-तूर्ष्णी भजमाने सति, नरेश्वरः-नलो दमयन्त्या प्रहितानि-मुक्तानि यानि प्राभृतानि-ढौकनानि तानि स्वयमेव आदरेण-सबहुमानं गृहीत्वा उवाच । हे सुन्दरक ! तस्याः-दमयन्त्याः सन्देश एव कर्णपूरः-अवतंसः कर्णयोः पूरणं च । तथा तस्या अयं भवत्सदृक्षः परिकरः-परिवार एव अस्माकं मणिकर्णावतंसः। तथा तस्याः सुष्ठु गृहीतेन नाम्नैव-दमयन्तीत्यभिधानेनैव वयं मुद्रिताः-मुद्रां प्राप्ताः, पक्षे अपरस्त्रीनाम्नो दुष्करप्रवेशी[१]कृताः, तेनायं अङ्गुलिमुद्रालङ्कारः-अङ्गुलीयकाभरणं प्रपञ्चः-विप्रतारणं । "**प्रपञ्चो विप्रलम्भने । विस्तारे सञ्चये चापि**" [३/१३८-३९] इत्य**नेकार्थः** । तथा तस्या अनुरागेणैव-अस्माकमुपरि प्रेमबन्धेनैव वयमाच्छादिताः-आवृताः, अत इदं आच्छादनयुगलं-चीनांशुकयुग्मं पुनरुक्तं, आच्छादितस्याच्छादने हि पौनरुक्त्यं, अफलमित्यर्थः । अपरं च-अन्यच्च उच्यत इति शेषः । तया-दमयन्त्या युवां

१. °प्रवेशाः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किन्नरकिन्नर्यौ प्रेषयन्त्या-मुञ्चन्त्या अस्माकं किं न प्रहितम् ? अपि तु भवतोः प्रेषणेन सर्वमपि प्रेषितमित्यर्थः । त्वत्तोऽपि-किन्नरमिथुनादपि अन्यत् परं-प्रकृष्टं किं प्रियं प्राभृतं भविष्यति ? अपि तु न किमपीति । तत्-तस्माद् एहि-आगच्छ शिबिरं-सेनासन्निवेशं अनुलक्षीकृत्य सरामः-गच्छामः । इति-अमुना प्रकारेण अभिधाय-उक्त्वा तत् किन्नर-मिथुनं बहुमानयन्-गौरवयंश्च नल एवम्विधेन वर्त्मना-मार्गेण निजावासं-स्वीयनिवासस्थानं प्रति उदचलत्-प्रावर्तत । किम्भूतेन वर्त्मना ? अतिचपला ये कपयः-वानरास्तेषां करैः-पाणिभिरन्दोलिलानि-कम्पितानि यानि तरूणां शिखराग्राणि-वृक्षाग्रप्रान्ता अतएव तेभ्यो गलितानि-पतितानि, तथा तलशिलासु-अधोभागवर्त्तिपाषाणेषु यत् आस्फालनं-आघातस्तेन स्फुटन्ति-द्विदलीभवन्ति ततः कर्मधारयः, एवम्भूतानि यानि फलानि तेषां यो रसः-द्रवस्तेन सुगन्धिना-सुरभिणा, तथा शुचिः-पवित्रः कुसुमानां यो मकरन्दद्रवः-पुष्परसस्तेन आर्द्रितं-क्लिन्नीकृतं पांसुपटलं यस्मिन् तत्तथा तेन ।

**उच्चलिते च पश्चिमाम्भोनिधिसलिलक्षालितपादपल्लवे वासार्थिनी-वास्तगिरिगह्वरं विशति वियद्वीथीपान्थे विवस्वति, क्रमेण तस्यां दिशि दिनकररथचक्रचङ्क्रमणचूर्णनो[१]च्छलन्मन्दरगिरिगैरिक[२]धूलिपटलोल्लोल इवोल्ललास संध्यारागः ।**

**तेन च संवलितानि विजृम्भितुमारभन्त जम्भनिशुम्भनककुभि [३]विपिनजरत्कृकवाकुकंधरारोमरोर्चीषि तमांसि ।**

राज्ञि-नले स्वावासाय उच्चलिते सति वियदेव वीथी-मार्गस्तस्याः पान्थ इव-पथिक इव यः स तस्मिन् विवस्वति च-सूर्ये अस्तगिरेः-अस्ताचलस्य गह्वरं-गुहा तस्मिन् विशति-प्रविशति सति, क्रमेण-सान्ध्यसमयातिक्रमणपरिपाट्या तस्यां दिशि पश्चिमायां सान्ध्यरागः-सायन्तनं लौहित्यं उल्ललास-प्रचकाट । किम्भूते रवौ ? पश्चिमाम्भोनिधेर्यत्[१] सलिलं तेन क्षालिताः-निर्माजिताः[२] पादपल्लवाः-किरणकिसलयानि येन स तथा तस्मिन् । पुनः किम्भूते ? उत्प्रेक्ष्यते, वासः-वसनं अर्थयते-अभिलषतीत्येवंशीलो वासार्थी तस्मिन्निव-रात्रौ अत्र निवासं[३] करिष्यत इत्यभिलषतीव । अन्योपि पान्थः सलिलेन चरणौ प्रक्षाल्य वासागारं प्रविशति तथा अयमपि जलधिजलक्षालितपादो निवासार्थं अस्ताद्रिगुहां प्रविशतीति भावः । किम्भूतः सन्ध्यारागः ?[४] उत्प्रेक्ष्यते, दिनकरस्य-रवेर्यद् रथचक्रं तस्य यच्चंक्रमणं-चलनं तेन यच्चूर्णनं-पेषणं तेन उच्छलत्-उत्पतत् यन्मन्दरगिरेर्गैरिकधूलिपटलं-धातुपांसुवृन्दं लोहितस्वर्णपांसुपटलं वा तस्य उल्लोल इव कल्लोल इव । "**गैरिकं स्वर्णे**

---

१. यत्नास्ति अनू. । २. निर्माजिताः अनू. । ३. निवासः अनू. । ४. सान्ध्यरागः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**धातौ''** [३/३७] इत्य**नेकार्थः** ।

**तेन** च सन्ध्यारागेण[१] संवलितानि-मिश्रितानि तमांसि जम्भनिशुम्भनः-इन्द्रस्तस्य ककुभि-पूर्वस्यां दिशि विजृम्भितुं-विस्तरितुं आरभन्त-प्रयत्नं चक्रुः । किम्भूतानि तमांसि? विपिने-वने जरन्तः-वृद्धा ये कृकवाकवः-ताम्रचूडास्तेषां कन्धरायां यानि रोमाणि तद्वद् रोचिः-छविर्येषां तानि धूसरवर्णानीत्यर्थः ।

**ततश्च नष्टचर्याक्रीडयेवादर्शनीयचयां विशन्तेषु दिक्कन्यकासु, वनमुनिहोमधूमगन्धेन संतर्प्यमाणासु वनदेवतासु, निद्रान्धसिन्धुरयूथेष्विवोन्नतवप्रस्थलीषु परिणमत्सु शनैस्तिमिरेषु, मनाग्भिन्नाञ्जनपत्रस्तबकितेषु जाते निशामुखे, नरपतिस्तेन किन्नरमिथुनेन सार्धमर्धपथायातप्रज्ज्वलितप्रदीपिकापाणिपरिजनपरिकरितः शरणागतकपोतमुत्पतितोलूककृतशब्दं शिबिमिव शिबिरसंनिवेशमविशत् ।**

**ततश्चेति** । ततः-उच्चलनानन्तरं नरपतिः-नल एवमेवं जायमाने सति, तेन किन्नरमिथुनेन सार्धं-अर्धपथे एव आयातः-अभिमुखं प्राप्तः, तथा प्रज्ज्वालिताः-स्नेहेन सिक्ताः प्रदीपिकाः पाणिषु यस्य स, ततः कर्मधारयः, एवम्विधो यः परिजनस्तेन परिकरितः-परिवृतः सन् शिबिरसन्निवेशं-सेनास्थानकं अविशत्-प्रविवेश । कासु सतीषु ? दिक्कन्यकासु-दिक्कुमारीषु अदर्शनीयस्य-अनवलोकनीयस्य या चर्या-गतिस्तां विशन्तीषु-प्रविशन्तीषु सतीषु, दिशो न दृश्यन्त इति भावः । **अदर्शनमायान्तीष्विति** पाठान्तरम् । उत्प्रेक्ष्यते, नष्टचर्याक्रीडयेव-शिशुक्रीडाविशेषेणेव । अन्या अपि कुमार्यो रममाणाः क्रीडया क्वचिद्विवरे प्रविश्य अदृश्या भवन्ति तथेमा अपि । तथा वनदेवतासु वनमुनीनां-तापसानां होमस्य यो धूमगन्धस्तेन संतर्प्यमाणासु-पूज्यमानासु सतीषु । पुनः केषु सत्सु ? शनैः-मन्दं मन्दं तिमिरेषु अन्धकारेषु उत्तुङ्गाः-उन्नता या वप्रस्थल्यः-तटप्रदेशास्तासु परिणमत्सु-परिपाकं गच्छत्सु सत्सु, बहलीभवत्स्वित्यर्थः । तिमिरेषु केष्विव ? उत्प्रेक्ष्यते, निद्रया अन्धानीव अन्धानि यानि सिन्धुरयूथानि-हस्तिवृन्दानि तेष्विव, कृष्णत्वसाधर्म्यात् तानपि[२] उत्तुङ्गवप्रस्थलेषु परिणमन्ति तिर्यक्प्रहारं ददते । पुनः क्व सति ? निशामुखे-प्रदोषे मनाक्-ईषत् भिन्नानि-विकसितानि यानि अञ्जनपत्राणि-कृष्णवृक्षविशेषदलानि तैः स्तबकितमिव कर्बुरितमिव, स्तबकितं तस्मिन् जाते सति । शङ्के, इदं निशामुखं तमसा कृष्णं नास्ति रजन्या अञ्जनपत्रैः स्वमुखं मण्डितमिति । किम्भूतं शिबिरसन्निवेशम् ? शरणाय नीडार्थमागताः कपोताः-पारापता यस्मिन् स तथा तम् । तथा उत्पतिताः-उड्डीना ये उलूकाः-घूकास्तैः कृतः शब्दो यत्र तं । निशासु हि कपोताः नीडमागच्छन्ति, उलूकाश्च उड्डीयन्ते । कमिव ?

---

१. सान्ध्यरागेण । २. तान्यपि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शिबिमिव-शिबिनृपमिव। किम्भूतं शिबिम्? शरणार्थं-स्वरक्षार्थं आगतः कपोतो यस्मिन् स तम्। तथा ऊर्ध्वं कपोतस्य उपरि पतितो य उलूकस्तस्य निवारणाय कृतः शब्दो-'मा घातय' इति रूपो ध्वनिर्येन स तम्। नारदकृतां शिबिनृपप्रशंसामसूयन्तौ कपोतोलूकरूपधारिणौ सुरौ सत्त्वं जिज्ञासमानौ शिबिनृपमागतौ इत्यागमः।

**तत्र च क्रमेण कृतकरणीयस्त्वरमाणपाचकवृन्दारकोपनीत[१]-मुत्पतत्पाकपरिमलस्पृहणीयमत्युष्णमेदुरमांसोपदंसमाज्यप्राज्यमुपभुज्य पुष्कराक्षकिंनरमिथुनाप्तजनैः[२] सह मधुररससारमाहारम्[३], अनन्तरमाचान्तः शुचिचन्दनोद्वर्त्तितकर[४]कमलं कर्पूरपारीपरिकरित[५]ताम्बूलोज्ज्वलवदनारविन्दः 'सुन्दरक, कमपि प्रस्तारय विद्याविनोदं त्वयापि अयि विहंगवागुरिके, गीयतां किमपि मधुरम्' इति मृदुपर्यङ्किकासुखासीनः किंनरमिथुनमादिदेश।**

**तत्र**-शिबिरसन्निवेशे क्रमेण-परिपाट्या कृतं करणीयं सन्ध्यावन्दनादिकं येन स एवम्विधः सन् नलः पुष्कराक्षश्च किन्नरमिथुनं च आप्तजनाश्च-श्रुतशीलाद्यास्तैः सह मधुररसेन-मृष्टास्वादेन सारं-प्रधानं आहारं उपभुज्य, अनन्तरं-पश्चात् आचान्तो-गृहीताचमनो अतएव शुचिः-पवित्रः, तथा चन्दनेन-चन्दनद्रवेण उद्वर्तितं-रूक्षीकृतं करकमलं[१]येन सः, तथा कर्पूरस्य-पारीशकलं तेन परिकरितं-सहितं यत्ताम्बूलं तेन उज्ज्वलं-मनोहरं वदनारविन्दं यस्य स, तथा मृद्व्यां-सुकुमारायां पर्यङ्किकायां-आसनविशेषे सुखेन आसीनः-स्थितः सन् किन्नरमिथुनं इति आदिदेश-आज्ञापयति स्म। किम्भूतं आहारम्? त्वरमाणाः-शीघ्रं आगच्छन्तो ये पाचकवृन्दारकाः-सूपकारमुख्याः तैरुपनीतं-उपढौकितं, तथा उत्पतन्-ऊर्ध्वं गच्छन् यः पाकस्य अन्नादिपचनस्य परिमलः-आमोदस्तेन स्पृहणीयं-अभिलषणीयं, तथा अत्युष्णं मेदुरं-मांसलं यन्मांसं-पलं उपदंशाश्च-अवदशास्ते विद्यन्ते यस्मिन् स तथा तम्। उपदिश्यते पानरुचिजननार्थमित्युपदंशः मद्यपस्य अशनं खरविशदमभ्यवहार्यम्, शाकमित्यर्थः, तथा आज्येन-घृतेन प्राज्यं-प्रचुरं बहुघृतयुतमित्यर्थः। इतीति किम्? हे सुन्दरक! कमपि विद्याविनोदं-शास्त्रकौतुकं प्रस्तावय-विधेहि प्रारभस्व। अपि इति कोमलामन्त्रणे, हे विहङ्गवागुरिके! किमपि अद्भुतं मधुरं त्वया गीयताम्-रागवद्ध्वनिना उच्चार्यताम्। "**अयि प्रश्ने अनुनये स्यात्**" [अनेकार्थ. परि. ४८]।

**दर्शिते च वांशिकेन वंशमुखोद्गीर्णगान्धारपञ्चमरागस्थानके**

१. करकमलयुगलं अनु.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**स्थिरीकृतमध्यमश्रुतिप्रसन्नप्रेङ्खोलनाप्रयोगमुचितस्थानकृतकम्प[१]मकठोरतारस्वरम्, आकर्षदिव हृदयम्, अभिषिञ्चदिवामृतेन[२] श्रवणेन्द्रियम्, अस्तंनयदिवान्यविषयवेदनम्[३], अनुच्चप्रपञ्चितपञ्चमं विपञ्चीस्वरसंदर्भितमभूत्तत्किमपि गीतम् ।**

राज्ञा आदिष्टे सति किमपि अद्भुतं गीतमभूच्च । क्व सति ? वांशिकेन-वंशवादनं शिल्पमस्येति वांशिकस्तेन वंशवादकेन वंशमुखेन-वेणुच्छिद्रेण उद्गीर्णं-उद्गीतं यत् गान्धारपञ्चमरागस्थानकं तस्मिन् दर्शिते च सति । किम्भूतं गीतम् ? स्थिरीकृता-निश्चलीकृता या मध्यमश्रुतिस्तया प्रसन्नः-विशदः प्रेङ्खोलनाप्रयोग-घोलनाव्यापारो यत्र तत् । श्रुतयो द्वाविंशतिस्तद् विभागस्त्वियम्-

**"षड्जत्वेन गृहीतो यः षड्जग्रामे ध्वनिर्भवेत् ।**
**तत ऊर्ध्वं तृतीयः स्यात् ऋषभो नाऽत्र संशयः ॥ [ ]**

**ततो द्वितीयो गान्धारश्चतुर्थो मध्यमस्ततः ।**
**मध्यमात् पञ्चमस्तद्वत् तृतीयो धैवतस्ततः ॥ [ ]**

**निषधोऽतो द्वितीयस्तु ततः षड्जचतुर्थकः ।**
**पञ्चमो मध्यमो नाम मध्यमान्तस्तृतीयकः ॥" [ ]**

इति । तथा उचितस्थाने कृतः कम्पः-कम्पनं यत्र तत् । तथा अकठोरः-मृदुस्तारः-उच्चस्वरो यत्र तत् । तथा हृदयं-चेत आकर्षदिव वशीकुर्वदिव । तथा श्रवणेन्द्रियं अमृतेन-पीयूषेण अभिषिञ्चदिव- स्नपयदिव आह्लादजनकत्वात् । तथा अन्येषां-शब्दव्यतिरिक्त-विषयाणां रूपादीनां सम्वेदनं ज्ञानं अस्तंनयदिव-अपाकुर्वदिव, इदं शृण्वतः सतोऽन्य-विषयपरिच्छेदो न जायते, मनसोऽत्रैव आसक्तत्वात् । तथा अनुच्चं-मन्दं यथा भवति तथा प्रपञ्चितः-विस्तारितः पञ्चमो रागो यत्र तत् । तथा विपञ्ची-वीणा तस्यां स्वरेण सन्दर्भितं-युक्तम् ।

**यत्र—**

**प्रसरति रणरणकरसः कुण्ठयति हठेन चित्तमुत्कण्ठा ।**
**स्मरति स्मरोऽपि धनुषः प्रगुणीकृतनिशितबाणस्य ॥ ४३ ॥**

**यत्रेति** । यत्र गीते श्रुते सति रणरणकरसः-उत्कण्ठारसः प्रसरति-प्रवर्तते । तथा यत्र च[१] उत्कण्ठा-वाञ्छा हठेन-बलात्कारेण चित्तं कुण्ठयति-प्रतिबध्नाति, अन्यत्रगन्तुं न

१. च नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ददातीत्यर्थः । तथा यत्र स्मरोपि धनुषः स्मरति, यस्मिन् श्रुते कामवृद्धिर्जायत इत्यर्थः । किम्भूतस्य धनुषः । प्रगुणीकृताः-सज्जीकृता निशिताः-तीक्ष्णा बाणा यस्मिंस्तत् तथा तस्य । "**अधीगर्थदयेशां कर्मणि**" [पा. सू. २/३/५२] इति स्मृत्यर्थयोगे कर्मणि षष्ठी ॥ ४३ ॥

**एवंविध व्यतिकरे[1] वैतालिकः पपाठ–**

**एवम्विध**व्यतिकरे-गानप्रस्तावे वैतालिकः-मागधः पपाठ ।

**सकलविषयवृत्तीर्मुद्रयन्निन्द्रियाणां,**
**हृदि विदधदवस्थां कांचिदुन्मादनीं च ।**
**ध्वनिरनुगतवीणानिक्कणः कोमलोऽयं,**
**जयति मदनबाणः पञ्चमः पञ्चमस्य ॥ ४४ ॥**

**सकले**ति । अयं पञ्चमस्य-रागस्य[1] ध्वनिर्जयति । किम्भूतो ध्वनिः ? पञ्चानां पूरणः पञ्चमो मदनबाणः-उन्मादनलक्षणः। कामस्य हि पञ्चबाणाः-१ मारण २ शोषण ३ तापन ४ मोटन ५ उन्मादनाख्याः । अथोन्मादनस्वरूपमेवाह-किंकुर्वन् ? इन्द्रियाणां सकला विषयवृत्तीः-विषयव्यापारान् मुद्रयन्, अन्येषु विषयेषु रूपादिषु इन्द्रियवृत्तिं निषेधयन् । तथा च-पुनः हृदि- चेतसि काञ्चिद्-वक्तुमशक्यां उन्मादिनीं-उन्मादजनयित्रीं अवस्थां-दशां विदधत्-कुर्वत् । तथा अनुगतः-अनुप्रवर्त्तितो वीणानिक्वणः-विपञ्चीस्वरो यस्य सः । तथा कोमलः-मृदुः । मालिनीवृत्तम् ॥ ४४ ॥

**अपि च-**

**प्रियविरहविषादस्यौषधं प्रोषितानां-**
**विविधविधुरचिन्ताभ्रान्ति[2]विश्रान्तिहेतुः ।**
**अयममृततरङ्गः कर्णयोः केन सृष्टो,**
**मधुररसनिधानं निःस्वनः पञ्चमस्य ॥ ४६ ॥**

**अपि च**-पुनः–

**प्रियेति** । अयं श्रूयमाणः पञ्चमस्य निस्वनः-ध्वनिः, केन सृष्टो ? -निर्मितः । किम्भूत ? प्रोषितानां-वियुक्तानां प्रियस्य- वल्लभस्य विरहे-वियोगे यो विषादः-मनःपीडा तस्य औषधं अगदः पञ्चमरागे श्रुते विरहिविरहव्यथा निवर्तत इत्यर्थः । तथा विविधानां-

१. पञ्चमरागस्य अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनेकविधानां विधुरचिन्ताभ्रान्तीनां-दुःखसंकल्पभ्रमाणां या विश्रान्तिः-निवृत्तिस्तस्या हेतुः-निबन्धनम् । तथा कर्णयोर्विषये अमृतस्य-सुधायास्तरङ्ग इव-वीचिरिव यः सः, अति मधुरत्वात् । पुनः किम्भूतं ? अति मधुररसस्य निधानं-आश्रयः। आविष्टलिङ्गोऽयम् । अत्र पञ्चमस्येति आख्याने तु पञ्चानां पूरणस्येति व्युत्पत्यर्थम् ॥ मालिनी ॥ ४५ ॥

**अपि च–**

**अयं हि प्रथमो रागः समस्तजनरञ्जने ।**
**यस्य नास्ति द्वितीयोऽपि स कथं पञ्चमोऽभवत्[१] ॥ ४६ ॥**

**अपि** च-पुनः–

**अयमिति** । हि-निश्चितं समस्तानां जनानां रञ्जने-आवर्जने अयं प्रथमः-प्रधानभूतो रागः । यस्य रागस्य द्वितीयः-समानो नास्ति, तथा पञ्चम इति तस्य रागस्य संज्ञा, अपि शब्दो विरोधे, यः प्रथमः-आद्यः यस्य च द्वयोः पूरणो द्वितीयः सोऽपि नास्ति, स कथं पञ्चानां पूरणः पञ्चमः ? इति ॥ ४६ ॥

**इति विविधमुदञ्चन्पञ्चमोद्गारगर्भं,**
**पठति मधुरकण्ठे धाम्नि वैतालिकेऽस्य[२] ।**
**अपहरति च चित्तं किंनरद्वन्द्वगीते,**
**सुखमय इव निद्रानिःस्पृहो लोक आसीत् ॥४७॥**

**ईती**ति । अस्य-राज्ञो धाम्नि-मन्दिरे मधुरः-मनोहरः कण्ठः-ध्वनिर्यस्य स तथा तस्मिन्, वैतालिके-मागधे इति-अमुना प्रकारेण विविधं-अनेकविधं, तथा उदञ्चन्-उच्चैः स्वरेणोल्लसन् यः पञ्चमस्योद्गारः-उच्चारः सगर्भे-मध्ये यत्र एवं च यथा भवति तथा पठति सति । च-पुनः किन्नरद्वन्द्वगीतेः चित्तं अपहरति- वशं नयति सति । लोकः सुखमय इव-सुखप्रचुर इव निद्रायां निःस्पृहः-निरभिलाष आसीत्, तद्गानश्रवणरसिकतया न कोऽपि निद्राति स्म इति भावः । **'निद्रामीलित'** इति पाठमधिकृत्य **टिप्पनकव्याख्येयम्-"परब्रह्मालोकनसमयसमुल्लासितसान्द्रानन्दमय इव । रसस्य हि तत्त्वं परब्रह्मास्वादसोदरत्वं पूर्वाचार्यैर्व्यचार्यत । सुखमय एव निद्रानिमीलित[१] इव आसीदित्युभयत्रापि इव शब्दो योज्यः । अथवा सुखमयः सन् निद्रामीलित इवेतीवशब्दो भिन्नक्रमे ॥"** [ ] **"कण्ठो ध्वनौ सन्निधाने ग्रीवायां मदनद्रुमे"** इत्यनेकार्थः [२/१०४] । मालिनी ॥ ४७ ॥

---

१. निद्रामीलित अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एवमनवरतमारोहावरोहमूर्च्छनाभङ्गितरङ्गिते गीतामृतस्त्रोतसि निमग्नमनसि कठोरितोत्कण्ठे रणरणकारम्भभाजि राजनि 'रजनि, किं न विरमसि। दिवस, किं नाविर्भवसि । अध्वन्[१], किं न स्तोकतां यासि[२] । कुण्डिननगर, किं न नेदीयो भवसि[३] । श्रम, किमन्तरायोऽसि । विधे, किमुत्क्षिप्य न मां तत्र नयसि' इत्यनेकधा चिन्तयति स किंनरयुवा प्रक्रमोचितश्लेषमिदमवादीत् ।**

**एवं**-अमुना प्रकारेण राजनि-नले इति अनेकधा चिन्तयति सति स किन्नरयुवा प्रक्रमास्य-गीतप्रस्तावस्य उचितः-योग्यः श्लेषो यत्र एवम्विधं गीतश्लेषसम्बद्धमित्यर्थः, इदं वक्ष्यमाणमवादीत्-पपाठ । किम्भूते राजनि ? अनवरतं-निरन्तरं आरोहेण च-उच्चैर्ध्वनिना अवरोहेण च-नीचैर्ध्वनिना या मूर्छनाभङ्गिः-स्वरसारणाविच्छित्तिस्तया तरङ्गितमिव-जातोर्मीव यत्तत्तस्मिन् । तथाभूते गीतमेव अमृतस्रोतः-पीयूषप्रवाहस्तस्मिन् विषये निमग्नं अन्तर्लीनं मनो यस्यासौ तथा तस्मिन् । तथा कठोरिता-जरठतां प्राप्ता दृढीभूता उत्कण्ठा-प्रियां प्रत्यभिलाषो यस्य स तस्मिन्।तथा रणरणकं-औत्सुक्यं तस्य य आरम्भः-उपक्रमस्तं भजति यः स तस्मिन् । इतीति किम् ? हे रजनि ! किं न विरमसि-किं न निर्वर्त्तसे ? हे दिवस! किं न आविर्भवसि-न प्रकटीभवसि ? हे अध्वन् !-मार्ग ! किं न स्तोकतां-अल्पत्वं यासि, स्तोकः किं न भवसि ? हे कुण्डिननगर ? ! किं न नेदीयो भवसि-न समीपवर्त्ति भवसि ? हे श्रम !-खेद ! किं अन्तरायः-विघ्नभूतोसि ? श्रमेणैव तत्र गन्तुं न शक्यते अतोऽन्तरायभूतत्वं तस्येति । हे विधे !-ब्रह्मन् ! मां उत्क्षिप्य-उद्धृत्य तत्र कुण्डिनपुरे[१] किं न नयसि-प्रापयसि ? येन दमयन्तीमालोकयामीति ।

अथ किन्नरपठितं सश्लेषपद्यवृन्दमाह—

**वर्धमानोल्लसद्रागा सुजातिमृदुपाणिका ।**
**दमयन्ती च गीतिश्च कस्य नो हृदयंगमा ॥ ४८ ॥**

**वर्द्धमानेति** । हे राजन् ! एवम्विधा दमयंती च गीतिश्च कस्य-पुरुषस्य नो हृदयङ्गमा-न हृदयाह्लाददायिनी, हृदये गच्छति-प्रविशतीति हृदयङ्गमा **"गमेः सुपि वाच्यः"** [पा. वा. कृ.] इति खच् । खित्वान्मुमागमः । **"हृद्यार्थं हृदयङ्गमम्"** [१/१४६] इति **हलायुधः** । किम्भूता दमयन्ती ? वर्द्धमानः-वर्द्धिष्णुः, न तु हीयमान; उल्लसन् रागः-अनुरागो यस्याः सा, तथा सुष्ठु-शोभना जातिः-क्षत्रियाख्या यस्याः सा, तथा मृदूः-सुकुमारौ

१. कुण्डिननगरे अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पाणी-करौ यस्याः सा । किम्भूता गीतिः ? वर्द्धमाने-तालविशेषे उल्लसन् रागः-श्रीरागादिर्यस्याः सा, तथा शोभना जातयो-नन्दयन्तीप्रभृतयो यस्याः सा, तथा मृदवः पाणयः समपाण्यादयो यस्यां सा ॥ ४८ ॥

**अपि च—**

**साप्यनेककलोपेता साप्यलंकारधारिणी ।**
**सापि हृद्यस्वरालापा किंत्वसाधारणा तव ॥ ४९ ॥**

अपीति । **साऽपि**-दमयन्त्यपि अनेकाभिः कलाभिः विज्ञानकौशलैरुपेता-सहिता, तथा साऽपि अलङ्कारैः-आभरणैर्हारिणी-मनोहरा, तथा साऽपि हृद्यः-मनोज्ञः स्वरः-शब्द आलापः-मिथो भाषणं च यस्याः सा । गीतिस्त्वेवंविधविशेषणावर्तत एव, परं दमयन्त्यपि तथाभूतैव अस्तीत्यपि शब्दार्थः । गीतिपक्षे इयं गीतिस्तु-

**"पताकेनावकृष्टिश्च विरलाङ्गुलिता च या ।**
**आवाप इति विज्ञेया कलाविद्‌भिस्तु सा कला ॥"** [ ]

इत्यावापादयः सप्त कलाः, अनेकाभिः कलाभिरुपेता, तथा अलङ्काराः-उपमारूपकादयः अलङ्कारैर्हारिणी, तथा स्वराश्च-षड्जादयः सप्त आलापश्च-आलप्तिः ★**"आलप्तिका गानप्रारम्भः"** [ ] इत्युणादिवृत्तौ★, हृद्याः स्वरालापा विद्यन्ते यस्यां सा । किन्तु-परं दमयन्ती तव असाधारणा-अनन्यविषयत्वात् त्वदेकाश्रया । गीतिस्तु साधारणा स्वरसाधारणा जातिसाधारणा चेति ॥ ४९ ॥

**अपि च—**

**संगीतका त्वदौत्सुक्यात्त्वां स्मरन्ती समूर्च्छना ।**
**किं तु तस्यास्त्वयि स्वामिल्लयभङ्गो न दृश्यते ॥ ५० ॥**

**सङ्गीते**ति । त्वयि औत्सुक्यं-मिलनोत्कण्ठा त्वदौत्सुक्यं तस्माद्धेतोः सम्यग्गीतं । प्रख्यातिरस्याः संगीतका, सर्वत्र त्वदुक्त्वा[१] सा गीयत इति भावः । तथा त्वां स्मरन्ती सह मूर्छनया वर्तत इति समूर्छना-समोहा । गीतिस्तु सङ्गीतं-स्वरगुणदूषणग्रामयतिश्रुति-मूर्छनालक्षणं यस्यां सा । तथा सह मूर्छनाभिर्विद्यते या सा समूर्छना—

**स्वरः संतर्जितो यत्र रागत्वं प्रतिपद्यते ।**
**मूर्छनामिति तां प्राहुर्मुनयो ग्रामसम्भवात् ।**

★-★ चिह्नान्तर्गत पाठो नास्ति अनू. । १. त्वदुक्ता अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सा च एकविंशतिविधा । यदुक्त म–

"सप्त स्वरास्त्रयो ग्रामा मूर्छनास्त्वेकविंशतिः ।
ताना एकोनपंचाशत् तिस्रो मात्रा लयास्त्रयः ॥" [ ]

इति । मूर्छना विभागस्त्वयम्–

"उत्तरमन्द्रा राजनी[१] तृतीया तूत्तरा मता[२] ।
चतुर्थी शुद्ध षड्जा तु पञ्चमी मत्सरी मता ॥

अश्वक्रान्ता तु षष्ठी स्यात् सप्तमी याभिरुद्गता ।
स्वरक्रमकृता विद्यात् सप्तैते[३] षड्जमूर्छनाः"
सौवीरी मध्यमा ग्रामे हारिणाश्वा तथैव च ।
स्याच्छलोपनता चैव चतुर्थी शुद्धमध्यमा ॥

मार्गी च पौरवी चैव दूषका[४] च यथाक्रमम् ।
सर्वासु[५] पंच षट् सप्त साधारणकृताः स्मताः ॥" [ ]

एतावता दमयन्तीगीत्योः साम्यमुक्तम् । अधुना तु भेदं निरूपयति । किन्तु-परं हे स्वामिन् ! तस्याः-दमयन्त्यास्त्वयि विषये लयः-तत्परता तस्य भङ्गो न दृश्यते, गीतौ तु द्रुतमध्यविलम्बितलक्षणाश्च लयास्तेषां भङ्गो दृश्यत इति ॥ ५० ॥

**एवमुक्तवति किंनरे[१] किमप्यलीककोपकुटिलोन्नमित[२]भ्रूवलया-वलितकंधरमवलोक्य किंनरी वक्तुमारभत ।**

**'सुन्दरक' मा मैवं वादीः ।**

**एवं**-अमुना प्रकारेण किन्नरे उक्तवति सति, किमपि-कथञ्चित् अलीककोपेन-बहिर्वर्त्यसूयया कुटिलितं[६]-वक्रीकृतं उन्नमितं-उच्चैः कृतं भ्रूवलयं-भ्रूचक्रं यत्र एवम्विधा आवलिता-ईषत् पश्चान्मुखी कृता परिवर्तिता कन्धरा-ग्रीवा यत्र अवलोकने एवं यथा भवति तथा किन्नरमवलोक्य किन्नरीवक्तुमारभत ।

हे **सुन्दरक** ! मा एवं वादीः-अकथयः । मा मेति निषेधेऽव्ययम् ।

**शुष्काङ्गी घनचार्वङ्ग्याः सुवाचः काकलीस्वरा ।
दमयन्त्याः कथं गीतिः सादृश्यमवगाहते ॥ ५१ ॥**

**शुष्केति** । दमयन्त्याः गीतिः कथं सादृश्यं-साम्यं अवगाहते प्राप्नोति ? यतः,

१. रजनी अनू. । २. उत्तरायते इत्यपि पाठः । ३. सप्तैताः । ४. हृष्यका अनू. । ५. सर्वास्तु अनू. । ६. कुटलितं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किम्भूता गीतिः ? शुष्कं-अनार्द्रं अङ्गं-शरीरं यस्या सा । किम्भूताया दमयन्त्याः । घनं-निविडं मांसलमित्यर्थः, चारु-रुचिरं अङ्गं यस्याः सा तस्याः । तथा गीतिस्तु काकली-श्लेष्मवैगुण्यात् द्विधा भूतः स्वरो यस्याः सा । किम्भूताया दमयन्त्याः ? शोभना वाक्यस्याः सा सुवाक् तस्याः । इति वैसदृश्यपक्षः । तत्त्वतस्तु-शुष्कं अवकृष्टं[1] अङ्गं-अवयवो यस्याः सा । तथा कु-ईषत् कालोऽस्यामिति **नदादित्वादी** काकली-निषादसंज्ञः स्वरो यस्याः सा ॥ ५१ ॥

**अपि च—**

**गीतेर्ग्रामाः किल द्वित्राः सा तु ग्रामसहस्रभाक् ।**
**कूटतानघना गीतिः कथं तस्याः समा भवेत् ॥ ५२ ॥**

**अपि च**-पुनर्दमयन्त्या सह गीतेर्वैसदृश्यमाह—

**गीते**रिति । किलेति अरुचौ । अरुचिस्तु गीतिविषये, न दमयन्त्याम् । गीतेर्ग्रामाः-खेटकानि द्वित्राः-द्वौ त्रयो वा मानं येषां ते इति द्वित्राः "**बहुव्रीहौ संख्ये ये डज्बहुगणात्**" [पा. सू. ५/४/७३] इति बहुव्रीहौ **डच्** । सा तु-दमयन्ती ग्रामाणां सहस्रं भजतीति ग्राम सहस्रभाक् । तथा गीतिः कूटतानेन-कपटविस्तारेण घना-बहुला, दमयन्ती तु न कूटता न घना । अतः कथं तस्या दमयन्त्या गीतिः समा भवेत् । तत्त्वतस्तु-गीतेः षड्जमध्यमगान्धारास्त्रयो ग्रामाः, गान्धारस्य स्वर्गविषयत्वात् द्वावेव इति द्वित्राः ग्रामाः, तथा कूटतानाः-पञ्चत्रिंशत् तैर्घनाः ॥ ५२ ॥

**किं चान्यत्—**

**ज्वरितेव [1]बहुलङ्घनप्रयोगप्रकाशितमूर्च्छना बहुलकम्पा[2] च, उन्मत्तेव बहुभाषा बहुताला[3] च, वेश्येव बहुटक्करागा बहुरागा[4] च, अटवीव बहुककुभभेदा बहुलनिषादस्थानका च गीतिरियम् ।**

**किञ्च**-पुनरन्यत्-अपरं गीतेः सदोषत्वमाह—

इयं गीतिः बहुलङ्घनं-उद्ग्राहितात् अधिकोच्चारणं यस्याः सा, तथा प्रयोगे-उच्चारणे प्रकाशिता-प्रकटिता मूर्छना- उत्तरमन्द्रादिका यस्यां सा, तथा बहुः-प्रचुरः कम्पः-अङ्गकृतं स्वरकृतं च चलनं यस्याः सा । केव ? ज्वरितेव-प्राप्तज्वरा स्त्रीव । सा किम्भूता ? बहुलं-घनं शोषणं यस्याः सा, तथा प्रकृष्टा योगाः-क्वाथादयो यस्याः सा, तथा प्रकाशिता मूर्छना-मोहो यया सा पश्चात् कर्मधारयः, तथा बहुः कम्पो यस्याः सा । पुनः किम्भूता इयं

---

१. अवकृष्टकं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गीतिः ? भैरवीप्रभृतयः षड्त्रिंशद्भाषास्तालाः-चञ्चत्पुटादयः बह्व्यो भाषा यस्यां सा, तथा बहवस्ताला यस्यां सा । केव ? उन्मत्तेव-क्षीबेव । किम्भूता उन्मत्ता ? बहु यत्तद्भाषत इति बहुभाषा, तथा बहुताला-बहवस्ताला यस्यां सा, उन्मत्ता हि बहु भाषते, बह्वीस्तालिकाश्च दत्त इति । तथा इयं गीतिः बहुः-घनो रागः-श्रीरागादिर्यस्यां सा, तथा बहुष्टक्वनामा रागो यस्यां सा । केव ? वेश्येव । किम्भूता सा ? बहुषु रागः-अभिलाषो अस्या इति बह्वासक्तिः, तथा बह्वीः-प्रभूताष्टक्वरा गच्छति-प्राप्नोतीति बहुटक्वरागा । टकशब्दोपलक्षिता क्रीडया कराहतिः टक्वरागमेः प्राप्त्यर्थाद् डः । पुनरियं गीतिः बहवः ककुभभेदाः-ध्वनिविशेषा यस्यां सा, तथा बहुलो निषादः स्वरविशेषः स्थानकं चं-मन्द्रमध्यतानलक्षणं यस्यां[१] सा । केव ? अटवीव । सा किम्भूता ? बहूनां ककुभानां-अर्जुनवृक्षाणां भेदा यस्यां सा, तथा बहुलो[२] निषादाश्च-शबराः स्थानकानि च-आलवालाः शिबिरसन्निवेशश्च बहुलानि निषादस्थानकानि यस्यां सा । एवं ज्वरितादि उपमानप्रतिपादितदोषा गीतिः कथंकारमिव दमयन्तीसमा ।

**तद्वरमिदमुच्यताम्—**

**तत्**-तस्माद् वरमिति मनागिष्टेऽव्ययम्, किञ्चित्प्रियमिदमुच्यताम्—

**वेदविद्योपमा देवी मनोहरपदक्रमा ।**
**उद्योतिता पुराणाङ्गमन्त्रब्राह्मणशिक्षया ॥ ५३ ॥**

**वेदेति** । देवी-दमयन्ती वेदविद्यया उपमीयते-समीक्रियते या सा वेदविद्योपमा । किम्भूता देवी ? मनोहरः पदक्रमः-पदन्यासो यस्याः सा । तथा पुराणं-जीर्णं अङ्गं-वपुर्येषां ते तेषां, तथा मन्त्रप्रधानब्राह्मणानां-पुरोधःप्रभृतीनां च शिक्षया-उपदेशेन उद्योतिता-लब्धप्रतिष्ठा । वेदविद्या तु पदक्रमाभ्यामधीयते अतो मनोहरौ पदक्रमौ-वाक्यानुक्रमौ यस्यां सा । तथा पुराणानां-मार्कण्डेयादीनां अङ्गानां-शिक्षाकल्पादीनां मन्त्रब्राह्मणस्य-ग्रन्थविशेषस्य शिक्षया-अभ्यासेन उद्योतिता भूषिता । अन्तःपुरे हि वृद्धा एव अधिक्रियन्ते । यदुक्तम्—

**"अशीतिकाश्च पुरुषाः पञ्चाशत्काश्च योषितः ।**
**बुध्येरन्नवरोधानां शौचमागारिकाश्च ये ॥"**

**"पदं स्थाने विभक्त्यन्ते शब्दे वाक्येऽङ्कवस्तुनोः ।**
**त्राणे पादे पादचिह्ने व्यवसायापदेशयोः ॥"** [२/२३२]

इत्य**नेकार्थः** ॥ ५३ ॥

---

१. यस्याः अनू. । २. बहुलो नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**किं त्वियमेकपथा, सा तु दृष्टशतपथा' इत्येवमनेकविधवक्रोक्तिविशेषैरभिनन्दयति दमयन्तीकिंनरमिथुने, भूतभूयिष्ठायां विभावर्याम्, सुरसङ्घ इवादृश्यमानमानुषे निशीथे, स्थगितवति भृङ्गभासि तमसि भुवनम्, अनन्तरमवसरपाठकः पपाठ ।**

**किन्तु**-परं इयं-दमयन्ती एक एव पन्थाः-त्वल्लक्षणो मार्गो यस्याः सा एकमार्गा, भवत्त्वेव प्रवर्तनात् तस्याः सा तु वेदविद्या[1] तु शतसंख्यानां पथां समाहारः शतपथं, दृष्टं शतपथं यया सा दृष्टशतपथा । पक्षे तु[2] दृष्टपथाख्यग्रन्थाः शतपथमिति[3] । "**ऋक्पूरब्धूः पथमानक्षे ।**" [पा. सू. ५/५/७५] इति अप्रत्ययः समासान्तः । पात्रादित्वात् स्त्रीत्वं न । इत्येवं-पूर्वोक्तप्रकारेण अनेकविधा-नानाविधा ये वक्रोक्तिविशेषास्तैः कृत्वा किन्नरमिथुने दमयन्तीमभिनन्दयति-स्तुवति सति । तथा विभावर्यां रात्रौ भूयिष्ठा-भूयसी भूता-अतिक्रान्ता या सा भूतभूयिष्ठा । **आहिताग्न्यादित्वात् [वाहिताग्न्यादिषु**, पा. सू. २/२/३७] निष्ठान्तस्य पूर्वनिपातः । एवम्विधायां सत्यां बह्व्यां गतायामित्यर्थः । तथा तमोऽतिशयात् अदृश्यमाणा-अनवेक्ष्यमाणा मानुषा यस्मिन् तथाविधे निशीथे-अर्द्धरात्रे सति । निशीथे कस्मिन्निव ? सुरसंघ इव-सुराणां समूहे इव । किम्भूते तस्मिन् ? स्वभावादेव अदृश्यमानमानुषे । तथा तमसि भुवनं-भूलोकं स्थगितवति आच्छादितवति सति । किम्भूते तमसि ? भृङ्गवन्नीला भाः-छविर्यस्य तत्तस्मिन् । अनन्तरं-पश्चादवसरपाठकः पपाठ ।

**'उपरम रमणीयात्किंनरद्वन्द्वगीता-**
**दभिभवति निशीथो[1] नाथ नेत्राणि पश्य ।**
**मदनवशविलोलल्लोचनाम्भोरुहाणां,**
**मिलतु[2] कुलवधूनां सेवको लोक एषः ॥ ५४ ॥**

**उपेति** ? हे नाथ-स्वामिन् ! रमणीयात् किन्नरद्वन्द्वगीताद्-किन्नरद्वन्द्वगीतश्रवणात् उपरम-निवर्त्तस्व, किन्नरद्वन्द्वगानान्निवर्तयेत्यर्थः । "**विभाषा कर्मकात्**" [पा. सू. १/३/८५] इति उपाद्रमः, परस्मैपदम् । हे नाथ ! त्वं पश्य, निशीथः-अर्द्धरात्रः प्रकरणात् सैनिकानां नेत्राणि अभिभवति-पराभवति, निद्रया नेत्राणि घूर्णन्त इत्यर्थः । एष प्रत्यक्षः सेवकः-अनुचरो लोकः मदनवशेन विलोलन्ति-कम्पमानानि लोचनाम्भोरुहाणि यासां एवम्विधानां कुलवधूनां मिलतु-संयुज्यताम् । मालिनी ॥ ५४ ॥

**अपि च—**

---

१. वेदविद्या २. तु नास्ति अनू. । ३-३. दृष्टशतपथाख्यग्रन्थाः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**शतगुणपरिपाट्या पर्यटन्नन्तराले,**
**कमलकुवलयानामर्धरात्रेऽप्यखिन्नः[१] ।**
**उपनदि दयितायाः क्वापि शब्दं निशम्य,**
**भ्रमति पुलिनपृष्ठे चक्रवच्चक्रवाकः ॥५५॥**

**अपि च**-पुनः

**शतेति** । हे देव ! अर्धरात्रे-निशीथे चक्रवाकः कमलानि च पद्मानि-सूर्यविकासीनि, कुवलयानि च-नीलोत्पलानि रात्रिविकासीनि तेषामन्तराले-मध्ये शतगुणा-शतसंख्या या परिपाटी-क्रमस्तया शतवारान् यावत् । अपिशब्दो भिन्नक्रमे, पर्यटन्-भ्रमन्नपि अखिन्नः सन् उपनदि-नदीसमीपे दयितायाः-चक्रवाक्याः क्वापि-कस्मिन्नपि प्रदेशे शब्दं निशम्य-श्रुत्वा पुलिनपृष्ठे-तीरप्रदेशे चक्रवद्भ्रम्यमाणः-कुलालोपकरणवद् भ्रमति । मालिनीवृत्तम् ॥ ५५ ॥

**अथ यथाप्रियं प्रेषित[२]परिजनो राजा रजनिशेषमतिवाहयितुमनुरूपं निरूप्य किंनरमिथुनस्य शयनमासन्ननिद्रागृहे[३] हंसीपिच्छच्छायाच्छप्रच्छद पटा[४]च्छादितहंसतूलतल्प[५]मभजत् ।**

**अथ**-अवसरपाठकोक्त्यनन्तरं यथाप्रियं प्रियं-इष्टं अनतिक्रम्य यथाप्रियं यस्य यदिष्टं स्थानं तस्मिन् प्रेषितः-प्रहितः परिजनः-सेवकलोको येन एवम्विधः सन् राजा रजनिशेषं-रात्रेरवशिष्टं भागं अतिवाहयितुं-लंघयितुं आसन्नं स्वसमीपवर्त्ति यन्निद्रागृहं-स्वापागारं तस्मिन्, हंसीपिच्छछायावत्-मरालीपक्षकान्तिवत् अच्छः-विशदो यः प्रच्छदपटः-उत्तरच्छदस्तेन आच्छादितं-आवृतं यद् हंसतूलतल्पं-हंसतूलीशय्या तत् अभजत्-शिश्राय । किं कृत्वा ? किन्नरमिथुनस्य अनुरूपं-योग्यं शयनं-शय्यां निरूप्य-कथयित्वा, यथाऽस्मिन् शयने यूयं शेध्वमिति ।

**तत्र च दमयन्त्यनुरक्तोऽयमितीर्ष्ययेवानायान्त्यां निद्रायां द्रोणीद्रुमान्तरालसुप्तोत्थितविविधविहंगरुतानि[६] विनिद्रवनदेवतापठ्यमानप्राभातिकपुण्यकीर्तनानीवाकर्णयन्ननेककालप्रणालिकापर्यायेण पर्यस्तेऽस्तगिरिमस्तके मुक्तास्तबकितनीलवितानपट इव तारातिमिरपटले, पट्टांशुकवैजयन्तीष्विव भविष्यति दिनकरोत्सवे[७] नभस्तलमलंकुर्वतीषु पूर्वस्या**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**दिशि प्रभातप्रभावल्लरीषु, वल्लकीक्वाणरमणीये श्रयति श्रवणपथमीषदुन्मिषत्कमलमुकुलमुखमुक्तमधुकरमन्द्रध्वनौ[८], ध्वस्तनिद्रेण प्रभातोचितभिन्नषड्जानुविद्धशुद्धभाषामालपतानेन[९] किंनरमिथुनेन गीयमानमिमं श्लोकमशृणोत् ।**

**तत्र च**-हंसतूलतल्पे निद्रायां अनायान्त्यां-अनागच्छन्त्यां सत्याम् । उत्प्रेक्ष्यते,दमयन्त्यामनुरक्तो यो[१] रागी अयमिति ईर्ष्यया इव-असूयया इव । अन्यापि कान्ता अन्यस्यां अयं पतिरनुरक्त इति ज्ञात्वा नायात्येव तथाऽस्यामपि । द्रोण्यां द्रुमाः द्रोणीद्रुमास्तेषां अन्तरालानि-मध्यानि तेषु मध्ये-निम्नःप्रान्तयोश्चोन्नतस्तरुराजिविराजितो नौसदृशः, पर्वतादिभूभागो द्रोणीः । यदाह-**मुकुटताडितक**[२]**नाटके बाणः**-

**"आशाप्रोज्झित दिग्गजा इव गुहाः प्रध्वस्तसिंहा इव,**
**द्रोण्यः कृत्तमहाद्रुमा इव भुवः प्रोत्खातशैला इव ।**
**बिभ्राणाः क्षयकालरिक्तसकलत्रैलोक्यकष्टां दशां,**
**जाताः क्षीणमहारथाः कुरुपतेर्देवस्य शून्याः सभाः ।"** [ ]

पूर्वं सुप्ताः पश्चादुत्थिताः सुप्तोत्थिता विविधाः-अनेकप्रकारा ये विहङ्गास्तेषां रुतानि-शब्दान् आकर्णयन् सन् नलः एवमेवं जायमाने सति । ध्वस्ता गता निद्रा यस्य तत्तेन, तथा प्रभातस्य उचिता-योग्या[३] भिन्नः-प्रकटीभूतो यः षड्जः-स्वरविशेषस्तेन अनुविद्धा व्याप्ता शुद्धा-श्लेष्मादिवैगुण्यरहिता या भाषा तां आलपता अनेन किन्नरमिथुनेन गीयमानं-रागवत् स्वरेण उच्चार्यमाणं इमं श्लोकं-पद्यं अशृणोत्-शुश्राव । विहङ्गरुतानि कानीव ? उत्प्रेक्ष्यते, विनिद्रा-जागरिता या वनदेवतास्ताभिः पठ्यमानानि-गीयमानानि प्राभातिकानि-प्रभातसमयसम्बन्धीनि पुण्यकीर्त्तनानि-पुण्यवतां यशांसि तानीव कीर्त्तनं-कीर्त्तिः। मन्ये, विहगा न कूजन्ति किन्तु वनदेवता एव प्रातःकालीनमङ्गलानि गायन्तीति। प्रभाते भवानि प्राभातिकानि **"कालाट्ठञ्"** [पा. सू. ४/३/११] इति ठञ्[४] । क्व सति ? ताराणां तिमिराणां च यत्पटलं-वृन्दं तस्मिन्, अस्तगिरेः-अस्ताचलस्य मस्तके-शिरसि पर्यस्ते-परिक्षिप्ते सति । केन ? अनेका याः कालप्रणालिकास्तासां यः पर्यायः-क्रमस्तेन, यया प्रणालिकया काल इयानिति ज्ञायते सा कालप्रणालिका-ताम्रमयघटिकादिका, अथवा प्रकृष्टा नाडिकैव, **"डलयोरैक्ये"** [ ] प्रणालिका-नाडिका कालविशेषः । तथा च-

**"स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसु-**
**र्जाता रात्रिरियं जिता कमलया देवीप्रसादाद्य च ।**

---

१. अयं अनू. । २. मुकुटताडित॰ अनू. । ३. उचितो योग्यो अनू. । ४. अध्यात्मादित्वात् ठञ् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इत्यन्तःपुरसुन्दरी प्रति मया विज्ञाय विज्ञापितो,**
**देवेन प्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाडिकाः ॥''** [दशरूपकटीका २/७]

अन्यदपि प्रणालिकया-जलपद्धत्या परिक्षिप्यत एव । तारातिमिरपटले कस्मिन्निव ? उत्प्रेक्ष्यते, मुक्ताभिः स्तबकितः-कर्बुरितो नीलः-कृष्णो यो वितानपटः-उल्लोचवासस्त-स्मिन्निव । शङ्के, अस्तगिरिशिरसि इदं तारातिमिरपटलपरिक्षिप्तं[१] नास्ति, किन्तु मुक्ताखचितं नीलवितानवास इति । ताराणां मुक्तास्तिमिरपटलस्य नीलवितानपट उपमा । पुनः कासु सतीषु ? पूर्वस्यां दिशि प्रभातप्रभावल्लरीषु नभस्तलं-आकाशमलङ्कुर्वतीषु सतीषु । उत्प्रेक्ष्यते, भविष्यति उत्पत्स्यमाने दिनकरस्य उत्सवे-महे पट्टांशुकस्य-रक्तपट्टकूलवाससो वैजयन्तीष्विव-पताकाष्विव । अन्यस्मिन्नपि उत्सवे क्रियमाणे रक्ताः पताका बध्यन्ते एव तथाऽत्रापि । पुनः क्व सति ? ईषन्-मनाक् अद्यापि सूर्यस्यानुद्गतत्वात् उन्मिषन्ति-विकसन्ति यानि कमलमुकुलानि-पद्मकुड्मलानि तेषां मुखेभ्यो मुक्ता ये मधुकरास्तेषां मन्द्रध्वनौ-गम्भीरझङ्काररवे श्रवणपथं श्रयति सति-श्रूयमाणे सति । किम्भूते मधुकर-मन्द्रध्वनौ ? वल्लक्याः-वीणाया यः क्वाणः-रणस्तद्वद् रमणीये-रम्ये ।

अथ यं श्लोकं शुश्राव तमाह–

**धुतरजनिविरामोन्मीलदम्भोजराजि-**
**स्तनुतुहिनतुषारानुद्गिरन्गान्धवाहः ।**
**कलितकलभकुम्भभ्रान्तिषूद्घाटितेषु,**
**स्खलति निधुवनान्तश्रान्तकान्ताकुचेषु ॥ ५६ ॥**

**धुतेति** । गन्धवाहः-वायुः उद्घाटितेषु-कञ्चुकरहितेषु निधुवनान्ते-सुरतावसाने श्रान्ताः-खिन्नाः याः कान्ताः-रमण्यस्तासां कुचेषु स्खलति-प्रतिघातं प्राप्नोति । अनेन मान्द्योक्तिः । किम्भूतेषु कुचेषु ? कलिता-कृता कलभकुम्भस्य-करिपोतमस्तकस्य भ्रान्तिः-सन्देहो यैस्ते तेषु । किम्भूतो गन्धवाहः ? धुता-कम्पिता रजनिविरामे-रात्रिनिवृत्तौ उन्मीलन्ती-विकसन्ती अम्भोजराजिः-पद्मपंक्तिर्येन सः । अनेन सौगन्ध्योक्तिः । तथा तनवः-सूक्ष्मा ये तुहिनतुषाराः-हिमकणास्तान् उद्गिरन्-मुञ्चन् । अनेन शैत्योक्तिः । तथा च वायोः शीतो मन्दः सुरभिश्चेति पुण्यत्रय[२]विशिष्टत्वं ध्वनितम् । मालिनी ॥ ५६ ॥

**तदनु पुनःप्रभातप्रहर[१]प्रयाणभेरीरवविनिद्रितस्य संपूरयतः[२] समविषम-वनविभागानुत्कल्लोलजलनिधेरिव चलतः सैन्यसमूहस्य कलकलमा-**

---

१. पटलं अनु. । २. गुणत्रय॰ अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कर्णयन्नुत्थाय कृतोचिताचारश्चारुपुष्पचर्चित[१]चन्द्रचूडचरणश्चटुलखुरचार-प्रचारितेना[२]डम्बरितताण्डवस्य खण्डपरशोः पदलीलामिवाभ्यस्यता स्फुरद्घुरघुरायमाणघोणाग्रस्खलत्खलीनवशाविगलितबहललालाजलप्लवेन[३] वनभुवि फेनिलजलनिधिमिवाकारयता जात्यतरतुरगसैन्येन परिवृतः पूर्वप्रस्थान-स्थित्या प्रतस्थे ।**

**तदनु**-पश्चात् पुनः-भूयः चलतः सैन्यसमूहस्य कलकलं कोलाहलं-आकर्षयन्-शृण्वन् सन् उत्थाय-शय्यात उत्थानं विधाय कृत उचित आचारः-प्राभातिक-शौचादिर्येन एवम्विधो नलः जात्यतराः-अतिशयेन सुन्दरा ये तुरगाः-अश्वास्तेषां सैन्येन परिवृतः-सहितः पूर्वप्रस्थानस्य या स्थितिः-मर्यादा तया, यथा पूर्वं-पूर्वदिनेषु प्रस्थितं तयैव स्थित्या प्रतस्थे-प्रचचाल । किम्भूतस्य सैन्यसमूहस्य ? प्रभातप्रहरे प्रयाणभेर्याः-प्रस्थानदुन्दुभेर्यो रवस्तेन विनिद्रितस्य-जागरितस्य । तथा समाश्च-अनिम्नोन्नता विषमाश्च-निम्नोन्नता ये वनविभागाः-काननप्रदेशास्तान् सम्पूरयतः-व्याप्नुवतः । कस्येव ? ऊर्ध्वं कल्लोला यस्य एवम्विधो जलनिधिः-अब्धिस्तस्येव । यथोद्वीचीः समुद्रः समविषमवनविभागान् सम्पूरयति तथाऽस्यापि । किम्भूतो नलः ? चारु यथा स्यात्तथा पुष्पैः-कुसुमैश्चर्चितौ-पूजितौ चन्द्रचूडस्य- शम्भोश्चरणौ येन सः । किम्भूतेन जात्यतरतुरंगसैन्येन ? चटुलः-चञ्चलः खुरैः कृत्वा यश्चारः-प्रगल्भपदन्यासस्तेन प्रचरति-प्रकर्षेण गच्छतीत्येवंशीलं चटुलखुरचार-प्रचारितेन । उत्प्रेक्ष्यते, आडम्बरितं आरब्धं ताण्डवं-नृत्यविशेषो येन एवम्विधस्य खण्डपरशोः-शम्भोः पादलीलां-चरणन्यासं अभ्यस्यता इव-शिक्षमाणेनेव । प्रकृत्यैव अश्वैश्चटुलतया गम्यते । तत्रोत्प्रेक्ष्यते, किमु नर्त्तनप्रवृत्तस्य हरस्य एभिः पादलीला शिक्ष्यत इति । पुनः किम्भूतेन ? स्फुरत्-प्रचलत् घुरघुरायमाणं-शब्दविशेषं कुर्वाणं यत् घोणाग्रं-नासाग्रं तत्र स्खलत्-स्खलनां प्राप्नुवत् यत् खलीनं-कविका तद्वशेन विगलितं-क्षरितं यत् बहलं-घनं लालाजलं तस्य प्लवः-पूरो यस्य तत्तेन । उत्प्रेक्ष्यते, वनभुवि-वनभूमौ फेनिलः-फेनवान् यो जलनिधिस्तं आकारयता इव-आह्वयतेव । शङ्के, अश्वानां अमूनि लालाजलानि न, किन्तु फेनिलोऽयं जलनिधिराहूत इति । फेनिलेति "**फेनादिलच्च**" [पा. सू. ५./२/९९] इति इलच् ।

**स्थपुटस्थलीस्थितं स्थूलमेकमव्यग्रमग्रे[४] गजग्रामण्यमवलोक्य पुष्कराक्षमभाषत ।**

**ततः** स्थपुटस्थल्यां-विषमोन्नतभूमिप्रदेशे स्थितं स्थूलं-मांसलं एकं-अद्वितीयं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अव्यग्रं-अव्याकुलं अग्रे-पुरो गजग्रामण्यं-मुख्यं गजमवलोक्य पुष्कराक्षमभाषत ।

**भद्र–**

**सालानकमनालानमत्युन्नतमनुन्नुतम् ।**
**दन्तवन्तमदन्तं च पश्यैनमगजं गजम् ॥ ५७ ॥**

हे **भद्र** !-पुष्कराक्ष !

**सालेति** । एवं[1] प्रत्यक्षं गजं पश्य । किम्भूतम् ? अलीनां समूह आलं तदेव प्रत्यायकत्वात् आनकः-पटहस्तेन सह-युक्तं सालानकं, मदविधुरे हि गजे भृङ्गाः समीपी भवन्ति तेन च मत्तो ज्ञायत इति भावः । तथा अनालानं-वन्यत्वात् निरर्गलनस्तम्भं । तथा अत्युन्नतं-अतीवोन्नतं उच्चं । तथा नास्ति नुन्नता-प्रेरणा यस्य स तं, स्वच्छन्दचरमित्यर्थः । यदि वा अनुन्नेति आमन्त्रणं तमिति गजविशेषणम् । तथा दन्तवन्तं-दन्तुरं । तथा अदन्तं-तृणादिकमश्नन्तं । तथा अगजं-गिरिजं । अथवा सालान्-तरून् अदन्तं, तथा अकं-अकुत्सितं सर्वलक्षणपरिपूर्णं तच्चे उच्चैः कुम्भ इत्यादिना वक्ष्यति ॥ ५७ ॥

**अयं हि मन्मथविलासेषु परं वैदग्ध्यमवलम्बते ।**

अयं हि गजो मन्मथविलासेषु-सुरतक्रीडासु परं-उत्कृष्टं वैदग्ध्यं-चातुर्यं अवलम्बते-आश्रयति ।

**तथाहि–**

तथाहीति । सुरतकेलिवैदग्ध्यमेवाह–

**मृदुकरपरिरम्भारम्भरोमाञ्चितायाः,**
**सरसकिसलयाग्रग्रासशेषार्पणेन ।**
**मदमुकुलितचक्षुश्चाटुकारी करीन्द्रः,**
**शिथिलयति रिरंसुः केलिकोपं प्रियायाः ॥५८॥**

**मृद्वीति** । रन्तुं-क्रीडितुमिच्छुः रिरंसुः करीन्द्रः प्रियायाः-हस्तिन्याः सरसानि-स्निग्धानि यानि किसलयाग्राणि-पल्लवप्रान्तास्तेषां यो ग्रासः-कवलस्तस्य यः शेषः-अवशिष्टो भागस्तस्य अर्पणेन-दानेन केलौ-क्रीडायां यः कोपस्तं शिथिलयति-मन्दीकरोति, एतां अनुनयतीत्यर्थः । किम्भूतायाः प्रियायाः ? मृदुः-सुकुमारो यः करः-हस्तस्तेन यः

१. एनं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परिरम्भः-आश्लेषस्तस्य या आरम्भः-उपक्रमस्तेन रोमाञ्चितायाः-पुलकितायाः । किम्भूतः करीन्द्रः । मदेन मुकुलिते-संकुचिते चक्षुषी यस्य सः, तथा चाटुप्रियवाक्यं करोतीत्ये-वंशीलश्चाटुकारी । मालिनी ॥ ५८ ॥

**अपि च–**

**उपनयति करे करेणुकायाः किसलयभङ्गमनङ्गसङ्गताङ्गः ।**
**स्पृशति च चलदक्षिपक्ष्मलेखं मुखमखरेण करेण रेणुदिग्धम् ॥५९॥**

**अपि** च-पुनर्मन्मथलीलामेव दर्शयति-

**उपेति** । अयं अनङ्गेन-कामेन सङ्गतं-अन्वितं अङ्गं-देहो यस्य स एवम्विधो गजेन्द्रः करेणुकायाः करे-शुण्डायां किसलयभङ्गं- पल्लवखण्डं उपनयति-उपढौकयति ददातीत्यर्थः। च-पुनः करेणुकाया मुखं अखरेण-सुकुमारेण करेण-शुण्डया स्पृशति-आमृशति । किम्भूतं मुखम् ? चलन्ती-स्फुरन्ती अक्ष्णोः पक्ष्मरेखा-नेत्ररोमराजिर्यस्मिंस्तत् । "**लेखा स्यात् पंक्तिरेखयोः**" [२/२५ **इत्यनेकार्थः**] तथा रेणुना-पांशुना दिग्धं लिप्तम् ॥ ५९ ॥

**अथवा विवेकपूर्वव्यवहारविचारेष्वमी मानुषेभ्यः स्तोकमेवावहीयन्ते ।**

**अथवे**ति-पक्षान्तरे पूर्वमाश्चर्यपक्षः, सम्प्रत्येषां व्यवहारेषु ईषत् मनुष्येभ्यो हीनत्वात् घटत एवेदमिति दर्शयति–

विवेकपूर्वेति । विवेकपूर्वाः-चातुर्यसहिता ये व्यवहारविचाराः-मन्मथव्यापार-विलासास्तेषु अमी गजा मानुषेभ्यः स्तोकमेव-अल्पमेव अवहीयन्ते-न्यूनीभवन्ति, बाहुल्येन मनुष्यसमाना एव भवन्तीत्यर्थः । "**कर्म कर्त्तरि यक्**" [ ] ।

**तथाहि–**

**तथा**हीति । मनुष्यसमत्वमेव वक्ति

**श्रूयते पुराणादौ[१] पुरा[२] किल नारायणनाभ्यम्भोरुहकुहर-कुटी[३]मधिशयानस्य वेदविद्यां निगदतो भगवतः पितामहस्य बृहद्रथन्तरविकीर्ण-भासमानानि[४] सामानि गायतः सामस्तोभरसनिष्यन्दादुदपद्यन्तैरावतसु-प्रतीककुमुदवामनाञ्जनप्रभृतयोऽष्टौ दिग्गजेन्द्राः ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तेभ्योऽभवन्भद्रमन्द[१]मृगसंकीर्णजातयो गिरिचरनदीचरोभयचारिणः करिणः ।**

**प्रसिद्धं चैतत् । 'सामजा गजाः' इति ।**

किलेति । पुराणादौ श्रूयते—पुरा-पूर्वं नारायणस्य यन्नाभ्यम्भोरुहं-नाभिपद्मं तस्य यत् कुहरं-रन्ध्रं तदेव कुटी-गृहं तां अधिशयानस्य-आश्रितस्य वेदविद्यां निगदतः-कथयतो भगवतः पितामहस्य-विधेः बृहद् ? रथन्तर २ विकीर्ण ३ भासमानानि ४ चत्वारि सामानि गायतः सतः सामनि स्तोभ- आसक्तिस्तमाद् रसस्य-स्वेदस्य यो निःष्यन्दः-श्रावस्तस्मात् ऐरावत १ सुप्रतीक २ कुमुद ३ वामना-४ ञ्जनाः ५ प्रभृतौ आदौ येषां ते एवम्विधाः । प्रभृतिशब्दात् पुण्डरीक[६]-पुष्पदन्त[७]-सार्वभूमाख्या[८] अष्टौ दिग्गजेन्द्रा उदपद्यन्त-उत्पन्नाः ।

तेभ्यः दिग्गजेन्द्रेभ्यो भद्र १ मन्द २ मृग ३ संकीर्ण ४ जातयः- भद्रजातयो मन्दजातयो मृगजातयः-संकीर्णजातयश्च । गिरिचरा नदीचरा उभयचारिणश्च गिरिनदीचराः पश्चात् द्वन्द्व एवम्विधाः करिणो अभवत् । एतावता ब्रह्मप्रस्वेदजातत्वादेषां मनुष्य-समत्वमितिः भावः ।

**प्रसिद्धं** च-विख्यातं चैतत् साम्नो जायन्त इति सामजा गजा इति ।

**केचित्पुनरन्यथा कथयन्ति—**

**केचित्** पुनरन्यथा कथयन्ति—

**किल सकलसुरासुरकरपरिघ[२]परिवर्त्यमानमन्दरमन्थानमथित-दुग्धाम्भोनिधेरजनि जनितजगद्विस्मयो लक्ष्मीमृगाङ्कसुरभिसुरद्रुमधन्वन्तरि[३]कौस्तुभोश्चैःश्रवसां सहभूः शशधरकरकान्तिरैरावतः । तत्प्रसूति-रियमशेषवनान्यलंकरोतीति ।**

**तदेष भद्रजातिर्भविष्यति ।**

**किलेति** वार्त्तायाम् । सकलसुरासुराणां करपरिघेण-पाण्यर्गलेन परिवर्त्यमानो-भ्रम्यमाणो यो मन्दर एव-मेरुरेव मन्थानः-मन्थदण्डकस्तेन मथितो यो दुग्धाम्भोनिधिः-क्षीराब्धिस्तस्मात् लक्ष्मीश्च मृगाङ्कश्च-चन्द्रः सुरभिश्च-कामधेनुः सुरद्रुमश्च-कल्पतरुः धन्वन्तरिश्च-वैद्यमुख्यः कौस्तुभश्च-मणिविशेषः उच्चैःश्रवाश्च-इन्द्रहयस्तेषां सहभूः-सोदरः शशधरकरवत् कान्तिः-छविर्यस्य एवम्विध ऐरावतो अजनि-जातः । यथा ते लक्ष्म्यादयो-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ऽब्धेरुत्पन्नास्तथाऽयमपि । किम्भूत ऐरावतः ? जनितो जगति विस्मयः-आश्चर्यं येन सः । तस्य-ऐरावतस्य प्रसूतिः-सन्तानः तत्प्रसूतिरियं अशेषवनानि अलङ्करोति । इमे ये करिणो दृश्यंते ते सर्वेपि ऐरावताज्जाता इति ।

**तत्** तस्मात् एष हस्ती भद्रजातिर्भविष्यति ।

**तथाहि—**

**उच्चैःकुम्भः कपिशदशनो बन्धुरस्कन्धसंधिः,**
**स्निग्धाताम्रद्युतिनखमणिर्लम्बवृत्तोरुहस्तः ।**
**शूरः सप्तच्छदपरिमलस्पर्धिदानोदकोऽयं,**
**भद्रः सान्द्रद्रुमगिरिसरित्तीरचारी करीन्द्रः ॥ ६० ॥**

**तथाहीति** । भद्रजातेर्लक्षणान्येवाह—

**उच्चै**रिति । अयं प्रत्यक्षः करीन्द्रो भद्रः-भद्रजातीयः । किम्भूतः ? उच्चैः-उन्नतौ कुम्भौ-शिरःपिण्डौ यस्य सः, तथा कपिशौ-पिशङ्गौ दशनौ-दन्तौ यस्य सः ।★तथा बन्धुरः-मांसलः स्कन्धयोः सन्धिः-श्लेषो यस्य सः★। तथा स्निग्धा-चकचकायमाना आताम्रा-ईषद्रक्ता द्युतिः-कान्तिर्येषामेवम्विधा नखमणयः-नख एव मणयो । यस्य सः । तथा लम्बः- प्रलम्बो वृत्तः-वर्तुलः उरुः-पृथुलो हस्तः-करो यस्य सः । तथा शूरः-रणकर्मणि कुशलः । तथा सप्तच्छदस्य परिमलं-आमोदं स्पर्द्धते-संहृष्यतीत्येवंशीलं दानोदकं-मदजलं यस्य सः । तथा सान्द्राः-निबिडाः द्रुमा यत्र एवम्विधं यत् गिरिसरित्तीरं-शैलशैवलिनीतटं तस्मिन् चरति-विहरतीत्येवंशीलम् ॥ ६० ॥

**तन्मुच्यतामयम्[१], अनुरागिणोर्दम्पत्योः क्रीडारसविघातः कृतो न श्रेयान् इत्यभिधाय, हृतहृदयः[२], स्वैरं रममाणमृगमिथुन[३]विलासैरुच्छ्वसितपुलकः[४] कुसुमितकाननानिलैरुत्कम्प्यमानः, झरन्निर्ज्झरोपान्तपादपतलचलत्केलिकिलकेकिकेकारवैर्विनोद्यमानः समीपचरसेवक[५]सुभाषितैश्च, सममसमं च, निम्नगात्रमनिम्नगात्रं च ग्रावविषममग्रावविषमं[६] च, सश्वापदमश्वापदं च, सपादपमपादपं च, विन्ध्यस्कन्धमुल्लङ्घ्य, 'देव, विलोक्यतामिह विषमविषाणि पन्नगकुलानि द्रोणीगहनं च, इह शरासनकरम्बाणि वनानि पापर्द्धिपरं[७] पुलिन्दवृन्दं च, इह बहुसुखानि**

---

★–★ चिह्नान्तर्गतपाठो नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**शबरद्वन्द्वानि रत्नाकरस्थलं च, इह सुमधुराणि फलानि कीचकवनं च, इहामोदितविश्वककुम्भि कुसुमानि सरित्तीरं च, इह सत्प्रभावन्ध्यानि दवदग्धारण्यानि मुनिमण्डलं च' इति विविधवनप्रदेशान्दर्शयतः पुष्कराक्षस्य विचित्रवचनोक्तीर्भावयन् क्रमेणातिक्रम्य शिखरपरम्परां[८] परैरसह्यः सह्या-चलमवततार ।**

अनुरागिणोः-परस्परं स्नेहवतोर्दम्पत्योः-जायाभर्त्रोः क्रीडारसस्य-मन्मथकेल्यासक्ते-र्विघातः कृतो न श्रेयान्-न श्रेष्ठस्तत् तस्मात् अयं गजेन्द्रो मुच्यताम् इत्यभिधाय-उक्त्वा करुणया हृतं हृदयं-चेतो यस्य सः हृष्टमनाः स्वैरं-स्वेच्छया रममाणानि यानि मृगमिथुनानि-हरिणहरिणीरूपयुग्मानि तेषां ये विलासाः-चेष्टितानि तैः, उच्छ्वासिताः-उच्चैःकृता पुलकाः-रोमाञ्चा यस्य सः, तथा कुसुमितानि-पुष्पितानि यानि काननानि तेषां ये अनिलाः-वातास्तैरुत्कम्प्यमानः-दमयन्तीं प्रत्युत्कण्ठां प्राप्यमाणः । तथा झरन्तः-स्रवन्तो ये निर्झराः-स्रवास्तेषामुपान्ते-समीपे ये पादपाः-तरवस्तेषां तलेषु-अधोभागेषु चलतां केलिकिलानां-केकानुकारप्रवृत्तानां केकिनां कैकारवैर्विनोद्यमानः-कुतूहलं प्राप्यमाणः । केलये किलति-क्रीडतीति केलिकिलः **"नाम्युपधात्के"**[१] [ ]क्रीडापात्रम् । यद्वा, किलतीति केलिकिलः **"बहुलं गुणवृद्धी चादेः"** [ ] इति धातोः किल् अः स्वरूपे च द्वे रूपे पूर्वस्य इः यथादर्शनं च गुणवृद्धी । च-पुनः समीपचराः-निकटगामिनो ये सेवकाः-अनुचरास्तेषां सुभाषितैः-सूक्तैर्विनोद्यमानो नल ईदृशं विन्ध्यस्कन्धं उल्लंघ्य-अतिक्रम्य इति-अमुना प्रकारेण विविधान् वनप्रदेशान्-काननोद्देशान् दर्शयतः, पुष्कराक्षस्य विचित्रा विविधा[२] वचनोक्तीः-वक्रोक्तीर्भावयन्-मनसि आकलयन् सन् क्रमेण गमनपरिपाट्या शिखरिपरम्परां-तदन्तरालवर्तिगिरिश्रेणिं अतिक्रम्य सह्याचलं अवततार-जगाम । किम्भूतो नलः ? परैः-शत्रुभिरसह्यः-प्रतापातिशयात् सोढुमशक्यः । किम्भूतं विन्ध्यस्कन्धम् ? सह मया-श्रिया वर्तत इति समस्तं-सश्रीकं, तथा असमं-विषमं न समोऽस्येति कृत्वा उत्कृष्टं वा। तथा निम्नगा-नदीस्त्रायत इति के निम्नगात्रस्तं, तथा अनिम्नं-उच्चगात्रं-मूर्त्तिर्यस्य स तम् । तथा ग्रावभिः-दृषद्भिर्विषमं-दुःसञ्चारं, तथा अग्रे-शिखरे अविषमं-समम् । तथा सह श्वापदैः-हिंस्रपशुभिर्वर्तत इति सश्वापदस्तं तथा, अश्वानां अपदं-अभूमिः, समनिर्जलो हि देशाऽश्वीयः, अयं च ग्रावविषमो निम्नगाधारश्च । तथा सह पादपैः-वृक्षैर्वर्तत इति सपादपस्तं, तथा अपादान्गूढपदः पातीत्यपादपस्तं, शून्ये हि सर्पादिप्राचुर्यम् । अथवा अतिवैषम्यात् सञ्चरतां पादान् न पातीत्यपादपं । सर्वतः चशब्दो विरोधार्थः । स च तुल्यार्थे व्याख्येयः । तद्यथा- यः समो भवति स असमः कथं स्यात् ? तथा यो निम्नगात्रः स

★ 'नाम्युपान्त्यप्रीकृगृज्ञः कः' इति सूत्रेण । १. विविधा नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनिम्नगात्रः कथं भवे[१]दित्यादिस्पष्टमेव । इतीति किम् ? हे देव!-राजन्! भवता विलोक्यतां-वीक्ष्यताम् । विलोकनीयमेवाह—इह-वनप्रदेशे पन्नगकुलानि द्रोणीगहनं च-शैलसन्धिगह्वरं सन्तीति अध्याह्रियते, एवमग्रेपि । किम्भूतानि पन्नगकुलानि ? विषमं-उग्रं विषं येषु तानि विषमविषाणी । किम्भूतं तत् ? विषमा- विषाणि नोदन्तिनः-शृङ्गिणो वा शबरादयो यत्र तत् । तथा हे देव ! विलोक्यतां इह-प्रदेशे वनानि पापर्द्धिः-मृगया तस्यां परं-तत्परं पुलिन्दानां वृन्दं च । किम्भूतानि वनानि ? शरेण-मुञ्जेन अशनेन च-बीजकवृक्षेण करम्बाणि-शबलानि । किम्भूतं पुलिन्दवृन्दम् ? शरासनं-धनुः करे यस्य तत्, तथा बाणाः सन्त्यस्येति बाणि-सशरं । तथा हे देव ! विलोक्याताम्-इह-प्रदेशे शबरद्वन्द्वानि-पुलिन्द- मिथुनानि रत्नाकरस्थलं च । किम्भूतानि, शबरद्वन्द्वानि ? बहु-प्रचुरं सुखं येषां तानि बहुसुखानि । किम्भूतं रत्नाकरस्थलम् ? बहु-विपुलं तथा सुष्ठु खानिः-आकरो यत्र तत् । बहुशब्दो वैपुल्येपि । तथा हे देव ! विलोक्यतां-इह-प्रदेशे फलानि कीचकवनं-सच्छिद्रवंशवनं च । किम्भूतानि फलानि[२] ? सुष्ठु मधुराणि-मृष्टानि । किम्भूतं कीचकवनम् ? सुष्ठु मधुः-क्षौद्रं यत्र तत् सुमधु, तथा रणत्यवश्यं राणि सच्छिद्रा हि वंशा वायुवशात् रणन्तीति । तथा हे देव ! विलोक्यतां इह-प्रदेशे कुसुमानि-पुष्पाणि सरित्तीरं च । किम्भूतानि कुसुमानि ? आमोदिताः-सुरभिता विश्वाः-सर्वाः ककुभः-दिशो यैस्तानि । किम्भूतं सरित्तीरम् ? आमोदिता-हर्षिता वयः-पक्षिणः श्वकाः-शुनः प्रतिकृतयो-वृकाः कुम्भिनश्च-गजा यत्र तत् । आमोदो हर्षे, **यद्विश्वप्रकाशः-"आमोदो गन्धहर्षयोः"** [दान्त. १९] । यदा तु विश्वा-शुण्ठी कुम्भी च-वल्लीविशेषः, तदा बहुव्रीहौ **"शेषाद्वा"** [पा. सू. ५/४/१५४] इति को दुर्निवारः, सादृश्यवृत्तेः संज्ञाप्रतिकृत्योः इति शुनः कः । तथा हे देव! विलोक्यतां— इह-प्रदेशे दवेन-दावाग्निना दग्धानि अरण्यानि मुनिमण्डलं च । किम्भूतानि दवदग्धारण्यानि ? सती-शोभना प्रभा-कान्तिस्तया वन्ध्या-रहितानि । किम्भूतं मुनिमण्डलम् ? सत्-प्रधानः प्रभावः-माहात्म्यं यस्य तत्, तथा ध्यानमस्यास्तीति ध्यानि ।

अथ नृपतिर्यदकार्षीत्तदाह—

**रमणीयतया स्निग्धतया च पुनः परिवर्तितमुखं विलोक्य विन्ध्यदक्षिणमेखलाशिखरश्रेणीपादपान् पुष्कराक्षमभाषत ।**

**'भद्र, दुस्त्यजाः खल्वमी विन्ध्यतटीतरवः ।**

**रमणीयतया**-रम्यतया स्निग्धतया च-सच्छायतया च विन्ध्यस्य दक्षिणमेखला-शिखरश्रेणिषु ये पादपास्तान् प्रति पुनः पुनः-भूयो भूयः परिवर्तितं-पश्चान्मुखीकृतं मुखं येन

---

१. स्यात् अनू. । २. वनानि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवम्विधं पुष्कराक्षमवलोक्य नलः अभाषत-अवोचत् । मुखस्य परिवर्तने तरूणां रम्यत्वं स्निग्धत्वं च हेतुः ।

अथ यदभाषत तदाह—

हे **भद्र** !-पुष्कराक्ष ! खलुः-वाक्यालङ्कारे, अमी विन्ध्यतटीतरवः-विन्ध्याचलतीरतरवो दुस्त्यजाः-दुःखेन त्याज्याः ।

**तथाहि—**

**आवासाः कुसुमायुधस्य शबरीसंकेतलीलागृहाः,**
**पुष्पामोदमिलन्मधुव्रतवधूझङ्काररुद्धाध्वगाः ।**
**सुस्निग्धाः प्रियबन्धवा[1] इव दृशो दूरीभवन्तश्चिरात्-**
**कस्यैते न दहन्ति हन्त हृदयं विन्ध्याचलस्य द्रुमाः ॥६१॥**

**तथाही**ति । विन्ध्यतरूणां दुस्त्यजत्वमेवाह—

**आवासा** इति । हन्त इति खेदे । एते विन्ध्याचलस्य द्रुमा दृशो दूरीभवन्तः सन्तः चिरात्-चिरकालं कस्य हृदयं-चेतो न दहन्ति-न दुन्वन्ति ? अपितु सर्वस्यापि । द्रुमाः के इव ? सुस्निग्धाः सुष्ठु स्नेहलाः प्रियबान्धवा इव-इष्टस्वजना इव । यथा सुस्निग्धाः प्रियबान्धवा नेत्राद् दूरीभवन्तो हृदयं दहन्ति तथा अमी अपि । बन्धुरेव बान्धवः **प्रज्ञादित्वात् णः [ प्रज्ञादिभ्यश्च**, पा. सू. ५/४/३८ ] यतः किम्भूताः द्रुमाः ? कुसुमायुधस्य-कामस्य आवासाः-गृहाः । यथा गृहेषु सुखेन स्थीयते तथाऽत्रापि कामः सुखेन तिष्ठतीति भावः । तथा शबरीणां, संकेतस्य-संगरस्य लीलागृह इव ये ते । शबर्यो लीलागृहेष्विव अत्र संकेतं कुर्वन्तीति भावः । तथा पुष्पामोदेन-कुसुमसौरभ्येण मिलन्त्यः-पुञ्जीभवन्त्यो या मधुव्रतवध्वस्तासां झङ्कारेण रुद्धा-माधुर्यरसादन्यत्रगमनान्निवारिता । अध्वगाः-पान्था येषु ते, मधुकरमधुरध्वानश्रवणरसादध्वगास्तत्रैव तिष्ठन्तीति भावः । एभिर्विशेषणैस्तेषां दुस्त्यजत्वमुक्तम् । शार्दूलविक्रीडितम् ॥ ६१ ॥

**अपि च—**

**भ्राम्यद्भृङ्गभरावनम्रकुसुमश्च्योतन्मधूद्गन्धिषु,**
**च्छायावत्सु तलेषु[2] पान्थनिचया विश्रम्य[3] गेहेष्विव ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[१]निर्यन्निर्झरवारिवारिततृष[२]स्तृप्यन्ति येषां फलै-**
**स्ते नन्दन्तु फलन्तु यान्तु च परामभ्युन्नतिं पादपाः ॥ ६२ ॥**

**अपि च**-पुनः पादपानां दुस्त्यजत्वमेवाह–

**भ्राम्यद**िति । ते पादपाः-वृक्षा नन्दन्तु-समृद्धिमाप्नुवन्तु, च-पुनः फलन्तु, तथा परां-प्रकृष्टां अभ्युन्नतिं-उदयं यान्तु-लभन्ताम् । ते[१] इति के ? येषां पादपानां तलेषु गेहेष्विव पान्थनिचयाः-अध्वगसमूहा विश्रम्य-खेदमपनीय निर्यत्-निःसरत् यत् निर्झरवारि-प्रस्रवणजलं तेन वारिता-छिन्ना तृट् यैस्ते एवम्विधाः सन्तः फलैस्तृप्यन्ति-आघ्राता भवन्ति। यथा गेहेषु पान्था विश्रम्य पानीयेन छिन्नतृषः सन्तः फलैरन्नादिभिस्तृप्यन्ति तथैष्वपि । "**तृप्त्यर्थानां करणे षष्ठी च***" [ ] इति सूत्रात् विभाषया फलैरिति प्रयोगः । किम्भूतेषु तलेषु ? भ्राम्यन्तः-विचरन्तो ये भृङ्गास्तेषां भरेण-भारेण अवनम्राणि-ईषन्नमनशीलानि यानि कुसुमानि अतएव तेभ्यः श्च्योतत्-क्षरत् यन्मधुररसस्तेन उत्कृष्टो गन्धः-परिमलो येषु तानि तथा तेषु । "**गन्धस्येदुत्पूतिसु सुरभिभ्यः**" [पा. सू. ५/४/१३५] इति गन्धस्येकारान्तादेशो बहुव्रीहौ । पुनः किम्भूतेषु ? छाया-आतपाभावो विद्यते येषु तानि तथा तेषु। शार्दूलविक्रीडितम् ॥ ६२ ॥

**अपि च**-

**यत्र न फलितास्तरवो विकासि[३]सरसीरुहाः सरस्यो वा ।**
**न च सज्जनाः स देशो गच्छतु निधनं श्मसानसमः ॥ ६३ ॥**

**अपि** च-पुनः-

**यत्रे**ति । यत्र-देशे फलिताः-फलिनस्तरवः-वृक्षा न, पुनर्यत्र-देशे सरस्यः-सरांसि विकासीनि-विकसनशीलानि सरसीरुहाणि-पद्मानि यासु एवम्विधा न। वा-पुनरर्थः। च-पुनः, यत्र-देशे न सज्जनाः-सन्तः स देशो निधनं-विनाशं गच्छतु -प्राप्नोतु । किम्भूतः स देशः ? श्मसानेन[२] समः-सदृशः । देशश्मसानयोः[३] समानतायामरतिजनकत्वं हेतुः । आर्या ॥ ६३ ॥

**तत्कथय कदा पुनरिमां विन्ध्यवनवीथीं विचित्रपत्त्रलकुचां दमयन्ती-मिव[४] निर्विघ्नमवलोकयिष्यावः[५] ।**

**तत्** इत्युपसंहारे, तस्मात् हे पुष्कराक्ष ! त्वं कथय । पुनः कदा-कस्मिन्काले इमां-विन्ध्यवनवीथीं-विन्ध्यगिरिकाननमार्गं निर्विघ्नं-विघ्नरहितं यथा भवति तथा आवां

---

१. ते नास्ति अनू. । २. श्मशानयोः अनू. । ३. समतायां अनू. । * तृप्तार्थपूरणाव्ययातृश्शत्रानशा [हैम. ३/१/८५]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अवलोकयिष्यावः । विन्ध्यवनवीथीं कामिव ? दमयन्तीमिव । किम्भूतां विन्ध्यवन-वीथीम् ? विचित्राणि-लघुगुरुत्वभेदेन विविधानि पत्राणि-दलानि येषुं एवम्विधा लकुचाः-तरवो यस्यां सा तां । दमयन्ती तु विविधपत्रवल्लीयुक्तस्तनी पत्रं लात इति के पत्रलौ ।

**तथाहि—**

**पीनोन्नमद्धनपयोधरभारभुग्न-**
**मध्यप्रदेशरुचिमल्लवलीलतायाः ।**
**उत्कण्ठितोऽस्मि चलदेणदृशः प्रियाया-**
**स्तस्याश्च पर्वतभुवो वनवीथिकायाः ॥ ६४ ॥**

**तथा ही**ति । दमयन्ती विन्ध्यवनवीथ्योरभिलषणीयत्वमेवाह—

**पीनेति** ? हे पुष्कराक्ष ! तस्याः प्रियायाः-दमयन्त्याः पर्वताद्-विन्ध्यगिरेर्भवति स्म-अजायत इति पर्वतभूस्तस्याः पर्वतभुवः-पर्वतोत्पन्ना या वनवीथिकायाश्च अहं उत्कण्ठितः-मिलनाय उत्सुकोऽस्मि । किम्भूतायास्तस्याः ? पीनौ-मांसलौ उन्नमन्तौ-उन्नतौ घनौ-कठिनौ यौ पयोधरौ-कुचौ तयोभरिण-भरेण भुग्ने-निम्ने मध्यप्रदेशे-उदरे रुचिं-शोभां मल्लन्ते-धारयन्तीत्यणि, पीनोन्नमद्घनपयोधरभारभुग्नमध्यप्रदेशरुचिमल्ल, एवम्विधा वल्लय एव लता यस्याः सा तस्याः । वलीनां लतात्वं सुकुमारत्वात् तनुत्वाच्च वली-उदरलेखा । तथा चलतां एणानामिव दृशौ यस्याः सा तस्याः । किम्भूताया वनवीथिकायाः । पीनः-जलभृतत्वात् उन्नमत्-उन्नतो वर्षार्थं गृहीतयत्नो घनः-निविडो यः पयोधरः-मेघस्तस्य भारेण भुग्नः-निम्नो मध्यप्रदेशः-मध्यभागो यस्या एवम्भूता रुचिं-मती तेजस्विनी-लवली नाम्नी लता यस्यां सा तस्याः । तथा चलत् एणानां-दृक्दर्शनं यस्यां सा तस्याः । वसन्ततिलका ॥ १४ ॥

**अपि च—**

**सानूनां सानूनां विलोक्य रमणीयतां हि सानूनाम् ।**
**सालवने सालवने विहरिष्यति सह मयाऽत्र कदा ॥ ६५ ॥**

**अपि** च-पुनः—

**सानूना**मिति । हि-निश्चितं सानूनां-तटानां सम्बन्धिनो ये सानवः-मार्गास्तेषां अनूनां-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परिपूर्णां रमणीयतां-रम्यतां विलोक्य, अत्र सह अलवनेन-अच्छेदनेन वर्तत इति सालवनं तस्मिन् सालवने, सालानां-सर्जतरूणां वने मया समं कदा सा-दमयन्ती विहरिष्यति-क्रीडिष्यति। अत्र प्राच्यः सानुशब्दस्तटार्थो अन्यश्चाध्वार्थः। यद् **विश्वप्रकाशः**-"**सानु शृङ्गे बुधे मार्गे शय्यायां पल्लवे वने**" [नान्त. १९]। यदि वा "**णू स्तवने**" [पा. धा. १३९८] आनवनमानूः प्रशंसा तया सह वर्तन्त इति सानूनि तेषां स्तुत्यर्थानामित्यर्थः[1]। आर्या ॥१५॥

**सखे सखेदा इव वयम्, तत्कथय कियद्दूरेऽद्यापि स वैदर्भविषयः, यत्र ब्रह्माण्डशुक्तिसंपुटमध्यमुक्ताफलगुलिकया तयालङ्कृतं तत्कुण्डिनं नगरम् इत्यभिदधाने निषधनाथे तैस्तैरालापैरनुवर्त्तितोक्तिः पुष्कराक्षोऽप्यभाषत।**

**'देव, प्राप्ता ननु वयम्।**

हे **सखे**! पुष्कराक्ष! वयं सखेदा इव-खिन्ना इव वर्त्तामहे, तत्-तस्मात् कथय, अद्यापि कियद्दूरे-कियद्[2] विप्रकृष्टे स वैदर्भदेश[3]विषयः-वैदर्भदेशः। यत्र वैदर्भविषये ब्रह्माण्डमेव शुक्तिसम्पुटस्तन्मध्ये मुक्ताफलगुलिकेव या सा तया, स्थूलवृक्षत्वात् गुणिकाकारत्वं मुक्ताफलस्य। तथा दमयन्त्या अलङ्कृतं-मण्डितं तत् कुण्डिननगरमित्यभिदधाने-वदति सति निषधनाथे-नले तैस्तैरद्भुतैरालापैः-सम्भाषणैरनुवर्तिता-अनुसृता उक्तिः-नलकथनं येन सः। यथा स्वामिन्! इदमित्थमेव यद्भवद्भिरुच्यत इति पद्धत्या अङ्गीकृतनलवाक्यः पुष्कराक्षोऽप्यभाषत।

हे **देव**! नन्विति सम्यग्वादे वयं प्राप्ताः विदर्भदेशमिति शेषः। "**ननु च प्रश्ने दृष्टोक्तौ सम्यग्वादे स्तुतावपि**" **इत्यनेकार्थः** [परि. ६१]।

**इदं हि—**

इदं हीति।

**वीरपुरुषं तदेतद्वरदातटनामकं महाराष्ट्रम्।**
**दक्षिणसरस्वती सा वहति विदर्भा नदी यत्र ॥ ६६ ॥**

**वीरेति**। हे देव! एतत् वरदातटनामकं महाराष्ट्रं-महामण्डलं वर्तते। किम्भूतं? वीराः-शूराः पुरुषा यत्र तत्। हे देव! सा दक्षिणसरस्वतीनगरी, यत्र दक्षिणसरस्वत्यां विदर्भानदी वहति ॥ ६६ ॥

---

१. स्तुत्यानामित्यर्थः अनू.। २. कियति अनू.। ३. देश नास्ति अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इहाकरभूया सिंहलद्वीपभुवा सदृशी, बहुदया त्यागिजनतया तुल्या समृद्धनया [१]भूमिनिखातकृपणजननिक्षेपकुम्भिकया समा[२], प्रजा ।**

**इह समकरन्दानि कमलवनानि राजचक्रं[३] च, इह बहुधामानि नगराणि लोकहृदयं च, इह सारम्भाणि कृषणकुलानि[४] दशरूपकप्रेक्षणं च, इह बहुकृपाणि जनमनांसि प्रजापालबलं च, इह महाविप्राणि ग्रामपुरपत्तनानि मेषगोष्ठं च ।**

**इयं च गगनवीथीव पूर्वोत्तराफाल्गुनीराशिवायूपयुक्ता ब्राह्मणाग्रहारभूमिः ।**

**इहेति** । अथ प्रथमातृतीयाश्लेषः । हे देव ! इह देशे सिंहलद्वीपभुवा सदृशी प्रजा वर्तते । किम्भूता ? न करात्-राजांशात् भयं यस्यां सा अकरभया, अकरेत्यर्थः । किम्भूतया भुवा ? न करभाः-उष्ट्रा यस्यां सा तया करभरहितया । तथा इह त्यागिनी-दात्री जनता-जनसमूहस्त्यागिजनता तया तुल्या प्रजा वर्तते । किम्भूता प्रजा ? बह्वी दया यस्याः सा बहुदया । किम्भूतया त्यागिजनतया ? बहु ददातीति बहुदा तया बहुदया, जनानां समूहो जनताग्रामजनबन्धुसहायेभ्यस्तः । तथा हे देव ! इह देशे भूमौ निखाता-निक्षिप्ता कृपणजनानां-अदातृलोकानां या निक्षेपस्य-न्यासस्य कुम्भ्येव- कुम्भिका तया समा प्रजा वर्तते । किम्भूता प्रजा ? समृद्धः-बहुलो नयः-न्यायो यस्यां सा समृद्धनया । किम्भूतया कुम्भिकया ? समृत् -मृत्तिकोपेतं धनं यस्यां सा तया समृद्धनया ।

अथ एकवचन-बहुवचनश्लेषः ।

हे देव ! **इह**-देशे कमलानि-पद्मानि राजचक्रं च नृपसमूहो वर्ते । *वर्तत इति तिङन्तप्रतिरूपकोऽयं निपातस्तेनैकत्वबहुत्वप्रयोगे अवैषम्यं अर्थवशाद्विभक्तिपरिणामो वा* । किम्भूतानि कमलानि ? सह मकरन्देन-रसेन वर्तन्त इति समकरन्दानि । किम्भूतं राजचक्रम् ? समः करः-राजांशो यस्य तत् समकरं तथा दानं अस्यास्तीति दानि-दानशौण्डमित्यर्थः । तथा हे देव ! इह-देशे एवम्विधानि नगराणि लोकहृदयं च । किम्भूतानि नगराणि ? बहूनि धामानि-गृहाणि येषु तानि बहुधामानि । किम्भूतं लोकहृदयम् ? बहुधा-अनेकधा मानः-अकृत्यानासेवनेऽहङ्कारोऽस्यास्तीति मानि । तथा हे देव ! इह-देशे कृषणकुलानि-कर्षककुलानि दशरूपकस्य प्रेक्षणकं च वर्तते । किम्भूतानि कृषणकुलानि ? आरम्भैः-कर्षणोपक्रमैः सह वर्तन्त इति सारम्भाणि । किम्भूतं दशरूपकप्रेक्षणकम् ? सारं-उत्कृष्टं तथा भाणः-रूपविशेषः सोऽस्यास्तीति भाणि । यदाह-

*-* चिह्नान्तर्गत पाठो नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**धनिकः**-

"**भाणस्तु धूर्तचरितं कृतं स्वेन परेण वा ।**
**यत्रोपवर्णयेदेको निपुणः पण्डितो विटः ॥**" [३/४९]

तथा हे देव ! इह-देशे जनमनांसि प्रजापालनस्य राज्ञो बलं च सैन्यं च वर्तते । किम्भूतानि जनमनांसि ? बह्वी कृपा येषु तानि बहुकृपाणि । किम्भूतं प्रजापालबलम् ? बहु-प्रचुरं तथा कृपाणः-खड्गोऽस्यास्तीति कृपाणि । तथा हे देव ! इह-देशे ग्रामपुरपत्तनानि मेषगोष्ठं च मेषस्थानं वर्तते । किंभूतानि ग्रामपुरपत्तनानि ? महान्तो विप्रा येषु तानि महाविप्राणि । किम्भूतं मेषगोष्ठम् ? महान्तो-ऽवयः-मेण्ढास्त एव प्राणिन-बलवन्तो यत्र तत् महाविप्राणि । गोष्ठशब्दो गोस्थानवाच्यपि उपचारात् मेषाणां स्थानेप्युच्यते ।

तथा हे देव ! **इयं** च ब्राह्मणानां अग्रहारभूमिः-[१]ब्राह्मणग्रामवसुधा[१] । किम्भूता ? पूर्वस्यां उत्तरस्यां अफल्गु-सारं नीरं यस्यां सा । तथा शिवा-कल्याणी, तथा यूपैः-यज्ञकीलैर्युक्ता । केव ? गगनवीथीव-नभोमार्ग इव[२] । किम्भूता सा ? पूर्वा उत्तराः फाल्गुन्यो नक्षत्राणि राशयः-मेषाद्या वायुः-पवनस्तैरुपयुक्ता-उपयोगी कृता । "**अग्रहारो द्विजग्रामः**" [ ] इति **विषमपदपर्यायग्रन्थे** । अत्र अग्रहारपदेनैव द्विजग्राम इत्यर्थस्य लब्धावपि ब्राह्मणेति पदं हयहेषितादिवत् उक्तपोषकत्वाददुष्टम् ।

**इतश्च–**

**आरुह्यैताः शिखरिसदृशान्ग्राममध्योच्चकूटा-**
**नन्योन्यांसप्रणिहितभुजाः संगताः कौतुकेन ।**
**प्रेक्षावेशादविचलदृशो योषितः पामराणां,**
**पश्यन्त्यस्त्वां निभृततनवो लेख्यलीलां वहन्ति ॥ ६७ ॥**

**इतश्चे**ति । हे देव ! इतो वीक्षस्व ।

**आरुह्ये**ति । एताः पामराणां-प्राकृतजनानां योषितः शिखरिसदृशान्-गिरिसमान् ग्रामस्य मध्ये उच्चात्-उन्नतान् कूटान्-अवकरोत्करान् आरुह्य-अधिष्ठाय अन्योन्यस्य-परस्परस्य अंसयोः-स्कन्धयोः प्रणिहितौ-स्थापितौ भुजौ याभिस्ता एवम्विधास्त्वां पश्यन्त्यः-अवलोकयन्त्यः सत्यः, अतएव निभृता-निश्चला तनुर्यासां एवंरूपां[३] लेखस्य-चित्रस्य लीलां-शोभां वहन्ति-बिभ्रति । किम्भूताः ? कौतुकेन-कुतूहलेन संगताः-मिलिताः । पुनः किम्भूताः ? प्रेक्षा-अवलोकनं तस्या आवेशः-आग्रहस्तस्मात् अविचले-निश्चले दृशौ यासां

१. सेठिया-'ब्रह्मणाधिष्ठितस्थानविशेषः पृ. १२५. बी. ब्राह्मणवसुधा अनू. ।' २. नभोवीथीव-गगनमार्ग इव अनू. । ३. एवंरूपा अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ताः । कौतुकान्निश्चलतया पामर्यस्त्वां वीक्षन्ते । तत्रोत्प्रेक्ष्यते, एताः सचेतनाः स्त्रियो न, किन्तु फलकविचित्रताः सन्तीति ॥ ६७ ॥

**किं चान्यत्—**

**नृप चलसि यथा यथा त्वमस्मिन्नपि वदनानि तथा तथा चलन्ति[1] ।**
**तरलितनयनानि पामरीणां पवनविनर्तित[2]पङ्कजोपमानि ॥ ६८ ॥**

**किञ्च**-पुनरन्यत्-अपरं उच्यते—

**नृपेति** । हे नृप !-राजन् ! यथा यथा त्वं अस्मिन्प्रदेशे चलसि तथा तथा पामरीणां वदनान्यपि चलन्ति । यतो यतस्त्वं यासि ततस्ततस्ता वीक्षणाय मुखमपि चालयन्तीति भावः । किम्भूतानि वदनानि ? तरलिते-वीक्षणाय कम्पिते नयने येषु तानि तरलितनयनानि। पुनः किम्भूतानि ? पवनेन विनर्तितानि-चालितानि यानि पङ्कजानि तैरुपमीयन्ते अतिदिश्यन्ते यानि तानि पवनविनर्तितपङ्कजोपमानि मुखानि चञ्चलत्वात् वायुप्रेरितपद्मसमानानीत्यर्थः ॥ ६८ ॥

**अपि च—**

**उत्कम्पाद्गलितांशुकेषु रभसादत्यन्तमुच्छ्वासिषु,**
**प्रोत्तुङ्गस्तनमण्डलेषु विलुठद्गुञ्जावलीदामसु ।**
**आसां स्वेदिषु दृश्यते मृगदृशां संक्रान्तबिम्बो भवा-**
**नाश्लिष्यन्निव गोपिकाः कृतबहुप्राकाम्यरूपो हरिः ॥ ६९ ॥**

**अपि** च-पुनः-

**उत्कम्पादिति** । हे देव ! आसां मृगदृशां पामरीणां प्रोत्तुङ्गानि-अत्युन्नतानि यानि स्तनमण्डलानि तेषु भवान्-त्वं संक्रान्तं-प्रतिफलितं बिम्बं-प्रतिबिम्बं यस्य स एवंविधो दृश्यते । किम्भूतेषु प्रोत्तुङ्गस्तनमण्डलेषु ? उत्कम्पात्-सात्विकभावात् गलितं-पतितं अंशुकं-तदावरणवासो येभ्यस्तानि तथा तेषु । तथा[1] रभसात्-हर्षात् अत्यन्तं-अतिशयेन उच्छ्वासिषु-उच्चैर्भवनशीलेषु । **"रभसो वेगहर्षयोः" इत्यनेकार्थः** [३/७९५]। तथा विलुठत्-इतस्ततः परिवर्तमानं गुञ्जावल्याः-कृष्णलाजेर्दाम-माला येषु तानि तथा तेषु । तथा स्वेदः-प्रस्वेदो विद्यते येषु तानि तथा तेषु स्वेदिषु । स्तनमण्डलस्य भ्रष्टांशुकत्वं स्वेदित्वं च नृपप्रतिबिम्बस्य संक्रान्तौ हेतुः । भवान् क इव ? उत्प्रेक्ष्यते, गोपिकाः आश्लिष्यन्-

---

१. तथा नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आलिंगन् प्राकाम्यं-महासिद्धिविशेषः प्राकाम्येण रूपाणि प्राकाम्यरूपाणि कृतानि बहूनि प्राकाम्यरूपाणि येन एवंविधो हरिरिव-विष्णुरिव । शङ्के, पामरीस्तनमण्डलसंक्रान्तो भवान् न, किन्तु विष्णुरेव, प्राकाम्येण कृतबहुरूपो गोपिका आश्लिष्यतीति ॥ ६९ ॥

**अहो नु खल्वाश्चर्यमिदमेतासां[१] तथाविधनेपथ्यनिरपेक्षाप्युन्मादयति यूनां मनो[२] युवतीनां यौवनश्रीः ।**

**अहो** ! इति सम्बोधने , हे देव ! नु-इति वितर्के, खल्विति वाक्यालङ्कारे, आश्चर्यं-अद्भुतमिदम् । किं तत् ? एतासां-पामरीणां तथाविधं उदारं-हारकुण्डलादिरूपं नेपथ्यं-वेषस्तस्य न विद्यते अपेक्षा-अङ्गीकारो यस्यां सा तादृशा कल्परहितापि यौवनश्रीः-तारुण्यलक्ष्मीर्यूनां मन उन्मादयति-सकामं कुरुते । यदि सन्नेपथ्या मन उन्मादयेत्तदा किं चित्रम् ? परं तथाविधनेपथ्यरहितापि मन उन्मादयतीदं चित्रमिति ।

**तथाहि—**

**माल्यं मूर्धनि कर्णिकारकलिकाः[३] पिष्टातकं चन्दनं,**
**मुक्तादाम गले च काचमणयो लाक्षामयाः कङ्कणाः ।**
**रागोऽङ्गेषु हरिद्रया नयनयोरत्युल्वणं कज्जलं,**
**वेषोऽयं विरसस्तथापि हृदयं ग्राम्या हरन्ति स्त्रियः ॥ ७० ॥**

**तथाहीति** । तथाविधनेपथ्यरहितत्वमेव दर्शयति—

**माल्यमिति** । यद्यपि आसां अयं वेषः-आकल्पो विरसः-वैरस्य कारणं नीरागताजनकस्तथापि ग्राम्याः स्त्रियः-पामर्यो हृदयं-चेतो हरन्ति-वशी कुर्वन्ति । अयमिति कः मूर्धनि-शिरसि कर्णिकारस्य-द्रुमोत्पलस्य कलिका-कोरकः माल्यं-माला, माल्यस्थाने कर्णिकारकोरकः । तथा हरिद्रा-तण्डुलचूर्णः पिष्टातकं तदेव चन्दनं-गोशीर्षविलेपनं । च-पुनः गले-कण्ठे काचमणयो मुक्तादाम-मौक्तिकमाला, काचः-क्षार मृद्विकारस्तस्य मणयः-मणिकाः काचमणयः । तथा लाक्षामयाः-जतुरसघटिताः कङ्कणाः । तथा अङ्गेषु-अवयवेषु हरिद्रया-रजनीरसेन रागः-अङ्गरागः । तथा नयनयोः अत्युत्कटं-अधिकं कज्जलं । नागरिकाणां हि अञ्जनं रेखितं भवति, एतासां च न तथेति ॥ ६० ॥

**इतश्च—**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कन्दलितकन्दविशेषाः कर्कशकर्कटिका विशालकालिङ्गाः कूष्माण्डमण्डितमण्डपाः सुवृत्तवृन्ताकाः सुहस्तितहस्तिकर्णपुनर्नवाः स्थूलमूलकाः पिण्डितपिण्डालवो[१] वास्तुकवस्तु[२]भूतभूतलाः संजीवितजीवन्तिकाः सर्षपराजिकाराजिराजिताः सरित्सारिणीसारिवारिसेचनसुकुमारविविधपल्लवित[३]शाकाः शाकवाटिकाः ।**

हे देव ! **इतश्च**-अस्मिन् प्रदेशे शाकस्य वाटिकाः शाकवाटिकाः । किम्भूताः शाकवाटिकाः ? कन्दलाः-प्ररोहाः सञ्जाता एष्विति कन्दलिताः "**तारकादित्वात्** [**तदस्य सञ्जातं तारकादिभ्य इतच्**,५/२/३६]संजाते इतच् । एवंविधाः कन्दविशेषा यासु ताः । तथा कर्कशाः-कठिनाः कर्कटिकाः-एर्वारवो यासु ताः । तथा विशालाः-पृथवः कालिङ्गाः-भूमिकर्कारवः कूष्माण्डविशेषा यासु ता विशालकालिङ्गाः । "**कालिङ्गस्तु भुजङ्गमे । द्विरदे भूमिकर्कारौ**" [३/११९] इत्य**नेकार्थः** । तथा कूष्माण्डेन-कर्कारुणा मण्डिताः-अलंकृता मण्डपाः-आश्रयविशेषा यासु ताः । तथा सुष्ठु वृत्तानि-वर्तुलानि वृन्ताकानि यासु ताः सुवृत्तवृन्ताकाः । वृन्ताकी-उच्चबृहती तत्फलं वृन्ताकं । "**मघाक[१] श्यामाक वार्ताक वृन्ताक ज्योक नाक गूवाक भद्राकादयः एते आकप्रत्ययान्ता निपात्यन्त**" [ ] **इत्युणादौ** । तथा हस्तिकर्णश्च पुनर्नवा च हस्तिकर्णपुनर्नवे सुष्ठु अतिशयेन हस्तः कन्दोद्भेदः सञ्जाऽतोऽनयोरिति सुहस्तिते तथाविधे हस्तिकर्णपुनर्नवे यासु ताः, द्वावपि वल्लीविभेदौ । तथा स्थूलानि-पीनानि मूलकानि-हरिपर्णानि यासु ताः । तथा पिण्डिताः-एकत्रैवोदभूताः पिण्डालवो यासु ताः । तथा वास्तुकेन-शाकविशेषेण वस्तुभूतं-गणनार्हं भूतलं यासु ताः । तथा सञ्जीविता-उद्भूता जीवन्तिका-मधुस्रावा यासु ताः । तथा सर्षपाणां राजिकानां च राजसर्षपाणां राज्या-राजिताः । तथा सरितः-नद्यायाः, सारिणी-कुल्या तया सर्तुं प्रवर्तितुं शीलं यस्य तत् सरित्सारिणीसारि, एवंविधं यत् वारि-जलं तेन यत्सेचनं तेन सुकुमाराः विविधाः-नानाविधाः पल्लवा जाता एष्विति एवंविधाः शाका यासु ताः ।

**इतश्च-**

**विकचमुचकुन्दानन्दिनो मकरन्दस्यन्दिसुन्दरसिन्दुवाराः पामरीसंकेतनिकेतकेतकीवनाः कम्राम्रातकाः कोरकितकुरटका[४]: कुड्मलितकङ्कोल-[५] कलाः पल्लवितवल्लीकाः फुल्लन्मल्लिकोल्लासिनः सुजातजातयो विचित्र[६]शतपत्त्रिकास्ताण्डवितपाण्डुपिण्डितगर[७]करवीरवीरुधो दृश्यमानसर्वर्तुपुष्पाः पुष्पारामाः[८] ।**

---

१. मवाक अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हे देव ! **इतश्च** पुष्पाणां आरामाः-वनानि पुष्पारामाः वर्तन्ते । किम्भूताः पुष्पारामाः ? विकचैः-सविकासैर्मुचुकन्दैः-पुष्पविशेषैः आनन्दन्ति-समृद्धिं प्राप्नुवन्त्यवश्यमिति[१] विकचमुचुकुन्दानन्दिनः-प्रफुल्लमुचुकुन्दपूर्णा इत्यर्थः । तथा मकरन्दस्यन्दीनि-मधुक्षरण-शीलानि सुन्दराणि सिन्दुवाराणि-निर्गुण्डीपुष्पाणि येषु ते । तथा पामरीणां सङ्केतनिकेतनानि-सङ्केतस्थानानि केतकीवनानि येषु ते । तथा कम्रा-रम्या आम्रातकाः-वर्षपाकिनो वृक्षा येषु ते । तथा कोरकिताः-कुड्मलिताः कोरण्टको येषु ते । तथा कुड्मलितानि-जातमुकुलानि अर्धविकसितपुष्पसहितानि कक्कोलकानि-कोशफलानि येषु ते, कुड्मलं अर्धविकसितमुच्यते । तथा पल्लविताः-सञ्जातकिसलया वल्लयः-वीरुधो लता येषु ते । तथा फुल्ला-विकसिता या मल्लिकाः-विचिकिलपुष्पाणि[२] ताभिरुल्लसितुं शोभितुं शीलं येषां ते फुल्लमल्लिकोल्लासिनः । तथा सुष्ठु जाताः-उत्पन्ना जातयः-मालत्यो येषु ते । तथा विचित्राः-विविधाः शतपत्रिका-पुष्पभेदो येषु ते । तथा ताण्डविताः-प्रफुल्लाः पाण्डवः-श्वेताः पिण्ड्यश्च-अलावस्तगराश्च[३] करवीराश्च-हयमारा वीरुधश्च-लता येषु ते । यद्यपि ताण्डवशब्दो नृत्यविशेषे वर्तते तथाप्यत्रोपचारात् विकासार्थस्ततो जातार्थे इतच् । तथा दृश्यमानानि सर्वेषां ऋतूनां-वसन्तादीनां पुष्पाणि येषु ते । यद्वा, दृश्यमानानि सर्वेषु ऋतुपुष्पाणि येषु ते ।

**इतश्च—नातिदूरे दक्षिणदिशि दृशं निवेशयतु देवः ।**

**एतास्ताः परिपक्वशालिकलमाः सुस्वादुदीर्घेक्षवो,**
**वप्रप्रान्तहरित्तृणस्थलचलत्पीनाङ्गगोमण्डलाः ।**
**दृश्यन्ते पुरतः सरोरुहवनभ्राजिष्णुनीराशयः[१],**
**प्रान्तोन्नादिविचित्रपत्रिनिचयाः सस्यस्थलीभूमयः ॥ ७१ ॥**

**इतश्च**-अस्मात् प्रदेशान्नातिदूरे-समीपे दक्षिणदिशि देवः-राजा दृशं निवेशयतु-स्थापयतु, पश्यतु[४] इत्यर्थः ।

हे देव ! **एतास्ताः**[५] सस्यस्थलीभूमयः-धान्योत्पत्तिभूमयः पुरतः-अग्रतो दृश्यन्ते । किम्भूताः सस्यस्थलीभूमयः ? परिपक्वाः-परिपाकं प्राप्ताः शालयः-सामान्यव्रीह्यः कलमाश्च-तद्विशेषा यासु ताः । तथा सुस्वादवः-मृष्टा दीर्घाः-प्रलम्बा इक्षवः-रसाला यासु ताः । तथा वप्रप्रान्तेषु-तटावसानेषु यानि हरित्तृणानां नीलतृणानां स्थलानि-प्रदेशास्तेषु चलत्-विचरत् पीनाङ्गं-स्थूलदेहं गोमण्डलं-धेनुसमूहो यासु ताः । तथा सरोरुहवनेन-पद्मखण्डेन

---

१. आप्नुवन्त्य० अनू. । २. विचकिल० अनू. । ३. अलाब्वः अनू. । ४. पश्यन्तु अनू. । ५. एता इति । अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भ्राजिष्णुः-शोभनशीलो यो नीराशयः-जलाश्रयस्तस्य प्रान्ते उन्नादिनः-उन्नदनशीला ये विचित्राः पत्रिणः-विविधपक्षिणस्तेषां निचयः-समूहो यासु ताः । शार्दूलविक्रीडितम् ॥७१॥

**स्वःसौन्दर्यविडम्बि कुण्डिनमिदं सैषा विदर्भा नदी,**
**सा चेयं वरदा स चायमनयोः पुण्याम्भसोः सङ्गमः ।**
**अस्यैवोन्मदहंसहारिणि तटे सेनास्थितिः कल्प्यतां[1],**
**यस्मिन्मत्तकरीन्द्रकुम्भकषणक्रीडासहाः पादपाः ॥ ७२ ॥**

**स्वरेति** । हे देव ! इदं प्रत्यक्षं कुण्डिनं-कुण्डिनाभिधं पुरम् । किम्भूतम् ? स्वः-स्वर्गस्य सौन्दर्यं-रामणीयकं विडम्बयति-अनुकरोतीत्येवंशीलं यत्तत् स्वःसौन्दर्यविडम्बि, यादृशं स्वर्गस्य सौन्दर्यं तादृशमेतस्यापीति । हे देव ! सेति-उक्त पूर्वा एषा-प्रत्यक्षा विदर्भा नदी । हे देव ! सा चेयं वरदाभिधा नदी । स च अयं अनयोः- विदर्भावरदयोः सङ्गमः-संयोगः । किम्भूतयोरनयोः । पुण्यं-पवित्रं अम्भः जलं ययोस्ते तयोः पुण्याम्भसोः । हे देव! अस्यैव नद्योः सङ्गमस्यैव तटे-तीरे सेनायाः स्थितिः-अवस्थानं कल्प्यतां-क्रियतां । किम्भूते तटे ? उन्मदाः-हृष्टाः ये हंसास्तैर्हारिणि-मनोज्ञे । यस्मिन् तटे मत्ताः-मदाकुला ये करीन्द्राः-हस्तिनस्तेषां कुम्भयोः कषणक्रीडां-घर्षणकेलिं कण्डूयलीलां सहन्ते-क्षमन्ते ये ते मत्तकरीन्द्रकुम्भकषणक्रीडासहाः, एवम्विधाः पादपाः-तरवः सन्ति । एतावता सेनावस्थानौचित्यं दर्शितम् । शार्दूलविक्रीडितम् ॥ ७२ ॥

**एवमनेकधा दर्शनीयप्रदेशप्रकाशनव्याजेन विनोदलीलां पल्लवयति पुष्कराक्षे, प्राप्ताः कुण्डिनपुरम् इत्युच्छ्वसितहृदयो[2] निषधेश्वरः परमपरितोषात्पारितोषिकप्रदानपूर्वमिदमवादीत् ।**

**'भद्र, भवतः सौकुमार्यमाधुर्यमधुमिश्रभङ्गश्लेषगर्भोक्तिभिराक्षिप्तमनसा[3]मस्माकमविदित इव, अदृष्टसमविषमविभाग इव, अनुत्पादितखेद[4] इव, अर्धगव्यूतमात्रऽमिवातिक्रान्तः[5] क्रीडाविहारभूमिसमो महानपि मार्गः। समुचितश्चायं सेनानिवेशस्य[6] सरित्सङ्गमोपकण्ठवनविभागः ।**

**एवं**-अमुना प्रकारेण अनेकधा-बहुधा दर्शनीयाः-द्रष्टुं योग्या ये प्रदेशाः-उद्देशास्तेषां यत्प्रकाशनं-प्रदर्शनं तस्य व्याजेन-दम्भेन पुष्कराक्षे विनोदलीलां-कौतुकविलासं पल्लवयति-वर्द्धयति सति, कुण्डिनपुरं प्राप्ता इति हेतोरुच्छ्वसितं-उल्लसितं हृदयं-मनो यस्य स, एवंविधो निषधेश्वरः-नलः परमो यः परितोषः-आह्लादस्तस्मात् पारितोषिकं-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रैतिकं वासनारूपं यत्प्रदानं-हारकेयूरादेर्वितरणं तत्पूर्वमादौ यस्मिन् तत् यथा भवति तथा इदं-वक्ष्यमाणं अवादीत् ।

हे **भद्र** !-पुष्कराक्ष ! भवतः-तव सौकुमार्यं-सुकुमारता माधुर्यं-मधुरता मृष्टता त एव मधुः-क्षौद्रं तेन मिश्रः-सहितो यो भङ्गश्लेषः-वक्रोक्तिः सगर्भे-मध्ये यासां एवंविधाभिरुक्तिभिः-वचनैराक्षिप्तं-हृतं मनो येषां ते तेषां, त्वद्वार्त्ताश्रवणव्यासक्तमनसामस्माकं महानपि मार्गः अविदित इव-अज्ञात इव न ज्ञातं, यथा मार्गो गम्यत इति । तथा न दृष्टः समः- प्रसमः विषमश्च-वक्रो भागो यस्य स तथाविध इव । तथा न उत्पादितः खेदः-श्रमो येन एवंविध इव, तथा अर्द्धगव्यूतमात्रमिव । तथा क्रीडार्थं या विहारभूमिस्तस्याः समः-सदृशः क्रीडाविहारभूमिसदृशः-क्रीडाविहारस्थलीव अतिक्रान्तः महानपि पन्थाः स्तोको जात इत्यर्थः । च-पुनः सेनासन्निवेशस्य-शिबिरस्य अयं सरितोर्यः सङ्गमस्तस्य उपकण्ठे-समीपे यो वनविभागः स समुचितः-योग्यः ।

**तथा हि–**

**इह भवतु निवासः सैनिकानामिहापि,**
**श्रमतरलतुरंगग्रासयोग्या तृणाली ।**
**इह हि कवलयन्तः पल्लवान्वारणेन्द्रा,**
**विदधतु तरुखण्डे गण्डकण्डूयनानि ॥ ७३ ॥**

**तथाहीति** । सेनासन्निवेशौचित्यमेव दर्शयति ।

**इहेति** । इह-प्रदेशे सैनिकानां-चमूचराणां निवासः-अवस्थानं भवतु । इहापि-प्रदेशे श्रमेण-मार्गातिक्रमणजन्यखेदेन तरलाः-चञ्चला ये तुरङ्गास्तेषां ग्रासः-भक्षणं तस्य योग्या तृणाली-तृणराजिर्वर्त्तते । हि-निश्चितं इह-प्रदेशे वारणेन्द्राः-गजेन्द्राः पल्लवान्-किसलयानि कवलयन्तः-भक्षयन्तः सन्तस्तरुखण्डे-द्रुमवने गण्डयोः कण्डूयनानि-कषणानि विदधतु-कुर्वताम् । मालिनी ॥ ७३ ॥

**इतश्चात्यन्तमनोहरतयास्माकमासनयोग्या सरित्सङ्गमोत्सङ्गभूमयः ।**

**इतश्च**-अस्मिन्प्रदेशे अत्यन्तमनोहरतया-अतिशयेन चारुतया सरितोः संगमः सरित्संगमस्तस्योत्सङ्गभूमयः अस्माकं आसनयोग्याः-निषदनोचिता वर्तते[१]।

**तथाहि–**

---

१. वर्तन्ते अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तथाही**ति । तदुत्सङ्गभूमीनां रम्यत्वमेव दर्शयति–

**अपसृताम्बुतरङ्गितसैकता निचुलमण्डपनृत्तशिखण्डिकाः ।**
**कुररसारसहंसनिषेविताः पुलकयन्ति न कं पुलिनश्रियः ॥ ७४ ॥**

**अपेति** । एताः पुलिनश्रियः-सरित्सङ्गमसैकतलक्ष्म्यः कं पुरुषं न पुलकयन्ति-रोमाञ्चन्ति ? अपितु सर्वमपि आनन्दयन्तीत्यर्थः । किम्भूताः पुलिनश्रियः ? अपसृत्य-तीरमागत्य पश्चान्निवृत्तं यदम्बुः-जलं तेन रङ्गितं-जाततरङ्गाकारं सैकतं-सिकतासमूहो यासु ताः । समूहार्थे अण् । तथा निचुलानां-हिज्जलानां मण्डपेषु नृत्ताः शिखण्डिनः-मयूरा यासु ताः । बहुव्रीहौ कः । तथा कुरराश्च सारसाश्च हंसाश्च तैर्निषेविताः-सेविताः । एभिर्विशेषणैर्पुलिनभूमीनां रम्यत्वं दर्शितम् । द्रुतविलम्बितम् ॥ ७४ ॥

**इत्यभिधाय भद्र, यथाक्रममकृतान्योन्यसम्बंध[1]कलहम्, अनुपद्रुततीर्थायतनम्, [2]अलुण्ठितासन्नोद्यानम्, अच्छिन्नचैत्यद्रुमम्, [3]अखण्डितकमल वनं निवेशय सैन्यं[4] इति सेनापतिमादिदेश ।**

**सोऽपि यथादिष्टमनुतिष्ठन्निदमवादीत् ।**

**इति**-पूर्वोक्तप्रकारेण अभिधाय-उक्त्वा नलः सेनापतिं बाहुकनामानं इति आदिदेश-आदिष्टवान् । इतीति किम् ? हे भद्र !-कल्याणकारिन् ! सेनापते ! सैन्यं निवेशय-स्थापय । कथं ? यथा भवतीत्याह–क्रमं पूर्वस्यान्ते-उत्तरस्यान्ते इत्यादिरूपां परिपाटीं अनतिक्रम्य यथाक्रमं-येषां यदुचितं स्थानं तेषां तद् दत्त्वेति भावः । तथा न कृतं[1] सैनिकैः अन्योन्यं-परस्परं सम्बन्धे-संयोगे कलहो यत्र तत् । तथा न उपद्रुतानि-भग्नानि तीर्थायतनानि यत्र तत् । तथा न लुण्टितानि-विध्वस्तानि आसन्नोद्यानानि यत्र तत् । तथा चैत्याः-ग्रामप्रदेशप्रसिद्धवृक्षा न छिन्नाः-लूनाश्चैत्यद्रुमा यत्र तत् । तथा न खण्डितं कमलवनं यत्र । एवं यथा भवति तथेति क्रियाविशेषणानि ज्ञेयानि ।

**सोऽपि**-सेनापतिः आदिष्टं अनतिकम्य यथादिष्टं-यथा राज्ञोक्तं तथैव अनुतिष्ठन्-कुर्वन् इदं-वक्ष्यमाणं अवादीत् ।

**'भजत बलसमूहाः खर्वदूर्वास्थलानि,**
**स्थविरशुकविजीर्यत्पक्षपिच्छच्छवीनि ।**

---

१. कृतः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**उपनदि मृदुवीचीवायुनाऽन्दोलितानां,**
**कुसुमितलतिकानामन्तरालेष्वमूनि ॥ ७५ ॥**

**भजतेति** । हे बलसमूहाः !-सैन्यवृन्दानि यूयं उपनदि-नद्यां मृदुर्यो वीचीवायुः-तरङ्गवातस्तेन अन्दोलितानां-कम्पितानां कुसुमिताः-पुष्पिता या लता एव लतिकास्तासां अन्तरालेषु-मध्येषु अमूनि खर्वाणि-अनुच्चानि दूर्वास्थलानि भजत-आश्रयत । किम्भूतानि खर्वदूर्वास्थलानि ? स्थविराः-वृद्धा ये शुकास्तेषां विजीर्यन्ति-विशेषेण जीर्णीभवन्ति यानि पक्षपिच्छानि तद्वच्छविः-कान्तिर्येषां तानि । यद्यपि पक्षपिच्छयोरभिधानकृता न भेदः प्रत्यपादि तथापि महदेवान्तरं, यतः पक्षशब्देन पक्षीतिरेव, पिच्छशब्देन तु तदंशोऽभिधीयते। मालिनी ॥ ७५ ॥

**अपि च–**

**स्मरविहरणवेदीं षट्पदापानशालां,**
**तटमनु वनमालां सस्मया मास्म भाङ्क्षुः ।**
**कमलवनविहारानन्तरं यत्र तैस्तै,-**
**र्मदनमदविनोदैरासते राजहंसाः ॥७६॥**

**अपि च** पुनः–

**स्मरेति** । हे सैनिकाः ! सस्मयाः-सगर्वाः सन्तो भवन्तस्तटमनुलक्षीकृत्य अनुतटं-तटसमीपे वनमालां-वनश्रेणिं मा स्म मांक्षुः-मा भञ्जन्तु । किम्भूतां वनमालाम् ? स्मरस्य विहरणवेदीव-क्रीडनवेदिकेव या सा तां । वेदी तु संस्कृताभूमिः, स्मरोऽत्र क्रीडतीत्यर्थः । विपूर्वो हरति क्रीडार्थः । तथा षट्पदानां-भृङ्गाणां आपानशालेव-मधुपानस्थानमिव या सा तां, मत्तता हेतुत्वात् । आपिबन्त्यस्मिन्निति आपानं-पानस्य गोष्ठी आसनबन्धः । यत्र वनमालायां राजहंसाः कमलवने यो विहारः-विचरणं तस्मादनन्तरं-पश्चात् तैस्तैरद्-भुतैर्मदनः-कामः मदः-हर्षस्ताभ्यां ये विनोदाः-कौतुकानितैरुपलक्षिता आसते-तिष्ठन्ति । मदनमदविनोदान् कुर्वन्तः सन्तीति भावः । मालिनी ॥ ७६ ॥

**अपि च–**

**सुरसदननिवासं सैनिका मा स्म कुर्वन्-,**
**सरिति मुनिकुटीनां भङ्गमुल्लुण्टनं वा ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इह[१] निषधनृपाज्ञा तस्य यः क्वापि कोऽपि,**
**क्लममुषि तरुखण्डे खण्डनं वा करोति' ॥७७॥**

**अपि च**-पुनः

**सुरेति** । हे सैनिकाः !-चमूचराः ! भवन्तः सुरसदनेषु- देवकुलेषु निवासं मा स्म कुर्वन्-मा कुर्वन्तु । तथा सरिति-नद्यां मुनिकुटीनां-आश्रमाणां भङ्गं-विनाशं उल्लुण्टनं वा-तद्दारुतृणादीनां चौर्यं मा स्म कुर्वन् । इह तरुखण्डे-द्रुमवने यः कोऽपि-पुरुषः क्वापि-कस्मिन्नपि प्रदेशे खण्डनं च करोति तस्य निषधनृपस्य-नलस्य आज्ञा-शपथः, न केनाऽपि तरुखण्डखण्डनं विधेयमियर्थः । किम्भूते तरुखण्डे ? क्लमं- मार्गश्रमं छायादिना मुष्णाति-अपनयतीति क्लममुट् तस्मिन् । मालिनी । ॥ ७७ ॥

**एवमनुशासति बलानि बहुधा[२] बाहुके, तत्क्षणादुत्तम्भितैः प्रेङ्खत्पताकापटपल्लवविराजितैः प्रयाणयोग्ययन्त्रचित्रशालागृहैः सञ्चारिणि गन्धर्वनगर इव रमणीये, हरिततोरणैरुड्डीनशुकावलीमय इव, गैरिकारक्तोन्नमितपटकुटीभिरुत्फुल्लकिंशुकमय इव, श्वेतांशुकमण्डपैः[३] ताण्डवितपुण्डरीकखण्डमण्डप[४] इव, जाते सरित्सङ्गमोत्सङ्गसङ्गिनि शिबिरसंनिवेशे, क्रमेणाक्रान्तसकलदिङ्मुखेषु निषधेश्वरागमनवार्तानिवेदनदूतेष्विव[५] विदर्भराजधानीधामनिगतेषु बहलसैन्यधूलिपटलेषु, विरसति[६] विपक्षक्षितिपालकर्णपुटीकटुनि नवजलधरध्वनिगम्भीरे[७] तत्कालप्रहतशङ्खसखप्रयाणझल्लरीझांकृते[८], स्वयंवरायातसमस्तराजन्यचक्रकर्णकर्तरीषु पठ्यमानासु सानन्दवन्दारुबन्दिवृन्दारकवृन्देनोच्चैर्नलनाममालासु, क्षणादेवोत्तम्भितशातकुम्भस्तम्भ[९]भवने मृदुमसृणास्तरणभाजि जात्यवैदूर्यपर्यङ्किकायां[१०] सुखनिषण्णे राजनि, सुस्थिते च परिजने, नातिदूरवति[११] कुण्डिने दण्डपाशिक[१२]स्योच्चैर्वागुदतिष्ठत् ।**

**एवं**-अमुना प्रकारेण बहुधा-अनेकप्रकाराणि हस्त्यश्वादिभेदात् बलानि-सैन्यानि बाहुके-सेनापतौ अनुशासति-शिक्षयति सति । तथा शिबिरसन्निवेशे-कटकरचनायां सरित्सङ्गमस्य य उत्सङ्गः-पुलिनभूमिस्तस्मिन् सङ्गः-सम्बन्धो विद्यते यस्य स तस्मिन् सरित्सङ्गमोत्सङ्गसङ्गिनि जाते सति, नदीपुलिने सैन्ये स्थिते सतीत्यर्थः । किम्भूते शिबिरसन्निवेशे ? तत्क्षणात्-अवस्थानसमकालमेव उत्तम्भितैः-वंशादिना उच्चैः कृतैः

प्रयाणयोग्यानि-प्रस्थानोचितानि यानि यन्त्रचित्रशालागृहाणि-कीलिकाप्रयोगनिबद्धचित्रित-दारुमन्दिराणि तैः कृत्वा रमणीये-रम्ये । उत्तम्भितैरिति स्तम्भुः सौत्रौ धातुः, स्वार्थिको णिच् क्तः । किम्भूतैः शालागृहैः ? प्रेङ्खन्तः-वायुवशाच्चलन्तो ये पताकापटपल्लवाः-ध्वजपटप्रान्तास्तैर्विराजितैः-शोभितैः । शिबिरसन्निवेशो कस्मिन्निव ? उत्प्रेक्ष्यते,सञ्चारिणि-सञ्चरणशीले गन्धर्वनगर इव-औत्पातिकनभश्चरपुरे इव । पुनः किम्भूते ? हरितानि-नीलवर्णानि यानि तोरणानि बहिर्द्वाराणि तैः कृत्वा उड्डीना-उत्पतिता या शुकावली-शुकपंक्तिः तन्मय इव-तत्स्वरूप इव । तथा गैरिकेण धातुना आ-ईषद् रक्ता उन्नमिता उच्चैः कृता याः पटकुट्यस्ताभिः कृत्वा उत्फुल्लानि-विकसितानि यानि किंशुकानि-किंशुकपुष्पाणि तन्मय इव । तथा श्वेतांशुकानां-धवलपटानां ये मण्डपाः-जनाश्रयास्तैः कृत्वा ताण्डवितं-प्रफुल्ला[१] यत् पुण्डरीकखण्डं श्वेतकमलवनं तदेव मण्डपस्तस्मिन्निव । तथा बहलानि-घनानि यानि सैन्यधूलीपटलानि-चमूरेणुवृन्दानि तेषु विदर्भराजस्य-भीमस्य या राजधानी-नगरी तस्या धामनि-गृहे गतेषु-प्राप्तेषु सत्सु । किम्भूतेषु बहलसैन्यधूलीपटलेषु ? क्रमेण-गमनपरिपाट्या आक्रान्तानि-व्याप्तानि सकलानि दिशां मुखानि यैस्तानि तथा तेषु । धूलीपटलेषु केष्विव ? उत्प्रेक्ष्यते, निषधेश्वरस्य-नलस्य या आगमनवार्त्ता-यथा 'नलः समाययौ' इत्येवंरूपा तस्या निवेदनस्य-कथनस्य दूता इव यानि तानि तथा तेषु । यथा दूतैरग्रतो गत्वा प्रोच्यते यथा स आगतः इति । तथा धूलिपटलैरेव पुरा गत्वोक्तं सैन्यरजसा बुबुधे, यथा नलः प्राप्त इति भावः । तथा तत्काले-तत्समय एव प्रहता-ताडिता शङ्खसखा-शङ्खसहिता या प्रयाणझल्लरी तस्या झङ्कृते-झङ्कारे विरसति-शब्दायमाने सति । किम्भूते झल्लरीझंकृते ? विपक्षक्षितिपालानां-प्रत्यर्थिनृपाणां कर्णपुट्योः-श्रोत्रयोः कटुनि-पीडाकारिणि, तथा नवो यो जलधरः-मेघस्तस्य ध्वनिवद्गम्भीरे । तथा सानन्दाः-सहर्षा वन्दारवः-स्तवनशीला ये बन्दिवृन्दारकाः-मङ्गलपाठकमुख्यास्तेषां वृन्देन-समूहेन उच्चैः-अतिशयेन नलनाममालासु-नलाभिधानश्रेणिषु पठ्यमानासु-कथ्यमानासु सतीषु । किम्भूतासु नलनाममालासु ? स्वयम्वरार्थमायातं यत् समस्तराजन्यचक्रं-सकलक्षत्रियवृन्दं तस्य कर्णयोः कर्त्तर्य इव-कल्पन्य इव दुःखकारित्वाद् यास्तास्तासु । वदिरिह स्तुत्यर्थः, **"वदि अभिवादनस्तुत्योः"** [पा. धा. ११] इति धातोः प्रयोगात् । **शृवन्द्योरारु**रिति, [पा. सू. ३/२/१७३] आभ्यामारुः वन्दारुरिति । तथा राजनि-नले क्षणादेव उत्तम्भिताः-उच्चैः कृताः शातकुम्भस्य-स्वर्णस्य स्तम्भा यस्मिन् एवंविधं यद्भवनं-गृहं तस्मिन्, जातवैदूर्यैः-मनोहरवालवायजैः खचिता या पर्यङ्किका-आसनं तस्यां सुखं यथा स्यात्तथा निषण्णे सति-उपविष्टे सति । किम्भूतायां पर्यङ्किकायाम् ? मृदु-सुकुमारं मसृणं-अकठिनं यत् आस्तरणं उपर्याच्छादनवस्त्रं तद् भजन्तीति[२] या सा तस्यां, मृदुमसृणास्तरणाच्छादितायामित्यर्थः । तथा

---

१. प्रफुल्लं अनू. । २. भजतीति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परिजने च[१]-परिवारे सुस्थिते-स्वस्वस्थानप्राप्त्या सम्यगवस्थिते सति । तथा कुण्डिने नातिदूरवति सति-समीपस्थिते[२] सति दण्डपाशिकस्य-तलारस्य उच्चैः-स्पष्टं यथा स्यात्तथा वाक् उदतिष्ठत्-उत्तस्थौ प्रादुर्बभूव इति यावत् ।

**सिच्यन्तां राजमार्गाः कलशमुखगलद्गोमयाम्बुच्छटाभिः,[१]**
**स्तम्भाः प्रेङ्खत्पताकाः कुसुमपरिकरास्तोरणाङ्काः क्रियन्ताम् ।**
**स्थाप्यन्तां पूर्णकुम्भाः प्रतिनगरगृहं प्राङ्गणे चान्नमिश्रैः[२],**
**सिद्धार्थैः स्वस्तिकालीर्लिखत नरपतिर्नैषधः प्राप्त एषः[३] ॥७८॥**

**सिच्यंताम**िति । एष प्रत्यक्षो नैषधो नरपतिः-नलाभिधो राजा प्राप्तः-आयातः । अतो हे पौराः ! भवद्भी राजमार्गाः-राजपथाः कलशमुखेभ्यो गलन्त्यः-श्रवन्त्यो गोमयेन-भूमिलेपनेन मिश्रं यदम्बुः-जलं तस्य याश्छटास्ताभिः सिच्यन्तां-उक्ष्यन्ताम् । तथा स्तम्भाः प्रेङ्खन्त्यः-वायुवशात् चलन्त्यः पताकाः-ध्वजपटा येषु एवम्विधाः । तथा कुसुमानां परिकरः-वेष्टनं विद्यते येषु एवंविधाः। तथा तोरणान्येव अङ्कः-चिह्नं येषां ते तोरणाङ्काः । यद्वा, तोरणैः कृत्वा अङ्कः-भूषा येषां ते तोरणाङ्काः, एवम्विधाश्च क्रियन्ताम् । पताकापुष्पतोरणविभूषिता विधीयन्तामिति भावः । "**अङ्को भूषारूपकलक्ष्मसु**" [२/१-२] इत्य**नेकार्थः** । तथा नगरगृहं, गृहं प्रति प्रति नगरगृहं पूर्णकुम्भाः-जलभृतघटाः स्थाप्यन्तां-निवेश्यन्तां । च-पुनः यूयं प्रतिनगरगृहं अन्नमिश्रैः-भक्तसहितैः सिद्धार्थैः-सर्षपैः स्वस्ति-कालीः-चतुष्पंक्तिर्लिखत । "**स्वस्तिको मङ्गलद्रव्ये गृहभेदचनुष्कयोः**" इत्य**नेकार्थः**[३/१०४] । स्रग्धरावृत्तम् ॥

**अपि च–**

**[४]सत्काञ्च्यश्चन्दनार्द्रस्तनकलशयुगामुक्तमुक्तावलीकाः,**
**पात्राण्यादाय दूर्वादलदधिकुसुमोन्मिश्रसिद्धार्थभाञ्जि ।**
**सोत्तंसा हंसपिच्छच्छविवसनभृतो वर्तिताश्चर्यचर्या,**
**नार्यो निर्यान्तु तूर्यध्वनिलयललितं गीतमुच्चारयन्त्यः ॥ ७९ ॥**

**अपि च**-पुनराह दण्डपाशिकः–

**सत्कांच्य** इति । हे नार्यः !-सधवाः स्त्रियः ! भवत्यः तूर्यध्वनिलयेन-

१. परिजनेन च अनू. । २. समीपस्थे अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आतोधस्वरविलासेन ललितं-मनोहरं तूर्यवादनपुरस्सरं गीतमुच्चारयन्त्यः सत्यः पात्राणि-भाजनानि आदाय निर्यान्तु-अभिमुखं प्रयान्तु । "**लयस्तूर्यत्रयी साम्ये संश्लेषण-विलासयोः**" [२/३८४] **इत्यनेकार्थः** । किम्भूतानि पात्राणि ? दूर्वा च दलानि च पत्राणि दधि च कुसुमानि च तैरुन्मिश्राः-सहिता ये सिद्धार्थाः-सर्षपास्तान् भजन्ति यानि तानि तैर्भरितानीत्यर्थः । किम्भूता नार्यः ? सती-शोभना काञ्ची-कटिमेखला यासां ताः सत्काञ्च्यः, तथा चन्दनद्रवेण आर्द्र-स्तिमितं यत् स्तनकलशयुगं तस्मिन् आमुक्ता-आयोजिता मुक्तावली मौक्तिकलता याभिस्ताः । तथा सह उत्तंसेन-कर्णकुवलयेन विद्यन्त इति सोत्तंसाः । तथा हंसपिच्छवत्-राजहंसपक्षवत् छविः-कान्तिर्यस्य एवंविधं धवलं यद्वसनं-वस्त्रं तद् बिभ्रति-परिदधतीति हंसपिच्छाच्छविवसनभृतः । तथा वर्तितं-प्रवर्त्तितं यदाश्चर्य-अद्भुतं तेन वर्याः-रुचिराः । स्रग्धरा । ॥ ७९ ॥

**अयि भवत कृतार्थाः पौरनार्यश्चिरेण,**
**व्रजतु निषधनाथश्चक्षुषां गोचरत्वम्[१] ।**
**ध्रुवमयमवतीर्णः स्वर्गलोकादनङ्गो,**
**हरचरणसरोजद्वन्द्वलब्धप्रसादः ॥ ८० ॥**

## ॥ इति श्रीत्रिविक्रमभट्टविरचितायां [२]दमयन्तीकथायां हरचरणसरोजाङ्कायां षष्ठ उच्छ्वासः ॥ ६ ॥

अयीति । अयीति कोमलामन्त्रणे हे पौरनार्यः ! चिरेण-चिरकालं यावत् यूयं कृतार्थाः-सम्पन्नमनोरथा भवत । निषधनाथः-नलो भवतीनां चक्षुषां गोचरत्वं-ग्राह्यत्वं व्रजतु, नलं पश्यत इत्यर्थः । ध्रुवं शङ्के, स्वर्गलोकादयं अनङ्गः-कामो अवतीर्णः, कामसमानरूपत्वात् काम एव अवतीर्ण इति । चेदयं अनङ्गस्ततः साङ्गः सन् स्वर्गात् कथमवतीर्णः ? इत्यत आह-किम्भूतोऽयमनङ्ग ? हरचरणरोजद्वन्द्वात् लब्धः प्रसादः-अनुग्रहो येन सः, अतएव साङ्गो भूत्वा मन्मथ एवायमवातरदिति । मालिनी ॥ ८० ॥

**इति वाचनाचार्यश्रीप्रमोदमाणिक्यगणिशिष्यश्रीजयसोमगणि-**
**तच्छिष्यपण्डितश्रीगुणविनयगणिविरचितायां श्रीत्रिविक्रम-**
**भट्टविरचितश्रीदमयन्तीकथाविवृतौ**
**षष्ठ उच्छ्वासः समाप्तः ।**

● ● ●

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# मूलपाठस्य पाठान्तराणि

### षष्ठ उच्छ्वासः

४१५. १. मालाकारिणेव पु० । २. 'इव' नास्ति पु० । ३. 'शंख' नास्ति नि० चौ० । ४. प्रबोधनार्थं नि० चौ० । ५. निशान्धे निपा० ।

४१६. १. °विरिञ्चयोरिव पु० । २. पाण्डुरपिञ्जरं च नि० चौ० ।

४१७. १. °वेगसरीः नि० चौ० । २. मण्डपिकाः संवृणुत काण्डपटात् नि० चौ० । ३. मदत्सु पु० । ४. कर्मावसाने निपा० । ५. °अनुबन्ध्या नि० चौ० । ६. सान्ध्यविधिमधिकृत्य नि० चौ० । ७. ०गिरिशिरःशिखरभाजं नि० चौ० ।

४१८. १. श्रीनारायणस्यापि पु० । २. वाञ्छितार्थसिद्धये निपा० ।

४१९-४२०.१. लसद् नि० चौ; वलद् निपा० । २. °भ्रमणधृष्ट° नि० चौ० । ३. °रम्यसाम° नि० चौ०। ४. जयत्यसमसाहसः नि० चौ० । ५. °स्फुरति° पु० । ६. °सिद्धि° निपा० । ७. शिल्पधारो पु०; शिल्पकारो निपा० । ८. चिन्तामणिः निपा० ।

४२२. १. देवदेवं नि० चौ० । २. विजयिवारणेन्द्र नि० चौ० । ३. पुरासर निपा० । ४. °तपस्यत° पु० । ५. सुरसिद्ध° निपा० । ६. °गजेन्द्र° पु० । ७. तरंगां अपरगगां नि० चौ० ।

४२३. १. अकोल्ल° पु० । २. अञ्जनाशोकसौभाञ्जनक° नि० चौ० । अशोक 'सौभाञ्जनक' नास्ति निपा० । ३. 'च' नास्ति पु० । ४. °रावणावृतां; रावणाभृतां निपा० । ५. विचित्र° पु० । ६. मिच्छागततापसां च निपा० । ७. 'कापालिकखट्वांगयष्टिभिव समुद्रोपकण्ठलग्नां' इति पाठोऽवर्तते पु० । ८. विविधव्याधां विन्ध्याटवीं नि० चौ० पु० । ९. गोष्ठवसतिः पु० नि० चौ० । १०. तरूभूमिः निपा० । ११. वीरुध पु० ।

४२४. १. °क्रेंकार° निपा० । २. °मृदितमन्द पु० ।

४२९. १. तामपि नि० चौ० । २. अवधूनित नि० चौ०; अवधूयमान° पु० । ३. पुञ्जकेषु नि० चौ०; पंकजेषु निपा० । ४. पिञ्जराः करैः नि० चौ० ।

४३०. १. आच्छादित दिक् खराणि शिखराणि पु०; आच्छादितर २. सरित्तीरे तरू° नि० चौ० । ३. इवं निपा० । ४. चारुश्लोकयुगलं नि० चौ० । ५. अतिमधुरगीततरतरङ्गरंगिताक्षरं निपा० ।

४३१. १. अनुभुक्तः निपा०; उपमुक्तः पु० नि० चौ० ।

४३२. १. उत्थाय नि० चौ० । २. गदान्वितः निपा० ।

४३३. १. वलयान्कूजतः नि० चौ० । २. 'तर' नास्ति नि० चौ० । ३. कश्चन भवान् पु० ।

४३४. १. कूलकीचक नि० चौ० ।

४३५. १. अम्भोजराजेः पु० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

४३६. १. °चलच्चटुलचकोर° नि० चौ० ।

४३७. १. °बहुल पु० । २. तथा यथावलानां पु० ।

४३८. १. प्रियावार्त्तिकं नि० चौ० ।

४३९. १. सा सर्वथा नि० चौ० । २. 'सत्' नास्ति निपा० । ३. सप्रश्रयः नि० चौ० । ४. परिणमयति नि० चौ० । ५. वासरं वाऽसौ नि० चौ० । ६. °पुत्री निपा० ।

४४०. १. रूपाञ्चित नि० चौ० । २. चारुचित्रफलके नि० चौ० । ३. एवमुक्तगुणं निपा० । ४. प्रपञ्चतस्य पु० । ५. कौतुकजननसदृशं पु० ।

४४१. १. असह्योष्मणि निपा० । २. जलाशयाननुसरत्सु नि० चौ० । ३. श्वासिषु श्वापदेषु नि० चौ०; श्वसुश्वापदेषु; श्वासिश्वापदेषु निपा० । ४. पंकिलकूलप्रौढकर्दम° निपा० । ५. समङ्गाङ्गणे; तरङ्गाङ्गणे निपा० । ६. °निम्नशाद्वल° नि० चौ० । ७. °कपोतपोतकेषु नि० चौ० । ८. °कोष्णामन्दमकरन्द° नि० चौ० । ९. बहलतरुतलच्छायां नि०; चौ० बहलतरच्छायां पु० ।

४४३. १. स्थगयति नि० चौ० ।

४४४. १. तरुतलाश्रयान् नि० चौ०; तरुतलामाश्रयत नि० चौ० । २. मुंचतामन्दमृदुशाद्वलेषु नि० चौ०; मुंञ्चयत् शाद्वलेषु पु० । शाद्वले निपा० । ३. बलीवर्दकान् नि० चौ० । ४. महिषान् नि० चौ० । ५. प्रचारक्रमेण पु० । ६. वंशस्तम्बेषु नि० चौ० । ७. वेगसरान् नि० चौ० । ८. 'तीर' नास्ति निपा० । ९. 'तर' नास्ति नि० चौ० । १०. °उत्पल्लवलतारखण्डमण्डवेषु; उत्फुल्लतामण्डपेषु निपा० । उत्पल्लवलतारवण्डमण्डपेषु; उत्फुल्लल्लतामण्डपेषु निपा० । ११. आवाह्यन्तु निपा० ।

४४५. १. व्यपदेशी नि० चौ० । २. दर्शि पु० । ३. 'परिवार' नास्ति निपा० । ४. दर्शनीयजात्पतरतुङ्गतुरङ्गं निपा० ।

४४६. १. ततोपि नि० चौ० । २. नातिदूरेण नि० चौ० ।

४४८ १. निषधाधिपः निपा० । २. इवार्द्रार्द्रदृष्टिपातैः पु० । ३. प्रियस्वागत-प्रश्नालापेन नि०

४४९. १. °प्रधानमेव पु० ।

४५०. १. विनिर्मितायाः निपा० । २. परितः चौ; सरितः निपा० । ३. प्राणसंयमसन्ध्या-सूक्तजपपितृ° नि० चौ०; संयमनमायतध्राणं संयम्य सन्ध्यासूक्तं प्रतिजप्य निपा० । ४. भास्करस्य पु० नि० चौ० ।

४५१. १. कलहंससंचारं नि० पा० ।

४५२. १. आर्द्रहृदयतया निपा० । २. °उचितोचित° निपा० ।

४५४. १. निवसामः नि० चौ० ।

४५५. १. ततोप्यनुरूप° नि० चौ० । २. शुचिविदग्ध° नि० चौ० । ३. अदूरवर्तितः निपा०; त्रतिदूरवर्तितः चौ० निपा० । ४. पुरः सृत्य नि० चौ०; उपसृत्य; पुरोपसृत्य निपा० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

४५६. १. परमरहस्यं पु० ।

४५७. १. 'देवस्य' देवेन देव्यै दत्तं, तया च दमयन्त्याः समर्पितं परं पाठोधिको वर्तते नि० चौ०। २. अवग्राम्यं नि० चौ० । ३. नर्त्तनानां नि० चौ० ।

४५८. १. °मुकुलः पु० ।

४५९. १. °किरणरंजित° नि० चौ० ।

४६०. १. त एव पु० ।

४६१. १. उदीरितादरं नि० चौ० । २. आप्यायितप्राणं निपा० । ३. 'इदं' नास्ति नि० चौ० । ४. 'परं' नास्ति नि० चौ० । ५. 'तत्' नास्ति नि० चौ० । ६. °कपिकुला° नि० चौ० । ७. 'तल' नास्ति नि० चौ० ।

४६२. १. उच्चलन् नि० चौ० । २. °गैरिका° नि० चौ० । ३. 'विपिन' नास्ति निपा० ।

४६४. १. पाचकवृन्दोपनीत नि० चौ; पाचिकावृन्दारिकोपनीत° निपा० । २. मिथुनादिजनैः निपा०। ३. आहारमकरोत्; आहारमाहारयांचकार निपा० । ४. शुचिश्चन्दनेनोद्वर्त्तितकरः करकम्मलयुगलं पु० °कर°ः नि० चौ० । ५. °कलित° पु० ।

४६५. १. °कम्पताल° नि० चौ० । २. अभिषिञ्चिदिवामृतेन पु० । ३. सन्धानं नि० चौ० । ४.

४६६. १. एवंविधे च व्यतिकरे नि० चौ० । २. °कूत° निपा० ।

४६७. १. भवेत् पु० । २. ऽस्मिन् नि० चौ० ।

४६८. १. मार्ग निपा० । २. व्रजसि नि० चौ० । ३. नेदीयोऽसि निपा०।

४७०. १. किंनरेश्वरे नि० चौ० । २. कुटिततलोलद् नि० चौ० ।

४७१. १. °लंघना° पु० । २. बहुलकम्पा नि० चौ० ३. बहुलता पु० । ४. बहुरा बहुदृष्टरागा नि० चौ० ।

४७३. १. निशीथे निपा० । २. मिलति पु० ।

४७४-४७५. १. अर्द्धरात्रेऽपि खिन्नः नि० चौ० । २. प्रोषित निपा० । ३. आसन्नं निद्रागृहे निपा० । ४. हंस नि० चौ० । ५. °पटघटिकाच्छादित° निपा० । हंसतूलीतल्पं पु०; हंसतूलीतल्पतलं निपा० । ६. विरुतानि नि० चौ० । ७. दिनकरोदयोत्सवे नि० चौ०; दिनकरोच्छेव पु० । ८. मधुकरमधुरमन्दध्वना निपा० । ९. प्रभातोचितभिन्नषड्जानुबद्धमुग्धभाषाविद्ध-विशुद्धं निपा०; 'भिन्न' नास्ति नि० चौ० ।

४७६. १. प्रभातप्रहत पु० नि० चौ०। २. आपूरयतः नि०चौ०; ।

४७७. १. °चारुचर्चित° नि० चौ०; चारुचर्चाचिते पु० । २. °खुरचारीप्रचारेणा° नि०चौ०; °खुरचारप्रचारिणा° पु । ३. ०जलाप्लवेन निपा० ४. अतिस्थूलमत्युग्रमेकमग्रे पु०; °मग्रे राजा नि० चौ० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

४७९. १. 'पुराणादौ' नास्ति नि० चौ० । २. 'पुरा' नास्ति पु० । ३. °कुटीर° निपा० । ४. °मासनामानि नि० चौ० ।

४८०. १. °भन्द्र° नि० चौ० । २. °परिघ° नास्ति नि० चौ० । ३. °कौस्तुभोच्चैःश्रवःशशधर-लक्ष्मीसहोदर ऐरावतः निपा० । नास्ति पाठः पु० ।

४८१-८२. १. तन्मोदतामयं नि० चौ; तन्मोच्यनामयं पु; तत्सोच्यभयं निपा० । २. हृष्टहृदयः निपा० । ३. रममाणपामरमिथुन° निपा० । ४. उल्लासितपुलन्दः नि०चौ०; द्धासितपुलकः निपा० । ५. °सेवित° निपा० । ६. ग्रावविषममभ्यग्रावविषमं निपा० । ७. पार्पद्धिक° नि० चो. । ८. शिखरपरम्परां पु० नि० चौ०; शिखरपराचराः निपा० ।

४८४. १. सुस्निग्धप्रियबान्धना निपा० । २. छायाबद्धतलेषु निपा० । ३. विश्राम्य पु० ।

४८५. १. नर्यन् पु० । २. °तृषत्° पु० । ३. विकासि° नि० चौ० । ४. दमयन्तीं च निपा० । ५. अवलोकयिष्यामः नि० चौ० ।

४८८. १. भूनिरकात° नि० चौ० । २. समाना नि० चौ० । ३. राजराजन्मचक्रं नि० चौ०; राजन्मचक्रं निपा० । ४. कृपाणकुलानि नि० चौ० ।

४९०. १. चलति पु; वलन्ति निपा० । २. °विनर्त्तन° निपा० ।

४९१. १. एतेषां निपा० । २. मनो यूनां पु०; यूनां मनो युवतीनां नि० चौ०; यूनां नास्ति निपा० । ३. फलितं; कलिलं निपा० । नयनयोरत्मुल्वणं पु० नि० चौ० ।

४९२. १. पिण्डितपलाण्डवो नि० चौ० । २. वास्तूकवास्तु° नि० चौ० । ३. विविधपल्लवित° नि० चौ० । ४. कुरण्टकाः नि० चौ० । ५. कक्कोलफलाः नि० चौ० ।; नि० चौ० प्रतौ 'कुड्मलितकक्कोलफलाः कोरकितकुरण्टकाः' पाठस्य विपर्ययो दृश्यते । ६. °शरपत्रिका° निपा० । ७. पिण्डितागुरु° नि० चौ० । ८. पुष्पायुधवासा पुष्पारामाः नि० चौ०;। पुष्पागमाः निपा० ।

४९३. १. नीराशयाः नि० चौ०; नीराश्रयाः निपा० ।

४९४. १. कथ्यतां निपा० । २. इत्याश्वसितहृदयो निपा० । ३. °मधुविश्रम्भसंदर्भितभंगश्लेषग-र्भाभिर्गीर्भिरा-क्षिप्तमनसां नि० चौ०; । मधुमिश्रभंगश्लेष र्भाभिरूक्तिभिराक्षिप्तमनसां पु० । ४. अनुत्पादितस्वे इव नि० चौः, । ५. अर्धगव्यूतिमात्र-शेषोऽतिक्रान्तः नि० चौ०; मात्रावशेषः निपा० । ६. सेनानिवेशस्य नि० चौ० ।

४९६. १. °सम्बाध° नि० चौ० । २. °अलुप्ति° पु० निपा० । ३. अविच्छिन्न° नि० चौ० । ४. सेनां नि० चौ० ।

४९८. १. इति निपा० । २. बलानि बहूनि बहुधा नि० चौ० । ३. मण्डपेश्च नि० चौ० । ४. ताण्डवितबृहत्मुपुण्डरीकखण्डमय नि० चौ०; ताण्डवित वृहत्पुण्डरीकखण्डमण्डप पु० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

५. वार्त्तावेदन दूतेष्विव; विनोददूषितेष्विव निपा० । ६. रसति नि० चौ० । ७. °ध्वनिगम्भीरे नि० चौ० । ८. क्रंकारे निपा० । ९. 'स्तंभ' नास्ति० निपा । १०. जात्यवैडूर्यपर्यन्त-पर्यंकिकायां नि० चौ० । ११. नातिदूरवर्त्तिनि नि० चौ० । १२ दण्डवासिकस्य निपा० ।

५००. १. गलच्चन्दनाम्बुच्छटाभि नि० चौ० । २. धान्यमिश्रैः नि० चौ० । ३. नैषधोप्येष एवः निपा० । ४. सत्कान्त्यः निपा० ।

५०१. १. गोचरं वः नि० चौ०; गोचरं च पु० । गोचरे च निपा० । २. सकलविबुधमनोहारिण्यां दमयन्तीकथायां निपा० । दमयन्तीकथायां हरचरणसरोजाङ्कायां नास्ति पु० ।

• • •

श्रीः

## सप्तम उच्छ्वासः

अथ सप्तमोच्छ्वास व्याख्या प्रस्तूयते—

**एवमविश्रान्तमतितारस्वरेण पुरः पौरपुरंध्रिमण्डलान्युद्दण्डयतो दण्डपाशिकस्य[1] कलकलमाकर्णयत्यास्थानस्थिते राजनि, प्रविश्य प्रणामप्रेङ्खोलितचारुकण्ठ[2]कन्दलावलम्बितजाम्बूनदस्थूलशृङ्खलास्फालितवक्षः-स्थलः स्थविरवयाः सुवेषप्रतीहारः[3] सविनयमुक्तवान् ।**

**एव**मिति । आस्थानं-सभा तस्मिन् स्थिते-निलीने राजनि-नले एवं-अमुना प्रकारेण अविश्रान्तं-निरन्तरं अतितारस्वरेण-अत्युच्चैर्ध्वनिना पुरः-अग्रे पौरपुरन्ध्रिमण्डलानि-नागरिककुटुम्बिनीवृन्दानि उद्दण्डयन्तः-गाढमुत्साहयतो दण्डपाशिकस्य-तलारस्य कलकलं-कोलाहलं आकर्णयति सति, प्रविश्य सभांगणे-प्रवेशं विधाय, स्थविरवयाः-वृद्धः सुवेषप्रतीहारः सविनयं-प्रणतिपूर्व उक्तवान् । किम्भूतः सुवेषप्रतीहारः ? प्रणामेन प्रेङ्खोलिता-दोलायमाना । चार्वी-मनोज्ञा कण्ठकन्दले अवलम्बिता-लम्बायमानीकृता जाम्बूनदस्य-कनकस्य या स्थूलशृङ्खला-आभरणविशेषस्तया आस्फालितं-आस्फोटितं वक्षः-स्थलं यस्य सः । दण्डपाशिकस्येति दण्डपाशौ स्तोऽस्येति अस्त्यर्थे इकः ।

अथ यदुक्तवांस्तदाह—

**देव, धृतमाङ्गल्यकल्पवेषाः[4] पुष्पफलाक्षतपूर्णस्वर्णपात्रपाणयः पुरःस्थिता अमी[5] ब्राह्मणाः [6]कुण्डिनपुरपौराः पुरंध्रयश्च देवदर्शनार्थितया द्वारिसेवावसरमनुपालयन्ति ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कथयन्ति चैवमदूरे विदर्भेश्वरोऽपि देवं द्रष्टुमायाति ।**

**लग्न इव श्रूयते च शङ्खस्वनविदर्भितो विदर्भोपकण्ठे पठद्बन्दिवृन्दकोलाहलः ।**

**'तदादिशतु देवो यथाकर्त्तव्यम्' इत्यभिधाय स्थिते तस्मिन् 'भद्रभूते, त्वरितं प्रवेशय विदर्भाधिपस्य परिजनं स्वयमपि तदर्धपथमनुसर' इति नलो दौवारिकमादिदेश ।**

**सोऽपि 'यथाऽऽज्ञापयति देवः' इत्यभिधाय यथादिष्टमकरोत् ।**

हे **देव** !-राजन् ! धृतो मांगल्ये-मङ्गलभावे कल्पः-दक्षो वेषः-मण्डनं यैः, भविष्यसि माङ्गल्यं, तथा पुष्पैः फलैरक्षतैश्च पूर्णानि-भृतानि यानि स्वर्णपात्राणि तानि पाण्योर्येषां ते एवम्विधाः, पुरस्थिताः-अग्रे स्थिता अमी ब्राह्मणाः तथा कुण्डिनपुनगरस्य[१] पौराः-नागरिकाः पुरन्ध्रयश्च-कुटुम्बिन्यो देवस्य दर्शनमेव अर्थः-प्रयोजनं येषां यासां चेति देवदर्शनार्थाः-देवदर्शनोत्सुकाः द्वारिसेवावसरमनुपालयन्ति-सेवाक्षणं प्रतीक्षन्ते, कदाऽवसरो भवेत् यदा गत्वा राजानं सेवामहे इति भावः ।

**एवं** ते ब्राह्मणादयः कथयन्ति— न अदूरे-समीप एव विदर्भेश्वरोपि-भीमोऽपि देवं द्रष्टुमायाति ।

**लग्न** इव-आयात एव च-पुनः विदर्भोपकण्ठे-विदर्भानदीसमीपे शङ्खध्वनिना विदर्भितः-सहितः पठितो[२] बन्दिवृन्दस्य-पाठकसमूहस्य[३] कोलाहलः श्रूयते ।

**तत्**-तस्मात् देवः-नृप आदिशतु-आज्ञापयतु यथाकर्त्तव्यं-कर्त्तव्यमनतिक्रम्य यथाकर्त्तव्यं-यद्विधेयं तदभिदधातु इत्यर्थः । इति-पूर्वोक्त प्रकारेण अभिधाय-उक्त्वा तस्मिन् सुवेषप्रतीहारे स्थिते सति, नलो दौवारिकं-प्रतीहारं प्रति इति आदिदेश-आदिष्टवान्। इतीति किम् ? हे भद्र !-सौम्य ! भद्रभूते ! त्वरितं-शीघ्रं विदर्भाधिपस्य-भीमस्य परिजनं प्रवेशय-सभान्तःप्रवेशं कारय । भद्रभूतिरिति द्वाःस्थस्य नाम । द्वारे नियुक्तो दौवारिकः, **"तत्र नियुक्तः"** [पा० सू० ४।४।६९] सप्तम्यन्तात् इति नियुक्तेऽर्थे ठक्, द्वारादित्वात् [**द्वारादीनां च**, पा० सू० ७।३।४] ऐच् । स्वयमपि-आत्मनापि त्वं तस्य-भीमस्य अर्धपथं-अर्धमार्गं अनुलक्षीकृत्य सर-व्रज । यदा इतः अर्धमार्गे समागतो विलोक्येत तदा भवतापि तदभिमुखं गन्तव्यमिति भावः ।

**सोऽपि**-दौवारिको यथा देव आज्ञापयति-आदिशति तथा विधास्ये इत्यभिधाय-

१. कुण्डिनपुरः—कुण्डिननगरस्य अनू. । २. पठतो अनू. । ३. मंगलपाठकसमूहस्य अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उक्त्वा यथादिष्टं-आदिष्टमनतिक्रम्य अकरोत् ।

**अनन्तरमनतिचिरादितस्ततो दोधूयमानचारुचामरकलापपवननर्तित[१]-कर्णकुवलयः, वल्गुवल्गनोल्ललनलङ्घनलास्यलीलापदैः पथि प्लवमान-[२]मिव तरलतुरंगममधिरुढः, कनककलशशिखरैरेकदेश[३]स्फुरितविद्युत्स्तब-कै[४]रकाण्डाडम्बरितमेघमण्डलैरिव मायूरातपत्रखण्डैराच्छादितगगनान्तरालः शस्त्रोद्वहनकिणाङ्कितकठोरकण्ठोपकण्ठैः कठिनप्रकोष्ठलुठल्लोहवलयै[५]-रूर्ध्वबद्धोद्भटजूटकैरलक[६]करालमौलिभिरर्धोरुकपरिधानैर्नि[७]शितकुन्त-पाणिभिरभितस्त्वरितपातिभिः पत्तिभिरनुगम्यमानः, मनाङ्मृदुमृदङ्गध्वनि-करम्बिते कोमलकांस्यतालशालिनि वांशिकवाद्यमानवंशनिस्वने दत्तकर्णः, कर्णिकारगौराङ्गोऽङ्गणे[८] नातिदूरेऽप्यदृश्यत भीमभूमिपालः ।**

**अनन्तरं**-पश्चात् अनतिचिरात्-स्तोकेनैव कालेन नातिदूरे-समीपे अङ्गणे भीमभूपालोऽपि अदृश्यत-आलोकि । किम्भूतो भीमभूपालः ? इतस्ततो दोधूयमानानि-वीजनवशादतिशयेन कम्पमानानि चारूणि-मनोज्ञानि यानि चामराणि तेषां यः कलापः-समूहस्तस्य पवनेन-वातेन नर्त्तितं-कम्पिते कर्णकुवलये-अवतंसीकृतनीलोत्पले यस्य सः, प्रकीर्णकैर्वीज्यमान इत्यर्थः । पुनः किम्भूतः ? तरलः-चपलो यस्तुरङ्गमः-अश्वस्तं अधिरूढः-आश्रितः । किम्भूतं तरलतुरङ्गमम् ? उत्प्रेक्ष्यते-वल्गु-चारु यद् वल्गनं-व्रजनं विक्रममाणता, तथा उल्ललनं-उच्चैर्विलसनं कूर्दनं, तथा लंघनं-मृगादिवत् फाला, तथा लास्यं-नृत्यद्गतिस्ततो द्वन्द्वस्तैः कृत्वा यानि लीलापदानि-लीलया-पदरचनानि तैः पथि-मार्गे प्लवमानमिव-तरन्तमिव, आसनस्थैर्येण अनुद्घातसुखत्वात् । पुनः किम्भूतः? मायूरातपत्रखण्डैः-मायूरातपत्रसमूहैः आच्छादितं-आवृतं गगनान्तरालं-नभोमध्यं येन सः । किम्भूतैः ? कनककलशाः-सौवर्णकुम्भाः शिखरेषु-अग्रेषु येषां ते तैः। मायूरातपत्रखण्डैः कैरिव ? उत्प्रेक्ष्यते-एकदेशे स्फुरितः-दीप्तो विद्युत्स्तबकः-तडित्गुच्छो येषु एवम्विधैः अकाण्डे-अकस्माद् आडम्बरितैः-उल्लसितैर्मेघमण्डलैरिव । मायूरातपत्रसमूहानां मेघमण्डलानि, सौवर्णकलशानां च विद्युत्ततय उपमानम् । पुनः किम्भूतः ? अभितः-समन्तात् त्वरितं-शीघ्रं पतन्ति-गच्छन्तीत्येवंशीलास्त्वरितपातिनस्तथाविधैः पत्तिभिः-पदातिभिरनुगम्यमानः, पुरतो राजा पश्चात्पदातयः । किम्भूतैः पत्तिभिः ? शस्त्राणां-आयुधानां यद् उद्वहनं-धारणं तस्य किणेन-व्रणेन अंकितं चिह्नितं कठोरकण्ठोपकण्ठं-कठिन-गलसमीपं येषां ते तथाविधैः । तथा कठिनप्रकोष्ठे-कठोरस्पर्शकलाचिकायां लुठत्-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परिवर्तमानं लोहवलयं येषां ते तैः, राजपुत्रा हि प्रकोष्ठे मणिकूर्परान्तरे दार्ढ्याय लोहमयवलयानि धारयन्ति । तथा ऊर्ध्वं बद्ध उद्भटः-उत्कृष्टो जूटकः-केशबन्धविशेषो यैस्ते तैः । तथा अलकाः-कुटिलाः करालाः-सटालत्वात् रौद्रा मौलयः-संयताः केशा येषां ते तैः। तथा अर्द्ध ऊरुः प्रमाणमस्य तदर्द्धोरुकं येन वाससा कटीप्रभृति अर्द्धोरुपर्यन्तं छाद्यते तत्परिधानं-वासो येषां ते तैः । तथा निशिताः-तीक्ष्णाः कुन्ताः पाणिषु येषां ते तैः । पुनः किम्भूतः ? वांशिकेन वैणविकेन वाद्यमानो यो वंशः-वेणुस्तस्य निस्वने-ध्वनौ दत्तौ कर्णौ येन सः । वंशवादनमस्यास्तीति वांशिकः । किम्भूते वंशनिस्वने ? मनाक्-स्तोकं मृदुः-अकठोरो यो मृदङ्गध्वनिस्तेन करम्बिते-मिश्रिते, तथा कोमलेन मृदुस्वनेन कांस्यतालेन शालते-शोभत इत्येवंशीलस्तस्मिन् । पुनः किम्भूतः ? कर्णिकारः-द्रुमोत्पलस्तद्वद् गौरं-पीतं अङ्गं-शरीरं यस्य सः ।

**ततश्च चामरग्राहिणीहस्तपल्लवमवलम्ब्यमानः सहेलमुत्थाय प्रथम-मुत्थितेन संभ्रमवशवल्गितवक्षःस्थलावलम्बित[१]कुसुमदाम्ना विसर्पि-[२]कर्पूरकुङ्कुममिलन्मृगमदामोदेन त्वरितसंपातपतत्पटवासपांसुना सामन्त-चक्रेण परिकरितः कतिपयपदानि निषधेश्वरस्तदभिमुखमगात् ।**

**ततश्चे**ति । ततः-भीमस्याङ्गणप्राप्त्यवगमानन्तरं निषधेश्वरः-नलः चामरग्राहिण्या हस्तपल्लवमवलम्ब्यमानः-आश्रयन् सन् सहेलं-सविलासं उत्थाय स्वस्मात् प्रथमं-पूर्वं उत्थितेन सामन्तचक्रेण-मण्डलेश्वरवृन्देन परिकरितः-परिवारितस्तस्य-भीमस्य अभिमुखं-सम्मुखं कतिपयपदानि अगात्-ययौ । किम्भूतेन सामन्तचक्रेण ? सम्भ्रमवशेन-आदरवशेन वल्गितं-चलितं वक्षःस्थले अवलम्बितं-लम्बायमानीकृतं कुसुमदाम-पुष्पमाला यस्य तत्तेन । तथा कर्पूरं-घनसारः कुङ्कुमं च-घुसृणं ताभ्यां मिलन्-संयुज्यमानो यो मृगमदः-कस्तूरिका तस्य यः आमोदः-परिमलः कर्पूरकुङ्कुममिलन्मृगमदामोदः विसर्पी-दिशि दिशि प्रसरणशीलः कर्पूरकुङ्कुममिलन्मृगमदामोदो यस्य तत्तेन । तथा त्वरितं[१] सम्पातेन-शीघ्रगमनेन पतन् पटवासः-वासः सुरभीकरण द्रव्यं तस्य पांसु-धूलिर्यस्य तत्तेन ।

**सोऽपि सत्वरोपसृतस्य ताम्बूलप्रसेविका[३]वाहिनः पुरुषस्य स्कन्ध-मवष्टभ्य दूरादेव तुरंग[४]पृष्ठादवातरत् ।**

**एवमन्योन्यनयनसंपातस्मिताननौ समकालमीषन्नमितमौलिमण्डलौ समसमयप्रसारितभुजौ सरभसमाश्लेषवशविशीर्यमाणहारावलीगलन्मुक्ता-**

---

१. त्वरित० अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**वली[१]च्छलेनाङ्गेष्वमान्तमिव प्रथमप्रेमामृतनिष्यन्दिबिन्दुविसर[२]मुद्गिरन्ताव-न्योन्यमाशिश्लिषतुः ।**

**तथाविधे च व्यतिकरे, पप्रथे[३] प्रेक्षकाणां दक्षिणोत्तरदिक्पा-लयोर्धर्मराजधनदयोरिव समागमे महा[४]न्नयनोत्सवो हर्षोत्कर्षकलकलश्च ।**

**सोऽपि**-भीमः सत्वरं-शीघ्रं उपसृतस्य-समीपमागतस्य ताम्बूलस्य या प्रसेविका-चर्मनिर्मितं पर्णपूगाद्यास्पदं यस्याः स्थगिकेतिख्यातिस्तां वहति-बिभर्त्तीत्येवंशील-स्ताबूलप्रसेविकावाही तस्य पुरुषस्य स्कन्धं-अंशं अवष्टभ्य-अवलम्ब्य अदूरादेव-समीपादेव तुरङ्गमपृष्ठादवातरत्-अवरुरोह ।

**तत एवं**-वक्ष्यमाणप्रकारेण तौ-भीमनलौ अन्योन्यं परस्परं आशिश्लिषतुः-आलिलिङ्गतुः । एवमिति कथम् ? किम्भूतौ ? अन्योन्यं नयनयोः सम्पातेन-वीक्षणेन स्मितं-विकसितं आननं ययोस्तौः तयोः । पुनः किम्भूतौ ? समकालं-युगपत् ईषत्-मनाक् नमितं-नीचैःकृतं मौलिमण्डलं-मस्तकं याभ्यां तौ । तथा समसमयं-समकालमेव प्रसारितौ-दीर्घीकृतौ भुजौ याभ्यां तौ प्रसारितभुजौ । पुनः किम्भूतौ ? उत्प्रेक्ष्यते-संरभसं-सादरं यथा भवति तथा आश्लेषवशेन विशीर्यमाणा-त्रुट्यन्ती या हारावली-मौक्तिकलता तस्या गलन्ती-क्षरन्ती या मुक्तावली-मौक्तिश्रेणिस्तस्याश्छलेन अङ्गेषु-शरीरावयवेषु [१]अमान्तं-अधिकीभवन्तं प्रथमप्रेमैव अमृतं-सुधा तस्य निःस्यन्दी-क्षरणशीलो यो बिन्दुविसरः-पृषत्समूहस्तं उद्गिरन्ताविव-उद्वमन्ताविव । शङ्के, अमूनि हारावल्यास्त्रुटितानि मौक्तिकानि न, किन्तु प्रथमसङ्गमोत्पन्नप्रेमामृतरसबिन्दव एव अङ्गेष्वमान्तो बहिर्निःसृता इति । एतावता तयोः सङ्गमे[२] प्रणयाधिक्यं दर्शितम् ।

**तथाविधे** च-तयोः सङ्गमलक्षणे व्यतिकरे-प्रस्तावे दक्षिणोत्तरदिशौ पालयत इति दक्षिणोत्तरदिक्पालौ तयोर्नलभीमयोः समागमे-संयोगे प्रेक्षकाणां-द्रष्ट्रीणां महान् नयनोत्सवः-नेत्रयोर्महः हर्षोत्कर्षेण-प्रमोदाधिक्येन कलकलश्च-कोलाहलः पप्रथे-प्रससार विस्तीर्णः । तयोः कयोरिव ? उत्प्रेक्ष्यते-धर्मराजधनदयोरिव-दक्षिणेशोत्तरेशयोरिव । भीमस्य दक्षिणेशत्वात् धर्मराजोपमानं, नलस्योत्तरेशत्वाद् धनदोपमानं । मन्ये, धर्मराजधनदावेव मिलिताविति[३]भावः ।

**तदनु पुनः प्रधावितप्रतीहारोपनीतम्, अतिविचित्रत्रिभङ्गिभङ्गोत्-कीर्णकर्णाटिकारूपरमणीयस्तम्भिकावष्टम्भम्, उज्जृम्भमाण[५]माणि-क्यमकरमुखमुक्तमौक्तिकसरविराजितम्, अपूर्वकर्मनिर्मितभव्यव्या-**

१. अमान्तं अनू. । २. संगे अनू. । ३. मिलिताविति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**लावलीकीर्णमुखालंकृतम्, उच्चकाञ्चनसिंहासनद्वितयमुभौ[१] भेजतुः ।**

**अन्योन्यकुशलप्रश्नसुखालापव्यतिकरविरामे च विदर्भेश्वरो निषधनाथमवादीत् ।**

**तदनु**-तयोर्मिलनानन्तरं पुनः-भूयः उभौ-भीमनलौ उच्चं-उन्नतं यत्काञ्चनस्य सिंहासनं तस्य यद् द्वितयं तत् भेजतुः-शिश्रियतुः । किम्भूतं उच्चकाञ्चनसिंहासनद्वितयम् ? प्रधाविताः-शीघ्रं तदानयनाय प्रवृत्ता ये प्रतीहाराः-दौवारिकास्तैरुपनीतं-उपढौकितम् । तथा अतिविचित्रेण-नानाविधेन त्रिभङ्गिभङ्गेन-स्थानकविशेषवैचित्र्येण उत्कीर्णानि-घटितानि यानि कर्णाटिकारूपाणि-कर्णाटदेशोद्भवस्त्रीणामाकृतयः, सिंहासनादौ हि उत्तम्भन-स्तम्भिकासु पश्चिमभागे त्रिभङ्गिभङ्गेन स्त्रीरूपमुत्कीर्यते, अतस्तै रमणीयाः-रम्याः याः स्तम्भिकाः-लघुस्तम्भास्ता अवष्टम्भः-आधारो यस्य तत्, तस्य एतदाधारे स्थितत्वात् । तथा उज्जृम्भमाणानि-विकस्वराणि कान्तिमति माणिक्यानि-रत्नानि यत्र एवंविधं यन्मकरमुखं-प्रणाली तस्मिन् मुक्तो[१] यो मौक्तिकसरः-मुक्ताहारस्तेन विराजितं-शोभितं । तथा अपूर्वकर्मणा-अद्भुतशिल्पेन निर्मिता-घटिता भव्या-सुन्दरा या व्यालावली-व्यालः सिंहादिर्हिंस्रसत्त्वं तस्य या आवली-पंक्तिस्तस्याः कीर्णं-विस्तीर्णं यन्मुखं तेन अलङ्कृतं-विभूषितम् । सिंहासनादौ हि काष्ठदन्तादिनिर्मिता व्यालावलीशोभार्थं क्रियते ।

**अन्योन्यं**-परस्परं कुशलप्रश्नस्य सुखयतीति सुखः "**पचाद्यच्**" [ ] सुखकारी यः आलापः-भीमेनोक्तं भवतां कुशलं, नलेनाप्युक्तं भवतां कुशलमित्येवंरूप उल्लापस्तस्य यो व्यतिकरः-सम्बन्धस्तस्य विरामे-अवसाने विदर्भेश्वरः-भीमो निषधनाथं-नलं अवादीत् ।

**अद्यास्मत्कुलसन्ततिः सुकृतिनी धन्याद्य दिग्दक्षिणा,**
**पुण्यप्राप्यसमागमातिथिजना जाताः कृतार्थाः श्रियः ।**
**श्लाघ्यं जन्म च जीवितं च निजमप्यद्यैव मन्यामहे**
**यत्रास्मत्सुकृतोदयेन बहुना यूयं गृहानागताः ॥ १ ॥**

**अद्येति** । अद्य अस्माकं कुलसन्ततिः-अन्वयपरम्परा सुकृतिनी-पुण्यवती जाता । "**सन्ततिस्तु तनये दुहितर्यपि । परम्पराभवे पंक्तौ गोत्रविस्तारयोरपि**" [३।३३१] इत्य**नेकार्थः** । तथा अद्य दक्षिणादिक् धन्या । तथा श्रियः-लक्ष्म्यः कृतार्थाः-सफला जाताः । किम्भूताः श्रियः ? पुण्यैः प्राप्यः समागमो येषां एवंविधा अतिथिजना यासु ताः ।

१. मुक्तो बद्धो ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रिया हि एतदेव फलं यद् अतिथयः सत्क्रियन्ते । तथा अद्यैव यत्तदोर्नित्याभिसम्बन्धात् तत् जन्म च श्लाघ्यं-प्रशंस्यं मन्यामहे-जानीमहे । च-पुनस्तन्निजमपि जीवितं अद्यैव श्लाघ्यं मन्यामहे । यत्र जन्मनि जीविते च बहुना-प्रभूतेन अस्माकं सुकृतोदयेन-पुण्योदयेन यूयं गृहान् आगताः-प्राप्ताः । **"गृहाः पुंसि च भूम्न्येव"** [२, पुरवर्ग १५] इत्य**मरः** । शार्दूलविक्रीडितम् ॥ १ ॥

**इतः प्रभृति च—**

**आ ब्रह्मावधिविस्तरत्कविगिरो गीर्वाणकर्णातिथेः,**
**कीर्तेः पूर्णकलेन्दुसुन्दररुचो यास्याम्यहं पात्रताम् ।**
**किं चान्यज्जनितक्लमोऽप्ययमभूदाकण्ठतृप्तस्य मे,**
**युष्मत्सङ्गसुखामृतेन सफलः संसारचक्रभ्रमः ॥ २ ॥**

**इतः प्रभृति च**-अस्माद्दिनादारभ्य च—

**आब्रह्मेति** । अहं कीर्तेः पात्रतां-भाजनतां यास्यामि-यशोभाजनं भविष्यामीति भावः । किम्भूतायाः कीर्तेः ? ब्रह्मावधि-ब्रह्माण्डपर्यन्तं आमर्यादीकृत्य आब्रह्मावधि विस्तरन्ती-प्रसरन्ती कवीनां गीर्यस्यां सा तस्याः । तता गीर्वाणानां-देवानां कर्णयोरतिथिरिव या सा तैरपि या श्रूयत इत्यर्थः । तथा पूर्णकलेन्दुवत्-राकाशशाङ्कवत् सुन्दरा-धवला रुक्-कान्तिर्यस्याः सा तस्याः, कविवर्ण्या याः स्वर्गताया इन्दुशुभ्रायाः कीर्तेः पात्रं जातः इत्यर्थः । किञ्च-पुनरन्यत्-अपरं किं युष्माकं सङ्गे-संयोगे यत् सुखं एव अमृतं-पीयूषं तेन आकण्ठं-कण्ठपर्यन्तं तृप्तस्य-आघ्रातस्य मे-मम जनितः क्लमः-खेदो येन एवंविधोप्ययं संसारचक्रभ्रमः-भवचक्रवालभ्रमिः सफलोऽभूत् । शार्दूलविक्रीडितम् ॥ २ ॥

**इत्यभिधाय प्रवणं प्रणयस्य, प्रगुणं गुणानाम्, अनुकुलं कुलक्रमस्य, योग्यं भाग्योदयस्य, सदृशं देशकालस्य, समानं मानोत्सवसंततेः[१], सरूपं रूपसंपदाम्[२], उचितमाचारस्य तस्या[३]तिथेरातिथेयमगर्वः कुर्वन्, दुर्वारवैरि-वारणान्वारणान्, वायुवेगातुरंगान्[४], अमूल्य[५]समुल्लसितांशुमञ्जरीजाल-जनितेन्द्रचापचक्रभ्रम[६]मप्रमाणं माणिक्यम्, एकत्र[७]ग्रथिततताराप्रकरान्-हारान्[८], हाससमुज्ज्वलभांसि[९] वासांसि, सलावण्याः पण्यनारी-श्च[१०]यमुपढौकयांचकार ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**प्रथमसमागमेऽप्यप्रमेयप्रेमारम्भरभसोल्लासितहृदयः पुनः सोत्कर्षहर्षोद्भेदगद्गदाक्षरमिदमवादीत् ।**

**इति**-अमुना प्रकारेण अभिधाय-उक्त्वा तस्य अतिथेः-नलस्य अतिथेयं[१]-अतिथिसत्क्रियां अगर्वः-गर्वरहितः कुर्वन् सन् अमूनि-अमूनि वस्तूनि उपढौकयाञ्चकार-प्राभृतीचकार । अतिथौ साधु आतिथेयं "**पथ्यतिथिवसतिस्वपतेर्ढञ्**" [पा० सू० ४।४।१०४] । किम्भूतं आतिथेयम् ? प्रणयस्य-स्नेहस्य प्रवणं-प्रह्वं स्नेहानुकुलमित्यर्थः । तथा गुणानां-दाक्षिण्यादीनां प्रगुणं-अनुकूलम् । तथा कुलक्रमस्य-अन्वयपरिपाट्या अनुकूलं एतादृग्विधे-एतद् विधेयमेव । तथा भाग्योदयस्य योग्यं-उचितं, एवंविधे आतिथेये कृते कर्तुर्भाग्योदयो जातो ज्ञायते । तथा देशकालस्य-अवसरस्य सदृशं-समानं, अस्मिन्नवसरे इदं विधेयमित्यर्थः । तथा मानः-आगतातिथेः सत्क्रिया तस्मै या उत्सवसन्ततिः-उत्सवप्रवाहस्तस्याः समानं । तथा सम्पदां-समृद्धीनां सरूपं-सदृशं, यादृशी[२] सम्पदो विद्यते[३] तादृशीनां समानसम्पदानुसारी[४] इत्यर्थः । तथा आचारस्य विधे रुचितं कानि कानि वस्तूनि ? इत्याह—दुर्वाराः-वारयितुमशक्या ये वैरिणः-शत्रवस्तान् वारयन्ति-निषेधयन्ति ये दुर्वारवैरिवारणास्तथाविधान् वारणान्-गजान् । तथा वायुवद् वेगः-रयो येषां ते वायुवेगाः-सत्वरगामिनस्तथाविधान् तुरङ्गान् । तथा अमूल्यं-अनर्घ्यं समुल्लसितं-प्रादुर्भूतं यद् अंशुमञ्जरीजालं-किरणकलापस्तेन जनित इन्द्रचापचक्रस्य-सुरपतिधनुर्मण्डलस्य भ्रमः-सन्देहो येन तत्, माणिक्यानामपि अनेकवर्णत्वात् इन्द्रधनुर्भ्रमोत्पादकत्वं, एवंविधं अप्रमाणं-बहुलं माणिक्यजालं रत्नवृन्दं । तथा एकत्र-एकस्मिन् गुणे ग्रथिताः-गुम्फितास्तथा ताराप्रकाराः-तारासदृशाः स्निग्धवृत्तत्वादिगुणयोगात् ततः कर्मधारयस्तथाविधान् हारान्-मौक्तिकलताः, "**प्रकारः सदृशे भेदे**" [३।६०८] इत्य**नेकार्थः** । तथा हासः-हास्यं तद्वत् समुज्ज्वला-विशदा भाः-छविर्येषां एवंविधानि वासांसि-दुकूलानि । तथा सलावण्याः-**ससौन्दर्याः** पण्यनारीश्च-वाराङ्गना उपढौकयाञ्चकारेति क्रिया सर्वत्रापि योज्या ।

प्रथमसमागमेपि-अभिनवमिलनेपि अप्रमेयः-अगण्यो यः प्रेमारम्भः-स्नेहोपक्रमस्तस्य यो रभसः-आदरस्तेन उल्लासितं-उच्छ्वासितं हृदयं-चेतो यस्य सः, एवम्विधः सन्, पुनः-भूयः सोत्कर्षः-अधिको यो हर्षोद्भेदः प्रमोदोल्लासस्तेन गद्गदानि-अव्यक्तान्यक्षराणि यत् एवं यथा भवति तथा इदं-वक्ष्यमाणं अवादीत्-उवाच ।

**आसेतोः कपिकीर्तनाङ्कशिखरादाराच्च विन्ध्यावधे-**
**रापूर्वापरसिन्धुसीमविषयस्त्वन्मुद्रया मुद्रिताः[१] ।**

---

१. आतिथेयं अनू. । २. या दृश्यः अनू. । ३. विद्यन्ते अनू. । ४. सम्पदनुसारी अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अद्यास्मद्गृहमागतस्य भवतो जाता विधेया वयं,**
**स्वीकारः क्रियतां किमन्यदपरं प्राणेषु चार्थेषु च ॥ ३ ॥**

**आसेतो**रिति । हे नल ! आसेतोः-सेतुमामर्यादीकृत्य च-पुनर्विन्ध्यावधेः-विन्ध्याचलसीम्नः आरात्-अर्वाक् तथा पूर्वापरसिन्ध्वोः-पूर्वापरसागरयोः सीमानं-पर्यन्तं आमर्यादीकृत्य आपूर्वापरसिन्धुसीमविषयाः देशास्तात् स्थ्यात् तद्व्यपदेशेन विषयवासिनो लोकास्त्वदीया या मुद्रा-आज्ञा तया मुद्रिताः-अङ्किता वर्तन्ते, त्वदाज्ञां सर्वेपि अङ्गीकुर्वत इत्यर्थः । किम्भूतात् आसेतोः ? कपीनां-हनुमदादीनां यत्कीर्त्तनं-कीर्त्तिस्तदेव अङ्कः-लक्ष्म येषु एवंविधानि शिखराणि-कूटानि यस्य तत्तस्मात् सेतोः कपिभिः कृतत्वात् । अद्य अस्माकं गृहमागतस्य भवतो वयं विधेया-विनयस्था जाताः, आज्ञाकारिणो अभूमेत्यर्थः । अन्यत्-अपरं किम् ? अस्माकं प्राणेषु च अर्थेषु च-द्रव्येषु च स्वीकारः-ममीकारः क्रियताम्, यथा अमीषां प्राणा अर्थाश्च अस्मदीया इति ॥ ३ ॥

**एवमुपबृंहयति प्रेम, प्रकाशयति प्रियंवदताम्, उद्योतयत्युदारताम्, दर्शयत्यादरम्, आविर्भावयति सर्वभावम्, भीमभूभुजि, नलोऽपि 'सरलस्वभावः स्वच्छार्द्रहृदयोऽयं महानुभावः' इति चिन्तयन् 'अलमलमखिलात्मसर्वस्वोपनयनेन, भवद्दर्शनमेवास्माकमिह सार्णवस्वर्णपूर्णवसुमतीलाभादपि परमो लाभः । नहि प्रियतमदर्शन[१]सुखाद्वित्तलाभसुखमतिरिच्यते । न च[२] भवद्भिभवेऽस्माकं[३] परस्वबुद्धि[४]र्नापि भवच्छरीरेऽप्य[५]नात्मभावः[६] । किं नान्यदेवंविधसूक्तसुनृतामृतगर्भगीर्भिरानन्दयतास्मन्मनो महानुभावेन किं न कृतमभिहितं वा प्रणयोचितम्" इति ब्रुवाणस्तं बहु मानयामास ।**

**एवंविधे च व्यतिकरे वैतालिकः, प्रस्तुतमपाठीत् ।**

**एवं**-अमुना प्रकारेण भीमभूभुजि प्रेम उपबृंहयति-वर्द्धयति सति । तथा प्रियंवदतां-अनुकूलभाषित्वं प्रकाशयति सति । तथा उदारतां दातृत्वं उद्योतयति सति । तथा आदरं-बहुमानं दर्शयति सति । तथा सर्वभावं-सकलैश्वर्यं आविर्भावयति सति । "**भावोऽभिप्रायवस्तुनोः । स्वभावजन्मसत्तात्मक्रियालीलाविभूतिषु । चेष्टायोन्योः**" [२।५४५-५४६] इत्य**नेकार्थः** । नलोपि सरलः-ऋजुः स्वभावो यस्य स सरलस्वभावः । तथा स्वच्छं-विशदं आर्द्रं-स्निग्धं हृदयं-चेतो यस्य एवंविधोऽयं महानुभाव । इति चिन्तयन् सन्, इति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ब्रुवाण:-कथयन् तं-भीमं बहुमानयामास-बहुमानयति स्म गौरवयति स्म । इतीति किम् ? हे राजन्! अखिलं-समस्तं यत् आत्मसर्वस्वं-स्वीयसर्वधनं राज्यादि तस्य उपनयनेन-प्रापणेन दानेन इत्यर्थ:, अलं-अलमिति वारणेऽव्ययम् । अलं भूषणपर्याप्तवारणेषु वीप्सायां द्वित्वम् । यतो भवतां दर्शनमेव अस्माकं इह अवसरे सार्णवा:-ससमुद्रा: स्वर्णै: पूर्णा या वसुमती तस्या लाभादपि परम:-प्रकृष्टो लाभ: । हि:-यस्मात् प्रियतमस्य-अतिशयेन वल्लभस्य दर्शने यत्सुखं तस्मात् वित्तलाभसुखं न अतिरिच्यते-नाधिकीभवति । न चेति, भवतां विभवे-द्रव्येऽपि अस्माकं परस्य स्वमिदमिति बुद्धिर्न च, किन्तु स्वीयमेवेदमिति जानीमहे । नाऽपि भवतां शरीरेऽपि अनात्मभाव:-अनात्माभिप्राय:, किन्तु भवतां शरीरमपि आत्मीयत्वेन जानीम इति भाव: । किञ्चान्यत् । एवम्विधानि पूर्वोक्तानि सूनृतानि-सत्यानि सूक्तानि-सुभाषितानि तान्येव अमृतं तद्गर्भे-मध्ये यासां एवंविधाभि: गीर्भि: अस्मन्मन आनन्दयता-हर्षयता भवता-महानुभावेन महाप्रभावेण किं न कृतम् ? वा-अथवा प्रणयस्य-स्नेहस्य उचितं-योग्यं किं न अभिहितं-उक्तम् ?

**एवंविधे** च-परस्परप्रशंसनलक्षणे व्यतिकरे-प्रस्तावे वैतालिक:-मागध: प्रस्तुतं-प्राकरणिकं अपठत्-पपाठ ।

अथ यद् अपठत् तदाह—

**'आपूर्वापरदक्षिणोत्तरककुप्पर्यन्तवेलावना-**
**दाज्ञां मौलिषु मालिकामिव नृपा: कुर्वन्तु दीर्घायुषो: ।**
**ब्रह्मस्तम्बविलम्बिकीर्तिलतयोर्विस्तारिलक्ष्मीकयो-**
**रन्योन्यस्य दिनानि यान्तु युवयो: स्नेहेन सौख्येन च ॥ ४ ॥**

**आपूर्वे**ति । नृपा: ! दीर्घायुषो:-चिरञ्जीविनोरनयो:-नलभीमयो: पूर्वापर-दक्षिणोत्तरककुभां पर्यन्तेषु यानि वेलावनानि तानि आमर्यादीकृत्य आपूर्वापर-दक्षिणोत्तरककुप्पर्यन्तवेलावनात् मौलिषु-मस्तकेषु आज्ञां-आदेशं मालिकामिव-स्रजमिव कुर्वन्तु । यथा मालिका शिरसि ध्रियते तथैतयोराज्ञां शिरसि धारयन्तु इत्यर्थ: । तथा युवयोरन्योन्यस्य-परस्परस्य स्नेहेन-प्रेम्णा च-पुन: सौख्येन दिनानि यान्तु । किम्भूत-योर्युवयो: । ब्रह्मस्तम्बे-ब्रह्माण्डे विलम्बिनी-लग्ना कीर्त्तिरेव लता ययोस्तयो: । पुन: किम्भूतयो: ? विस्तारिणी-विस्तरणशीला लक्ष्मीर्ययोस्तयोर्विस्तारिलक्ष्मीकयो: । "**बहुव्रीहौ क:**" [ ] । शार्दूलविक्रीडितम् ॥ ४ ॥

**एवमुपक्रमाविरुद्धविद्ग्[1]दालापलीलया परस्परमाश्यानतुहिनशिलाश-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कलाकारकर्पूरपारीपरिकरितताम्बूलार्पण[१]प्रणयेन परितुष्टपरिजनपरिहासगोष्ठ्या[२] च किमप्यभिनवम्, किमपि पुरातनम्, किमप्युत्पाद्यम्[३], किमपि यथावस्थितं जल्पाकजनजल्पितं शृण्वन्तौ[४] तस्थतुः[५] स्थवीयसीं वेलाम् ।

अनन्तरमनुसरति मध्यभागमम्बरस्यांशुमालिनि नलः 'स्वगृहानलंकुर्वन्तु भवन्तः' इति प्रणयेन[६] विदर्भेश्वरं विससर्ज ।

गते च तस्मिन्, 'अहो वात्सल्यम्, अहो परमौदार्यम्, अहो लोकवृत्तकौशलम्[७], अहो वाग्विभववैदग्ध्यम्, अहो प्रश्रयोऽस्य विदर्भराजस्य' इति तद्गुणप्रवणाः कथाः कुर्वन्नाप्तजनपरिजनेन सह मुहूर्तमिवासांचक्रे ।

[८]चिन्तितवांश्च–

**एवं**-अमुना प्रकारेण तौ-नलभीमौ उपक्रमेण-तदाद्याचिख्यासया अन्योन्यविवक्षितार्थप्रारम्भेण वा सह अविरुद्धा-अप्रतिकूला-अनुकूला या विद्वदालापलीलाविचक्षणसूक्तवचनविलासस्तया परस्परं-अन्योन्यं आश्यानं-अविलीनं यत्तुहिनं-हिमं तस्य यत् शिलाशकलं तदाकारं यत्कर्पूरं तस्य या पारी-खण्डं तया परिकारितं सम्बद्धं यत्ताम्बूलं तस्य अर्पणेन यः प्रणयः-स्नेहस्तेन भीमो नलाय दत्ते, नलस्तु भीमायेति । तथा परिजनेन सह या परिहासगोष्ठी-सविलासहास्यसंलापस्तया जल्पाकाः-बहुजल्पनशीला ये जनास्तेषां जल्पितं-उक्तं शृण्वन्तौ सन्तौ स्थवीयसीं-प्रचुरां वेलां तस्थतुः । अतिशयेन स्थूला स्थवीयसी स्थूलदूरेत्यादिना सिद्धिः । किम्भूतं जल्पितम् ? किमपि अभिनवं-नूतनं, किमपि पुरातनंजीर्णं, तथा किमपि उत्पाद्यं-बुद्ध्या परिकल्पितं, किमपि यथावस्थितं-यथास्वरूपनिवेदकम्। "**उपक्रमस्तु विक्रमे । उपधायां तदाद्याचिख्यासा चिकित्सयोरपि । आरारम्भे**" [४।२२२-२२३] इत्य**नेकार्थः** । जल्पाकेति "**जल्पभिक्षकुट्टलुण्टवृङः षाकन्**" [पा० सू० ३।२।१५५] इति षाकन् शीलार्थे ।

**अनन्तरं**-सुहृद्गोष्ठीकरणादूर्ध्वं अंशुमालिनि-सूर्ये अम्बरस्य-नभसो मध्यभागं अनुलक्षीकृत्य सरति-गच्छति सति, नलः प्रणयेन-स्नेहेन विदर्भेश्वरं-भीमं इति-अमुना प्रकारेण विससर्ज-प्रेषयामास । इतीति किम् ? भवन्तः स्वगृहान् अलङ्कुर्वन्तु ।

**तस्मिन्**-भीमे गते च सति आप्तः-यथार्थवक्ता यो निजजनस्तेन सह मुहूर्त्तमिव

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आसाञ्चक्रे-निषसाद । अत्र इवशब्दो वाक्यालङ्कारे । किं कुर्वन् नलः ? इति-अमुना प्रकारेण तस्य-भीमस्य ये गुणास्तद्गुणास्तैः प्रवणाः-प्रह्वाः सहिता इत्यर्थः, याः **कथास्ताः** कुर्वन् । इतीति किम् ? अहो ! इति अद्भुतं अस्य विदर्भराजस्य-**भीमस्य वात्सल्यं**-स्निग्धता । अहो ! परमौदार्य-प्रकृष्टदातृत्वं । अहो ! लोकवृत्तिषु-लोकव्यवहारेषु कौशलं-रक्षत्वं । अहो ! वाग्विभवस्य-वचनविलासस्य वैदग्ध्यं-चातुर्यं । अहो ! प्रश्रयः-स्नेहः ।

च-**पुनश्चिन्तितवान्**-इति चिन्तां कृतवान् ।

**अनुगुणघटनेन यद्यपीयं भवति हि हस्तगतेव कार्यसिद्धिः ।**
**भयतरलभुजंगवक्रवृत्तेस्तदपि न विश्वसिमो वयं विधातुः ॥ ५ ॥**

**अन्विति** । हि-स्फुटं इयं कार्यसिद्धिर्दमयन्तीप्राप्तिरूपा, यद्यपि अनुगुणानां-अनुकूलानां दमयन्त्यनुरागभीमबहुमाननादिरूपाणां घटनेन-संयोजनेन हस्तगतेव-हस्तप्राप्तेव भवति-विद्यते । अत्र भूधातु, सत्तार्थः । यदुक्तम्-

**"सत्तायां मङ्गले वृद्धौ निवासे व्याप्तिसम्पदोः ।**
**अभिप्राये च शक्तौ च प्रादुर्भावे गतौ च भूः ॥"** [ ]

इति । तदपि-तथापि वयं विधातुः-विधेर्न विश्वसिमः-न विश्वासं कुर्मः, विधिस्तु अन्यथापि विदध्यात् इति । किम्भूतस्य विधातुः ? भयेन तरलः-लोलो यो भुजङ्गस्तद्वत् वक्रा-कुटिला वृत्तिर्यस्य स तस्य । तरलत्वं चाऽन्यवक्रतातिशयहेतुः ॥ ५ ॥

**अङ्गाः [१]कङ्गकलिङ्गबङ्गमगधाः सर्वेऽप्यमी पार्थिवा,**
**दिक्पालाश्च मरुत्पतिप्रभृतयः कन्यार्थिनः संगताः ।**
**नो विद्मः कथमेष्यतीह घटनां कार्यं यतस्तत्क्षणा-**
**न्नानाभङ्गिभिरिन्द्रजालसदृशं दैवं विचित्रीयते[२] ॥ ६ ॥**

**अङ्ग** इति । अङ्गाः-अङ्गदेशाधिपतयः, तथा कङ्गाश्च कलिङ्गाश्च बङ्गाश्च मगधाश्च ते अङ्गकाङ्गकलिङ्गबङ्गमगधाः सर्वेपि अमी पार्थिवाः । तथा मरुत्पतिः-इन्द्रः प्रभृतौ-आदौ येषां ते मरुत्पतिप्रभृतयो दिक्पालाश्च-यमवरुणकुबेराभिधाः कन्यां अर्थयन्ते-अभिलषन्तीत्ये-वंशीलाः कन्यार्थिनः संगताः-मिलिताः । कार्यं-दमयन्तीवरणलक्षणं घटनां-संयोजनां कथमेष्यतीति ? इह-प्रस्तावे नो विद्मः-न जानीमः । यतः-यस्मात् दैवं विधिर्विचित्रीयते-विशेषेण चित्रं-आश्चर्यं करोति विचित्रीयते, सर्वस्यापि कौतुकं जनयतीत्यर्थः । **"नभो वरिवश्चित्र ङः क्यच्"**[पा० सू० ३।१।१९] इति, आश्चर्यलेखनयोः क्यच्, अघटितं घटयति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुघटितं वियोजयतीति । किम्भूतं दैवम् ? तत्क्षणान्नानाभङ्गिभिः-अनेकविच्छित्तिभिः इन्द्रजालसदृशं-मायानिर्मितकर्मसमानं । यथेन्द्रजालं तत्क्षणान्नानारूपभाग्, भवति तथेदं[1] दैवमपि ॥ ६ ॥

**अथवा–**

**का नाम तत्र चिन्ता प्रभवति पुरुषस्य पौरुषं यत्र ।**
**[१]वाङ्मनसयोरविषये विधौ च चिन्तान्तरं किमिह[२] ॥ ७ ॥'**

**अथवेति** पक्षान्तरे, प्रथमपक्षस्तु चिन्तारूपः द्वितीयस्त्वयम् । प्रभवति-समर्थं भवति, नामेति सम्भावनायां, तत्र का चिन्ता-पर्यालोचना सम्भाव्यते ? नैव चिन्तेत्यर्थः । "**नाम प्राकाश्यकुत्सयोः । सम्भाव्याभ्युपगमयोरलीके विस्मये क्रुधि**" [२।४६-४७] इत्य**नेकार्थः** । च-पुनरिह वाङ्मनसयोरविषये-अगोचरे विधौ-दैवे चिन्तान्तरं किम् ? स एव प्रमाणमित्यर्थः । अन्तरशब्दो विशेषार्थः । उभयथापि चिन्ता न कार्येति भावः । अतएवोक्तं **श्रीरामसूनुना** श्रीमता गङ्गाधरेण-

"कदाचित् क्वापि केनापि चिन्ता धार्या न चेतसि ।
धृत्वा चिन्तां हि तन्मध्ये द्रागवश्यं विनश्यति ॥" [ ]

वाक् च मनश्च वाग्मनसे "**अचतुर**" [पा०सू०, ५।४।७७] इत्यादिना अजन्तो निपात्यते ॥ ७ ॥

**एवमनेकविध[३]वितर्कभङ्ग[४]भाजि भूभुजि, भुजबलशालिषु विसर्जितेषु सेवकसामन्तेषु, विरलीकृते परितः परिजने, परिहासपेशलालापाप्तजनगोष्ठी-प्रक्रमेणातिक्रान्ते[५] स्तोकसमये, भूरिभव्याभरणावरणरमणीयरूपाः, काश्चिदार्द्रक्रमुकफलहस्ता[६], काश्चित्कक्षावलम्बितताम्बूलीपत्त्रपिण्ड-करण्डिकाः[७], काश्चित्पिहितपट्टांशुकपटलिकापाणयः, काश्चित्काश्मीर-करम्बितकस्तूरिकामोदामन्दचन्दनभाञ्जि भाजनानि भजमानाः, काश्चिद-वान[८]नालिकेरजम्बीरबीजपूर[९]पूरितपात्रीपाणयः, काश्चिदसंख्यखण्ड-खाद्यविशेषानमूल्यमङ्गल[१०]माला[११]भरणानि च सकौतुकमादाय दमयन्त्या प्रहिताः प्रथम[१२]प्रधाविप्रतीहारसूचिताः प्रविविशुरन्युब्जाः कुब्जिका वामनिकाश्च ।**

---

१. तथैदं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सविस्मयाः स्मररूपातिशायिनं नरपतिमवलोक्य 'साधु भोः स्वामिनि, साधु स्थानेऽभिनिविष्टासि, योग्ये जाताग्रहासि, पात्रे जातस्पृहासि[१३], लप्स्यसे जन्मफलम्, अवाप्स्यसि स्त्रीस्वभावभाग्यम्[१४], अनुभविष्यसि यौवनसुखानि, मानयिष्यसि संसारफलमहोत्सवम्[१५] । [१६]वन्दनीया सा कापि पुरुषरत्नाकरकुक्षिर्जननी, यस्याः[१७] सकलसंसारनरहारावलीमध्यमहानायकोऽयमुत्पन्नः' इत्यवधारयन्त्यो मनाङ्नमितमौलिदोलितसीमन्तमुक्ताफलाः 'स्वामिन्नयमस्मदीयः प्रणामः, अन्यापि क्वापि काचित्प्रणमति' इत्यभिधाय स्मयमानवदनकमलाः सलीलमवनिपालं प्रणेमुः ।**

**अन्योन्यकृतसंबोधनाश्च सहर्षमिदमवोचन् ।**

भूमुजि-नले **एवं**-अमुना प्रकारेण अनेकविधा ये वितर्कभङ्गाः-विकल्पभेदास्तान् भजतीति अनेकविधवितर्कभङ्गभाक् तस्मिन् सति । तथा सेवका ये समान्ताः-मण्डलेश्वरा राजानस्तेषु विसर्जितेषु यथास्थानं प्रेषितेषु सत्सु । किम्भूतेषु सेवकसामन्तेषु ? भुजबलेन शालन्ते-शोभन्ते इत्येवंशीला भुजबलशालिनस्तेषु । तथा परितः-समन्तात् परिजने विरलीकृते-स्तोकीकृते सति । तथा परिहासेन-स्मितेन पेशला-मनोज्ञा आलापा येषां एवंविधा ये आप्तजनास्तैः सह यो गोष्ठीप्रक्रमः-संलापावसरस्तेन स्तोकसमये-अल्पकाले अतिक्रान्ते-निवृत्ते सति । भूरीणि-प्रचुराणि भव्यानि-सुन्दराणि यानि आभरणानि-अलङ्कारा आवरणानि च-वासांसि तै रमणीयं रम्यं रूपं यासां ताः, एवम्विधा दमयन्त्याः प्रहिताः प्रथमं प्रधावितः-द्रुतमागतो यः प्रतीहारस्तेन सूचिता, यथा देव ! दमयन्तीप्रेषिता दास्यः समायान्तीति ज्ञापिता दास्यः प्रविविशुः-प्रवेशं व्यधुः । किम्भूताः ? काश्चित् आर्द्रक्रमुकफलानि हस्तयोर्यासां ता आर्द्रक्रमुकफलहस्ताः । *तथा काश्चित् कक्षायां अवलम्बिताः-धृताः ताम्बूलीपत्रपिण्डस्य नागवल्लीदलसमूहस्य करण्डिका-स्थगी याभिस्ताः* एवंविधाः । "**पिण्डो वृन्दे जपापुष्पे गोले बोलेऽङ्गसिल्हयोः । कवले**" [२।१२४।१२५] **इत्यनेकार्थः** । तथा काश्चित् पिहिता-आवृता पट्टांशुकानां-पट्टकुलवाससां पटलिका पाण्योर्यासां ताः । तथा काश्चित् काश्मीरेण-घुसृणद्रवेण करम्बिता-मिश्रिता या कस्तूरिका तस्या य आमोदः-परिमलस्तेन अमन्दं-प्रचुरं यच्चन्दनं तद्भजन्ति यानि तानि काश्मीरकरम्बितकस्तूरिकामोदामन्दश्चन्दनभाञ्जि, एवंविधानि भाजनानि-पात्राणि भजमाना-बिभ्रत्यः । तथा काश्चित् अवानानि-सार्द्राणि यानि नालिकेरजम्बीरबीजपूराणि तैः पूरिता-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भृता या पात्री सा पाण्योर्यासां ताः । वानं शुष्कफलम् । तथा काश्चित् असंख्याः-बहवो ये खण्डखाद्यविशेषास्तान्, च-पुनः अमूल्यानि-अनर्घ्याणि यानि मङ्गलसाधु- मालाभरणानि तानि सकौतुकं-सकुतूहलं यथा भवति तथा आदाय-गृहीत्वा न्युब्जाः-अधोमुखाः न न्युब्जां अन्युब्जाः-दिदृक्षारसेन ऊर्ध्ववदना इति भावः, एवंविधाः कुब्जिकाः वामनिकाश्च ।

सविस्मयाः-साश्चर्याः सत्यः स्मररूपं अतिशेते कामसौन्दर्यात् अधिकी भवत्यवश्य-मिति स्मररूपातिशायी तं कामरूपाधिकरूपं नरपतिं-नलमवलोक्य इति अवधारयन्त्यः-मनसि विचारयन्त्यो मनाक्-ईषत् प्रणामार्थं नमितः-नीचैः कृतो यो मौलिः-मस्तकं तेन दोलितं-कम्पितं सीमन्तमुक्ताफलं-केशान्तरालस्य मौक्तिकं यासां ता एवंविधाः सत्यः, हे स्वामिन् ! अयं-अस्मदीयः प्रणामः क्वापि-कस्मिंश्चिद्देशे अन्यापि काचिद् भैमीलक्षणा प्रणमति इति अभिधाय स्मयमानं-ईषद्धसत् वदनकमलं यासां ताः एवंविधाः सलीलं-सविलासं अवनिपालं-नलं प्रणेमुः-ममन्ति स्म । अन्योन्यं-परस्परं कृतं सम्बोधनं-आह्वानं याभिस्ताः एवंविधाश्च सहर्ष-सप्रमोदं यथा भवति तथा अवोचन् । इति अवधारयन्त्य इत्यत्र इतीति किम् ? भोः स्वामिनि !-दमयन्ति ! साधु-चारु यथा स्यात्तथा साधुस्थाने-भव्याश्रये अभिनिविष्टासि-आग्रहवत्यसि । तथा योग्ये-उचिते स्थाने जात आग्रहः-स्वीकारो यस्याः सा जाताग्रहा असि । तथा पात्रे-योग्ये जाता स्पृहा-अभिलाषो यस्याः सा जातस्पृहासि-अभिलाषवत्यसि । तथा जन्मनः फलं लप्स्यसे । तथा स्त्रीस्वभावे-स्त्रीत्वे यद्भाग्यं तत् अवाप्स्यसि । तथा यौवने-तारुण्ये यानि सुखानि तानि अनुभविष्यसि-वेदयिष्यसे । तथा संसारफलस्य यो महोत्सवस्तं मानयिष्यसि-उपभोक्ष्यसे । मानिरिह उपभोगार्थः । सा काऽपि-महितमहिमा पुरुषरत्नस्य आकरप्राया कुक्षिर्यस्याः एवंविधा जननी-माता वन्दनीया-स्तवनीया । यस्याः-मातुः सकला ये संसारे नराः-पुरुषास्त एव हारावली तस्य मध्ये-गर्भे महानायक इव उत्कृष्टतेजस्वित्वात् तरलमणिरिव यः स एवंविधोऽयं-नल उत्पन्नः ।

अथ ताः कथं परस्परं सम्बोध्याहुः स्मेत्याह–

**'हंहो हंसि चकोरि चन्द्रवदने चन्द्रप्रभे चन्दने,**
**चम्पे चङ्गि लवङ्गि गौरि[१] कलिके कक्कोलिके मालति ।**
**[२]एतत्प्राप्नुत[३] जन्मजीवितफलं लावण्यलक्ष्मीनिधौ,**
**सौभाग्यामृतनिर्भरे[४] नरपतौ निर्वान्तु नेत्राणि वः ॥ ८ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**हंहो** इति ? हंहो ! इति सम्बोधने, हे हंसि ! हे चकोरि ! हे चन्द्रवन्दने ! हे चन्द्रप्रभे ! हे चन्दने ! हे चम्पे ! हे चङ्गि ! हे लवङ्गि ! हे गौरि ! हे कलिके ! हे कक्कोलिके ! हे मालति ! यूयं एतत् जन्मनश्च जीवितस्य च फलं जन्मजीवितफलं तत् प्राप्नुत । वः-युष्माकं नेत्राणि अस्मिन् नरपतौ-नले निर्वान्तु-वीक्षणेन शीती भवन्तु । किम्भूते नरपतौ ? लावण्यलक्ष्म्या निधिरिव यः स तस्मिन्, सर्वापि लावण्यलक्ष्मीरस्मिन् वर्तत इत्यर्थः । तथा सौभाग्यमेव अमृतं तेन निर्भरः-सम्पूर्णस्तस्मिन् सौभाग्यामृतनिर्भरे । अमृतपूर्णे हि ह्रदादौ स्नानादिना शीतीभवनं घटत एवेति छायार्थः । "**सौभाग्यामृतनिर्झरे**" इति पाठान्तरम् ॥ ८ ॥

**अपि च–**

**कुन्दे सुन्दरि[1] चन्दि नन्दिनि[2] हले दिष्ट्याद्य वर्धामहे,[3]**
**देव्याः सोऽयमनङ्गसुन्दरवपुः प्राणेश्वरः प्राप्तवान् ।**
**तस्याः संप्रति यत्कृते कृशतनोः क्रीडावने शाखिनां,**
**दीर्घश्वासमरुद्भिरग्निपरुषैर्म्लायन्ति ते पल्लवाः ॥ ९ ॥**

**अपि** च-पुनः–

**कुन्दे** इति । हे कुन्दे ! हे सुन्दरि ! हे चन्दि ! चन्दे रञ्जनाह्लादार्थे **नदादित्वात्** ङीष्, हे नन्दिनि ! हे हले ! अद्य दिष्ट्या आनन्देन वर्धामहे इति हर्षातिशयोक्तिः । देव्याः-दमयन्त्याः सोऽयं अनङ्गवत् सुन्दरं वपुर्यस्य स एवंविधः प्राणेश्वरः-प्रियतमः सम्प्रति प्राप्तवान्-प्राप्तः । स इति कः ? यत्कृते-यदर्थं यन्मिलनेच्छया कृशा-तन्वी तनुर्यस्याः सा तस्याः कृशतनोः तस्याः-दमयन्त्याः अग्निवत् परुषैः-कठोरस्पर्शैः दीर्घा ये श्वासमरुतः-निश्वासवायवस्तैः कृत्वा क्रीडावने शाखिनां ते पल्लवाः-किसलयानि म्लायन्ति-विच्छाया भवन्ति । एतेन विरहाधिक्यं तस्याः दर्शितम् ॥ ९ ॥

**अपि च–**

**यं श्रुत्वैव मनोभवालसदृशा देव्या धृतोन्मादया,**
**नीयन्ते गृहदीर्घिकातटतरुच्छायाश्रये वासराः ।**
**प्राप्तः शोणसरोजपत्रनयनो निःशेषसीमन्तिनी-**
**भ्राम्यन्नेत्रपतत्त्रिविश्रमतरुः सोऽयं नलो नैषधः' ॥ १० ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अपि च**-पुनः काचित्-काञ्चित् सखीं सम्बोध्य ब्रूते-

**यं श्रुत्वे**ति । हे सखि ! यं-नलं श्रुत्वैव देव्या-दमयन्त्या । गृहदीर्घिकायाः-गृहवाप्यास्तटे ये तरवः-द्रुमास्तेषां या छाया तस्या य आश्रयः-आश्रयणं अङ्गीकारस्तस्मात् । '**गृहदीर्घिकातटतरुच्छायाश्रये**' इति पाठे तु गृहदीर्घिकातटतरुणां या छाया सैवाऽऽश्रयः-सद्म तस्मिन् , वासरा नीयन्ते-अतिवाह्यन्ते । विरहदुःखित्वात् सौधेषु स्थातुं न शक्यते, अतएव दिनानि तत्र गम्यन्त इत्यर्थः । किम्भूतया देव्या ? मनोभवेन-कामेन अलसे-मन्थरे दृशौ यस्याः सा तया । तथा धृत उन्मादः-उन्मत्तता यया सा तया । सोऽयं नैषधः-निषधदेशाधिपतिः-नलः प्राप्तः-आयातः । किम्भूतः ? शोणं-रक्तं यत् सरोजपत्रं-पद्मदलं तद्वन्नयने अर्थान्नेत्रप्रान्तौ यस्य सः, नेत्रयोः प्रान्तशोणत्वं च सल्लक्षणं । पुनः किम्भूतः ? निःशेषाः-समस्ता याः सीमन्तिन्यः-स्त्रियस्तासां भ्राम्यन्ति-अवलोकनाय तरलीभवन्ति यानि नेत्राणि तान्येव पतत्त्रिणः-पक्षिणस्तेषां विश्रमाय-खेदापनयनार्थं तरुरिव यः स । यथा भ्राम्यन्तः पक्षिणस्तरुषु विश्राम्यन्ति तथा युवती नेत्राण्यपि नले विश्राम्यन्ति, सौन्दर्यातिशयात्तत्रैव निश्चलीभवन्तीत्यर्थः । **"आमादेस्तु विकल्पेन वृद्धिः, आमः अमः, चामश्चमः, विश्रामः विश्रमः"** [ ] इति **प्रक्रियाकौमुद्याम्** । शार्दूलविक्रीडितम् ॥१०॥

**एवमन्योन्यमभिधाय समीपमुपसृतास्ताः क्षितिपतिस्त्वनुराग[1]तरङ्ग-तरत्तारकेण सादरं दूरोत्क्षिप्तपक्ष्मणा चक्षुषा संतोषपुञ्जमञ्जूषिका इव, आनन्दकन्दलीरिव, अमृतपङ्कपुत्रिका इव, मधुमासविकासित[2]सहकार-मञ्जरीरिव, दमयन्तीप्रेषिताः सस्पृहमवलोकयन्, 'इत इत[3] एत कुशलं तत्र भवतीनाम्, उपविशत, गृह्णीत ताम्बूलम्, आवेदयत स्वस्वामिनीसंदेशम्,' इति ससंभ्रमं संभाषयामास ।**

**एवमि**ति । क्षितिपतिस्तु नलः एवं-अमुना प्रकारेण अन्योन्यं-परस्परं अभिधाय-उक्त्वा समीपमुपसृताः-समागतास्ताः दमयन्तीप्रेषिताः दासीः अनुरागः-प्रेमबन्धस्तस्य ये तरङ्गाः-परम्परास्तैस्तरन्ती-प्लवमाना तारका-कनीनिका यस्मिंस्तत्तथाविधेन, तथा सादरं दूरं अतिशयेन उत्क्षिप्तानि-उच्चैः कृतानि पक्ष्माणि-नेत्ररोमाणि येन, तथाविधेन चक्षुषा सस्पृहं-साभिलाषं अवलोकयन् सन्, इति ससम्भ्रमं-सादरं यथा भवति तथा सम्भाषयामास-वादयति स्म । किम्भूतास्ताः ? सन्तोषपुञ्जस्य मञ्जूषिका इव-पेटा इव, सन्तोषवतीरित्यर्थः । तथा आनन्दस्य कन्दलीरिव-प्ररोहानिव । तथा अमृतपङ्कस्य पुत्रिका इव-पाञ्चालिका इव,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुधापङ्कघटिता इवेत्यर्थः । तथा मधुमासेन-चैत्रेण विकासिताः-प्रफुल्लीकृता याः सहकारमञ्जर्यस्ता इव, मनोहरत्वादित्यर्थः । इतीति किम् ? इत इतः-अस्मिन् अस्मिन् प्रदेशे एत-आगच्छत । "**इण् गतौ**" [पा०धा० १०४५] इत्यस्य धातोराङ्‌पूर्वकस्य लोट्‌मध्यमपुरुषबहुत्वे रूपम् । कुशलं-भद्रं तत्रभवतीनां पूज्यानां, उपविशत-निषीदत, ताम्बूलं गृह्णीत-क्रमुकफलपर्णचूर्णसंयोगस्ताम्बूलं, स्वस्वामिन्याः सन्देशं-वार्त्तां आवेदयत-कथयत ।

**ताश्च 'महानयं प्रसादः' इति ब्रुवाणाः समुपविश्य 'राजाधिराज[१], राजीवदलदीर्घाक्षी क्षेमवार्त्तां पृच्छति 'न नाम देवस्यापघने घर्मांशुघर्मोर्मिनिर्मितः कोऽपि खेदः समपद्यत, न वा समविषममार्गलङ्घनश्रमेण कापि परिमाथिनी परिजनस्य ग्लानिरभूत्, बहूनि दिनानि देवेनाध्वनि विलम्बितम् । इदं च तया प्राणेश्वर प्रियं प्राभृतं प्रहितम्, इदमुक्तम्, इदमेकान्तसंदिष्टम्, इदं प्रकाशप्रश्रयापलीलायितम्, इति राजानमञ्जसा जजल्पुः ।**

**ताश्च**-दास्यो महानयं प्रसादः-अनुग्रहो यत् स्वयं स्वाम्येवं[१] ब्रूत-इति ब्रुवाणाः समुपविश्य-निषद्य, हे राजाधिराज ! राजीवदलवद्दीर्घे अक्षिणी यस्या एवंविधा दमयन्ती भवतां क्षेमवार्त्ता-कुशलवार्त्ता पृच्छति-यथा भवतां कुशलमिति । नामेति-अभ्युपगमगर्भायां पृच्छायां देवस्य-राज्ञः अपघने-शरीरे घर्मांशुः-सूर्यस्तस्माज्जाता ये घर्मोर्मयः-परिस्वेदजलवीचयस्तैर्निर्मितः-जनितः कोऽपि खेदः-श्रमो न समपद्यत-न जातः । न वेति पक्षान्तरगर्भायां पृच्छायां, समश्च-ऋजुर्विषमश्च-दृषदादिभिः कठिनो यो मार्गस्तस्य यल्लंघनं-अतिक्रमणं तस्माज्जातो यः श्रमस्तेन कापि-अल्पापि परिमथ्नाति-पीडयतीत्येवंशीला परिमाथिनी-दुःखजनयित्री ग्लानिर्बलहीनता-असक्तता परिजनस्य-सेनाया न वा अभूत्, सेना कुशलिनी वर्तत इत्यर्थः । "**ग्लानिस्तु क्लमथः स्मृतः**" [२।६०१] इति **हलायुधः** । तथा बहूनि दिनानि यावत् देवेन अध्वनि-मार्गे विलम्बितं-विलम्बः कृतः । इदं च तया-देव्या प्राणेश्वरस्य-प्रियतमस्य प्रियं-इष्टं प्राभृतं-ढौकनं प्रहितं-मुक्तम् । तथा इदं उक्तं । इदं एकान्ते-रहसि संदिष्टं-सन्देश उक्तः । तथा इदं तस्याः प्रकाशः-प्रकटो यः प्रश्रयालापः-स्नेहालापस्तेन लीलायितं-विलासवद्भवनं अलीलावत् लीलावद्भवनं लीलायितं, तद्वति वर्त्तमानाल्लीला शब्दादायि प्रत्यये भाव क्ते च रूपम् । इयं प्रकटा प्रणयवार्त्ता उक्तास्तीति, इति-अमुना प्रकारेण राजानं-नलं अञ्जसा-शीघ्रं जजल्पुः-कथयामासुः ।

---

१. स्वाम्येव अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सोऽपि स्मरव्यापारकोरकिताभिः शृङ्गाररससेकपल्लविताभिर्मुग्धस्मितांशुमञ्जरिताभिरमृतच्छटाभिरिव वाग्भिः किमपि सरलाभिः, किमपि नर्मोक्तिकुशलाभिः, किमपि कथयन्, किमपि पृच्छन्, किमपि संदिशन्, [१]जल्पमनुजल्पितम्, हासमनुहसितम्, सुभाषितमनुसुभाषितम्, प्रियमनुप्रियम्, प्रसादप्रदानोद्दीपितोद्दामानुरागास्ताः कुर्वन्निति चिरमिव गोष्ठीलीलयावतस्थे ।**

**सोऽपि**-नलः एवं-एवं कुर्वन् अतिचिरं-बहुकालं यावत् गोष्ठीलीलया परस्पर-संलापविलासेन-अन्योन्यवार्त्ताविनोदेन अवतस्थे-अस्थात् । किं कुर्वन् ? स्मरव्यापारेण कोरकिताभिः-कुड्मलिताभिः । तथा शृङ्गाररससेकेन पल्लविताभिः-किसलयिताभिः । तथा मुग्धस्मितांशुभिः-मनोज्ञहास्यकान्तिभिर्मञ्जरिताभिः । तथा अमृतच्छटाभिरिव-आह्लादजनकत्वेन पीयूषच्छटोपमाभिः । *किमपि-किञ्चित् सरलाभिः-ऋज्वीभिः । किमपि-किञ्चित् नर्मोक्तौ-परिहासालापे कुशलाभिः-दक्षाभिः । तथा* किमपि-किञ्चित् कुटिलाभिः-काक्वोक्ताभिः अन्यमुखेन तदर्थं बोधयन्तीभिः । एवम्भूताभिर्वाग्भिः किमपि-किञ्चित् कथयन्, किमपि पृच्छन्, किमपि सन्दिशन्-तस्यै वार्त्तां निवेदयन्, तथा जल्पितं अनुलक्षीकृत्य जल्पितं, हसितं अनुलक्षीकृत्य हसितं, सुभाषितं-सूक्तं अनु लक्षीकृत्य सुभाषितं, प्रियं-इष्टं अनु लक्षीकृत्य प्रियं, अन्तस्था कुर्वन्निति क्रिया सर्वत्र योज्या । तथा प्रसादप्रदानेन-हारार्धहारादिवितरणेन उद्दीपितः-प्रकटित उद्दामः-उत्कटो अनुरागः-प्रेम यासु एवंविधास्ताः कुर्वन् । अनुजल्पमनुजल्पितमिति यदा क्वचित्पाठस्तदा अनुजल्पितमिति क्रियाविशेषणं, अनुगतं जल्पितं यत्रेति अनुजल्पितमित्यादिषु अनुयोगे द्वितीया ।

**'अहो नु[२] खल्वस्य[३] नरपतेः अनश्लीलं शीलम्, अनाहार्यमौदार्यम्, अवञ्चनं वचनम्, अदैन्यं दानम्, अस्मयं स्मितम्, अविचारगोचरं गाम्भीर्यम्' इति भावयन्त्यस्ताश्च [४]कांचिदुचितविनोदैरतिवाह्य वेलाम्, अनुभूय च किमपि गोष्ठीसुखम्, आख्याय च किञ्चिदिव दमयन्ती-विनोदविलासव्यतिकरम्, 'आज्ञापयतु देवोऽस्मानागमनाय, भवद्वार्त्तामृत-पानार्थिनी देवीत्वरिता[५]ऽस्मत्प्रत्यावृत्तिमवेक्षमाणा तिष्ठति इत्यभिधायानुमतास्ताः[६] यथागतमगच्छन् ।**

**अहो** ! इति अद्भुतं, नु इति वितर्के, खलुर्वाक्यालंकारे, अस्य नरपतेः-नलस्य

*—* चिन्हान्तर्गतपाठो नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनश्लीलं-प्रशंसनीयं शीलं-स्वभावः । तथा अस्य औदार्यं-दातृत्वं, अनाहार्यं-अनारोप्यं स्वाभाविकमित्यर्थः । तथा अस्य वचनं अवञ्चनं-न विद्यते वञ्चनं-विप्रतारणं यस्मिंस्तदवञ्चनं-अविप्रलम्भकं । तथा अस्य दानं अदैन्यं-दीनतारहितं, एवं दददप्ययंसौ न दीनो जायत इति । तथा अस्य स्मितं-ईषद्धसितं अस्मयं-अगर्वं । तथा अस्य गाम्भीर्यं-गम्भीरता न विचारस्य गोचरः-विषयो यत्तत् अविचारगोचरं, एतावदस्मिन् गाम्भीर्यमस्तीति विचारयितुं न शक्यत इत्यर्थः । इति-पूर्वोक्तप्रकारेण भावयन्त्यः-अवधारयन्त्यः सत्यः ताश्च उचितविनोदैः-योग्यकुतूहलैः काञ्चिद्वेलामतिवाह्य-उल्लंघ्य, च-पुनः किमपि-किञ्चिद् गोष्ठीसुखमनुभूय, च-पुनः किञ्चिदिव-किञ्चित् दमयन्त्या यो विनोद[१]विलासस्य व्यतिकरः-सम्बन्धस्तं आख्याय-उक्त्वा, इवशब्दोऽत्र वाक्यालङ्कारे, इति अभिधाय च अनुमता अनुज्ञातास्ता यथागतं-आगतमनतिक्रम्य यथागतं यत आयातास्तत्रैव अवगच्छन् । इतीति किम् ? देवः-राजा अस्मान् गमनाय आज्ञापयतु-आदिशतु, यतो भवतां वार्त्तैव अमृतं तस्य पानं अर्थयते-अभिलषतीत्येवंशीला भवद्वार्त्तामृतपानार्थिनी-भवत्सन्देशशुश्रूषुः देवी-दमयन्ती त्वरिता-उत्सुका सती अस्माकं या प्रत्यावृत्तिः-पश्चाद्वलनं तां अवेक्षमाणा कदा आगच्छेयुरिति विलोकयन्ती तिष्ठति ।

**गतासु च तासु, प्रगल्भं प्रज्ञायाम्, अचरमं[१] वाचि, [२]कलासु कुशलं, निपुणं नीतौ, सप्रतिभं सभायाम्[३], आश्चर्यभूतमाहूय पर्वतकनामानं[४] वामनकमुपायनीकृत्य कर्कशकर्कन्धूफलस्थूलोज्ज्वल-मौक्तिकावली[५]मुख्यभव्यभूषणांशुकानि[६]संमानदानादरपरितोषित[७] पुष्कराक्षपुरःसरेण[८] किंनरमिथुनेन सह दमयन्तीं प्रति प्रेषयामास ।**

अथ तासु-दासीषु गतासु सतीषु प्रज्ञायां-बुद्धौ प्रगल्भं-प्रौढं, तथा वाचि-वाण्यां अचरमं-मुख्यं, तथा कलासु कुशलं-दक्षं, तथा नीतौ-न्याये निपुणं-चतुरं, तथा सभायां-सदसि सप्रतिभं सबुद्धिं, आश्चर्यभूतं-आश्चर्ययुक्तं आश्चर्यकरं वामनाकृतित्वाद् यं दृष्ट्वा आश्चर्यं जायत इत्यर्थः, पर्वतकनामानं वामनकं-खर्वदेहं आहूय-आकार्य कर्कशानि-कठिनानि यानि कर्कन्धूफलानि तद्वत् स्थूला-बृहती उज्ज्वला-विशदा या मौक्तिकावली-मुक्तालता सा मुख्या-वरेण्या येषां एवंविधानि यानि भव्यभूषणांशुकानि-सुन्दरालङ्कार-वासांसि तानि उपायनीकृत्य-उपदीकृत्य सन्मानदानेन-आदरेण च परितोषितः-प्रमोदितो यः पुष्कराक्षः स पुरःसरः-अग्रेसरो यस्य तथाविधेन किन्नरमिथुनेन सह दमयन्तीं प्रति प्रेषयामास-मुमोच । पुष्कराक्षकिन्नरमिथुनाभ्यां सह सोपायनं पर्वतकममुञ्चदिति समुदायार्थः । आश्चर्यभूतमिति **"भूतं सत्योपमानयोः"** । **प्राप्तेऽतीते पिशाचादौ पृथ्व्यादौ**

१. विनोद नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जन्तुयुक्तयोः" । इत्यनेकार्थः [२।१८६-१८७] ।

**स्वयं च शाङ्खिकमुखमरुत्पूर्यमाणशङ्खस्वनविभिन्नभांकारि[1]भेरीरवेण निर्यद्वेलाविलासिनीचरच्चरणरण[2]न्मणिपूरझंकारेण च निवेद्यमाने मध्याह्नसमये[3] मध्याह्निककरणायोदतिष्ठत्[4] ।**

**क्रमेण च निःसृते समस्तसेवकजने, विश्रान्ततूर्यतालगीतासु निर्यातनर्तकीविरहखेदादिव मूकीभूतासु नृत्यशालासु, निःशब्दतया सुप्तास्विवार्थाधिकारक[5]कुटीषु, शून्यतया मध्याह्नतन्द्रीमूर्च्छितेष्विव [6]सामन्तमण्डपेषु, संक्रान्तसेवाविलासिनीचरणकुङ्कुमपदपङ्क्तितया विकीर्णविकसितरक्तारविन्दप्रकर[7]इव प्रकाशमाने राजभवनाङ्गणे, घनं ध्वनन्तीषु[8] भोजनावसरशङ्खकाहलासु[9], प्रधावमानेषु[10] प्रत्यास्वादिक-जनेषु[11], परिमृज्यमानास्वतिथिसत्त्रशालासु सज्जीक्रियमाणेष्वग्राशन-[12]ब्राह्मणेषु, प्रवेश्यमानासु गोग्रासयोग्यासु कपिलासु पुण्यगवीषु[13], प्रक्षाल्यमानेषु वायसबलिस्तम्भशिखरफलकेषु, बहिर्दीयमानेषु, दीनानाथभिक्षुक-भैक्ष[14]पिण्डेषु, समुपलिप्यमानासु भोजनस्थानवेदीषु, संचार्यमाणेषु चकोरपञ्जरेषु[15], निवेद्यमाननैवेद्यासु पूज्यराज्याधिदेवतासु, वैश्वदेवाहुति-गन्धवाहिनि वहति विविधान्नपाकपरिमलमनोहरे महानसमरुति, निर्वर्तितम-ज्जनादिक्रियाकलापे भजति भोजनभुवं भूभुजि, बहिः सूपकार-कलकलः समुल्लास ।**

**स्वयं च** राजा मध्याह्नसमये मध्याह्निककरणाय-मध्यन्दिननित्यक्रियाविधानाय उदतिष्ठत्-उत्तस्थौ । किम्भूते मध्याह्नसमये ? शाङ्खिकस्य-शंखवादकस्य मुखमरुता-वक्त्रवातेन पूर्यमाणः-भ्रियमाणो यः शंखस्तस्य स्वनेन-रवेण विभिन्नः-मिश्रितो भाङ्कारी यो भेरीरवस्तेन, तथा निर्यत्यः[1]- निःसरन्त्यो या वेलाविलासिन्यः-वारनार्यस्तासां चलच्चरणयो रणती-शब्दायमाने ये मणिनूपुरे तयोर्झङ्कारेण च निवेद्यमाने-बोध्यमाने, मध्याह्ने किल शङ्खसखा भेरी वाद्यते, वारनार्यश्च विचरन्त्यतो ज्ञायते मध्याह्नो जात इति । शङ्खवादनं शिल्पमस्य शाङ्खिकः **"शिल्पमितीकण्"** [**पा०सू०** ४।४।५५]।

**क्रमेण** च-मध्याह्नादूर्ध्वं कियत्समयातिक्रमणपरिपाट्या भूभुजि-नले भोजनभुवं-

---

१. निर्यत्यो अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जेमनभूमिं भजति सति, बहिः-स्वावस्थानाद् बाह्यप्रदेशे सूपकाराणां कलकलः--कोलाहलः समुल्ललास-उदभूत् । किम्भूते भूभुजि ? निर्वर्तितः-कृतो मज्जनादिक्रियाणां कलापः-समूहो येन स तस्मिन् । क्व सति ? समस्तो यः सेवकजनः-अनुचरलोकस्तस्मिन् निःसृते-गते सति । पुनः कासु सतीषु ? विश्रान्तानि-उपरतानि तूर्यतालैः[१] सम्बद्धानि गीतानि यासु एवंविधासु नृत्यशालासु सतीषु । उत्प्रेक्ष्यते-निर्याताः-निःसृता या नर्त्तक्यस्तासां विरहखेदात्-वियोगदुःखात् मूकीभूताष्विव । अन्योपि विरहखेदात् मूकीभवति तथा नृत्यशाला अपि । मन्ये, नर्त्तकीनां वियोगदुःखादेव तूष्णीं भेजुरिति । पुनः कासु सतीषु ? उत्प्रेक्ष्यते-अर्थाधिकारकाः-भाण्डागारिकास्ते कुटीषु-गृहेषु निःशब्दतया-निर्गतः शब्दो याभ्यस्ता निःशब्दास्तद्भावो निःशब्दता तया गतजनकलकलत्वेन सुप्तास्विव-शयितास्विव। पुनरुत्प्रेक्ष्यते-सामन्तानां ये मण्डपाः-आश्रयविशेषास्तेषु शून्यतया सामन्तानां भोजनार्थमन्यत्र गतत्वात् मध्याह्नस्य या तन्द्रीः-निद्रा तया मूर्छितेष्विव-प्रचलायितेष्विव । अन्योऽपि तन्द्री-मूर्छितः किल न ब्रूते तथा तेपि शून्यत्वात् जनस्वनराहित्येन तन्द्रीमूर्छिता इव ज्ञायन्ते । "**तन्द्रिस्तन्द्रीश्च निद्रायाम्**" [देवकाण्ड ९] इति **शिलोञ्छः** । पुनः क्व सति ? राजभवनाङ्गणे संक्रान्ता-प्रतिफलिता सेवाविलासिनीनां चरणयोः कुङ्कुमपदपंक्तिः-घुसृणद्रवलिप्तपदरचना तद्भावस्तया प्रकाशमाने-शोभमाने । राजभवनाङ्गणे कस्मिन्निव ? उत्प्रेक्ष्यते-विकीर्णः-विक्षिप्तो यो[२] विकसितः-विहसितो रक्तारविन्दानां-अरुणपद्मानां प्रकरः-समूहो यस्मिन् एवंविधे इव । मन्ये, रमणीय[३]कुङ्कुमलिप्तपादप्रतिबिम्बानि न विद्यन्ते, किन्तु अरुणानि पद्मान्येव विकीर्णानि सन्तीति भावः[४] । तथा भोजनावसरे शंखसहिता याः काहलास्तासु घनं-निविडं यथाभवति तथा ध्वनन्तीषु-शब्दायमानासु सतीषु। काहला वाद्यभेदः स्त्रीनपुंसकः । **यदनेकार्थः**-"**काहलं तु स्यात् भृशे चाव्यक्तवाचि च शुष्के च वाद्यभेदे च**" [३।६७१-६७२]। तथा प्रत्यास्वादिकजनेषु आस्वादं-आस्वादं प्रति चरन्तीति प्रत्यास्वादिकाः प्रतिगृहं किञ्चित् किञ्चिद् रसास्वादग्राहिणः । चरतीत्यर्थे ठक् । एवंविधा ये जनाः-भिक्षुविशेषास्तेषु प्रधावमानेषु प्रतिसद्मद्रुतं गच्छत्सु सत्सु । *तथा अतिथीनां याः सत्रशाला सत्रं-सदादानं तस्य शाला-गृहाणि तासु परिमृज्यमानासु-पूजासु क्रियमाणासु सतीषु* । "**सत्रमाच्छादने क्रतौ महादाने वने दम्भे**" [२।४७७] **इत्यनेकार्थः** । तथा अग्रे-स्वभोजनात् पूर्वं नियतं आश्यन्ते-भोज्यन्ते ये ते अग्राशनाः-अग्रे भोजनिका, एवंविधा ये ब्राह्मणास्तेषु सज्जीक्रियमाणेषु-सावधानीक्रियमाणेषु[५] सत्सु । तथा कपिलासु-पिङ्गलवर्णासु पुण्याः-पवित्राश्च ताः गावश्च पुण्यगव्यस्तासु पुण्यगवीषु तृणवाटिकादिषु प्रवेश्यमानासु सतीषु । किम्भूतासु पुण्यगवीषु ? गोग्रासस्य-तृणकवलस्य योग्या गोग्रासयोग्यास्तासु । **पुण्य-**

---

१. तूर्यनादैः अनू. । २. यो नास्ति अनू. । ३. रमणी० अनू. । ४. भावः नास्ति अनू. ।

*—* चिन्हान्तर्गत पाठो नास्ति अनू. । ५. भोजनाय सावधानी क्रियमाणेषु अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गवीष्विति "**गोरतद्धितलुकि**" [पा०सू०५।४।९२] इति टच् समासान्तः । तथा वायसानां-काकानां बलिस्तम्भशिखरेषु ये फलका[1]:-पट्टास्तेषु प्रक्षाल्यमानेषु-जलेन शोध्यमानेषु सत्सु। तथा दीनाश्च-दयास्पदं अनाथाश्च-अस्वामिकाः भिक्षुकाश्च-भिक्षणशीला वराकास्तेषां भैक्षपिण्डेषु-भिक्षाणां समूहो भैक्षं, समूहार्थे **तस्य समूहस्य** [पा०सू० ४।२।३७] यद्वा, भिक्षाणां इमे भैक्षास्तस्येदं इत्यण्, एवंविधा ये पिण्डाः-कवलास्तेषु बहिश्चतुष्पथादौ दीयमानेषु सत्सु । भिक्षणशीलो भिक्षुः "**सनाशंसतिभिक्ष उः**" [पा०सू०३।२।१६८] इति उस्ततः स्वार्थे कः । तथा भोजनस्थानस्य या वेद्यः-संस्कृतभूमयस्तासु समुपलिप्यमानासु-छगणादिना संस्क्रियमाणासु सतीषु । तथा चकोराणां पञ्जरेषु-शलाकामयेषु बन्धनोपकरणेषु भोजनस्थानं सञ्चार्यमाणेषु-प्राप्यमाणेषु सत्सु । तथा पूज्याः-अर्च्या राज्यस्य या अधिदेवताः-अधिष्ठात्र्यो देव्यस्तासु निवेद्यमानं-दर्श्यमानं नैवेद्यं बलिर्यासां तास्तथाविधासु सतीषु, राज्याधिदेवतानां नैवेद्ये दर्श्यमाने इत्यर्थः । तता महानसस्य-पाकस्थानस्य यो मरुत्-वायुस्तस्मिन् वहति-वाति सति । किम्भूते महानसमरुति ? विश्वदेवाः-त्रयोदशदेवविशेषास्तेषामियं वैश्वदेवी-विश्वदेवसम्बन्धीनि या आहुतिः-होमस्तस्य[2] गन्धं वहतीत्येवंशीलो वैश्वदेवाहुति गन्धवाही तस्मिन्, "**स्त्रियाः पुंवद्भाषितपुंस्कादित्वात्** [पा०सू०६।३।३४] इति उक्तं पुंस्कात् परस्यानूङः स्त्रीप्रत्ययस्य पुंवद्भावः । तथा विविधान्नानां-अनेकविधभक्तानां पाकस्य यः परिमलः-आमोदस्तेन मनोहरे-रम्ये ।

**आज्यं प्राज्यमभिन्नकुन्दकलिकाकल्यश्च[1] शाल्योदनो,**
**सूपो धूपमनोहरा[2] शिखरिणी स्वादूनि शाकानि च ।**
**पेयास्वाद्यकवल्यलेह्यबहुलं नानाविधं भुज्यतां,**
**भोज्यं भीममहानृपस्य सुतया संप्रेषितं सैनिकाः ॥ ११ ॥**

**आज्य**मिति । हे सैनिकाः-चमूचराः ! भीममहानृपस्य सुतया-भैम्या सम्प्रेषितं-मुक्तं नानाविधं-अनेकप्रकारं भोज्यं-भक्ष्यं भुज्यताम्-अश्यताम् । अनेकविधत्वमेव दर्शयति, तद्यथा—प्राज्यं-प्रभूतं आज्यं-धृतं, च-पुनः शाल्योदनः-कलमशाल्यादिरूपं अशनम् । **किम्भूतः** शाल्योदनः । अभिन्नकुन्दकलिकया-अस्फुटितकुन्दकोरकेण कल्यते-मीयते उपमीयते इति अभिन्नकुन्दकलिकाकल्यः । कलेरदन्तात् स्वराद् यः । केचित्तु पवर्गोपधं पठन्ति तदा तु स्पष्ट एव । अभिन्नकुन्दकलिकया कल्पः-सदृशः, ओदनशब्दः पुंक्लीबलिङ्गः । तथा अयं सूपः-सूदः । तथा धूपेन-गन्धद्रव्ययोगविशेषेण मनोहरा-वासिता शिखरिणी-रसाला । च-पुनः स्वादूनि-मृष्टानि रुच्यानि । सुन्दराणि वा शाकानि-

१. फलकाः नास्ति अनू. । २. तस्या अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मूलकादीनि। "**स्वादुस्तु सुन्दरे मृष्टे**" [२।२४०] इत्यनेकार्थः । शाकशब्दः पुंक्लीबलिङ्गः। किम्भूतं भोज्यम् ? पेयं-पातुं योग्यं द्राक्षापानादि, आस्वाद्यं-अनुभवनयोग्यं आम्ररसादि, कवल्यं-कवलीकरणयोग्यं ओदनादि, लेह्यं-मध्वादि ततो द्वन्द्वस्तैर्बहुलं व्याप्तं-सहित-मित्यर्थः । शार्दूलविक्रीडितम् ॥ ११ ॥

**अहो[१] खल्वमी मत्स्य[२]मांसैर्विरहितमुदीच्यप्रतीच्यप्राच्यपरिजनाः[३] प्रियसक्तवो भोक्तुमेव न जानन्ति ।**

**विरलः खलु दाक्षिणात्येषु मांसाशनव्यवहारः ।**

**तदाकर्णयतां नैषधाः ।**

**अहो** ! इति आश्चर्ये, खलु इति वाक्यालंकारे । अमी प्रत्यक्षाः उदीच्यां भवा उदीच्याः, प्रतीच्यां भवाः प्रतीच्याः, प्राच्यां भवाः प्राच्यास्ततो द्वन्द्वः, एवंविधा ये परिजनाः सैनिकाः प्रियाः-इष्टाः सक्तवः-धानाचूर्णं येषां ते प्रियसक्तवः, एवंविधाः सन्तो मत्स्यानां मांसानि-मत्स्यमांसानि तैर्विरहितं-वियुक्तं अर्थाद् भोज्यं भोक्तुमेव न जानन्ति, किन्तु मत्स्यमांससंयुक्तमेव ते भुञ्जते ।

खलु-अनुनये दाक्षिणात्येषु-दक्षिणस्यां जाता दाक्षिणात्यास्तेषु विरलः-स्तोको मांसाशनस्य-पलभक्षणस्य व्यवहारः ।

**तत्**-तस्मात् आकर्ण्यतां हे नैषधाः-निषधदेशोद्भवाः सैनिकाः !

**आज्यप्राज्यपरान्न[४]कूरकवलैर्मन्दां विधाय[५] क्षुधां,**
**चातुर्जातकसंस्कृतो नु शनकैरिक्षो रसः पीयताम् ।**
**[६]संसारस्पृहणीयतेमनरसानास्वाद्य किंचित्ततः,**
**स्निग्धस्तब्धदधिद्रवेण सरसः[७] शाल्योदनो[८] भुज्यताम्' ॥१२॥**

**आज्येति** । आज्येन-घृतेन प्राज्यानि-प्रभूतानि पराणि प्रकृष्टानि अन्नानि-भक्षितानि यानि कूरकवलानि-भक्तपिण्डास्तैः कृत्वा क्षुधां-बुभुक्षां मन्दां-अल्पां विधाय-कृत्वा भवद्भिः अनु-पश्चात् शनकैः-मन्दं मन्दं इक्षोः-रसालस्य रसः-द्रवो[१] पीयताम् । किम्भूतो रसः ?

**"त्वगेलापत्रकं चैव त्रिगन्धं च त्रिजातकम् ।**
**तदेव मरिचैर्युक्तं चातुर्जातकमुच्यते ॥"** [ ]

---

१. द्रवः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तेन संस्कृतः-कृतगुणान्तरः चातुर्जातकसंस्कृतः। तत इक्षुरसपानानन्तरं तेमनस्य-मिष्टानस्य रसा[१]स्वादास्तेमनरसाः संसारे-भवचक्रे स्पृहणीयाः-अभिलषणीय' ये तेमनरसाः संसारस्पृहणीयतेमनरसास्तान् किञ्चिद्-ईषद् आस्वाद्य-अनुभूय स्निग्धः-सरसः स्तब्धः-कठिनो यो दधिद्रवः-वस्त्रगालितं दधि तेन सरसः-सस्वादः, '**सरल**' इति पाठे सरलः सुनिष्पन्नदीर्घतण्डुलपाकजः अतिक्लिन्नवारिदोषरहितश्च[२] एवंविधः शाल्योदनः-कलमशाल्यादिभक्तं भुज्यतां-अश्यताम्। उदीच्येति "**द्युप्रागप्रागुदक्प्रतीचो यत्**" [पा०सू०४।२।१०१] इति शेषेऽर्थे एभ्यो यत्, उदीच्यः प्रतीच्यः प्राप्य इति। दाक्षिणात्येष्विति "**दक्षिणापश्चात्पुरसस्त्यक्**" [पा०सू०४।२।९८] इति शेषेर्थे त्यक्। दक्षिणस्यां जाताः दाक्षिणात्य इति। यद्यपि अन्नकूरेत्यत्र अन्नकूरयोर्भक्तार्थत्वेन **अभिधानकोषे** न कश्चिद् विशेषः। "**भक्तमन्नं कूरमन्धः**" [३।५९] इति। तथाप्यत्र अन्नशब्दोऽशितार्थः। **यदनेकार्थः-अन्नं भक्तेऽशिते** [२।२६०] इति। कवलशब्दः पुन्नपुंसकः॥ १२॥

**राजा तु प्रतीहार 'विनिश्चीयतां किमयं बहिः कलकलव्यतिकरः' इत्यभिधाय तत्कालयोग्यपरिजनपरिवृतो भोक्तुमुपाविशत्।**

**ततः[१] त्वरितं[२] च गत्वागतश्च[३] स[४] प्रतीहारो विज्ञापयाम्बभूव।**

**'देव, दमयन्त्या प्रहिताः सूपकाराः सैन्यजनम् आब्राह्मणा[५]न्त्यजगोपालबालकम्[६], आकरितुरगवाहनम्, आसामन्तनियुक्तकम्, आस्वाद्यैस्तैस्तैर्विशेषै[७]र्भोजयन्ति लग्नाः।**

**सर्वतो दृश्यन्ते पर्वताः पक्वान्नस्य, राशयः शाल्योदनस्य स्तूपाः सूपस्य, निर्झराः सर्पिषः, सिन्धवो मधुनः, निकराः शर्करायाः, स्रोतांसि दधिदुग्धयोः, शैलाः शाकानाम्, निपानानि पानकानाम्, कुल्याः फलरसानाम्, कूटाः कषायाम्ललवणतिक्तमधुरोपदंशानाम्।**

**एवमकार्पण्यमिच्छया भोजितं सैन्यम्।**

**राजा तु**-नल। इत्यभिधाय-उक्त्वा तस्मिन्काले-भोजनावसरे योग्यो यः परिजनस्तेन परिवृतः-परिकरितो भोक्तुं उपाविशत्-निषसाद। इतीति किम्? हे प्रतीहार!-दौवारिक! विनिश्चीयतां-निर्णीयतां, किमिति प्रश्ने, अयं बहिः कलकलस्य-कोलाहलस्य व्यतिकरः-सम्बन्धः किम्?, कोऽयं कलकल इत्यर्थः।

---

१. रसाः अनू.। २. अतिक्लिन्नतादिदोषरहितश्च अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**ततः** स प्रतीहारः त्वरितं-शीघ्रं गत्वा आगतश्च सन् विज्ञापयाम्बभूव-कथायामास ।

हे **देव** !-राजन् ! दमयन्त्या प्रहिताः-प्रेषिताः सूपकाराः कर्त्तारः ब्राह्मणाश्च अन्त्यजाश्च-चाण्डालाश्च गोपालबालकाश्च-गोप्रशशवस्तान् अभिव्याप्य वर्तमानं आब्राह्मणान्त्यजगोपालबालकं, तथा करिणश्च-हस्तिनः, तुरगाश्च-अश्वाः, वाहनानि च पत्राणि तानि अभिव्याप्य वर्त्तमानं आकरितुरगवाहनं, तथा सामन्ताः-मण्डलेश्वराः, नियुक्तकाश्च-अधिकारिणस्तान् अभिव्याप्य वर्त्तमानं आसामन्तनियुक्तं, एवंविधं सैन्यजनं कर्म आस्वाद्यैः-आस्वादनार्हैः तैस्तैर्विशेषैर्भोजयन्ति लग्नाः ।

अथ तांस्तान् भोज्यविशेषानेवाऽऽह—पक्वान्नस्य सर्वतः-सर्वासु दिक्षु पर्वता दृश्यन्ते। तथा शाल्योदनस्य राशय-राजयो दृश्यन्ते । तथा सूपस्य-सूदस्य स्तूपाः-उच्चा मृद्विकारा दृश्यन्ते । तथा सर्पिषः-घृतस्य निर्झराः-प्रस्रवणानि दृश्यन्ते । तथा मधुनः-क्षौद्रस्य मद्यस्य वा सिन्धवः-नद्यो दृश्यन्ते । तथा शर्करायाः-सिताया निकराः-समूहा दृश्यन्ते । तथा दधिदुग्धयोः स्रोतांसि-प्रवाहा दृश्यन्ते । तथा शाकानां-तण्डुलीयकादीनां शैलाः-गिरयो दृश्यन्ते । तथा पानकानां-द्राक्षादिजलानां निपानानि-आहवाः कूपस्य समीपे शिलादिबद्धं पशुपानार्थं कूपोद्धृताम्बुस्थानं निपानं । तथा फलरसानां कुल्याः-सारणयः । तथा कटवश्च-ओषणाः कषायाः-तुवरा अम्लाश्च-दन्तशठा लवणाश्च-सर्वरसाः तिक्ताश्च-वक्त्रभेदिनः मधुराश्च-गुल्या ये उपदंशाः-मद्यपस्य खरविशदानि अभ्यवहार्याणि शाकानीत्यर्थः, तेषां कूटाः-शिखराणि दृश्यन्ते ।

**एवं**-अमुना प्रकारेण भवतः सैन्यस्य आतिथेयं-अतिथिसत्कारः कृतं अकार्पण्यं-अकृपणत्वं उदारत्वं यथा भवति तथा इच्छया-स्ववाञ्छया, न तु प्रेरणया दमयन्त्या सैन्यं भोजितम् ।

**अपि च-**

**भुक्तान्ते घृतदिग्धहस्ततलयोरुद्वर्तनं चन्दनं,**
**पश्चान्नागरखण्डपाण्डुरदलैस्ताम्बूलदानक्रमः ।**
**एकैकस्य मृणालतन्तुमृदुनी दत्ते ततो वाससी,**
**देव्या किंचिदचिन्त्यमेव भवतः सैन्यातिथेयं कृतम् ॥ १३ ॥**

**च**-पुन :—

हे **देव** ! इति-अमुना प्रकारेण देव्या-दमयन्त्या किंचित् अचिन्त्यं-अनाकलनीयं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भवतः सैन्यस्य आतिथेयं-अतिथिसत्कारः कृतं । तमेव प्रकारमाह—भुक्तान्ते-अशितावसाने घृतेन दिग्धौ-लिप्तौ यौ हस्ततलौ-करतलौ तयोरुद्वर्तनं-रूक्षीकरणं चन्दनं-चन्दनद्रवो दत्तं। पश्चाच्चन्दनद्रवदानानन्तरं पाण्डुरदलानि-वनवासदेशोद्भवानि नागवल्लीपत्राणि नागरैः-विदग्धैः खण्ड्यन्ते-चर्व्यन्त इति नागरखण्डसंज्ञानि, एवंविधानि यानि पाण्डुरदलानि-श्वेतपत्राणि तैः कृत्वा ताम्बूलदानस्य क्रमः-परिपाटी कृतः, ताम्बूलदलानि दत्तानीत्यर्थः। ततः-ताम्बूलदानानन्तरं एकैकस्य-प्रतिजनं मृणालतन्तुवत् मृदुनी-सुकुमारे वाससी-वस्त्रे दत्ते। शार्दूलविक्रीडितम् । ॥ १३ ॥

**इयं च रसवती देवस्य तया स्वहस्तपल्लवपरिमलनसंस्कृतैः पाकविशेषैर[१]लङ्कृत्य स्वमुद्रया मुद्रिता प्रहिता' इत्यभिधाय व्यरंसीत् ।**

**इयं चेति** । हे देव ! देवस्य तया-दमयन्त्या स्वहस्तपल्लवाभ्यां यत्परिमलनं-यथोचितगन्धद्रव्यक्षेपेण सुरभिकरणं तेन संस्कृतैः-पाकविशेषैरलङ्कृत्य स्वमुद्रया-स्वलाञ्छनेन मुद्रिता-अङ्किता इयं च रसवती प्रहिता-प्रेषिता । इति-उक्तप्रकारेण अभिधाय व्यरंसीत्-विरराम तूष्णीं बभाजेति यावत् ।

**राजा तु मनाक् तरलितशिरः[२] 'सस्मितमहो निरतिशयमुदारगम्भीरमुचितव्यवहारहारि लीलायितं तस्याः, स्पृहणीयपरिमलस्वादो[३]यमपूर्व इव कोऽपि पाकक्रमः ।**

**तथाहि—**

**इदमम्लमप्यनम्लास्वादम्[४], इदमीषत्कषायमपि मधुरतामानीतम्[५], इदमेकरसमप्यनेकरसीकृतम्, इदमतिमृष्ट[६]याऽमृतमप्यतिशेते, रसवत्या[७]मपि रसवती विदर्भराजसुता[८], इति भावयं[९]स्तास्तया[१०] प्रहितान्पाकविशेषानादरेणास्वादयामास ।**

**राजा तु** नलः मनाक्-स्तोकं तरलितं-कम्पितं शिरो येन एवंविधः सन् सस्मितं-ईषद्धास्यसहितं यथा भवति तथा इति भावयन्-मनसि विचारयन् तया-दमयन्त्या प्रहितान् पाकविशेषान् आदरेण आस्वादयामास-बुभुजे । च-पुनः इति चिन्तितवान् । इतीति किम्? अहो ! इति आश्चर्ये, निरतिशयं-उत्कृष्टं उदारेण-उदारतया दातृतया, गम्भीरं-अस्ताघं उचितव्यवहारेण, हारि-मनोहरं तस्या लीलायितं-विलासवद्भवनं अलीलावत् लीलावत् भवनं लीलायितं तद्वति वर्तमानाल्लीलाशब्दात् आयिप्रत्यये भावे क्ते च रूपसिद्धिः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अत्रोदारशब्दो भाववचनो लवणादिशब्दवत् । तथा तस्याः-भैम्याः अपूर्व इव-अभिनव इव कोऽपि वाचामगोचरः पाकक्रमः । किम्भूतः[१] पाकक्रमः ? परिमलश्च-आमोदः आस्वादश्च-आस्वादनं स्पृहणीयौ-अभिलषणीयौ परिमलास्वादौ यत्र स स्पृहणीयपरिमलास्वादः ।

**तथा**हीति । अपूर्वत्वमेव पाकक्रमस्य दर्शयति, तद्यथा—

इदं अम्लमपि-दन्तशठमपि न विद्यते अम्लस्य आस्वादो यत्र तत् अनम्लास्वादं । तथा इदं ईषत् कषायं-मनाक् तुवररसमपि मधुरतां-मृष्टतां आनीतम् । तथा इदं एकरसमपि-एकास्वादमपि अनेकरसीकृतं-अनेकास्वादीकृतं । तथा इदं अतिमृष्टतया-अतिस्वादुतया अमृतमपि अतिशेते अमृतादप्यधिकी भवति । इयं विदर्भराजसुता-भैमी रसवत्यामपि रसिका-रागिणी तात्पर्यवतीति यावत् ।

**चिन्तितवांश्च—**

**षड्रसाः किल वैद्येषु भरतेऽष्टौ नवापि वा ।**
**तया तु[१] पद्मपत्राक्ष्या सर्वमेकरसीकृतम् ॥ १४ ॥**

अथ यच्चिन्तितवान् तदाह—

**षड्रसा** इति । किलेति आप्तोक्तौ, आप्ता इति वदन्ति वैद्येषु-वैद्यशास्त्रेषु षड्रसाः-तिक्तादयः । अथ भरते-नाट्यशास्त्रे अष्टौ नवापि वा शृङ्गारादयो रसाः[२] । तया पद्मपत्राक्ष्या-कमलदललोचनया पुनः सर्वं एकरसीकृतं-उत्कृष्टास्वादीकृतं चमत्कृतत्वात् आत्मविषये एकानुरागीकृतं च । यदनेकरसं तत्कथमेकरसी भवेत् ? इति विरोधे[३] पुनरर्थस्तु शब्द उद्भावयति ॥ १४ ॥

**तथाहि—**

**अग्रस्थामिव चेतसः पुर इव व्यालम्बमानां दृशो-**
**र्जल्पन्तीमिव रुन्धतीमिव मनाङ् मुग्धं हसन्तीमिव ।**
**निद्रामुद्रितलोचना अपि वयं तां विश्वरूपायितां[२],**
**पश्यामो बहिरन्तरे निशि दिवा मार्गेषु गेहेषु च ॥ १५ ॥**

**तथाही**ति । अनेन आत्मानुभवसम्भावनाद्वारेण एकरसत्वमेव व्यनक्ति—

**अग्रस्था**मिति । निद्रया मुद्रिते-पिहिते लोचने येषां ते एवंविधा अपि वयं भैमीं[३]

---

१. किम्भूतश्च अनू. । २. रसास्तिक्तादयः अनू. । ३. विरोधं अनू. । ४. तां भैमीं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चेतसः अग्रस्थामिव-पुरःस्थितामिव, तथा दृशोः-नेत्रयोः पुरः-अग्रे व्यालम्बमानामिव-अवस्थितामिव साक्षादवलोक्यमानामिवेत्यर्थः । तथा जल्पन्तीमिव, तथा वदन्तीमिव, तथा रुन्धतीमिव-अन्यत्र गच्छन्तं मां गृह्णन्तीमिव, तथा मनाक्-ईषत् मुग्धं-रम्यं यथा भवति तथा हसन्तीमिव । तथा बहिरन्तरा-मध्ये, तथा निशि-रात्रौ दिवा-दिने, तथा मार्गेषु च-पुनः गेहेषु विश्वरूपायितां-विश्वं रूपमस्येति विश्वरूपो हरिः स इव आचरिता विश्वरूपायिता तां विष्णूपमां पश्यामः-अवलोकयामः । यथा विश्वरूपो हरिः-सर्वमभिव्याप्य[1] तिष्ठति तथा सर्वव्यापिनीव च सा विलोक्यत इत्यर्थः । भ्रमाद् यत् तत्रापि तस्या अवलोकनात् । शार्दूलविक्रीडितम् ॥ १५ ॥

**एवमवधारयन् अतृप्त इव तथा प्रहितेषु स्वहस्तपक्वपाकरसविशेषेषु[१], असन्तुष्ट[२]स्तत्कथायाम्, आचम्य, चन्दनागुरुपरिमल[३]पाण्डुरितपाणिपल्लवः, लवङ्गकक्कोलकरम्बितताम्बूलमुत्सर्पिकर्पूरपरिमलमादाय, विकीर्णविविधकुसुमप्रकरहारिणि[४] यक्षकर्दमाच्छच्छटाच्छोटित[५]पर्यन्तभित्तिभागे लम्बितप्रलम्बजाम्बूनदपद्मदाम्नि धूपधूमामोदिनि चूर्णितकर्पूररङ्गरेखाभाजि भोजनान्तरमपरेऽपराह्णविनोदमण्डपे मनाग्विश्रम्य रणरणकाक्रान्तहृदयो दूरदिगन्तावलोकन[६]कुतूहलितः सरित्तीरोत्तम्भिता[७]भ्रलिहसौधस्कन्धभूमिमारुरोह[८], आरुह्य च तस्यामूर्ध्व एव ध्रियमाण[९]मायूरातपत्रमण्डलः, सलीलालसपदैरितस्ततः परिक्रामन्, नेदीयसि सरित्संगमाम्भसि मध्याह्नमखिलमवगाहनसुखमनुभूय तीरमुत्तीर्णासु तिमिरशङ्कया कृतदूरचंक्रमणैश्चक्रवाकचक्रवालैराकुलमालोक्यमानासु[१०], पुलिनपांसुविहरणविरामे विकसितविविधवीरुन्धिरोधांसि रदन्तीषु दन्तिपङ्क्तिषु दत्तदृष्टिः, विरलनलिनीपत्रान्तराल[११]सुप्तोत्थितस्य,[१२] किंचिदवाञ्चितचटुलचञ्चोः, चरतः, चटुलचञ्चरीकिणि विकचकमलवने, राजहंसकुलकलापस्य करिकलभदन्तदण्डपाण्डुरे[१३]बिसकाण्डभङ्गटंकारानाकर्णयन्, अपराह्णमज्जनागताभिः कुण्डिनपुरपुरन्ध्रिभिराश्चर्यसोर्मिमुषितनिमेषैर्निष्कम्पनीलोत्पलपलाशलीलायमानैर्नेत्रपुटैरापीयमानमुखेन्दुद्युतिः, दर्शिततरङ्गभ्रूभङ्गया दूरोच्छलद्बाल[१४]शफरीछलेनविस्फारित[१५]विलोचनया, सरित्संगमसलिलाधिदेवतयापि विलोक्यमानरूपसंपत्तिरिव, क्षणमविरलचलच्चञ्चरीकचक्रचुम्बि-**

१. सर्वमपि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**ताम्बुरुहासु क्रीडाकमलसरसीषु, क्षणमुपान्तपङ्क्तीभूतमञ्जरितसहकार-राजिषु स्मर[१६]वाजिवाह्यालीषु, क्षणमुन्मिषत्कुसुममनोहारिणीषु[१७], भवनोद्यानमालासु, क्षणमुत्पतत्पताकापटपल्लवविराजितासु[१८] भीमभूपालान्तःपुरप्रासादपङ्क्तिषु[१९], क्षणमवकीर्णकुसुमरङ्गावलीरम्यासु नगरवीथीषु विश्रान्तविलोचनश्चिरमवतस्थे ।**

**एवं**-अमुना प्रकारेण अवधारयन्-मनसि विचारयन् तया-भैम्या प्रहितेषु-मुक्तेषु स्वहस्ताभ्यां पक्वाः-सिद्धा ये पाकरसविशेषास्तेषु अतृप्त इव-अनाघ्रात इव । तथा तस्याः-भैम्याः कथायां-वार्त्तायां असन्तुष्टः । आचम्य-आचमनं गृहीत्वा शुचीभूय चन्दनं च अगुरुश्च चन्दनागुरु ताभ्यां परिमलनेन-उद्वर्त्तनेन पाण्डुरितौ-धवलितौ पाणिपल्लवौ यस्य स एवंविधः सन् । उत्सर्पी-प्रसरणशीलः कर्पूरस्य परिमलो यस्मिन् एवंविधं लवङ्गैः-देवकुसुमैः कक्कोलैः-कोशफलैः करम्बितं-मिश्रितं यत्ताम्बूलं-क्रमुकीफलं क्रमुकफल-चूर्णपर्णयोगो वा तत् आदाय-गृहीत्वा । भोजनानन्तरं अपरे-अन्यस्मिन् विनोदः-कौतुकं तदर्थं यो मण्डपः-आश्रयविशेषो विनोदमण्डपः यत्र गत्वा विनोदः क्रियते, ततोऽ-पराह्णस्य-सायंतनसमयस्य यो विनोदमण्डपोऽपराह्णविनोदमण्डपस्तस्मिन् मनाक्-ईषत् विश्रम्य-विश्रामं गृहीत्वा भोजनजन्यखेदमपनीय रणरणकेन-उत्कण्ठया आक्रान्तं-व्याप्तं हृदयं-चेतो यस्य सः, तथा दूराः-विप्रकृष्टा ये दिगन्ताः-आशाप्रान्तास्तेषामवलोकने कुतूहलं जातमस्येति कुतूहलितः एवंविधः सन्, सरित्तीरे उत्तम्भितस्य-तत्कालारोपितस्य जङ्गमस्य चित्रकूटाख्यस्य अभ्रंलिहसौधस्य स्कन्धभूमिं-मध्यभुवं आरुरोह-अधिशिश्राय । किम्भूते अपराह्णविनोदमण्डपे ? विकीर्णानि-विक्षिप्तानि विविधानि-अनेकप्रकाराणि पञ्चवर्णत्वात् यानि कुसुमानि तेषां यः प्रकरः-समूहस्तेन हारिणि-मनोज्ञे । तथा यक्षकर्दमस्य अच्छा-विशदा याश्छटास्ताभिराछोटिताः-सिक्ताः पर्यन्तभित्तिभागाः-अवसानकुड्यदेशा यस्य स तस्मिन् । "**कर्पूरागुरुकक्कोलकस्तूरीचन्दनद्रवैः । स्याद् यक्षकर्दमो मिश्रैः**" [३।३०२-३०३] इति **हैमकोषः** । तथा लम्बितानि-लम्बायमानीकृतानि प्रलंबानि-दीर्घाणि जाम्बूनदपद्मानां-हैमाम्भोजानां दामानि-माला यस्मिन् स तथा तस्मिन् । तथा धूपः-गन्धद्रव्ययोगविशेषस्तस्य यो धूमस्तस्य आमोदो विद्यते यस्मिन्नसौ धूपधूमामोदी तस्मिन् धूपधूमामोदिनि । तथा चूर्णितकर्पूरेण-मृदितघनसारेण यो रङ्गः-रञ्जनं धवलीकरणं तस्य या रेखा-आभोगस्तां भजतीति चूर्णितकर्पूररङ्गरेखाभाक् तस्मिन्, कर्पूरचूर्णे धवलिते इत्यर्थः । "**रेखा स्यादल्पके छद्मन्याभोगोल्लेखयोरपि**" [२।२५] इत्य**नेकार्थः** । अथ सौधमारुह्य च-अधिष्ठाय तस्यां सौधस्कन्धभूमौ ऊर्ध्व एव-उपर्येव ध्रियमाणं-छत्रधरैर्गृह्यमाणं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मायूरातपत्रमण्डलं यस्य सः । तथा सलीलं-सविलासं यथा भवति तथा अलसपादैः-मन्थरचरणन्यासैरितस्ततः परिक्रामन्-विचरन् । तथा एवंविधासु दन्तिपंक्तिसु-करिराजिषु दत्ता-न्यस्ता दृष्टिर्येन सः । किम्भूतासु दन्तिपंक्तिसु ? नेदीयसि-निकटतरं सरित्सङ्गमस्य यदम्भस्तस्मिन् सरित्सङ्गमाम्भसि-नदीसम्भेदोदके अखिलं-समस्तं मध्याह्नं अवगाहनसुखं-मज्जनसुखं अनुभूय तीरमुत्तीर्णासु-तटं प्राप्तासु । तथा करिणां कृष्णत्वात् तिमिरशङ्कया-तमोभ्रान्त्या कृतं दूरे चङ्क्रमणं-गमनं यैस्तानि एवंविधैश्चक्रवाकाणां-चक्राणां यानि चक्रवालानि-वृन्दानि तैराकुलं-सत्रासं यथा भवति तथा आलोक्यमानासु, दन्तिपंक्ती-रवेक्षमाणाश्चक्रा आकुला जायन्त इत्यर्थः । तथा पुलिनपांशूनां-सैकतरजसां यद् विकिरणं-इतस्ततो विक्षेपणं तस्य विरामे-अवसाने धूलीस्नानानन्तरं विकसिता विविधा-अनेकविधा वीरुधो येषु, एवंविधानि रोधांसि-तटानि रदन्तीषु-पाटयन्तीषु । तथा विकचकमलवने-सविकासपद्मखण्डे चरतः-विहरतो राजहंसकुलस्य-सितपक्षकुटुम्बकस्य यः कलापः-समूहस्तस्य करिकलभदण्डवत् पाण्डुरं-धवलं यद् विसकाण्डं-कमलनालवृन्दं तस्य यो भङ्गः-त्रोटनं तस्य टङ्कारान्-रवविशेषान् आकर्णयन्-शृण्वन् । "**काण्डं नालेऽधमे वर्गे द्रुस्कन्धेऽवसरे शरे**" [२।११२-११३ ] इत्**यनेकार्थः** । किम्भूते विकचकमलवने ? चटुलाः-चञ्चलाश्चञ्चरीकाः-भृङ्गाः विद्यन्ते यस्मिंस्तत्तथा तस्मिन् । किम्भूतस्य राजहंसकुलकलापस्य ? विरलानि-अनिविडानि यानि नलिनीपत्राणि-पद्मिनीदलानि तेषामन्तरालेषु-मध्येषु सुप्तोत्थितस्य पूर्वं सुप्तः पश्चादुत्थितः-जागरित सुप्तोत्थितस्तस्य । तथा किञ्चित्-ईषत् अवाञ्चिता-नीचैः कृता चटुला चञ्चुर्येन स तस्य । तथा अपराह्णमज्जनाय-सायन्तनस्नानाय आगताभिः कुण्डिनपुर-पुरन्ध्रिभिः-कुण्डिनपुर-स्त्रीभिर्नेत्रपुटैः आपीयमाना-अतिशयेन दृश्यमाना मुखेन्दुद्युतिः-आननशशिश्रीर्यस्य सः । सादरेक्षणं नेत्रपानं तच्च पत्रपुटैर्युक्तं, अतो नेत्रपुटैरापीयमानेत्युक्तं। किम्भूतैः नेत्रपुटैः ? आश्चर्यरसोर्मिभिः-अद्भुतरसबाहुल्येन मुषिता-अपहृता निमेषाः-अक्षिमीलनानि येषां ते तैः विस्फारितैरित्यर्थः। अतएव पुनः किम्भूतैः ? निकम्पाणि-निश्चलानि यानि नीलोत्पलपलाशानि-कुवलयपत्राणि तद्वदलीलावन्तो लीलावन्तो भवन्तो लीलायमानाः-शोभायमानास्तै निश्चलकुवलयपत्रोपमैरित्यर्थः । तथा सरित्सङ्गमसलिलस्य अधिष्ठात्र्य-देवतयाऽपि विलोक्यमानावीक्ष्यमाणा रूपसम्पत्तिः-सौन्दर्यसम्पत् यस्य स एवंविध इव । किम्भूतया सलिलाधिदेवतया ? दर्शितास्तरङ्गा एव भ्रूभङ्गाः-भ्रूविलासा यया सा तया दर्शिततरङ्गभ्रूभङ्गया । तथा दूरे उच्छलन्त्यः-उल्ललन्त्यो यो बालशफर्य्यस्तासां छलेन-दम्भेन विस्फारिते-विकस्वरीकृते विलोचने यया सा तया । मन्ये, उद्वर्तितशफरीच्छलेन जलदेवता नलरूपसम्पदं वीक्षत इति[1]। अन्यापि नायिका सभ्रूभङ्गया विस्फारितदृशा इष्टरूपसम्पदं

---

[1] इवेति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ईक्षते । तथा क्षणमेकं अविरलं-निविडं चलद् यच्चञ्चरीकचक्रं-भृङ्गवृन्दं तेन चुम्बितानि-आस्वादितानि अम्बुरुहाणि-पद्मानि यासु एवंविधासु क्रीडाकमलसरसीषु । तथा क्षणमेकं स्मरवाजिनो बाह्यालीव-वाहवाहभूमिरिव यास्ता, यथा वाजीवाह्याल्यां स्वैरं क्रीडति तथाऽत्र स्मरोपि विलसतीति, तथाविधासु उपान्ते-सरित्सङ्गमसमीपे पंक्तिभूताः-श्रेणिभूताः मञ्जरिताः याः सहकारराजयः-चूतालयस्तासु, कण्टकादिदोषरहितासु तरुराजिराजितासु च भूमिषु वाहवाहना । तथा च रम्या समतला लोष्ठकीलकण्टकवर्जिता बाह्यालीभूमिरभ्यर्णतरुराजिविराजितेति, एतदेव पंक्तीभूतेत्यादिना उक्तम् । तथा क्षणमेकं उन्मिषन्ति-विकसन्ति यानि कुसुमानि तैर्मनोहारिणीषु-मनोहरासु भवनोद्यानमालासु-गृहवनपंक्तिषु । तथा क्षणमेकं उत्पतन्-वातेन ऊर्ध्वं गच्छन् यः पताकापटपल्लवः-ध्वजपटप्रान्तस्तेन विराजितासु भीमभूपालस्य या अन्तःपुरप्रासादपंक्तयः-अवरोधभवन-पंक्तयस्तासु । तथा क्षणमेकं अवकीर्णानि-विक्षिप्तानि हिंगुलुहरितालादिविचित्रवर्णकवत् चित्रहेतुत्वात् कुसुमान्येव रंगावलीविचित्रवर्णपंक्तिस्तया रम्यासु-शोभनासु नगरवीथिषु-पुरपद्धतिषु विश्रान्ते-दत्ते विलोचने-नेत्रे येन सः । विश्रान्तविलोचन इति पदं प्रत्येकं योज्यम् । एवंविधं चिरं[१] अवरतस्थे ।

**चिन्तितवांश्च–**

> **नोद्याने न तरङ्गिणीपरिसरे नो रम्यहर्म्ये[१] न वा,**
> **पुष्यत्पुष्करगर्भगुञ्जदलिषु क्रीडातडागेष्वपि ।**
> **वात्याघूर्णितशीर्णपर्णतरला दृष्टिर्मदीयाधुना,**
> **लुभ्यल्लुब्धकभापितेव[२] हरिणी श्रान्तापि विश्राम्यति ॥१६॥**

**चिन्तितवांश्च**-विचारितवांश्च–

**नोद्यान** इति । अधुना मदीया दृष्टिः श्रान्ताऽपि-खिन्नाऽपि न उद्याने-वने विश्राम्यति-खिद्यते, पुनरवलोकनाय प्रवर्तित इत्यर्थः । तथा न तरङ्गिण्याः-नद्याः परिसरे-समीपे विश्राम्यति । तथा नो रम्ये हर्म्ये[२]-सुन्दरधनिगृहे विश्राम्यति । तथा न वा क्रीडातडागेष्वपि विश्राम्यति । किम्भूतेषु क्रीडातडागेषु ? पुष्यन्ति-विकसन्ति यानि पुष्कराणि-राजीवानि तेषां गर्भे-मध्ये गुञ्जन्तः-शब्दं कुर्वाणा अलयः-भृङ्गा येषु ते तथाविधेषु पुष्पफुल्लने । किम्भूता दृष्टिः ? वात्यया-वातसमूहेन घूर्णितं-भ्रमितं शीर्णं-शटितं यत्पर्णं-पत्रं तद्वत् तरला-चञ्चला दृष्टिः केव न विश्राम्यति ? लुभ्यन्-मृगीमांसखादने अभिलाषं-गार्द्ध्यं कुर्वन् यो लुब्धकः-मृगयुस्तेन भापिता-त्रासिता हरिणीव । यथा

---

१. एवं विधश्चिरं अनू. । २. रम्यहर्म्ये अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लुब्धकभापिता मृगी श्रान्ताऽपि नो विश्राम्यति तथा मदीया दृष्टिरपि । शार्दूलविक्रीडितम् ॥१६॥

**अपि च—**

**न गम्यो मन्त्राणां न च भवति भैषज्यविषयो,**
**न चापि प्रध्वंसं व्रजति विहितैः शान्तिकशतैः ।**
**भ्रमावेशादङ्गे कमपि विदधद्भङ्गमसमं,**
**स्मरापस्मारोऽयं भ्रमयति दृशं घूर्णयति च ॥ १७ ॥**

**अपि** च-**पुनश्चिन्तितवान्**—

**न गम्य** इति । अयं स्मरापस्मारः-स्मररूपग्रहावेशो ममेति गम्यते, मम दृशं भ्रमयति, च-पुनः घूर्णयति-व्याकुली करोति । किम्भूतः स्मरापस्मारः ? न मन्त्राणां गम्यः-ग्राह्यः, न मन्त्रैः शान्ती क्रियत इत्यर्थः । तथा भैषज्यं-औषधं तद्विषयोऽपि न भवति, च शब्दोऽप्यर्थः, औषधैरपि न शम्य इत्यर्थः । तथा विहितैः-कृतैः शान्तिकशतैरपि न च प्रध्वंसं-विनाशं व्रजति-प्राप्नोति । अन्यो हि अपस्मारः मन्त्राणां गम्यो भवति, औषधैः शम्यो भवति, शान्तिकैर्विनाशं च प्राप्नोति, परं अयं न । शान्तिकेति शान्तिकं-मङ्गलस्नानं । किं कुर्वन् स्मरापस्मारः ? भ्रमः-सन्देहः, स चात्र दमयन्तीलाभविषयस्तस्य य आवेशः-प्रवेशस्तस्मात् अङ्गे-देहे कमपि-वक्तुमशक्यं असमं-उग्रं भङ्गं-रुग्विशेषं विदधत्-कुर्वन् । "**भङ्गस्तरङ्गे भेदे च रुग्विशेषे पराजये । कौटिल्ये भव्यविच्छित्त्योः**" [२।३९] इत्य**नेकार्थः** ।

**किंचान्यदद्भुतम्—**

**पौष्पाः पञ्चशराः शरासनमपि ज्याशून्यमिक्षोर्लता,**
**जेतव्यं जगतां त्रयं प्रतिदिनं जेताप्यनङ्गः किल ।**
**इत्याश्चर्यपरम्पराघटनया चेतश्चमत्कारय-**
**न्व्यापारः सुतरां विचारपदवीवन्ध्यो[1] विधेर्वन्द्यताम् ॥ १८ ॥**

**किञ्च**-पुनः अन्यत्-एतत् अद्भुतम्, तदेवाह—

**पौष्पा** इति । विधेः-दैवस्य[1] व्यापारः-चेष्टा सुतरां-अतिशयेन वन्द्यतां-स्तूयताम् । किम्भूतः ? विचारपदव्या-विचारमार्गेण वन्ध्यः-रहितः, न विचारयितुं शक्य इत्यर्थः । किं कुर्वन् ? इति-अमुना प्रकारेण आश्चर्यपरम्पराया या घटना-योजना निर्वर्त्तना तया चेतः-

---

१. देवस्य अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मानसं चमत्कारयन्-सचमत्कृतिकुर्वन् । इतीति किम् ? पौष्पाः-पुष्पविकाराः[१] पुष्प-सम्बन्धिनो न त्वायसाः, शराः-सायकास्तेऽपि पञ्च न तु बहवः । अपरं इक्षोर्लता शरासनमपि-धनुरपि ज्याशून्यं-प्रत्यञ्चारहितं । अपरं जगतां त्रयं-त्रिभुवनं प्रतिदिनं जेतव्यम् । अपरं किलेति अरुचौ । जेताऽपि अनङ्गः-शरीररहितः कामः । अत्र प्रथमोऽपि शब्दः शरासनस्य ज्याशून्यस्य शरोपेक्षया[२] द्वितीयश्च जेतुरनङ्गस्य प्रतिदिनजेतव्य-जगत्त्रयापेक्षया वैषम्यव्यञ्जकः ॥ शार्दूलविक्रीडितम् ॥ १८ ॥

**एवमनेकविधवितर्कतरलितहृदये कुण्डिननगरवीथीविश्रान्तदृशि शनैरुद्वेल्लित[१]मल्लिकाक्षपक्ष[२]पल्लवस्य मृदुतर[३]तरङ्गितसरितः कमलवनवायोः समर्पितवपुषि निषधभूभुजि, भुजंगनिर्मोकधवले वसानो वाससी, रणन्मणिकङ्कणैराकूर्परं पूरितप्रकोष्ठः श्रीखण्डपिण्डपाण्डुरिततनुरपूर्व इव पर्वतकः प्रतीहारसूचितः प्रविवेशः ।**

**प्रविश्य च प्रकटितप्रणयप्रणामः प्रभुणा सविस्मयस्मितहुंकारेणाभि-लाषितः[४] स्तोकोन्नमित[५]भ्रूसंज्ञया विज्ञपयितुमारेभे ।**

**एवं**-अमुना प्रकारेण अनेकविधाः-नानाप्रकारा[३] ये वितर्काः-ऊहास्तैस्तरलितं-कम्पितं हृदयं-चेतो यस्य स तस्मिन्, तथा कुण्डिननगरवीथ्यां विश्रान्ता-दत्ता दृक् येन स तस्मिन्, तथा कमलवनवायोः समर्पितं-दत्तं वपुर्येन स तस्मिन्, पद्मवनवातं स्पृशतीत्यर्थः । किम्भूतस्य कमलवनवायोः ? शनैः-मन्दं उद्वेल्लिताः-ऊर्ध्वं कम्पिताः *मल्लिाकाक्षाणां-राजहंसविशेषाणां पक्षपल्लवा येन स तथा तस्य, तथा मृदुतरं-मन्दं मन्दं तरङ्गिता*-तरङ्गीकृता सरित्-नदी येन स तथा तस्य, एवंविधे सति नैषधभूभुजि-नले प्रतीहारेण-दौवारिकेण सूचितः, यथा—देव ! पर्वतकः समागच्छतीति ज्ञापितः । पर्वतकः सौधान्तः प्रविवेश-प्राविशत् । किं कुर्वन् ? भुजङ्गनिर्मोकवत्-सर्पकञ्चुकवत् धवले-श्वेते वाससी-वस्त्रे वसानः-परिदधानः । "**वस् आच्छादने**" [पा०धा० १०२३]। तथा रणरणन्ति[४]-शब्दायमानानि यानि मणिकङ्कणानि तैः आकूर्परं कूर्परं-भुजामध्यं आमर्यादीकृत्य, आकूर्परं कूर्परं यावत् पूरितः-भृतः प्रकोष्ठिका कलाचिका यस्य स । पूरितप्रकोष्ठः । तथा श्रीखण्डपिण्डेन-चन्दनद्रवसमूहेन पाण्डुरिता-धवलिता तनुः-शरीरं यस्य सः श्रीखण्ड-पाण्डुरिततनुः, अतएव अपूर्व इव-अभिनव इव । चिरं दृष्टस्यापि पर्वतकनाम्नो वामनस्य अपूर्वत्वमिह पूर्वमभूषितस्य सम्प्रति पारितोषिकभूषणभूषितत्वात् । दत्तोदन्त प्रश्नतात्पर्याद्वा ।

---

१. पुष्पविकाराः नास्ति अनू. । २. शरापेक्षया अनू. । ३. नानाविधाः अनू. ।

*—* चिह्नान्तर्गत पाठो नास्ति अनू. । ४. रण० नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**प्रविश्य** च प्रकटितः प्रणयेन-प्रश्रयेण प्रणामो येन सः । तथा प्रभुणा-नलेन विस्मयः-आश्चर्यं स्मितं-ईषद्धास्यं ताभ्यां सह वर्तत इति सविस्मयस्मितः, एवंविधो यो हुङ्कारस्तेन अभिलाषितः-वादितः सन् पर्वतकः स्तोकं-ईषत् उन्नमिता-उच्चैः कृता या भ्रूस्तया या संज्ञा-प्रयोजनसूचना तया, राज्ञो भ्रूसंकेतेन इत्यर्थः, विज्ञपयितुं-कथयितुं आरेभे । "**संज्ञा नामनि गायत्र्यां हस्ताद्यैरर्थसूचनैः । चेतनार्कस्त्रियोः**" [२।८०-८१] इत्य**नेकार्थः** ।

**'देव, श्रूयताम् । इतो गतवानहम् । अनन्तरमतिशयित[1]स्वर्गान्-मार्गाननेकविधचर्चाचारूणि चत्वराणि विलङ्घ्य, विहितमनःप्रसादान्-प्रासादानवलोकयन्, इतस्ततः सस्मितस्मरालसचलद्वेलाविलासि-नीविकारकूणितकोणेक्षणाक्षिप्तहृदयः, सेवाविरामनिःसरत्सामन्तसंकुलम्, अविरलगलन्मधुमञ्जरीपुञ्जपिञ्जरितसरससहकारवननिकुञ्जपुञ्जित-पुंस्कोकिलकुलकलरवरमणीयोद्यानमालावलयितम्, उपान्तकृतमणि-मन्दुरामन्दिरनिबद्धस्निग्धपोषणोत्कर्षहर्षहेषित[2]राजवल्लभतुरंगम्, उत्तुङ्गशृङ्गसंगतमङ्गलध्वजम्[3], अङ्गणोत्सङ्गरङ्गत्क्रीडाकुरङ्गविहंगम्, अभङ्गाङ्गर[4]क्षरक्षितकक्षान्तररममाणराजकुमारकम्, अतिसूक्ष्ममुक्ता-फलरचिततरङ्गरम्यरेखा[5]राजिराजिताजिरं राजभवनमविशम् ।**

**अतिमनोहारिणि यत्र सुपुष्करमालानि क्रीडावापीपयांसि नागयूथं च, सारवाणि लीलोद्यानसारसमिथुनानि सेवककविवृन्दं च, विलम्बतानि काञ्चनकुसुम[6]दामानि गीतं च, अनलसङ्गानि लक्षप्रदीपवर्तिमुखानि प्रेक्षणकं च ।**

**हे देव** ! श्रूयताम् । अहं-पर्वतकः इतः-भवत्समीपात् गतवान् । अनन्तरं-इतो निर्गमनात् पश्चात् मार्गान् चत्वराणि च विलंघ्य, प्रासादान् अवलोकयन्-पश्यन् ईदृक् राजभवनं अविशमिति सम्बन्धः । किम्भूतान् मार्गान् ? स्वर्गात्-प्रकरणात् स्वर्गमार्गात् श्रिया अतिशयिता अधिका "**आहिताग्न्यादित्वात् [ वाहिताग्न्यादिषु ] निष्ठान्तस्य प्राक्निपाते**" [**पा०सू०** २।२।३७] अतिशयितस्वर्गास्तान्, स्वर्गमार्गातिशायिशोभावत् इत्यर्थः । किम्भूतानि चत्वराणि ? अनेकविधा या चर्चा-गन्धोदकसेचनपुष्पप्रकरादिवार्ता[1] च, सा च प्रस्तावात् नलप्रवेशादिलक्षणा तया चारूणि-मनोज्ञानि । किम्भूतान् प्रासादान् ? विहितः-कृतो मनः-

---

१. ०प्रकरादि: अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रसादः-चेतो प्रसन्नता यैस्ते तथाविधान्, द्रष्ट्रीणां आह्लादजनकानित्यर्थः । किम्भूतं राजभवनम् ? इतस्ततः-सर्वतः सस्मिताः-सहास्याः-स्मरालसाः स्मरमन्थतश्चलन्त्यः-गच्छन्त्यः या वेलाविलासिन्यः-वारनार्यस्ताभिर्विकारेण-स्मरविलासेन कूणितं-संकोचितं कोणे-नेत्रप्रान्ते यत् ईक्षणं-नेत्रं तेन अक्षिप्तं[1]-वशीकृतं हृदयं-चेतो येषां एवंविधाः, सेवाविरामे-नृपपर्युपासनावसाने निःसरन्तः-निर्गच्छन्तो ये सामन्ताः-मण्डलेश्वरास्तैः संकुलं-व्याप्तम् । तथा अविरलं-प्रचुरं गलत्-क्षरत् मधु-मकरन्दो यत्र तत्, तथा मञ्जरीपुञ्जेन पिञ्जरितं-पिङ्गलीकृतं, तथा सरसं-आर्द्रं ततः कर्मधारयः, एवंविधं यत् सहकारवनं तस्य यो निकुञ्जः-गह्वरं तस्मिन् पुञ्जितं-मिलितं यत् पुंस्कोकिलानां-पिकानां कुलं-समूहस्तस्य यः कलरवः-मधुरस्वरस्तेन रमणीया-रम्या या उद्यानमाला तया वलयितं-परिकरितं, यस्य परितः-सर्वतो वनमाला विद्यत इत्यर्थः । तथा मणीनां मन्दुरा-वाजिशाला मणिमन्दुरा उपान्ते-राजभवनस्य समीपे कृता या मणिमन्दुरा सैव मन्दिरं तस्मिन् निबद्धाः-संयताः स्निग्धाः-सच्छायाः, यद्वा स्निग्धैः-हरित्तृणादिभिर्यत् पोषणं-पुष्टीकरणं तस्योत्कर्षात् अतिशयाद् हर्षेण हेषिताः-कृतहेषारवाः । राज्ञः-भीमस्य वल्लभाः-इष्टास्तुरङ्गाः-अश्वा यत्र तत् । **"हेषृ अव्यक्ते शब्दे"** [पा०धा० ६२१] निष्ठायां रूपम् । तथा उत्तुङ्गशृङ्गेषु-उन्नतशिखरेषु संगताः-वायुवशात् मिलिता मङ्गलध्वजा यत्र तत् । तथा अङ्गणोत्सङ्गे-अजिरमध्यभागे रङ्गन्तः-खेलन्तः क्रीडाकुरङ्गाः क्रीडाविहङ्गाश्च यत्र तत् । क्रीडाशब्द उभयत्रापि योज्यते । तथा अभङ्गाः-अपराजया ये अङ्गरक्षाः-राज्ञः अङ्गरक्षकास्तै रक्षिताः-पालिताः कक्षान्तरे-गृहभूमिभागमध्ये दोर्मूलमध्ये वा रममाणाः-क्रीडन्तो राजकुमारका यत्र तत् । तथा अतिसूक्ष्माणि-अतिलघूनि यानि मुक्ताफलानि तैः रचिता-विहिता तरङ्गवद् रम्या या रेखाराजिः-रेखापंक्तिस्तया राजितं शोभितं अजिरं-प्राङ्गणं यत्र[2] तत् ।

**अतिमनोहारिणि**-अतिमनोहरे यत्र-राजभवने एवं विधानि क्रीडावाप्याः पयांसि-जलानि नागयूथं च हस्तिवृन्दं । किम्भूतानि क्रीडावापीपयांसि ? सुष्ठु पुष्कराणां-पद्मानां माला-श्रेणिर्येषु तानि । किम्भूतं नागयूथम् ? सुष्ठु पुष्करं-शुण्डाग्रं यस्य तत् सुपुष्करं । **यदनेकार्थः**-**"पुष्करं द्वीपतीर्थाहिखगरागौषधान्तरे । तूर्यास्येसि फले काण्डे शुण्डाग्रे खे जलेम्बुजे"** [३।६१४-६१५]। तथा आलानं-अर्गलनस्तम्भोऽस्यास्तीति आलानि । तथा यत्र एवम्विधानि लीलोद्यानस्य सारसमिथुनानि सेवककवीनां वृन्दं च । किम्भूतानि सारसमिथुनानि ? सह आरवैर्वर्तन्त इति सारवाणि । किम्भूतं सेवककविवृन्दम् ? सारा-उत्कृष्टा वाणी[3]-सरस्वती यस्य तत् । तथा यत्र एवंविधानि काञ्चनकुसुमानां-सौवर्णपुष्पाणां दामानि-मालाः गीतं च । किम्भूतानि काञ्चनकुसुमदामानि ? विशेषेण लम्बितानि-लम्बायमानीकृतानि । किम्भूतं गीतम् ? विलम्बिस्वरकृतविलम्बोपेतं तथा तानि तानोपेतम् ।

---

१. आक्षिप्रं अनू. । २. यस्य अनू. । ३. वाणिः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा यत्र एवंविधानि लक्षसंख्यानां प्रदीपानां वर्त्तिमुखानि-दशाप्रान्ता प्रेक्षणकं च। किम्भूतानि लक्षप्रदीपवर्त्तिमुखानि ? अनलेन-ज्वालालक्षणेन संयोगो येषां तानि अनलसङ्गानि । किम्भूतं प्रेक्षणकम् ? न अलसं अनलसमोजस्वि उच्चैः स्थाने गीयमानत्वात्। तथा गानमस्यास्तीति इन् गानिम् ।[१] लक्षसंख्यद्रव्यपतीनां हि वेश्मसु यावल्लक्षं दीपा ज्वाल्यन्त इति प्रसिद्धिः ।

**किं बहुना—**

**सुस्थिततेजोराशेर्लक्ष्मीजनकस्य रत्ननिलयस्य ।**
**तस्योपरि प्लवन्ते वार्धेरिव वर्णकाः सर्वे ॥ १९ ॥**

**किम्बहुना**-किम्बहूक्तेन—

**सुस्थितेति** । वार्द्धेरिव-सागरोपमस्य तस्य राजभवनस्य-नृपमन्दिरस्य उपरि वर्णकाः-स्तोतारः प्लवन्ते-तरन्ति अपरिच्छिन्नगुणत्वात्, अलब्धमध्या बाह्यमेव वर्णयन्तीति भावः । यथा वार्द्धेरुपरि सर्वेऽपि प्लवन्ते । किम्भूतस्य तस्य ? सुष्ठुस्थितस्तेजोराशिः-प्रतापचयो यत्र तत्तस्य । तथा[२] लक्ष्म्याः-शोभाया जनकस्य-उत्पादकस्य, तथा रत्नानां निलयस्य-आश्रयस्य। किम्भूतस्य वार्द्धेः ? सुस्थितस्तेजोराशिः-वडवानलो यस्मिन् स तथा तस्य, तथा लक्ष्मीः-विष्णुपत्नी तस्याः जनकस्य, तथा रत्नानां निलयस्य । वारो जलानि धीयन्तेऽस्मिन्निति वार्द्धिः । आर्या ॥ १९ ॥

**तत्र च चलत्कञ्चुकिकुल[१]संकुलं पातालमिवान्तःपुरमनन्तालयं[२] प्राविशम्[३] । विविधकुसुमसम्पत्संपन्नपुण्यपादपपरिकरिताङ्गणवापीपरिसर-चलच्चक्रवाके[४] चन्द्रशालाशालिनि, शैलूष इवानेकभूमिकाभाजि, धनंजय इव सुभद्रान्विते, कुरुवंशाख्यान इव चारुचित्त्रविचित्रभित्तिभाजि, तुहिनाचलोच्चकूटायमाने सुधाधवलस्कन्धे धाम्नि ध्वजावली-विलग्न[५]सप्तसप्तिसप्तौ सप्तमभूमि-कायाम्[६], इतोमुखवातायने निविष्टाम्, इतो गतास्ताः कुब्जवामनकन्यकास्त्वद्वार्ताव्यतिकरविनोदारम्भिणीः सम्भाषयन्तीम्, अनवरततरललोचनालोकनैर्नीलोत्पलोपहारमिव त्वदधिष्ठितायै दिशे दिशन्तीम्, उत्तरीयांशुक[७]स्याच्छतया दृश्यमानमदनबाणव्रणकिणानुकारि-**

१. गानि अनू. । २. तथा नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कस्तूरिकापङ्कपत्रलताङ्कितकुचकलशश्रियम् अष्टमीशशाङ्कशकलश्रीशोभाभाजि ललाटपट्टे स्मरपरवश[१]त्रिपुरुषैरिव [२]'ममेयं ममेयम्' इति[२] संहर्षात्कृतं स्व[३]स्ववर्णानुकारिस्वीकारचिह्नमिव कुङ्कुममृगमदमलयजरसरचितत्रिपुण्ड्रकरेखात्रय[४]मुद्वहन्तीम्, आलोहितेन च[५] त्वद्वार्ता[६]मृतपानबालप्रवालप्रणालकेनेव कर्णप्रणयिना बालपल्लवेन विराजितवदनाम्, आसन्नमणिभित्तिदर्पणसंक्रान्तप्रतिबिम्बतया त्वत्संगमवाञ्छाकृतसंतापसंविभागार्थमिव बहून्यात्मरूपाणि सृजन्तीम्, आसन्नवर्तिनीभिर्वाणीविनोद[७]विदुषीभिः समानवयोवेषाभिः सखीभिः सरस्वतीमिव सकलविद्याधिदेवताभिरुपास्यमानाम्, उन्मिषत्कुसुमाभरणारमणीयाभिश्चामरग्राहिणीभिर्वनदेवताभिरिव शरीरिणीभिर्वसन्तमासश्रियमुपसेव्यमानाम्, अनुलेपनपुष्पपाणिभिः प्रसाधिकाभिर्भवानीमिवानेकनाकि[९]नायकनारीभिराराध्यमानाम्, इतस्ततो निपतन्मण्डनमणिमयूखमञ्जरीजालच्छलेनाङ्गेष्वमान्तमिव[१०] कान्तिरस[११]मुत्सृजन्तीम्, अशेषावयवेषु[१२] प्रतिबिम्बितैरासन्नचित्रभित्तिरूपकैर्मायाविभिः सुरासुरैरिव विधीयमानाश्लेषाम्, अग्रस्थिते[१३] पद्मरागमणिदर्पणे कन्दर्पातुरे रागिणि शशिनीव करुणयार्पितच्छायाम्, अशेषजगद्विजयास्त्रशलाकामिव[१४] मन्मथस्य, सङ्केतवसतिमिव सौन्दर्यगुणानाम्[१५] अधिदेवतामिव सौभाग्यस्य, विपणिमिव लावण्यस्य, शिल्पसर्वस्वरेखामिव[१६] विधातुः, अनन्त[१७]संसाररोहणैकरत्नकन्दलीं दमयन्तीमद्राक्षम्[१८] ।

ईक्षणामृतशलाकामवलोक्य[१९] च तामतिहर्षविस्मयकौतुकोत्तानितचक्षुश्चिन्तितवानहम् ।

**तत्र** च राजभवने अन्तःपुरं-अवरोधं प्राविशम् । किम्भूतं अन्तःपुरम् ? चलन्तो ये कञ्चुकिनः-महल्लकास्तेषां यत्कुलं-वृन्दं तेन संकुलं-व्याप्तं । तथा अनन्ताः-बहवः आलयाः-निलया यस्मिंस्तत् अनन्तालयं । किमिव ? पातालमिव । किम्भूतं पातालम् ? चलन्तो ये कञ्चुकिनः-उरगास्तेषां कुलेन संकुलं, तथा अनन्तः-शेषस्तस्य आलयो यत्तत् । तत ईदृग्विधे धाम्नि-गृहे सप्तमभूमिका-सप्तमक्षणस्तत्र स्थिते, इतः-अस्यां दिशि मुखं यस्य तत् इतोमुखं तस्मिन्, इतो मुखे एव-हस्तादिसंकेतकथिते एव वातायने-गवाक्षे निविष्टां-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आसीनां दमयन्तीं अद्राक्षमिति सम्बन्धः। 'इत' इति अव्ययं, "**सार्वविभक्तिकस्तसिल्**" [ ]। किम्भूते धाम्नि ? विविधकुसुमानां-अनेकविधपुष्पाणां या सम्पत् तया सम्पन्नाः-सहिताः पुण्याः-पवित्रा ये पादपाः-तरवस्तैः परिकरिता-वलयिता या अङ्गणवापी तस्यां परिसरे चलन्तश्चक्रवाका यत्र तत् तस्मिन् । तथा चन्द्रशालाशिरोगृहं तया शालते-शोभतेऽवश्यमिति चन्द्रशालाशालि तस्मिन् । तथा अनेका या भूमिकाः-गृहक्षणास्ता भजतीति अनेकभूमिकाभाक् तस्मिन् । कस्मिन्निव ? शैलूष इव-नट इव । किम्भूते तस्मिन् ? अनेका या भूमिका-वेषधारणं तां भजति यः स तस्मिन् । पुनः किम्भूते धाम्नि ? शोभनानि यानि भद्राणि-गृहावयवविशेषास्तैरन्विते-सहिते । कस्मिन्निव ? धनञ्जय इव-अर्जुन इव । किम्भूते तस्मिन् ? सुभद्रा-अर्जुनपत्नी तया अन्विते । तथा चारुचित्रेण-मनोहरालेख्येन विचित्रा भित्तीर्भजते यत्तत्तस्मिन् । कस्मिन्निव ? कुरुवंशस्य आख्यानं कथा तस्मिन्निव ? किम्भूते तस्मिन् ? चित्रविचित्रौ-शान्तनसुतौ तावेव भित्तिस्तां भजति यत्तत्तस्मिन्, तौ च कुरुवंशस्य भित्तिभूतौ, तत्कलत्राभ्यां अम्बिकाऽम्बालाभ्यां पाण्डुधृतराष्ट्रयोरुत्पन्नत्वात् । तथा तुहिनाचलस्य-हिमाचलस्य उच्चकूटमिव-उन्नतशृङ्गमिव आचरत् तुहिनाचलोच्चकूटायमानं तस्मिन्, अत्युन्नते इत्यर्थः । तथा सुधया-लेपविशेषेण धवलः स्कन्धः-मध्यभागो यस्य तत्तस्मिन् । तथा ध्वजावलीषु-पताकापंक्तिषु विलग्नाः सप्तसप्तेः-आदित्यस्य सप्तयः-अश्वा यत्र तत्तस्मिन् । किम्भूतां दमयन्तीम् ? इतः-भवत्समीपाद्गतास्ताः-कुब्जवामनकन्यकाः सम्भाषयन्तीं-वादयन्तीं । किम्भूतास्ताः ? तव-देवस्य वार्त्तानां-कुशलोदन्तानां यो व्यतिकरः-सम्बन्धः स एव विनोदः-कौतुकं तं आरभन्ते- वक्तुमुपक्रमन्ते इत्येवंशीलास्त्वद्वार्त्ताव्यतिकरविनोदारम्भिण्यस्ताः, त्वद्वार्त्ताः कथयन्ती-रित्यर्थः । तथा त्वया अधिष्ठिता-आश्रिता त्वदधिष्ठिता तस्यै दिशे-आशायै उत्तरस्यै अनवरतं-निरन्तरं तरललोचनाभ्यां-चञ्चलनेत्राभ्यां यानि आलोकनानि-वीक्षणानि तैः कृत्वा नीलोत्पलानां कुवलयानां य उपहारः-ढौकनं तमिव दिशन्तीं-ददतीम् । सा त्वद् दिशायै अजस्रं वीक्षते । शङ्के, तया कुवलयोपहारः क्रियत इति । पुनः किम्भूताम् ? उत्तरीयांशुकस्य-उपरिवाससः अच्छतया-अमलतया दृश्यमाना-वीक्ष्यमाणा मदनबाणानां-कामशराणां ये व्रणाः-क्षतानि तेषां ये किणाः-रुढव्रणपदानि तेषां अनुकारिण्यः-अनुकरणशीलाः सदृश्य इत्यर्थः । याः कस्तूरिकापङ्कस्य-मृगमदकर्दमस्य पत्रलताः पत्रभङ्गयस्ताभिरङ्किता-चिह्निता कुचकलशयोः श्रीर्यस्याः सा तां, मृगनाभिपत्रमञ्जर्या विभूषितपयोधरामित्यर्थः । पुनः किम्भूताम् ? ललाटपट्टे-अलिकफलके कुङ्कुमश्च-घुसृणं मृगमदश्च-कस्तूरिका मलयजश्च-चन्दनं तेषां यो रसः-द्रवस्तेन रचितं-कृतं त्रयाणां पुण्ड्रकाणां-तिलकानां यद् रेखात्रयं तत् उद्वहन्तीं-बिभ्रन्तीं । किम्भूते ललाटपट्टे ? अष्टम्यां

Jain Education International For Personal & Private Use Only www.jainelibrary.org

या शशाङ्कशकलश्रीः-चन्द्रखण्डशोभा तद्वत् शोभां भजतीति अष्टमीशशाङ्कशकल-श्रीशोभाभाक् यस्मिन्[१], खण्डशशिनो हि श्रियं ललाटं श्रयति। ललाटे एतत् त्रिपुण्ड्रकरेखात्रयं । उत्प्रेक्ष्यते, त्रयाणां-सत्वरजस्तमसां पुरुषास्त्रिपुरुषाः-ब्रह्मविष्णुरुद्राः, यथा-"**न बाधतेऽस्य त्रिगणः परस्परम्**" [किरातार्जुनीय ६-२११] इत्यत्र त्रयाणां-धर्मादीनां गणः त्रिगणः । यथा च श्री**चण्डसिंह**कृते **चण्डिकाचरिते**-"**प्रियत्रिवर्गचक्रमे**[२] **सकामम्**" इति। कर्मधारयस्तु संज्ञायामेव । स्मरस्य परवशा-अधीना ये त्रिपुरुषास्तैरिव 'ममेयं ममेयं ममेयम्' इति संहर्षात् स्पर्द्धया कृतं स्वः स्वः-स्वीयः स्वीयो यो वर्णः, यथा सत्त्वस्य धवलो वर्णः, रजसः पिञ्जरो वर्णः, तमसः कृष्णो वर्णस्तस्य अनुकारि-अनुकरणशीलं स्वीकारस्य-अङ्गीकारस्य चिह्नमिव-लक्ष्मेव । मन्ये, इदं कुङ्कुमकस्तूरिकाचन्दनद्रवाणां तिलकरेखात्रयं न, किन्तु सत्त्वरजस्तमःपुरुषैः स्वस्वस्वीकाराय स्वस्ववर्णानुकारि चिह्नं न्यस्तमस्तीति । पुनः किम्भूताम् ? कर्णे प्रणयः-स्नेहोऽस्यास्तीति कर्णप्रणयी तेन श्रवणन्यसेन बालपल्लवेन-नवकिसलयेन विराजितं वदनं यस्याः सा ताम्। किम्भूतेन ? आ-ईषल्लोहितेन-अरुणेन, उत्प्रेक्ष्यते-त्वदीया या वार्त्ताः-सन्देशास्ता एव अमृतं तस्य पानार्थं बालप्रवालस्य-नवविद्रुमस्य प्रणालकेनेव-प्रणाल्येव । प्रणालशब्दस्त्रिलिङ्गः । प्रणाल्यैव पानीयं प्रविशति तथाऽनेन त्वद्वार्त्तामृतं पास्यतीति वितर्क्यते । तथा आसन्ना-निकटा या मणीनां भित्तिः सैव दर्पणस्तस्मिन् संक्रान्तं प्रतिफलितं-प्रतिबिम्बं आकृतिर्यस्याः सा आसन्नमणिभित्तिदर्पणसंक्रान्तप्रतिबिम्बा तद्भावस्तया बहूनि-अनल्पानि आत्मनः-स्वस्य रूपाणि-आकृतयः सृजन्तीं-विदधतीम् । उत्प्रेक्ष्यते- त्वत्सङ्गस्य-त्वदाश्लेषस्य या वाञ्छा-ईहा तया कृतो यः सन्तापः-दुःखं तस्य संविभागार्थमिव-संविभजनार्थमिव । मन्ये, मणिभित्तौ इमानि स्वरूपाणि संक्रान्तानि न, किन्तु बह्वीं विरहव्यथां सोढुमशक्नुवती तां विभज्य विभज्य दातुं स्वरूपाणि बहूनि चकारेति । अन्योऽपि बहुं भारं वोढुमक्षमो विभज्य विभज्य तं अन्येभ्योपि ददातीति । पुनः किम्भूताम्? सखीभिरुपास्यमानां-सेव्यमानां । किम्भूताभिः सखीभिः ? आसन्ने-निकटे वर्त्तितुं शीलं यासां ता आसन्नवर्त्तिन्यस्ताभिरासन्नवर्त्तिभिः, तथा वाणीविनोदे-गीर्विलासे विदुष्यः-विचक्षणास्ताभिः, तथा वयश्च-कालावस्थावेषश्च आकल्पो वयो वेषौ समानौ-तुल्यो वयो वेषौ यासां तास्ताभिः। उत्प्रेक्ष्यते-सकला या विद्याधिदेवताः-विद्यानामधिष्ठात्र्यो देव्यस्ताभिरुपास्यमानां सरस्वतीमिव-भारतीमिव । भैम्याः सरस्वती सखीनां च विद्याधिदेवता उपमानम् । पुनः किम्भूतां दमयन्तीम् ? उन्मिषन्ति-विकसन्ति यानि कुसुमानि आभरणानि च-अलङ्कारास्तै रमणीयाभिः-सुन्दराभिश्चामरग्राहिणीभिः-प्रकीर्णक-[३]धारिभिरुपसेव्यमानां-आराध्यमानाम् । तां कमिव[४]? उत्प्रेक्ष्यते-शरीरिणीभिर्वन-

---

१. तस्मिन् अनू. । २. प्रियत्रिवर्गश्च कमे० अनू. । ३. धारिणीभिरुव, ४. कामिव अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

देवताभिरुपसेव्यमानां वसन्तमासश्रियमिव । किम्भूताभिर्वनदेवताभिः ? उन्मिषन्ति कुसुमान्येव आभरणानि शोभाजनकत्वात् तैः रमणीयाभिः । भैम्यावसन्तश्रीः चामरग्राहिणीनां च मूर्ता वनदेवता उपमानम् । पुनः किम्भूतां भैमीम् ? अनुलेपनं-विलेपनं पुष्पाणि च-[कु]सुमानि तानि पाण्योर्यासां ता एवंविधाभिः प्रसाधिकाभिः-मण्डनकारिणीभिराराध्यमानां-सेव्यमानां । उत्प्रेक्ष्यते-अनेकाः-बह्व्यो या नाकिनायकस्य-शक्रस्य नार्यस्ताभिः अप्सरोभिराराध्यमानां भवानीमिव गौरीमिव । ता अपि अनुलेपनपुष्पपाणयो भवन्ति । भैम्या गौरी प्रसाधिकानां च इन्द्ररमण्य उपमानम् । पुनः किम्भूताम् ? इतस्ततः-परितो निःपतत्-निःसरत् मण्डनमणीनां-अलङ्काररत्नानां यन्मयूखमञ्जरीजालं तस्य छलेन अंगेषु-अवयवेषु अमान्तं-अधिकीभवन्तं कान्तिरसं-दीप्तिमकरन्दं उत्सृजन्तीमिव-उद्वमन्तीमिव । मन्ये, इमा मण्डनमणिकान्तयो न निःपतन्ति, किन्तु स्वकान्तिरसं एव प्रतीकेषु अमान्तं सन्तं उद्वमतीति । तथा अशेषावयवेषु-समस्ताङ्गेषु प्रतिबिम्बितैः-प्रतिफलितैः आसन्ना या चित्रभित्तिः-आलेखवत्कुड्यं[1] तत्र यानि रूपकाणि-आकारास्तैर्विधीयमानः क्रियमाणः आश्लेषः-सङ्गो यस्याः सा तां । रूपकैः कैरिव ? उत्प्रेक्ष्यते-मायाविभिः-दाम्भिकैः सुरासुरैरिव । मन्ये, अङ्गेषु प्रतिफलितैर्भित्तिचित्ररूपैर्नाश्लिष्यते[2], किन्तु मायाविभिः सुरासुरैरेव आलिंग्यत इति । मायावित्वं च रूपान्तरकरणादिति । सुरासुरैरिति **"विरोधाविवक्षयै[3]कवद्भावाभावः शाश्वतिकविरोधाभावात्"** [ ] इति तु **उपाध्यायः प्रकाशवर्षः** । येषां च विरोधः शाश्वतिकस्तेषामेव द्वन्द्वैकवद्भावः । यथा अहिनकुलं अश्वमहिषं काकोलूकमित्यादि, एषां च न शाश्वतिको जात्या विरोधः किन्तु कार्यकृतस्तेन नैकवद्भावः । तथा च **भारविः**-**"सुरासुरैरम्बुनिधेर्ममन्थ"** [**किरातार्जुनीयः**] इति । यदि वा सुरसहिता असुरा इति **"शाक-पार्थिवादित्वात्"** [**पा०वा०**] तत्पुरुषः । पुनः किम्भूताम् ? अग्रस्थिते-पुरःस्थिते पद्मरागमणीनां-लोहितमणीनां यो दर्पणः-आदर्शस्तस्मिन्, कन्दर्पेण आतुरः-पीडितस्तस्मिन्, रागिणि-तस्यां प्रेमवति शशिनि-चन्द्रे करुणया-दयया अर्पिता-दत्ता छाया-प्रतिबिम्बं यया सा तामिव । मणिदर्पणलक्षणे शशिनि कारुण्यादर्पितप्रतिकृतिमित्यर्थः । अवज्ञातो हि रागी श्रियते[4], अतः स्वप्रतिबिम्बं दत्तवतीमिव । तथा मन्मथस्य-स्मरस्य अशेषजगतां-त्रिभुवनस्य यो विजयः-वशीकरणं तस्मिन् शस्त्रशलाकामिव[5]-आयुधविशेषमिव । यथा अस्त्रशलाकया वैरी जीयते तथा अनया स्मरस्त्रिलोकीं विजेष्यतीति । **"शलाका शारिका शल्यं श्वाविदालेख्यकूर्चिका । छत्रपञ्जरकाष्ठीषु"** [३।१०१-१०२] इत्य**नेकार्थः** । शल्यः आयुधविशेषः । तथा सौन्दर्यगुणानां संकेतवसतिमिव-संकेतगृहमिव । यथा संकेतवसतौ संकेतिताः सम्मिलन्ति तथाऽस्यां सौन्दर्यगुणा इति । तथा सौभाग्यमस्या वशे वर्तत इत्यर्थः ।

---

१. आलेख्यवत् अनू. । २. ०विचित्र० अनू. । ३. ०विविक्षयै० अनू. । ४. म्रियते अनू. ।
५. अस्त्रशलाकामिन अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा लावण्यं-नयनलेह्यं स्निग्धत्वं तदेव पण्यं-पणितव्यं तस्य विपणिमिव-हट्टमिव । यथा विपणौ सर्वमपि पण्यं लभ्यते तथाऽस्यां सर्वं लावण्यमिति । तथा विधातुः-वेधसः शिल्पसर्वस्वस्य-शिल्परूपसर्वधनस्य परमा रेखेव या सा तां, अन्यत्र एतादृशं शिल्पं धातुर्न कुत्रापि अस्तीत्यर्थः । तथा अनन्तः-अपर्यन्तः संसार एव रोहणः-रोहणगिरिस्तत्र एका-अद्वितीया रत्नकन्दलीव-रत्नप्ररोहशलाकेव या सा तां, संसारे अत्युत्कृष्टामित्यर्थः ।

**ईक्षणयोः**-नेत्रयोरमृतशलाकेव आह्लादजनकत्वात् या सा तां[१] अवलोक्य च अतिशायी-अधिको यो हर्षश्च विस्मयश्च-आश्चर्यं कौतुकं च-कुतूहलं तैरुत्तानिते-उन्मुखीकृते चक्षुषी येन एवंविधः सन् अहं चिन्तितवान् ।

**इयं हि-**

**स्मरराजराजधानी मङ्गलवलभी[१] विलासविहगानाम् ।**
**शृङ्गाररङ्गशाला हरति मनः कस्य न जनस्य[२] ॥ २० ॥**

**इयं** हीति । हि-निश्चितं इयं-दमयन्ती कस्य जनस्य मनो न हरति-वशीकुरुते ? किम्भूता ? स्मर एव राजा स्मरराजः तस्य राजधानीव, यथा राजधान्यां राजा स्वेच्छया क्रीडति तथाऽस्यां स्मर इति । तथा विलासा एव-विभ्रमा एव विहगाः-पक्षिणस्तेषां मङ्गलवलभीव-मङ्गलार्थवेश्माग्रभूमिभाग इव या सा । यथा वलभ्यां विहगाः क्रीडन्ति तथा ऽस्यां विलासा इति । वलभीनाम शोभनकाष्ठरचित आवासविशेष इति केचित् । तथा शृङ्गारस्य-रसविशेषस्य रङ्गशालेव-नृत्यशालेव या सा । यथा रङ्गशालायां शृङ्गार उद्भवति तथाऽस्यामपि । आर्या ॥ २० ॥

**दग्धो विधिर्विधत्ते न सर्वगुणसुन्दरं जनं कमपि ।**
**इत्यपवादभयादिव सुन्दरी वेधसा विहिता ॥ २१ ॥**

**दग्ध** इति । दग्धशब्दो निन्दार्थे, दग्धः-निन्द्यो विधिः सर्वगुणसुन्दरं-सर्वगुणसम्पूर्णं कमपि जनं न विधत्ते इति योऽसावपवादः-अवर्णस्तद्भयादिव तेनाऽसौ सुन्दरी विहिता । तेनेति विधिना अपवादोद्विग्नेन असौ इति साक्षाद् द्रष्टा सुन्दरीति समग्रगुणसौन्दर्योपेता विहिता । यदाह-**श्रीरामसूनुर्गङ्गाधरसूरिः-**

**आस्ते प्रियेण परिहासविलासहेला, खेलावलोकपरिरम्भरसोपलम्भा ।**

**सन्देशमात्रमधिगम्य रसातिरेकाद्, या स्पंदते झटति सा किल सुन्दरीति ॥**

[ ] गुणाः-सौन्दर्यादयो रसशब्देऽन्तर्भूताः । "**शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे**

---

१. तां दमयन्तीं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रसे" [ ] इत्यभिधानात् । अतस्तस्यां सृष्टायां स्रष्टुरपवादो न भविष्यतीति । हरिणाक्षीति पाठस्तु अक्षिमात्रसौन्दर्यार्थो न समग्रगुणसुन्दरतां वक्तीत्युपलक्षणपरतया निर्वाह्यः । आर्या ॥ २१ ॥

किं चान्यत्—

**लावण्यपुण्यपरमाणुदलं तदन्य-**
**दन्यः क्रियासु कुशलः स च[१] कोऽपि वेधाः ।**
**येनाद्भुता कृतिरियं विहिता विशिष्ट-**
**कार्येण कारणविशेषगुणोऽनुमेयः[२] ॥ २२ ॥**

किञ्चान्यत्—

**लावण्ये**ति । तत् लावण्येन पुण्यं-पवित्रं यत्परमाणूनां दलं उत्सेधवद् वस्तुपुञ्ज इति यावत् तत् लावण्यपुण्यपरमाणुदलं अन्यत् शिष्टं च-पुनः स कोऽपि क्रियासु-करणव्यापारेषु कुशलः-दक्षो वेधा अन्यः, अन्यपदं उभयत्र वैशिष्ट्यपरं विशिष्ट इत्यर्थः । येन निरुपमलावण्यदलेन-क्रियाकरणलब्धपाटवेन वेधसा च इयं-भैमी अद्भुता-आश्चर्यकारिणी आकृतिर्यस्याः सा एवंविधा विहिता । तत्रार्थे हेतुमाह—विशिष्टकार्येण-कार्यगुणवैशिष्ट्येन कारणस्य विशेषगुणो अनुमेयः । कार्यविशिष्टगुणेन हि कारणविशिष्टगुणो अनुमीयते । यथा पटस्य शौक्ल्येन तत्कारणभूततन्तुपटलस्य शौक्ल्यमिति । तथाऽत्रापीयं दमयन्ती चेत् सर्वगुणपरिपूर्णा जाता तर्हि एतस्याः कारणं परमाणुदलं वेधाश्च अन्य एव आसीदित्यनुमीयते । "**दलं शस्त्रीच्छदेर्द्धपर्णयोः । उत्सेधवद्वस्तुनि**" [२।५०५] इत्य**नेकार्थः** । वसन्ततिलका ॥ २२ ॥

**एवं वितर्कयन्तं[३] सापि मां पुष्कराक्षसूचितं संभ्रमेण[४] मनाग्वलित-कन्धराकन्दलीकम्पितकर्णोत्पलमवलोक्य[५] स्वागतप्रश्नानन्तरम् 'अहो बहोः कालादभूत्सुप्रभातमद्योद्योतितमिव तमस्काण्डपिण्डीकृतं कुण्डिनम्, अकाण्डाडम्बरितवसन्तविकासोत्सव इवाभवत्सरित्संगमोपकण्ठवनविभागः, चिरात्संपन्ना सलक्षणा दक्षिणा[६] दिगियम्, उन्निद्रित इव सह्याद्रिः, अमृतद्रवार्द्रित इवोज्जीवितो[७]ऽयं जनः' इत्यभिधाय 'पर्वतक, कच्चित्-कुशली परबलवनदावानलो[८] नलः' इति स्मितमुखमधुरया[९] गिरा मामभाषत[१०] । माभाषते[११] ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एवं**-स्मरराजेत्यादिपद्यत्रयव्यवस्थया वितर्कयन्तं-ऊहमानं, तथा पुष्कराक्षेण सूचितं, **यथा**-हे भैमि ! नलप्रेषितः पर्वतकः समागच्छतीति निवेदितं मां-पर्वतकं साऽपि-दमयन्त्यपि संभ्रमेण-आदरेण मनाक्-ईषत् वेलिता[1]-परिवर्तिता या कन्धराकन्दली-ग्रीवाप्ररोहस्तया कम्पितं-दोलितं कर्णोत्पलं यत्र वीक्षणे यथा[2] भवति तथा अवलोक्य स्वागतस्य यः प्रश्नः यथा भवतां स्वागतमिति तस्मात्, अनन्तरं-पश्चात् इत्यभिधाय हे पर्वतक ! कच्चित् इति इष्टपरिप्रश्ने परबलवने[3]-शत्रुसैन्यकानने दावानल इव यः सः एवंविधो नलः कुशली-कल्याणवान् इति स्मितं-विकसितं मुखं यस्यां सा स्मितमुखा, तथा मधुरा-मृष्टा ततः कर्मधारयः, एवंविधया गिरा-वचनेन मां अभाषत-सम्भाषितवती । दावानलोपमानेन आत्मनो विरहसन्तापहेतुत्वं नलस्यं व्यनक्ति । इति अभिधायेत्यत्र इतीति किम् ? अहो ! इति अद्भुतं बहोः कालात् सुप्रभातं-शोभनप्रातरभूत् । अहो तमस्काण्डेन-अन्धकारसमूहेन पिण्डीकृतं-सान्द्रीकृतं बह्वन्धकारव्याप्तमित्यर्थः, कुण्डिनं अद्य उद्योतितमिव-प्रकाशितमिव । **"काण्डं नालेऽधमे वर्गे द्रुस्कन्धेऽवसरे शरे । सहः श्लाघाम्बुषु स्तम्बे"** [२।११२-१३] **"पिण्डं तु वेश्मैकदेशे जीवनायसोः । बले सान्द्रे"** [२।१२५ ] इत्य**नेकार्थः**। अहो सरित्सङ्गमस्य-नदीसम्भेदस्य उपकण्ठे-समीपे वनविभागः-वनोद्देशः अकाण्ड एव-अकाल एव आडम्बरितः-उल्लसितो वसन्तविकासस्य-मधुविलासस्य उत्सवो यत्र एवंविध इव अभवत् । सैन्यजनानां वने विलसनात् । अहो चिरात्-चिरकालात् इयं दक्षिणादिक् सलक्षणा-लक्षणोपेता सम्पन्ता जाता । अहो सह्याद्रिरुन्निद्रित इव-जागरित इव, सैन्यकलकलस्य तत्र संजायमानत्वात् । अहो अयं दाक्षिणात्यो जनः अमृतद्रवेण-पीयूषरसेन आर्द्रित इव-सिक्त इव उज्जीवितः-पुनः प्राप्तचैतन्यः ।

**अहमपि प्रणम्य यथोचितमनन्तरमतित्वरितसखीजनोपनीतमासन-मध्यास्य देवेन प्रहितानि तान्याभरणोपायनान्युपानैषम् ।**

**अहमपि** यथोचितं-उचितं अनतिक्रम्य यथोचितं-यथायोग्यं प्रणम्य अनन्तरं-पश्चात् अतित्वरितं-अतिशीघ्रं यथा स्यात्तथा सखीजनेन उपनीतं-उपढौकितं दत्तमासनं-पीठं अध्यास्य-आरुह्य देवेन प्रहितानि तानि आभरणान्येव उपायनानि-ढौकनानि उपानैषं-प्रापयामास अदामित्यर्थः ।

**आदरेण[1] तया गृहीतेषु तेषु[2], बहुमते मयि, प्रकान्ते त्वद्गुण-**

१. वलिता अनू. । २. एवं यथा अनू. । ३. परिनलवने अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**ग्रहण[1]गोष्ठीव्यतिकरे, नर्मसुखालापलीलयातिक्रामति स्तोककालकला[2]-कलापे, पुष्कराक्षोऽप्यभाषत ।**

**तया**-दमयन्त्या आदरेण तेषु-उपायनेषु गृहीतेषु सत्सु, मयि बहुमते-तस्या अतिशयेन अभीष्टे, तव ये गुणाः-औदार्यधैर्यादयस्त्वद्गुणास्तेषां यद् ग्रहणं-कथनं तदेव गोष्ठी-क्रीडास्थानं तस्या यो व्यतिकरः-सम्बन्धस्तस्मिन् प्रक्रान्ते-आरब्धे सति, त्वद्गुणात् वर्णयति सतीत्यर्थः । तथा स्तोकः-अल्पो यः कालकलानां-कालविशेषाणां कलापः-समूहस्तस्मिन् नर्मसुखेन-परिहाससौख्येन या आलापलीला-सम्भाषणविलासस्तया अतिक्रामति-गच्छति सति पुष्कराक्षोप्यभाषत ।

**'देवि, विज्ञापयामि[3] यद्यभयम् ।**

**एवमनुश्रुतमस्माभिः 'किल सकलनाकिनायकपुरन्दरपुरःसराः सर्वेऽपि[4] लोकपालास्त्वामभिलषन्तोऽन्तःकरणारण्यलग्नमदनदावानलं[5]नलमायान्तमभ्यर्थितवन्तो यथा-महानुभावा भवन्ति हि भवादृशाः[6] परोपकारव्रतधर्माणः, तदेष प्रार्थ्यसे स्वप्रयोजननिरपेक्षेण त्वयास्मदर्थे दमयन्ती वरणीया, इति' ।**

**तद्देवि, देवदूतकार्येणागतो निषधेश्वरः ।**

**पृच्छतु वा देवी पर्वतकम्' ।**

हे **देवि** !-भैमि ! विज्ञापयामि-निवेदयामि यदि चेत् अभयं-भयाभावो न मारणोपक्रमः क्रियेतेति भावः ।

अथ विज्ञाप्यमेवाह-

**एवमि**ति । किलेति अरुचौ, तस्य इदं न रोचत इत्यर्थः । हे भैमि ! अस्माभिः एवं अनुश्रुतं, किं तत् ? सकलनाकिनां-सर्वस्वर्गिणां नायकः-स्वामी यः पुरन्दरः-इन्द्रः स पुरःसरः-अग्रेसरो येषां एवंविधाः सर्वेपि लोकपालाः-यमादयस्त्वां अभिलषन्तः-वाञ्छन्तः अन्तःकरणं-चेतस्तदेव अरण्यं-वनं तस्मिन् लग्नः-उत्थितो मदन एव दावानलो यस्य स तथाभूतं नलं आयान्तं-आगच्छन्तं अभ्यर्थितवन्तः-प्रार्थयामासुः ।

अथ ते यदभ्यर्थितवन्तस्तदाह-

**यथे**ति । यतः हि-स्फुटं भवादृशा महानुभावाः परोपकारव्रतमेव धर्म्मः-पुण्यं येषां

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ते । यद्वा, परोपकारव्रते एव-परोपकृतिकरणाभिग्रहे एव धर्मः-स्वभावो येषां ते परोपकारव्रतधर्माणः, यथा परोपकारस्तैः क्रियते अयमेव तेषां धर्म इति एवंविधा भवन्ति। "**धर्मादनिच्-केवलात्**" [पा०सू० ५।४।१२४] इति अनिच्प्रत्ययोऽत्र चिन्त्यः निरुपपदपूर्वपदाभावात् । यद्वा, परोपकारो अस्त्येषामिति परोपकारा "**अभ्रादित्वादः***" [ ] व्रतमेव धर्मो येषां ते व्रतधर्माणः, परोपकाराश्च ते व्रतधर्माणश्चेति समासो अतो "**धर्मादनिच् केवलात्**" [५/४/१२४] इति योगेन कथं अनिच् प्रत्यये न भवितव्यं केवलोपपदाभावादिति परास्तम् । नन्वेवं सति विशेष्यपदस्य परोपकारकोटित्वं न विशेषणरूपव्रतपदस्य तत्कथमयं समास इति चेत् ? न "**सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामत**" [ ] इति न्यायेन व्रत एव परोपकारकोटित्वपर्यवसानात् । तत्-तस्मात् एष त्वं इति प्राथ्र्यसे-याच्यसे । इतीति किम् ? स्वस्य यत्प्रयोजनं-दमयन्तीवरणलक्षणं तन्निरपेक्षेण-तदपेक्षारहितेन त्वया अस्मदर्थे-अस्मन्निमित्तं दमयन्ती वरणीया ।

**तत्**-इत्युपसंहारे, तस्मात् हे देवि ! देवानां यद् दूतकार्यं-दूत्यं तेन निषधेश्वरः-नल आगतः ।

यदि मदुक्तं न स्वीकरोतु तर्हि देवी वा-अथवा पर्वतकं पृच्छतु ।

**इति श्रुत्वा पुष्कराक्षभाषितम्, ईषद्विषादविलक्षस्मितस्मेरां[१] दृशं मयि साचि संचारितवती ।**

**मयापि संवादिते पुष्कराक्षवचने तस्मिन्, आकस्मिककठोरकाष्ठप्रहार-व्यथामिवानुभवन्ती, विन्दतु वीणाक्वणो[२] माधुर्यमितीव प्रतिपन्न-मौनव्रता, लभेतां कर्णोत्पले परभागमितीव मुकुलितनयना, प्राप्नोतु शोभां मुक्तावली दीप्तिजालमितीव मुक्तस्मिता, गच्छतु च्छायां कण्ठावलम्बिनी चम्पकमालेयमितीवाङ्गीकृतवैवर्ण्या, लभतां लीलाकमलमिदं सौभाग्य-मितीवानमितवदना[३], सा[४] क्षणमभूत् ।**

**इति** पुष्कराक्षभाषितं श्रुत्वा सा-भैमी मयि-पर्वतके ईषद् विषादेन-मनाग्मनः पीडया विलक्षं-वीक्षापन्नं यत् स्मितं-ईषद्धास्यं तेन स्मेरां-विकस्वरां दृशं साचि-तिर्यक् संचारितवती-प्रवर्त्तयामास । "**तिर्यगर्थे तिरः साचि**" [४।५८१] इति **हैमकोषः** ।

मयापि तस्मिन्-पुष्कराक्षवचने संवादिते सति, यथा-देवि ! इत्थमेव यदयं

१. * अभ्रादिभ्यः [हैम. ७.२.४६]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुष्कराक्षो ब्रूत इति एकवाक्ये कृते सति । आकस्मिकः-अकस्माज्जातः कठोरः-कठिनो यः काष्ठप्रहारः-लकुटप्रघातस्तेन या व्यथा-पीडा तामिव अनुभवन्ती-वेदयमाना सा-भैमी वीणाक्वणः-विपञ्चीस्वनो माधुर्यं-मृष्टं तां विन्दतु-लभतां इतीव हेतोः प्रतिपन्नं-अङ्गीकृतं मौनव्रतं यया सा एवंविधा क्षणमेकमभूत् । मौनं किल तया तद्व्यथया आश्रितं परं । उत्प्रेक्ष्यते, मयि वदन्त्यां क्व नाम वीणाक्वणे[1] माधुर्यमिति वीणाक्वणस्य माधुर्यापादनार्थमिति । तथा कर्णोत्पले-कर्णावतंसीकृतकुवलये परभागं-गुणोत्कर्षं शोभातिशयं लभेतामितीव हेतोर्मुकुलिते-संकोचिते नयने यया सा एवंविधा क्षणमेकं अभूत् । मन्नयनयोर्विकासे एतयोः शोभा का ? इति निमीलितनेत्रा आसीत् । तथा मुक्तावल्या-मुक्तालतया यत् दीप्तिजालं-कान्तिवृन्दं तत् शोभां प्राप्नोतु इतीवहेतोर्मुक्तं स्मितं-ईषद्धास्यं यया सा एवंविधा क्षणमेकमासीत् । मद्धास्यशौक्ल्यात् पुरतो मुक्तालताकान्तिः का ? इति हेतोर्हास्यमत्यजदिति । तथा इयं चम्पकमाला कण्ठावलम्बिनी-कण्ठकन्दलन्यस्ता छायां-शोभां गच्छतु-प्राप्नोतु इतीव हेतोरङ्गीकृतं वैवर्ण्यं-अङ्गविच्छायता यया सा एवंविधा क्षणमेकमासीत् । तथा इदं लीलाकमलं सौभाग्यं-सर्वजनवाल्लभ्यं लभतामितीव हेतोरवनमितं ईषन्नीचैः कृतं वदनं यया सा एवंविधा क्षणमेकमासीत् ।

**तत्र च व्यतिकरे—**

**विगलितविलासमपरममाकस्मिकजातभङ्गशृङ्गारम् ।**
**मूकितमिव मूर्छितमिवमुद्रितमिव भवनमिदमासीत् ॥ २३ ॥**

**तत्र च** व्यतिकरे-तस्मिन्नवसरे—

**विगलिते**ति । इदं भवनं एवंविधमासीत् । किम्भूतम् ? विगलितः-गतो विलासः-लीला यत्र तथाविधं, तथा अपगता रमा-लक्ष्मीर्यत्र तत् अपरमं, तथा आकस्मिको जातः-उत्पन्नो भङ्गः-विनाशो यत्र स आकस्मिकजातभङ्गः, एवंविधः शृङ्गारः-रसविशेषो यत्र तत् उपरतशृङ्गारमित्यर्थः । तथा मूकितमिव-मौनप्राप्तमिव, तथा मूर्छितमिव-मूर्छां प्राप्तमिव, तथा मुद्रितमिव-जतुना कृतमुद्रमिव । सर्वत्र "**तारकादित्वादितच्**"[**तदस्य सञ्जातं तारकादिभ्य इतच्**] पा०सा० ५।२।३६] तस्यां व्यथितायां सर्वमपि गृहं व्यथितमिव अभूदिति भावः । आर्या ॥ २३ ॥

**राजा तु 'पर्वतक, ततस्ततः' ।**

**पर्वतकोऽपि 'देव, श्रूयताम् ।**

---

१. वीणाक्वणो अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**राजा तु**-नल उवाच-हे पर्वतक ! ततस्ततः किं जातमिति गम्यते ।

**पर्वतकोपि** वक्तुमुपचक्रमे हे देव ! श्रूयताम्, अतः परं यज्जातम् ।

**अतः परम्—**

**ईषन्निःसृतकुन्दकुड्मलसदृग्दन्तप्रभामञ्जरी-**
**रोचिष्णुस्मितमन्थरां[१] मयि दृशं संचारयन्ती मनाक् ।**
**अस्यन्ती करपद्मभृङ्गमधरे बन्धूकबुद्ध्यागतं,**
**वारंवारमकम्पयत्तरलितस्तोकावतंसं शिरः ॥ २४ ॥**

**ईषदिति** । सा-दमयन्ती वारम्वारं-पुनः पुनः शिरः अकम्पयत्-धुनाति स्म । किम्भूतं शिरः ? स्तोकं-मनाक् तरलितः-कम्पितः अवतंसः-शिरः स्रक् यत्र तत्, **"आहिताग्न्यादित्वात् [ वाहिताग्न्यादिषु पा०सू० २।२।३७ ]निष्ठान्तस्य प्राक्निपाते"** तरलितस्तोकावतंसं । किम्भूता ? ईषत्-मनाक् निःसृतं निर्गतं यत्कुन्दकुड्मलं-कुन्दमुकुलं तेन सदृशी उज्ज्वला या दन्तप्रभामञ्जरी तया रोचिष्णुः-दीपनशीलं यत् स्मितं-ईषद्धास्यं तेन मन्थरा-मन्दा, ईषद्धास्यं कुर्वतीत्यर्थः । तथा मनाक् मयि-पर्वतके दृशं सञ्चारयन्ती-प्रवर्तयन्ती, मामवलोकयन्तीत्यर्थः । तथा अधरे-ओष्ठे बन्धूकबुद्ध्या रक्तत्वात् बन्धूककुसुममिदमिति मत्या आगतं करपद्मस्य यो भृङ्गस्तं अस्यन्ती-क्षिपन्ती प्रेरयन्ती । शार्दूलविक्रीडितम् ॥२८॥

**ततः परम् । वारितवारविलासिनीचाटुवचनक्रमम्, आकस्मिकविस्मयविस्मृतस्मितविलासम्, अतनुतुहिनाहतनवनलिनदलदीनदीर्घेक्षणम्, उष्णसरलश्वासारम्भिविषमविषादविच्छायिताननेन्दुद्युति[२], तस्याः स्थानकमवलोक्य सखेदं सखीजनेन देवि, भवन्निःश्वासपवनपरम्परया पर्यस्त इवास्ताचलहस्तावलम्बनमयमाश्रयति भगवान्भानुः, इयं च [३]सौभाग्यशालिनि नले निलीनचित्तायास्तवलोकपालपार्थिवयोः[४] प्रार्थनाव्यतिकरमिममाकर्ण्य लज्जितेव पिहितश्रवण दूरी[५]भवति वासरश्रीः, इमानि[६] निश्चलनिलीनमधुपनिपीयमानगर्भमधूनि सङ्कोचयन्ति लोचनानीव कमलानि, संविभागीकृतविषादा इव विलासवयस्याः सरसी[७] सरोरुहिण्यः, इमाश्च 'कथमस्मत्पतयो मनुष्यकन्यकां[८] कामयन्ते' [९]इतीर्ष्याशोकवशादिव**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**दिशः श्यामायन्ते, तत्प्रेष्यतामयं पर्वतकः' इत्यभिधीयमाना कथंकथमपि चिन्तान्तरायतिरस्कृतालापमीषदुन्नम्य[10] मुखं समुल्लसदशोकपल्लवानुकारि[11] करतलमुत्तानीकृत्य मामविस्मरणीयसंमानादानावसाने व्यसर्जयत्।**

**ततः परं** एवंविधं तस्याः-भैम्या स्थानं-अवस्थामवलोक्य सखेदं यथा भवति तथा सखीजनेन इति, अभिधीयमाना-निवेद्यमाना सती सा-भैमी कथं-कथमपि महता कष्टेन चिन्तैव अन्तरायः-विघ्नस्तेन तिरस्कृत आलापः-भाषणं यत्र तत् एवंविधं मुखं ईषद् उन्नम्य-ऊर्ध्वीकृत्य समुल्लसन्-विलसन् अशोकपल्लवस्य अनुकारी-अनुकरणशीलो रक्तत्वसाधर्म्यात् यः करतलस्तं उत्तानीकृत्य-उन्मुखं विधाय मां-पर्वतकं अविस्मरणीयं-अविस्मृतियोग्यं सन्मानपूर्वकं यद्दानं-अलङ्कारादिवस्तुवितरणं तस्य अवसाने-प्रान्ते व्यसर्जयत्-प्रैषीत्, सगौरवदानं दत्त्वा हस्तसंज्ञयैव मां मुमोचेत्यर्थः । किम्भूतं तस्याः स्थानम्? वारितः-निषिद्धो वारविलासिनीनां चाटुः-प्रियो वचनक्रमोः-वाक्परिपाटी यत्र तत् तथा हे वारविलासिन्य ! तूष्णीं भजतेति । तथा आकस्मिकः-अकस्माज्जातो यो विस्मयः-आश्चर्यं लोकपालप्रार्थनालक्षणं तेन विस्मृतो विलासः-लीला यत्र तत् । तथा अतनुतुहिनेन-बहुहिमेन आहतं-उपरिपतनेन विध्वस्तं यन्नवनलिनदलं-तरुणपद्मपत्रं तद्वद् दीने-विच्छाये दीर्घे-आयते ईक्षणे यत्र तत् । तथा उष्णः-सोष्मा सरलः दीर्घो यः श्वासः-मुखमारुतस्तं आरभते-जनयत्यभीक्ष्णमिति उष्णसरलश्वासारम्भी, एवंविधो यो विषमविषादः-असममनःपीडा तेन विच्छायिता-विवर्णतां प्राप्ता आननेन्दुद्युतिर्यत्र तत् । इति अभिधीयमाने इत्यत्र इतीति किम्? हे देवि ! अयं प्रत्यक्षो भगवान् भानुः-सूर्यः अस्ताचल एव हस्तावलम्बनं-हस्ताधारो हस्तग्राह्यस्तम्भस्तत् आश्रयति, अस्तगिरिं प्राप्नोतीत्यर्थः । किमिति? उत्प्रेक्ष्यते, भवत्या निःश्वासपवनस्य या परम्परा-अविश्रान्तं निर्गमस्तया पर्यस्त इव-परिक्षिप्त इव । अन्योऽपि केनचित् बलात्पर्यस्तो भवति सोऽपि पतन् किंचिद्धस्तावलम्बनं स्तम्भादि आश्रयति तथाऽयमपि हस्ताभ्यां अवलम्ब्यते यत्तद्धस्तावलम्बनम् । तथा हे देवि ! इयं वासरश्रीः-दिनलक्ष्मीः पिहितः-आच्छादितः श्रवणः-नक्षत्रविशेषो यस्यां एवंविधा सती दूरीभवति दिनं गतमित्यर्थः । उत्प्रेक्ष्यते-सौभाग्येन शालते-शोभत इत्येवंशीलः सौभाग्यशाली तस्मिन् नले निलीनं-निविष्टं चित्तं यस्या । एवंविधायास्तव इमं लोकपालश्च पार्थिवश्च जात्यैकवचनं तयोः सम्बन्धिनं प्रार्थनाव्यतिकरं-याञ्चासम्बन्धं आकर्ण्य लज्जितेव-व्रीडितेव । वासरश्रीरिति चिन्तयति—ननु इयं नले निबद्धरागा, अथ च लोकपालाः पार्थिवाश्च इमां प्रार्थयन्ते अहो ! असमञ्जसमिति व्रीडावतीव सती

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पिहितश्रवणा दूरीभवति । अन्याप्येवंविधा[१] अकृत्यं श्रुत्वा पिहितश्रवणा-कर्णौ पिधाय दूरे गच्छतीति । तथा हे देवि ! तव विलासस्य वयस्याः-सख्यः सरसीसरोरुहिण्यः इमानि कमलानि लोचनानीव संकोचयन्ति-निमीलयन्ति, एतासु भवत्या विलासकरणात् विलासवयस्या त्वमेतासां । किम्भूतानि कमलानि ? निश्चलाः-निभृता निलीनाः-अन्तः-प्रविष्टा ये मधुपास्तैर्निपीयमानं-आस्वाद्यमानं गर्भमधु-अन्तवर्त्तिमकरन्दो येषु तानि । कमलानां लोचनोपमानं भृङ्गाणां य तारकोपमानं । सरसीसरोरुहिण्यः किम्भूताः ? उत्प्रेक्ष्यते, संविभागीकृतः-विभज्य गृहीतो विषादो याभिस्ता एवंविधा इव । मन्ये, सरःपद्मिनीभिरपि स्वकमललोचननिमीलनाद् भवद्विषादो वेंटित्वा[२] गृहीत इति तव विलाससखीत्वात् । अन्या अपि सख्यः स्वसख्याविषादे विषादिन्यो भवन्ति । तथा हे दमयन्ति ! च-पुनः इमा दिशः श्यामायन्ते-कृष्णीभवन्ति । उत्प्रेक्ष्यते, अस्माकं दिशां पतयः अस्मत्पतयः-अस्मत्प्रियाः कथं मनुष्यकन्यां कामयन्ते-अभिलषन्ति इति ईर्ष्या च शोकश्च तयोर्वशादिव । हीनकन्याभिलाषे ईर्ष्या, तत्परिणयने च शोकः । अन्यापि पूर्वप्रिया अपरां स्वतोऽवमां प्रियां प्रत्यभिलाषुकं प्रियं दृष्ट्वा ईर्ष्याशोकवशात् श्यामानना जायते । तत्-तस्मात् हे देवि ! अयं पर्वतकः प्रेष्यतां-प्रियं प्रतिमुच्यताम् ।

**विसर्जितश्च तया[१] तत्कालमाविर्भवद्विषादवशसंपन्नमौनया न पुनः संभाषितोऽस्मि, न वीक्षितोस्मि, न पृष्टम्, न[२] संदिष्टं किमपि, केवलं चलन्नेत्रविभागप्रान्ततरत्तारया दृष्ट्या[३] समवलोक्य समुत्तानितकरकमल-संज्ञयैव [४]संप्रेषितः कथम्[४] इति चिन्तयन्न[५]लसालसमसमञ्जसपातिभिः पश्चिममुखैरिव पादैरहमिहायातवान्[६] ।**

**तद्देव ! दमयन्ती देवदूतकार्याङ्गीकरणव्यतिकरमिममाकर्ण्य परं विषादमापद्यत ।**

**तया**-दमयन्त्या विसर्जितश्च अहं इति चिन्तयन् सन् अलसालसं-मन्दं मन्दं असमञ्जसेन-अनौचित्येन पतितुं शीलं येषां ते असमञ्जसपातिनः । एवंविधैः पश्चिममुखैरिव पादैरिह आयातवान् । पश्चिममुखा हि पादा असमञ्जसपातिनो भवन्ति । इतीति किम् ? अस्मीति अव्ययं, अहमित्यर्थे । अहं तत्कालं-तत्समयमेव आविर्भवन्-प्रकटीभवन् यो विषादस्तद्वशेन सम्पन्नं-जातं मौनं यस्याः सा एवंविधया भैम्या न पुनः सम्भाषितः-वादितः । तथा अस्मि-अहं न पुनर्वीक्षितः । तथा न पुनः पृष्टं प्रियवार्त्तादि । तथा पुनः किमपि नलं प्रति न संदिष्टं-न सन्देश उक्तः । केवलं-परं चलन् यो नेत्रविभाग-

---

१. एवंविधं अनू. । २. वंटित्वा अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रान्तस्तस्मिन् तरन्ती-चञ्चन्ती तारा यस्यां सा तथाविधया दृष्ट्या-नेत्रेण समवलोक्य समुत्तानितं-उन्मुखीकृतं यत्करकमलं तस्य संज्ञयैव-संकेतेनैव कथं-किमपि[१] सम्प्रेषितः ।

तत्-इत्युपसंहारे, तस्मात् हे देव ! दमयन्ती इमं देवदूतकार्यस्य यो अङ्गीकरण-व्यतिकरः-स्वीकारसम्बन्धस्तं आकर्ण्य-श्रुत्वा परं-प्रकृष्टं विषादं-मनःपीडां आपद्यत-प्राप्ता ।

**अन्यच्च । मन्ये च–**

**परिम्लानच्छायाविरहितसनिद्रद्रुमवनं,**
**पतत्पङ्क्तीभूतध्वनितशकुनोन्नादितनभः ।**
**वियोगव्यापारा[१]दुपनदि रुदच्चक्रमिथुनं**
**विषीदन्त्यां देव्यामिदमपि विषण्णं जगदभूत् ॥ २५ ॥**

**अन्यच्च**-अपरं च, **मन्ये** चेति । च-पुनरहमेवमन्ये सम्भावयामि । देव्यां-भैम्यां विषीदन्त्यां-विषादं प्राप्नुवत्यां सत्यां इदं जगदपि विषण्णं-विषादापन्नं अभूत् । जगतो विषण्णतामेवाह-किम्भूतं जगत् ? परिम्लानं पत्रसंकोचवत्, तथा छायया-शोभया विरहितं-उज्झितं, तथा सनिद्रमिव-शकुनिकूजनाभावात् प्राप्तनिद्रमिव यत्तत् पश्चात् कर्मधारयः, एवंविधं द्रुमवनं यत्र तत् । तथा पतन्तः-उपरिभागान्नीचैर्गच्छन्तः पंक्तीभूताः-श्रेणीभूता ध्वनिताः-शब्दिता ये शकुनाः-पक्षिणस्तैरुन्नादितं-मुखरितं नभः-व्योम यत्र तत् । तथा वियोगव्यापारात्-विरहप्रयोगात् उपनदि-नद्यां रुदत्-अश्रूणि मुञ्चत् चक्रवाकाणां मिथुनं यत्र तत् । एते विषादसूचका भावाः । अन्योऽपि विषण्णः परिम्लानो विच्छायः सनिद्रः पूत्कुरुते रोदिति च । शिखरिणी ॥ २५ ॥

**इत्यभिधाय स्थिते पर्वतके तत्कालोचितमिममेवार्थं समर्थयन्नव-सरपाठकः पपाठ ।**

**इति** अभिधाय-उक्त्वा पर्वतके स्थिते सति तत्कालस्य-तत्समयस्य उचितं इममेव-पूर्वोक्तमेव जगच्छोकलक्षणं अर्थं समर्थयन्-द्रढयन् अवसरपाठकः पपाठ ।

**कन्यामन्यानुरक्तां कथममृतभुजो मानुषीं मानयन्ते[२],**
**तन्वङ्गीः सस्मितास्याः स्मरविवशदृशो नाकनारीर्विहाय ।**
**वक्त्रं खेदादिवैतद्दिनपतिरधिकं व्रीडयैवावनम्रः,**
**कोपेनेवारुणांशुः[३] प्रविशति वरुणस्यालयं पश्चिमाशाम्[४] ॥२६॥**

---

१. किमिति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कन्यामिति**। अमृतभुजः-देवाः अन्यस्मिन्नले अनुरक्तां-रागिणीं मानुषीकन्यां कथं मानयन्ते-सत्कुर्वन्ति ? किं कृत्वा ? तन्वङ्गीः-कृशतनुलताः, तथा सस्मितं-सहास्यं आस्यं यासां ताः सस्मितास्याः, तथा स्मरेण विवशाः-परवशा दृशो यासां ताः स्मरविवशदृशः, एवंविधाः नाकनारीः-सुराङ्गना विहाय-त्यक्त्वा दिनपतिः-सूर्यः खेदात्-मनस्तापात् एतद्वक्तुमिव वरुणस्यालयं-पश्चिमाशां प्रविशति। खेदस्तु तदकार्यावलोकनात्। किम्भूतो दिनपतिः ? उत्प्रेक्ष्यते, अधिकं-अतिशयेन व्रीडयेव अवनम्रः-ईषन्नमनशीलः, तथा कोपेनेव अरुण-लोहिता अंशवः-करा यस्य सः एवंविधः। अन्योऽपि यः कस्यचित्-किञ्चिदकृत्यं दृष्ट्वा खेदात् कमपि वक्तुं प्रयाति स लज्जया अवाङ्मुखः कोपेन अरुणमुखश्च स्यादिति। वक्तुं खेदादित्यस्योपयोगि वरुणस्यालयमिति पदं। वचो हि श्रोतारमपेक्षते। मानयन्त इति प्रयोगश्चिन्त्यः, कथं ? यो हि "**मनण्[१] स्तम्भे**" [ ] चुरादौ आत्मनेपदी, स्तब्धो भवतीत्यर्थसूचकः, स चात्र न घटते। पूजार्थस्तु युजादौ परस्मैपदी मानयति मनतीति च। यदुक्तं **कविरहस्ये**-

**"यो धर्मं श्रुतिनिर्मलेन मनसा मीमांसते सर्वदा,**
**यो मान्यान् बहुमानयत्यविरतं भृत्यांश्च संमानति।**
**शत्रौ मानयते मनांसि मनुते यश्चेष्टया देहिनां,**
**युद्धे वैरिबलं तृणाय सकलं यो मन्यते तेजसा॥"** [ ]

यद्वा, '**मानयन्ती**'ति पाठः पादान्ते लघोरपि गुरुत्वस्य महाकविसम्मतत्वात्। प्रत्यन्तरे तु '**कामयन्ते**' इति पाठस्तत्र[२] न कोऽपि[३] दोषशङ्का समुन्मीलति। स्रग्धरा॥२६॥

**राजा तु तदाकर्णयन्, अवतीर्य सौधशिखरतलाल्लीलापदप्रचारेण संध्याविरामो[१]पविष्ट[२]जपद्विजजनसनाथसैकते सरित्सङ्गमे सन्ध्याह्निकमकरोत्।**

**ततश्च पश्चिमायां दिशि स्फुरिते[३] सन्ध्यारागे, रुधिरासवपिपासया कालवेतालमण्डलीव प्रधावमाना, त्रिभिः स्त्रोतोभिः प्रवृत्तया गङ्गया सह संहर्षादिवानेक[४]स्त्रोतसां सहस्त्रैर्गगनतलमिव प्लावयन्ती कालिन्दीव, व्यजृम्भत तिमिरपटलपङ्क्तिः।**

**अनन्तरं च चन्द्रमसा गर्भिणी पौरन्दरी दिक्केतकीकुसुम[५]पत्रपाण्डिमानमगमत्[६]।**

१. मनिण् अनू.। २. तत्र च अनू.। ३. काऽपि अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**उल्ललास च[१] चण्ड[२]तरमारुतान्दोलितोदयाद्रिद्रुमकुसुमकिञ्जल्क-रेणुराजिरिव कपिशा शशाङ्कद्युतिः ।**

**राजा तु**-नलः तत्पूर्वोक्तं आकर्णयन् सन् सौधशिखरतलात् लीलया-विलासेन यो पदप्रचारः-चरणरचना तेन अवतीर्य सरित्सङ्गमे-नदीसम्भेदे सन्ध्यायाः यत् आह्निकं-नित्यक्रिया तत् अकरोत्। किम्भूते सरित्सङ्गमे ? सन्ध्याविरामे-सन्ध्यावसाने उपविष्टाः-निषण्णाः जपन्तः-मन्त्रजपं कुर्वंतो ये द्विजजनास्तैः सनाथं सहितं सैकतं-पुलिनं यस्य स तस्मिन्।

**ततश्च** सन्ध्याह्निककरणानन्तरं पश्चिमायां दिसि सन्ध्यारागे-सायन्तनरक्ततायां स्फुरिते-प्रोद्दीप्ते सति, तिमिरपटलपंक्तिः-तमोवृन्दराजिर्व्यजृम्भत-विललास। तिमिरपटल- पंक्तिः केव ? उत्प्रेक्ष्यते, रुधिरमेव आसवः-शीधुस्तस्य या पिपासा-पानेच्छा तया प्रधावमाना-शीघ्रं गच्छन्ती कालवेतालानां-कृष्णरजनिचरविशेषाणां मण्डलीव-पंक्तिरिव। शंके, इयं तिमिरपंक्तिर्न, किन्तु पश्चिमायां रुधिरं पातुमियं कालवेतालपंक्तिः प्रधावतीति । "**चात्वालकंकालहिंतालवेतालजम्बालशब्दालसमाप्तालादयः**" [ ] इति आलप्रत्यये वेताल इति निपात्यते। तथा पुनरुत्प्रेक्ष्यते, त्रिभिः स्रोतोभिः प्रवृत्तया-प्रौढया गङ्गया सह संहर्षादिव-स्पर्द्धयेव अनेकस्रोतसां-अनेकप्रवाहाणां सहस्रैर्गगनतलमिव आप्लावयन्ती-आपूरयन्ती कालिन्दीव-यमुनेव। गङ्गायाः किल त्रीण्येव स्रोतांसि, अहं पुनरनेकानि स्रोतांसि विधास्यामीति, संहर्षेण शङ्के, यमुनाविहितैरनेकैः स्रोतोभिर्गगनमा-पूरयति, तत्स्रोतसां[१] नीलत्वात्।

**अनन्तरं** च-तिमिरपटलभवनात् पश्चात् चन्द्रमसा-शशिना कृत्वा गर्भिणी-गुर्विणी पौरन्दरी-एन्द्री दिक् केतकीकुसुमपत्रवत् पाण्डिमानं-पाण्डुतामगमत्-प्राप। गर्भिणी हि स्त्री केतकपत्रवत् पाण्डुतां बिभर्ति तथेयमपि ।

**च**-पुनः कपिशा-पिङ्गलवर्णा शशाङ्कद्युतिः-चन्द्रदीप्तिरुल्ललास-प्रादुर्बभूव । शशाङ्कद्युतिः केव ? उत्प्रेक्ष्यते, चण्डतरः-अत्युग्रो यो मारुतः-वायुस्तेन अन्दोलिताः-कम्पिता ये उदयाद्रिद्रुमाः-उदयाचलतरवस्तेषां यानि कुसुमानि तेषां किञ्जल्करेणुराजिरिव-केसररजः पुञ्ज इव, तस्या अपि कपिशवर्णत्वात् ।

**अथ क्रमेण पूर्वपुलिना[३]द्राजहंस इव गगनमन्दाकिनीमुच्चलितः, केसरिकिशोर इवोदयगिरिगुहागह्वरात्तिमिरकरियूथपतिशंकया[४]पृष्ठलग्नः, स्फटिकमयः पूर्णकुम्भ इव जगद्विजयप्रस्थानस्थितस्य मङ्गलाय मकरकेतोः**

---

१. तत्स्रोतसामपि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**केनापि सज्जीकृतः, श्रीखण्डपिण्ड इव मण्डनाय महेन्द्र[१]दिशा हस्ताश्लेषो-[२]पलालितः, शाङ्खिका[३]पुष्पस्तबक[४] इव गगनश्रिया श्रवणे संयोजितः, कुम्भ इवैकः प्राचीन[५]वनविहारिसुरकरीन्द्रस्य प्रकटतां गतः[६], वासर-विरावल्लीमुल्लूय कन्द इवोद्धृतो निशाशबरिकया, पाण्डुपुष्पाक्षत-गुञ्जापुञ्ज इव सिद्धवधूभिरुदयाचलचतुष्पथे[७] विरचितः, गण्डशैल इव कैलास-शिखराल्लुठित्वागतः, सीमन्तमौक्तिकमिव पूर्वदिङ्मुखस्य, सितातपत्रमिव पूर्वाशाधिपतेः पुरन्दरस्य, क्रीडामौक्तिकन्दुक इव कालकुमारस्य क्षीर-डिण्डीरपिण्डसदृशो दृष्टिपथमवततार तारापतिः ।**

**अथ** शशाङ्ककान्तेः प्रसरणानन्तरं क्रमेण-कियता कालेन क्षीरस्य '**पदैकदेशे पदसमुदायोपचारात्**' क्षीराब्धेर्यो डिण्डीरपिण्डः-फेनपिण्डस्तत्सदृशस्तारापतिः-चन्द्रो दृष्टिपथं अवततार-अदर्शीत्यर्थः । उत्प्रेक्ष्यते, पूर्वपुलिनात्-पूर्वसमुद्रसैकतात् गगनमन्दाकिनीं नभोगङ्गां प्रति उच्चलितः-प्रवृत्तो राजहंस इव । शङ्के, असौ शशी न किन्त्वयं राजहंस एव व्योमगङ्गायां गन्तुं प्रवृत्त इति । पुनरुत्प्रेक्ष्यते, उदयगिरिगुहागह्वरात्-उद्याद्रिगह्वरकुञ्जात् तिमिरमेव करियूथपतिः-गजेन्द्रस्तस्य शंकया-भ्रमेण पृष्ठलग्नः-पश्चाद्धन्तुं प्रवृत्तः केसरिणः-सिंहस्य किशोर इव-अर्भक इव, तमसो गजभ्रान्तिजनकत्वात्, तमसि गज इति बुद्ध्या हन्तुं पृष्ठलग्नः, शङ्के, सिंहशिशुरयमिति । गह्वरशब्दोऽत्र कुञ्जार्थः । **यदनेकार्थः**-"**गह्वरो बिलदम्भयोः कुञ्जेषु**[१]" [३।५८४]। पुनरुत्प्रेक्ष्यते, जगतां यो विजयो जगद्विजयस्तस्मै यत् प्रस्थानं-प्रवर्तनं तस्मिन् स्थितस्य जगद्वशीकरणप्रवृत्तस्येत्यर्थ, मकरकेतोः-कामस्य मङ्गलाय-मङ्गलार्थं केनापि सज्जीकृतः-प्रगुणीकृतो निर्मित इत्यर्थः, स्फटिकमयः-स्फटिकविकारः पूर्णकुम्भ इव । अन्योऽपि राजा जगद्विजयार्थं यदा प्रवर्तते तदा तस्य मङ्गलार्थं पूर्णकलसः सम्मुखं केनचित् सज्जीक्रियत एव । विकारे मयट्, विकारस्तु स्फटिकस्य कलसत्वेन करणात् । तथा महेन्द्रदिशा प्राच्या मण्डनाय-अङ्गविलेपनाय हस्ताश्लेषेण-करपरामर्शनेन उपलालितः-संस्कृतो वर्तुलीकृतः श्रीखण्डपिण्ड इव-चन्दनगोल इव । "**पिण्डो वृन्दे जपापुष्पे गोले बोलेङ्गसिल्हयोः । कवले** [२।१२४-१२५] इत्**यनेकार्थः** । तथा गगनश्रिया-नभोलक्ष्म्या श्रवणे-कर्णे संयोजितः-न्यस्तः शांखिकाया लताविशेषस्य पुष्पस्तबक इव-कुसुमगुच्छ इव । तथा प्राचीनं-प्राच्यां भवं यद्वनं तस्मिन् विहर्तुं शीलं यस्यासौ प्राचीनवनविहारी एवंविधो यः सुरकरीन्द्रः-ऐरावणस्तस्य प्रकटतां-प्रकाशतां दृश्यतां गतः-प्राप्तः एकः कुम्भ इव । यद्यपि कुम्भयोर्द्वित्वं भवति तथापि वनगहने विचरतः करिणः प्रायेणैक एव कुम्भस्थलविभागो लक्ष्यते अत एक इत्युक्तम् । तथा निशैव

---

१. कुञ्जे अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शबरिका निशाशबरिका तया वासरस्य-दिनस्य यो विरामः-विरमणं निवृत्तिं स एव वल्ली तां उल्लूय-छित्त्वा उद्धृतः-उत्क्षिप्तः कन्द इव तस्यापि वृत्तत्वात् धवलत्वाच्च। तथा सिद्धवधूभिः सिद्धाः-देवविशेषास्तेषां वधूभिः-स्त्रीभिः उदयाचलचतुष्पथे विरचितः-विहितः पाण्डूनां पुष्पाक्षतानां गुञ्जानां चयः-पुञ्ज उत्करः स इव । पाण्डुगुञ्जा हि मंगलाय स्युः । उदयाचलशब्दश्रुतेश्चन्द्रसमागमनसूचा । तथा कैलासशिखरात्-रजताद्रिशृङ्गात् लुठित्वा-परिवृत्य आगतो गण्डशैल इव-गिरेश्च्युतः स्थूलोपल इव । तथा पूर्वदिङ्मुखस्य सीमन्तमौक्तिकं इव-केशान्तरालवर्त्तिमुक्तेव । तथा पूर्वाशाधियतेः-पुरन्दरस्य सितातपत्रमिव-श्वेतच्छत्रमिव । तथा काल एव-अनेहा एव कुमारस्तस्य क्रीडायै मौक्तिकानां कन्दुक इव-गेन्दुक इव ।

**तदनु च–**

**तदनु च**-उदयानन्तरम्–

**मदनयति[१] युवानं यौवराज्येऽभिषिञ्च-**
**न्कृतकुमुदविकासो [२]भासयन्दिङ्मुखानि ।**
**अय[३]ममृततरङ्गैः प्लावयञ्जीवलोकं,**
**गगनमवजगाहे मन्दमन्दं मृगाङ्कः ॥ २७ ॥**

**मदनयती**ति । अयं मृगाङ्कः-शशाङ्कः गगनं-व्योम मन्दं-मन्दं-शनैः-शनै-अवजगाहे-आक्रामति स्म । कथं ? युवानं-तरुणं यौवराज्ये-युवराजभावे अभिषिञ्चन्-अभिषिक्तं कुर्वन् मदनयति-मदनवन्तं करोति । मदनयतीति "**तत्करोति**" [**पा०सू०** गणपाठ] इति णिच् "**विन्मतोर्लुग्**" [**पा०सू०** ५।३।६५] इति मतुप् प्रत्ययस्य लुक् । तथा कृतः कुमुदानां विकासो येन एवंविध सन् दिङ्मुखानि भासयन्-उद्दीपयन् । तथा अमृतमयाः-सुधास्वरूपा ये तरङ्गाः-वीचयस्तैः कृत्वा जीवलोकं प्लावयन्-आपूरयन् । मयट् तद्रूप इति केचित् । यौवराज्याभिषेकाद्यनेककार्यव्यग्रतया मन्दमन्दावगाहः । मालिनी ॥ २७ ॥

**तदनन्तरम् , आप्लावितमिव मुक्तमर्यादेन दुग्धवार्धिना, सिक्त[३]भू-भागाङ्गणमिवामन्दचन्दनाम्बुच्छटाभिः, विलिप्तदिग्भित्तिकमिव सान्द्र-[४]सुधापङ्कपिण्डैः[५], [६]पूरितमिवोत्सर्पिकर्पूरपांसुवृष्ट्या, प्रविष्टमिव**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**स्फाटिक[७]-मणिमहामन्दिरोदरदरीम्[८], उत्प्लवमानमिव द्रवीभूततुहिना-चलमहाप्लवेन[९], भुवनमासीत् ।**

**तदनन्तरं**-शशिना नभ आक्रमणानन्तरं भुवनं-जगत् एवंविधं आसीत् । किम्भूतं ? उत्प्रेक्ष्यते, मुक्ता मर्यादा-अवधिर्येन एवंविधेन दुग्धवार्द्धिना-क्षीरसागरेण आप्लावितमिव-आपूरितमिव । यावदब्धिः स्वमर्यादायां स्थितो भवति तावद् भुवनस्याप्लावनं न भवेत् अतो मुक्तमर्यादेनेत्युक्तम् । तथा अमन्दा-अनल्पा याश्चन्दनाम्बुनः-श्रीखण्डद्रवस्य छटास्ताभिः सिक्तं-उक्षितं भूभागाङ्गणं यस्य तत् एवंविधमिव, चन्दनाम्बुच्छटानामपि श्वेतत्वात् । तथा सान्द्राः-निविडा ये सुधापङ्कस्य पिण्डाः-गोलास्तैर्विलिप्ता-दिग्धा दिग्भित्तयो यस्य तत् तथाविधमिव । तथा उत्सर्पिणी-प्रसरणशीला कर्पूरपांसूनां या वृष्टिस्तया आपूरितमिव-व्याप्तमिव । तथा स्फाटिकमणीनां यन्महामन्दिरं-विशालगृहं तस्य या उदरदरी-गर्भकन्दरस्तां प्रविष्टमिव । परितः-सर्वतोऽपि श्वेततायाः प्रसृतत्वात् । मन्ये, स्फाटिकमणिगृहगर्भविवरे इदं प्रविष्टमिति । तथा द्रवीभूतः-गलितो यस्तुहिनाचलः-हिमालयस्तस्य महाप्लवेन-महापूरेण उत्प्लवमानमिव-प्रवहमानमिव ।

**ततश्च—**

**तत**श्च-चन्द्रप्रकाशप्रौढिमानन्तरम्—

**कैलासायितमद्रिभिर्विटपिभिः श्वेतातपत्त्रायितं,**
**मृत्पङ्केन[१०] दधीयितं जलनिधौ दुग्धायितं वारिभिः ।**
**मुक्ताहारलतायितं व्रततिभिः शङ्खायितं श्रीफलैः,**
**श्वेतद्वीपजनायितं जनपदैर्जाते शशाङ्कोदये ॥ २८ ॥**

**कैले**ति । शशाङ्कोदये जाते सति अद्रिभिः-पर्वतैः कैलासेनेव-रजताद्रिणेव आचरितं कैलासायितं, तथा विटपिभिः-वृक्षैः श्वेतातपत्रैरिव आचरितं श्वेतातपत्रायितं, तथा मृत्पंकेन दधिनेव आचरितं दधीयितं, तथा जलनिधौ वारिभिः-जलैः दुग्धनेवाचरितुं दुग्धायितं, तथा व्रततिभिः-वीरुद्भिः मुक्ताहारलतयेव आचरितं मुक्ताहारलतायितं, तथा श्रीफलैः-बिल्वैः शंखेनेवाचरितं शंखायितं । तथा जनपदैर्देशैः **'तात्स्थ्यात् तद्व्यपदेशः'** [ ] इति न्यायात् जनपदवासिलोकैः श्वेतद्वीपस्य ये जनास्तैरिव आचरितं श्वेतद्वीपजनायितं । श्वेतद्वीपवासिनो हि जनाः श्वेता भवन्ति तथा शशाङ्ककान्त्या सर्वेपि जना धवलीभूता वीक्ष्यन्ते, अत किमु श्वेतद्वीपवासिनो अमी इति ॥ २८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अपि च–

**सर्वेऽपि पक्षिणो हंसाः सर्वेऽप्यैरावता गजाः ।**
**जाताश्चन्द्रांशुभिः सर्वे रौप्यपुञ्जाः शिलोच्चयाः ॥ २९ ॥**

**अपि च**-पुनश्चन्द्रोदये यज्जातं तदाह–

**सर्वे** इति । चन्द्रांशुभिः-शशिकान्तिभिः सर्वेऽपि पक्षिणो-हंसा जाताः, तथा सर्वेऽपि गजाः-ऐरावता जाताः, तथा सर्वेऽपि[1] शिलोच्चयाः-गिरयो रौप्यपुञ्जाः-कलधौतराशयो जाताः ॥ २९ ॥

**सुधापङ्कोपलिप्तेव बद्धेव स्फाटिकोपलैः[१] ।**
**विलीनहिमदिग्धेव मेदिनी ज्योत्स्नया कृता ॥ ३० ॥**

**सुधेति** । ज्योत्स्नया-चन्द्रातपेन मेदिनी एवंविधा कृता । किम्भूता ? उत्प्रेक्ष्यते, सुधापङ्केन उपलिप्ता इव-दिग्धेव, तता स्फाटिकोपलैः-स्फाटिकमणिभिर्बद्धेव-खचितेव, तथा विलीनं-द्रवीभूतं यद्धिमं तेन दिग्धेव-लिप्तेव । श्वेतत्वावलोकनादिमा उत्प्रेक्षाः ॥३०॥

अपि च–

**सौधस्कन्धतलानि दीपपटलैः कम्पेन पाण्डुध्वजाः**
**हंसाः पक्षविधूननेन[२] मृदुना निद्रान्तनादेन च ।**
**लक्ष्यन्ते कुमुदानि षट्पदरुतैरुत्सर्पिगन्धेन च**
**क्षुभ्यत्क्षीरपयोधिपूरसदृशे जाते शशाङ्कोदये ॥ ३१ ॥**

अपि च-पुनः–

**सौधेति** । क्षुभ्यन्-क्षोभं प्राप्नुवन् यः क्षीरपयोधिः-क्षीराब्धिस्तस्य यः पूरः-प्रवाहस्तत्सदृशे शशाङ्कोदये जाते सति, सौधस्कन्धानां-नृपमन्दिरोपरिभागानां यानि तलानि-अधोभागास्तानि दीपपटलैः-प्रदीपवृन्दैर्लक्ष्यन्ते-ज्ञायन्ते, अन्यथा सर्वस्यापि धवलत्वात् कथमेतान्येव सौधस्कन्धतलानीति, परं दीपैस्तानि ज्ञायन्ते । तलशब्दः पुन्नपुंसकः । तथा पाण्डुध्वजाः-धवलाः पताकाः कम्पेन[२]-वातप्रेरणेन लक्ष्यन्ते । तथा हंसाः पक्षयोर्विधूननेन[३]-चालनेन, वा-अथवा मृदुना-श्रोत्रानुकूलेन निद्रान्ते-तन्द्राया अवसाने यो नादः-कूजितं तेन लक्ष्यन्ते । तथा कुमुदानि-श्वेतकमलानि षट्पदानां-भृङ्गाणां यानि रुतानि-झङ्कारास्तैः, च-पुनः उत्सर्पो-प्रसरणशीलो यो गन्धः-आमोदस्तेन लक्ष्यन्ते, अन्यथा

---

१. अपि नास्ति अनू. । २. पंकेन अनू. । ३. विधूनेन अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कोकनदादीनामपि तदानीं धवलत्वात् कथं ज्ञायेरन्[१] ? एतान्येव कुमुदानीति परं भृङ्गझङ्कारैरुत्सर्पिगन्धेन च तेषामवगमः । अन्यानि च पद्मानि श्वेतत्वे समानेऽपि रविविकासित्वाद् रात्रौ सभृङ्गझङ्काराणि उद्गन्धीनि च न भवन्तीति । ॥ ३१ ॥

**तथाविधे चन्द्रोदयप्रपञ्चे हठादुत्कण्ठयाभिभूयमानो निषधनाथश्चिन्तयांचकार ।**

**तथाविधे** भ्रान्तिजनके चन्द्रोदयस्य प्रपञ्चे-विस्तारे जाते सति हठात्-प्रसभात् उत्कण्ठया-रणरणकेन अभिभूयमानः-पीड्यमानो निषधनाथः-नलश्चिन्तयाञ्चकार विचारयति स्म । किं तत् ? इत्याह—

**इतश्चन्द्रः सान्द्रान्किरति किरणानग्निपरुषान्,**
**इतोऽपि प्रोन्मीलत्कुमुदवनवायुर्विलसति ।**
**इतः कादम्बानां ध्वनितमपि निद्रालसदृशा-**
**मसह्यः सर्वोऽयं मनसिजमहिम्नः परिकरः ॥ ३२ ॥**

**इत** इति । अयं प्रत्यक्षः सर्वो मनसिजस्य-कामस्य यो महिमा-अनुभावस्तस्य परिकरः-परिवारस्तत्साहाय्यदानात् असह्यः-सोढुमशक्यः । कः परिकरः ? इत्याह—इतः-अस्मिन् प्रदेशे चन्द्रः सान्द्रान्-घनान् अग्निवत्परुषान्-कठोरस्पर्शान् किरणान् किरति-विक्षिपति । इतोपि प्रोन्मीलन्ति-विकसन्ति यानि कुमुदवनानि तेषां वायुर्विलसति-वाति । इतोऽपि कादम्बानां-कलहंसानां ध्वनितं-शब्दितं । किम्भूतानाम् ? निद्रया अलसा दृक् येषां ते तथा तेषाम् ॥ ३२ ॥

**इतो मकरकेतनः किरति दुर्निवारः शरा-**
**नितोऽपि वयमाकुलाः कुलिशपाणिदत्ताज्ञया ।**
**तदेतदतिसङ्कटं यदिह कैश्चिदुक्तं जनै-**
**[१]रितो विषमदुस्तटी भयमितो महाव्याघ्रतः ॥ ३३ ॥**

**इत** इति । इतः-अस्मिन् विभागे दुर्निवारः-वारयितुमशक्यो मकरकेतनः-कामः शरान् किरति-विक्षिपति । इतोऽपि वयं कुलिशपाणिः-इन्द्रस्तेन दत्ता या आज्ञा-यथा मदर्थं दमयन्ती वरणीयेति आदेशस्तया आकुलाः-व्यग्राः परवशाः इत्यर्थः । तत्-तस्मादेतत् कामातुरत्वं तदाज्ञावर्तित्वं च युगपत् अतिसंकटं अतिसम्बाधः । यद्यस्मात् इह-उभयतः

---

१. ज्ञायेत अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

संकटोपनिपाताधिकारे कैश्चिज्जनैरुक्तम् । किम् ? इतो विषमा चासौ भ्रश्यत्प्रदेशत्वात् दुस्तटी च-दुर्नदीतटं विषमदुस्तटी, इतो महाव्याघ्रतो भयं, तदयमेव न्यायो ममाप्यापतित इति ॥ ३३ ॥

**तदिदानीं किमिह कर्तव्यम्, कथं वा हास्येनाप्यवन्ध्यवचसामविलङ्घनीयः[1] खल्वादेशो लोकपालानाम्' इति चिन्तयन्नेकाकी पद्भ्यामेव निर्गत्य[2] निजनिकेतनादापतद्भिः[3] शशाङ्ककिरण[4]जालैः [5]परिजनैरिव उपदर्शितवर्त्मा कैश्चित्काललवैः कैलासकूटायमानाट्टालकाभोगभव्यं भीमभूपालभवनमवाप्य कन्यान्तःपुरं पुरंदरवरप्रदाना[6]दहश्यमानरूपः प्रासाद-जालकैः[7] प्रविवेश ।**

**तत्**-तस्मात् इदानीं किं इह कर्त्तव्यम् ?, अथवेति पक्षान्तरे, पूर्वपक्षस्तु मोहरूपो, द्वितीयस्त्वर्य तदाज्ञाकरणरूपः । कथं हास्येनाऽपि अवन्ध्यं-सफलं वचो येषां ते अवन्ध्यवचसस्तेषां लोकपालानां खलु अनुनये-अनुनयः प्रसादनं तेषामेव आदेशः-आज्ञा अविलंघनीयः-अनतिक्रमणीयः, इति चिन्तयन् सन्, एकाकी पद्भ्यामेव निजनिकेतनाद्-आत्मगृहान् निर्गत्य आपतद्भिः-आगच्छद्भिः शशांककिरणजालैः उपदर्शितं-अवलोकितं वर्त्म यस्यासौ उपदर्शितवर्त्मा । किरणजालैः कैरिव ? उत्प्रेक्ष्यते-परिजनैरिव । यथा परिजनैर्गच्छतः स्वजनस्य वर्त्म दर्श्यते तथा एभिरपि । एवंविधः सन् नलः कैश्चित्काल-लवैः-कालविशेषैः कैलासकूटमिव-रजताद्रिशिखरमिव आचरन्तः कैलासकूटायमाना अत्युच्चा इत्यर्थः, एवंविधा ये अट्टालकाः-प्राकाराग्रे रणगृहास्तेषां आभोगेन-विस्तारेण भव्यं-सुन्दरं भीमभूपालस्य भवनं-गृहं अवाप्य-प्राप्य, कन्यानामन्तःपुरं-अवरोधः कन्यान्तःपुरं तत् पुरन्दरस्य-शक्रस्य यत् वरप्रदानं यथा 'तत्र प्रविशन्तं न कश्चित् त्वां विलोकयिष्यतीत्येवंरूपं' तस्य प्रभावात् शक्तेः न दृश्यमानं रूपं-आकृतिर्यस्य स, अदृश्यमानरूपः प्रासादस्य जालकैः-गवाक्षविवरैः प्रविवेश-प्राविक्षत् । "**प्रभावस्तेजसि शक्तौ**" [३।७४१] इत्य**नेकार्थः** । "**जालं तु गवाक्षे क्षारके गणे दम्भानाययोश्च**" [२।५००] इति **हैमानेकार्थः** ।

**प्रविश्य च दूरादभिमुखागतेनानवरतदह्यमानकृष्णागुरुधूपधूमवर्त्तिनर्तकेन बहलयक्षकर्दमाम्बुसिक्तसौधस्कन्धसंधिविचारिणा[8] गन्धवाहेन कृताभ्युत्थान इव, परिक्रम्य स्तोकमन्तरम् 'इत इतो देवी वर्त्तते' इति**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**गीतगोष्ठीस्थितसखीगतझंकारेणाहूयमान इव, यत्रास्ते दमयन्ती तत्सौध-पृष्ठमारूढवान् ।**

**प्रविश्य च**-कन्यात:पुरे प्रवेशं विधाय यत्र सौधे दमयन्ती आस्ते तं सौधपृष्ठं आरूढवान्-आरुरोह । किम्भूतो नलः ? उत्प्रेक्ष्यते[१], दूरात्-विप्रकृष्टदेशात् अभिमुखागतेन-सम्मुखप्रासेन, तथा अनवरतं-अजस्रं दह्यमानः-भस्मीक्रियमाणो यः कृष्णागुरुः-कालागुरुः स एव धूपः-गन्धद्रव्यं तस्य यो धूमः स एव वर्त्तिः-दशा तदाकृतित्वात्तस्य तस्या नर्त्तकेन-कम्पकेन, वातेन हि धूमश्चाल्यत इति । तथा कर्पूरकस्तूरिकादीनां क्षोदो यक्षकर्दमः बहलं-निविडं यद् यक्षकर्दमाम्बु तेन सिक्तः-उक्षितो यः सौधस्कन्धयोः सन्धिः-श्लेषस्तस्मिन् विचरितुं-विहर्तुं शीलं यस्यासौ तथाविधेन गन्धवाहेन वायुना कृतं अभ्युत्थानं-अभिमुखं उत्थानं यस्मै, एवंविध इव । यदा हि अतिथिरागच्छेत् तदा तस्याभिमुखं उत्थानं क्रियते तथा अनेन वातेनैवाभिमुखमागतेन अभ्युत्थानं नलस्य कृतमिति। तथा स्तोकं-अल्पं अन्तरं-अवकाशं परिक्रम्य-उल्लंघ्य इत इतः-अस्मिन् अस्मिन् प्रदेशे देवी-भैमी वर्तत इति गीतगोष्ठ्यां-गानसभायां स्थिता याः सख्यः-वयस्यास्तासां गीतझङ्कारेण आहूयमान इव-आकार्यमाण इव । नलेन गीतझङ्कारेण अज्ञायि यथाऽत्र भैमी वर्तत इति । तत्रोत्प्रेक्ष्यते, तत् झङ्कारेण इत इतो देवी वर्तत इति आकार्यत इवेति ।

**आरुह्य च मनाग्व्यवहितोऽनुपलक्ष्यमाण एव[१], वेणुवीणाक्वणा[२]नुसारिणा कोमलकाकलीप्रायेण किंनरीपुरुषस्य संगीतेन[३] विनोद्यमानाम्, अलकवल्लरीमध्यनिवेशिततारानुकारिमौक्तिकेन [४]कज्जल-कलङ्कितनयनोत्पलपक्ष्मपालिना मुखेन गगनचन्द्रस्पर्धया[५] भूतलमपि पूर्णोदितेन्दुमण्डलमिवापादयन्तीम्, उच्चकुचमण्डलविलोलया सस्मर-सप्तर्षिग्रहगणपङ्क्त्येव हारलतया कृतकण्ठकन्दलाश्लेषाम्, ईषत्कपोलपालिं परामृशता [६]कृतश्चाटुकारेण वसन्तसमयप्रहितदूतेनेव कर्णलग्नेन [७]कुमुद-मञ्जरीद्वितीयेन बालपल्लवेन विराजितवदनाम्, अच्छाच्छैः कस्तूरिका-पङ्कपत्रभङ्गैर्भुजङ्गैरिव लावण्यामृतरक्षागतैरलंकृत-भव्यभुजशिखराम्, आसन्नभुवि विकीर्णैः पाण्डुपुष्पप्रकरैर्गगनादवतीर्य रूपालोकन-कुतूहलिभिर्नक्षत्रैरिव परिवृताम्, गुरु[८]नितम्बमण्डलस्पर्शसुखलम्पटतया**

१. उत्प्रेक्ष्यते नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**नीवीप्रान्तपुञ्जिततरङ्गं क्षीरोदमिव वस्त्रांतरगतमच्छपाण्डुनेत्रपट्टं परिदधानाम्, 'अहमेव त्वया स्वयंवरे वरणीयः' इत्यर्थितया पादलग्नेन शेषोरगेणेव रौप्यनूपुरवलयेन विराजितवामचरणपल्लवाम्, विविधविलासवर्तिकाभिरिवाकारिताम्, अमृतद्रववर्णकैरिव विचित्रितावयवाम्[१], आनन्दकन्दलैरिव घटिताम्, मोहनमणिशिलायामिवोत्कीर्णाम्, शृङ्गारदारुणीवोत्कुट्टिताम्, वशीकरणपरमाणुभिरिव विनिर्मिताम्, मदनमदमृत्पिण्डेनेव[२] निष्पादि-ताम्, वज्रलेपपुत्रिकामिव दृशोः, आकर्षमणि[३]शलाकामिव हृदयस्य जीवनौषध[४]मिवानुरागस्य, जयपताकामिव मदनस्य[५], [६]बहुलचन्द-नाम्बुच्छटार्द्रितभुवि विकीर्णसुरभिपरिमलमिलन्मधुकररवानुमेयपाण्डुर-पुष्पप्रकरे मसृणसित[७]सुधाबन्धपिच्छिले[८] सौधस्कन्धे ज्योत्स्नामृतस्पर्श-सुखमनुभवन्तीम्, अच्छांशुमणिस्फटिकपर्यङ्किकाङ्कभाजं[९] दमयन्तीमलब्ध-निद्रामद्राक्षीत् ।**

**आरुह्य च** सौधपृष्ठं मनाक्-ईषत् व्यवहितः-अन्तरितः अनुपलक्ष्यमाण एव-अज्ञायमान एव नलः एवंविधां दमयन्तीं अद्राक्षीदिति सम्बन्धः । किम्भूतां दमयन्तीम् ? वेणूनां-वंशानां, वीणानां-विपञ्चीनां क्वणं-स्वरं अनुसरति-अनुप्रवर्तत इत्येवंशीलं वेणुवीणाक्वणानुसारि तेन वेणुवीणास्वरानुगामिना । तथा ईषत् कलो अस्यामिति काकली **"निषादः काकली संज्ञो द्विश्रुत्युत्कर्षणाद्भवेत्"** [ ] कोमला या काकली सा प्रायेण-बाहुल्येन वर्ततेऽस्मिन्निति कोमलकाकलीप्रायं तेन, एवंविधेन किन्नरपुरुषस्य यत् सङ्गीतं-सम्यग्गानं तेन विनोद्यमानां-सकुतूहलां क्रियमाणाम् । पुनः किम्भूताम् ? उत्प्रेक्ष्यते, अलकवल्लरीमध्ये-कबरीमध्ये निवेशितानि-स्थापितानि तारानुकारीणि-तारोपमानि[१] मौक्तिकानि यस्मिन् तथाविधेन । तथा कज्जलेन-अञ्जनेन कलङ्किता-कलङ्क इव आचरितवती नयनोत्पलपक्ष्मपालिर्यत्र कलङ्क इवाचरति स्मेति लुप्ता यिः । एवंविधेन मुखेन य[२]श्चन्द्रस्तस्य स्पर्द्धया संहर्षेण भूतलमपि पूर्णं उदितं-उदयप्राप्तं इन्दुमण्डलं यत्र तत् एवंविधं आपादयन्तीमिव सम्पादयन्तीमिव । किल नभस्येव चन्द्र उदेतीत्येतत् किम् ? अहं भुव्यपि चन्द्रोदयशोभां विधास्यामीति गगनचन्द्रस्पर्द्धया[३] मन्ये, दमयन्त्या स्वमुखेन भूतलं पूर्णोदितेन्दुमण्डलं सम्पादितमिति । इदं अस्या मुखं न, किन्तु पूर्णशशिमण्डलमुदितमिति भावः । पुनः किम्भूताम् ? हारलतया-मुक्तालतया कृतः कण्ठकन्दले आश्लेषः-संयोगो यस्याः सा तां कण्ठकन्दललम्बितहारामित्यर्थः ।

---

१. तारोपमानानि अनू. । २. गगने यः अनू. । ३. गगनचन्द्रेण सह स्पर्द्धया अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किम्भूतया हारलतया ? उच्चौ-उन्नतौ यौ कुचमण्डलौ-पयोधरौ तयोर्विलोलया-चपलया । उत्प्रेक्ष्यते, सस्मरा:-सकामा ये सप्तर्षय:-मरीच्यादयो ग्रहाश्च-मङ्गलादय: गणानि च-अभीच्यादीनि, यद्वा ग्रहा:-नक्षत्राणि गणा:-वृन्दानि तेषां पंक्त्येव-श्रेण्येव । मन्ये, हारलतायाममूनि मौक्तिकानि न, किन्तु सकामा: सप्तर्षिग्रहगणा एव दमयन्तीं आलिङ्गितुमागता इति । पुन: किम्भूताम् ? कर्णयोर्लग्नेन-प्राप्तेन तथा कुमुदमञ्जरी द्वितीया-सहायीभूता यस्य एवंविधेन बालपल्लवेन-नवकिसलयेन विराजितं वदनं यस्या: सा तां । बालपल्लवेन केनेव ? उत्प्रेक्ष्यते, ईषत् मनाक् कपोलपालिं-गण्डप्रान्तं परामृशता-स्पृशता, तथा कृतश्चाटुकार:-प्रियवचनोल्लापो येन एवंविधेन वसन्तसमयेन प्रहित:-मुक्तो यो दूतस्तेनेव[१] । शङ्के, कर्णोपान्ते असौ बालपल्लवो न, किन्तु वसन्तेन चाटूकारीस्तद्दूत: प्रेषित इति । पुन: किम्भूताम् ? अच्छाच्छै:-अतिशयेन अमलै: कस्तूरिकापङ्कस्य ये पत्रभङ्गा:-पत्रलतास्तैरलङ्कृते-मण्डिते भव्ये-सुन्दरे भुजाशिखरे-बाह्वग्रभागौ यस्या: सा तां । पत्रभङ्गै: कैरिव ? उत्प्रेक्ष्यते, लावण्यं-सौन्दर्यमेव अमृतं तस्य रक्षायै आगतै:-आयातैर्भुजङ्गैरिव । अमृतं हि भुजङ्गै रक्ष्यते । शङ्के, अमी मृगमदपत्रभङ्गा न, किन्तु लावण्यामृतरक्षणाय भुजङ्गा एव आगता इति । पुन: किम्भूताम् ? आसन्नभुविनिकटाङ्गणे विकीर्णै:-विक्षिप्तै, पाण्डुपुष्पाणां प्रकरै:-समूहै: परिवृतां-वेष्टितां । पाण्डुपुष्पप्रकरै: कैरिव ? उत्प्रेक्ष्यते, गगनादवतीर्य रूपावलोकने कुतूहलं-कौतुकं विद्यते येषां तानि रूपावलोकनकुतूहलीनि तथाविधै: नक्षत्रैरिव । मन्ये, अमी पाण्डुपुष्पप्रकरा न, किन्तु दमयंतीरूपावलोकने[२] कौतुकान्नक्षत्राण्यमूनि नभसो अवतीर्य भैमीं परिवृत्य संस्थितानीति । पुन: किम्भूतां दमयन्तीम् ? अच्छं-अमलं पाण्डु:-धवलं नेत्रपट्टं-वस्त्रविशेषं परिदधानां-वसानाम् । उत्प्रेक्ष्यते, गुरु:-महत् यन्नितम्बबिम्बं-आरोहस्तस्य यत्स्पर्शसुखं तल्लम्पटतया-तल्लालसतया नीवीप्रान्ते-उच्चयावसाने पुञ्जिता:-राशीकृतास्तरङ्गा येन स तथाविधं वस्त्रान्तरगतं-वासो मध्यप्राप्तं क्षीरोदमिव-क्षीराब्धिमिव । मन्ये, असौ नेत्रपट्ट: परिहितो नास्ति, किन्तु नितम्बस्पर्शसुखाकांक्षया स्वतरङ्गान् नीवीप्रान्ते पुञ्जीकृत्य वस्त्रान्तर्गत: क्षीराब्धिरेवाऽयमुपागत इति । पुन: किम्भूताम् ? रौप्यनूपुरवलयेन विराजितो वामश्चरणपल्लवो यस्या: सा ता:[३] । रौप्यनूपुरवलयेन केनेव ? उत्प्रेक्ष्यते, अहमेव-शेष एव दमयन्त्या स्वयंवरे वरणीय:-परिणेतव्य इति अर्थ:-प्रयोजनं विद्यते यस्यासौ इत्यर्थी तद्भावस्तया इत्यभिलाषितया पादलग्नेन शेषोरगेणेव-अनन्तेनेव । मन्ये, वामचरणन्यस्त: पादकटकोऽयं न, किन्तु स्वविवाहाभ्युपगमं कारयितुं शेषाहिरेव पादे लग्न इति । पुन: किम्भूताम् ? उत्प्रेक्ष्यते, विविधा:-अनेकप्रकारा ये विलासास्त एव वर्त्तिका:-चित्रकर-चित्रकूचिकास्ताभिराकारितामिव-आलिखितामिव । आकारशब्दात् नामकारितान्तात् सिद्धि: । आलेखनं हि स्वेच्छया विधानादद्भुतं भवति तथेयमपि अद्भुताकारेत्यर्थ: । पुन: किम्भूताम् ?

---

१. तेनैव अनू. । २. १. ०रूपावलोकन० अनू. । २. ताम् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उत्प्रेक्ष्यते, अमृतद्रवरूपा ये वर्णकाः-शुक्लादयस्तैर्विचित्रिता-विशेषेण चित्रिता अवयवाः-अङ्गानि यस्याः सा एवंविधामिव । अङ्गे क्वचित् शुक्लतायाः, क्वचित् पीततायाः, क्वचित् कृष्णतायाश्च अवलोकनात् । मन्ये, पीयूषद्रववर्णकैरेव चित्रिताङ्गीति[१] । पुनः किम्भूताम् ? उत्प्रेक्ष्यते, आनन्दस्य कन्दलैः-प्ररोहैर्घटितामिव-निर्मितामिव, द्रस्ट्रीणामानन्दजनकत्वात् । पुनः किम्भूताम् ? उत्प्रेक्ष्यते, मोहनमणिशिलायां उत्कीर्णामिव-विभक्तीकृतामिव युवजनमनोमोहजनकत्वात् । तथा शृङ्गार एव दारु-काष्ठं तस्मिन् उत्कुट्टितामिव-घटितामिव । तथा वशीकरणस्य-वशवर्तिताविधानस्य ये परमाणवस्तै[२]र्विनिर्मितामिव-निष्पादितामिव, सर्वस्यापि वशकारित्वात् । तथा मदनमदावेव मृत्पिण्डस्तेन निष्पादितामिव । तथा दृशोर्वज्रलेपस्य पुत्रिकामिव-पाञ्चालिकामिव, अत्र लग्ने दृशौ मन्ये वज्रलिप्ते इव नेतोऽपसरत इत्यर्थः । तथा हृदयस्य-चेतसः आकर्षमणेः-आकृष्टिरत्नस्य शलाकामिव । यथा आकर्षमणिशलाकया दूरस्थं वस्तु आकृष्यते तथाऽनया चेत इति । तथा अनुरागस्य-प्रेमबन्धस्य जीवनौषधमिव, अनुरागोऽमृतोप्यनयोज्जीवतीत्यर्थः । तथा मदनस्य-कामस्य जयपताकामिव, कामेन सर्वं जगज्जित्वा इयं जयपताकेव उत्तम्भिता । पुनः किम्भूताम् ? एवंविधे सौधस्कन्धे ज्योत्स्ना-कौमुदी सैव अमृतं तस्य यः स्पर्शस्तं अनुभवन्तीं-वेदयमानां । किम्भूते सौधस्कन्धे ? बहुलाभिः-प्रचुराभिश्चन्दनाम्बु-च्छटाभिरार्द्रिता-सिक्ता भूर्यत्र स तस्मिन्, अतएव धवलाङ्गणत्वात् विकीर्णः-विक्षिप्तः सुरभिपरिमलेन मिलन्तः-पुञ्जीभवन्तो ये मधुकरास्तेषां रवेण-झंकारेण अनुमेयः-अनुमातुं योग्यः पाण्डुरपुष्पप्रकर[३]:-धवलकुसुमसमूहो यत्र स तस्मिन् । चन्दनाम्बुच्छटाभिरार्द्रितत्वेन भुवो धवलत्वात् तत्र विकीर्णः श्वेतपुष्पप्रकरो मधुकरझंकारेणैव अनुमीयते यथाऽत्र पुष्पप्रकरो विद्यते भृङ्गारवश्रवणादिति । तथा मसृणः-कोमलः सितः-धवलो यः सुधाबन्धः-लेपविशेषरचना तेन पिच्छिले-मनोज्ञे । "**पिच्छादित्वादिलच्**" । [**लोमादिपामादिपिच्छादिभ्यः शनेलचः, पा०सू०** ५।२।१२०] पुनः किम्भूताम् ? अच्छाः-अमला अंशवः किरणा यत्र एवंविधा ये मणयश्च-रत्नानि वैदूर्यादीनि स्फटिकाश्च-चन्द्रकान्तमणयस्तेषां या पर्यङ्किका-लघुपल्यङ्कः तस्या अङ्कं-उत्सङ्गं भजति-आश्रयति या सा तां । "**अल्पार्थे कन्**" । [**अल्पे, पा०सू०** ५.३।८५] तथा न लब्धा निद्रा यया सा ताम् ।

**तां चावलोक्य चिन्तितवान्[१] ।**

**'अहो[२] स्थानेऽभिनिवेशो लोकपालानाम् । अशेषसुखनिधानाय को न स्पृहयति[३] ।**

---

१. विचित्रताङ्गीति अनू. । २. परिमाणनः अनू. । ३. पाण्डुपुष्पप्रकरः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**मन्ये च ।**

**विस्फारितत्तारेक्षणैरिमामेव पश्यन्न[1]यमाकाशः सग्रहोऽभूत् ।**

**अयं च चन्द्रश्चन्दनपाण्डुभिः करैरिमामेव परामृशन्मदनानलदाहमयीं व्रणलेखां कलङ्कच्छलेन हृदयेनोद्वहति ।**

**अयमपि[2] समीपोद्यानमारुतोऽस्याः समर्पितकुसुमगन्धः शनैरुत्तरीयांशुकमाक्षिपन्मदनातुरस्तिर्यक् पतति ।**

**सर्वथा जितं[3] मनुष्यलोकेन, यत्रैवंविधमचिन्त्यम्, अनालोचनगोचरम्, अप्रतिरूपम्[4], अद्भुतम्, अमूल्यमुदपद्यत[5] स्त्रीरत्नम् ।**

**आः प्रजापते, परिणतशिल्पोऽसि । संसार, सनाथोऽसि । मदन, महोत्सववानसि, चक्षुः, कृतार्थमसि । हृदय, पूर्णमनोरथमसि । दूरागमनश्रम सफलोऽसि ।**

**सकलयुवजनमनोमधुकराकृष्टिकुसुमितलतिके[6] निजनयननिर्जितराजीवे जीव चिरम् ।**

**तां** च-दमयन्तीमवलोक्य नलश्चिन्तितवान् ।

**अहो** इति अद्भुते स्थाने लोकपालानां-शक्रादीनामभिनिवेशः-परिणयनाग्रहः, अशेषसुखानां-समस्तसौख्यानां यन्निधानं-आस्पदं तस्मै कः-पुरुषो न स्पृहयति-अभिलषति ? अपितु सर्वोऽपि स्पृहयति । स्पृहेरीप्सित इति स्पृहयतेरिष्टस्य निधानस्य सम्प्रदानसंज्ञा ।

**चः**-पुनः अहमेवं मन्ये-

विस्फारितानि-विजृम्भितानि तारानक्षत्राण्येव ईक्षणानि-नेत्राणि तैः कृत्वा इमामेव-*दमयन्तीं पश्यन् अयमाकाशः सग्रहः-ग्रहैः सूर्यादिभिः सहितो अभूत् । पक्षे-विस्फारितास्तरोः कनीनिका येषु एवंविधानि यानि ईक्षणानि तैः कृत्वा इमामेव* पश्यन् ग्रहो भूताद्यभिनिवेशस्तत्सहितोऽभूत् ।

च-पुनः अहमेवं मन्ये, **अयं** चन्द्रः चन्दनवत् पाण्डुभिः-श्वेतैः करैः-किरणैः इमामेव-दमयन्तीं परामृशन्-स्पृशन् सन् , कलङ्कच्छलेन-लक्ष्मदम्भेन मदन एव अनलः-

*-* चिह्नान्तर्गत पाठो नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अग्निस्तेन यो दाहस्तन्मयीं-तद्विकाररूपां व्रणलेखां हृदयेन-मध्यभागेन उद्वहति-बिभर्त्ति। अन्योऽपि कराभ्यां अनलं स्पृशन् सन् तद्दाहमयीं व्रणलेखां बिभर्त्त्येव। विकारे मयट्।

**अयमपि** समीपोद्यानस्य-निकटवनस्य यो मारुतः-वायुः स अस्याः-दमयन्त्याः समर्पितः-दत्तः कुसुमानां गन्धः-सुरभिपरिमलो येन एवंविधः सन्, शनैरुत्तरांशुकं-उपरिवास आक्षिपन्-अपनयन्, मदनेन आतुरः-पीडितस्तिर्यक् पतति। अन्योऽपि स्मरातुरः कुसुमगन्धकस्तूरिकादि चार्पयन् संव्यानाकर्षणपरास्तिर्यक् पतति।

**सर्वथा**-सर्वप्रकारेण मनुष्यलोकेन जितं, यत्र मनुष्यलोके अचिन्त्यं-चिन्तयितुशक्यं, तथा न आलोचनस्य-विचारणस्य गोचरो विषयो यत्तत्, तथा अप्रतिरूपं-असदृशं, तथा अद्भुतं-आश्चर्यरूपं, तथा अमूल्यं-अनर्घ्यं स्त्रीरत्नं उदपद्यत-जातम्।

**आ** इति सन्तापे, प्राप्स्यते न वा इति सन्देहात् सन्तापः, "**आः सन्तापप्रकोपयोः**" [**अने०** परि० १३] इति वचनात्। हे प्रजापते !-विधे ! त्वं परिणतं-परिपक्वं शिल्पं-विज्ञानं यस्य स एवं विधोऽसि-एवंविध भैमीनिर्माणात्। तथा हे संसार ! त्वं सनाथोऽसि-सप्रभुरसि। तथा हे मदन ! त्वं महोत्सववानसि-महामहं प्राप्तवानसि। तथा हे चक्षुः !-नेत्र ! त्वं कृतार्थ-कृतकृत्यं सफलं असि। तथा हे हृदय !-चेतः ! त्वं पूर्णा मनोरथा यस्य तत्तथाविधं असि। तथा दूरागमनाद् यः श्रमो दूरागमनश्रमस्तस्य सम्बोधने हे दूरागमनश्रम ! त्वं सफलोऽसि-फलवान् वर्त्तसे, यत एवंविधा भैमी मया आलोकितेति।

तथ **सकलयुवजना**नां यानि मनांसि तान्येव मधुकरास्तेषां आकृष्टौ-आकर्षणे कुसुमितलतिकेव-पुष्पितव्रततिरिव या सा। यथा कुसुमितलतया भृङ्गा आकृष्यन्ते तथा त्वया युवजनमनांसीति तस्याः सम्बुद्धौ हे सकलयुवजनमनोमधुकराकृष्टि[१]कुसुमितलतिके ! तथा निजनयनाभ्यां निर्जितं राजीवं यया सा तस्याः सम्बोधने हे निजनयननिर्जितराजीवे ! हे दमयन्ति ! त्वं चिरं जीव।

**तथाहि–**

**तथाही**ति। तस्या नयनवर्णनामेवाह–

**लक्ष्मीं बिभ्राणयोः कांचिच्चञ्चद्भ्रूभङ्गभागयोः[१]।**
**बलिं यामो वयं तन्वि ! तवान्यसदृशोर्दृशोः ॥ ३४ ॥**

**लक्ष्मीमि**ति। हे तन्वि !-दमयन्ति ! तव दृशोः-नेत्रयोर्वयं बलिं यामः-उपहारी भवामः, इति परमप्रीतिगर्भा लोकोक्तिः। किम्भूतयोर्दृशोः ? अब्जसदृशोः-पद्मसमानयोः।

---

१. ०मधुकाराकृष्ट० अनू.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुनः किम्भूतयोः ? काञ्चिद् अद्भुतां लक्ष्मीं-शोभां बिभ्राणयोः-धारयन्त्योः, तथा चञ्चत्-दीप्यमानो भ्रूरेव भङ्गः-तरङ्गः सभागे-एकदेशे ययोस्तयोः । यदा तु **'चञ्चद्भ्रूभृङ्गसङ्गयोः'** इति पाठस्तदा चञ्चन्तौ भ्रुवावेव भृङ्गौ तयोः संगो यत्र तयोः । अब्जान्यपि लक्ष्मीं बिभ्रति तथा चञ्चन्तः-विलसन्तो भ्रूवत् कुटिला ये भङ्गास्तरङ्गास्ते भागे-एकदेशे येषां तानि, सरो मध्यगतत्वात् । **'पद्मानां भ्रूभृङ्गे'**ति पाठे चञ्चन्तो भ्रूवत् कृष्णा ये भृङ्गास्तेषां संयोगो यत्र तानि ॥ ३४ ॥

**अपि च–**

**किन्नरवदनविनिर्गतपञ्चमगीतामृते[१] श्रुतिं श्रयति ।**
**हरति हरिणीदृशो दृक् सालसवलिता च लुलिता च ॥ ३५ ॥**

**अपि च**-पुनः–

**किन्नरे**ति । किन्नरवदनात् विनिर्गतं-निःसृतं यत् पञ्चमगीतमेवाऽमृतं आह्लाद-जनकत्वात् पीयूषं तस्मिन् श्रुतिं-कर्णं श्रयति सति-श्रूयमाणे सति हरिणीदृशो दमयन्त्याः सालसा-मन्थरा चासौ वलिता च-पश्चादवलोकनाय प्रवर्तिता च सालसवलिता, च-पुनर्लुलिता च-ईषदधो नमन्ती-कम्पिता वा दृक् हरति वशीकुरुते, मन इति अध्याहृियते । "**लुलि सौत्रः, लुल्यते लुलितम्**" [ ]। यत एव हरिणीदृक् अतएव गीतानुरागलक्षणं हरिणीहेवाकमनुसरति ॥ ३५ ॥

**इत्यनेकविधानि[२] चिन्तयन्मन्दमृदु[३]लीलापदैरागत्य गीतगोष्ठीस्थितस्य 'कोऽयम्' इति विस्मय[४]विस्फारितविलोचनस्य[५] संभ्रमवतः सखी-कदम्बकस्य[६] मध्यमविशत् ।**

**इति**-पूर्वोक्तानि अनेकविधानि चिन्तयन् सन्नलः मन्दैः-मन्थरैः मृदुभिः-सुकुमारैः लीलापदैः-लीलया पदन्यासैः आगत्य सखीकदम्बकस्य-वयस्या वृन्दस्य मध्यं अविशत्-प्रविवेश । किम्भूतस्य सखीकदम्बकस्य ? गीतगोष्ठ्यां-गानसभायां स्थितस्य, तथा कोऽयमिति विस्मयेन-आश्चर्येण विस्फारितानि विकसितानि[१] विलोचनानि येन तत्तथा-विधस्य, तथा सम्भ्रमः-भयं तद्विद्यते यस्य तत्तस्य सम्भ्रमवतः-भीतस्येत्यर्थः । "**सम्भ्रमो भीतौ संवेगादरयोः**" [३।५०४] **इत्यनेकार्थः** ।

**प्रविष्टे च तस्मिन्, आकस्मिकविस्मयेन विस्फारितानि, भयेन**

---

१. विकासितानि अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**भ्रमितानि, कौतुकेनोत्तानितानि, व्रीडया वलितानि, मुदा मिलदरालपक्ष्माणि, स्मराकूतेन विलुलितानि, दिदृक्षारसेनानिमिषाणि, दृष्टिसंघट्टनेन मुकुलितानि[१], चिरं चक्षूंषि बिभ्राणाः किमपि चलितासनम्, उत्कम्पितहृदयम्, अपसरद्धैर्यम्, अवगलत्स्वेदसलिलम्, उत्पुलकिताङ्गम्, अनङ्गभङ्गुरम्[२], अवलोकितान्योन्यमुखमवतस्थिरे तदभिमुखाः सख्यः ।**

**अथ** तस्मिन्नले **प्रविष्टे** च सति, सख्यः एवंविधानि चक्षूंषि, चिरं बिभ्राणाः-दधानाः सत्यस्तदभिमुखाः तं-नलं अभिसंमुखं मुखं यासां तास्तदभिमुखाः, किमपि-किञ्चित् चलितं-कम्पितं आसनं-पीठं यत्र एवं यथा भवति, तथा किमपि उत्कम्पितं हृदयं चेतो यत्र एवं यथा भवति तथा, किमपि अवगलत्-ईषत् क्षरत् स्वेदसलिलं यत्र एवं यथा भवति, तथा किमपि उत्पुलकितानि अङ्गानि-अवयवा यत्र एवं यथा भवति, तथा किमपि अनङ्गेन-कामेन भङ्गुरं-वक्रं यथा भवति तथा, किमपि अवलोकितं-वीक्षितं अन्योन्यस्य-परस्परस्य ★स्त्रीनपुंसकयोरिति स्त्रीनपुंसकयोर्यत्सर्वनामकर्मव्यतिहारे वर्तने तस्योत्तरपदस्य या विभक्तिस्तस्याः स्थाने आम् भावो वा वक्तव्य इत्यर्थः, अन्योन्यां परस्परामिति । द्विर्वचनं विभक्तेराम् भावः पूर्वपदस्य सुः । पक्षे, अन्योन्यमित्यादीनि स्त्रियां समासवद्भावात् सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति टापो निवृत्तिः **प्रसादे**★ मुखं यत्र एवं यथा भवति तथा अवतस्थिरे-तस्थुः । किम्भूतानि चक्षूंषि ? आकस्मिकः-अकस्माज्जातो यो विस्मयः-आश्चर्यं तेन विस्फारितानि-विकासितानि, तथा भयेन कोऽयं अकाण्डे एव आगत इति भीत्या भ्रमितानि-कम्पितानि, तथा कौतुकेन उत्तानितानि-उन्मुखीकृतानि, तथा व्रीडया-लज्जया वलितानि-परिवर्तितानि, तथा मुदा-हर्षेण मिलन्ति-संयुज्यमानानि अरालपक्ष्माणि-वक्रनेत्ररोमाणि येषु तानि, तथा स्मराकूतेन-कामाभिप्रायेण विलुलितानि-कम्पितानि मृदितानि वा, तथा दिदृक्षारसेन-अवलोकनेच्छारागेण अनिमिषाणि-असंकोचितानि, ता दृष्ट्योः संघट्टेन-संश्लेषेण इतो नलदृक् ततः सखीनामिति नयनयोः संयोगेन मुकुलितानि-मीलितानि ।"

**दमयन्त्यपि 'देवी, वर्धयामो वर्धयामः कोऽपि कस्याश्चिज्जीवितेश्वरोऽयमत्रैवागतो दृश्यते' इति हर्षोत्कर्षगद्गद्गिरा[३], गीतमुत्सृज्य ससंभ्रमोत्थितकुब्जवामनकन्यकानां मृदुकरतलतालिकाकलितकलकलेन मनाग्विलासवलितमुखी तदभिमुखमवलोक्य शय्यातलादुदचलत्[४] ।**

---

१. चिह्नान्तर्गतपाठो नास्ति अनू.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**दमयन्त्यपि** इति हर्षोत्कर्षेण गद्गदा-अव्यक्ताक्षरा या गीस्तया गीतमुत्सृज्य-मुक्त्वा ससंभ्रमं-सादरं यथा भवति तथा उत्थिता याः कुब्जवामनकन्यकास्तासां मृदुकरतलाभ्यां या तालिका-करास्फोटस्तेन कलितः-सहितो यः कलकलः-कोलाहलस्तेन मनाक् विलासेन वलितं-पराङ्मुखीकृतं मुखं यया सा, एवंविधा सती तदभिमुखं-नलसम्मुखमवलोक्य शय्यातलात् उदचलत्-उत्तस्थौ । ईतीति किम् ? हे देवि ! भवतीं 'वर्द्धयामो वर्द्धयामः', सम्भ्रमे द्वित्वं, कोपि-अद्भुतमहिमा-कस्याश्चित्-सद्भाग्यवत्या जीवितेश्वरः-प्रियतमो अत्रैव-समीप एव आगतो दृश्यते ।

**'आः कुतोऽस्यानेक[१]प्राकाररक्षकरक्षिते पक्षिणामपि दुष्प्रवेशे विशेषतो रजन्यां [२]कन्यान्तःपुरे[३] प्रवेशः' इत्यद्भुतरसावेशस्तिमितेन किंचित्साचि[४]संचारितेन चक्षुषा पुनः[५]पुनर्नलमवलोक्य चिन्तयांचकार ।**

**आः**-प्रकोपे, असंभाव्यवाक्योच्चारात् सखीः प्रति कोपः । "**आः सन्ताप-प्रकोपयोः**" [परि० १३] इत्य**नेकार्थः** । अस्य-नलस्य अनेकप्रकारा ये रक्षकाः-रक्षयितारस्तै रक्षिते-प्रतिजागरिते, तथा पक्षिणामपि दुःप्रवेशे-प्रवेष्टुमशक्ये विशेषतो रजन्यां-रात्रौ कन्यान्तःपुरे कुतः प्रवेशः ? इत्यद्भुतरसावेशेन-आश्चर्यरसप्रवेशेन स्तिमितं-निश्चलीकृतं यत्तत् तथाविधेन, तथा किञ्चित्मनाक् साचि-तिर्यक् सञ्चारितेन-प्रवर्तितेन चक्षुषा पुनर्नलं अवलोक्य चिन्तयाञ्चकार ।

यदचिन्तयत् तदाह—

**धन्या काप्युपरोधिता[६]द्रितनया यस्यास्त्वमाह्लादय-**
**न्मुक्ताहार[७] इव प्रसारितभुजः[८] कण्ठे विलोठिष्यसि ।**
**धातस्तात तवापि धन्यममुना सृष्टेन मन्ये श्रमं,**
**मातर्मेदिनि वन्ध्यसे किमपरं यस्यास्तवायं पतिः ॥ ३६ ॥**

**धन्ये**ति । सा काऽपि भाग्यवती युवती धन्या-पुण्यवती । किम्भूता ? उपरोधिता-प्रसादिता अद्रितनया-गौरी यया सा उपरोधिताद्रितनया यस्याः-युवत्याः कण्ठे त्वं मुक्ताहार इव आह्लादयन्-आह्लादं कुर्वन् तथा प्रसारितौ भुजौ येन एवंविधः सन् विलोठिष्यसि-विलुठनं करिष्यसि संश्लेक्ष्यसीत्यर्थः । यथा मुक्ताहारः कण्ठे आह्लादयन् सन् विलुठति तथा त्वमपि । ताततेति कोमलामन्त्रणे हे मात ! हे धातः !-वेधः ! तव श्रमं-जगन्निर्माणखेदं अद्य अमुना-नलेन सृष्टेन धन्यं-सफलं मन्ये-जाने । हे मातः । मेदिनि अपरं-अन्यत् किं ?

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्वं मया वन्द्यसे-नमस्क्रियसे, यस्याः तव भुवः अयं-नलः पतिः । मातृशब्दं जननीपर्यायमपि । स्त्रियः सपत्न्यादिष्वपि प्रणयसम्बोधने प्रयुञ्जते इति नले भूपतावपि अर्थिन्या दमयन्त्या मातर्मेदिनीति सम्बोधनं न दुष्टम्, अन्यथा सपत्नीं प्रति मातः इत्यामन्त्रणमनुचितम् ॥ ३६ ॥

**एवं चिन्तयत्येव तत्कालमाकूतकौतुकहर्षभयाद्यनेकरसपरम्परया[१] परावर्तितनयनोत्पला लज्जावनमितमुखी विधेयविवेकवैकल्य[२]मभजत ।**

**एवं**-अमुना प्रकारेण चिन्तयन्त्येव तत्कालं-तत्समयमेव आकूतं च-मिलनाभिप्रायः, कौतुकं च-कुतूहलं कुत एवमागत इति, हर्षश्च-प्रियावलोकनात्, भयं च-पित्रादिभ्यः कथमेवं अपरिणीतैव अनेन सह वार्त्ता विधत्त इति, एतानि आदौ येषां ते एवंविधा ये अनेके-बहवो रसास्तेषां या परम्परा-परिपाटी तया परावर्तिते-पश्चान्मुखीकृते नयनोत्पले यया सा, तथा लज्जया अवनमितं-ईषदवाङ्मुखीकृतं मुखं यया सा एवंविधा सती विधेयस्य-कर्त्तव्यस्य यो विवेकः-विमर्शस्तस्य वैकल्यं-राहित्यं अभजत् । सम्प्रति किं विधेयमित्यादिना किञ्चिदज्ञासीदित्यर्थः ।

**नलोऽपि 'विहंगवागुरिके, भवत्स्वामिन्याः किमेवंविधः समाचारः, यदभ्यागतजनेन सह स्वागतालापमात्रेणापि न क्रियते व्यवहारः' इति तस्याः समीपवर्तिनीं पूर्वपरिचितां किन्नरीमभाषत ।**

**नलो**ऽपि इति-अमुना प्रकारेण तस्याः-दमयन्त्याः समीपवर्तितुं[१] शीलं यस्याः सा तां समीपवर्तिनीं पूर्वपरिचितां-पूर्वसंस्तुतां किन्नरीमभाषत-सम्भाषितवान् । इतीति किम् ? विहङ्गवागुरिके ! भवत्स्वामिन्याः किं एवंविधः समाचारः-समाचरणं वेष्टनं[२] यत् अभ्यागतजनेन-सम्मुखप्राप्ताऽतिथिजनेन सह अन्यत् तिष्ठतु, स्वागतालापमात्रकेणाऽपि-भवतां स्वागतमिति कथनमात्रेणापि व्यवहारो न क्रियते ।

**सापि ससंभ्रमप्रणामपूर्वमिदमवादीत्-**

**'किञ्चित्कम्पितपाणिकङ्कणरवैः पृष्टं ननु स्वागतं,**<br>
**व्रीडानम्रमुखाब्जया चरणयोर्न्यस्ते च नेत्रोत्पले ।**<br>
**द्वारस्थस्तनयुग्ममङ्गलघटे दत्तः प्रवेशो हृदि,**<br>
**स्वामिन्किं न तवातिथेः समुचितं सख्याऽनयाऽनुष्ठितम् ॥ ३७ ॥**

---

१. समीपे अनू. । २. चेष्टनं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**साऽपि**-विहङ्गवागुरिका सम्भ्रमः-आदरस्तेन सहितो यः प्रणामः सपूर्वो प्रथमो यत्र एवं **यथा भवति** तथा पूर्वं सादरं प्रणम्य पश्चात् इदं-वक्ष्यमाणं अवादीत् ।

**किञ्चिदि**ति । हे स्वामिन् ! तव अतिथेः अनया सख्या दमयन्त्या समुचितं-अभ्यागतजनयोग्यं किं न अनुष्ठितं-किं न कृतम् ? किन्तु अभ्यागतस्य यत् क्रियते तत् सर्वमपि कृतमित्यर्थः । तदेवाह--ननु-सम्यग्वादे, किञ्चित्-मनाक् कम्पितानि--चालितानि यानि पाण्योः कङ्कणानि-वलयानि तेषां ये रवाः-शिञ्जितानि तैः कृत्वा तव स्वागतं पृष्टम् । अन्योऽपि ब्रुवन्नेव स्वागतं पृच्छेदिति । **"ननु च प्रश्ने दुष्टोक्तौ सम्यग्वादे स्तुतावपि"** [परिशिष्ट. ६१] इत्**यनेकार्थः** । च-पुनः व्रीडया-लज्जया नम्रं-नतं मुखाब्जं यस्याः सा एवंविधया अनया तव चरणयोर्नेत्रे एव उत्पले-कुवलये न्यस्ते-निहिते, अतिथेः किल पादयोरग्रे पूजार्थं उत्पले न्यस्येते एव, तथा अनया लज्जया वाङ्मुखत्वेन भवत्पादयोर्नेत्रे एवोत्पले न्यस्ते । तथाऽनया हृदि तव प्रवेशो दत्तः, त्वां इयं हृदि प्रावेशयदित्यर्थः । किम्भूते हृदि ? द्वारस्थं-प्रवेशमुखावस्थितं यत् स्तनयुगं तदेव मङ्गलघटौ यत्र तत्तस्मिन् । अन्योप्यतिथिः पूर्णकलसयुग्मसहितेन द्वारेण गृहान्तः प्रवेश्यते तथा तवापि ॥ ३७ ॥

**तत्[1] ससंभ्रमोत्थितयानया समर्पितमिदं समुल्लसन्म[2]णिपर्यङ्किका[3]मधितिष्ठतु देवः ।**

**त्वमपि देवि[4], विद्रुममणिपर्यङ्किकामिमादूरवर्तिनीमध्यास्व ।**

**भवतु च भवतोः परमुखेन श्रुतान्योन्यस्वरूपयोरिदानीमात्मानुभवेन[5] नयननिर्वृतिः, फलन्तु मनोरथाः सखीनाम् ।**

**इति तयाभिहितौ तौ [6]सत्वरसखीकरपरामृष्टयोः स्फटिकप्रवालपर्यङ्किकयोरुत्सङ्गभागं भेजतुः ।**

**तत्**-तस्मात् ससंभ्रमं-सादरं यथा भवति तथा उत्थितया अनया-दमयन्त्या समर्पितं-दत्तं इदं समुल्लसन्तः-दीप्यमाना मणयः-रत्नानि यत्र एवंविधं यत् पर्यङ्किका-आसनं तत् देवः-नृपः अधितिष्ठतु-आश्रयतु ।

हे **देवि** ! दमयन्ति ! त्वमपि इमां अदूरवर्तिनीं-निकटस्थां विद्रुममणीनां-प्रवालरत्नानां या पर्यंकिका तां अध्यास्व-आश्रय ।

**च**-पुनः परमुखेन-हंसादिद्वारेण श्रुतं अन्योन्यस्य स्वरूपं याभ्यां एवंविधयोर्भवतोः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इदानीं आत्मना-स्वयं अनुभवेन-अवलोकनेन नयनयोर्निर्वृत्तिसुखं भवतु । तथा सखीनां मनोरथाः-अभिलाषा यथेयं प्रियेण संगता भवतु इत्येवं रूपास्ते फलन्तु ।

**इति**-अमुना प्रकारेण तया-किन्नर्या अभिहितौ-उक्तौ तौ-दमयन्तीनलौ सत्वरं-शीघ्रं सखीकराभ्यां ये परामृष्टे-स्पृष्टे सत्वरसखीकरपरामृष्टे एवंविधयोः स्फटिकस्य प्रवालस्य च या पर्यंकिकापदं उभ[य]त्रापि योज्यते, स्फटिकपर्यंकिका प्रवालपर्यंकिका च तयोरुत्सङ्गभागं-मध्यप्रदेशं भेजतुः-शिश्रियतुः ।

**ततश्च तौ—**

**ततश्च**-ततः पर्यंकिकाध्यासानन्तरं तौ दमयन्तीनलौ—

**हर्षाद्बाष्पचिते, भयात्तरलिते, विस्फारिते विस्मया-**
**दौत्सुक्यात्स्तिमिते, स्मराद्विलुलिते, संकोचिते लज्जया ।**
**रूपालोकनकौतुकेन रभसादन्योन्यवक्त्राम्बुजे,**
**किंचित्साचि च संमुखं च नयने संचारयामासतुः ॥ ३८ ॥**

**हर्षादिति** । रभसात्-वेगात् रूपावलोकनस्य यत्कौतुकं तेन अन्योन्यस्य-परस्परस्य यद्वक्त्राम्बुजं तस्मिन् विषये किञ्चित्-मनाक् साचि च-तिर्यक् सम्मुखं च-अभिमुखं नयने-नेत्रे सञ्चारयामासतुः-प्रवर्त्तयामासतुः, परस्परं मुखं तौ अद्राष्टामित्यर्थः । किम्भूते नयने ? हर्षात्-आनन्दात् बाष्पचिते-अश्रुभिर्व्याप्ते, तथा भयाद्-अपरिणीतप्रियाव-लोकनाद्भयं तस्मात् तरलिते-कम्पिते, तथा विस्मयात्-आश्चर्याद् विस्फारिते-विशालीकृते, तथा औत्सुक्यात्-उत्कण्ठायाः स्तिमिते-निश्चले, तथा स्मरात्-कामात् विलुलिते-अवाङ्मुखीकृते मृदिते वा, तथा लज्जया संकोचिते-निमीलिते ॥ ३८ ॥

**तत्र च[1] व्यतिकरे—**

**अन्तः केवलमुल्लसन्ति न पुनर्वाचां तु ये गोचरा,**
**येषां नो भरतादयोऽपि कवयः कर्तुं विवेकं[2] क्षमाः ।**
**लज्जामन्थरयोः परस्परमिलद्दृष्टिप्रपाते तयो-**
**स्ते सर्वे समकालमेव हृदये कोऽप्याविरासत्रसाः[3] ॥ ३९ ॥**

**तत्र च** व्यतिकरे-तस्मिन्नवसरे—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अन्त**रिति । लज्जया-व्रीडया मन्थरयोः-अलसयोस्तयोः-दमयन्तीनलयोः परस्परं-अन्योन्यं मिलन्त्यौ-संयुज्यमाने ये दृष्टी तयोर्यः प्रपातः-अन्योन्यं वीक्षणमित्यर्थस्तस्मिन् अर्थाज्जाते सति, हृदये-उभयोश्चेतसि ते केऽपि-अद्भुताः सर्वे रसाः समकालमेव युगपदेव आविरासत्-प्रकटीबभूवुः । तुः-विशेषे, विशेषेण ये रसास्तयोरन्तः-चित्ते एव केवलं-परं उल्लसन्ति-उद्भवन्ति न पुनर्वाचां गोचराः-विषयाः, न वाग्भिर्वक्तुं शक्यन्त इत्यर्थः । "**तु विशेषेऽवधारणे समुच्छ्रये पादपूर्तौ**" [परि० १३-१४] इत्य**नेकार्थः** । तथा येषां रसानां भरतादयोऽपि कवयो विवेकं-युगपत् तेषामुद्भवात् विवेचनं कर्त्तुं-विधातुं न क्षमाः-न शक्ताः ॥ ३९ ॥

**अपि च । तत्र[1] व्यतिकरे—**

**कर्णान्तकृष्टवलयीकृतचापचक्र-**
**श्चञ्चद्गुणस्खलनजर्जरितप्रकोष्ठः ।**
**लक्षद्वयेऽपि युगपद्विशिखान्विमुञ्च[2]-**
**न्संधानसत्वरकरः श्रमवान् स्मरोऽभूत् ॥ ४० ॥**

**अपि** च-पुनः तत्र[1]व्यतिकरे-तस्मिन्नवसरे-

**कर्णान्ते**ति । स्मरः-कामो लक्षद्वयेपि-दमयन्तीनलरूपवेध्ययुग्मेपि युगपत्-समकालं विशिखान्-बाणान् विमुञ्चन् सन् श्रमवान्-खिन्नो अभूत्[2]-बभूव । किम्भूतः स्मरः? सन्धाने-बाणज्यासंयोजने सत्वरौ-शीघ्रौ करौ यस्य स सन्धानसत्वरकरो ज्यया सह शीघ्रं बाणं संयोजयन्नित्यर्थः । पुनः किम्भूतः स्मरः ? कर्णान्तं-श्रोत्रपर्यन्तं यावत्कृष्टं- कर्णान्तकृष्टं अतएव वलयीकृतं-मण्डलीकृतं चापचक्रं-धनुर्मण्डलं येन स, तथा चञ्चन्-दीप्यमानो यो गुणः-प्रत्यञ्चा तस्य स्खलनेन-पुनः पुनः संघट्टनेन जर्जरितः सव्रणप्रकोष्ठः[3] कलाचिका यस्य सः ॥ ४० ॥

**अनन्तरमाप्तसखीवचनेन स्वयमर्घदानोद्यतां ताम् "अलमल-मुत्पलाक्षि, प्रयासेन । न खल्वसि पात्रं परिश्रमस्य । न पारिजातमञ्जरी जरठपवन-प्रेङ्खोलनायासं सहते' इति[3] दमयन्तीमभिधाय तस्याः स्वादुदुर्लभसूक्ति-सुधासेक[4]कोमलालापपण्डिताभिः सखीभिः सह परिमित-परिहासेन, किमपि जल्पयन्[5], किमपि हसन्, किमपि हासयन्, मुहूर्त्तमिवासांचक्रे ।**

---

१. तत्र च अनू. । २. अभूत् नास्ति अनू. । ३. सव्रणः अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अनन्तरं**-परस्परं मुखप्रेक्षणात् पश्चात् नलः आप्ता-यथार्थवादिनी या सखी तस्या वचनेन यथा हे दमयन्ति ! प्रियाय अर्घं देहीत्येवंरूपया गिरा स्वयं-आत्मना अर्घः-पुष्पाञ्जलिस्तस्य दाने उद्यतां-प्रवृत्तां तां-दमयन्तीं इति अभिधाय तस्यां-दमयन्त्यां सखीभिः-वयस्याभिः सह परिमितः-अल्पो यः परिहासः-लीलापूर्वको हासस्तेन किमपि-किञ्चित् ता[१] जल्पयन्-सम्भाषयन्, किमपि स्वयं हसन्, किमपि ताः[२] हासयन् मुहूर्त्तमिव आसाञ्चक्रे-तस्थौ । इति अभिधायेत्यत्र इतीति किम् ? हे उत्पलाक्षि !-कुवलयलोचने ! प्रयासेन-अर्घदानव्यायामेन अलं अलं-प्रयासं मा कुरु इत्यर्थः । अलमिति वारणेऽव्ययम् । खलु-अनुनये, अनुनयः-प्रसादनं, दमयन्त्या एव यतस्त्वं परिश्रमस्य-खेदस्य पात्रं-भाजनं न असि, न त्वं व्यायामसहेत्यर्थः । यतः पारिजातमञ्जरी जरठपवनेन-कठोरवायुना यत् प्रेङ्खोलनं-दोलनं तेन य आयासः-श्रमस्तं न सहते । दमयन्त्या कल्पतरुमञ्जरी अर्घदानव्यायामस्य जरठपवनप्रेंखोलनमुपमानम् । किम्भूताभिः सखीभिः ? स्वादवः-सुन्दरा मृष्टा वा, दुर्लभाः-दुःप्रापा या सूक्तयः-सुभाषितानि ता एव सुधासेकः-पीयूषोक्षणं तेन कोमलाः-मृदवो ये आलापास्तेषु पण्डिताभिः-कुशलाभिः, मधुरवचनोक्तिविदुराभिरित्यर्थः । **"स्वादुस्तु सुन्दरे मृष्टे"** [२।२४०] इत्य**नेकार्थः** ।

**चिन्तितवांश्च—**

**चिन्तितवांश्च**-[३]नलोऽपि विचारितवांश्च[३]। किंतत् ?

**लीलाताण्डवितभ्रुवोः स्मरभरश्रान्तोल्लसत्तारयो-**
**रन्तर्मौक्तिकमालिकाधवलयोर्मुग्धस्मितस्मेरयोः ।**
**किंचित्साचिदृशोः कृतानिलचलन्नीलोत्पलस्पर्धयो-**
**रुल्लोलैरिव याति पक्ष्मलदृशः कान्तिर्मदीये मुखे ॥ ४१ ॥**

**लीलेति** । पक्ष्मले-रोमवत्यौ दृशौ यस्याः सा तस्याः-दमयन्त्या किञ्चित्-मनाक् साचिदृशो-तिर्यक्नेत्रयोः कान्तिर्मदीये मुखे उल्लोलैरिव-तरङ्गैरिव याति-स्फुरति । यथा तरङ्गाः परम्परया स्फुरन्ति तथा दमयन्तीनेत्रकान्तिर्मन्मुखे इति, पुनः पुनर्मां वीक्षत इत्यर्थः । पक्ष्माणि-रोमाणि सन्त्यस्मिन् इति पक्ष्मलं **"सिध्मादित्वात्"** [**पा० सू०** ५।२।४७] लः । किम्भूतयोः दृशोः ? लीलया-विलासेन ताण्डविते-नर्त्तिते भ्रुवौ याभ्यां ते तयोः, तथा स्मरभरेण-कामातिशयेन श्रान्ते-खिन्ने उल्लसन्त्यौ-चञ्चन्त्यौ तारे-कनीनिके ययोस्ते तयोः, तथा अन्तः-मध्ये मौक्तिकमालिकावत् धवलयोः-वलक्षयोः, तथा मुग्धस्मितेन-मनोज्ञेषद्धास्येन स्मेरयोः-विकस्वरयोः, तथा कृता-विहिता अनिलेन-वायुना चलती-

१. जल्पन् किमपि किंचिततां अनू. । २. तां अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कम्पमाने ये नीलोत्पले-कुवलये तयोः स्पर्द्धा-संहर्षो ययोस्तयोः । दृशोश्चलनात् वायुकम्पितनीलोत्पलोपमानम् ॥४१॥

**अपि च–**

**दरमुकुलितनेत्रप्रान्तपर्यस्ततारं,**
**तव तरुणि सलज्जं सस्मितं सस्मरं च ।**
**क्षणमभिमुखवक्त्रे विस्मयस्मेरदृष्टौ,**
**मयि चलति[1] वलक्षं वीक्षितं मा निरोधीः[1] ॥ ४२ ॥**

**अपि च**-पुनश्चिन्तितवान्–

**दरेति** । हे तरुणि !-दमयन्ति ! क्षणं यावत् अभिमुखं-तव सम्मुखं वक्त्रं-आननं यस्य तथाविधे मयि तव एवंविधं वलक्षं-धवलं वीक्षितं-अवलोकनं त्वं मा निरोधीः-मा वारय, पुनः पुनर्मां वीक्षस्वेत्यर्थः । किम्भूते मयि ? विस्मयेन-आश्चर्येण स्मेरा-विकस्वरा दृष्टिर्यस्य स तस्मिन् । पुनः किम्भूते मयि ? चलति अत्र स्वल्पकालावस्थानाच्चञ्चले अतएव मयि वीक्षणव्याघातं मा कार्षीरित्यर्थः । किम्भूतं वीक्षितम् ? दरः-ईषत् मुकुलितौ-संकोचितौ यौ नेत्रप्रान्तौ तयोः पर्यस्ते-विक्षिप्ते तारे-कनीनिके यत्र तत्, अतएव धवलं वीक्षितं । पुनः किम्भूतं ? सलज्जं-सव्रीडं, तथा सस्मितं-सविकासं, च-पुनः सस्मरं-सकामम् ॥ ४२ ॥

**किंचान्यदपरमिदमाशास्महे–**

**लावण्यामृतदीर्घिका कुलगृहं सौन्दर्यसौभाग्ययो[2]**
**स्त्रैलोक्याकररत्नकन्दलिरियं जीव्यात्सहस्त्रं समाः ।**
**लोकालोकनकौतुकाय बहुना शिल्पश्रमेणादरा-**
**न्मन्येऽहं[3] विधिना विधाय[4] विहितं सृष्टेर्ध्वजारोहणम्[5] ॥ ४३ ॥**

**किञ्च**-पुनः अन्यत्-अपरं न विद्यते परं प्रकृष्टं यस्मात् तदपरं-अत्युत्कृष्टमिदं-वक्ष्यमाणं आशास्महे-इच्छामः[1] । **"आङः शासु इच्छायाम्[2]।"** [पा०धा० १।२२]

**लावण्येति** । इयं-दमयन्ती सहस्रं समाः-वर्षाणि यावत् जीव्यात्-जीवतु । किम्भूतेयम् ? लावण्यं-नयनलेह्यं स्निग्धत्वं तदेव अमृतं-सुधा तस्य दीर्घिकेव-वापीव या सा । यथा दीर्घिका अमृतेन भृता भवति तथेयमपि लावण्येनेति । तथा सौन्दर्यं च-

१. आशिषं द अहे अनू. सेठिया । २. नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शरीरसुन्दरता सौभाग्यं च-सुभगता तयोः कुलगृहं-उत्पत्तिस्थानं । यथा कुलगृहे-पितृमन्दिरे कुमारी स्वैरं क्रीडति तथा अस्यां सौन्दर्यसौभाग्ये । तथा त्रैलोक्यमेव आकरः-खानिस्तस्मिन् रत्नकन्दलिरिव या सा । यथा आकरे रत्नकन्दलीश्रेष्ठा तथेयं त्रैलोक्ये । अहमेवं मन्ये, यां-दमयन्तीं आलोकने-वीक्षणे कौतुकं आलोकनकौतुकं लोकस्य आलोकनकौतुकं लोकालोकनकौतुकं तस्मै पश्यन् लोको द्रष्टव्यदर्शनात्-दृष्टिफलं प्राप्नोतु इत्यर्थं बहुना-भूयसा शिल्पश्रमेण आदरात् विधाय-कृत्वा विधिना-वेधसा सृष्टेः-सर्गस्य ध्वजारोहणं-उपरि पताकोपन्यसनं विहितम् । ध्वजो हि प्रासादं पूर्णं निर्माप्य उपर्येव विधीयते तथा विधिना सर्वां सृष्टिं विधाय इयं पताकोपमा विहिता, सर्वोत्कृष्टेयमित्यर्थः ॥ ४३ ॥

**अहो आश्चर्यम्—**

**रङ्गत्यङ्गे कुरङ्गाक्ष्याश्चक्षुर्मे यत्र यत्र तु[१] ।**
**दृश्यते तत्र तत्रैव बलाद्बाणकरः[२] स्मरः ॥ ४४ ॥**

**अहो** आश्चर्यं-अत्यद्भुतमेतत् , एकार्थो द्विरुक्तः शब्दस्तदतिशायित्वं व्यनक्तीति ।

**रङ्गेति** । तु पुनरर्थे, पुनः कुरङ्गाक्ष्याः-दमयन्त्या यत्र यत्र अङ्गे-अवयवे मे-मम चक्षुः-नेत्रं रङ्गति-गच्छति तत्र-तत्रैव बलात्-हठात् बाणकरः-करगृहीतशरः स्मरो दृश्यते । तस्य साधिष्ठानत्वात् मया स्मरबाण बाधा प्राप्यते इत्यर्थः ॥ ४४ ॥

**कथमियमन्यार्थे[३] प्रार्थ्यते । तद्दह्यतामयं परप्रेष्यभावः[४] ।**

**यतः-तिरयति स्वातन्त्र्यसुखम्, अभिमुखयति[५] पारवश्यक्लेशम्, आमन्त्रयति तिरस्कारम्, आदरयति दैन्यम्, आह्वयति लघिमानम्, आवाहयति[६] हास्यपदम्[७], आनय[८]त्यौचित्यभङ्गम्, अङ्गीकारयति कार्पण्यम्, अपहस्तयति वस्तुभावम, पुरुषस्य्[९] ।**

**इयं**-दमयन्ती अन्येषां-इन्द्रादीनामर्थे-अन्यार्थे कथं प्रार्थ्यते-याच्यते ? तत्-तस्मात् अयं परस्य प्रेष्यभावः-दासत्वं दूतत्वमित्यर्थः, दह्यताम् ।

**यतः** परप्रेष्यभावः[१] पुरुषस्य स्वातन्त्र्यस्य-स्वेच्छाचारित्त्वस्य स्वान्त्र्यरूपं वा यत्सुखं तत् तिरयति-आच्छादयति, स्वातन्त्र्यसुखं दूरीकरोतीत्यर्थः । तथा पारवश्यस्य पराधीनतायाः यः क्लेशः-सन्तापस्तं अभिमुखं-सम्मुखं करोति अभिमुखयति, पराधीनता-क्लेशं जनयतीत्यर्थः । तथा तिरस्कारं-तर्जनं आमन्त्रयति-आह्वयति, तिरस्कारं विधत्ते इत्यर्थः ।

---

१. परप्रेष्यभावस्य अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा दैन्यं-दीनतां आदरयति-गौरवयति, दीनतां कुरुत इत्यर्थः । तथा लघिमानं-लाघवं आह्वयति-आमन्त्रयति । तथा हास्यपदं-हास्यस्थानकं आवाहयति-कारयति, हास्यं कारयतीत्यर्थः । आङ्पूर्वकस्य वहतेः करोत्यर्थत्वात् । तथा औचित्यभङ्गं-करणीयविध्वंसं आनयति-प्रापयति । तथा कार्पण्यं-कृपणतां भयातुरतां अङ्गीकारयति-अभ्युपगमयति, भयातुरं करोतीत्यर्थः । अत्र कृपणशब्दो भयातुरार्थः ।

**"पदे पदे सन्ति भटा रणोद्भटा, न तेषु हिंसारस एष पूर्यते ।**
**धिगीदृशं ते नृपते ! कुविक्रमं, कृपाश्रये यः कृपणे पतत्रिणि ।"** [१।१३३]

इति **नैषध**पद्यव्याख्यैकदेशे कृपणे दीने भयातुरेवेति वाक्यात् । तथा वस्तुभावं-वस्तुस्वरूपं अपहस्तयति-अधरयति, पौरुषं दूरीकरोति । पुरुषस्येति पदं सर्वत्र योज्यते ।

**तथाहि—**

तथाहीति । तदेव परप्रेष्यताभावस्य[१] असत्त्वं दर्शयति-

**सोच्छ्वासं मरणं निरग्निदहनं निःशृङ्खलं बन्धनं,**
**निष्पङ्कं मलिनं[१] विनैव नरकं सैषा महायातना ।**
**सेवासंजनितं जनस्य सुधियो धिक्पारवश्यं यतः,**
**पञ्चानां सविशेषमेतदपरं षष्ठं महापातकम् ।। ४५ ।।**

**सोच्छ्वासमि**ति । सुधियः-बुद्धिमतो जनस्य सेवासंजनितं-वरिवस्याकृतं पारवश्यं-पराधीनत्वं धिक् । किम्भूतं पारवश्यम् ? सोच्छ्वासं-उच्छ्वाससहितं मरणं, अन्यन्मरणं निरुच्छ्वासं इदं च सोच्छ्वासमिति । परवशजनो जीवन्नपि मृत एवेति भावः । १ । तथा दहनं-भस्मीकरणं निरग्निः-अग्निरहितं । अन्यद्दहनं अग्निना भवति इदं चाग्निं विनापि । २ । तथा निःशृंखलं-शृंखलारहितं बन्धनं । अन्यद्बन्धनं शृंखलया भवति इदं शृंखलां विनापि । ३ । तथा निःपंकं-पङ्कं विना मलिनं, मालिन्यं भावप्रधानत्वान्निर्देशस्य, अन्यन्मालिन्यं पंकेन भवति, इदं पङ्कं विनापि । ४ । तथा नरकं-दुर्गतिं विनैव सा एषा महायातना-महापीडा । ५ । पुनः पारवश्यस्य धिक् त्वं । कुतः ? यतो हेतोः पञ्चानां मरणदहनबन्धनमालिन्यनरकरूपाणां पातकानां मध्ये एतत् पारवश्यं अपरं-अन्यत् सविशेषं-अतिशायि षष्ठं महापातकं-महापापम् ।। ४५ ।।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किञ्चान्यत्—

**प्रस्तुतस्य विरोधेन ग्राम्यः सर्वोऽप्युपक्रमः ।**
**वीणायां वाद्यमानायां वेदोद्गारो न रोचते ॥ ४६ ॥**

**किञ्चान्यत्** ।

**प्रस्तुते**ति । प्रस्तुतस्य-प्रस्तावापन्नस्य वस्तुनो विरोधेन प्रातिकूल्येन सर्वोऽपि उपक्रमः-आरम्भो ग्राम्यः-अनुचितः, सर्वं हि अनुचितं ग्राम्यमित्युच्यते । तत्र दृष्टान्तमाह—वीणायां-विपञ्च्यां वाद्यमानायां सत्यां वेदोद्गारः-वेदोच्चारो न रोचते-न प्रीणाति । प्रस्तुतेन वीणावादनेन सह वेदोद्गारस्य विरुद्धत्वात्, अतो ग्राम्यत्वेन न रोचते । "**रुचङ् नृप्रीतिप्रकाशयोः**" [ ]। तथाऽत्र प्रस्तुतं किल मम परिणयनार्थमागमनं तत्र च विरुद्धं लोकपालानामभ्युपगमं । कारयितुं दूत्यकर्मेति ॥ ४६ ॥

**तत्किमिदानीमिदमुच्यते । 'लोलाक्षि, लोकपालास्त्वामस्मन्मुखेन वृण्वन्ति[१] इति प्रस्तुतानुरागभङ्गः, तदादेशोऽपह्नूयते[२] स्वामिनामन्यथा[३] कथ्यते[४] इति[५] श्रेयस्खलनम्[६], यथावृत्तमाख्यायते[७] स्वार्थहानिः, तद्वरमस्तु स्वार्थविघातो न तु विश्वस्तदेवतावञ्चना[८]पातकम्' इति चिन्तयन्नशेषमपि तस्यै पुरन्दरादेशं सप्रपञ्चमा[९]चचक्षे ।**

**तत्**-तस्मात् किमिदानीं इदं उच्यते, यथा हे लोलाक्षि ! लोकपालास्त्वां-दमयन्तीं अस्मन्मुखेन-अस्माकं द्वारा वृण्वन्ति-याचन्ते, इति प्रस्तुतो यो अनुरागो मयि एतस्याः प्रेमबन्धस्य प्रस्तुतत्वात् तस्य भङ्ग-विनाशः । अथ तेषां-इन्द्रादीनां आदेशः-आज्ञा अपह्नूयते-अपलप्यते, तत्प्रार्थनावार्ता नोच्यत इत्यर्थः । स्वामिनां च तेषां अन्यथा कथ्यते यथोक्तमिति, तर्हि श्रेयस्खलनं-श्रेयःप्रतिघातः, श्रेयांसि न भवन्तीत्यर्थः । अथ यथावृत्तं-यथाभूतं-तत् प्रार्थनालक्षणं आख्यायते-कथ्यते तर्हि स्वार्थहानिः, तत्-तस्मात् स्वार्थविघातो वरं-मनागिष्टमस्तु, स्वार्थविघातस्यापि मनागिष्टत्वात् । वरमित्यव्ययं मनागिष्टे । तुः-पुनरर्थे, न पुनर्विश्वस्तानां-विस्रब्धानां देवतानां वञ्चनारूपं पातकं-पापमस्तु, विश्वस्तजनवञ्चनस्य महापापरूपत्वात् । इति-अमुना प्रकारेण चिन्तयन्-मनसा अवधारयन् सन् नलः [तस्यै] अशेषमपि-समस्तमपि पुरन्दरादेशं-इन्द्रादेशं सप्रपञ्चं-सविस्तरं आचचक्षे-कथयामास ।

**[१०]सापि शोकस्मितमुग्धनम्रमुखी[११] 'हं हे प्रियंवदिके, प्रियास्मज्जीवितयाम्बया तातेन[१२] च मध्याह्ने समाहूय किमुक्तासि ? किं शिक्षिता-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**ऽसि ? । [१३]नामबालेयम् अविनीयेतम्, आग्रहग्रस्तेयम्[१४], इति केनापि कर्णेजपेन तातस्य हृदयाद्दूरीकृताहमिति[१५] । वन्द्याः खलु गुरवो देवाश्च बिभेमि तेभ्य[१६] इति प्रियंवदिकाख्यया सख्या सार्धमन्यालापलीलामकरोत्[१७] ।**

**साऽपि**-दमयन्ती शोकेन स्मितेन च-ईषद्धास्येन मुग्धं-रम्यं नम्रं-नतं मुखं यस्याः सा एवंविधा सती इति प्रियंवदिकाख्यया सख्या सार्द्धं अन्या-अहं तान् अङ्गीकरिष्ये न वा ? इत्येवंरूपोत्तरप्रदानादपरा या आलापलीला-सम्भाषणविलासस्तामकरोत्। अर्थिनोऽपि लोकपालान् प्रत्यवज्ञां नलं प्रत्यनुरागाग्रहं च अन्यालापव्याजेन प्रतिपादयाञ्चक्रे इत्यर्थः । इतीति किम् ? हं-इति रोषभाषणे, सरोषा ब्रूत इत्यर्थः । "**हं रोषभाषणे अनुनयेऽपि च**" [परिशिष्ट २४] इत्य**नेकार्थः** । हे प्रियंवदिके ! प्रियं-इष्टं अस्माकं जीवितं-प्राणधारणं यस्याः सा एवंविधया अम्बया-मात्रा तातेन च-पित्रा मध्याह्ने समाहूय-आकार्य त्वं किं उक्तासि ? तव किमुक्तमित्यर्थः । तथा किं शिक्षितासि-का शिक्षा तव प्रदत्तेति भावः । नामेति वितर्के, इयं-भैमी बाला अविनीता-अविनयवती, तथा इयं आग्रहः-हठस्तेन ग्रस्ता-व्याप्ता इति कथनेन केनाऽपि कर्णेजपेन-पिशुनेन तातस्य हृदयात् अहं किं दूरीकृता न इति वितर्कः । खलु-अनुनये, अनुनयः-प्रसादनं, गुरूणामेव गुरवः-पित्रादयो देवाश्च वन्द्याः-नमस्कर-णीयास्तेभ्यो गुरुभ्यो देवेभ्यश्च बिभेमि ।

**नलोऽपि 'मदिराक्षि, मदनयति[१८] मदिरा, तरलयति तारुण्यम्, अन्धयति धनम्, उत्पथयति मन्मथः, विरूपयति रूपाभिमानः, खर्वयति गर्वः इति [१९]सर्वजनप्रसिद्धमेतत् । किंतु त्वमिदमसत्यतां[२०] मानैषीः[२१] । व्यभिचरतु[२२] तवाङ्गे सर्वमेतत् । न हि शशिनि वह्निः, अमृते च विषाङ्कुराः[२३] संभवन्ति । [२४]तदिमं देवादेशं मावज्ञासीः । सर्वज्ञा प्रभवन्ति प्राणिनाममी लोकपालाः । तत्रापि विशेषतः सकलत्रिदशाधिपति-रशेषसुरकिरीटमणिमयूखमालार्चितचरणारविन्दपुरन्दरो देवः । तद्वृणु[२५] कमप्यमीषाममृतभुजां मध्ये । मानय स्वर्गसुखानि । अभूमिरसि मर्त्यलोक-स्तोकसुखानाम्' इति पुनस्तामभ्यधात् ।**

**नलोऽपि** इति-अमुना प्रकारेण पुनः-भूयस्तां-दमयन्तीं अभ्यधात्-उवाच । इतीति किम् ? "**मदिरे-हर्षदायिनि[१] प्रान्तरक्ते च नेत्रे**" [ ] इति रति[२]रहस्योक्तत्वात् । प्रान्तशोणे वा अक्षिणी-नेत्रे यस्याः सा मदिराक्षी तस्याः सम्बोधने हे मदिराक्षि ! दमयन्ति !

---

१. हर्षदायिनी अनू. । २. रति नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मदिरा-मद्यपानं मदनयति-मदनवन्तं करोति । "**तत्करोतीति णिच्**" [ ] विन्मतोर्लुक् इति मतुप् प्रत्ययस्य लुक्" । तथा तारुण्यं-यौवनं तरलयति-चपलयति । तथा धनं अन्धयति-अन्धं करोति, व्याकुलं करोतीत्यर्थः । तथा मन्मथः-काम उत्पथयति उत्पथं-उन्मार्गं करोति, उत्पथयति-उन्मार्गे प्रवर्तयतीत्यर्थः । तथा रूपाभिमानः-सौन्दर्यगर्वः विरूपयति-विरुद्धशब्दं करोति । "**रूपं तु श्लोकशब्दयोः । पशावाकारे सौन्दर्ये नाणके नाटकादिके । ग्रन्थावृत्तौ स्वभावे च**" [२-३०१-३०२] इत्य**नेकार्थः** । तथा गर्वः खर्वं करोति-आत्मानं नीचैर्विधत्त इति खर्वयति । सर्वत्र '**तत्करोति तदाचष्टे**' [**पा०** गणपाठ] इति णिच् । एतत् पूर्वोक्तं सर्वजनानां प्रसिद्धं-विख्यातम् । किमु हे दमयन्ति ! इदं पूर्वोक्ते असत्यतां-अनृततां मा नैषीः-मा प्रापयः, त्वमपि तथैव कुर्वित्यर्थः । एतावता मां वृणीष्वेति ज्ञापितं, वा-अथवा तवाङ्गे-तव शरीरे सर्वमेतत् पूर्वोक्तं व्यभिचरतु-अन्यथाभवतु, मदिरादयो न मदनवत्तादिकारणानि भवन्त्वित्यर्थः । न हि शशिनि-चन्द्रे वह्निः सम्भवति । न हि अमृते च विषाङ्कुराः सम्भवन्ति । तथा त्वं राशिपीयूषप्राया, मदनवत्ता तरलतादयो हि वह्निविषाङ्कुरप्रायाः, अतएव त्वयि एते न सम्भवन्तीत्यर्थः । तदिति-यस्मान्मदिरादयास्त्वां मदनवत्तादिविशिष्टां कर्तुं न क्षमास्तस्मात् इयं देवादेशं माऽवज्ञासीः-मा अवगणय । यतः अमी लोकपालाः प्राणिनां-जन्तूनां सर्वथा प्रभवन्ति-समर्था भवन्ति । यथारुचिसुन्दरमसुन्दरं वा कुर्वन्तीत्यर्थः । तत्रापि-लोकमालेष्वपि विशेषतः-आधिक्येन सकलत्रिदशानां-समस्तदेवानामधिपतिः-स्वामी तथा अशेषसुराणां-समस्तनिर्जराणां यानि किरीटानि-मुकुटानि तेषु या मणिमयूखमाला-रत्नांशुश्रेणिस्तया अर्चितं-पूजितं चरणारविन्दं यस्य सः, सर्वदेवनम्य इत्यर्थः, एवंविधः पुरन्दरो देवः । तत्-तस्मात् हे दमयन्ति ! त्वं अमीषां अमृतभुजां-लोकपालदेवानां मध्ये कमपि-पुरन्दरादिकं वृणु-स्वीकुरु । तथा स्वर्गस्य सुखानि मानय-उपभुंक्ष्व । मानिरिह उपभोगार्थः । तथा मर्त्यलोकस्य स्तोकानि-अल्पानि यानि सुखानि तेषां अभूमिः-अस्थानमसि । भूमिशब्दोऽत्र स्थानमात्रवाची । तथा चोक्तं **कालिदास**कविना **रघुकाव्ये**-"**उटजाङ्गणभूमिषु**" [१।१९] इति ।

**एवंविधे च व्यतिकरे दमयन्त्या पुनरुक्तमिमं जल्पमरण्यकरिण्ये-वारुन्तुदमङ्कुशमसहमानया मनाक्करलिते शिरसि, स्तोकीकृते मनसि, मुक्ते निःसहनिश्वासमरुति, परावर्तिते चक्षुषि, विवर्णतामानीते वदनारविन्दे, प्रस्तावपण्डिता प्रियम्वदिका प्राह ।**

**एवंविधे** च व्यतिकरे-एतादृशप्रस्तावे राज्ञा देववरणस्वरूपे उक्ते सति, दमयन्त्या पुनरुक्तं इमं जल्पं-वाक्प्रपञ्चं असहमानया-सोढुमशक्नुवत्या सत्या मनाक्-ईषत् शिरसि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तरलिते-कम्पिते सति । जल्पस्य पुनरुक्तता च, एकशः पर्वतकेन उक्तत्वात्, द्वितीयवारेण च **स्वयमेव नलेन** उक्तत्वात् । दमयन्त्या कयेव ? अरुन्तुदं-मर्मव्यथकं अङ्कुशं असहमानया अरण्यकरिण्या-काननहस्तिन्येव, यथा अरण्यकरिण्या अङ्कुशमसहमानया मनाक् शिरस्तरल्यते तथाऽनयापि । तथा मनसि-चेतसि स्तोकीकृते सति, इदं[१] प्रार्थनोक्तौ बहिच्छायानिवृत्तत्वात् । तथा निःसहः-सोढुमशक्यो यो निःश्वासमरुत्-मुखवायुस्तस्मिन् मुक्ते सति, तथा चक्षुषि परावर्त्तिते सति-भ्रमिते सति, तथा वदनारविन्दे विवर्णतां-विच्छायतां आनीते सति, वदने विच्छाये जाते सतीत्यर्थः, प्रस्तावे-अवसरे पण्डिता-विदुषी अस्मिन्नवसरे इदं वक्तव्यमिदं न वक्तव्यमिति जानाना प्रियंवदिका सखी प्राह—

**'देव, श्रुतं श्रोतव्यम्, अवधारितो देवादेशः । किं तु न स्वतन्त्रेयम्, ईश्वरेच्छया प्रवृत्तिनिवृत्तयो यतः प्राणिनां अनालोचनगोचरश्चायमनुरागोऽङ्गनाजनस्य ।'**

**तथाहि—**

**तीव्रातपनतापप्रियाम्भोजिनी न सहते स्तोकमप्यमृतमुचो रुचश्चन्द्रस्य, परिम्लायति मालतीमालिका सलिलसेकेन ।**

हे **देव** !-राजन् ! श्रोतव्यं-श्रवणार्हं श्रुतम् । तथा देवादेशः अवधारितः-मनसि धृतः । किन्तु इयं-दमयन्ती न स्वतन्त्रा-न स्वाधीना । तत्र हेतुमाह—यतः प्रवृत्तिनिवृत्तयः ईश्वरेच्छया स्युः-किल ईश्वरेच्छया प्रवर्तते, ईश्वरेच्छया च निवर्तत इति, ईश्वरेच्छा-परवशेत्यर्थः । च-पुनरयं अङ्गनाजनस्य अनुरागः-प्रेमबन्धः प्राणिनां न आलोचनस्य-विचारणस्य गोचरः-विषयः, न विचारयितुं शक्यत इत्यर्थः ।

**तथाही**ति । अङ्गनाजनानुरागस्य अविचारविषयत्वमेव दर्शयति—

**तीव्रः**-उग्रो यस्तपनतापः-सूर्यतापः स प्रियः-इष्टो यस्याः सा एवम्विधा अम्भोजिनी-पद्मिनी स्तोकमपि-मनागपि अमृतमुचः-पीयूषस्राविणश्चन्द्रस्य रुचः-कान्तीर्न सहते किन्तु विच्छाया भवति । च-पुनर्मालत्या जातेर्मालिका-स्रक् सलिलसेकेन-जलोक्षणेन परिम्लायति-विच्छायाभवति । अम्भोजिन्या जातिस्रजश्च साक्षात् स्त्रीत्वाध्यवसायात् सुन्दरेऽपि नानुराग उक्तः । तथा अस्या अपि रम्येष्वपि लोकपालेषु नानुराग इति भावः ।

---

१. इन्द्र० अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**प्रसिद्धं चैतत्—**

**भवति हृदयहारी क्वापि कस्यापि कश्चि-**
**न्न खलु गुणविशेषः प्रेमबन्धप्रयोगे[१] ।**
**किसलयति वनान्ते कोकिलालापरम्ये,**
**विकसति न वसन्ते मालती कोऽत्र हेतुः ॥ ४७ ॥**

**एतत्**-वक्ष्यमाणं प्रसिद्धं च-सर्वजनविदितं च तदेवाह—

**भवे**ति । हे देव ! क्वापि-कुत्रचित् न सर्वत्र कस्यापि कश्चित् हृदयहारि-वल्लभो भवति । गुणविशेषः प्रेमबन्धस्य प्रयोगी-प्रयोक्ता न खलु-नैव, गुणविशेषेण प्रेमबन्धो न भवतीत्यर्थः । एतदेव दृष्टान्तेन द्रढयति--वनान्ते-वने किसलयति-पल्लवयति वसन्ते-मधौ मालती-जातिर्न विकसति-न पुष्पति । कोऽत्र हेतुः--किमत्र कारणम् ? यदि पुनर्गुणविशेषापेक्षया प्रेमबन्धो भवेत्तदा जातिरपि वसन्ते पुष्पेत् ? न च पुष्पति । एतावता बहुगुणविशिष्टानपि लोकपालान् परित्यज्य इयं त्वय्येव प्रेमवतीति सूचितम् । पुनर्गुणविशेषं दर्शयति-किम्भूते वसन्ते ? कोकिलानां-पिकानां आलापेन रम्यः-सुन्दरः कोकिलाला-परम्यस्तस्मिन् । वनान्त इत्यत्र अन्तः[१]स्वरूपार्थेः ॥ ४७ ॥

**एवमनेकविधोपाख्याननिपुणया तत्कालोचितम्[२], अनुच्चस्मितसुधा-स्निग्धम्, अविरुद्धम्, परिमित[३]परिहाससुन्दरम्, अनुबृंहितानुरागम्[४], उचितचाटुपटहम्[५], अशाठ्यम्[६], अकठोरम्, अनुज्झितप्रियम्, प्रियं-वदिकया सहाल्पाल्पं जल्पन् 'अयुक्तमिह कन्यान्तःपुरे चिरं स्थातुम्' इति चिन्तयन्नापृच्छ्य दमयन्तीं नलः पर्यङ्किकापृष्ठा[७]दुदतिष्ठत् ।**

**एवं**-अमुना प्रकारेण अनेकविधानि-बहुप्रकाराणि यानि उपाख्यानानि-पुंसि[२] दृष्टान्तास्तत्र निपुणया-दक्षया तया प्रियंवदिकया सह तस्मिन् काले-अवसरे उचितं-योग्यं यथा भवति तथा, अनुच्चं-अप्रकटं यत् स्मितं-हास्यं तदेव श्वेतत्वात् सुधा-पीयूषं तया स्निग्धं-चारु यथा भवति, तथा अविरुद्धं-पूर्वापरविरोधवर्जितं यथा भवति, तथा परिमितः-स्तोको यः परिहासः-लीलापूर्वकहास्यं तेन सुन्दरं यथा भवति, तथा अनुवृत्त्या-तदनुकूलवार्त्ताकरणप्रवृत्त्या बृंहितः-वृद्धिं नीतः अनुरागो यत्र तत् एवं यथा भवति । बृह-शब्दे वा[३] वृद्धौ । तथा उचितचाटूनां-योग्यप्रियवाक्यानां पटह इव यत् तत् तथाभूतं यथा भवति, तथा अशालां-शाठ्यरहितं यथाभवति तथा अकठोरं-कोमलं यथा भवति, तथा

१. अन्तशब्दः अनू. । २. पुंसि नास्ति अनू. । ३. वार् अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उज्झितं-त्यक्तं प्रियं-इष्टं यत्र एवंविधं यथा भवति, तथा अल्पाल्पं-स्तोकं-स्तोकं[१] जल्पन्, तथा इह-कन्यान्तःपुरे चिरं स्थातुं अयुक्तमिति चिन्तयन्-विचारयन् सन् दमयन्तीमापृच्छ्य नलः पर्यङ्क्किकापृष्ठात्-लघुपल्यंकोपरितनतलात् उदतिष्ठत्-उत्तस्थौ । अल्पाल्पमिति एकं बहुव्रीहिवत् इति पूर्वस्मात् सुप्लोपः ।

**प्रथमोत्थितया तया लज्जावनम्रवदनारविन्दया सह सखीकदम्बकेन द्वित्राणि पदान्यनुगम्यमानो विहसन् 'अलमलमायासेन[१], स्थीयतां सुखम्' इत्यभिधाय स्वगृहानयासीत् ।**

**प्रथमं** नलोत्थानात् पूर्वमुत्थितया-मुक्तासनया, तथा लज्जया अवनम्रं-ईषन्नतं वदनारविन्दं यस्याः सा तया लज्जावनम्रवदनारविन्दया तया-दमयन्त्या सखीकदम्बकेन-वयस्यावृन्देन च सह द्वित्राणि पदानि अनुगम्यमानः-अनुस्रियमाणो नलो विहसन् हे दमयन्ति ! आयासेन-खेदेन अलं अलं-आयासं मा कुर्वित्यर्थः । सम्भ्रमे द्वित्वम् । सुखं स्थीयतां इत्यभिधाय-उक्त्वा स्वगृहान् अयासीत्-जगाम ।

**गत्वा च शिरीषकुसुमदाममृदुनि[२] शय्यातले निषण्णश्चिन्तयां-चकार ।–**

**स्वगृहेषु** गत्वा च शिरीषकुसुमदामवत् मृदुनि-सुकुमारे शय्यातले निषण्णः-उपविष्टः सन् चिन्तयाञ्चकार ।

**हर्षादुत्पुलकं विकासि रभसादुत्तानितं कौतुका-**
**च्छृङ्गारादलसं, भयात्तरलदृङ् नम्रं च लज्जाभरात् ।**
**तस्यास्तन्नवसंगमे मृगदृशो दृश्येत भूयोऽपि किं,**
**किंचित्काञ्चनगौरगण्डगलित[३]स्वेदाम्बुरम्यं मुखम् ॥ ४८ ॥**

**हर्षादिति** । तस्याः मृगदृशोः-दमयन्त्या नवसङ्गमे-प्रथमसंयोगे यन्मुखं दृष्टं तत् भूयोपि किं दृश्येत-तथाविधं मुखं पुनरपि किं वीक्ष्येत ? अत्र यत् दृष्टं चेति अध्याह्रियते । किम्भूतं तत् ? नवसङ्गमे मुखम् ? हर्षात्-आनन्दात् उद्गताः पुलकाः-रोमाञ्चा यत्र तत् उत्पुलकं, तथा रभसात्-वीक्षणौत्सुक्यात् विकासि-विकसनशीलं, तथा कौतुकात् उत्तानितं उन्मुखीकृतं, तथा शृङ्गारात्-शृङ्गाररसात् अलसं-आलस्योपेतं, तथा भयात् अपरिणीतप्रियेण सह वार्त्ताविधानेन पित्रादिभ्यो भीतेस्तरला-चञ्चला दृक् यत्र तत्, च-पुनः लज्जाभरात्-व्रीडातिशयात् नम्रं-नमनशीलं । पुनः किम्भूतम् ? किञ्चिन्-मनाक् काञ्चनवत्-स्वर्णवत्

१. स्तोकस्तोकं अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गौरौ-पीतवर्णौ यौ गण्डौ-कपोलौ ताभ्यां सकाशात् गलितं-क्षरितं यत्स्वेदाम्बुः-घर्मजलं तेन रम्यं-मनोहरं । यद्वा, इत्थं योजना विधेया—तस्याः मृगदृशः तदिति पूर्वदृष्टं मुखं नवसङ्गमे विवाहादूर्ध्वं प्रथमसंयोगे भूयोऽपि किं दृश्येत? अग्रे मुखविशेषणानि तान्येव । नवरं, भयात्रवोढत्वेन भीतेस्तरलदृक् ॥ ४८ ॥

**अपि च—**

**अपसरति न चक्षुषो[1] मृगाक्षी,**
**रजनिरियं च न याति नैति निद्रा ।**
**प्रहरति मदनोऽपि[2] दुःखितानां,**
**बत बहुशोऽभिमुखीभवन्त्यपायाः[3] ॥ ४९ ॥**

**अपि च**-पुनः—

**अपेति** । मृगाक्षी-हरिणलोचता चक्षुषो न अपसरति-न याति, पुनः पुनर्भ्रमात् तामेव पश्यामीत्यर्थः । च-पुनः इयं प्रत्यक्षा रजनिः-निशा न याति, विरहित्वात् स्तोकाऽपि बह्वी जातेत्यर्थः । तथा निद्रा-तन्द्रा नैति-नायाति । तथा मदनोऽपि-कामोऽपि प्रहरति-शरव्ययति । यस्माद् बत-इति खेदे, दुःखितानां-दुःखिनां बहुशः-बहुभिः प्रकारैः अपायाः-प्रत्यूहाः अभिमुखी भवन्ति-सम्मुखाः जायन्ते । अतएव ममापि विरहदुःखितत्वेन एतेऽपाया जाता इति खेदः ।

**इति विविध[4]वितर्कावेशविध्वस्तनिद्रः,**
**सजलजडिम मीलत्पक्ष्म चक्षुर्दधानः ।**
**हरचरणसरोजद्वन्द्वमाधाय चित्ते,**
**[5]नृपतिरुभयसङ्गी सत्रियामामनैषीत् ॥ ५० ॥**

**[6]इति श्रीत्रिविक्रमभट्टविरचितायां दमयन्तीकथायां हरचरणसरोजाङ्कायां**

**सप्तम उच्छ्वासः समाप्तः ॥ ग्रन्थोऽपि च[7] समाप्तः ॥**

**इतीति** किम् ? स नृपतिः-नलश्चित्ते हरस्य-शम्भोः चरणसरोजद्वन्द्वं-पादपद्मद्वयमाधाय-संस्थाप्य स्मृत्वेत्यर्थः, त्रियामां-रात्रिं अनैषीत्-अत्यवाहयत् । किम्भूतो नृपतिः ? इति-पूर्वोक्तप्रकारेण विहिताः-कृता ये वितर्काः-विकल्पास्तेषां आवेशः-हृदि प्रवेशस्तेन विध्वस्ता-नष्टा निद्रा यस्य सः । तथा एवम्विधं चक्षुः-नेत्रं दधानः-बिभ्राणः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किम्भूतं चक्षुः ? जलेन-अश्रुजलेन यो जडिमा-जडत्वं अनुन्मिषत्वं जलजडिमा सह जलजडिम्ना वर्तत इति सजलजडिमनोन्मुखीभवतीत्यर्थः, तथा मीलन्ति-संकुचन्ति पक्ष्माणि-नेत्ररोमाणि यत्र तत् मीलत्पक्ष्म । यद्वा, सजलं च तत् जडिम्ना मीलत्पक्ष्म चेति समासः । पुनः किम्भूतः ? उभयस्मिन् शक्राद्यभ्यर्थितभैमीपरिणयने श्रेयः प्रतिघात इति न परिणयाम्येनां तादृक् सर्वातिशायिरूपावलोकनोत्पन्नानुरागाच्च परिणयामि इत्युभयत्र संग-आसक्तिर्विद्यते यस्यासौ उभयसङ्गी । किञ्चिज्जानाति परिणयामि, किञ्चिच्च जानाति न परिणयामि इत्युभयत्र अभिलाषवान् । यद्वा, उभयस्मिन् शम्भुपदपद्मस्मरणे भैमीमुख-पुनरवलोकने च सङ्गो विद्यते यस्याऽसौ उभयसङ्गी । "**अत इतिठनौ**" [**पा०सू०** ५।२।११५] इति इनिर्मत्वर्थे । प्रत्यन्तरे तु '**अतिविदग्धः**' इति पाठः स च स्पष्ट एव ॥ ५० ॥

**इति वाचनाचार्यश्रीमच्छ्री[1]प्रमोदमाणिक्यगणिशिष्यश्रीजयसोम-**
**गणितच्छिष्यपण्डित[2]श्रीगुणविनयगणिविरचितायां**
**श्रीत्रिविक्रमभट्टविरचित श्रीदमयन्तीकथा-**
**विवृतौ सप्तम उच्छ्वासः समाप्तः ।**

---

१. श्रीमत् नास्ति अनू. । २. पण्डित नास्ति अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# सारस्वतीविवृतिकृत्प्रशस्तिः

श्रीमत्**खरतरगच्छे** स्वच्छेऽभूवन्नवाङ्गवृत्तिकराः ।
श्रीमद**भयदेवाख्याः** पुरा वराचार्यगुणमुख्याः ॥ १ ॥

तेषां क्रमेण पट्टे विख्याता लक्षसंख्यगुणदक्षाः ।
रेजुर्जलधिगभीराः श्री**जिनमाणिक्यसूरिवराः** ॥ २ ॥

तत्पट्टे विशदप्रभाकरकरस्फूर्जत्प्रतापोद्धुराः,
वादप्राप्तजया धरापतिसदः पीठे सदा सुन्दराः ।
तत्तत्कृत्यविधानतो भुवि चमत्कारं विशां चक्रिरे,
चेतःसु प्रथमागमाधिगमतो लब्धप्रतिष्ठाश्च ये ॥ ३ ॥

**युगप्रधानेषु** महाप्रभाव-श्रियो निधानेषु विशुद्धबुद्धिषु ।
विराजमानेषु जनेषु तेषु, स्तुत्येषु सच्छ्री**जिनचन्द्रसूरिषु** ॥ ४ ॥

श्री**क्षेमशाखासु** सुधातिशायि-रसप्रवेशासमवाग्विलासाः ।
श्री**क्षेमराजः**[१] भुवि पारिजात-फलोपमाः पाठकलक्ष्मिलक्ष्याः ॥ ५ ॥

जयन्तु तेषां च वरा विनेयाः, सद्भागधेयाः स्वगुणैरमेयाः ।
चत्वार आसन् विमलप्रबोधा, विधेर्नु वेदा इव मूर्त्तिमन्तः ॥ ६ ॥

**शिवसुन्दर**नामानो विलसत्संवेग**कनकतिलका**ह्वाः ।
पाठकपदप्रधाना[ः], उभयेऽपि प्राप्तकीर्त्तिभरा[ः] ॥ ७ ॥

सदयोदयास्तृतीयाः सदयास्सततं **दयातिलक**गणयः ।
वाग्गुरवो वाग्गुरवस्तुर्याः शिष्याश्च विजयन्ते ॥ ८ ॥

श्रीमत्**प्रमोदमाणिक्य**नामधेयाः सुसाधुवृत्तधराः ।
भाग्याभ्यधिकास्तेषां विद्यन्तेऽमी पुनः शिष्याः ॥ ९ ॥

चत्वारोप्यम्बुधिवद्गम्भीराक्षोभ्यतादिगुणयुक्ताः ।
न च जडसङ्गतिभाजो भवन्ति येऽस्मिन् महीपीठे ॥ १० ॥

वाग्गुरु**गुणरङ्गा**ख्या रङ्गद्गुरुभक्तिभाग्**दयारङ्गाः** ।
श्री**जयसोमा**स्सोमाननास्तथा **क्षेमसोमा**ह्वाः ॥ ११ ॥

---

१. श्रीक्षेमराजा अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्र **श्रीजयसोम**कल्पतरवोऽमेयप्रमाशेमुषी-
शाखालीढवरागमाम्बरतलाः सत्पात्र[१]शोभावहाः ।
कीर्त्तिप्राप्तफलाः कलोत्तर[२]कलाः सन्तीहमत्पाठकाः,
श्रीमन्तो गुरवो रवोदितरसैः सम्प्रीणितप्राणिनः ॥१२ ॥

तेषां शिष्यो मुख्यो **गुणविनया**ख्यो विमृश्य शास्त्राणि ।
सत्पाणिनीयहैमानेकार्थोणादिमुख्यानि ॥ १३ ॥

श्री**चण्डपाल**रचितं **दुर्गपद**प्रकटनैकसितकक्षम् ।
श्री**चम्पूटिप्पनकं** पुनः सहार्दं समुपजीव्य ॥ १४ ॥

श्रीविक्रमवंशोद्भवसद्विक्रम**राजसिंह**नृपराज्ये ।
सत्कर्म**कर्मचन्द्रा**भिधधीसखधुर्यसंधार्ये ॥ १५ ॥

श्रीमद्विक्रमभूपतेः स्वरसरस्वत्तर्कशक्रप्रमा- [१६४७]
ख्यातायां शरदि प्रमोदविसरभ्राजिष्णुपौराकुले ।
श्री**सेरुन्नक**नाम्निभद्रनगरेऽर्हच्चैत्यशोभाधरे,
चक्रे श्री**दमयन्त्यु**दारचरिते **टीकां** महार्थां सुधीः ॥ १६ ॥

सरस्वत्यां[३] प्रणीतायां श्रीचम्प्वां कृतसंविदि ।
यन्मया वितथं प्रोक्तं मतिमान्द्येन वाऽन्यथा ॥ १७ ॥

सद्व्याख्यां कुर्वता सन्तोऽनुग्रहं मयि धीधनाः ।
तत्कृत्वोत्सारयन्त्वार्या मावजानन्तु किञ्चन ॥ १८ ॥ युग्मम् ।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥ १९ ॥

[आधुनिकबुधविनिर्मितमेतद्व्याख्यानमिति विमृश्येह ।
माऽवज्ञां कुरुत बुधा ग्रन्थान् संवीक्ष्य यद्दब्धम् ॥ २० ॥

श्री**फलवर्द्धिकपार्श्व**-श्री**मज्जिनदत्तकुशलसूरीणाम्** ।
सौम्यदृशा पठतामिह शुभार्थदा वृत्तिरेषा स्तात् ॥ २१ ॥]

वैयाकरणविशिष्टैः शिष्टैः सदसद्विवेकमतिपुष्टैः ।
**रत्ननिधानै**र्वाचकमुख्यैर्दक्षैरशोधीयम् ॥ २२ ॥

● ● ●

---

१. पर्णानि—सत्पुरुषाश्च । २. कलनाया उत्तरा अधिकाः कला विज्ञानानि येषां ते । ३. सरस्वत्या अनू. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न येषु देशेषु विशिष्टधर्म-वार्त्तापि कर्णातिथितां बभाज ।
येन प्रजापालनतत्परेण, प्रवर्तितस्तेषु विशुद्धधर्मः ॥ १ ॥

अनार्या अपि देशाः सद्धर्मभावनयानया ।
येनार्या विहिता यद्वत्तिलाः पुष्पैः सुवासिताः ॥ २ ॥

दोषापहारात्तमसो विनाशात्, प्रकाशनान्न्यायपथस्य भूतले ।
श्री**सूर्यसेवाकरणा**नुषङ्गिणा, श्रीसाहिना येन कृतं महाद्भुतम् ॥ ३ ॥

**गवादि**प्राणिसंघातघातस्य प्रतिषेधनात् ।
येन कान्ता दयाकान्ता सौभाग्यैकमतीकृता ॥ ४ ॥

स्वप्नेऽपि सज्जनाः सर्वे यस्येमामाशिषं ददुः ।
त्वं पालय चिराद् राज्यं यत्कृपावारिवारिधिः ॥ ५ ॥

यस्य राज्ञः प्रसत्त्यामी धर्मं कुर्वन्ति साधवः ।
तस्माद् यद्विजयो नित्यं यतो धर्मस्ततो जयः ॥ ६ ॥

यस्य नाम्नि विराजन्ते विष्णुब्रह्ममहेश्वराः ।
तेनाऽत्रा**ऽकबरे**त्याख्या ख्याता सर्वत्रभूतले ॥ ७ ॥

विबुधश्रेणिविराजित सविधे वरनन्दनश्रिया मुदिते ।
कृतगोरक्षे दक्षे शुभनयन इव त्रिदिवनाथे ॥ ८ ॥

**अकबर**नृपाधिनृपतौ विजयिति शरभुवनसम्मिते(३५)वर्षे ।
श्री**मल्लाभपुरीयं** प्राकाशि परापुरस्सुधियाम् ॥ ९ ॥

**इति** श्रीचम्पूवृत्तिः समाप्ता ।

ग्रन्थाग्रं १०००० (११०००) सारस्वतीनाम्नीवृत्तिरियम्।★

● ● ●

★ प्रतिष्ठानप्रतौ अन्तिमपत्रावे श्लोकाङ्का २० से प्रारभ्य अन्तिमांरा लोपलम्यंत ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# मूलपाठस्य पाठान्तराणि

## सप्तम उच्छ्वासः

५०७. १. दण्डवासिकस्य निपा० । २. चारु नास्ति नि० चौ०; कण्ठस्थाने 'गल' नि० चौ० । ३. सुवेषः प्रतीहारः नि० चौ; 'सुवेषः' नास्ति निपा० । ४. धृतमंगल्यवेषाः निपा० । ५. अधीयाना नि० चौ०; पुरः स्थिताधीयानब्राह्मणाः निपा० । ६. कुण्डिनपुरः पु० ।

५०९. १. °पवनानर्तित° निपा० । २. 'तरल' नास्ति निपा०; तरुणतुरंगं निपा० । ३. °शिखरैकदश° निपा० । ४. °स्तोम° निपा० । ५. लोहवलयो° पु०; °लोहवहलै° निपा० । ६. 'आतंक' निपा० । ७. °निशात° नि० चौ; °निरवात° निपा० । ८. अंगणस्य नि० चौ० ।

५१०. १. °अवलम्बि° निपा० । २. विसर्पित° निपा० । ३. °स्थगिका° निपा० । ४. तुरंगम° निपा० ।

५११. १. मुक्ताफल नि० चौ०; °मुक्ताकली° निपा० । २. °प्रसर° निपा० । ३. प्रथमप्रेक्षकाणां निपा० । ४. महत् पु० । ५. तज्जृम्भभाण° नि० चौ० ।

५१२. १. °द्वितीय° पु०; °द्वयं° निपा० ।

५१३. १. मानोक्तेः निपा० । २. रूपसम्पदां नि० चौ० । ३. 'तस्य' नास्ति नि० चौ० । ५. तुरङ्गांस्तुरगान् नि० चौ० । ५. 'अमूल्य' नास्ति नि० चौ० । ६. 'क्रमं' निपा० । ७. जातमेकत्र पु० निपा० । ८. प्रकरानुकारान्हारान् नि० चौ० । ९. उज्ज्वलभांसि नि० चौ० । १०. च स्वयमुपढौकयांचकार नि० चौ० ।

५१४. १. मुद्यतां पु० नि० चौ; मुद्रितं निपाः ।

५१५. १. °प्रियदर्शन° निपा० । २. न हि निपा० । ३. भवद्विभवेप्यस्माकं निपा० । ४. बुद्धि पु० । ५. 'अपि' नास्ति पु० निपा० । ६. अनात्मभावाः निपा० ।

५१६. १. विदग्धा° निपा० ।

५१७. १. अर्पणेन प्रणयेन पु० । २. गोष्ठ्यां निपा० । २. उत्पापं निपा० । ४. भावयन्तौ नि० चौ० । ५. अवतस्थतुः निपा० । ६. प्रश्रयेण नि० चौ० । ७. लौकवृत्तकौशलं नि० चौ० । ८. 'चिन्तितवांश्च' नास्ति पु० ।

५१८. १. कुंभ° निपा० । २. हि चित्रीयते नि० चौ० ।

५१९-२०. १. वाङ्मनसो° पु० । २. किमप्याह निपा० । ३. अनेकवितर्क° नि० चौ० । ४. भंगनात्ति निपा० । ५. अतिक्रान्ते सति पु० । ६. फलकहस्ताः फलहस्तकहस्ताः निपा० । ७. °करण्डकाः नि० चौ० । ८. काश्चित्नारङ्गनारि° निपा० । ९. °बीजपूरक° नि० चौ० । १०. मंगल्य निपा० मांगल्य पु० नि० चौ० । ११. माल्य नि० चौ० । १२. °प्रबोधित° नि० चौ० । १३. बद्धस्पृहासि निपा० । १४. स्त्रीसौभाग्यभावभाग्यं; स्त्रीभावभाग्यं निपा० । १५.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

संसारमहोत्सवं पु०; संसारं निपा० । १६. अहो वन्दनीया नि० चौ० । १७. यस्यां नि० चौ० ।

५२१. १. गोरि पु० । २. एत. नि० चौ० । ३. प्राक्तन निपा० । ४. निजरि नि० चौ० ।

५२२. १. चन्द्रि नि० चौ० । २. नन्दनि नि० चौ० । ३. मन्यामहे पु० ।

५२३. १. क्षितिपतिः सानुराग° निपा० । २. °विकसित° नि० चौ० । ३. 'इत' नास्ति नि० चौ० ।

५२४. १. राजाधिराजं निपा० ।

५२५. १. अनुजल्पमनुजल्पितं, अनु हासमनुहसितं, अनु सुभाषितमनुसुभाषितं, अनु प्रियमनुप्रीतं नि० चौ० । अनुजल्पितं अनुहसितं अनुसुभाषितं अनुप्रियं पु० । निपा० पाठान्तरे तु केवलं °अनुप्रियमप्रमेय-प्रसाद° । २. 'न' पु०; । ३. स्वल्वस्य नि० चौ० । ४. काञ्चिदप्यविदितामुचित° निपा० । ५. 'च' नास्ति नि० चौ० । ५. त्वरितमस्मत् निपा० । ६. 'ताः' नास्ति नि० चौ० ।

५२६. १. अपरं अचरमं पु० । २. कुशलं कलासु नि० चौ० । ३. प्रतिमायां निपा० । ४. पर्वतनामानं पु० । ५. °मुक्तावली° नि० चौ० । ६. भूषणांशुकादि नि० चौ० । ७. परितोषितेन नि० चौ०; संतोषिते निपा० । ८. पुरः सरं नि० चौ० ।

५२७. १. भांकारिमध्याह्नभेटीरवेण नि० चौ; मध्याह्नमाकारिभेटीरवेण निपा; 'भांकारि' नास्ति निपा० । २. °चरणामरणरणन्° नि० चौ० । ३. निवेद्यमानमध्याह्नसमयः निपा० । ४. माध्याह्निककरणाय नि० चौ० । ५. °अर्थाविकार° पु०; °अर्थाविकारिका° निपा० । ६. °समस्त° नि० चौ० । ७. 'प्रकर' नास्ति नि० चौ० । ८. स्वनन्तीषु निपा० । ९. कालहलासु निपा० । १०. प्रवाद्यमानेषु निपा० । ११. प्रत्यास्वादजनेषु नि० चौ० । १२. °अग्रासन° निपा० । १३. पुण्यगवीषु कपिलासु पु०; 'कपितासु' नास्ति निपा° । १४. 'भैक्ष्य' नि० चौ० । १५. शुक्रचकोर निपा० ।

५२९. १. °कल्मश्च नि० चौ०; कल्पश्च पु० । २. धूपामोदमनोहरा नि० चौ० ।

५३०. १. अहो नु नि० चौ० । २. 'मत्स्य' नास्ति निपा० । ३. प्राच्यजनाः नि० चौ० । ४. °तरान्न° निपा० । ५. निधाय निपा० । ६. सम्भार° नि० चौ० । ७. सरलः निपा० । ८. शाल्योदन निपा० ।

५३१. १. 'ततः' नास्ति पु० नि० चौ० । २. स त्वरितं पु० । ३. गत्वागतश्चततः निपा० । ४. 'स' नास्ति पु० । ५. आब्रह्मणा° पु० । ६. गोपालकं चौ° । ७. 'अन्नविशेषैः नि० चौ० ।

५३३. १. तैस्तैः पाक निपा० । २. शिराः पु० नि० चौ० । ३. स्पृहणीयपरिमलश्चायमपूर्व नि० चौ० । ४. अनम्लास्वादं नि० चौ० । ५. मधुरतां नीतं नि० चौ० । ६. अतिमिष्टतया निपा० । ७. तद्रसवत्यां निपा० । ८. विदर्भराजात्मजा नि० चौ० । ९. विभावयत् नि० चौ० । १०. तांस्तान् निपा० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

५३४. १. 'नु' पु० । २. विश्वरूपायतां पु० ।

५३५-५३६. १. पाकरसेषु निपा 'विशेष' नास्ति निपा० । २. असन्तुष्ट इव पु० । ३. परिमलेन नि० चौ० । ४. प्रकरप्रकारहारिणि निपा० । ५. °छटोच्छोतित° नि० चौ० । ६. °दिगन्तालोकन नि० चौ०; °दिगन्तरालोकन° पु० । ७. सरित्तीरत्तंसिता निपा० । ८. 'आरुरोह' नास्ति नि० चौ० । ९. क्रियमाण° निपा० । १०. अवलोक्यमानासु नि० चौ० । ११. °वनान्तराल° निपा० । १२. किञ्चिदिवा° निपा० । १३. °पाण्डु° नि० चौ० पु० । १४. 'बाल' नास्ति पु० । १५. विस्फारि° पु० । १६. क्षणवाजि° निपा० । १७. °मनोहारितरुलतारमणीयासु पु० नि० चौ; मनोहारिणीषु तरलितरमणीषु; तरलतारमणीयासु निपा० । १८. राजितासु नि० चौ० । १९. प्रासादपदपंक्तिषु नि० पा० ।

५३८. १. रम्यहर्म्येषु वा; रम्यहर्म्येऽपि वा निपा० । २. भाषितेव नि० चौ०; भायितेव निपा० ।

५३९. १. विन्ध्यो निपा० ।

५४०. १. उन्नमित निपा० । २. 'पक्ष' नास्ति नि० चौ० । ३. 'तर' नास्ति पु० । ४. अभिभाषितः नि० चौ०; अभिलापितः पु०; आभिभूषित निपा० । ५. स्तोकान्नमित° नि० चौ० ।

५४१. १. अतिशपितः पु० । २. °हेषितोत्कर्षहर्षित° निपा०; °हर्षहेषित° चौ० । ३. °मयूरध्वजं निपा० । ४. °अंगरक्षि° नि० चौ० । ५. रम्यरङ्गरेखा नि० चौ० । ६. °कुंकुभ° नि० चौ० ।

५४३ १. 'कुल' नास्ति नि० चौ० । २. अनन्तालयं पातालमिवान्तः पुरं पु०; अनन्तमयं पातालमिव तदन्तःपुरं निपा० । ३. प्रविश्य नि० चौ० । ४. चक्रवालचक्रवाके निपा० । ५. विलसत् नि० चौ० । ६. सप्तभूमिका पु०; सप्तमभूमिका पु०; ७. उत्तरांसुक पु० ।

५४४. १. स्मरबाणपरवश° निपा० । २-२ ममेयमिति निपा० । ३. स्व नास्ति नि० चौ० पु० । ४. रेखान्नितयं नि० चौ० । ५. 'च' नास्ति निपा० पु० । ६. भवद्वार्ता निपा० । ७. °वीणा दि विनोद° नि० चौ० । ८. शरीरिणी नि० चौ०; सशरीरिर्णी निपा० । ९. नाक नि० चौ० । १०. अंगेषु नास्ति नि० चौ० । ११. कान्तिरसबिसरं नि० चौ० । १२. अशेषाङ्गावयवेषु नि० चौ० । १३. उपस्थिते निपा० । १४. °अस्त्रशालाभिव नि० चौ० । १५. समस्तसौन्दर्यगुणानां नि० चौ० । १६. परिणामरेखभिव नि० चौ० । १७. अनून° निपा० । १८. अद्राक्षीत् निपा० । १९. शलाकामिवावलोक्य निपा; शिलाकामवलोक्य पु० ।

५४८. १. मंगलवसतिः निपा० । २. न बाला मनः कस्य नि० चौ० ।

५४९. १. स चापि निपुणः खलु नि० चौ० । २. °गुणानुमेयः पु० । ३. एवं हि तर्कयन्तं नि० चौ० । ४. सूचितमुचितसंभ्रमेण नि० चौ; सूचितसंभ्रमेण पु० । ५. आलोक्य निपा० । ६. °कण्ठे° पु० । दक्षिणा नास्ति पु० । ७. इवोर्जितो° निपा० । ८. परबलदलदावानलो नि० चौ; परबलदावानल पु० । ९. स्मितमुग्धमधुरया नि० चौ० । १०. समभाषत नि० चौ० ।

५५०. १. संतोषमादरेण पु०; सपरितोषमादरेणेव; आदरेण च निपा० । २. 'तेषु' नास्ति पु० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

५५१. १. 'ग्रहण' नास्ति निपा० । २. 'कला' नास्ति नि० चौ० । ३. देव विज्ञापयसि निपा० । ४. सर्वे पु० । ५. °दावानलानलं नि० चौ० । ६. भवादृशः निपा० ।

५५२. १. °स्मेरदृश° पु० । २. वीणाक्वाण पु० । ३. मितीवोच्छ्वसितवदना नि० चौ० । ४. 'सा' नास्ति पु० ।

५५४-५५. १. °मन्थरा पु० । २. °विच्छायमानेन्दुद्युति पु० । ३. सौभाग्यभागिनि पु० । ४. °पार्थिवप्रार्थना नि० चौ० । ५. दूरे भवति नि० चौ० । ६. इमाश्च पु०; इमान्याश्चर्यनिश्चल° निपा० । ७. सरसीषु निपा० । ८. मनुष्यकन्यकां नि० चौ० । ९. 'इति' नास्ति पु० । १०. उन्नमय्य नि० चौ० । ११. पल्लवाकारि निपा० ।

५५६. १. तथा पु० । २. 'न' नास्ति पु० । ३. दृशा निपा० । ४-४. कथमपि संप्रेषितः कष्टं नि० चौ० । ५. अलसालसैरसमञ्जसं नि० चौ० । लालसैरिव निपा० । ६. पादैरिहाहमागतवान् निपा०;

५५७. १. °व्याकूता° नि० चौ; °व्याधाता° निपा० । २. कामयन्ते नि० चौ० । ३. कोपेनेवारुणाङ्गः निपा० । ४. पाश्चिमाब्धि नि० चौ० ।

५५८. १. सन्ध्यावन्दनविधिविरामो° नि० चौ०; सन्ध्यावन्दनविरामो° निपा० । २. °नृपद्विज° निपा० । ३. स्फुरति नि० चौ० । ४. अनेकैः नि० चौ० । ५. °पुष्प° नि० चौ० । ६. अगात् निपा० ।

५५९. १. 'च' नास्ति निपा० । २. प्रचण्ड° निपा० । ३. पूर्वपयोधिपुलिनाद् नि० चौ० । ४. °यूथपपृष्ठ° नि० चौ० ।

५६०. १. माहेन्द्र° निपा० । २. हस्तश्लेषो° नि० चौ० । ३. शंखिका° नि० चौ० । ४. 'स्तवक' नास्ति निपा० । ५. प्राची° नि० चौ० । ६. गच्छातः निपा० । ७. उदयाचलचलच्चतुष्पथे निपा० ।

५६१-६२. १. मदनमिति नि० चौ० । २. हासयन् निपा० । ३. इम नि० चौ० । ४. संसिक्त° निपा० । ५. सारं निपा० । ५. °पिण्डितैः नि० चौ० । ६. पूरति° नि० चौ० पु० । ७. स्फटिक° निपा० । ८. दरीषु निपा० । ९. महाप्लवेषु निषा० । १०. मृत्पिण्डेन निपा० ।

५६३. १. स्फटिकोपलैः नि० चौ० । २. पक्षतिधूननेन निपा० ।

५६४. १. इतोपि विषमास्तटी निपा० । इतो विषमदुस्तती-भयमितो निपा० ।

५६५. १. अलंघनीयः पु० नि० चौ० । २. विनिर्गत्य नि० चौ० । ३. निजनिकेतनात्समन्तादापतद्भिः पु० नि० चौ० । ४. किं रणप्रभाजालैः निपा० । ५. 'परिजनैः' नास्ति निपा० । ६. वरप्रदानात् अदृश्य° नि० चौ० । ७. प्रासादपालकैः नि० चौ० । ८. °संचारिणा नि० चौ० ।

५६६. १. इव नि० चौ० । २. 'क्वण' नास्ति पु० । ३. किंनरीप्रमुखसखीनां गीतेन नि० चौ० । ४. नवीनकज्जल° निपा० । ५. सचन्द्रगगनस्पर्द्धया नि० चौ० । ६. 'कृतः' नास्ति नि०

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चौ० । ७. कुसुममंजरी° नि० चौ० । ८. ऊरु नि० चौ०; उरु° निपा० ।

५६७. १. चित्रितावयवां नि०चौ०। २. मदनमृत्पिडेनेव नि० चौ०; मदनचन्दनकुंकुमहरिद्रामृत्पिडेन निपा० । ३. आकर्षणमणि° पु० नि० चौ० । ४. जीवनौषधिमिव नि० चौ० प्रतौ 'अंकभाजं' अनन्तरं - जयपताकामिव मदनस्य, जीवनौषधभिवानुरागस्य पाठो वर्तते । ६. शृंगाररस्य निपा० । ६. बहल° नि० चौ० । ७. मसृणित° पु० । ८. °पिच्छले पु० नि० चौ० । ९. अच्छांशुस्फटिकमणि नि० चौ० ।

५६९. १. विचिन्तिवान् नि० चौ० । २. अयं पु० । ३. स्पृहयति 'मह रामेश्वरः' निपा० ।

५७०. १. 'अयं' नास्ति पु० । २. अयमपि समीरणः निपा० । ३. सर्वथा स्वर्लोकायितं निपा० । ४. अप्रतिमरूपं नि० चौ० । ५. उत्पद्यन्त पु० । ६. कुसुमलतिके पु० ।

५७१. १. भ्रूमङ्गसंगयोः पु; कृतश्रवणासंगयोः निपा० ।

५७२. १. °गीतामृतश्रुति पु० । २. इत्यनेकविधं पु० निपा० । ३. 'मन्द' नास्ति नि० चौ० । ४. विस्मित° पु०; विस्मयविस्मित° निपा० । ५. लोचनस्य पु० नि० चौ० । ६. सरवीजनकदम्बकस्य निपा० ।

५७३. १. मुकुलिलानि पश्चात् 'विलासेन मिलितानि' इत्यधिकपाठो वर्तते पु० नि० चौ० । २. अनङ्गभ्रूभङ्गुरं पु० । ३. °गिरां पु० नि० चौ० । ४. शय्यातलाज्जवादुदचलत् निपा० ।

५७४. १. °प्राकार° नि० चौ०; °प्रासादरक्षिणारक्षि° निपा० । २. राजकन्या° निपा० । ३. पुरेऽत्र पु० । ४. 'साचि' नास्ति नि० चौ० । ५. पुनः पुनः पु० नि० चौ० । ६. काप्युराधिता° नि० चौ० । ७. मुक्ताहारभिव पु० । ८. प्रसारितकरः निपा० ।

५७५. १. परम्परा° नि० चौ० । २. विकल्पं पु० ।

५७६. १. तदितः नि० चौ० । २. उल्लसन् नि० चौ० । ३. पर्यंकिकापृष्ठं नि० चौ० । ४. देवत्वमपि पु० । ५. आत्मानुभवेन नि० चौ० । ६. सर्वसत्वर° नि० चौ०।

५७७. १. 'च' नास्ति पु० । २. विनोदं निपा० । ३. केप्याविरासूरसाः निपा; केप्याविरासद् रसाः पु० ।

५७८. १. तत्र च पु० नि० चौ० । २. विशिखान्युगपद्विमुञ्च° पु० । ३. 'इति' नास्ति पु० । ४. 'सेक' नास्ति पु० । ५. जल्पन् नि० चौ; जल्पन् जल्पयन् पु० ।

५८०. १. निरौत्सीः नि० चौ; विरोधीः निपा० । २. सौभाग्यसौन्दर्ययोः पु० नि०चौ० । ३. मन्ये यां नि० चौ० । ४. विहाय निपा० । ५. ध्वजारोपणं नि० चौ० ।

५८१. १. 'हि' निपा० । २. वल्गान्बाणकरः; चलद्वाणकरः निपा; वलाद्वाणकर° पु० । ३. तत्कथमियमन्यार्थे नि० चौ०; तत्किमियमन्यार्थे निपा०; अथ कथमियमन्यथा निपा० । ४. परप्रेक्षभावः पु० । ५. मुखरयति; अतिमुखरयति निपा० । ६. आरोहयति निपा० । ७. हास्यवादं चौ०; प्रतिहास्यपदं निपा० । ८. समानयति नि० चौ० । ९. पुरुषभावं निपा० ।

५८२. १. गलनं; नलिनं निपा० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

५८३-८४. १. विवृण्वते पु० । २. अपधीयते निपा० । ३. स्वामिन्यन्यथा नि० चौ० । ४. कथ्यन्ते पु०; कथ्यते निपा० । ५. 'इति' नास्ति नि० चौ० । ६. श्रेयः स्खलनं पु०; श्रेयः संवलनं निपा० । ७. यथावृत्तमेवाख्यायते नि० चौ० । ८. वञ्चनपातक° पु० निपा० । ९. पुरन्दरादेशप्रपञ्चं निपा० । १०. ततः साऽपि निपा० । ११. स्तोकस्मितस्निग्धनम्रमुखी नि० चौ; । स्तोकस्मितमुग्धनम्रमुखी; स्तोथस्मितस्निग्धमुग्धनेत्रमुखी; स्निग्धमुखनम्रमुखी निपा० । १२. कुप्यता तातेन निपा० । १३. न नाम नि० चौ० । १४. आग्रहग्रहग्रस्तेयं नि० चौ०; आग्रहग्रस्तैवेयं निपा० । १५. 'इति' नास्ति नि० चौ; अहमपि निपा० । १६. तेभ्योहं नि० चौ० । १७. अन्योन्यालापलीलामकरोत् निपा० । १८. मदयति नि० चौ० । १९. 'इति' नास्ति नि० चौ० । २०. सर्वमसत्यतां पु० । २१. मनैषीः निपा० । २२. व्यभिचरति निपा० । २३. विषांकुरः नि० चौ० । २४. तमिमं निपा० । २५. तद्वृणुष्व निपा० ।

५८७. १. प्राप्तबन्धप्रयोगी निपा० । २. तत्कालोचितभुवा; स्निग्धं निपा० । ३. परिमितं निपा० । ४. अनुबृंहितानुरागं चौ० । ५. उचितचाटुचटुलं नि० चौ० । ६. असाध्यकठोरं निपा० । ७. पर्यंकिकातलात् निपा० ।

५८८. १. अलमलमायासेन विहसन् पु०; विरहातुरामलमलं प्रयासेन निपा० । २. मृदुशय्यातले निपा० । ३. °गलिता° पु० ।

५८९. १. चक्षुषोः निपा० । २. मदनोपदुःखितानां पु० । ३. अभिमुखीपतन्त्यपायाः पु० । ४. विहित° पु० । ५. नृपतिरपि विदग्धः नि० चौ०; नृपतिरयमसङ्गीतां निपा० । ६. समविषम-कविश्रीत्रिविक्रमभट्टस्य कृतौ दमयन्तीकथायां विबुधजनमनोहारिण्यां हरचरणसरोजाङ्कः पु० । ७. ग्रन्थोऽपि समाप्तः नि०; नास्ति पु० । - ग्रन्थाग्रं २५०० पु ।

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# प्रथमो परिशिष्ट :

## नलचम्पूस्थश्लोकानामकारदिक्रमेणानुक्रमणिका ।


| उच्छ्वासा: मूलानि | श्लोकसंख्या: |
|---|---|
| ५ अंसस्रसिजलार्द्र. | ३७ |
| १ अक्षमालापवृत्तिज्ञा | ७ |
| २ अखण्डितप्रभावोऽथ | ३१ |
| १ अगाधान्त:परिस्पन्दम् | ३ |
| ७ अग्रस्थामिव चेतस: | १५ |
| ७ अङ्गा: कङ्ककलिङ्ग | ६ |
| १ अच्छाच्छै: शुकपिच्छ. | ४६ |
| १ अजनि जनित. | ५० |
| ६ अजनि रजनि: | ३५ |
| ४ अतिललिततरं | ५ |
| ३ अत्रान्तरे तरणि- | ३ |
| १ अत्रिजातस्य या | ९ |
| १ अथ कथमपि नाथं | ५१ |
| ३ अथनरपतिदत्ते | ८ |
| ३ अथविमलदुकूल. | २१ |
| ३ अद्य मे सुबहो: | १२ |
| ७ अद्यास्मत्कुलसंतति: | १ |
| ७ अनुगुणघटनेन | ५ |
| ५ अनुभवतु चिराय | २८ |
| २ अनेकधा य: किल | २० |
| ७ अन्त: केवल | ३९ |
| ७ अपसरति न चक्षुषो | ४९ |
| ६ अपसृताम्बुतरङ्गि. | ७४ |
| ५ अपहस्तितान्तराया. | ५६ |
| १ अप्रगल्भा: पदन्यासे | ६ |
| ३ अपि रेणुकृतक्रीडं | २७ |
| १ अब्जश्रीसुभगं | ५३ |
| ५ अभिलषति नाल. | ७ |
| ३ अमन्दानन्दनिष्यन्द. | २५ |
| ६ अयं हि प्रथमो राग: | ४६ |
| ६ अयि भवत कृतार्था: | ८० |
| उच्छ्वासा: मूलानि | श्लोकसंख्या: |
| ६ अरुणमणिकिरण. | ३९ |
| ४ अलंकृतनिशान्तेन | १२ |
| ५ अवतरति घृताची | ५१ |
| ५ अविरतमिदमम्भ: | ६१ |
| ४ अवृष्टिनष्टधूलोक | १३ |
| ५ असमहरिततीरं | ९ |
| १ अस्ति स्वर्गसम: | ५४ |
| १ अस्तु स्वस्ति समस्त. | ५५ |
| ४ अहीनां मालिकां | २९ |
| १ आकर्ण्य स्मरयौवराज्य. | ४० |
| १ आकार: स मनोहर: | ५८ |
| ७ आज्यं प्राज्यमभिन्न. | ११ |
| ७ आज्यप्राज्यपरान्न | १२ |
| ६ आनन्ददायिनस्ते. | ४२ |
| ५ आनन्दिसुन्दर. | १२ |
| ७ आ पूर्वापर. | ४ |
| ३ आबध्नत्परिवेष. | ३२ |
| ७ आ ब्रह्मावधि. | २ |
| ६ आरुह्यैता: शिखरि. | ६७ |
| ६ आवासा: कुसुमा. | ६१ |
| ५ आविर्भूतविषा. | १६ |
| ५ आसीत्पिण्डित. | ३९ |
| ७ असेतो: कपिकी. | ३ |
| ४ आस्यश्री: सन्निभे | १६ |


Jain Education International For Personal & Private Use Only www.jainelibrary.org

| उच्छ्वासा: मूलानि | श्लोकसंख्या: | उच्छ्वासा: मूलानि | श्लोकसंख्या: |
|---|---|---|---|
| ५ आहूतोदीच्यभूपेन | २४ | ६. उपरम रमषीया | ५४ |
| ५ आह्लादयन्ति मृदवो | ६८ | ४ उपरि परिमलान्धै: | २३ |
| २ आह्लादयन्ति सौख्याम्भ: | २४ | २ एकान्ते सेवते योगं | १८ |
| ७ इतश्चन्द्र: सान्द्रा. | ३२ | ५ एतस्या: करिकुम्भ. | ५९ |
| २ इति जनितमुदिन्दो: | ३९ | ६ एतस्या: सलिलाव. | १६ |
| ६ इति विविधमुदञ्च | ४७ | ४ एता: प्राप्य परोपकार. | २१ |
| ७ इति विविधवितर्का. | ५० | ४ एता: सान्द्रद्रुमतल. | ४ |
| ७ इतो मकरकेतन: | ३३ | ६ एतास्ता: परिपक्व. | ७१ |
| १ इत्थं काव्यकथा. | १५ | २ एषा मे हृदयं जीव. | २१ |
| ४ इदं गोदावर्या. | २५ | ५ एषा सा विन्ध्यमध्य. | ३५ |
| ४ इदं मन्दाकिन्या. | २४ | ४ कंदर्पस्य जगज्जैत्र. | १ |
| ३ इदं राज्यमियं | १३ | ५ क: करोति गुणवा. | १४ |
| १ इन्दो सौन्दर्य. | ५७ | ६ कदा किल भविष्य. | २१ |
| ५ इष्ट्वा क्रतुन्युग | ५४ | ७ कन्यामन्यानुरक्तां. | २६ |
